जगद्गुरु श्रीत्रिदण्डिग्रन्थमालायाः पञ्चत्रिंशत्तमपुष्पम्



सर्वेश्वरश्रीसीतारामाभ्यां नमः

जगद्गुरुश्रीरामानन्दाचार्य
रामप्रपन्नाचार्ययोगीन्द्रप्रणीता

तत्त्वत्रयसिद्धिः

पश्चिमाम्नायश्रीरामानन्दाचार्यपीठाधीश्वर
स्वामी रामेश्वरानन्दाचार्य
प्रणीत * **तत्त्वदीप** * सहिता

श्री डॉ. विद्यानिवास मिश्र कुलपति
सं.सं.वि.वि. .... महानुभावाय
जगद्गुरु श्रीरामानन्दाचार्यः तेन वाराणसी
समुपायनीकृतमिदम् दि. ७।५।९२

जगद्गुरु श्रीत्रिदण्डिग्रन्थमालायाः पञ्चत्रिंशत्तमपुष्पम्

सर्वेश्वरश्रीसीतारामाभ्यां नमः

जगद्गुरुश्रीरामानन्दाचार्य रामप्रपन्नाचार्ययोगीन्द्रप्रणीता

तत्त्वत्रयसिद्धिः

पश्चिमाम्नायश्रीरामानन्दाचार्यपीठाधीश्वर

स्वामी रामेश्वरानन्दाचार्य

प्रणीत * तत्त्वदीप * सहिता

प्रकाशकः
पश्चिमाम्नाय जगद्गुरु श्रीरामानन्दाचार्यपीठ
श्रीकोशलेन्द्रमठः
सरखेजरोड
पो० पालडी
जि० अहमदावाद ३८०००७

सम्पादकः
पश्चिमाम्नाय श्रीरामानन्दाचार्यपीठाधीश्वरः
स्वामी रामेश्वरानन्दाचार्यः

प्राप्तिस्थाने
१. आचार्यपीठ श्रीकोसलेन्द्रमठ
सरखेजरोड
पो० पालडी
अहमदाबाद ३८०००७

२. पश्चिमाम्नाय जगद्गुरु श्रीरामानन्दाचार्यपीठ–श्रीशेषमठ
मु० विश्रामद्वारका
पो० शींगडा
वाया बगवदर
पोरबन्दर (सौराष्ट्र)

गुरुपूर्णिमा

卐 विक्रमाब्दः 卐 श्रीरामानन्दाब्दः 卐
(२०४३ ६८६)

मुद्रकः 卐 श्रीआनन्दभाष्यमुद्रणालयम्
आचार्यपीठ श्रीकोसलेन्द्रमठ
पो० पालडी
अहमदावाद ३८०००७

सर्वेश्वर श्री सीतारामजी

जगद्गुरु श्री रामानन्दाचार्यपीठ
विश्रामद्वारका–श्रीशेषमठ पोरबन्दर–सौराष्ट्र

प्रथितभानुकुलाम्बुजभास्करं
जनकजाहृदयैकविभूषणम् ।
शिवविरिञ्चिनुताङ्घ्रिसरोरुहं
रघुपतिं सततं प्रणमाम्यहम् ॥

श्री रामानन्दसम्प्रदाय के ३९ वें आचार्य
जगद्विजयी महामहोपाध्याय
जगद्गुरु श्री रामानन्दाचार्य रघुवराचार्यजीवेदान्तकेसरी
ज. गु. श्री रामानन्दाचार्यपीठ–श्रीशेषमठ–शींगडा–सौराष्ट्र



चत्वारिंशैकहीने प्रथमरजतसिंहासने न्यस्तपादः
नानोपायैर्विशिष्टद्वयमधुररसं वर्षयन् शस्तवादः ।
संवादो यस्य हर्षं वितरति विदुषः संश्रुतः सिंहनादः
आचार्यस्तेजसाऽसौ जयति रघुवरो रामसेवासुधार्द्रः ।।


स्थूल चिदचिद्विशिष्ट ब्रह्म ॥ ३ ॥
श्रोत्र
त्वक्
चक्षु
रसना
घ्राण
वाक्
पाणि
पाद
उपस्थ
पायु
पञ्च ज्ञान इन्द्रिय
पञ्च कर्म इन्द्रिय
मन
चित्त अहंकार और बुद्धि
एकादश
राजस सात्विक का भी सहायक है और तामस का भी सहायक
सात्विक
राजस
तामस
सात्विक इन्द्रियों की उत्पत्ति में राजस सहायक है
महत्तत्व
अहंकार
महत्तत्व
प्रकृति
मिश्र
शुद्ध
शून्य
नित्य विभूति
अचित्
तामस तत्वों की उत्पत्ति में राजस सहायक है
पृथ्वी
गन्ध
जल
रस
तेज
रूप
वायु
स्पर्श
आकाश
शब्द
तन्मात्रा
निमेष काष्ठा कला मुहूर्त दिन पक्ष मास अयन वर्ष युग कल्प आदि
काल
दृप्त
आर्त
परमैकान्ती
एकान्ती
प्रपन्न
भक्त
भगवत् पर
देवान्तर पर
कैवल्य पर
मोक्ष पर
धर्म पर
अर्थ काम पर
बुभुक्षु
मुमुक्षु
भजन आदि साधन द्वारा मुक्त भक्त जन
हनुमान आदि
नित्य
मुक्त
बद्ध
चित्
सूक्ष्म चिदचिद्विशिष्ट ब्रह्म
ब्रह्म
पर
व्यूह
विभव
अन्तर्यामी
अर्चावतार
वासुदेव संकर्षण प्रद्युम्न अनिरुद्ध आदि
मत्स्य कूर्म वराह आदि
प्रत्येक शरीर में रहने वाले ईश्वर
पूजा के मूर्ति शालग्राम इत्यादि
परान्तर राम ब्रह्म
तत्त्व त्रय
1
2
3
4
5
6
7
8
9
10
11

श्री वैष्णव सिद्धान्त कल्पद्रुम ॥

यस्माद्विश्वमुदेति येन लभते संरक्षणं शाश्वतम् ॥ यस्मिन्नप्ययमेति यो हि सततं कारुण्य वारां निधिः
यः कल्याण गुणाकरोऽस्ति जगतः श्रेयः परम्प्रापक-स्तं ब्रह्मार्चित पाद पद्म युगलं रामाख्यमीशं नुमः

विषयसूची

१ मङ्गाचरणमद्द्वितीयत्वश्रुतेः पराभिमतार्थ दूषणञ्च १
२ सकलभेदप्रपञ्चस्यसत्वपक्षसमर्थनम् ८
३ तत्त्वमसिवाक्यस्यपरोभिमतब्रह्मात्मैकपरत्वेऽनुपपत्तिप्रदिपादनम् २२
४ परमतेसामानाधिकरण्यर्थाऽयोगवर्णनम् २५
५ परकीयसंविदेकत्वव्यबस्थानुवादप्रकरणम् २९
६ सम्विन्नानात्वोपपादनप्रकरणम् ३३
७ अविद्यायास्वरूपनिर्वचनीयत्वानुपपत्ति प्रकरणम् ३६
८ अविद्यायाआश्रयानुपपत्तिवर्णनप्रकरणम् ४४
९ अविद्याया एकानेकत्वदूषणम् ५१
१० एकविद्याविकल्पितैकजीववादानुवाद प्रकरणम ५२
११ एकाविद्याकल्पितैकजीववादनिरासप्रकरणम् ५३
१२ नानाविद्याकल्पितनानाजीववादनिरासः ६१
१३ सविशेषत्वोपपादनेनसंविदोनिर्विशेषनिरासः ६१
१४ प्रपञ्चसदसद्व्यतिरेकित्वरूपमिथ्यात्वनिरासः ६४
१५ सदद्वैतनिरासेनभेदप्रपञ्चस्यपारमार्थिकत्वसमर्थनम् ६८
१६ चिदद्वैतनिरासेनमित्यादियाथार्थसमर्थनम् ६९
१७ देहात्मवादे पूर्वपक्षः ७३
१८ देहात्मवाद खण्डनम् ९५
१९ इन्द्रियात्मवादः १०८
२० अन्तरिन्द्रियमन आत्मवादस्तत्खण्डनञ्च ११०
२१ मनःपदार्थनिरूपणंतस्यचेतनत्वखण्डनञ्च ११४
२२ प्राणात्मवादः ११९
२३ सम्विदात्मवादे क्षणिकात्मवादादिबुद्धानां पूर्वपक्षस्तत्समर्थनञ्च १२०
२४ नित्यविज्ञानात्मवादेन क्षणिकविज्ञानवादखण्डनम् १२९
२५ नित्यविज्ञानात्मवादीशांकरमतनिरासः १३२
२६ संविदोनित्यत्वनिरासः १४१
२७ ज्ञानस्याननुभूत्वाक्षेपनिरासः १४९
२८ ज्ञानस्यसर्वविधभेदराहित्यनिरासः १५२
२९ ज्ञानेमानसिद्धधर्माभावनिरासो नित्यत्वप्रदर्शनञ्च १५४
३० सिद्धिरूपसंविदाश्रयनिरूपणम् १६०
३१ पारमार्थिकसंविद्यहमर्थस्याध्यासनिरासः १६३
३२ ज्ञातुरहमर्थाद्विलक्षणसाक्षित्वनिराकरणम् १६६
३३ सत्त्वादीनां ज्ञातृत्त्वानुपपत्तिः १६९
३४ ज्ञप्तिमात्रस्वरूपात्मवादिसुरेश्वरमतनिरासः १७१
३५ अहङ्कारस्यात्माभिव्यञ्जकत्वनिरासः १७५
३६ स्वापेऽहमर्थस्यभानसमर्थनम् १८५
३७ आत्मनोमोक्षादौसर्वदाहंभावसमर्थनम् १८८
३८ ज्ञानात्मत्वसाधकाजडत्त्वहेतुदूषणम् १९८
३९ सुगताभिमतग्राह्यग्राहकप्रत्युद्धारनिराकरणम् २००
४० अद्वैताभिमतविकल्पप्रत्युद्धारनिराकरणम् २१०
४१ देहादिविलक्षणप्रत्यगात्मस्वरूपनिरूपणम् २१२
४२ शरीरादिविलक्षणात्मनआनुमानिकत्वनिरूपणम् २१५
४३ नैयायिकाभिमतात्मानुमाननिरासः २२६
४४ सांख्याभिमतात्मानुमाननिरूपणम् २२९
४५ सांख्याभिमतात्मानुमाननिरासः २३४
४६ शरीराद्यतिरिक्तविलक्षणात्मनः शाब्दैकप्रमाणत्वनिरूपणम २४१
४७ मीमांसकेनात्मनः प्रत्यक्षवेद्यत्वनिरूपणम् २४५
४८ आत्मप्रत्यक्षवेद्यत्वमितिमीमांसकमतनिरसनम २४६
४९ मीमांसकेनात्मनोमनसाग्राह्यत्वादिरूपेणाक्षेपः २४८
५० भाट्टाक्षेपोद्धारः २५०
५१ गुरुमुखेनात्मनोमानसप्रत्यक्षत्वानुमान दूषणम् २५८
५२ आत्मनोग्राह्यग्राहकभावविरोधप्रदर्शनम् २५९
५३ विरोधोद्धारः २६१

५४ प्रभाकरस्योद्धारप्रतिक्षेपः २६२
५५ भाट्टेनप्रभाकरमतदूषणम् २६४
५६ प्रभाकरेणपुनः स्वपक्षपतिस्थापनम् २६६
५७ प्रभाकरमतनिरासः २७३
५८ गुरुमतोपपादनम् २७४
५९ गुरुमतखण्डनम् २७५
६० सिद्धान्तिनात्मनः स्वप्रकाशत्वसमर्थनम् २७९
६१ आत्मधर्मज्ञानस्यनित्यत्वोपक्षेपः २८१
६२ धर्मभूतज्ञानस्यनित्यत्वस्थापनम् २८२
६३ ज्ञाननित्यत्वपक्षेज्ञानार्थसन्निकर्षानुपपत्तिः २८५
६४ ज्ञानस्यात्मविरलत्वविचारः २८६
६५ ज्ञानस्यात्मविरलत्वमतदूषणम् २८७
६६ नित्यसर्वगतज्ञानात्मवादनिराकरणम २८८
६७ ज्ञानस्यनित्यत्वप्रतिपादनेपूर्वपक्षोपक्रमः २९१
६८ धर्मभूतज्ञानस्यनित्यप्रतिपादनम् २९५
६९ ज्ञानस्यात्मस्वभावत्वप्रतिष्ठापनम् ३०१
७० ज्ञाननित्यत्वेप्रसक्ताक्षेपाणांपरिहारः ३०९
७१ निद्रायावृत्तिरूपत्वनिराकरणम् ३१४
७२ आत्मनोज्ञानस्वभावत्वनित्यत्वप्रकाशत्वसमर्थनम् ३१८
७३ प्रकाशपदार्थनिर्वचनेपूर्वपक्षः ३२१
७४ भाट्टप्राभाकराभिमतप्रकाशपदार्थेऽनुपपत्तिप्रदर्शनम् ३२३
७५ ज्ञानस्यार्थेनसहसन्निकर्षोपपादनम् ३३३
७६ आत्मधर्मरूपज्ञानस्यान्यत्रसंवन्धसमर्थनम् ३४०
७७ पुनःप्रभाकरेणस्वमतस्थापनम् ३४७
७८ प्रभाकरमतेदूषणप्रदर्शनम् ३४९
७९ प्रकाशशब्दस्यनिर्वचनलक्षणप्रतिपादनम ३४९
८० सत्यंज्ञानमित्याद्यानुगुण्येनात्मनःस्वप्रकाशत्वसमर्थनम् ३५५
८१ धर्मभूतज्ञानस्यसंशयाद्यावान्तरभेदोपपादननिर्वचनम् ३६६
८२ आत्मनिरूपणप्रमाणप्रकरणम् ३६९
८३ आत्मनः कालावच्छेदत्वकालसम्बन्धत्वनिर्वचनम् ३७०
८४ तत्रचार्वाकवौद्धमतपर्यालोचनम् ३७१
८५ वौद्धमतनिराकरणम् ३७३
८६ जैनमतमवलम्ब्यवौद्धमतनिराकरणम् ३८१
८७ जैनमतनिराकरणम् ३८४
८८ शंकरमतंपर्यालोच्यापाकरणम् ३८६
८९ संक्षेपेण मुक्तिसाधननिरूपणम् ३९५
९० ब्रह्मलक्षणसंक्षेपः ३९६
९१ ब्रह्मणिप्रमाणदर्शनपूर्वकसमन्वयप्रदर्शनम् ३९७
९२ विशिष्टाद्वैतशब्दगीमांसा ३९८
९३ ईश्वरसिद्धौपूर्वपक्षारम्भः ३९९
९४ योगिप्रत्यक्षमीश्वरसाक्षात्कारेऽसमर्थसाधनम् ४०१
९५ अनुमानेनेश्वरसाधनाशक्यत्वचर्चा ४०६
९६ सामान्यतोदृष्टानुमानेनेश्वरसिद्धिचर्चा ४०८
९७ मीमांसकेनसामान्यतोदृष्टानुमानावरोधचर्चा ४११
९८ एकचेतनाधीनत्वमात्रसाधननिराकरणम् ४१२
९९ सकर्तृकत्वानुमानस्यासिद्धसाधनत्वप्रतिपादनम् ४१३
१०० कार्यत्वहेतोरसिद्धिदोषोद्भावनप्रकरणम् ४१४
१०१ कार्यत्वहेतोर्विरोधप्रतिपादनम् ४१५
१०२ असिद्ध्यादिदोषपरिहारः ४१८
१०३ सकर्तृकत्वानुमानेदूषणपरिहारः ४१९
१०४ ईश्वरसाधककार्यत्वहेतोर्विरुद्धदोषपरिहारः ४२२
१०५ ईश्वरेसामान्यतोदृष्टानुमानस्यप्रामाण्यव्यवस्थापनम ४२८
१०६ परमेश्वरेऽप्यभिमतसाधकानुमानप्रदर्शनम् ४३१
१०७ विशिष्टाद्वैतमीमांसा पं० श्रीकेदारनाथ ओझा ४३३
१०८ अर्चिरादिमार्गविवेकः ज·गु. श्रीरामानन्दाचार्य रघुवराचार्यजी ४३९
१०९ प्रमाणदीपिका ज.गु.हर्यानन्दाचार्यजी ४४६

तत्त्वत्रयसिद्धिकर्तृणां जगद्गुरु श्रीरामानन्दाचार्याणां श्रीरामप्रपन्नाचार्ययोगीन्द्राणां

जीवनचक्रम्

१. त्रिप्रवरान्वितवशिष्ठगोत्रीयकान्यकुब्जब्राह्मणपरिवारे श्रीरामनवम्यां तिथौ शुभे १९४९ विक्रमाब्दे प्रातःकाले वाराणस्यामाविर्भावः ।

२. सुशोभने १९७८ विक्रमाब्दे उज्जयिन्यां महाकुम्भपर्वणि श्रीरामानन्दाचार्याणां श्रीशेषमठाधीश्वराणां जगद्गुरुश्रीरघुवराचार्यमहामहोपाध्यायानां पादप्रपन्नो भूत्वा विविधशास्त्राध्ययने योगसाधने च पारं गतवान् ।

३. दि० २०–११–१९५२ ख्रिष्टाब्दे सौराष्ट्रान्तर्गतविश्रामद्वारिकास्थे श्रीशेषमठे सुप्रसिद्ध श्रीरामानन्दाचार्यपीठे आचार्यत्वेनराज्याधिकारिभिरभिषिक्तः ।

४. दि० ५–४–१९६० खृष्टाब्दे पोरबन्दरराज्यश्रीसुदामापुर्यां विश्रामद्वारिकास्थशेषमठीयशाखाभूतं भव्यं श्रीजानकीमठं निर्मापितं कारयित्वा तत्र परब्रह्मणो भगवतः श्रीअवधविहारिणः प्रतिष्ठां पवित्रपर्वणि श्रीरामनवम्यां तिथौ कृतवान् ।

५. भारतीयोद्योगशालिनगराणां मध्ये प्रमुखतां गते श्रीअहमदाबादनगरे पूतसलिलायाः श्रीसाभ्रमत्यास्तटे विराजमानायां महर्षिश्रीमरीचितपोभूम्यां श्रीरामानन्दाचार्यपीठं भव्यं श्रीकोसलेन्द्रमठं निर्माप्य तत्र दि. २५–३–६१ खृष्टाब्दे पावनतमायां श्रीरामनवम्यां शुभतिथौ भगवतः श्रीसाकेतविहारिणः प्रतिष्ठां कारितवानष्टोत्तरशत श्रीरामार्चामहापूजापूर्वकं महतासमारोहेण । यस्मिनहमदाबादनगरस्थाः सर्वेस्थानधारिणस्तथान्यप्रदेशप्रान्तीयाश्चसम्मिलिता आसन् ।

६. दि० २८–९–६३ खृष्टाब्दे श्रीकोशलेन्द्रमठे श्रीरघुवररामानन्दवेदान्तमहाविद्यालयं स्थापितवान् । श्रीरामानन्ददर्शनस्य विश्वव्यापिप्रचाराय ।

७. दि० ४–४–७१ खृष्टाब्दे श्रीरामनवम्यां श्रीयोगेश्वरमहादेवो निकुम्भिलामर्दनः श्रीहनुमाँस्तथा श्रीसिद्धेश्वरो हनुमान् श्रीअम्बाजी श्रीपार्वती श्रीगणपतिस्तथा प्रस्थानत्रयानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्यादीन् प्रतिष्ठापयामास । पृथगेवभव्यशिखबन्धमंदिरं निर्माय ।

८. दि० १२–४–७३ खृष्टाब्दे श्रीरामनवम्यां श्रीरामानन्दसम्प्रदायीयविधिपूर्वकं त्रिदण्डं गृहीत्वा श्रीरामानन्दसम्प्रदायस्य लुप्तां त्रिदण्डग्रहणपरम्परां पुनः क्रान्तिदूतत्वेन प्रचारयामास ।

९. दि० ३–४–७४ खृष्टाब्दे नैपालादौ तीर्थयात्रार्थमगमत् । तदैव विजययात्राप्रसङ्गे दि० १७–४–७४ खृष्टाब्दे मोतीहारीमण्डले नैपालराजकीयप्रतिनिधितया श्री के. एस. प्रधानद्वारा जगद्गुरु श्रीरामानन्दाचार्यत्वेन सम्मानितः ।

१०. दि० २०–४–७४ खृष्टाब्दे श्रीवाल्मीकिअध्ययन संस्थाने श्रीत्रिभुवनविश्वविद्यालये समस्तैः पण्डितैः सम्मानितः ।

११. दि० २५–४–७४ खृष्टाब्दे वाराणसेयस्य श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यकुलपतेः पण्डितप्रवरश्रीबदरीनाथशुक्लस्याध्यक्षतायां काशीस्थैः पण्डितवर्यैर्नागरिकैश्च जगद्गुरुश्रीरामानन्दाचार्यत्वेन सुस्वागतमवाप तस्मिन्नेव दिने वाराणस्याः कर्णघण्टास्थश्रीरामानन्दपीठसंस्कृतमहाविद्यालयीयैः सच्छात्रैरध्यापकैः सम्मानितः ।

१२. दि० १२–१–७७ खृष्टाव्दे वाराणस्याः शंकुधारास्थले ‘आनन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यपीठस्य स्थापनां कृतवान् । तस्मिन्नेव दिने वाराणसेयविशिष्टविद्वत्परिषद्द्वारा साभिनन्दनपत्रं जगद्गुरुश्रीरामानन्दाचार्यत्वेन सम्मानितः । तस्यां सभायां पण्डितराजश्रीराजेश्वरशास्त्री पण्डितराज श्रीरघुनाथशर्मा पण्डित श्रीकेदारनाथ ओझा पण्डितराजश्रीकालीप्रसादमिश्रः पण्डितश्रीदेवस्वरूपमिश्रः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य मान्यवर्योपकुलपतिः पण्डितश्रीकरुणापतित्रिपाठी पण्डितश्रीरामपाण्डेयः प्रभृतिमहोदया आसन् ।

उक्तदिवस एव श्रीरामानन्दयुवकसंघस्य सम्मान्यमन्त्री महन्तश्रीरामविलासदासवेदान्ती श्रीमहावीरदासो वेदान्तीत्यादि श्रीरामानन्दीयमहानुभावैराचार्यपीठोपरिनूतनाभिषिक्तस्य जगद्गुरुश्रीरामानन्दाचार्ययोगीन्द्रस्य साभिनन्दनदलं सुस्वागतं विहितम् ।

१३. उक्ताः श्रीरामानन्दाचार्यजगद्गुरुश्रीरामप्रपन्नाचार्याः वर्त्तमानसमये काश्यामाचार्यपीठ निर्माणे संलग्ना वर्त्तन्ते । पीठनिर्माणकार्यं वेगेन प्रचाल्यते श्रीरामानन्दविद्यालयस्याचार्यपीठाङ्गभूतस्य तथा श्रीद्वारिकाधीशमन्दिरस्य जीर्णोद्धारतयातिविशालरङ्गमण्डपस्य निर्माणं जातं पीठेऽन्येऽपि त्रिशत्परिमिता प्रकोष्ठा निर्मिता अन्यनिर्माकार्यं वेगेन चलति ।

रामप्रपन्नयतिराजवरोऽवसाने संराजतेत्र धवले कमले पदेऽद्य ।
आचार्यभव्यचरितप्रथितो वरिष्ठः काशीसमेत्य विविधं तनुते सुकृत्यम् ।
अहह योगितवैवकथाधुना, दहतु संसृतिपापरसां मुदा ।
वहतु पावनगाङ्गवनं मतिः भवजरोगनिदाघनिवारिका ।
योगाश्रमं विविधतापहरं विचिन्त्य, रामप्रपन्नयतिराजवरो नवीनम् ।
संस्थाप्य रोगहरपुण्यसुधासभुद्रमाचार्यपीठभवरोगहरं विधत्ते ॥

आचार्यप्रवरप्रसादिताः कतिपयदिव्यप्रवन्धाः

१. सिद्धान्तदीपके किरणावली २. जागदीशी व्यधिकरणे दीपिका ३. वेदरहस्ये तात्पर्यदीपः ४. श्रीरघुवरीयवृत्तोर्विवरणम् ५. अध्यासध्वंसलेशे तात्पर्यचन्द्रिका ६. ब्रह्मसूत्रानन्दभाष्येभाष्यदीपः ७. वेदार्थचन्द्रिका ८. तत्त्वत्रयसिद्धिः ९. योगसूत्रविवरणम् १०. खण्डनोद्धारे दीपिका ११. न्याय दीपिका १२ श्वेताश्वतरोपनिषदि श्रीरामानन्दभाष्यम्–प्रभृतयः ।

तत्त्वदीपकर्तु–र्जीवनपरिचयः–आविर्भावः–१९८८ विक्रमसंवति. सौरवैशाखस्य २८ अष्टाविंशदिने जन्मस्थलम्–पूर्वनय(ने)पालप्रदेशः । मातापित्रोंर्नाम पुनः पितृगृहसम्पर्काऽऽशङ्कया गुप्तम् । शुक्लयजुर्वेदीयवाजसनेयशाखाध्यायित्रिप्रवरान्वितवसिष्ठगोत्रोत्पन्नः कान्याकुब्जब्राह्मणः । जन्मनाम–श्री······ उपाध्यायः । पितरः प्रथितातिशयकीर्त्तयः सर्वशास्त्रविषयविद्वांसः सुविदितभूमिपतयश्चेति लक्ष्म्यानुगृहीतत्वाद्गृहस्य स्थितेः सम्पन्नत्वेनेतस्ततः पर्यटनस्य लिप्साऽऽसीत् । सार्धवर्षवयस्येव मातुः साकेतधामगमनेन तत्र ज्येष्ठभ्रातृकर्तृकं सहृदयं संरक्षणमपि बाधकं नाभूत् । २००० विक्रमसंवति १२ द्वादशवर्षदेशीये अल्पीयसि वयसि देशान्तरं प्रयातुं पर्याप्तं धनं (द्रव्यं) गृहींत्वा गृहान्निरगमत् धनस्य समाप्तिं यावत् विराट नगरेमनीयारीक्षेत्रे पर्यट्य पुनर्गृहमगमत् । स्वर्णमयसमयसदुपयोगेनाध्ययनं कर्तुं पितृद्वारा शिक्षा । यात्रोयाः पुनरिच्छाऽभूत् पुनर्गृहान्निर्गमनम् । मध्यमज्येष्ठभ्रातुरकालसाकेतगमनेन नयपालस्य लघुकन्दरनालिकायां प्लवमानस्य यूनः शवञ्च दृष्ट्वा जीवनस्य क्षणभंगुरताया विचारः प्रादुरभूत् । ज्येष्ठभ्रातुस्नेहपाशबद्धस्तेनैव सह पुनर्गृहदिश्यागमनम् । पितृद्वारा पुन-

रुपदेशः। गृह एकस्य श्रीवैष्णवस्य नयपालीयस्य महात्मनः पादार्पणं सङ्गतिश्च । पुनर्यात्रेच्छाजागरणं गृहत्यागः सिक्किमे नगरे श्मशानपार्श्वे एकस्मिन् मन्दिरे पादार्पणम् । तत्र नित्यं मृतकानामन्त्येष्टिं दृष्ट्वा व्यरज्यत । धनाभावे पद्भ्यां वङ्ग—कामरूप (आसाम) भूटानप्रदेशपरिभ्रमणम् । प्रवासे सहृदयभ्रातुः स्मरणमभूत् । ततः स्वप्ने मेलनेच्छा । मामन्विष्य समागच्छता तेनैव सह वङ्गप्रदेशाद् गृहागमनम् । पितृद्वारा भर्त्सना । २००७ सम्बति नेपाले राज्योपप्लवेषण्मासं यावदभूतपूर्वशाहसेनोत्पीडितनिरीहजनानां सर्वविधा सेवा सम्पादिता । २००८ वि० संवति कार्तिकशुक्लप्रतिप्रदि सर्वतोभावेन गृहत्यागः । कामरूपप्रदेशस्य तेजपुरनगरे प्रारम्भिकमध्ययनम् । एके महात्मनाऽधीत्य योग्यीभवितुमनुमतिः । उचितोमनुमतिं स्वीकृत्यविशेषाध्ययनाय प्राचलदेकेनसतीर्थ्येन सह परं पूर्वसंस्कारसङ्गत्यासाकेतवाराणसीमथुरावृन्दावनहरिद्वारयमुनोत्तरीगङ्गोत्तरीकेदारवदरीनाथादितीर्थानि परिभ्रमन् ऋषिकेशनगरे (सन् १९५३—५४ ई०) आसीत्। एतस्मिनेवान्तरे प्रथमपरीक्षामदात्। ततः परावृत्य वृन्दावनमगमत् । तत्रैव प्रथमं विश्रामद्वारिकायोः संस्कृतशिक्षणविषये व्यवस्थामश्रृणोत् । ततः विश्रोमद्वारिकायाम् आगमनतिथिः १।७।५४ खीष्टाब्दे । श्रीरामानन्दाचार्यपीठाधीश्वर जगद्गुरु श्रीरामानन्दाचार्यं श्रीरामप्रपन्नाचार्यस्यास्मिन् नैसर्गिकः स्नेहः समजनि यत्पूर्वंऋणानुबन्धित्वादिति मन्यते । संसारतो विरागः तदसारताऽनुभबाज्जगद्गुरोः शरणं प्राप्नोत् । विधिवद्दीक्षा, दीक्षानाम—श्री रामेश्वरानन्दाचार्यः। दीक्षातिथिः १०—५—५६ खीष्टवर्षेगुरुवासरः । "गुरोराज्ञा गरीयसी" इतिमत्वाऽऽचार्यसेवापुरस्सराध्ययनानन्तरसाकेतवाराणस्योरध्ययनम् । पुनर्विश्रामद्वारिकाऽऽगगनम् । ५—४—६० खीष्टाब्दे श्रीजानकीमठेअवधविहारिणः प्रतिष्ठानन्तरं स्वाचार्येण सह श्रीकोशलेन्द्रमठेऽहमदाबादे २५-३-६१ ईसवीये श्रीसाकेतविहारिणः प्रतिष्ठा श्रीकोसलेन्द्रमठ एव श्रीरघुवररामानन्दवेदान्तमहाविद्यालस्य स्थापना । तत्तिथिः २८—९—६३ ख्रिष्टाब्दस्य विजयदशमी । महाविद्यालयस्याध्यक्षः प्रधानाचार्यो व्याकरणाचार्यः साहित्यरत्नं च १९६४ ख्रिष्टाब्देऽभवत् । सम्प्रदायदर्शनेऽभिरुचिः । श्रीरामानन्दवेदतान्र्ताचार्यः १९६७ ख्रिष्टवत्सरेऽभवत् । वाराणसेय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरीक्षाविभागेन सम्बन्धः सम्प्रदायस्यैतिहासिकगवेषणापरः, तथा श्रीरामानन्दवेदान्तविशिष्टाद्वैतसिद्धान्तप्रचाराय निर्मितायाः अखिलभारतवर्षीयश्रीरामानन्दवेदान्तप्रचारसमित्या वर्तमानो महामन्त्री । कतिभिरन्यसंस्थाभिरपि सम्बद्धः ।

जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्राः परम्परागताः स्वनिर्मिताश्च संस्था अस्मिन् करे निष्कण्टका इत्यनुभूयाचार्यपीठायाचार्यत्वेनावृण्वन् । परम्परयोत्तराधिकारप्राप्तिदिनांङ्कः ११—४—७३ चैत्रशुक्लश्रीरामनवमी । पूज्याचार्यचरणानां त्रिदण्डग्रहणानन्तरं श्रीविश्रामद्वारकास्थत्रिदण्डिसंस्थानश्रीरामानन्दाचार्यपींठस्य श्रृङ्गिपुरस्थशेषमठस्य सुदामपुरीस्थश्रीजानकीमठस्य तथान्यतत्सम्बद्धसंस्थोनस्य श्रीकोशलेन्द्रमठस्य च सर्वा व्यवस्था अस्य तत्त्वावधाने सन्ति । एतस्य प्रणीता व्याख्याताश्चप्रकाशिता प्रकाशिताः शतप्रमिता दिव्यप्रवन्धाः सन्ति ।

श्री रामानन्द सम्प्रदायके ४० वें आचार्य
जगद्गुरु श्री रामानन्दाचार्य रामप्रपन्नाचार्यजी योगीन्द्र
आचार्यपीठ * शंकुधारा * वाराणसी



श्रेष्ठैर्भक्तैः सुवित्तैरधिगतबलविद्याविधौ दानिधुर्यः
रक्तैस्त्वाचांशुवस्त्रैर्जगति विजयते आश्रमोयस्यतुर्यः ।
चत्वारिंशोऽतिदीप्तः कविवरसुवचोवर्णनाच्छादितार्यः
शुद्धो :रामप्रपन्नो मुनिजनचरितः कीर्तिताचार्यवर्यः ॥

भक्तिरामस्यरम्या भुवि विलसति यद् यत्नजाताऽभिरामा
भक्ता भीष्टाश्च कामाः सपदि सुफलदा यत्प्रयासाः फलन्ति ।
सोऽयं विज्ञस्तपस्वी लिखितगदिततत्त्वः सुराचार्यकल्पः
भावी स्वामी सुधांशुर्यतिसुभमणिरामेश्वराचार्य विद्वान् ॥



पश्चिमाम्नाय श्रीरामानन्दाचार्य पीठाधीश्वर

स्वामीरामेश्वरानन्दाचार्य

श्रीकोसलेन्द्रमठ,
पो. पालडी,
अहमदाबाद-७.

श्रीविश्रामद्वारका
श्रीशेषमठ-शींगडा,
पोरबन्दर

सर्वेश्वरश्रीसीतारामाभ्यां नमः
श्रीहनुमते नमः
प्रस्थानत्रयानन्दभाष्यकाराय नमोनमः

जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रप्रणीततत्त्वत्रयसिद्धौ

अथ सम्वित्सिद्धिः

राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम् ॥
सीताकान्तसमारंभां रामानन्दार्यमध्यमाम् ।
रघुवरार्यगुर्वन्तां वन्दे गुरुपरंपराम् ॥

"रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले" इत्यागमप्रामाण्यात्

॥ सर्वेश्वरश्रीरामोविजयतेतराम् ॥
श्रीहनुमते नमः
पश्चिमाम्नायश्रीरामानन्दाचार्यपीठाधीश्वरस्वामीरामेश्वरानन्दाचार्यप्रणीतः

तत्त्वदीपः

सीताकान्तसमारम्भां रामानन्दार्यमध्यमाम् ।
रामप्रपन्नगुर्वन्तां वन्दे गुरुपरम्पराम् ॥

"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणमिति" न्यायभाष्यम् ।" अर्थात् यदा चक्षुरादीनां स्वविषयेण सह संयोगादि संनिकर्षो जायते तदाऽयं घटः पटोवेत्यादिकं ज्ञानमुत्पद्यते। ततश्च ज्ञातघटाद्यानयनाय लोकः प्रवर्तते। ततश्च घटादि विषयप्राप्तौ सत्याम्, इयं मदीया घटादि प्रवृत्तिः सफला, समर्थप्रवृत्तित्वात् विषयान्तरसफलप्रवृत्तिवत्। इत्यनुमानेन प्रमाणजनित ज्ञानस्य सत्यत्वमवगत्य फलभूतज्ञानेन प्रमेयतत्वं व्यवस्थापयति। एतदुक्तं भवति. प्रमाणफल रूपस्य ज्ञानस्यैव प्रमेयतत्वव्यवस्थापकत्वमिति नियमः। एवं चैतादृशस्वरूपकस्य ज्ञानस्यस्वरूपं किमात्मकं लक्षणं च किमिति. जिज्ञासायां "लक्षणप्रमाणाभ्यामेव वस्तुनः सिद्धिरिति" पूर्वाचार्य वचनमनुसृत्य तादृशज्ञानस्य स्वरूपादिविशोधनमत्र संवित् सिद्धौ करिष्यते। तदाशयेनाह

“यदा यदाहि धर्मस्य ग्लानिर्भवति भारत !। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥” इति स्वोक्तिं संपुष्ट्यनधिप्रयागेऽवततार श्रीरामानन्दरूपेण स्वयंश्रीरामः, त्रयोदशशतोत्तरषट्पञ्चाशत्तमे वैक्रमाब्दे श्रीशुशीलादेवीकुक्षितः श्रीपुण्यसदनसद्मनि । वाराणसीस्थश्रीमठाध्यक्षजगद्गुरुश्रीराघवानन्दाचार्यचरणमाराध्यलब्धसाङ्गवेदवेदान्तविद्यास्तत एव प्राव्राज्यं स्वीचक्रुरितिविश्वविदितमेतदितिवृत्तमानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यचरणानाम् । इतरसमस्तकार्याणि सम्पाद्य मोक्षसाधनीभूततत्त्वसम्पादनाय स्वशिष्यान्यतमं जगद्गुरुश्रीसुरसुरानन्दाचार्यं निमित्तीकृत्य तत्त्वत्रयमुपदिदेश सर्वमुमुक्षुजीवोपकृतये, तत्र च प्रथमं तत्त्वम्—

“अथ संवित् सिद्धिरित्यादि ।” अथात्राथशब्दोमङ्गलार्थकः । **तदुक्तम्**

> **“ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।**
> **कण्ठं भित्वाविनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥” इति ।**

अथवा “अथ योगानुशासनम्” “अथ शब्दानुशासनमितिवत् प्रकृते आरंभार्थक एव योगानुशासननामकं शब्दानुशासननामकं शास्त्रमारभ्यते इत्यर्थवत् । लक्षणप्रमाणनिरूपणद्वारा संविदो निर्णयमित आरभ्यते प्रस्तूयते इति ।

अत्र प्रकरणे प्रायशोऽद्वैतमतस्यमायिकस्य यन्मतं तस्यैव निराकरणं करिष्यते । प्रसङ्गागतं किमप्यन्यदपि लेशत एव विचारयिष्यते आचार्येणेति । ननु केवलादैतवादिनः “सदेव सोम्येदमग्रे आसीदेकमेवाद्वितीयमित्युपश्रुत्य तत्र स्थूलसूक्ष्मसाधारणजड़चेतनात्मकसकलप्रपञ्चकारणभूतस्य “यतो वा इमानि भूतानि जायन्ते” इत्यादि श्रुतिप्रतिपादितकारणीभूतसत्पदवाच्यस्य सविशेषब्रह्मणोऽद्वितीयत्वश्रवणात् । “सत्यं ज्ञानमनन्तं ब्रह्मेति” ज्ञानमात्रत्वश्रवणादपि एकावधारणद्वैतप्रतिषेधकपदैः सजातीयविजातीयस्वगतभेदसामान्याभाववद् ब्रह्मैवचिन्मात्रस्वरूपं सत् परमार्थं कालत्रयेऽप्यबाध्यम् । एतद् भिन्नं सर्वं जगत् ब्रह्मण्येवाविद्ययाकल्पितं शुक्तिरजतादिवदेव परिकल्पितम् । तदुक्तम् “अक्षमा भवतः केयं साधकत्व प्रकल्पने । किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्” इति । “शुक्त्यवस्थात्ममोहोत्थारुप्यधीः शुक्तिसंभवा । कथ्यते मृदवस्थात्मजातोमृज्जो यथाघटः” इति च । तत्र यथा शुक्त्यवच्छिन्नचैतन्यनिष्ठाविद्याजातं रजतं रजतत्वं तदीयसम्बन्धादिककल्पितमिति. मिथ्या स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वम् ज्ञानसमानकालिकत्वरूपंवेति ते कथयन्तीति पूर्वपक्षमाकलय्य तद्दर्शयितुमुपक्रमते

"पृष्टानामेकमाद्यं त्रिकमपि श्रृणु तद्भेदतो नामभेदै
र्नित्याऽज्ञाऽचेतना सा प्रकृतिरविकृतिर्विश्वयोनिश्शुभैका ।
नानावर्णात्मिकाऽजात्रिगुणसुनिलयाऽव्यक्तशब्दाभिधेया
निर्व्यापारापरार्थामहदहमितिसूरुच्यते तत्त्वविद्भिः ॥१।६॥" इति ।

तदत्र छान्दोग्ये "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति वचनं तद्वचनं सच्चिदात्मकब्रह्मणोभिन्नस्य पदार्थस्य सद्भावं निराकृत्य तावन्मात्रं पदार्थ इति निवेदयतीति चेत्सत्यम्—

"छान्दोग्ये "सदेवसोम्येदमग्रे आसीत्" इत्यादि । हे सोम्यश्वेतकेतो ! इदं नामरूपाभ्यां परिदृश्यमानं जड़चेतनात्मकं जगत् अग्रे स्वोत्पत्तेः पूर्वम् सदेव सदात्माकं ब्रह्मरूपमेव ब्रह्म तादात्म्यकमविभज्यमानस्वरूपकमेवासीत् . तच्च सदात्मकं कारणम् तदा. एकं सजातीय भेदरहितम् एव स्वगतभेदशून्यम्. अद्वितीयं विजातीयभेदरहितं चासीत् । यथा कस्मिंश्चिदपि वृक्षे. स्वगतपत्रादिभिर्भेदः वृक्षान्तरात् सजातीयो भेदः शिलादितो विजातीयो भेदो भवतीति सर्वानुभवसिद्धम् . तथैव सजातीय विजातीय स्वगतभेदो ब्रह्मणि वस्तुत्वात् प्राप्तो भवतीति तादृशभेदनिराकरणं, श्रुतिश्च. ऐक्यावधारणद्वितीयप्रतिषेधकवाचोभिस्तादृशभेदानां निराकरणं करोतीति तदुक्तमभियुक्तैः—"वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः । वृक्षान्तरात्सजातीयो विजातीयः शिलादितः । तथा सद्वस्तुनो भेदत्रयं प्राप्तं निषिध्यते । ऐक्यावधारणद्वैतप्रतिषेधै स्त्रिभिः क्रमादिति ।

इत्येवं क्रमेण प्रश्नाशयः स्फोरितः । तत्राद्वितीये श्रुतेः केवलाद्वैताभिमतार्थप्रतिपादकत्वं न संभवतीति वर्णयितुं तन्मतमेव प्रदर्शितम् "एकमेवेत्यादि" "यत्तदोर्नित्य सम्बन्धः" इति नियमात् । यदित्यस्यानुषञ्जनम् । एकमेवाद्वितीयमिति यदुपनिषद्वचनं तदिति सम्बन्धः । अथवा तत्पदम् प्रसिद्धार्थावद्योतकम् । यथा "द्वयंगतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः । कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य च नेत्रकौमुदी" श्रीशिवः प्राप्तये पार्वत्यास्तपोऽवसानसमये शिवस्तस्याः कीदृशीश्रद्धेति जिज्ञासया तदुपरि प्रसन्नोभवस्तदन्तिकं ब्रह्मचारि रूपमास्थायगतस्ततस्तां चालयितुं प्रथमतः शिवस्य निन्दामेवाकरोत् । तत्प्रवाहे कथितं यत् हे उमे! शिवसमागमप्रार्थनया एतदुभयं लोके निन्दनीयतां गतम् एका तु कान्तिमतश्चन्द्रस्य सा कला या हि सर्वलोकप्रसिद्धाः द्वितीया च त्वम् । तत्र सा कलेति कथनात् चन्द्रमसः कान्तिमत्याः कलायाः सर्वलोकप्रसिद्धत्वंध्वनितमिति । तत्र यथा कलायाः सर्वलोकप्रसिद्धत्वमवोचदिति प्रसिद्धार्थकोपितच्छब्दः प्रकान्ताद्यर्थबोधकत्वे सत्यपि । तथैव प्रकृते तत्पदं प्रसिद्धार्थावद्योतकम् । एवञ्च ब्रह्मवाचकसत्पदविशेषणमद्वितीयपदं ब्रह्मभिन्नस्यासत्वबोधकमिति पूर्वपक्षकर्तृणामाशयोमानसः ॥

किमत्राद्वितीयोक्तौ कीदृशः समासः किं तत्पुरुषः किं वा बहुव्रीहिसमासो विवक्षितः ! तत्र नाद्यः यतः पूर्वस्मिन् कल्पे उत्तरपदार्थः प्रधानतया विवक्षितस्तद्ब्रह्मततोऽन्यत् तत्सदृशं तद्विरुद्धं वा । त्रिष्वपि तदन्यन्न बाधते । अन्यत्वे सदृशत्वेवा द्वितीयस्य सिद्धिरेव जायते । नतुबाधः । विरुद्धत्वे द्वितीयपदेन प्रथमं तृतीयं वा

तदिममद्वैतिमतकल्पितमतं निराकर्तुमद्वितीयपदे समासं विकल्पयति सिद्धान्तवादी "किमत्रा द्वितीयोक्तौ कीदृशः समासः" इत्यादि ।

अत्राद्वितीयोक्तावद्वितीयपदे, उत्तरपदार्थप्रधानकस्तत्पुरुषसमासोऽथवाऽन्यपदार्थप्रधानको बहुव्रीहिसमासः, राजपुरुषः गङ्गाभार्यवदिति. तत्र यदि अद्वितीयपदस्य तत्पुरुषसमास इष्यते तदा द्वितीयस्य बाधो नस्यात्तत्राह "पूर्वस्मिन् कल्पे" इत्यादि । अद्वितीयमित्यत्र न द्वितीयमद्वितीयमित्येवं तत्पुरुषे उत्तरपदार्थप्रधानके समासे स्वीक्रियमाणे तत्रोत्तरपदार्थः प्रधानरूपेण विवक्षितो भवति. यथा राज्ञः पुरुषोराजपुरुष इत्यत्रोत्तरपदार्थः पुरुषः स-चार्थगत्यागौणोपि शब्दवृत्त्याप्रधान एव । ततश्च राजपुरुषयोस्तादात्म्यबाधे पूर्वपदार्थराजपदस्य राजसम्बन्धिनि लक्षणा भवति. तस्य चाभेदेन पुरुषेऽन्वय इति राजसम्बन्ध्यभिन्नः पुरुषोऽमात्यादिर्बोधितो भवति उत्तरपदार्थप्रधानत्वात्तत्पुरुषसमासस्य ।

तत्र च न द्वितीयमित्यद्वितीयम् । नञ् तत्पुरुषसमासे चारोपितत्वस्य पूर्वपदार्थत्वं. तस्यचोत्तरपदार्थविशेषणत्वमेवेति वैयाकरणाः । आरोपश्च तद्भिन्नेतत्सदृशे वा भवति । तस्यैव फलित कथनं तदन्याद्यर्थेनञ्—इति । "नञिवयुक्तमन्यसदृशाधिकरणं तथाहमर्थगति" रिति च शाब्दिक परिभाषा । एवञ्चाद्वितीयपदेनारोपितद्वितीयत्ववद् ब्रह्मेति शाब्दबोधे. तत्र द्वितीयभिन्नत्वस्य द्वितीयसदृशत्वस्य द्वितीयविरुद्धत्वस्य वा प्रतीतिः फलति नैतद्भिन्नस्य । यतः समासान्तर्गतस्यनञ पदस्यार्थविशेषबोधकत्वस्यैव नियमात् । तदुक्तम्—

"तत्सादृश्यमभावत्वं तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥"

यथा "अनिक्षुः सरः" इत्यत्र सादृश्यमेवार्थो नञः । अघटंभूतलमित्यत्राभावोह्यर्थः । अघटः पट इत्यत्रान्योन्याभावोर्थः । अनुदराकन्या अलवणकं शाकमित्यत्र नञोऽल्पत्वमर्थस्तथाचेषल्लवणकं शाकमित्यर्थः । "अब्राह्मणोवार्धुपिक इत्यत्राप्रशस्तो ब्राह्मणः स इत्येवार्थः । असुरोरावणादिरित्यत्र विरोध एव नञर्थो नतु भेदादिरर्थस्तथा सति सुरभिन्नत्वस्य मनुष्यदेवादावपि सत्वेन मनुस्यादीनामप्यसुरत्वप्रसङ्गात्. तस्मादत्र नञर्थो विरोध एव । तथा च सर्वसमञ्जसं भवति । प्रकृतेऽद्वितीयमात्रयोग्यत्वात् त्रय एवार्थाविकल्पिताः । तत्रचार्थत्रयेपि ब्रह्मव्यतिरिक्तस्यार्थात् ब्रह्मभिन्नस्य

प्राप्नोति तद् ब्रह्मैव तद् द्वितीयेन विरुद्ध्यते । अतः स सर्वे प्रथमाः सर्वे तृतीयाद्यर्थ समुदाया द्वितीयेन स्पृष्टा अबाधिता एव स्वस्थातिष्ठन्ति । ननु नञा ब्रह्मभिन्नस्य सर्वस्यैवनिषेधोयतो द्वितीयपदस्य सर्वार्थोपलक्षकत्वात् इति चेन्मैवम्—

नैवं प्रकारेण ब्रह्मभिनस्य विनिषेधो युक्तः, यतोऽस्मात् , अद्वितीय पदात्

द्वितीयपदार्थस्य वाधो न संभवति । यतो द्वितीयपदार्थप्रतियोगिकस्य भेदस्य सादृश्यवोधने प्रति योगी विधया द्वितीयस्यसिद्धेः । एतदुक्तं भवति यथा चन्द्रवन्मुखमित्यत्रमुखानुयोगिकचन्द्रप्रति योगिकसादृश्यं विवक्षितमिति सादृश्यप्रतियोगितया चन्द्रस्यवोध इति न चन्द्रादिर्वोधितः किन्त्व· वाधितरूपेणैव तस्य प्रतीतेः । एवं भिन्न इति कथने कस्य भेदः कुत्रेति जिज्ञासायाम् प्रतिविधयासमुपस्थितः पटादिर्न स वाधितः किन्तु प्रमित एव अप्रमितस्य निषेधायोगात् । निषेधानुपपत्यैव प्रतियोगिनः सिद्धत्वात् ।

"लब्धरूपेक्वचित् किञ्चित् तादृगेव निषिध्यते । विधानमन्तरेणासौ न निषेध्यस्य संभवः ॥"

इति प्राचीनोक्तेः ।

अथैवमपि द्वितीयविरुद्धत्वे ब्रह्मणोवोधिते कथं नद्वितीयपदार्थस्य वाधस्तत्राह "विरुद्धत्वे" इति । अयंभावः द्वितीयत्वमत्रद्वित्वसंख्यापूरकमेव । द्वितीयविरुद्धत्वंच द्वितीयविरुद्धधर्मवत्त्वात् । स चधर्मः प्रथमत्वं नियमतः तृतीयत्वादिकत्वं वा एतावता द्वितीयस्य कस्यचिद् वाधो न भवति । तत्राह, "अतः स प्रथमाः सर्वे" इत्यादि द्वितीयेन द्वित्वसंख्यापूरकेग तथा स्पृष्टाः विरोधसम्बन्धेन सम्वद्ध्यस्वस्थाः स्वस्वप्रमाणाधीनसिद्धिकाः सन्तः, अद्वितीयत्वकथनेनापि अवाधिता एव प्रथमतृतीयादि पदार्थ समुदाया वर्तन्ते । प्रमाणाधीनसिद्धिकत्वादितिभावः ॥

पुनरत्र शङ्कते "ननु नञ्" इत्यादि । अयमाशयः प्रश्नकर्तुः "प्रकृते अद्वितीयमिति पदघटक द्वितीयपदं न मुख्यार्थस्य समर्पकम् । येन भवदुत्तरं समींचीनं भवेत् । किन्तु भेदार्थकद्वितीयपदं भेदप्रपञ्चस्य सर्वस्य लक्षकमेव । अर्थात् लाक्षणिकम् । ततश्च छत्रिणोयान्तीत्यत्रछत्रिपदं समुदायस्यबोधकं तथा प्रकृते द्वितीयपदं लाक्षणिकमेव । नञ् पदंच नभेदवोधकमपितु अत्यन्ताभावस्यज्ञापकम् । द्वितीयस्याभावोऽद्वितीयम् । अर्थाभावेऽव्ययीभावसमासः । एवञ्च भेद प्रपञ्चवाधो द्वितीयश्रुत्या भवतीति । अर्थादद्वितीयपदलक्ष्यस्य प्रपञ्चमात्रस्याभावेऽर्थतस्तेषां वाध एव ब्रह्मणि स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वादिति ॥

पूर्वप्रदर्शितं परिहरति "नैवं प्रकारेण ब्रह्म भिन्नस्येत्यादि ।" यत इति पदं हेत्वर्थकम् । यस्मात् कारणात् । "अस्मात्—अद्वितीय पदात् ब्रह्म समानाधिकरणात् ब्रह्मणो द्वितीयादि पदार्थतोभिन्नत्वं विरुद्धत्वं सदृशत्वमेव वोध्यते । नतु प्रपञ्चमात्रस्याभावंवोधितं भवति । तस्मादत्राद्वितीय

द्वितीयस्य कस्यचिन्निषेधो न ज्ञायते । यतोऽद्वितीयशब्दोब्रह्मभिन्नं ब्रह्मविरुद्धंतत्सदृशमेवार्थं कथयति नतु प्रपञ्चनिषेधं वक्ति । द्वितीयं यस्य नास्ति तद्ब्रह्मेतिपक्षे सत्यत्वादि ब्रह्मलक्षणानामपलक्षणत्वमापतेत् । अद्वितीये द्वितीयार्थमात्रस्य नास्तितामात्र विषयत्वे नञर्थभावस्य स्वप्रधानत्वात् । ब्रह्मपदे विशेषणविधयाऽन्वयोनस्यात् । तत्र द्वितीयशून्यत्वं ब्रह्म विशेषणं न संभवेत् । विशेषणे तद् ब्रह्म तृतीयं प्रथमं वा भवेद् ।

पदे नाव्ययीभावसमास इतिभावः । अपि च ब्रह्मभिन्नस्य सर्वस्य निषेधोऽनुपपन्न एव । तथा सति “सत्यं ज्ञानमित्यादि ब्रह्मलक्षणवाक्यानामसङ्गतिरेवस्यादित्याशयेनाह ‘द्वितीयं यस्य नास्ति तद्ब्रह्मेत्यादि ।’ यत्सम्बन्धिनोऽन्यस्य—यतोभिन्नस्य सर्वपदार्थस्याभावस्तदेवेत्यर्थकथने ब्रह्मात्मकलक्ष्यवृत्त्यसाधारणधर्मरूपसत्यत्वप्रसङ्गो यतोधर्मधर्मिणो भिन्नत्वेन लक्षणस्याप्यसत्वेन सत्यज्ञानादि लक्षणवाक्यमलक्षणमेवस्यादित्याशयः । अव्ययिभावस्य सत्पदेनान्वयोपि न स्यात् । तस्याव्ययत्वादित्याशयेनाह “अद्वितीये द्वितीयार्थमात्रस्येत्यादि” अद्वितीयेऽर्थात् “एकमेवा द्वितीयमिति श्रुतिघटकाद्वितीयपदे स्वनिष्ठत्वात् स्वप्रधानत्वात् स्वेतरपदार्थविशेषणत्वादित्यर्थ । ब्रह्मवाचकसदादिपदे विशेषणविधयाऽन्वयोनैव स्यात् । यतः सत्यादिकं ब्रह्मसमानाधिकरणं ब्रह्मविशेषणं नीलेनेवघटस्य । तस्मान्नैवापत्तिरत्र संभवति । तथा सतीष्टापत्तौवाक्यभेददोषप्रसंगात् ।

अथ लाघवादभावोऽधिकरणस्वरूपमेवान्यथा गौरवप्रसङ्गादेकस्याप्यभावस्यानेकरूपत्वादिति द्वितीयाभावो ब्रह्मरूपमेव ततस्तादृशाभावस्य ब्रह्मसामानाधिकरणत्वं घटते एवेति चेत्तत्राह “तत्र द्वितीयशून्यत्वमित्यादि” अर्थात् द्वितीयराहित्यं तादात्म्यसम्बन्धेन विशेषणं संभवति सदसतोस्तथा भावस्यादर्शनादनुपपन्नत्वाच्च ब्रह्म तु सत्पदार्थोऽभावस्तु न तथा । अथवा तुच्छः स इति परस्पर विरुद्धयोस्तयोस्तादात्म्यासंभवात् । नहि सतोऽसद्योगोऽसदात्मकत्वं वा नहि भवति प्रकाशतमसाः सम्बन्धस्तदात्मकत्वं वेति ।

ननु तर्हि घटाभाववज्जलमित्यादौ जलघटाभावयोः कः सम्बन्ध इति चेत् । घटाभावादेर्जलादौ स्वरूपसम्बन्धेनैव विशेषणत्वमिति । प्रौढ़िवादेन समाधत्ते “विशेषणत्वे तद्ब्रह्म” इत्यादि । यदि द्वैताभावो विशेषणमिति स्वीक्रियेत तदापि अद्वितीयस्य द्वितीयं यत् प्रतियोगि तत् प्रथम तदभावत्वं द्वितीयम् तृतीयं च ब्रह्मविशेषणम् । किं वा ब्रह्म प्रथमम् । द्वितीये प्रतियोगितद् द्वितीयम् तृतीयं तदभावत्वविशेषणमिति प्रथमत्वं तृतीयत्वं ब्रह्मण आवश्यकमेवेति भावः । एवमव्ययीभावपक्षे दोष उक्तः ॥

एतावता प्रकरणेन अद्वितीयपदे तत्पुरुषसमासपक्षे प्रपञ्चस्यबाधो न भवतीति प्रदर्श्य वहुव्रीहि समासोवेति द्वितीयकल्पेऽर्थात् वहुव्रीहि समासपक्षस्वीकारेपि दूषणं दर्शयितुमाह “बहु-

वहुव्रीहिसमासपक्षेपि अद्वितीयपदे तत्पुरुषवदेव व्रह्मणो ये प्रथमास्तृतीयादयाश्च ते सर्वे प्रसक्ता भवन्ति । व्रह्मप्रति अद्वितीयत्वादवाधिता एव भवन्ति । किञ्च बहुव्रीहि समासाश्रयणे कृते सतिवृत्त्यर्थस्यनञर्थस्य पदार्थान्तरेणान्वयो न स्यात् । सत्याद्यर्थान्तरसम्वन्धे एव षष्ठ्या प्रयोगो भवति । द्वितीयवस्तुनो नास्तित्वे न व्रह्म नवा

व्रीहि समास पक्षेपीत्यारभ्य प्रसक्ता भवन्तीति" ग्रन्थेन—वहुव्रीहि समासेप्यद्वितीयपदे तत्पुरुषसमासवदेवप्रथमतृतीयादि सर्वपदार्थसद्भावोऽनिवार्यः प्रसक्त एवेति तदेव दर्शयति "व्रह्मप्रत्यद्वितीयत्वादिति । नास्तिद्वितीयं यस्य तद् व्रह्मेत्यस्मिन् विग्रहः । व्रह्मनिष्ठद्वित्वसंख्यापूरकत्वं नास्तीत्यर्थः। एवञ्च व्रह्मण एव द्वितीयत्वं लभ्येत । ततश्चव्रह्मापेक्षया प्रथमस्य तृतीयादेर्वापदार्थस्याद्वितीयश्रुत्यावाधो भवतीति सिद्धम् । यत आद्यसंख्यापूरकत्वमेव प्रथमत्वम् । तृतीयादि संख्यापूरकत्वं च तृतीय त्वादीति । "व्रह्मप्रत्यद्वितीयत्वादिति—व्रह्मापेक्षया द्वितीयत्वाभावात् । तच्च व्रह्मापेक्षया तृतीयत्वाद्वा ते सर्वेपि पदार्था निराकुलाः सन्तोऽवतिष्ठन्ते नतु तेषां वाध इति ।

अथ वहुव्रीहिसमासघटकस्य द्वितीयपदस्य द्वित्वसंख्यापूरकत्वं । द्वित्वसंख्यायां च यत् पदवोध्यस्य व्रह्मणोनिष्ठत्वसम्बन्धेनान्वयो न स्वीक्रियते । येन प्रथमस्य तृतीयादेर्वा प्रसक्ति भवेत् ।

किन्तु द्वितीय पदं भिन्नपरकमर्थाद् भेदाश्रयपरकम् । भेदे च प्रतियोगिता संवन्धेनव्रह्मणोऽन्वयोऽर्थात् भेदव्रह्मप्रतियोगिकत्वस्यान्वयः । एवञ्च यतो व्रह्मणोभिन्नं नास्ति किञ्चित् तद्व्रह्मा द्वितीयमित्येवं क्रमेणाद्वितीयश्रुत्या द्वितीयपदार्थस्य वाधोलभ्यते एवेत्याशंकां दर्शयति "किञ्च बहुव्रीहि समासाश्रयणे कृते सतीति । वहुव्रीहिसमासश्चान्यपदार्थप्रधानकोभवति 'गंगाभार्यः' इति वत् । तथा च वहुव्रीहिवृत्तपदोपस्थापितद्वितीयाभावस्यान्यपदार्थव्रह्मविशेषणत्वमेव वक्तव्यं भवेत् । परन्तु तन्न घटते । यतो व्रह्मभिन्नसर्वस्य शून्यतायाम् द्वितीयाभावस्यापि शून्यत्वेन व्रह्म पदार्थविशेषणत्वायोगात् । नहि सदसतोर्विशेष्यविशेषणभावः क्वचिद् दृष्टः स भवेद्वेति । ननु वृत्यर्थस्य बहुव्रीह्यर्थस्य नञ् पदवाच्यस्य द्वितीयाभावस्य कुतो न पदार्थान्तरान्वयः ? तत्राह "सत्याद्यर्थान्तरसम्वन्धे" इत्यादि । यस्येति भेदार्थकषष्ठी प्रकृत्यर्थान्वितेऽर्थान्तरसम्वन्धे प्रामाणोपस्थापिते एव संगच्छते । देवदत्तस्य कम्बल इतिवत् । अत्र च निर्विशेषे च अर्थात् सर्वविशेषरहिते व्रह्मणि प्रकृत्यर्थे पदार्थान्तरसम्बन्धस्यासत्यत्वात् । षष्ठीवहुव्रीहिसमासः प्रकृते न घटते इतिभावः । ननु यथा देवदत्तस्य गृहमित्यादि प्रयोगदर्शनाद् भेदे षष्ठी विभक्तिरिति ज्ञायते । परन्तु नायमेकान्ततो नियमः क्वचिद् राहोः शिर इत्यादि प्रयोगादभेदेपि षष्ठी विभक्तिर्भवत्येव । एवञ्चाभेदार्थेपि षष्ठी विभक्तेर्दर्शनात् । यदभिन्नो द्वितीयाभावस्तदद्वितीयं व्रह्मेति कस्यचिद् विवक्षां प्रतिक्षेप्तुमाह "द्वितीयवस्तुनोनास्तित्वे इति । असतः सत् पदार्थभेदस्तद्विशेषगत्वमपि न घटते । सद सतोस्तथा भावादर्शनादित्यर्थः । प्रकरणार्थमुपसंहरति "तस्मादित्यादि" दूरत्वादिसर्वदोषरहित

विशेषणम् । असत्त्वान्नासद्ब्रह्मभवेन्नवा विशेषणं चापि भवेत् । तस्मात् ब्रह्मेतरप्रपञ्चसत्त्वंनाद्वैतश्रुति वाधितम् । अपितु साधक प्रमावलादेवसिद्ध्यति । स च श्रुत्याप्यनुमोदितः ।

इत्यद्वितीयत्वश्रुतेः पराभिमतार्थदूषणम्

तेनैकमेवाद्वितीयं ब्रह्मेतिश्रुतेः स्वसम्प्रदायानुसारेणार्थं वच्मि । द्वितीयगणनायोग्योनासीन्नास्ति समोवाऽभ्यधिको वा यस्य यः स एव द्वितीय पदेन गण्यते । यतोऽस्य ब्रह्मण इदं जगत् विभवव्यूहकलामात्रमेव तस्मात् कथंकोप्यस्य द्वितीयपदयोग्यतां प्राप्नुयात् ।

प्रत्यक्षप्रमाणसिद्धोऽथ च प्रपञ्चसत्यत्वप्रतिपादकश्रुतिभिरनुमोदितोऽर्थात् तया परमार्थतयाऽनुमोदितो भेदप्रपञ्चसद्भावो नाद्वितीयश्रुतिवाध्यः । प्रदर्शितप्रकारेणाद्वितीयश्रुतेर्ब्रह्मभिन्ननास्तिताप्रतिपादनेऽसामर्थ्यादित्यर्थः ।

॥ इत्यद्वितीयत्वश्रुतेः पराभिमतार्थदूषणनिरूपणप्रकरणस्य तत्त्वदीपः ॥

ननु यदि केवलाद्वैतिसंमतोऽर्थः "एकमेवाद्वितीय मित्यस्य न युक्तस्तदा कीदृशोऽर्थस्तादृशोऽर्थः सम्प्रादायानुमतो निर्दुष्टश्चेत्याशङ्कायामाह—"तेनैकमेवाद्वितीयमित्यादि ।" उक्त श्रुतेः पराभिमतार्थस्य युक्तिश्रुत्यन्तरादि विरोधेन तदन्यादृश एवार्थोऽस्माभिरुपन्यस्यते योर्थः श्रुत्यन्तरयुक्त्याद्यनुमोदितः सम्प्रदायानुमतश्च स एवार्थोऽस्माभिरुदाह्रियते इति भावः । सोऽर्थ उच्यते मयेति प्रतिज्ञातं प्रोच्यमानार्थस्यापूर्वत्वन्महदाश्चर्यावहत्वकं प्रख्यापनार्थमवधेयत्वार्थं च । तादृशमेवार्थं वक्तुमाह "द्वितीयगणनायोग्य इत्यादि ।

प्रथमतोजगन्निदानस्य भगवतो ब्रह्मणो गणनायां कृतायां तेन सह गणनायोग्यो द्वितीयः समानो वा तदधिको वा पदार्थोनाभूत नास्ति न भविष्यतिवेति कालत्रयेपि नास्तीत्यर्थः ।

अथानेक विलक्षणानन्तजड़चेतनात्मकसंसारे कथं ब्रह्मतुल्यस्य कस्यचिदप्यभावः स्यात् तादृशशंकायामाह, "यतोऽस्य—विभवव्यूह" इत्यादि । अस्य ब्रह्मणः सविशेषस्यानन्तमहाविभूतिमतो विभूतेरेकदेशांशमात्रत्वाच्चतुर्दशभुवनात्मकब्रह्माण्डकोटेरपि तदन्तर्गतस्योदुंवरफलोदरेविपरिवर्तमानंमशकवत् परिच्छिन्नस्वरूपस्वभावादिमतो लोकपालादेभवप्रजापत्यादेरपि न तेन तेन समत्वं प्रसज्यते इति द्वितीयपदवाच्यत्वयोग्यतामर्थात् ब्रह्मणासहगणनायोग्यत्वं कथं तत् जगत् प्राप्नुयादित्यर्थः । एवंच स्वसिद्धान्तेऽद्वितीयमितिपदस्य समासद्वयमपिसंभवतीति ध्वनितम् ॥

एवंच नञतत्पुरुषे ब्रह्मण एवाग्रगण्यत्वं स्थितम् । ततस्तस्य सर्वाधिकत्वसिद्धिः । ततश्चाधिकनिषेधः फलति । तथा चाद्वितीयमित्यत्रबहुव्रीहि समासेन च समनिषेधः फलितं ब्रह्मणः । मुक्तानामपिभोगमात्रे साम्यमिति न ब्रह्मणा सह गणनं मुख्यगणनप्रस्तावे युक्तम् । तन्मुख्यं वस्तु वस्तुना ब्रह्मैकमेवेति तस्य ब्रह्मणोऽद्वियत्वं प्रतितिष्ठतीति वोद्ध्यम् ।

यथा चोलनामको राजाऽद्वितीयो भुवि विद्यते इति कथने चोलनृपतिसमान नृपान्तरस्य निवारणमेव ज्ञायते नतु तदीयभृत्यपुत्रकलत्रादिनिवारणपरकं तद्वाक्यम् । तथैव दैत्यदानववसुनरब्रह्माण्डकोटयोऽस्य क्लेशकर्मविपाकाशयैरस्पृष्टस्य भगवतो रामचन्द्रस्य ज्ञानादिषड्गुणाकरस्य श्रीरामस्य विभूतिमहिमसमुद्रस्यविन्दुसमाना एवेति ॥

कः खलुपुमान् अंगुल्या सप्तसमुद्रान् गणयन् तदीयजलविन्दुराशिं गणयितुंशक्नुयात् । यथैव गगने एक एव सूर्यो न द्वितीयो विद्यते इति कथनेन सूर्यरश्मीनां निषे-

एवमद्वितीयश्रुतेःर्ब्रह्मणः समाभ्यधिकराहित्यप्रतिपादनपरत्वंव्यवस्थापितम् । तथा च श्रुत्यन्तरम् "न तस्य कार्यंकरणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते । परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानवलक्रियाचेति नत्वत्समश्चाभ्यधिकः कुतोऽन्योलोकत्रयोऽप्यप्रतिमप्रभावः" इति भगवद्गीतावचनानुसाराच्चायमेवार्थोऽद्वितीयमिति श्रुतिखण्डस्य कर्तुं युक्तो नत्वर्थान्तरकरणं युक्तमिति ।

अथ अद्वितीयमिति पदस्य समासान्तरनिषेधपरत्वे लौकिकप्रयोगमपिदृष्टान्तयति "यथाचोलनृपः" इत्यादि, यथाऽत्रचोलनृपस्याद्वितीयत्ववर्णनं राजातिरिक्ततदीयविभूत्यादेर्निषेधकं न भवति किन्तु एतत्सदृशनृपान्तरस्यैव निषेधवर्णनपरकमेव । तथैवाद्वितीयश्रुतिर्नब्रह्मणो विभूत्यादेर्निषेधवर्णनपरकमेवेत्याशयेनाह "तथैवदैत्यदानवसुरादि" इत्यादि याः सुरासुरनरादिकमलासनघटितब्रह्माण्ड कोटयस्ता ब्रह्मणोविभूत्यर्णवविशीर्यमाणजलकणिकायमानास्तदद्वितीयश्रुत्यावाधिता न भवन्तीति । उपनिषत् प्रतिपाद्यं परंतत्त्वं सर्वेश्वरश्रीरामचन्द्र एवेति "राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् । इत्याद्यथर्ववेदीयश्रीरामोपनिषदादिभिनिरूपितम् । विष्णुशब्दादिप्रयोगास्तु व्यापकत्वगुणविशिष्टत्वेनेतिगौणार्थाभिप्रायेणेतिध्येयम् ।

"अयनोनरवृन्दस्य तस्मान्नारायणोहि सः । सर्वत्र व्यापकत्वात्सविष्णुत्वेन प्रभाष्यते ॥
सर्वेषु वसतीत्यस्माद्वासुदेवतयोच्यते । निष्कर्षकेतरे शब्दाः शक्त्या रामस्य वाचकाः ॥
विश्वरूपस्य ते राम ? विश्वेशब्दाहिवाचकाः । स्कन्दस्येति वचस्तत्र प्रमाणं विद्यते खलु ॥"
(श्रौतप्रमेयचन्द्रिका ६/१८–१९–२०) इत्यादिरूपेणाचार्योक्तेः ।

ननु असमत्वेपि सहगणनास्वीकारे काक्षतिस्तत्राह "कः खलु पुनानित्यादि । तत्स्वरूपान्तःगंतस्य न गणना भवति तेन, तत्र दृष्टान्तोऽङ्गुल्यासप्तसमुद्रान्" इति, तथा तत्रैव "यथैव गगने एक एव सूर्य" इति दृष्टान्तोऽपि प्रदर्शितः ।

एवं घटादिगुणानां नीलपीतानां गुणिना घटादिना सह गणनायोगो न भवति, तत्र दृष्टान्त-

धो न भवति किन्तु सूर्यान्तरस्यैव यथा प्रधानसंख्येय संख़्यायाम् , संख़्येयात् पृथगपि संख्यानैवगण्यते संख्येयभिन्नपदार्थान्तरवदिति ।

तथा "पादोस्य सर्वाभूतानि त्रिपादस्यामृतंदिवि" एवं प्रतिपादयन्ती श्रुतिःसर्वजगतो ब्रह्मणोंऽशत्वमेव कथयति । एवं "एतावानस्य महिमाततोज़्यायांश्च पुरुषः । यत्रामाह "यथा प्रधानसंख्येयसंख्यायामिति" । पृथक् सती=संख्येयात् पार्थक्येन वर्तमानापि, अथवाऽपृथक् सती=संख्येयात् पार्थक्येनवर्तमानापि, अथवाऽपृथक्सती=अपृथक् सिद्धविशेषणरूपा संख्या । संख्येयान्यपदार्थवदितिवैधर्म्यदृष्टान्तः । यथा संख़्यावद्द्रव्यगणनायां संख़्येयद्रव्यभिन्नो गुणादिर्यथा गण्यते तथा तदीयगुणभूताद्वित्वादिका संख्या, तेन स्वाश्रितद्रव्येन सह नैव गणितोभवतीति। अथवा संख़्येयत्वेनाप्रस्तुतपदार्थान्तरवदित्यर्थः । एवञ्च साधर्म्यदृष्टान्तत्वमपि घटते एवेति ।

अथैतदुपयुक्तं तदैव संपत्स्येत, यदि ब्रह्मव्यतिरिक्ततदीयविभूतिषु किमपि प्रमाणं भवेत्, "प्रमेयसिद्धिः प्रमाणाद्धि" इति नियमात् । अन्यथा ब्रह्मविभूतेर्वर्णनं गगनकुसुमादितुल्यतामियादित्याशंका निवर्तयितुं प्रमाणशेखरमेव दर्शयति, "पादोऽस्य विश्वाभूतानि" इति । येन प्रकारेण जगतो ब्रह्मत्वं सिद्ध्येत् , तथैव ब्रह्मांशत्वं प्रतिपादयत्, श्रुत्यादिप्रमाणजातं सर्वं जगत ब्रह्माऽपृथक्सिद्ध प्रकारत्वेन्यवस्थापयत् । गुणत्वं चात्यन्तपारतन्त्र्यरूपम्, इत्थं भावपदवाच्यमपृथक् सिद्धप्रकारत्वस्वरूपमेव । इत्थं भाव इत्यनेन स्वरूपैकदेशत्वलक्षणमंशत्वं नैव भवति । किन्तु विशिष्टब्रह्म स्वरूपान्तर्गतप्रकारतैकरूपत्वलक्षणमेव ज़गतो ब्रह्मांशमितिव्यञ्जनयाऽभिव्यञ्ज़ितम् ।

ननु स्थूलसूक्ष्मसाधारणज़ड़चेतनात्मकस्य समस्तस्यापिज़गतो ब्रह्मस्वरूपैकदेशत्वमेव कुतो न भवतीत्याशङ्कायामाह, "एतावानस्यमहिमा ततोज्यायांश्च पुरुषः" इति । तत्र महिमेति पदेन समस्तस्यापि जगतो विभूतित्वं ब्रह्मणोऽतिशयवत्वकथनाद् ब्रह्मत्वं च । "ततोज्यायांश्च पुरुषः" इत्यनेन तु ब्रह्मणोजगदपेक्षया वैलक्षण्यं च ज्ञापितम् । तस्मात्प्रपञ्चस्य न ब्रह्मस्वरूपैकदेशत्वं जगतः यथामृत्तिकापरिणामरूपघटोदञ्चनशरावादेर्मृत्स्वरूपैकदेशत्वं न तथा प्रपञ्चस्य ब्रह्मस्वरूपैकदेशत्वमिति ।

तस्मात् अपृथक् सिद्धविशेषणत्वरूपेणैव विशिष्टैकवस्त्वेकदेशत्वस्वरूपमेव ब्रह्मांशत्वं ज़ड़चेतनप्रपञ्चस्याभिमतमित्यर्थः । "विंशिष्टस्यैकदेशोंऽशंस्तत्वविद्भिर्मतोयतः । प्रभाप्रभावतश्चांशः शक्ति शक्तिमतोयथा। देहिनो ब्रह्मणोश्चांशो देहो जीवस्तथैव हि । वैलक्षण्येऽपि चांशत्वं विशेषणविशेष्ययोः । देहिनो ब्रह्मणोभिन्नश्चांशो जीवस्तथैव हि ।" (श्रौतप्रमेयचन्द्रिका ५/३–५) इत्याचार्योक्तेः । प्रापञ्चिकपदार्थमात्रस्य ब्रह्मस्वरूपान्तर्गतत्वमेवात्र श्रुतिमुदाहरति "यत्रानान्यद्विजानातिनशृणोतीत्यादि"

न्यन्नविजानाति नशृणोति सभूमा, यदोदरमपि उदरं कुरुतेऽथतस्य भयं भवति। मेरोरिवाणुर्यस्येदं ब्रह्माण्डमखिलं जगत्'' इत्यादि पुराणवाक्यमपि सम्पूर्णस्य जगतस्तदित्थंभावपरकत्वमेवेति ॥

वाचारंभणमात्रं विकारजातं सकलं जगत्, सत्यंकूटस्थमात्रमेव मूलकारणम्, यत्रजड़्चेतनात्मकविशेषणविशिष्टैः सविशेषे परमात्मनि समीचीनतयाऽनुभूयमाने, तदन्यत् स्वतन्त्रवस्तुपरमेश्वरपार्थक्येन परिदृष्टं न भवति, यतः षदार्थमात्रस्य ब्रह्मण्येवान्तर्भावात्, जलेफेन बुद्बुधादिवत्, स एव भूमा सर्वव्यापकः श्रीरामपरमात्मेत्यर्थः। तस्मात् सर्वव्यापकः सर्वात्मापरम ब्रह्मपरमपुरुषो भगवान् सीतापतिरेव स एव च भूमपदवाच्यः, तदन्यः सर्वोप्यल्पक एवेति ज्ञापितं भवति।

स्वनिष्ठप्रपञ्चदर्शनन्निन्दया च ब्रह्मनिष्ठत्वमेव सर्वप्रपञ्चस्य ज्ञातं भवतीत्याशयेन श्रुत्यन्तरमपि प्रस्तौति "उदरमन्तरमिति" यदाह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्यभयं भवतीति। एतस्मिन् जड़्चेतनात्मके जगति, दरमल्पमपि, अन्तरालं ब्रह्मसम्बन्धविच्छेदलक्षणं जीवो यदा पश्यति विजानाति, तदैव तादृशज्ञानोत्तरसमकालमेवास्य विज़ानतो जीवस्य भयं संसारभयं समुपस्थितमेवाग्रे भवतीतिभावः। अद्वैतवादिनां प्रक्रिययेदृशार्थोऽत्रविवक्षितो भेदमिथ्यात्वं ज़गतो न सिद्ध्येत्तद्वाक्यत इति द्योतनाय। वस्तुतः स्वमतेन तु निष्ठाशब्दबोधितस्य ध्रुवानुस्मरणस्य पूर्ववाक्यप्राप्तस्याल्पसमयविच्छेदेपि संसारभयप्राप्तिरेवेति सिद्धान्तानुमोदितः पन्थाः पूर्वकथनं तु तुष्यतुदुर्जनन्यायानुगमेनेति भावः। परब्रह्मणो विभूत्येकदेशत्वे निखिलप्रपञ्चस्येति तत्र स्मृतिमपिप्रमाणमितिदर्शयति "मेरोरिवाणुर्यस्येदमित्यादि" यस्य ब्रह्मण एकदेशरूपं ब्रह्माण्डं सकलंजगत्, यथा मेरो महापर्वतस्याण्डस्तथैव, एते प्रमाणराशयो ब्रह्मापृथक् सिद्धप्रकारकत्वप्रतिपादनपरका एवेति बोद्धव्यमिति फलिताशयः॥

ननु "पादोऽस्य विश्वाभूतानीत्यादिकथितश्रुतिस्मृतिवचनेषु सकलप्रपञ्चस्य ब्रह्मविभूत्यादौ प्रतिपादनेपि तदन्यश्रौतस्मार्तवचनान्तरेषु, मूलकारणमात्रस्यैव सत्यत्वं तदन्यस्य सर्वस्य विकारजातस्यासत्यत्वमेव ज्ञाप्यते इति वचनान्तरानुरोधेन प्रपञ्चसमुदायस्य व्यावहारिकत्वंमन्तव्यमित्याशयेनाह "वाचारम्भणमात्रं विकारजातमित्यादि" सत्यं किन्तु वाचारम्भणेत्यादिवचनान्तरेष्वपि भेदप्रपञ्चस्य स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वरूपं मिथ्यात्वं न प्रतिपादितं भवति, किन्तु ब्रह्मात्मकत्वरूपेण भेदमात्रस्य सत्यत्वमेव प्राप्तं भवतीति भावः।

श्रौतकतिपयपदघटितं श्रौतार्थानुवादरूपमेव "वाचारम्भणमात्रमित्यादि" तत्तत्पदस्मारितानि श्रुतिवाक्यान्यत्र विवक्षितानि। वाचारम्भणमात्रं विकारोनामधेयं मृत्तिकेत्येव सत्यमिति छान्दोग्योप-

अनन्यत्कारणात् कार्यं पावकतदीयविस्फुलिङ्गवत्, मृत्तिकादिना दृष्टान्तेन प्रदर्शितम् । नाशकदग्धुमनलादिरित्यादिदृष्टान्तैः कारणशक्तेरनादरः । एकप्रधानविज्ञानादेव निषदः षष्ठप्रपाठके कथितम् । तत्र वाक् पदोत्तरं या तृतीया विभक्तिः सा प्रयोजनस्य कारणत्व विवक्षायाम्, तत्रारम्भणम्=आलम्भनम् गृहीतमित्यर्थः आलम्भः स्पर्शसिंहयोरितिवत् । आरभ्यते इत्यारम्भणं स्पृष्टमिति वा, नपुंसकैकशेषवद्भावौ । किं तत् विकारो नामधेयं च । किं तत् स्पृष्टं तत्राह—वेत्थ यथा सौम्यैकेन मृत्पिण्डेनेत्यादि पूर्वप्रक्रान्तोमृत्पिण्डः योग्यतया कर्तृत्वेनान्वयमेति । घटत्वाद्यवस्थालक्षणो विकारः तत्तदवस्थायोगप्रयुक्तं घटादिनाम च मृत्पिण्डेनैव वाक् पूर्वकव्यवहारोपपादनाय गृहीतमिति फलितं भवति । एवं सतिकारणद्रव्यस्योपादानभूतस्य सुवर्णमृत्तिकादिपदार्थस्यानेकावस्थाभाक्त्वेन नानाकार्यात्मकत्वात् कटककुण्डलघटशरावादिकार्याणांमृदादिकारणेनानन्यत्वं तदभावेतदभावरूपमित्याह मृत्तिकेत्येव सत्यमिति, कारणद्रव्यमेव सत्य·मित्यर्थः ।

अत्र सर्वं मृण्मयं सुवर्णमथं वा विशेष्यम् । "मृत्तिकेत्येव" इत्यत्र इति पदं प्रकारवाचकम् । ततश्च सर्वं मृण्मयं लोहमयं वा व्यापकधर्मेण मृत्तिकात्वादिप्रकारेणैव प्रमाणविषयतां भवति, नतु मृदनात्मकत्वेनेत्यर्थः । एतेन कणादसंमतः कार्यकारणयोरुपादानोपादेययोऽर्थात् समवायिकारणकार्ययोर्गवाश्ववदत्यन्तभेदो निराकृतः ।

यतः, एकविज्ञानेन सर्वविज्ञानमिति श्रौतप्रतिज्ञायाः समुपपादनार्थमेव "वाचारम्भण वाक्यस्य प्रवृत्तत्वात्, अस्य वाक्यस्य यथा सोम्येकेनेत्यादिकस्योपादानोपादेययोरनन्यते एवतात्पर्यमिति कथितम् नतु कार्यमात्रस्य मिथ्यात्वे तात्पर्यम्, तथा सति ज्ञातव्यत्वेनाभिमतस्य प्रपञ्च·स्याभावादेव सर्वं ज्ञातं स्यादिति कथनं सर्वथैव निरर्थकं स्यात्, वाग् व्यवहारस्य व्यवहर्तव्यमन्तरेण सर्वथैवासंभवादिति ।

"वाचारम्णं विकारः" इत्यस्याद्वैताभिमतस्य समस्तपदत्वे "वागारम्भणमिति भवेत्, नतु वाचारम्भणमिति । वाचारम्भणमिति शद्बस्य पराभिमतं मिथ्यार्थकत्वं चात्यन्तमेवाप्रसिद्धमिति ज्ञातव्यम् । तस्मात् श्रौतसिद्धान्तानुकूल एवार्थो ग्राह्यः कृतश्चेति ।

"तत्सत्यं स आत्मा श्वेतकेतो" इतिवाक्यस्यार्थतोऽनुवादः कृतः "कूटस्थम्" इत्यनेन । उपादानकारणत्वेपि ब्रह्मणो निर्विकारत्वकूटस्थपदेन कथितम्, घटादिकार्यस्थलेषु सर्वत्रोपादानकारणलोहसुवर्णादीनां विकारवत्वस्यैव दर्शनात् ।

तद्ब्रह्मसत् सत्यम्=सततमनवरतं सत्यरूपमेव, "असन्नेव स भवति, असद्ब्रह्मेति वेदचेत् । सद्ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुत्यन्तरात्तस्य सदैकरूपत्वव्यवस्थितेरिति । ननु

सर्वं विज्ञातं भवतीत्येकविज्ञानेत्यादिश्रुत्यभिप्रायः, तेन चिदचिन्मयः प्रपञ्चो ब्रह्मात्मनैवात्मलाभः । इति न भवति ब्रह्मविभूतेर्निषेधः । यतस्तन्निषेधे सर्वंमिथ्यात्वात् लोक

ब्रह्मणो निर्विकारत्वे कथं तस्योपादानत्वम्, उपादानस्य सविकारत्वात् ? इति चेत् सर्वजडचेतन शरीरकत्वात्तस्य, सूक्ष्मचिदचिद्विशिष्टत्वेनोपादानत्वं ब्रह्मण उपपद्यते एवेति गृहाण "तस्मिंल्लीनं जगज्जातं ततस्तस्मिंश्च संस्थितम् । रामस्य परिणामोहि चिदचिद्द्वारको जगत् ॥" "स्वरूपे च स्वाभावे च विकारः प्रकृतेः खलु । स्वभाव एव जीवस्य विकारः स्वीकृतो बुधैः । ब्रह्मणस्तु विकारो यन्नस्वरूपस्वभावयोः ॥" इत्याद्युक्तेः । सोयं प्रपञ्चब्रह्मणोः शरीरात्मभावः "सदायतनाः" "ऐतदात्म्यमिदं सर्वम्" इत्यत्र विशेषतो निर्दिष्टम् ॥ नचैवं स्वरूपपरिणामे ब्रह्मणो मृण्मयदृष्टान्तासङ्गतिरितिवाच्यम्, कार्यकारणयोर्मृदादिघटशरावादिकयोरनन्यस्वीकारेणैव श्रुतिदृष्टान्तस्य सुसंगतत्वात् । ननु जड़चेतनजगतो ब्रह्मणा सहानन्यत्वं कथं स्यादिति चेन्न प्रपञ्चमात्रस्य ब्रह्मात्मकत्वेन ब्रह्मरूपत्वेन तयोरनन्यत्वोपपादनसंभवात् ।

एतदेव प्रामाणिकम्, तत एव श्रुतावुच्यते "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" इति वाक्येन, एकवाक्यतयान्वयात् । मृदादिदृष्टान्तवाक्यानुकूलश्चायमेवार्थो भवति । समानप्रकरणेषु कार्यकारणयोरैक्यस्यैव प्रतिपादनात् कारणस्य सत्यत्वं कार्यस्य च मिथ्यात्वं न वाचारंभण श्रुतेरर्थः किन्तु कार्यस्य कारणात्मकतैवेति दर्शयितुमाह "अनन्यत् कार्यं कारणादिति ।" पावकादग्नेर्व्युच्चरितानां विस्फुलिङ्गानां वन्ह्यंशत्वेनानन्यत्वमात्यन्तिकोऽभेदस्तथैव परिदृश्यमानस्योद्भूतस्थूलजगतोपि परब्रह्मांशभूतस्य ब्रह्मणाऽनन्यमेव विवक्षितं दृष्टान्तवोधेषु । तदिदमनन्यत्वं कार्यकारणयोः । सुवर्णमृत्तिकालोहदृष्टान्तेषु विविच्यप्रदर्शितम् ॥ कार्यं कारणात्मकमेव भवति नतु ततो व्यतिरिक्तमत्र युक्तिः प्रदर्शिता—तत्र तथा उपक्रमोपसंहारावभ्याशोऽपूर्वताफलमित्यादिना तात्पर्यनिर्णायकत्वं युक्त्यादेस्तथैवार्थवादस्यापि तथात्वमितिदर्शयितुं केनोपनिषदन्तर्गताख्यानकं स्मारयति "नाशकद्दग्धुमनलादिरिति ।" वह्निर्वायुर्वा परमेश्वराज्ञां विना तृणादिकमपि नदग्धुं शशाक. देवराजस्तु स्वरूपत एव दूरापेत इत्यादिकथानकमर्थवादात्मकं तत एव ज्ञातव्यमितिकार्यकारणयोरनन्यत्वमेवेति ज्ञातव्यम् ।

ननु "उततमादेशमप्राक्ष्योयेनाश्रुतमपि श्रुतं भवत्यमतमपि मतं भवति" इत्यादिना, एक विज्ञानेन सर्वविज्ञानं प्रतिज्ञानं सेयमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, केवलब्रह्मणः पारमार्थिकत्वे एव घटते, नतु ब्रह्मतदीयकार्याणां तदन्येषां पारमार्थिकत्वे कथमपि घटते, तस्मात् आकाशादिप्रपञ्चस्य सर्वस्याप्यनिच्छयाप्यपारमार्थिकत्वमेव मन्तव्यमित्याशङ्कां निराकर्तुमाह "एक प्रधानविज्ञानेत्यादि" परब्रह्मणः सकलजगतोऽन्तरात्मतया, समस्तजगत् प्रधानत्वेन सर्वस्या-

शास्त्रव्यवहारविलोप आत्मज्ञानस्यापि तथात्वप्रसङ्गात्, व्यावहारिकसत्यत्वेन समाधानं प्रागेव दूषितम् ॥ अत औपनिषदात्मविज्ञानेन जगन्नबाध्यते ब्रह्मविभूतित्वादेव ।

काशादित आरभ्यविज्ञानपर्यन्तजगतो ब्रह्मशरीरत्वेन तत्प्रकारतैकस्वरूपतया, तादृशपरब्रह्मणि ज्ञानं सति प्रत्यक्षसमानाकारकस्मरणेन विषयीकृते सति, ब्रह्मान्तर्गतं किमपिवस्तु ज्ञातव्यं मुख्यं न।वशिष्टं भवतीति, एकप्रधानब्रह्मणि ज्ञाते सर्वविज्ञानमुपपद्येत एवेति एक विज्ञानेन सर्वविज्ञान प्रतिज्ञा वाक्यस्यायमेवार्थोनान्यादृश इति निष्कण्टकः सिद्धान्तमार्गः । तदत्रानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्यमहाभागाः—"तदयंनिर्गलितोऽर्थः, इदं प्रत्यक्षादिप्रमाणेन परिदृश्यमानं जगद्विभक्तनामरूपं बहुत्वावस्थं सृष्टेः पूर्वं निमित्तान्तररहितमविभक्तनामरूपतया एकं सच्छब्दशब्दितं ब्रह्मलक्षणमेवाभवदिति । यद्यपि जगदिदानीमपि सदेव पूर्वमपिसदेव तथापि सृष्टेरनन्तरं विभक्तनामरूपतयासत् उत्पत्तेः पूर्वं तु अविभक्तनामरूपतया सत्वमेतावानेवविशेषः । ये तु एकमेवाद्वितीयमिति वेदवाक्यं जगतोमिथ्यात्वे प्रमापयन्ति ते भ्रान्ता यतो यदि एकमेवेत्यादिवाक्यं मिथ्यात्वमवबोधयेत्तदा सदेव सोम्येदमग्रे आसीदिति वाक्यघटककालप्रापकाग्रपदेन तथा तदैक्षतनामरूपे व्याकरवाणीति· ईक्षणनामरूपप्रतिपादकोत्तरवाक्येन विरोधप्रसङ्गादिति" इति ।

यथोक्तरूपार्थप्रतिपादनपरकैः श्रुतिवाक्यैस्तथा श्रुतिमूलकवेदार्थोपबृहणगीतादिस्मृतिवचनैश्च ब्रह्मात्मकत्वेन लब्धब्रह्मस्वरूपः सर्वोपि प्रपञ्च इत्येव ज्ञाप्यते । नतु ब्रह्मणो विभूतिरूपः प्रपञ्चः कदापि निषिध्यते । ब्रह्मात्मनाऽत्मलाभः प्रपञ्च इत्यत्रात्मनो लाभो यस्येति बहुव्रीहिसमासः तेन ब्रह्माभिन्नान्तरात्मना प्रयोज्यस्वरूपलाभवान् । अथवा ब्रह्मात्मलाभोऽयं प्रपञ्च इति समस्त पाठः । तत्र आत्मनो लाभ आत्मलाभः । आत्मलाभ इति तदीयं स्वरूपसत्त्वम्, ततश्च ब्रह्मात्मतया=ब्रह्मात्मकत्वेनात्मलाभो यस्येति बहुव्रीहिरेव । ब्रह्मात्मकत्वाधीनस्वरूपसत्तावानित्यर्थः । इति प्रतीयते तत्वतो ज्ञायते । एतावता ब्रह्मविभूतिरूपस्य जगतो न निषेधः कृतोऽपितु साधित एवेति । ननु "अतोऽन्यदार्तमित्यादि" श्रुत्या प्रपञ्चनिषेधस्य दर्शनेन, तादृशनिषेधस्यान्यथानुपपन्नत्वादपिनिषेधपरकत्वादपिनिषेधपरकतयावापातातः प्रतिपन्नानाम् "अतोन्यदार्तमित्यादि" आगमवाक्यनामन्यत्रैव तात्पर्यं कल्पनीयमित्याशयवानाह "तन्निषेधे" इत्यादि । अर्थादागम वाक्यात् प्रपञ्चनिषेधे विवक्षिते, तत्तदर्थप्रतिपादनहानोपादानाद्यर्थकाः सर्वेव्यवहारा लौकिकाः शास्त्रीयाश्चदत्ततिलाञ्जलयोऽप्रामाणिका भवेयुः सर्वपदार्थस्य मिथ्यात्वात् ।

ननु यथा स्वाप्निकाः सर्वे व्यवहारा परिदृश्यमाना अपि तत्काले तथापि प्रबोधे तेषामप्रामाणिकत्वं सर्वसंमतम्, तथैव सर्वभेदव्यवहाराणामप्रामाणिकत्वमिष्टमेव तत्राह—"आत्मज्ञानस्या" पीत्यादि । अयमर्थः ब्रह्मभिन्नपदार्थमात्रस्य मिथ्यात्वे "श्रोतव्यः" इत्यादिवाक्यजन्यान्तः करण

वृत्त्यात्मकब्रह्मज्ञानस्यापि मिथ्यात्वमापतेत्, असत्यकारणजन्यत्वादसत्यत्वमसत्यविपयत्वं च भवेदौपनिषद् ब्रह्मधिय इति । तथा च निरर्थको ब्रह्मविचारो भवन्मतेऽपीति भावः ।

अथ पारमार्थिक दृष्ट्या ब्रह्मभिन्नस्य सर्वस्य मिथ्यात्वेपि, परन्तु ब्रह्मज्ञानात् पूर्वं व्यवहार काले ब्रह्माज्ञानवलात्, प्रमाणप्रमेयव्यवहारोपास्योपासकादिसर्वोपि व्यवहारो यथायथं निर्वाह्यते एवेति चेत्तत्राह, "व्यावहारिकसत्यत्वे" इत्यादि । अयमाशयः व्यावहारिककारणेन लौकिके न वा, व्यावहारिकमेव कार्यं साधितं स्यात्, लौकिको घटादिर्वैदिकं स्वर्गादिश्च । मोक्षस्तु न लौकिकः कार्य इति तन्निष्पादनं कथं केनवास्यादिति । एतदुक्तं भवति व्यावहारिकसत्ताया प्रमाण प्रमेयादिव्यवहारस्य समर्थने ब्रह्मज्ञानाय व्यावदारिकस्यकस्यस्यात् प्रमाणस्याभावात्, श्रुत्यादि प्रमाणजनिताऽन्तःकरणवृत्तिरूपा परब्रह्मज्ञानमपि भवदभिमतं व्यावहारिकार्यमात्रविपयकमेव भवेत्, ततश्च निर्विशेषब्रह्ममात्रपारमार्थिकत्वस्यापि व्यावहारिकप्रमाणाधीनत्वमेवापतेत् । तथा च ब्रह्मपारमार्थिकत्वमपि पारमार्थिकसाधकाभावान्नोदीयात् । एवञ्च भवन्मते मोक्षाशा, आशामोदकादिसमानैवस्यादिति न मोक्षात्मिकेष्टसिद्धिरिति । नचान्तःकरणजन्यवृत्तिज्ञानस्याविद्यकत्वेन, व्यावहारिकाविद्यायास्तादृशकारणेन विनाशात्, ब्रह्मप्राप्तिरूपो मोक्षः स्यादेवेति वाच्यम्, तथापि तत्त्वज्ञानजनिताविद्याध्वंसस्य विनाशकाभावेनाविनाशात्, अविद्याध्वंसरूप द्वितीयस्य सर्वदाऽवस्थानेन द्वितीयस्य तस्य सत्वेनाद्वितीयब्रह्मप्राप्तिरूपमोक्षस्यासंभवात् । "अविद्यास्तमयो मोक्षः साच बन्ध उदाहृतः" इतित्वत्पक्षपातिनामुद्गारात् । अविद्या च द्विविधा स्थूलरूपा संस्कारादिसूक्ष्मरूपा च, ततश्च तत्वज्ञानेनोभयोर्विनाशेपि तत्त्वज्ञानस्य तज्जनिताविद्या विनाशस्य च नाशकान्तराभावेन सर्वथा अविद्याया विनाशाभावेन तदभावरूपमोक्षाभावादिति ।

अद्वैतश्रुतिजनितब्रह्मविषयकनिश्चयेन प्रपञ्चवाधो न भवतीति प्रदर्श्य, तदेतत्प्रकरणमुपसंहर्तुमाह "अतऔपनिषद्" इत्यादि । यत् इदं जगत् सविशेषस्य ब्रह्मणो विभूतिरूपमर्थात् जगद् ब्रह्मणोः प्रकारप्रकारिभावः तस्मात् कारणात् ब्रह्माद्वैतनिश्चयेन जगतो वाधो न भवति, विभूतिसहितस्यैव ब्रह्मणोऽद्वितीयनिश्चयस्योपनिषद्वाक्यसिद्धत्वात् । तथाऽवाधितप्रतीति सिद्धत्वात् । अर्थात् यथा मन्दान्धकारे सादृश्यादिदर्शनसमुद्बोधितरजतसंस्कारसहितशुक्त्य ज्ञानेन शुक्तिकायां जायमानरजतस्य, यथा वा रज़्जौ जायमानसर्पभ्रमस्य शुक्तित्वरज्जुत्वादिज्ञानोत्तरकालेनेदं रजतं सर्पो वा वाध्यते, न तथा ब्रह्मविभूतेर्वाधकं किंचिदुपलभ्यते इति वाघकाभावान्न वाधः किन्तु घटवति बाधकाभावान्न भवति घटस्य बाधस्तथैवेहापि ब्रह्मविभूतिरूपजगतो बाधो न भवतीति संक्षेपः । इति प्रपञ्चस्य ब्रह्मविभूतित्वस्थापनपूर्वकाद्वितीयश्रुत्यर्थवर्णन प्रकरणस्य तत्त्वदीपः ॥

ननु प्रपञ्चस्य सत्यत्वं नास्तीति प्रतीतिविषयत्वं कथमुपपद्यते ? असत्वे वा अस्तीति प्रतीतिविषयता प्रपञ्चस्य कथमित्यस्यापि समानत्वात् । सदसत्वमेकस्य कथं तयोर्विरुद्धत्वात् सदसत् प्रतीतिप्राप्तस्य विरोधप्रसङ्गे तयोर्मध्ये एकस्य तदन्यतरस्यार्थस्य निश्चायकाभावात् प्रपञ्चस्योभयधर्मवत्वमिति जैनमतालंबिनो गिरन्ति । सत्वं पुरस्कृत्यैवासत्त्वप्रतीतिदर्शनात् सर्वदा प्रपञ्चस्य सत्वमेवेति सांख्याः । सदसत् प्रत्यय प्राप्तविरोधे प्राप्ते विरोधपरिहाराय विरुद्धांशं परित्यज्यानिर्वचनीयत्वमेव प्रपञ्च-

एकमेवाद्वितीयमिति, अद्वितीयश्रुत्या प्रपञ्चनिराकरणं भवतीति मन्यमानानामेतावता प्रकरणेन निरासो भवतीति प्रतिपादितम् । अथ च प्रपञ्चो न सद् वाधात्, नाप्यसत् प्रतीयमानत्वात् तस्मात्सदसद्भ्यां विलक्षणमनिर्वचनीयमेवेतियत्तदीयमेवमतं तस्य निराकरणाय विचारमुपक्रमते "ननु प्रपञ्चस्य सत्यत्व" मित्यादि । ननु यदि प्रपञ्चः सद्भवेत्तदानास्तीति प्रत्यय विषयता तस्य कथं स्यात् नहि सतो बाधः दृश्यते च प्रपञ्चस्य वाधः शुक्तिरजतादिवदिति सर्वा सत्ववादिनो माध्यमिकस्याक्षेपः, अर्थात्, तस्य सत्यत्वंनास्तीति बाधविषयत्वं कथं भवेदित्याक्षेपः । अत्र सांख्यादयः प्रत्यवतिष्ठन्ते 'असत्वेवा–कथमिति"—यदि नास्तीति प्रतीत्यन्यथानुपपत्त्याऽसत्वाग्रहोभवतस्तदा घटोयं पटोयमिति बाधर्राहतसर्वलोकप्रत्यक्षादिप्रमाणस्य निरालंबमिति तस्य प्रपञ्चस्य सत्वमप्येष्टव्यमेवाकामेनापीत्यतः सन्नेव प्रपञ्च इति सांख्यादयः । ननु घटादौस्वरूपतोऽस्तीति सत्प्रत्ययः पररूपेण नास्तीत्यसत्प्रत्यय इति सत्वासत्वप्रत्ययवलादुभयमपि पदार्थस्येति जैनमतं तत्राह='सदसत्वमेकस्य कथमिति" विरुद्धद्वयमेकस्मिन्नसंभवान्नोभययोग्यमित्यर्थः । विचारप्रसक्तिमाह, 'सदसत् प्रतीतिप्राप्तमित्यादि" परस्परविरुद्धाकारद्वयप्रसंगे परस्परविरोधात्तदुभयस्य तदन्यतराकारस्य वाऽनिर्णयाद्विचारो भवति प्राप्तावसरः, अतोऽत्र विचारः प्रस्तूयते इति पूरयित्वा वाक्यार्थौ वर्णनीयः । तत्र प्रथमतोऽनेकान्तवादिमां स्याद्वादमतमुभयोः प्रतीयमानत्वादेवैकस्मिन् सदसत्वयोः समावेशे न भवति कोपि विरोधः प्रतीयमानत्वादेवेति तदाशयः । अर्थात् सदसत्वयोरेकत्र प्रतीयमानयोर्मध्ये एकस्यैवनिर्णये विनिगमककारणाभावात्, यथा प्रतीतप्रपञ्चस्योभयरूपत्वमेष्टव्यमेवेति जैना वदन्ति । 'निश्चायकाभावात्' इत्यस्य निश्चायककारणाभावादित्यर्थः । स्याद्वादविरोधि एकान्ततः सत्ववादिर्साख्यमतमाह, 'सत्वं पुरस्कृत्य' इत्यादि निषेधस्य प्राप्तिपूर्वकत्वनियमेनोपजीव्यत्वादसत्वप्रतीत्यपेक्षया सत्वप्रतीतिः प्रबला । तदुक्तम्—

"लब्धरूपे क्वचित्तस्यतादृगेव निषिध्यते । विधानमन्तरेणासौ न निषेध्यस्य संभव ॥" इति ।

तस्मात् सर्वदा प्रपञ्चस्य सत्वमेवेति । न च तर्हि घटो भविष्यति घटोध्वस्त इत्याद्य

स्येति शांकराः । सत्वासत्वे विरुद्धदेशकालभेदेनैकत्रैवव्यवस्थिते घटादौस्त एवेति नैयापिकाः । तदेवं वादिविप्रतिपत्त्या संविद्विचारोमीमांसकमतेन विधेयः । यदि घटादि स्वरूपेऽस्तित्वं नास्तित्वमुभयमपि विजानाति तदा युगपत्सत्वमसत्वं घटादिषु स्यादेव ।

भावप्रतीतिः कथं संगतास्यादिति वाच्यम्, घटो नास्तीत्याद्यभावप्रतीतिर्नघटाद्यभावपरा किन्तु तदीयानभिव्यक्तिपरैवेति न दोषः ।

एतन्मतद्वयविरोधिशांकरमतमाह, 'सदसत्प्रत्ययेत्यादि' प्रतीतिवलात् सत्वासत्वरूप विरुद्धधर्मप्राप्तौ, विरुद्धयोर्द्वयोः सामानाधिकरण्यवलात् सत्वमसत्वं च परस्परविरुद्धधर्मद्वयं परिहाय, नसत् नाप्यसत् किन्तु सदसद्भ्यां विलक्षणमनिर्वचनीयमेवजगत्, सत्वेवाधे तस्या सत्वे प्रतीतिर्नस्यादिति मायावादिनः ।

न्यायमतमाह, 'सत्वासत्वे' इत्यादि । विभागेन=विभक्तकालदेशाविशेषवलात् प्रतीयमानं घटादेः सत्वासत्वं च व्यवस्थितमिति भावस्तेषाम् । प्रकरणमुपसंहरति 'तदेवंवादिविप्रतिपत्तावित्यादि' वादिविवाददर्शनात्, विप्रतिपत्तेः संशयोत्पत्त्या, संदिग्धार्थस्य निर्णयाय विचारः प्राप्तावसरो भवति, तत्रान्यमतानां दोषवत्वप्रदर्शनपूर्वकसोपाधिकसत्वासत्वपक्षो मीमांसकाभिमतः सद्युक्तिको निर्णीयते इति भावः ।

तत्र निरूपाधिकसत्वासत्वसमुच्चयनिराकरणपूर्वकसिद्धान्तोऽनुवर्णितो भवति घटादि स्वरूपे सत्वमसत्वमित्यादि । अयमाशयः—घटस्वरूपे नास्तित्वं प्रतीयमानमेव, नास्तीतिप्रतीतिदर्शनात्, अथ यदि तस्य घटस्य सत्वमपि मन्येत, अथवा प्रतीतिः सत्वमसत्वं च निरूपाधिकं यदि प्रतिपाद्येत तर्हि सदसत्वसमुच्चयः स्वीकृतो भवेत् । न चैवं किन्तु यत् किञ्चिद्देशकालावस्था विशेपेणसत्वम्, अन्यदेशकालावस्थाविशेषावच्छेदेनौपाधिकमेवासत्वमेव च प्रतीतयः प्रतिपादयन्ति । तस्मात् कालदेशादिभेदात् सत्वासत्वे घटादौ व्यवस्थिते, इति वादस्य वादान्तरस्य च दुष्टत्वान्न तेषां संभव इति भावः । निराकृतस्य व्याघातवाधितस्य स्याद्वादपक्षस्य, स्यादस्ति स्यान्नास्ति, स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति जैनानामनेकान्तवादस्य न कथमपि संभव इति ॥

अत्र च नैयायिकादिमतमुपाधिभेदादुभयं तद्भेदस्तु स्वात्मना सत्वम्, परात्मनाऽसत्वम् स्वकाले सत्वम् परकाले चासत्वमेव । एवं स्वदेशेसत्वम्, अन्यदेशेऽसत्वम् । अत्र तु तादात्म्यं संसर्गो वा सत्वं व्यपदिष्टं भवति । तद्विरुद्धवेषेण वस्तुन्येवासद् व्यवहारः । ययाघटादिः स्वात्मना सन्नितिनिर्दिश्यते, स एव घटः पटात्मनाऽसन्निति निर्दिश्यते । स्वदेशकालयोः सन्नेव घटादिरर्थः

इदमिदानीमत्रनास्तीत्येवं बुद्धिदर्शनात् । देशकालादिदशाभेदेऽस्तिनास्तीति बुद्धेः । तस्मात् देशकालादिभेदेन घटादिषु सत्वमसत्वमुभयमपि व्यवस्थितम् । जैनमतस्य निरासात् स्याद्वादो न संभवतीति ।

स्वविरोधिदेशकालयोरसन्नित्येवं व्यपदिश्यते । उभयानुकूलोत्पाद्यमेव मींमांसकपक्ष आद्दतोभवति सिद्धान्ते । अत्रैतावान् विवेको यथा तादात्म्यतदितरसंबन्धान्यतरलक्षणैव सत्ता भवति । तत्रायं घटोऽस्तीत्यत्र प्रथमातादात्म्यरूपैव सत्ताप्रतीता भवति, तथाऽत्रेदानीं घटोऽस्तीत्यत्रैतद्देशकालसंयोगलक्षणा सा सत्ता प्रतीयते । तत्र तदा घटोनास्तीत्यत्र च पटादितादात्म्याभावलक्षणा पटात्मनाऽसत्ता प्रतीयते । तत्र तदाघटोनास्तीत्यत्र च तद्देशकालसंयोगाभावलक्षणाऽसत्तैव प्रतीयमाना भवति । एवं भाव रूपयोः सदसत्वयोर्देशकालादिभेदेन घटादिभावेषु समुपपत्तिर्भवतीत्येकः पक्षः । एवम् 'भावान्तरमभावोऽन्योनकश्चिदनिरूपणात्' इति वदद्भिः अभावो भावान्तररूप एव, अभावस्याधिकरणरूपतयापटेविद्यमानो घटाभावः पटरूप एवेति पक्षान्तरम् । अयंघटोऽस्तीत्यत्र प्रतीतं घटस्यस्वरूपसत्वं घटत्वरूपमेव । तदेवायं घटोनास्तीत्यत्रापि पटादितोभेदरूपमसत्वं प्रतीयते । एवं स्वदेशकालसम्बन्धरूपासत्तैवान्यदेशकालनास्तिता प्रतीतावपि विषयो भवति देशकालादिसम्बन्धाभावत्वेनेति । तथा च धर्मविशेष एव सर्वभावानामस्तिप्रतीतिविषयो भवतीति साधितम् । अयमेव प्रकारः सिद्धान्तसंमत इति ।

परस्परविरुद्धयोरपि सत्वासत्वयोरेकस्मिन् धर्मिणि सहचरितोभयधर्मद्वयवत् विरुद्धयोरप्येकत्राविरोधेन समर्थनकारिणां मतमसहमानः सत्वैकान्तवादिसांख्यः युक्त्या सत्वपक्षं समर्थयितुं पुनः प्रत्यवतिष्ठते "ननुदेशकालादिसम्बन्धः" इत्यादि—पूर्वमसतोघटादेः स्वदेशकालादिसम्बन्धेन सत्तां नोपपादयितुं शक्नोति कोपि, यथा सिकतासु, अविद्यमानतैलस्य सत्तां कर्तुं न शक्नोति तथैव प्रकृतेपिज्ञेयम् । यतः सम्बन्धो हि द्वयाश्रितो भवति, यथा पटघटयोर्नत्वेकस्यसम्बन्धो भवति नवा, विद्यमानस्याविद्यमानस्य तदपरस्य सम्बन्धोऽसंबन्धो भवति, कुतः ? यतो द्विष्ठस्य सम्बन्धस्यैकासत्वे तदसंभवात् । अर्थात् संयोगादेः सम्बन्धस्य सम्बन्धिद्वयजन्यस्या सत्याधारान्तरे समुत्पत्तेरभावात् । एवं च स्वदेशकालादिसंवन्धात् सत्वं भावानाम् , भावस्य सत्वे च स्वदेशकालादिसम्बन्ध इति भवति दुरुत्तरोऽन्याश्रय इति । तस्मात् सत्वमेव सर्वदा भावानामित्येव स्वीकर्त्तव्यम् । अन्यथाऽन्योन्याश्रयप्रसङ्गादिति । ननु यथा दण्डचक्रादिव्यापारादनन्तरं सत उपलब्धिस्तदा कारकव्यापारो निरर्थक एव, तस्मात् कारकव्यापारात् पूर्वं न सन् घटादिरपितु असन्नेव । न च वन्ध्यापुत्रादेरप्युपपत्तिः स्यादिति वाच्यम् , असद्विशेषस्यैव तथा नियमात् , तस्मादसत एवोत्पत्तिरित्याशङ्कायायमाह "असतः कारकव्यापारेण सत्वमित्यादि". नहि

ननु देशकालादिसम्बन्धः सत एवोपपद्यते, नतु देशकालादिसम्बन्धाः सतः सत्वमिष्टम् , सम्बन्धस्योभयनिष्ठत्वात् , तस्मात् सत एव सत्वं सर्वदा भवति । असतः कारकव्यापारेण सत्वं तु सर्वदैव दुर्घटम् । प्रपञ्चश्चाद्यन्तवानतः सत्पक्षे एव निवेशितः ।
स्वभावतोऽसत्पदार्थस्य प्रयत्नशतेनापि सत्वं संभवति, नहि सिकताभ्यस्तैलं कोपि कर्तुं शक्नोति, तथा सति तैलार्थीतिलोपादानकारणं तिलादिकं नो संचिनुयाद् । सर्वोपि सर्वत्र सर्वं स्वाभिलषितं प्राप्स्यति प्रयत्नमन्तरेणापीतिनासत्वं भावस्य ।

किञ्च असत्पदार्थस्याप्युत्पत्तिस्वीकारे दण्डचक्रादितोऽसत्वाविशेषात् घटवत् पटादेरप्युत्पत्तिप्रसङ्गात् । केनचिद्व्यापारविशेषेण कूर्मरोमगगनकुसुमादीनामपि कदाचिदुत्पादप्रसङ्गात्। तस्मात् सर्वदा सन्नेवभावपदार्थः । उपलब्ध्यनुपलब्धी तु आविर्भावतिरोभावाभ्यां जायेते, तादृश भावे एवासत्कथनमिति ।

ननु दण्डादिसद्भावे घटादिकार्यविशेषस्य दर्शनेन सामर्थ्यप्रतिनियमात् , नातिप्रसङ्ग इति चेन्न कार्यगर्वत्वमन्तरेण सामर्थ्यस्यापि निरूपयितुमशक्यत्वात् । तस्मात् कारणव्यापारात् पूर्वमपि सदेव कार्यं कारणव्यापारेणाभिव्यज्यते, निष्पीडनेन तैलस्य दोहनेन सौरभीयेषु पयसः। एतदेव स्वीकर्तव्यमित्याशयेनाह "तस्मात् , आद्यन्तवान् " इत्यादि, घटादेर्भावस्याद्यन्तौ, प्रागभावप्रतियोगित्वध्वंसप्रतियोगित्वं तन्नोत्पत्तिविनाशलक्षणं किन्तु आविर्भावतिरोभावलक्षणमेव । अर्थान् न घटादेरुत्पादो विनाशो वा भवति किन्तु आविर्भावतिरोभावावेव भवतो नतूत्पत्ति भवति स्वभावत; सर्वदा सत्वात् "नासतो विद्यते भावो नाभावो विद्यते सतः" अतः सत्वेननिश्चितः सदासन्नेवेतिमन्यतामिति । "सदसद्रूपयोरात्मदेहयोर्नित्यत्वानित्यत्वाभ्यामेव सदसच्छब्दाभ्यां व्यपदेशः" इत्याचार्योक्तिः ।

"असतः" इत्यादि यश्च सर्वथाऽसत्पदार्थस्तस्य कदापि सत्वं न संभवति, कारणसंबंधरूपोत्पत्तेरभावात् । यथा खपुष्पादेरुत्पत्तेरभावात् कदापि सत्वं न भवति तथैव भावानामप्यसत्वे कदापि तेषां सत्वं नैव संभवेदिति । उत्पत्तेः पूर्वमविद्यमानस्य 'तथा विनाशादनन्तरमसतः सार्वदिकासत्वापेक्षया कोपि विशेषो नास्ति, असत्वस्य सर्वत्र समानत्वादिति । ननु सांख्यमत व्यवस्थितौ तदेवमतं सिद्धान्तं स्यात् , परन्तु नैवं विशिष्टाद्वैतसिद्धान्तेऽन्यादृशप्रक्रियायाः श्रुतिसमर्थितायाः स्वीकारात् तस्मात् सांख्यमतस्य निरासः संक्षेपेणात्र टीकायामुद्भाव्यते । तत्रायमाशयः द्रव्यं तावत् विनाशोत्पत्तिराहित्यलक्षणं नित्यमेवैकान्ततः । तस्यमृदादिद्रव्यस्यावस्था विशेषापटत्वतन्तुत्वादिका आगन्तुका उत्पत्तिविनाशभाजोऽनित्या एव । अवस्थाविशेषस्य संपादनायैवतन्तुवायवेमादिलक्षणकारकाणां व्यापारोऽपेक्षितो भवति ननु पटादेरुत्पत्यर्थम् । द्रव्यस्य मृत्तिकादेः सत्वादेवकारकव्यापारविषयत्वमवस्थान्तरभागित्वञ्चेति तदुभयवत्वं सुलभतयैव घटते ।

तथैवोक्तमभियुक्तैः "आदावन्ते च यन्नास्ति मध्यभागेपि तत्तथेति। अतो निश्चितसद्भावः सर्वदासत्वमेव स्वीक्रियताम्। असतः सर्वदाऽसत्वमेवोत्पत्त्यभावात्, गगनकुसुमवत्। पदार्थस्यासत्वे प्रागभावात्यन्ताभावयोरविशेष एव स्यात् ॥

नचात्रकपालादिनैव घटस्तन्तोरेव पट इतिप्रतिनियम इति वक्तव्यम् अन्वयव्यतिरेकयोरेव नियामकत्वात्। अर्थात् यस्य कार्यस्य येन कारणविशेषेण सहान्वयव्यतिरेको घटते तत्रैव कार्यें तादृशकारकविशेषस्य जनकत्वं नतु तद्भिन्नस्य तदन्यत्रकार्ये जनकत्वम्। अन्वयव्यतिरेकश्च सार्वलौकिकः प्रत्यक्षादिप्रमाणसिद्ध एवेति न तत्र प्रयत्नान्तरमधिकमपेक्षितं भवति। अर्थादन्वयव्यतिरेकाभ्यामेव च कारकसमुदायस्य तस्य तस्य तत्र तत्र कार्यें सामर्थ्य नियमः सिद्ध्यतीतिनातिप्रसङ्गः पदमादधातीतिभावः। तत्तदवस्थाविशिष्टस्वरूपेण घटो जातः पटश्च विनष्ट इत्यादिप्रतीतिरपि समुपपद्यते। कारकसमुदायस्य कार्याभिव्यंजकत्वम्, नतूत्पादकत्वमिति मतेतु कारककारणस्य ज्ञापककारणस्य च विभागो न संघटेत।

[यथा 'दण्डेन घटः' इत्यत्र दण्डस्थतृतीययादण्डे जनकत्वं ज्ञाप्यते 'प्रदीपेन घटः' इत्यत्र तु प्रदीपपदोत्तरतृतीययाज्ञापकत्वं प्रदर्शितं भवति नहि प्रदीपेन घटः कदाचिदुत्पादितो भवति किन्तु ज्ञापित एव भवति, नवा दण्डेन घटोज्ञाप्यते अपितूत्पादित एव भवतीत्येवं जनकज्ञापककारणयोर्भेदो भवति। सचायं भेद उत्पत्तिस्वीकारे एव भवत्यभिव्यञ्जकत्व पक्षे न घटेत तस्मात् कारकचक्रस्याभिव्यञ्जकत्वपक्षे कारकज्ञापकयोर्योविभागोलोकसिद्धः स दत्तजलाञ्जलिक एव स्यादिति] ननु नेयमभिव्यक्तिर्ज्ञानरूपा किन्तु ततो भिन्नैव काचिदिति चेत् तदाप्रकारान्तरेणोत्पत्तिरेवबलादूगले सांख्यस्यापतिता भवतीति न कारकसमुदायस्याभिव्यञ्जकत्वमपितु कार्यजनकत्वमेव। अपिच येयमभिव्यक्तिः सा नित्या, अनित्या वा? नोभयथापि समीचीनतामञ्चति, तथाहि तस्या अभिव्यक्ते नित्यत्वे सर्वदा विद्यमानत्वेन कारकव्यापारो निरर्थकत्वमेव स्यात्, सत्वादभिव्यक्तेः सर्वदा सत्वेन तादृशाभिव्यक्त्यर्थं कारकचक्रस्य निष्प्रयोजनत्वात्। अभिव्यक्तेरप्यभिव्यक्त्यन्तरस्वीकारेऽर्थात् द्वितीयपक्षस्वीकारेऽनवस्थादुरवस्थैव स्यात्। तत्र प्रथमाऽभिव्यक्तिः स्वात्मलाभायाभिव्यक्त्यन्तरमपेक्षते, द्वितीयापि तृतीया सा चतुर्थीमित्ययमेवमनवस्था स्यात्। न च व्यवस्थायां सत्यां साभ्युपगन्तुं युक्ता। न चाभिव्यक्तेरभिव्यक्तिर्नभवति, किन्तु साऽभिव्यक्तिरुत्पद्यते, इत्येवस्वीक्रियते, ततश्च नानवस्था नवा कारकचक्रो निष्फल इति वाच्यम्, तथा सति सत्कार्यवादोऽस्तमियादसत्कार्यवादश्चापतेत्।

तदभिव्यक्तेरुत्पत्त्युपगमतो यथोपलंभंतस्योत्पत्तिरुपगन्तुमुचिता। सदेवद्रव्यमवस्थान्तरं भाक् सत्कार्यं भवतीत्येव सत्कार्यवादः परिरक्षणीयः। एतादृश एव सत्कार्यवादो विशिष्टाद्वैत

अथ षष्ठप्रपाठके श्वेतकेतुमुपादायतत्वमसीति यत् श्रुतम् तस्यमुख्यार्थः कथं सिद्ध्यति, यतः कार्पण्यादियुक्तश्चेतनस्त्वंपदार्थः, सर्वज्ञत्वादियुक्तश्चेतनस्तत्पदार्थस्तयोरैक्यं कुतः संभवति प्रकाशान्धकारवत् विरुद्धत्वात्। त्वमर्थस्थे तटस्थे वा गुणे तत्वंपदयोरैकार्थ्यश्रुत्या कथमिव प्रतिपादितं भवेत्। अज्ञत्वं सर्वज्ञत्वं वा चैतन्यस्य विशेषणमुपलक्षणं वा ? विरुद्धगुणसंक्रमणात् त्वंतदर्थयोर्भेद एव भवेत्। वाच्यैकदेशपरित्यासिद्धोऽपीतिसांख्यमतनिरासः । अविद्याजनितोनिखिलभेदप्रपंचो मिथ्या । अद्वितीयश्रुत्या चजगतोमिथ्यात्वमेव प्राप्तं भवतीति गम्यते । तच्च प्रतीतिवाधाभ्यां सदसद्विलक्षत्वसिद्धे सुस्थितमिति मयावादिमतम् । तच्च बहुधानिराकृतत्वादेवोपेक्षणीयमितिदिक् ।

॥ इतिसकलभेदप्रपंचस्यसत्वपक्षसमर्थनप्रकरणस्य तत्त्वदीपः ॥

ननुब्रह्मात्म्यैकाज्ञानमूलकंजगत् निर्विशेषचैतन्यमात्रब्रह्मात्मैक्यज्ञानादेवाविद्यादिसर्वजगतो विनाशो भवति । निर्विशेषचिन्मात्रब्रह्मात्मैक्यं च तत्वमसीति ज्ञानादेवजायते इति मतं प्रतिक्षेप्तुंतत्वमसि वाक्यार्थविचारं प्रक्रमते "अथषष्ठप्रपाठके श्वेतकेतुमुपादाय" इत्यादि, उपादानं ग्रहणार्थकं न किन्तु संबोधनार्थकम्, तथा चोद्दालक ऋषिः स्वपुत्रं श्वेतकेतुं सम्बोध्य, छान्दोग्यस्य षष्ठाध्याये तत्वमसीति प्रोवाच । अद्वैतवादे जीवब्रह्मणोरभेदसिद्धयेतत्वमसीति वाक्यमेवमुख्यं प्रमाणमिति ते संगिरन्ति, परन्तु अस्यापि समानाधिकरणवाक्यस्य मुख्यार्थत्वं न संभवति तत्राह "तस्येति" तस्य=तत्वमसीति वाक्यस्यमुख्यार्थत्वं न संभवति, तत्राह "कार्पण्यादि", तस्यवाक्यस्य मुख्यार्थत्वं न भवतीत्युपपाद्यते, कार्पण्येत्यादि । तत्र कार्पण्यमतिदैन्यम् गतिशून्यतेत्यर्थः । शोकश्चदुःखानुसंधानजनितचित्तस्य व्याकुलत्वम् । दुःखं च वर्तमानकालिकमनिष्टानुभवलक्षणम् । तत्र जीवेश्वरयोः समानविभक्त्या ज्ञायमानमेकत्वम्, तदेकत्वं तेजोऽन्धकारवत् परस्परविरुद्धयोर्नघटते तस्मान्न सद्वाक्यस्यमुख्यार्थत्वं संभवति । परस्परविरुद्धस्वभावकत्वमेव दर्शयति "कार्पण्यादिदोषविशिष्टश्चेतनो जीवस्त्वंपदस्यार्थः सर्वज्ञत्वादिगुणकश्च तत्वमसीतिवाक्यघटिततत्पदार्थस्य सर्वज्ञत्वादिविशिष्टपरमेश्वरपरकः ततश्च परस्परविरुद्धयोरेकत्वं न भवति, तस्मात् तत्वमसीतिवाक्यंनोक्तार्थकम् । "त्वमर्थेवा तटस्थे वा" इत्यादि । त्वमर्थजीवनिष्ठोगुणोऽल्पज्ञत्वसुखित्वदुःखित्वादितदर्थपरमेश्वरनिष्ठो गुणः सर्वज्ञत्वसत्यसङ्कल्पत्वजगत्कारणत्वादिः स च यथोक्तगुणोयथायथं ब्रह्मणस्तटस्थलक्षणत्वेनमायावादाभिमतः । अनयोरल्पज्ञत्वसर्वज्ञत्वादिधर्मयोराश्रयभेदकत्वात् तदर्थत्वमर्थयोरैक्यमभेदः कदापि न संभवतीत्यर्थः ।

ननु सर्वज्ञत्वाल्पज्ञत्वयोश्चोपलक्षणतैव, नतु तयोर्धर्मयोर्विशेषणता, ततश्च तदुभयोपलक्षितं चिन्मात्रं वस्तु एकमेवेति न मुख्यार्थसंभव इति । तत्राह "अज्ञत्वं सर्वज्ञत्वं वा" इत्यादि । चित्त-

गात्, एकव्यक्तिनिष्ठत्वं तयोर्भवेत् सोयं देवदत्तवत्, तदप्यपेशलम् । देशकालदशाभेदात्, विरुद्धयोरपि समावेशः सोयं गौरिवेति युज्यते । स्वप्रकाशचैतन्ययोविरुद्ध धर्मद्वयसम्बन्धस्याविरोधापादकं व्यवस्थापादकं किंचिदपि देशकालादिकं न संभवति ।

निर्धूतनिखिलद्वन्दे स्वप्रकाशात्मके चैतन्ये, द्वैतलक्षणानर्थभ्रमस्याभावात्तत्त्वमस्यादिशास्त्रं निरर्थकमेव भवेत् । एतेन सत्यकामत्वादिकागुणामायोपाधिकेऽध्यस्तास्तथाशोकमो-

त्वस्य शुद्धचैतन्यस्य एते गुणा विशेषणं वा उपलक्षणं वा ? तत्र च नास्ति कश्चिद्विरोधस्तत्राह "अज्ञत्वमित्यादि" चिद्धातोः चित्त्वस्योपलक्षणत्वेपि, अज्ञत्वादिनाउपलक्ष्यस्य जीवभावस्य, सर्वज्ञादिधर्मेणोपलक्षितस्य चेश्वरभावस्य च वैयधिकरण्यादेव त्वं पदार्थस्य तत्पदार्थस्य च, एतयोर्द्वयो रैक्यं तादात्म्यं कथमपि नसिद्ध्यतीत्यर्थः ।

ननु तत्वंपदयोर्विरोधान्मुख्यार्थस्त्यज्यते, चिन्मात्रेतु पदद्वयस्य लक्षणास्वीक्रियते यथा सोयं देवदत्त इत्यत्र तद्देवदत्तोपलक्षितवस्तुमात्रेपदद्वयस्यलक्षणा, तथैव प्रकृतेपीति कुतो विरोध इत्याशङ्कायामाह "वाच्यैकदेश" इत्यादि, वाच्यैकदेशस्य प्रवृत्तिनिमित्तभेदस्य परित्यागेन विशेष्य शुद्धचैतन्यमात्रे पदद्वयस्यवृत्तिर्जहदजहल्लक्षणयेति ततो न कोपि दोष इति । एतन्निराकरोति "तदप्यपेशलम्" इति न समीचीनमसुन्दरमिति यावत् । एकपदलक्षणयैव परस्परविरोधपरिहारसंभवे पदद्वयलक्षणा न युक्ता नो मनोरमेत्यर्थः । दृष्टान्ते सोयं देवदत्तः सोयं गौरित्यादावपि पदद्वयस्य लक्षणा नास्ति, तत्राह—"देशकालावस्थाभेदादित्यादि । तत्र तत्तानामतद्देशकालयोगित्वरूपम् , इदन्तैतद्देशकालयोगित्वरूपा, ततश्चतत्ताविशिष्टे इदन्ताऽन्वयस्य बाधेपि, एकस्मिन् धर्मिणी देवदत्तादौ, तदुभयाऽन्वये न कोपि विरोधः । परिच्छिन्नपदार्थस्य देशद्वयसम्बन्धः कालभेदात् संभवत्येव, कालद्वयसंबन्धस्तु पदार्थस्य स्थिरत्वादेव निर्वाह्यते । प्रतिपादकाभ्यां देशद्वयकालद्वयसम्बन्धस्य समानविभक्त्या तदाश्रयद्रव्यैक्यस्य च प्रतिपादने, नास्ति विरोधः । अस्मिन्नेवार्थे सोयं देवदत्तः सोऽयं गौरित्यादिवाक्यस्य तात्पर्यम् । तस्मात् दृष्टान्ते न पदद्वयस्य लक्षणेत्यर्थः ।

नच केवलाद्वैतमते इदं समाधानमपि तु मदीयसिद्धान्ते एव, ततोनेदं तैर्वक्तुं शक्यं तत्राह "स्वप्रकाशस्ये"त्यादि । निर्विशेषचैतन्यमात्रे विरुद्धधर्मद्वयसंबन्धस्याविरोधोपपादकं देशकालावस्थाभेदादौ किमपिनघटते, स्वयं प्रकाशरूपत्वादज्ञानमपि, अविरोधोपपादकं न शक्यं तस्मिन् चैतन्ये इति भावः ।

स्वयं प्रकाशरूपे ब्रह्मणि तमोरूपाज्ञानस्य सम्बन्धाभावादेवाविद्याकृतभेददर्शननिरसनार्थत्वं तत्वमस्यादिशास्त्राणां निर्विशेषचिन्मात्रब्रह्मात्म्यैक्यविषयत्वं च पराभिमतं कथमपि न

हादिकाजीवेऽध्यस्ता विभागेन ते मायाविद्ये तदुभयस्मिन् विद्येते इति यन्मतं केषाचित् तन्मतंपूर्वमेव निरस्तम् । चित्स्वरूपे विशिष्टे वा मायाऽविद्यादयोऽवतिष्ठन्ते ? पूर्वकल्पेजीवेश विभागाभावे सर्वसाङ्कर्यंभवेत् । द्वितीयकल्पेविशिष्टचैतन्यमपि निर्विशेषेभावाद्युपाधिभि र्विभिन्न इव विभ्रान्तं विशिष्टं चेति तव मतम् । तदापि तदा तटस्थे विद्यमाना धर्माः स्वरूपं किं नस्पृशन्ति ? किं दण्डिनोमस्तककर्तनेन पुरुषो न हिंसितो भवत्यपितु हिंसित

सम्भवति तत्राह—**निर्धूतनिखिलद्वन्द्वे** इत्यादि । अत्र द्वन्दशव्दार्थों भेदः । अविद्याद्वारेणैव भेदभ्रमो वक्तव्यः स्यात्, परन्तु निर्विशेषस्वप्रकाशे ब्रह्मणि, तमोरूपाज्ञानस्य सम्भवो यतस्तादृशाज्ञाननिरसनीयस्यासिद्धेरिति तन्निरासकत्वाभिमतैक्यज्ञाने शास्त्रतात्पर्यं न कल्पयितुं युक्तम् । ततश्च निरर्थकमेवापतेदध्यात्मशास्त्रं **तत्वमसि** इत्यादि महावाक्यं चेत्यर्थो मूलप्रकरणस्य । एतेनाविद्या कृतान्तःकरणभेदो यः स एवजीवत्वेश्वरत्वकल्पक उपाधिश्चेतनमात्रे, इत्यपि निरस्तम् । तादृशस्वप्रकाशात्मकचैतन्ये तमोरूपाया अविद्याया एवासम्भवात् । नाह तेजःस्वरूपे तमसः सत्वं भवति तथैवात्रापीति ज्ञेयम् ।

चैतन्यस्वरूपे ब्रह्मण्यविद्यान्वयस्यानुपपत्तिप्रदर्शनेन, कैश्चिदद्वैतिभिः कल्पितं मायाऽविद्योपाधिभेदं तत एव चेशेशितव्यभेदं चापारमार्थिकमुपपाद्यमानं निरसितुमाह "एतेनसत्यकामत्व" इत्यादि । एतेन देशकालवस्तुकृतत्रिविधपरिच्छेदरहिते चिन्मात्रेब्रह्मणि मायाविद्योपाधिभेदा सिद्ध्यैव मायोपाधौ—मायोपाहतचैतन्यमात्रे, परे=परमेश्वरे विनाशेनेति तत्वमस्यादिमहावाक्य जनितवृत्तिविशेषरूपैक्यसाक्षात्कारेण मायाविद्यात्मकोपाधिविनाशे सति तादृशोपाधिकल्पित जीवेशभावोपि निवृत्तोनावस्थातुं शक्त इति भावः । **पूर्वमेवनिरस्तमिति** अपारमार्थिकत्वेनाभिमतयोर्मायाविद्ययोः कस्यचित् कल्पकस्याभावादेव मायाऽविद्ययोः सिद्धिर्नस्यात्, कल्प्यस्य कल्पकाधीनत्वात् । स्वतः कल्पनायामात्माश्रयदोषो भवेत् । यदि कदाचित् ब्रह्मण एवमायाविद्याकल्पकत्वं, तदा कल्पकस्य ब्रह्मणो नित्यत्वेन सर्वदाऽवस्थानात्, तयोर्मायाविद्ययोरपिनित्यत्वमापतेत् । ब्रह्मात्म्यैक्यज्ञानरूपतत्वज्ञानेनतयोर्निवृत्तिस्वीकारे निवर्तकज्ञानस्य क्षणिकत्वेन पुनरपि नित्यब्रह्मस्वरूपवलान्मायाविद्ययोः कल्पनाप्रसङ्गः । अपि च मायायाः प्रपञ्चभ्रमोत्पादकत्वेदुःखादिजनकत्वे च मायाया अविद्यातो विभागो न सिद्ध्येत । मायाया यथार्थज्ञानजनकत्वे, क्रीडारसपरिकरत्वेचापुरुषार्थत्वाभावात्, तन्निरासोनोपपद्येत । अनादिभावरूपाया मायाया ज्ञानमात्रेण निरसनाऽनुपपत्तिः । अनादिभावस्यात्मवत् नित्यत्वं नित्यत्वेन विनाशायोगः । माया न निवर्तते अनादिभावरूपत्वादित्यनुमानात् । अविद्याया एवानेकवेदान्तिसंमतत्वात्, मायाऽविद्योपाधिभेदवादिनस्तदेकदेशिनः क्षुद्राः सर्वथा शास्त्रपरिज्ञानहीनाब्रह्मविदोऽद्वैतिषुचेति ज्ञातव्यम् । एवं नाश-

एव भवति । अचिदंशपरित्यागेन चिन्मात्रमेवावशिष्यते, अयमेवार्थस्तत्त्वमसीति वाक्यस्य भवतीति युक्तम् ‘‘ब्रह्माहमितिकस्यापि प्रत्यक्षं जायते नहि ।ब्रह्मणश्चाथजीवस्य नैक्यं प्रत्यक्षतस्ततः । तत्त्वमस्यादिवाक्यस्य श्रवणानन्तरं ननु । जायतेऽनुभवश्चोक्त इति चेन्नैवमुच्यताम् । प्रकारि ब्रह्मणोरैक्यं तद्वाक्यार्थोयतस्ततः । नस्यादनुभवस्तादृग्वाक्यस्य श्रवणादनु । ब्रह्मणो देहरूपत्वाच्चिदचितोः प्रकारता । चिदचिदात्मनश्चाथ

कस्य तत्वज्ञानस्य नित्यत्वाभ्युपगमेतद्विनाशाभावेन तद्रूपद्वैतस्य सर्वदाऽवस्थानेननाद्वैतसिद्धिरित्यादि बहुतरदोषो ज्ञातव्यः ।

ईशजीवोपाधिभूतमायाविद्ययोर्भेदोपगमासम्भव इति पूर्वं कथितम्, किन्तु तयोर्भेदस्योपगमे तु दोषान्तरं वक्तुमुपक्रमते **चित्स्वरूपे विशिष्टे वेत्यादि** अयमाशयः किं चैतन्यमात्रेमायाऽविद्याद्युपाधयः संबद्धा भवन्ति अथवा उपाधिविशिष्टे चैतन्ये उपाधयः सम्बद्ध्यन्ते ? तत्र न प्रथमः पक्षः अर्थात् शुद्धचैतन्यमात्रे मायाविद्ययोः सम्बन्धाभ्युपगमे, उपाधिप्रयुक्तस्वभावभेदा एकस्मिन्नेव प्रसक्ता भविष्यन्तीति जीवेश्वरस्वभावयोः सांकर्यमापतेत् । यदि कदाचित् विशिष्टे तयोः सम्बन्धस्तदा किं तद्विशेषणमितिवक्तव्यम् ? मायाञ्चाविद्यायैव विशेषणमितिस्वीकारे आत्माश्रयः, मायायां मायाया वृत्तित्वस्वीकारात् । यदि जीवत्वेश्वरत्वविशिष्टे उपाधयस्तदाऽन्योन्याश्रयो दोषो भवेत् । एतदतिरिक्तं किमपि जीवेश्वरे विशेषणं स्यादिति सुदुर्वचमेव ।

किञ्च मायया ऽविद्यया वा संवित्स्वरूपस्य परिच्छेदासंभवात्, एकमेव तत्तदुपाहितं भवेत्, आकाशवत्, मठान्तर्वर्तिघटेन मठेन चोपहितम् । तथा च हस्तपादाद्यवच्छिन्नसुखदुःखभोग एकस्यैव यथा जीवस्य तथा तत्तदुपाधिप्रयुक्तैश्वर्यदुःखादिभोग एकस्यैव परब्रह्मणः प्रसज्यते इति जीवेश्वरस्वभावाव्यवस्थितिरेव भवेदिति नेदं मतं समीचीनम् ।

अथोपाधिकप्रदेशभेदोपगमाद् परब्रह्मणि न जीवेशस्वभावसांकर्यमिति चेत् तत्राह **तदा तटस्थे विद्यमानाधर्माः** इत्यादि । मायया ऽविद्ययावोपहितं ब्रह्मैव तत्स्थमिति कथ्यते, तादृश ब्रह्मनिष्ठस्य सर्वज्ञत्वज्ञत्वादेश्च, दण्डेन कुण्डलेन वा उपहिते पुरुषे कदाचिद्दण्डादिविशेषणवत्तया तटस्थपदवोध्यदेवदत्तादौ वर्तमानस्य सुखदुःखप्रयत्नादेर्देवदत्तात्मनीव, ब्रह्मण्यपितटस्थपदवाच्ये सुखदुःखादेः सम्बन्धोदुर्निवार एवस्यादित्यर्थः ।

तत्र ब्रह्मण्यनान्दित्वप्रसङ्गस्य “आनन्दंब्रह्मेतिश्रुत्येष्टत्वेपिदुःखित्वप्रसङ्गस्य कथंचित् दुःखित्वादिप्रसङ्गस्यासह्यत्वे दृष्टान्तमाह **किं दण्डिनः** इत्यादि । उपाधिभेदे सत्यपि विरुद्धधर्मसमावेशप्रसङ्गो न निवारयितुं शक्यः । अर्थात् यथा दण्डोपाधिविशिष्टदेवदत्तस्य विनाशिरश्छेदे जाते दण्डिनो मरणं न भवति किम् ? अर्थात् भवत्येवेति । तस्माद् वस्तुभेदंविना कल्पितप्रदेशभेदमात्रे

ब्रह्मणोहि प्रकारिता ।" (श्रौतप्रमेयचन्द्रिका ५।३०–३४) इत्याद्याचार्योक्तेः ।

इति तत्वमसिवाक्यस्य ब्रह्मात्मैक्यपरत्वेऽनुपपत्युपपादकप्रकरणम् ।

अब्रह्मणोऽनात्मत्वे तत्त्वंपदयोर्लक्ष्यार्थ एकः प्रत्यक्तत्वं चैतन्यमात्रं परिशिष्टं भवति । यत एक शेषे तादात्म्यं चैतन्यमात्रे न स्यात् । तत्पदं त्वं पदं चैतद्वयं जीवेशयोस्तादात्म्यविपयकतन्मुख्यवृत्तिस्तादात्म्ये तु वस्तुद्वयाश्रितं भवतीति । भेदाभेद विजीवेशादिभेदव्यवस्था न कथमपि घटते । एवञ्च मायाऽविद्योपाधिभेदकल्पना निरर्थिकैवतेषांस्थितमिति ।

एतेन मायाऽविद्योपाधिरूपविशेषणभेदपरित्यागेन विशेष्यीभूतचैतन्यमात्रस्यैक्यं **तत्त्वमसीति** महावाक्यस्यार्थो भवतीत्यपि निरस्तमेव, तत्राह **अचिदंशपरित्यागेन** इति । अचेतनमाया विद्यादिकं परित्यज्य चैतन्यमात्रस्यैक्यं भवतीति कथने, तत्पदे त्वं पदे चोभयपदे लक्षणा भवति, सचनेष्टः, एकस्मिन्नेव पदे लक्षणाकरणेनैव तथाबोधसम्भवेन पदद्वये लक्षणाकरणस्यायुक्तत्वात् । एवं ब्रह्मणिदोषापत्तिश्चभवतीति । स्वोक्तिदाढ़्यार्थं पूर्वाचार्यप्रबन्धमवतारयति **ब्रह्माहमिती**त्यादि ।

॥ इति तत्वमसिवाक्यस्य पराभिमतब्रह्मात्मैकपरत्वेऽनुपपत्त्युपपादनप्रकरणस्य तत्त्वदीपः ॥

केवलाद्वैतमते सामानाधिकरण्यार्थस्य तादात्म्यस्य, अर्थात् ब्रह्मजीवयोस्तादात्म्यस्यानुपपत्तिमुपपादयितुमुपक्रमते **अब्रह्मणः**इत्यादि । अब्रह्मणः इत्यत्र नञर्थाकारस्यभेदवानित्यर्थः । ततश्च ब्रह्मभिन्नस्य जगतोऽनात्मत्वे तत्त्वंपदद्वयलक्ष्यार्थ एकः प्रत्यक्तत्वं चिन्मात्रं ज्ञानमात्रमेवावशिष्यते । तत्रैकस्मिन् समानाधिकरणवाक्यार्थस्य तादात्म्यस्य लाभो न स्यात्, तादात्म्यस्य सम्बन्धत्वात् , सम्बन्धस्य द्वयाश्रितत्वनियमेनैकस्मिन् तदयोगात् , नहि भवति घटोघट इति । एकशेषे तादात्म्यस्यानुपपत्तिं विवृत्त्यदर्शयति **तत्पदंत्वं पदंचैतद्वयं जीवेशयोस्तादात्म्यविषयकमिति,** तत्त्वंपदद्वयस्येशजीवयोः सामानाधिकरणमितिशेषः । **तन्मुख्यवृत्ती**ति । तस्य मुख्यवृत्तिर्यत्र तत् तन्मुख्यवृत्तिः । **वस्तुद्वयाश्रितम्** इति । तादात्म्यं द्विविधं भेदसामानाधिकरणम् , यथा नीलाभ्रम् , भेदासहिष्णु च तादात्म्यमपरम् । तत्र भेदसमानाधिकरणाभेदस्य तादात्म्यस्यात्यन्ताभेदे तस्य संभवो न भवत्यर्थादसंभव एवेति भावः । अत्र च यादवप्रकाशस्य प्रक्रियामाश्रित्य माह प्रक्रिययावा तादात्म्यं निरूप्यते इति ज्ञातव्यम् । सिद्धान्तेतु **वस्तुद्वयाश्रय**मित्यस्य प्रवृत्तिनिमित्तधर्मभेदवदेकवस्त्वाश्रितमिति । तत्र प्रवृत्तिनिमित्तधर्मः शक्यतावच्छेदकमेव, यथा घटे घटत्वम् । तयोः प्रवृत्तिनिमित्तधर्मः शक्यतावच्छेदकयोर्यत्र भेदस्तत्रैव तादात्म्यसम्बन्धः, यथा नीलो घटः इत्यत्रोद्देश्यतावच्छेदको धर्मोघटत्वं विधेयतावच्छेदकधर्मस्तु नीलत्वमिति प्रवृत्तिनिमित्तधर्भयो-

कल्पस्तु यः कथितो भवता, स भेदाभेदिनोः बन्धेतादात्म्येऽसति निरर्थक एव भवति। अभेदो हि स्वाश्रयीभूतवस्तुनोर्भेदविरोधी भवति, परस्परानात्म्यरूपो भेदोभावानामेतयोः। स्वरूपं स्वीकृत्यैवभेदाभेदविकल्पयोर्वाधः, तेन वाक् विरोधेन निगृहीतो भवसि। भिन्नाभिन्नत्वविकल्पः सम्बन्धस्य सत्वासत्वयोश्च विकल्पः प्रत्यक्षादिप्रमाण

नीलत्वघटत्वयो र्विभिन्नत्वेन भवति नीलघटयोस्तादात्म्यम् , यत्रत्वनयोर्नभेदस्तत्र तादात्म्यं न भवति यथा घटोघट इत्यत्रोद्देश्यतावच्छेदकंघटत्वं तदेव च विधेयतावच्छेदकमपि, तत्र च तयोर्भेदाभावात्; तत्र तादात्म्येन घटप्रकारकघटविशेष्यकः शाद्बबोधो न भवतीति। अर्थात् धर्मद्वारकभेदविशिष्ट स्वरूपस्याभेदे सत्येवतादात्म्यं भवतीति विवेकः।

ननु भेदाभेदस्तादात्म्यमिति न संभवति। भेदाभेदयोरभेदेऽत्यन्तभेदेपिभेदाभेदस्यासिद्धेः। भेदाभेदे वा तत्रापि भेदाभेदेपि तथेत्यनवस्या एकस्मिन् भेदाभेदेऽपरापरभेदाभेदकल्पने स्यादेवानवस्थेतिचेत्तत्राह **भेदाभेदविकल्पस्तु यस्त्वयाकथितः** इत्यादि। अत्रत्यविकल्पप्रकारः शङ्कग्राहितया मूलकृताऽत्रवास्थलान्तरे वा न प्रदर्शितस्तदीयाभिप्रायेण शास्त्रसंग्रहमालोच्य किञ्चित्प्रदर्श्यते, तथाहि भिन्नयोस्तादात्म्यमिष्यते, अथवा अभिन्नयोस्तदात्म्यमुच्यते ? तत्र न तावत् प्रथमः पक्षः प्रथमपक्षस्वीकारे हिमवद् विन्ध्ययोरपि तादात्म्यमापद्येत सर्वथाभेदस्य तत्र विद्यमानत्वात् , यथावा धर्मापेक्षया स्वरूपापेक्षया च भिन्नयोर्गवाश्वयोरपि तथा भावप्रसङ्गात्। अभिन्नयो तादात्म्यमीति द्वितीयकल्पादरे घटोघट इति वा भेदाभेदविकल्पः स्यात्। अभेदाभेदिनः=भेदाभेदिभिन्नस्य, अत्यन्तभिन्नस्यात्यन्ताभिन्नस्य वा बन्धे=तादात्म्यसम्बन्धे असति, अप्रामाणिके सति भवद्भिः कृतोयं विकल्पो निरर्थकतामेतीत्यर्थः। नहि घटोघट इति वा घटः पट इति वा सामानाधिकरण्यं क्वचिद्दृष्टं श्रुतमुमपद्यते वा। किन्तु नीलोघट इत्येव भवति, अंशतो भेदेंऽशतोऽभेदे एवेति मन्तव्यम्। न चोद्देश्यविधयभेदे, तयोर्भेदाभेदयोर्विरोधादेवैकत्र समावेशो न घटते इति वाच्यम् नीलपटयोः प्रतीतिसिद्धत्वादेवतयोर्विरोधाभावात् प्रतीतिरेवभगवती शरणम्। अथवा धर्मं पुरस्कृत्य भेदः स्वरूपतश्चाभेद इति ज्ञातव्यम् , तथैव सर्वत्र निर्वाहादिति भावः।

भेदाभेदं विकल्पयतः स्ववचनव्याघातोपि भवति, यतोऽभेदोभेदस्य प्रतिद्वन्द्वीविरोधीभवति। अर्थादत्यन्तभेदस्य निरासको भवति, एतयो=र्भेदाभेदयोः स्वरूपमर्थात् स्वरूपभेदं स्वीकृत्यैव. भेदोवाऽभेदोवेति विकल्पकोटिद्वयोर्वाधोनं दूषणं क्रियते। तेन स्वाभ्युपगमेनैववाग्बाधा=भवदुक्त दूषणवचनेन व्याघातः प्रसज्यते। एतावतात्वं स्वाभ्युपगतवचनेन निगृहीतो भवसि।

भिन्नाभिन्नत्वेत्यादि। भिन्नभिन्नत्वस्य धर्मिणा सह सम्बन्धोऽस्ति नवा प्रथमेपक्षे, तत्सम्बन्धेपि सम्बन्धान्तरं वक्तव्यम् , सम्बन्धान्तरेऽपि सम्बन्धान्तरं वक्तव्यमित्येव क्रमेणानवस्थैवायाति।

बाधित इति वृथा कण्ठशोषणम् । नीले नीलज्ञानमुत्पलादौ नीलादिज्ञानं प्रत्यक्षं नापलप्यं तथा प्रकृतेपीति ।

यथा प्रत्यक्षगोचरे संयोगादिसम्बन्धे भेदाभेदादिदुस्तर्कजनितो विभ्रम एव प्रत्यक्षादिबाधितत्वात् । एवं श्रुतिप्रत्यक्षमूलकतादात्म्ये संयोगे च दुस्तर्कमूलकभ्रमो

सम्बन्धोनास्तीति द्वितीयपक्षे असम्बद्धस्य विशिष्टबुद्धिजनकत्वं न स्यादिति विकल्पोपि कण्ठशोषणमात्र फलको भवति प्रत्यक्षानुभवबाधितश्चापि भवतीत्यर्थः । यथावा नीलपीतादि रूपवति घटपटादिद्रव्ये नीलपीतादिबुद्धिर्भवति साच नीलादिप्रतियोगिकघटादिद्रव्यानुयोगिकसमवाय सम्बन्धमवगाहमाना भवति, साच नापलपितुं योग्या । एवं नीलमुत्पलमिति विदिता लोकप्रसिद्धा नीलादितादात्म्यबुद्धिरपिनापलपयितुं शक्या । स्वपरनिर्वाहकान्तरेण स्वरूपसम्बन्धेन वाऽनवस्था दोषः परिहरणीय इति भावः । तादात्म्यसम्बन्धप्रद्वेषिप्रयुक्तानां दुस्तर्काणां प्रत्यक्षपराहतत्वमपि । तदेव प्रपञ्चयति—

संयोगेभेदभेदादिदुस्तर्कम् इति यथा भिन्नयोः संयोगसम्बन्धो भवति, अभिन्नयोर्वासंयोगो भवति ? इति विकल्पः संयोगविषयकः । तत्र न प्रथमः तथासति अतिविदूरयोर्हिमाचलविन्ध्याचलयोरपि संयोगसम्बन्धप्रसङ्गात् । न चेष्टापत्तिः, अनुपपत्तेः । तथाहि, संयोगो हि क्रियाजन्यो भवति, स चैकक्रियाजनित उभयक्रियाजनितभेदात् । तत्रैकक्रियाजनितः पर्वतपक्षिणोः, तत्रश्येनमात्रे क्रिया पर्वतस्त्वचलत्वादक्रियावानेव, तत्रश्येनक्रियया श्येनं उड्डीयागत्यपर्वते विश्रामं करोतीति श्येनजनितक्रियया श्येनशैलयोः संयोग एकक्रियया जनितः, न चोभयोर्नगयोर्वः संयोगः स नैव तादृशः हिमवद्विन्ध्ययोः क्रियारहितत्वात् । द्वितीयश्च संयोग उभयक्रियाजनितः यथा मेषयोगः स उभयमेषनिष्ठक्रियाजनितः । नायमपि संयोगोद्वयोर्नगयोः तयोर्द्वयोरपि निष्क्रियत्वात् । तृतीयस्तु संयोगजः संयोगो यथा करतलतरुसंयोगात्संयोगस्तरुकुमयोर्भवति । अत्र च न तृतीयोपि, असंभवात् , इति न भिन्नयोः संयोग इति प्रथमकल्पः । नवा द्वितीयोऽभिन्नयोः संयोग इत्याकारकः, तथा सति स्वेनैव स्वस्य संयोग आपनेत् । नचैतदपीष्टम् , अनुपपत्तेः सम्बन्धमात्रस्यैकप्रतियोगिकत्वंपरानुयोगिकत्वं रूपद्विकत्वनियमेन स्वप्रतियोगिकत्वानुयोगिकत्व लक्षणैकसंयोगे सम्बन्धत्वस्यैवंमात्रेन भवत्येवापत्तिरिति । एवं संयोगः स्वधर्मिणो भिन्नो न वा । तत्र न प्रथमः संयोगसंयोगिनोर्भिन्नत्वेनुपपशाप्रथमः संयोगो द्रव्यात्मकसंयोगिसापेक्षः, एवमेव संयोगस्यापि सम्बन्धान्तरं कल्पनीयम् । तथैव सम्बन्धान्तरस्यापि सम्बन्धान्तरमित्येवं क्रमेणानवस्थायामेवपर्यवसानं स्यादिति न प्रथमः । नवा धर्मिणोऽभिन्नः संयोग इति द्वितीयकल्पः, अभेदे सति तस्य संयोगत्वमेव न सिद्ध्येत् । एवं स्फुटप्रतिपन्नेदुस्तर्कतन्मूलकविकल्पनादि यथा भ्रमलक्षण

वारणीयः । निर्दोषापौरुषेयास्यर्थमादरेण, ब्रह्मजीवब्रह्मणोस्तादात्म्यरूपंमसकृदाह । ब्रह्मानन्दलक्षणह्रदे निमग्नो मुक्तात्मा सुखंप्राप्नोति । फले मोक्षकाले जीवस्वरूपस्य

कण्ठशोषणमात्रं प्रत्यक्षप्रमाणपराहतं च, एवमेव नीलोत्पलादितादात्म्ये प्रत्यक्षे जीवब्रह्मतादात्म्ये च शास्त्रसिद्धेदुस्तर्कतन्मूलकविकल्पनादिकं प्रत्यक्षशास्त्रदण्डनिवारितमिति । तत्र प्रत्यक्षदण्डेनेति, नीलघटयोस्तादात्म्याभिप्रायेण, श्रुतिदण्डेनइति तु प्रकृत **तत्त्वमसि** वाक्यार्थाभिप्रायेणकथितमिति विवेकः । ननु जीवपरमेश्वरयोस्तादात्म्ये तु अभ्यासलक्षणं तात्पर्यनिर्णायकलिङ्गं विद्यते तत्र "उपक्रमोपसंहारावभ्याशोऽपूर्वताफलम् । अर्थवादोपपत्तिश्च लिङ्गम् तात्पर्यनिर्णये ।"

इति तात्पर्यनिर्णायकं षड् लिङ्गम् । तत्रोपक्रमादीनां यथा तात्पर्यनिर्णायकत्वं तथैवाभ्यासस्यापि तथात्वंविद्यते अत्र प्रकरणे, तत्वमसीति नवकृत्वोऽभ्यासो विद्यते इति तद्बलेन जीवेशयोस्तादात्म्यं सिद्ध्याशयेनाह, **निर्दोषेत्यादि** प्रवृत्ति निमित्तरूपधर्मभेदेनधर्मिस्वरूपयोरभेदेन च तादात्म्यं तत्वमसीत्यादौ तत् त्वमादिपदानां तत्तच्छरीकब्रह्मपर्यन्ततया निरूपणीयम्, तदादिपदानां ब्रह्मात्मकपरतया वा निरूपणीयम् । यादवप्रकाशादिमतेतु जीवब्रह्मस्वरूपगतावेव भेदाभेदाविति विवेकः । एतावता केवलाद्वैतमते प्रातिपदिकयोरिव समानविभक्तेरपि न मुख्यार्थतेतिस्थापितम् । यद्यपि, अभेदमात्रस्य समानविभक्त्यर्थत्वं संभवति । तथापि प्रवृत्तिधर्मभेदत्यागात् सामानाधिकरण्यमुख्यार्थता परमते संभवतीति ज्ञेयम् । मोक्षे चैतन्यमात्रस्य परिशेषो भवतीति कथनमपि न युक्तम्, एवं सति मोक्षस्य सर्वाभिमतपुरुषार्थता नस्यात्तत्राह **ब्रह्मानन्द... मुक्तात्मा** इत्यादि । "एष ब्रह्मप्रविष्टोऽस्मि ग्रीष्मेशीतमिव ह्रदम्" इत्यभियुक्तोक्तवचनबलेन ब्रह्मानन्दस्य ह्रदरूपेणोऽभिमतं चन्द्रेणेव मुखस्य । सकलसंसारतापक्लेशनाशनात् नित्यनिरतिशय सुखप्रापकत्वाद् ब्रह्मानन्दस्य मुक्तात्मा तु त्रिविधपरिच्छेदरहितब्रह्मानन्दमहासमुद्रे निमग्नोनित्यप्रवुद्धसुखवानेव भवतीति शास्त्रमर्यादा । नित्यनिरतिशयसुखात्मकपरमफले मोक्षे भोक्तृत्वावस्थापन्नस्यस्वस्यक्वचिद्विलयं यदि जानीयात्, तदातादृशफलमनेकमनेकप्रयाससाध्यं, न तदा तादृशफलं क्वचिदपीच्छेत्, ततश्च शास्त्राणां महर्षीणां च तदर्थं प्रवृत्तिः सर्वथैव निष्फला भवेत् । मोक्षकाले, एकशेषेऽर्थात् निर्विशेषचैतन्यमात्रावशेषे कस्य मोक्षात्मकंस्यादिति वक्तव्यम् । किं ब्रह्मणो मोक्षफलम् जीवस्य वा मोक्षफलम् ? तत्र ब्रह्मणो मोक्षफलमिति न प्रथमः पक्षो, ब्रह्मणो नित्यत्वेन तद्वैयर्थ्यत्वात् । तस्यापि तादृशफलवत्वस्वीकारेऽस्मदादिवदनीश्वरत्वप्रसङ्गात्, सिद्धान्तविरोधाच्च । नापि जीवस्यमोक्षफलमिति द्वितीयः पक्षः, मोक्षसमये जीवस्य विलयात्, सतिजीवे तस्य बन्धनिवृत्तिपूर्वकनिरतिशयसुखात्मकमोक्षरूपफलंभवेत्, सति धर्मिणे तदीयधर्मोऽवस्थितः स्यात् तत्र धर्मिणि । नहि कुड्यादीनामभावे तद्विशेषणीभूतचित्रादीनामवस्थानं संभवति । श्रूयते

विलये मोक्षस्य पुरुषार्थत्वं नस्यात् । एक शेषे निरवच्छिन्नचेतनमात्रावशेषे कस्यजीवस्य ब्रह्मणो वा फलं स्यात् ।

॥ इति परमते सामानाधिकरण्यार्थायोगवर्णनप्रकरणम् ॥

किञ्च प्रपञ्चाकारेण कीदृशीसंविद्विवर्तते । नतावद्घटज्ञानं प्रपञ्चाकारेणविवर्तते ? घटज्ञानाभावेपि, भेदप्रपञ्चस्यदर्शनात् । नहि घटादिज्ञानस्यानुत्पादे तद्विनाशे वा सकलं जगत् नास्तीति वक्तुं शक्यते. प्रत्यक्षवाधात् । नाप्यन्यसंवित् प्रपञ्चाकारेण वा, तदुपपद्यतेवा चैतन्यमात्रं ब्रह्मैव जीवस्य स्वरूपमिति चेत्तर्हि ब्रह्मण एवानादिभावात्मकाविद्यया जीवभाव इति स्वीकर्तव्यम् , तच्च श्रुतियुक्तिबाधितमिति बोद्धव्यम्। अनेन प्रकारेणाविद्यापरिकल्पित जीवेश्वरत्वादिविकल्पपरित्यागेन निर्विशेषचिन्मात्रैक्यम् **तत्त्वमसीत्यादि** महावाक्यस्यार्थ इत्यत्र दोषजालमवोचत् ।

॥ इति परमते सामानाधिकरण्यार्थाऽयोगवर्णनप्रकरणस्यतत्त्वदीपः ॥

अथ चेतनेतरसकलप्रपञ्चविभ्रमाधिष्ठानस्य चेतनस्य तथा प्रपञ्चविभ्रमकारणस्य च स्वरूपविमर्शेनापि केवलाद्वैतिमतेऽसामञ्जस्यं दर्शयितुमुपक्रमते **किञ्च** इत्यादि । अत्र प्रपञ्च विभ्रमस्य यदधिष्ठानम् , किञ्च प्रपञ्चविभ्रमे कारणमित्युभयविषयकः प्रश्नः । विवर्तते इति, अन्योहि अन्याकारेण भासते इत्यर्थः । तदुक्तम् ‘अततवतोऽन्यथा प्रथा विवर्त इत्युदाहृतः । अतत्वतोऽन्यथा प्रथा विकार इत्युदाहृतः ।’

कारण विषयसत्ताककार्योत्पादो विवर्त इत्यर्थ । यथा शुक्तौरजतम् , इत्यत्र कारणमधिष्ठानं शुक्तिकादिद्रव्यम् , तस्यव्यावहारिकीसत्ता, कार्यस्य च रजतस्य प्रातिभासिकी सेति तत्र विषयसत्ताककार्यस्योत्पादेन रजतस्य शुक्तिकाऽधिष्ठानम् , चाकचिक्यादिसादृश्यदर्शनं विभ्रमे कारणमिति घटते विवर्त लक्षणम् । वस्तुतस्तु शुक्त्यवच्छिन्नचैतन्यमेव रजताधिष्टानं शुक्तिकात्ववच्छेदकमात्रम् , तदुक्तम्-शुक्त्यवच्छिन्वान्मोहोत्थारुप्यधीः शुक्तिसंभवा । कथ्यते मृदवस्थात्मजातोमृज्जो अथा घटः’ इति । एतदभिप्रायेनैव कथितम् विवर्ततेऽयथार्थाकारेण प्रतिभासते, इति । न तत्र घटज्ञानं प्रपञ्चरूपेण विवर्तते इति पक्षः ? घटज्ञानाभावेपिपटादिप्रपञ्चस्य ज्ञायमानत्वात् । अधिष्ठानं विना तस्मिन्नारोप्यप्रतीतेरयोगात् ।

नहि शुक्त्याद्यधिष्ठानमन्तरेण रजतप्रतीतिर्भवतीति । तस्माद् घटज्ञानस्य पटादिज्ञानस्यवोत्पादविनाशशालिनां निखिलप्रपञ्चविभ्रमाधिष्ठानत्वं संभवतीति भावः । नहि घटादिज्ञानस्याजातत्वे विनाशे वा, जगतोऽखिलं प्रपञ्चोनास्तीति वक्तुं शक्नोति कश्चित् , यतः पटादिज्ञानस्या भावेपि तदितरसकलप्रपञ्चस्य प्रत्यक्षात् । अर्थात् . पटज्ञाननाशेपि तदन्येषां घटादिभेदानां

विवर्तते पटज्ञाननाशेपि घटादिनाशेपि तदन्यज्ञानानां समुपलंभात् । ननु संविदेकैव तस्या भवान्तरभेदोनास्ति, केवलं विषयाघटादय एव परस्परं विभिन्नायन्ते, किन्तु ज्ञानं न भिद्यते, यतो ज्ञानस्यावभासनात् । ननु यदि ज्ञानमेकमेव तदाघटज्ञानकाले पटज्ञानं कुतोनावभासते इति चेन्नैवं, घटादेरनवभासनेपि तस्याः स्फुटरूपेण भासनात् । तत्रघटव्यावृत्तिसंवित् नोस्फुरतीति चेत्, तद्व्यावृत्तिपदेन किं सैवसंविदुच्यते तदन्या वा । सैवचेत्, भासते एव, अन्यच्चेत्तस्य भासनं न ब्रूमः । किञ्च नीरूपायाः स्वप्रकाश रूपायाश्च संविदोन स्वतो भेदोऽपितु विषयनानात्वादेवतथा भेदः । विषये नानात्व

प्रत्यक्षसिद्धत्वान्न पटज्ञानादेरपि प्रपञ्चाधिष्ठानत्वं संभवति, अधिष्ठानमन्तरेणारोप्यस्यारोपासंभवात् । ज्ञानमेव प्रपञ्चविभ्रमस्याधिष्ठानमिति परेषां मतम् । तत्र प्रातिस्विकरूपेण घटपटादिसंविदांनाधिष्ठानत्वं संभवति परस्परव्यभिचारात् । नाप्यन्यसंवित् तन्नाशेपि तदन्येषामुपलंभदर्शनादिति। अत्र पुनः केवलाद्वैतवादीशङ्कते **ननु संवित्** अभिन्नैकैव, तादृश संविदि भेदो नास्ति, विषयभेदेपि विषयिणः सर्वदाऽवभासमानत्वात् । अर्थात् संविदखण्डा एकैवोत्पादविनाशरहिता व्यापिका च । विषयाणां रूपस्पर्शादीनामन्यज्ञानेष्ववभासमानमेव परस्परं भेदः । ज्ञानस्य तु सर्वज्ञानेषु प्रकाशमानत्वादेकत्वमेव । तदुक्तं शब्दस्पर्शादयोवेद्या वैचित्र्याद् जागरे पृथक् । ततो विभक्तात्तत्संविदैकरूप्यान्नभिद्यते' अतस्तस्यां संविदि भेदबुद्धिरौपाधिकाविषया नतु यथार्थ संवित्स्वरूपभेदविषया । एतादृशाविशुद्धैका संविदत्रापि कैवनिखिलप्रपञ्चविभ्रमस्याधिष्ठानं भवति । ननु घटज्ञानं तु पटज्ञानकाले न भासते, तदा तु पटज्ञानमेव भासते इति चेन्न, तदा पटज्ञानकाले विषयरूपघट एव न भासते । ननु घटविषयकत्वविशिष्टसंविदः पटज्ञानेऽभानमिति चेन्नैवम्, घटविषयकत्वरूपं घटव्यावृत्तत्वसंवित्स्वरूपमेव । अतः पटज्ञाने तस्यभानमेव घटः केवलं न भासते । तस्यातिरिक्तत्वेतु पटज्ञाने तद्भानेपि संविदोभानमक्षतमेवेति समुदित ग्रन्थस्याशयः ।

ननु संविदिज्ञाने यदि भेदोनास्ति किन्तु यदि सा संविदेकैव, तदेदं घटज्ञानम्, तदन्यत्पटादिज्ञानम्, तदेकमुत्पन्नं जातम्, तदन्यद्विनष्टमित्यादि सर्वलोकसाक्षिको व्यवहारः कथमुपपद्यते इत्याक्षेपमाक्षेप्तुमाह **किञ्च नीरूपायाः स्वप्रकाशरूपायाः संविदः** इत्यादि । तत्र नीरूपायाः निराकारायाः सर्वविशेषरूपाया इत्यर्थः । नानात्वावग्रहभ्रमः=नानात्वा रूपा सदाकारोपहितत्वभ्रम एव भवति । संविन् नाना न भवति । भवति स्वप्रकाशत्वात्, यत् नाना भवति तन्न स्वप्रकाशरूपं भवति, यथा स्वभावजडो घटादिरिति, इत्याशयः । संविदिज्ञानेनानात्व प्रतीतिर्याभवति, सापि न स्वतः किन्तु विषयौपाधिकभ्रान्तिरेव नतु वास्तविको भेदस्तस्यामित्यर्थः। ननूपाधिभेदेनैव भेदोपि तत्र वास्तविक एव स्यात्, सांसर्गिकधर्मस्य तत्र तत्रोदयदर्शनात्, तत्राह

ज्ञानमपि भ्रमलक्षणमेव । घटादिवेदोपि न वस्तु नवा वस्तुधर्मः, न प्रत्यक्षो नवा लैङ्गिकः किन्तु भ्रमलक्षण एव केवलम्, यदा तदा विषयभ्रमाधीनोज्ञानभेदग्रहः कुतः कुतस्तरांच तस्य पारमार्थिकत्वसंभावना । किञ्च स्वयं प्रकाशज्ञानस्य प्रागभावादिः स्व-

नवस्तुवस्तुधर्मोवा इत्यादि यदा खलु विषयभेदएव वास्तविकस्तदातत्प्रयुक्तसंविदोनानात्वमप्य वास्तविकमेवेति भावः ।

ननुघटादिभेदस्य प्रत्यक्षसिद्धत्वात्, तथा "द्वासुपर्णा" "ज्ञाज्ञौ" इत्यादि श्रुत्यादि सिद्धत्वात् तदभावे ऐहिकपारलौकिकव्यवहारबन्धमोक्षादिव्यवहारस्योपपादनं कथमुपपन्नंस्यादित्यतभेदो वास्तविक एवेति चेन्न, नहि वयं व्यसनिभेदं निराकुर्मः किन्तु भेदवास्तविकत्वस्यदुर्निरूपत्वात् निराकरणं कुर्मस्तथाहि=भेदो हि नतावद् वस्तुनो घटादेर्नवस्तुतः स्वरूपम्, प्रतिज्ञानापेक्षग्रहस्यभेदस्य तदनपेक्षग्रहस्वरूपत्वासंभवात् । नवाऽयं भेदो वस्तुनो घटादेर्धर्मरूपः, भेदस्य धर्मिणा सहभेदो धर्मान्तरमेव, तस्यापि स्वधर्मिणा सहभेदो धर्मान्तरमेव, एवञ्च तस्यापि धर्मिभेदो धर्मान्तरमेवेत्यनवस्थायामेव पर्यवसानात् । एवं घटस्य पटभेदो धर्मः पटभेदभेदो धर्मः एवंतद्भेदोपीत्येवं क्रमेणानवस्था प्रसज्येत सेयं दोषत्रयवती । तदुक्तं—

"प्राग्लोपाविनिगम्यत्वं प्रमाणापगमैर्भवेत् । अनवस्थितिमास्थानमचिकित्यात्रिदोषतेति ।"

सोयंश्लोको व्याख्यातप्रायोऽथवा स्वयमेव व्याख्यातव्यः । एवं यः पदार्थः स्वरूपतोनिरूपो भवति तस्य प्रमाणतोपि दुर्निरूपत्वमेव । यथा वन्ध्यापुत्रादेः स्वरूपतो लक्षणतोवाऽनिरूपणात् कथमपि प्रमाणेनापि निरूपणं न भवति । अन्यथा तस्यापि वस्तुत्वप्रसङ्गात् । प्रकृते—यथा प्रत्यक्षं प्रमाणं भेदं विषयीकर्तुं न शक्तम्, यतोभेदस्याभावत्वात् रूपस्पर्शाद्यभावे चक्षुरादिना ग्रहणासंभवात् । यद्वाक्षणिकस्य तस्य, स्वरूपप्रतियोगिग्रहणपूर्वकभेदग्रहणपर्यन्तावस्थानाभावात् । अर्थात् प्रत्यक्षं भेदं प्रतियोगिग्रहणपूर्वकभेदग्रहणकालपर्यन्तं तस्यास्थिरत्वात् । न च प्रथमं प्रतियोगिज्ञानं तदनन्तरभेदस्य ग्रहणमिति वक्तुं शक्यम्, 'शब्दज्ञानकर्मणां विरम्यव्यापाराभावात्' इति नियमात् । युगपदेव त्रितयं विषयीकरोति तदपि न समूहालंवनवदुपश्लेषासिद्धेः । अर्थात् यथा घटपटादीनां समूहालंवज्ञाने तद्विषयाणां परस्परं विशेष्यविशेषणभावो न प्रतिभाति तथैव प्रकृतेप्यापतेत् ।

प्रत्यक्षप्रमाणेन यदा भेदग्रहणं न भवति तदा प्रत्यक्षमूलकव्याप्तिग्रहाधीनानुमान प्रमाणमपि भेदग्रहणे सशक्तं न भवतीति । ननु तर्हि घटादेरनुभूयमानो भेदग्रहः कथं भवतीति चेत्तत्राह **केवलंभ्रमलक्षण** इति । अर्थात् योयं भ्रमः स न सद्रूपः किन्तु शुक्तौ प्रतिमानरजतवदेव भ्रमस्तदेव गृहीतो भवति, गगनेनीलपीतादिवदिति । **यदेत्यादि** यदातु ज्ञाने नानात्वस्य स्वाभाविकत्वं न घटते, तदा औपाधिकमपि नानात्वं न भवति, उपाधिभेदस्यैवाभावात् । किन्तु

तो गृह्यते परतो वा ? तत्र न स्वतः संभवति स्वस्मिन् स्वस्य विरुद्धत्वात्, अनवस्थानात्। स्वनिमित्तप्रकाशस्य स्वस्याभावेऽसंभवाच्च। अनन्यविषयत्वेन ज्ञानस्य स्वतो ग्रहणं परतोपि वा ग्रहणासंभवात्। किञ्च वेद्यस्य भेदादेर्नचिद्धर्मत्वम्, रूपस्पर्शादिवत्, तस्मात् संविदद्वितीया स्वयं प्रमाचेति। अतस्तद्भेदमाश्रित्यविकल्पादिकं कथितं तदविद्याविलास एवेत्यत्रप्रक्रिया।

अनादि अविद्या दोषमूलकापारमार्थिकोपाधिभेदाधीननानात्वस्य भ्रममात्रमेव भवतीत्यर्थः। एवं ज्ञाने घटपटादिविषयभेदेन. प्रतीयमानाभेदबुद्धिरप्ययथार्थेत्युक्तं भवतीति। अथोत्पत्यादि प्रतीत्या, भेदबुद्धिरपि तत्रायथार्थैवेतिनिरूपयितुमुत्पत्याद्ययोगमाह **किञ्चस्वयंप्रकाश** इत्यादि। संविदो ज्ञानस्य प्रागभावः प्रध्वंसो तेनैव ज्ञानेन गृह्यते, अथवा ज्ञानान्तरेण गृहीतं भवतीति विकल्पः। तत्र विकल्पं प्रतिक्षेप्तुमाह **स्वतः** इत्यादि। विद्यमानेन स्वेन स्वस्याभावो गृहीतो भवति अथवाऽविद्यमानेन तेन स्वस्याभावो गृह्यते इति विकल्पद्वयम् ? तत्र तावत् प्रथमकल्पदूषयितुमाह **स्वस्मिन् स्वस्यविरुद्धत्वा**दिति। स्वस्मिन् विद्यमाने तदभावे विरोधात्, अभावस्थानमशक्यम् प्रतियोगितदभावयोः समानकालिकत्वस्यासंभवात्। अविरुद्धयोस्तथा भवति न तु विरुद्धयोः समानकालिकत्वम्। द्वितीयपक्षं निराकर्तुमाह **स्वनिमित्तप्रकाशस्यस्वाभावेऽसंभवा**दिति। अर्थात् स्वाधीनप्रकाशस्य स्वस्य ग्राहकस्याभावेऽसंभावादिति।

तदेवं स्वत इति कल्पं निराकृत्य परत इति द्वितीयकल्पं निराकर्तुमाह **अनन्यविषयत्वेन** इत्यादि। अभावस्य सप्रतियोगिकत्वनियमात् प्रतियोगिनमुल्लिख्यैवाभावो गृहातो भवेत्, ज्ञानस्यत्वनवस्थाभयेन ज्ञानान्तराविषयत्वाभावात्, ज्ञानान्तरेणापि प्रथमज्ञानीयप्रागभावप्रध्वंसयोर्ग्रहणं न संभवतीत्यर्थः। संविदोनानात्वस्वीकारेपि न तदीयप्रागभावादिग्रहसंभव इत्यभ्युपगम्यविचार आरब्धः। नत्वद्वैत्यभिमतं वस्तुतस्तन्नानात्वमितिभावः। वस्तुतो ज्ञाने नानात्वाभावे प्रमाणमपीति दर्शयितुमाह **किञ्चवेद्यस्यभेदादेरित्यादि** ज्ञानस्य न भेदो वेद्यत्वात् रूपादिवदित्यनुमानमत्रविवक्षितम्। **तस्मात्संविदद्वितीये** त्यादि। ज्ञानभेदभेदस्य निरूपयितुमशक्यत्वात् संविद्धर्मत्वासंभवाच्च सा संविदद्वितीया। अर्थात् सजातीयविजातीयस्वगत भेदरहितैव यथावृक्षादौ सजातीयात् वृक्षान्तरात् सजातीयो भेदः शिलादितो विजातीयो भेदः पत्रपुष्पादिभिः स्वगतोभेदस्तद्वदिह स्वगतसजातीयविजातीयभेदोनास्ति, तस्मादियं संवित् स्वप्रकाशरूपैकैवनतुनानेति सिद्धम्। ज्ञाने स्वयं प्रकाशत्वकथनेन तुच्छव्यावृत्तिर्भवतीत्युपसंहरति **अतस्तद्भेदमाश्रित्य** इत्यादि। यतः सर्वथा भेदराहित्यं संविदः, अतः किं घटादिसंवित्प्रपञ्चाधिष्ठानम्, अथवा पटादिसंवित्तथेति विकल्पकथनं यत्, सोयं संविद्भेदावलंवीविकल्पवादः संवित्स्वरूपयथार्थाज्ञानकार्यं इत्यैतवादिनो मन्यते इत्यर्थः॥

॥ इति परकीयसंविदेकत्वव्यवस्थानुवादप्रकरणस्यतत्त्वदीपः ॥

हन्तयोयं भवतोपदेशो ब्रह्मविषयकः सतु श्रद्धानशिष्यगोष्ठीष्वेव केवलं शोभते। नाहंभवद्वचसि श्रद्धानोऽतोमदर्थं युक्तितर्कोपेतंवचनमेवोदाहर्तव्यम्। प्रतिप्रमातुः परस्परविलक्षणा अपरोक्षाः सुखदुःखप्रमुखा बुद्धयः प्रतिभान्ति। एवं सम्बन्धिव्यंग्यभेदसंयोगस्येच्छादेर्वास्वतोभेदो नास्तीति न, नवा तादृशेच्छादेरप्रत्यक्षोऽसम्मतः।

गतैतावताप्रकरणेनयदद्वैतमतस्योपपादनं कृतवान्, तदनूदितं परकीयमतं निराकर्तुमुपक्रमते **हन्त** इत्यादि, हन्तेतिपदं वेदान्तमते विभ्रान्तेषु परेषु खेदप्रदर्शनार्थम्। तदिमे तत्त्वेषु विभ्रान्ततया पथभ्रष्टामोक्षं न प्राप्नुयुरिति व्यञ्जनया सूच्यते। यथा 'गच्छ गच्छसि चेत्कान्तः? पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्" इत्यत्र जन्मनो मरणमन्तरेणासंभवात्, तवगमनं मरणनिमित्तकंस्यान्मे, गमनंप्रतिषेधयति, तथैव प्रकृते तवायं भ्रान्तमार्गानुसरणं वन्धायैवस्यान्न मोक्षायेति स्वाग्रहगृहीतमार्गं मुञ्चथेति व्यज़्यते परमकृपालोराचर्यस्य संकेतः। श्रद्धामात्रशरणेषु विनेयबुद्धिषु निरूपणसमर्थेष्वेव केवलं भवदभिमतोयं ब्रह्मोपदेशः शोभते, युक्तितर्कद्वारा विचारकाावयं तु नात्रभवदीये ब्रह्मोपदेशे श्रद्धालवः। तस्मादत्र युक्तितर्कोपेतसत्प्रमाणेनैव विचायन्तु।

तत्र प्रथमस्तावज् ज्ञाननानात्वं यत् सर्वलोकसिद्धं तन्नकूटयुक्तिभिरपलपनीयं तत्राह **प्रतिप्रमातुः** इत्यादि। चैत्रमैत्रादिभेदेन, एकस्मिन्नपि देवदत्तादिषु रूपो विषयघटपटादिभेदेन, एकस्मिन्नेव घटादिविषये, वर्तमानादिकालभेदेन ज्ञानं परस्परं विभिन्नमेवेति प्रत्यात्मप्रत्यक्षसिद्धमेव सुखादिवदित्यर्थः। अर्थात् यथा एकस्य पुरुषस्य सुखंभवति, कस्यचिद्दुःखंजायते इत्यनुभवसिद्धं तथैव ज्ञानमपि पुरुषविषयकालभेदेन विभिन्नमेवानुभूयते इत्यनुभवसिद्धमेवेति। यदि ज्ञानस्य भेदापलापे तुल्यन्यायेन सुखदुःखादिनानात्वमप्यपलपितं भवेत्। न चेष्टापत्तिः अनुभवविरोधस्य जागरुकत्वात्।

ननु यथा सर्वथा भेदरहितेप्याकाशे सम्बन्धिव्यंग्योभेदोऽयं घटाकाशोऽयं पटाकाशश्चायमिति प्रतीयते, एवमेव ज्ञानस्य व्यापकत्वैकत्वेपि तत्र ज्ञानेपि विषयाश्रयाव्यक्तोभेंदो न पारमार्थिको गगनवदेवेति चेत्तत्राह **सम्बन्धिव्यंग्यभेद** इत्यादि। यथा घटप्रतियोगिकभूतलानुयोगिकसंयोगोऽयम् पटप्रतियोगिकमठानुयोगिकः संयोग इति सम्बन्धिभूतलादिभेदेनैव व्यावृत्ततया ज्ञायमानः संयोगभेदः पारमार्थिकोवास्तव एव कुतः? यतः सम्बन्धिजन्यत्वात् तादृशसंयोगस्य, यथावा चैत्रस्य घटविषयिणीच्छा, देवदत्तस्य पटविषयिणीच्छा इत्येवं प्रकारेण सम्बन्धिभेदेन भिन्नतया प्रतीयमाना भिन्नभिन्नैवेच्छातत्तत् पुरुषसमवेता तदातदा जायमाना भवति,

यदि नित्यासंविदेकाव्यापिकाऽभ्युपेयते तदा सर्वं ज्ञानं सर्वपुरुषस्य सर्वदैवभासेत, नवा किञ्चित् कस्यचित्कदाचिदपि न भासेत तदानीं वेद्यघटादेरसन्निधिकारिता व्यवस्था न घटेत, आकाशादिवद्वित्तेर्व्यापकत्वस्वीकारात्। नापि कारणभेदेन व्यवस्था स्यात्,

एवमेव विषयाश्रयभेदेन ज्ञायमानो ज्ञानभेदोपि पारमार्थिको वास्तविक एव कालपुरुषादिभेदेन जायमान इति सिद्धान्तेतु तत्तत्पुरुषे वर्तमानस्य धर्मभूतज्ञानस्यैकत्वे नित्यत्वेपि तत्तद्विपयप्रकाशनार्थप्रसरणावस्थाभेदविशिष्टस्वरूपेणानेकत्वमुत्पादविनाशित्वरूपमनित्यत्वं च संमतमतमेव यथा प्रकृतिर्नित्या, एकापि, तत्परिणामविशेषाणामनित्यत्वमनेकत्वमिति तथैवेहापि ज्ञातव्यम् ।

एवमुपलब्धिवलेन संविदो ज्ञानस्य नानात्वमनेकत्वं प्रसाध्य संविद एकत्वेऽर्थात् ज्ञानस्यैकत्वे बाधकं दण्डं वक्तुमाह **यदिनित्या** इत्यादि। यदि ज्ञानस्याकाशवन्नित्यत्वं व्यापकत्वमर्थात् सर्वगत्वमेकत्वं च स्वीक्रियेत, तदासर्वं वस्तु सर्वदा भासेत, भासकस्य ज्ञानस्य व्यापकतया सर्वेंण सहसम्बन्धस्य विद्यमानत्वात्, नित्यत्वादेकत्वाच्च। अर्थात् नित्यस्यव्यापकस्य प्रकाशस्यैकस्यैकस्य ज्ञानस्य सर्वविषयकसम्बन्धे सर्वस्यापि घटपदार्थस्य सर्वदैवभानप्रसङ्गः स्यात्, नत्वेवं भवति कस्याप्यनुभवः। यदि कदाचित् प्रकाशकज्ञानस्य सम्बन्धेसत्यप्यभानाभ्युपगमे, कस्यचिदपि घटाद्यर्थस्य कदापिभानं न स्यात्., प्रकाशज्ञानसम्बन्धव्यतिरिक्तस्य कारणान्तरस्यासंभवादित्यर्थः।

तदानीं वेद्यस्येत्यादि। तदानीं तस्मिन् समये सन्निधिभिन्नमर्थाद् संनिधानम् अर्थात् तत्काले वेद्यस्य व्यवस्था संनिधि तदतिरिक्ता कृतव्यवस्था न घटते, यतो ज्ञानस्याकाशवद्विभुत्वस्वीकारात्। अत्रायमाशयः, ज्ञानसंनिध्यसंन्निधिप्रयुक्तार्थभेदेभानाभानव्यवस्थादुरुपपोदा स्यात् यतो ज्ञानस्य सदा सदा सर्वेंण सह सम्बद्धत्वात्, गगनवत् यथा व्यापकस्य सर्वदा सर्वेंण सम्बन्धो भवत्येव. तथैव प्रकृतेपि सर्वदा सर्वदा सर्वविषयसम्बन्धात् सर्वस्यार्थजातस्य सर्वदाभानं प्रसज़्येत नवा कस्यापि कदापिभानं न स्यादिति भावः।

सिद्धान्तेतु ज्ञानं संकोच विकाशशालि, अर्थात् तदेव ज्ञानं सहकारिवलात् कदाचित्संकोचमासादयति कदाचित् तादृशसहकारिविकाशमेतीति संकोशविकाशाभ्यां ज्ञानस्य विषयभेदे, सन्निध्यसन्निधीव्यवस्थिते भवत इति ज्ञातव्यम्।

अमुककरणजन्यं ज्ञानममुकमर्थमेव गृह्णाति अर्थात् चक्षुरिन्द्रियजनितं ज्ञानंरूपं रूपत्वतदभावरूपिद्रव्यादिकमेवगृह्णाति त्वगिन्द्रियजनितं ज्ञानंस्पर्शादिकमेव गृह्णाति, एवं प्रकारेणकरणभेदेनापि व्यवस्था न भवन्मते इति शेषः। करणभेदे व्यवस्थाकुतो न स्यादिति न वाच्यम्, ज्ञानस्य भवन्मते नित्यत्वस्वीकारेण नित्यस्य करणासंभवात्, इति ज्ञानस्य नित्यत्वेकरणभेदप्रयुक्तव्यवस्था न कथमपि घटते, करणजन्यत्व स्वीकारे सिद्धान्तकराळव्याकोपः प्रसज्येत इति।

नित्यस्य कारणाभावात् । न च स्वरूपभेदेन नानात्वम्, ज्ञानस्यैकत्वस्वीकारात् । ततश्चान्धवधिरादेरपि रूपशब्दादिग्रहणंस्यात् । गुरुशिष्यादिभेदोप्यकारणक एव भवेत् ।

॥ इति संविदैक्यमतदूषणेन संविन्नानात्वोपपादनप्रकरणम् ॥

ननु न भवतु करणभेदेन ज्ञानभेदो ज्ञानस्य नित्यत्वात् तदापि घटादिविषयभेदेनैव ज्ञानभेदः स्यात्, तदपि केवलाद्वैतिभिर्ज्ञानाद्वैतस्वीकारादिति न विषयभेदेन ज्ञानभेदव्यवस्था तत्राह **न च स्वरूपभेदेन नानात्वम्**इति । एभिर्ज्ञानैकत्ववादिभिर्नैवं वक्तुं शक्यते ज्ञानस्यैकत्वस्वीकारेणापसिद्धान्तापातप्रसङ्गादिति भावः ।

प्रकाशकसंविदैक्यवादे लौकिकवैदिकमर्यादाभङ्गमुपपादयति **ततश्चान्धवधिरादे**रित्यादि । ज्ञानस्यैकत्वस्वीकारेण येन ज्ञानेन शब्दोगृह्यते तेनैव ज्ञानेन शब्दरूपादीनामपि ग्रहणंवक्तव्यम् एवञ्च शब्दग्राहकज्ञानेनैव रूपादिग्रहणसंभवे, अन्धोपिरूपादिकं गृह्णीयात्, वधिरोपि शब्दं शृणुयादिति वधिरान्धव्यवस्थापि विपन्ना स्यात् । एवं वाह्यकरणचक्षुरादीनां स्वीकारोपि निरर्थको भवेत्, ज्ञानस्य नित्यत्वात् प्रकाशकत्वेन सर्वदाऽर्थप्रकाशने समर्थत्वादित्येवं सर्वोपिलौकिकवैदिकव्यवहारोऽस्तमियात् । एवं गुरुशिष्यभेदोपि कारणरहितः स्यात् । एवं "ऋतौभार्यामुपेयात्" "गुर्वङ्गनांनगच्छेत्', इत्यादिविधिनिषेधव्यवहारोऽपि निर्मूलक एव भवेदिति । ननु तदर्थं व्यावहारिकभेदो विधिनिषेधयोराश्रयणेऽभेदोऽद्वैतमिति स्ववचनव्याघातः स्यात् ।

ननु प्रकाशकस्य चैतन्यस्वरूपज्ञानस्य स्वरूपत एकत्वेपि, चक्षुरादि वाह्यकरणेन वहिर्निःसृतान्तः करणवृत्त्याविषयसंबद्धयाऽविद्याया निवर्तनेनैवचैतन्यंतंतमर्थं प्रकाशयतिनान्यमर्थं प्रकाशयतीति व्यवस्था सम्यगुपपद्यते एवेतिचेत्, मैवं वृत्तेर्जडाया अविद्यावरणनिवर्तकत्वाभावात् । आवरणनिवर्तकत्वं प्रकाशस्यैव नतुतदितरस्य, यथा तमो निवर्तकत्वं सूर्यप्रकाशस्यैव । तथेहापि, अन्तः करण वृत्तेरविद्याजन्यत्वेनाविद्यात्मकत्वमेव । अविद्यानप्रकाशरूपा जडत्वात् ततश्चजडात्मकाविद्याजनितान्तः करणवृत्तेरपि तथात्वेन तादृशजडात्मकावरणस्य नाशायोगात् । यदि कदाचित् जडात्मकान्तः करणवृत्तेः प्रकाशकत्वमिष्येत तदा तस्या एवार्थप्रकाशकत्वमिति चैतन्यस्य तदतिरिक्तस्य स्वीकारो निरर्थक एव भवेत्, यत आवरणनिवर्तकत्वरूपकार्यस्य प्रकाशात्मकवृत्त्यैव संपादनादिति ।

ननु ब्रह्मरूपचैतन्यस्यैकत्वात्, प्रमाणप्रमातृप्रमेयादिभेदव्यवस्था भवन्मते केवलाद्वैतमते कथमुपपद्येत, तदभावे सर्वलोकसर्वसाक्षिकलोकयात्रायास्तथा लौकिकवैदिकव्यवहारस्य गुरुशिष्यादिव्यवहारस्यानुयोगे, तत्राहाद्वैतवादी, मम मते, त्रिविधं चैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं प्रमेयचैतन्यं च । तत्रान्तः करणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, घटादिविषयावच्छिन्नचैतन्यं प्रमेयचैतन्यम्, एतदेव ब्रह्मचैतन्यमिति गीयते ।

ननु मम मते संविदोभिन्नं सर्वनाम न किञ्चिद्विद्यते "नान्यत् किञ्चित् मिषत्" "नेहनानास्ति किञ्चन" इतिश्रुतेः। अतः सर्वं सर्वदाभायादिति दोषोनापतति। इदं तत्र प्रमाणचैतन्यप्रमेयचैतन्ययोरेकत्वज्ञानप्रत्यक्षम्। प्रमातृचैतन्यप्रमेयचैतन्ययोश्चैकत्वस्थले विषयस्य घटादेः प्रत्यक्षत्वव्यवहारो भवतीति। तथाहि चक्षुरादिकस्य विषयेणसंयोगे सति घटाकारान्तःकरणवृत्तिः, यथा तडागोदकंछिद्रान्निर्गत्य कुल्यादिमार्गेण केदारान्प्रविश्य केदारवदेवचतुष्कोणाद्याकारं भवति तथैव परिणाभ्यन्तःकरणं तैजसंवृतादिवत्, चक्षुरादिद्वारेण वहिर्निर्गत्य घटादिविषयं प्राप्यतदाकारेण परिणमते, सोयं परिणामो वृत्तिः। ततश्च परिणामावच्छिन्नं चैतन्य विषयावच्छिन्नचैतन्यमेकीभवति, यत उपाध्योरेकदेशैककालिकतया भेदाजनकत्वात्। एवञ्च घटज्ञानं प्रत्यक्षं भवति। अनुमित्यादिस्थलेतु वह्न्याकारवृत्तेर्वह्निदेशे निर्गमानाभावेन वह्न्याकार वृत्तेर्वह्न्यवच्छिन्नवृत्तेश्च देशद्वयावस्थानेन नवन्हेः प्रत्यक्षत्वमपितु परोक्षत्वमेव तत्रोपाध्योर्भिन्नदेशस्थत्वेनोपधेयाभेदाप्रयोजकत्वात्। तत्रैवोपधेयस्याभेदो भवति यत्रोपाध्योः समानदेशत्वम्। तत्र वृत्तावभिव्यक्तचैतन्येन प्रत्यक्षादिव्यवहारो निष्पद्यते इति न कोपि लौकिकादिव्यवहारः प्रतिरुद्ध्यते इति चेन्न, एतादृशप्रक्रियानुसरणस्यहस्तसमावरणमात्रत्वात्। यथाशिरसि घातकदण्डपात· कालेतद्रक्षणाय हस्तेन मस्तकं समावृणोति। परन्तु दण्डपातान्निवारणं न भवति दण्डघातो न निवर्तते तथैवात्रापि ज्ञातव्यम्। तस्माद् ग्राह्यग्राहकभेदेन ज्ञानानां पार्थक्यं मन्तव्यमेव। विशेष विवरणं तु सति समयेऽन्यत्र करिष्यते इति दिक्।

॥ इति संविदैक्यमतदूषणेन संविन्नानात्वोपादनप्रकरणस्य तत्त्वदीपः ॥

ननु संविद एकत्वे नित्यत्वे व्यापकत्वे ज्ञानस्य सर्वदा सर्यत्र सत्वात् सर्वसंवद्धत्वाच्च सर्वपदार्थस्य सर्वदा भानं भवेदितिवधिरान्धाभावप्रसङ्ग इति सिद्धान्तिनाऽक्षेपेकृते केवलाद्वैतिना पुनः समाधानाय समुपस्थिते, सिद्धान्ती पुनदोषमुद्भावयितुं प्रक्रमते **ननुममभते संविदोभिन्नम्** इत्यादि। "नेह नानास्ति किञ्चन" इह पूर्वप्रकान्ते सर्वाधारे सर्वोत्पादके ब्रह्मणि, नाना किञ्चनवस्तु तत्वतो नास्ति, अपितु केवलमविद्यामात्रेणावभासते, नतु परमार्थभूतंवस्तुनास्ति, अर्थात् ब्रह्मव्यक्तिव्यतिरिक्त वस्तुसामान्याभावात्मकमेव ब्रह्मेत्यर्थः श्रुतेः। तथा च ब्रह्मव्यतिरिक्तपारमार्थिकं नानावस्तुयदि भवेत्तदा, ज्ञानस्यैकत्वव्यापकत्वे सर्वं सर्वदा भासेत इत्याकारकोपालंभो योग्यो भवेद्विशिष्टाऽद्वैतिनाम्। परन्तु संविद्भिन्नस्य सर्वस्याभावादेवास्मन्मते, सर्वंसर्वदाभायादित्यनुयोगभवतोऽकाण्डकाण्डित एव भवतीत्यर्थः। सिद्धान्तीसमाधानायोपक्रमते **इदंवद** इत्यादि। अत्र पृच्छामि भवन्तम् यतो योयोनीलः पीतइत्यादिकः सर्वसाक्षिकः प्रत्ययो जायते, तादृशप्रत्ययेनीलादिपदार्थस्यप्रत्ययो जायते, सप्रत्यय एव नास्ति अथवा नीलादिपदार्थस्य संविदभिन्नत्वेनैवनीलादिप्रतीतिरेव सेति

वद ? किं नीलादिर्न प्रकाशते, प्रकाशमानो वा नीलादिः संविदो ज्ञानान्नभिद्यते । प्रथमकल्पे अवाधितानुभवसिद्धोलोकवेदव्यवहारः कथं स्यात्, यतः पदपदार्थादिकं न किञ्चिदप्यवभासते । द्वितीयकल्पे भवदभिमतं ज्ञानाद्वैतं व्याहन्येत, प्रतीयमाननाना प्रपञ्चैक्ये संविदोपि नानात्वापातात् । नचाविद्याविलासत्वाद् भेदाभेदनिरूपणा । सा हि भेदाभेदनिरूपणा युक्तिवन्हिस्पृष्टा जातुपमाभरणवद्विलीयते । तथाहि यदीयमभवद्भिर्मन्यते इति विकल्पद्वयमत्रापतति ? तत्र प्रथमकल्पं दूषयितुमाह **प्रथमकल्पेऽवाधितानुभव** इत्यादि ।

सर्वानुभव सिद्धानेकप्रतीतिनिन्हवे, नानापदपदार्थप्रत्ययनिर्वाह्यसर्वोपि लोकसिद्धव्यवहारो वैदिकव्यवहारोवाऽबाधितानुभवसिद्धः कथं भवद्भिः साधितोभवेन्न कथमपि सिद्धोभवेदिति । अथद्वितीय पक्षंदूषयितुमुपक्रमते **द्वितीय···व्याहन्येत** इत्यादि । अर्थात् द्वितीय कल्पस्य स्वीकारे यदद्वैतंभवत् सिद्धान्तसिद्धं भवदभिमतं च तस्य व्याघातः स्यात् । अर्थात् प्रतीयमानानेकप्रपञ्चेन सहसंविद ऐक्ये संविदोपि नानात्वं प्रसज्येत एवेति स्वाभिमतज्ञानाद्वैतस्य हानिस्तथात्वे चापसिद्धान्तापातश्चेति भावः । अथ पुनः शङ्कते केवलाद्वैतवादी **नचाविद्याविलासत्वा**दित्यादि । नीलादिभेदानां विशेष्याणामत्राध्याहारः कर्त्तव्यः । ततश्च नीलादिभेदानां भिन्नतयाऽभिन्नतया निरूपणा शक्यत्वं च तस्या अविद्या विलासत्वादेव । अविद्यावलायातस्याविद्याकार्यस्यनीलादिभेदस्य मिथ्यात्वेन मिथ्यार्थेचदुर्घटत्वस्य भूषणायमानत्वेन भेदाभेदनिरूपणमुपपद्यते एवेति । उत्पत्त्यननुवार्तत्वादेव च "सर्वंसदा भायादित्याद्यापत्तेरनवकाश इति पूर्वपक्षिणां दोषाभावनिरूपणाभिप्रायः ।

सिद्धान्ती परिहरति **साहि** इत्यादि । अर्थात् युक्तितर्केण यथायथमविद्यास्वरूपंविचारयामि, तथा तथाविनश्यति सिकताकूपवद् विशीर्यते, यथायथा न्यायवन्हिनाऽविद्यास्वरूपं तापयामि तदातत् जतुभूषणवद्विशीर्यते एव नतुस्थिरायते, अर्थात् यं भेदाभेदनिरूपणमविद्यायाविलासः कार्यमिति कथयसि, सैवाविद्यान्याययुक्तिप्रमाणपराहता, स्वात्मानमेव लब्धुं योग्या न भवति, यथाजतुधातुनिर्मितमाभूषणं तावदेवस्वात्मानं लभते यावन्नाग्निना तापितं भवति । वन्हितापसंपर्कात् स्वात्मानमेव जहाति विलीयते इति यावत् । यथा सिकतानिर्मितः कूपस्तावदेवास्ते यावद्दण्डाघातं न प्राप्नोति । तथैव प्रकृते यस्या अविद्यायावलेन भेदाभेदनिरूपणं कर्तुमिच्छसि तामधिकृत्य यदा विचारयामि सैव विनश्यतीति । अयमर्थः आविद्यकस्य भेदस्यनीलादिसम्बन्धिनो मिथ्यात्वान् मिथ्यार्थेदुर्घटत्वस्यनेत्रकज्जलवत् भूषणत्वात् तदुक्तं **अलौकिकत्वमेतेषांभूषणंनतु दूषण**मिति । एवञ्च भेदनिरूपणमुपपद्यते एव । उपपत्यननुवर्तित्वादेव च **सर्वंसदाभायादि**त्यादि सिद्धान्तापत्तेरनवकाश इति भावः । एवञ्चाविद्याविलासत्वमर्थादविद्याकार्यत्वं च भेदादि

विद्याविद्याभावात्मिका स्वीक्रियते तदा निरूपाख्यस्वभावत्वात् वस्तु नियन्त्रणे नशक्ता प्रपञ्चस्य नसिद्ध्यतीत्युत्तरग्रन्थस्याभिप्रायः। सम्प्रत्येतस्यावान्तरप्रश्नस्य सिद्धान्ती पराकर्तुमुपक्रमते=अर्थात् न्यायपराघातं प्रपञ्चयति **तथाहि** यद्यविद्येयमित्यादि। अयंभावः

"तत्सादृश्यमभावत्वं तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्चनञर्थाः षट् प्रकीर्त्तिताः॥"

अयमर्थः समासान्तर्गतस्य नञः षडर्थाः संभवन्ति. सादृश्यम्, अत्यन्ताभावः, तदन्यत्वं, भेदः, अल्पता च अप्राशस्त्यम्, विरोधश्चेति षट्। तत्र "अनिक्षुः सरः" इत्यत्र न इक्षुरनिक्षुरिति विग्रहे, दीर्घत्वमिष्टजलत्वे न सरसः सादृश्यमवगतं भवति समासान्तर्गतनञ् वलात्। एवं अघटं भूतलमित्यत्र न विद्यते घटोयत्रेति वहुव्रीहिसमासान्तगर्तस्य नञः अत्यन्ताभावोऽर्थः प्रतीयते, तेन घटात्यन्ताभाववद्भूतलमित्यर्थोऽवगतोभवतीति। एवमनुदराकन्येत्यत्र न विद्यते उदरं यस्याः सा अनुदरेति विग्रहेनञो वलादल्पोदरत्वं प्रतीयते नत्वत्यन्ताभावो लोकविरोधादर्थान्तरासंभवादित्यतो योग्यत्वादल्पत्वमेवार्थः। यथावा अलवणकंशाकमिति। अप्रशस्तत्वमपि तदर्थः, अप्रशस्तो ब्राह्मणोऽब्राह्मणो वार्धुषिको वार्धुकिको न तु ब्राह्मणभिन्न इत्याद्यर्थोऽयोग्यत्वात्। विरोधि भवत्येवं नञर्थः यथाऽसुर इत्यत्र, न सुरोऽसुर इति विग्रहेनात्यन्ताभावादिस्तदर्थः सुरभिन्नोवेत्यर्थः। तथात्वेसुभिन्नत्वस्य देवनरादिषु सर्वत्राविद्यमानत्वेन नरादिष्वपिविद्यभावत्वात्, विशिष्टाभावोभयाभावस्य सुरेष्वपि संभवात्, जात्याविरोधिविभीषणेपि तथात्वात्। न चेष्टापत्तिः दयादक्षस्य करुणासिन्धोर्भगवतो रामस्य दयादृष्ट्याऽपगतसंसारतापस्यापगमेनासुरत्वस्यापगमात्। ततः प्रभृतिराक्षसकुलोत्पन्नोपि विभीषणः प्रातः स्मरणीयानां चिरजीविगणनायामपि परिगणितोवभूवेति। एतादृशमहाजनेऽसुरत्वस्य कथं संभावनेति विदाङ्कुर्वन्तु विद्वांस इति।

किमियमविद्या विद्याया अभावरूपा वा विद्याभिन्नावा ? इति योग्यत्वात् विकल्प द्वयम्। **यदीयमविद्याविद्याभावात्मिके**त्यादि। अर्थादत्रविकल्पद्वयं भवति। यथार्थज्ञानरूपायाः संविद्रेन पर्यायात्मिकायाः अभावोऽविद्या, अथवा विद्या भिन्नं भावान्तररूपा वा ?। तत्र न प्रथमः पक्षः साधीयान्, अत्यन्ताभावप्रतियोगित्वमलीकत्वमितिनये, तस्या अलीकत्वमेव स्यादित्याशयेनाह **निरूपाख्यत्व**मित्यादि, तत्र निरूपाख्यत्वं निःस्वरूपत्वं तुच्छत्वमितियावत्। उपाख्या च धर्मविशेषरूपैव, असतितुच्छे च धर्माभावात्, धर्मश्च धर्मिणितिष्ठतीति नियमः। तुच्छे, च धर्मधर्मिभावस्याभावात्। धर्मधर्मिभावे च घटादिवत् तुच्छत्वमेवनिवर्तेत। तथा च भवदभिमता विद्या भावात्मिका शून्यस्वरूपैवेति स्वसिद्धान्तहानिर्बौद्धमतप्रवेशश्च भवन्मतके समापतेत्। तथा च स्वयमेवालब्धसत्ताकाऽविद्या कथमिव प्रपञ्चस्य परिणाम्युपादानं भवेदित्यभिप्रायः।

स्यात् । यदीयमविद्यार्थान्तरं तदा शोभना ते भेदाभेदनिरूपणा । अर्थानर्थान्तरत्वादि-

इत्येवं प्रथमकल्पं दूषयित्वा द्वितीयकल्पं दूषयितुमुपक्रमते **अर्थान्तरम्** इत्यादि । यदि विद्यातोऽर्थान्तरमविद्या, तदा भेदाऽनिरूपणा=भिन्नत्वेनाभिन्नत्वेनवा, अशक्य निरूपणा चाऽर्थान्तरं चेत्युपपादयितुमशक्यैव भवेत् । कथं निरूपणंनस्यादिति चेत् , स्ववचनविरोधादेवेति गृहाण वाग् विरोधमेव दर्शयति **अर्थानर्थान्तरत्वादि विकल्पोऽविद्यायानसंभवती**त्यादि, अर्थादर्थान्तरत्वादि विकल्पोऽविधाया न कथमपि संभवति स्ववचनविरोधात् । अद्वैतमते सर्वं ब्रह्मण्येव कल्पितम् आरोप्यस्य सत्वमधिष्ठानेनैव, नतु आरोप्यस्य सत्ताऽधिष्ठानसत्तातो भिन्ना । एवञ्च विद्यातोऽर्थान्तरं तदाऽसौ विद्यते कथनं कथनं कथनं कथमविरुद्धमपितु विरुद्धमेवयतोऽधिष्ठानविद्यापेक्षया भिन्नत्वे तत्स्वरूपमेव खपुष्पायमाणंभवेत् । तदापुनरसौ, इति कथनमिति पररपरमतिविरुद्धमेव "मातामेवन्ध्येतिवत्" यथा जिह्वा मे नास्ति वच्मिचेति वद्वा । तस्मादर्थानर्थान्तरविकल्पो नैव युक्त इति ।

अयमाशयः प्रकरणस्य तथाहि—अपिचास्या अविद्यायाः स्वरूपं किमात्मकमिति ब्रूहि "नजानामीति प्रतीतेर्ज्ञानप्रागभावे तदीयध्वंसे एव वा व्यावहारिकव्यवहारोपलंभात् । ज्ञानोत्पत्तेः प्राक्काले तत्प्रध्वंसानन्तरमेव वाऽज्ञानव्यवहारोपलंभात् । नहि, आभ्यामन्यः कश्चित्प्रकारः श्रुतउपपद्यते नवेयं ज्ञानात्यन्ताभावरूपा, तथा सति, वेद्यस्य घटादेरभावो नानिर्वचनीयस्तथैव विद्याया अभावोपि नानिर्वचनीयः स्यात् । नवा किञ्चिदस्या लक्षणं वा पश्यामि । न च विद्याया अभावोऽविद्येति लक्षणम् ? तथा सति विद्यातिरिक्तस्य सर्वस्य जगतो विद्यात्व प्रसङ्गात् । नचानादित्वे सतिज्ञाननिवर्त्यमज्ञानमिति तल्लक्षणमिति वाच्यम् , तथा सति ज्ञानप्रागभावे व्यभिचारात् । ज्ञानप्रागभावो ज्ञाननिवर्त्योऽनादिश्च स्वप्रतियोगिजनकः स्वप्रतियोगि निवर्त्यश्च भवति प्रागभवादेस्तत्र गतत्वादज्ञानलक्षणस्येति तत्रभवत्येवातिव्याप्तिरिति ।

न चानादित्वे सति भावत्वमेवाज्ञानलक्षणं भवतु । प्रागभावस्याभावत्वेन तत्र भावत्वस्याभावान्नातिव्याप्तिः । नचाज्ञानस्यानादित्वं शङ्कनीयम् "जीव ईशो विशुद्धाचित्तथा जीवेशयोर्भिदा । अविद्यातच्चितो योंगः षड्स्माकमनादयः ।" इत्यभियुक्त्येति वाच्यम्, तथा सत्यात्मवदविद्याया अपि नित्यत्वप्रसङ्गात् । यथाऽत्माऽनादिभावत्वात् नित्यत्वेन विनाशित्वं न भवति तथैव विद्यायाअपि अनादिभावत्वेन तत्त्वज्ञानविनाश्यत्वाभावादद्वैतव्याघातप्रसङ्गात् । तथा च "त्वदीयोवाणस्त्वामेव प्रहरतीति न्यायविषयतांनातिक्रामसि । ननु परमाणुश्यामिकाऽनादिभावरूपादिपाकेन विनश्यतीति तद्वदेवाज्ञानस्यापि विनाशकस्यादर्शनात् , ईश्वरज्ञानस्य तन्नाशकत्वस्यास्वीकारात् । अस्तु वा यथा कथञ्चित् अविद्यायाः किमपि लक्षणं तथापि एतादृशाज्ञानस्य किमपि प्रमाणं न पश्यामि ।

ननु "गाढ़मूढोहं मह्यं न किञ्चिदवेदिषम्" इति सुप्तोत्थितस्यपरामर्शान्यथाऽनुपपत्त्या सुषुप्तिका ज्ञानानुभव एवाज्ञाने प्रमाणम् अनुभवं विना स्मरणस्यानुपपत्तेः। तदुक्तमभियुक्तैः— "प्रमाणमनुभूतिः स्यात्स्यतेरन्यस्मृतिः पुनः। पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते" इति चेन्न,

सुषुप्तिकालिकज्ञानाभावस्य प्रबोधकालेऽनुमीयमानत्वात्। नायं सुषुप्तिकानुभवजनितः परामर्शोऽपितु समुत्थितस्य प्रबोधकाले एवायमनुभवो जायते, सुषुप्तिकालो ज्ञानाभाववान् कालत्वात् स्वप्नकालवदिति नायं स्मरणात्मकज्ञानस्य मूलभूताज्ञानानुभवः। किन्तूत्थितस्य प्रवोधकालिका ज्ञानानुभवेति। नवा "अहमज्ञ" इति प्रत्यक्षज्ञानं भवदभिमताज्ञाने प्रमाणम्, तस्य ज्ञानाभाव विषयकत्वेनापि सार्थकत्वात्। एवमस्य भावत्वानादित्वस्य भवदभिमतस्य बोधने औदासीन्यात्। उक्तप्रतीतेरज्ञानवानहम्" इति नार्थः किन्तु सुषुप्तिकालिकज्ञानाभाववानहमित्येव प्रतीतेः। न चाभावज्ञानस्याधिकरणप्रतियोगिबोधपराधीनत्वनियमेन सुषुप्तौबोधाबोधाभ्यां व्याघातात्। अर्थात् यस्याभावो गृह्यते तदभावप्रतियोगिनस्तदधिकरणस्य च प्रथमतो ज्ञानमावश्यकम्, प्रमितप्रतियोगिकाभावस्वीकारात्, तदुक्तमभियुक्तैः—

"लब्धरूपेक्वचित् किञ्चित् तादृगेव निषिध्यते।
विधान (प्रमाण) मन्तरेणासौ ननिषेध्यस्य संभवः॥ इति।

एवञ्च यदि सुषुप्तिकालेऽज्ञानप्रतियोगिनो ज्ञानस्य तादृशज्ञानाधिकरणात्मनस्य च ज्ञानं वर्तते तदाऽज्ञानप्रतियोगिनो ज्ञानस्य विरोधिनः सद्भावादेवनाज्ञानप्रत्यक्षम्। अधिकरणप्रतियोगिनोऽभावेकारणाभावादेवनाज्ञानप्रत्यक्षम्। एवं प्रकारेण प्रतियोगिज्ञानाज्ञानाभ्यां व्याघातो भवेदेवेति वाच्यम्, भेदसादृश्यवत्तदुपपत्तिसंभवात्। अर्थात् यथा सदृशं भिन्नश्चेत्यत्रसादृश्य प्रतियोगिनश्चन्द्रस्यानुयोगिनो मुखस्य च तत्तद्रूपेणाज्ञानेपि, यथावा भिन्नमित्यत्रचानुयोगिप्रतियोगिनोस्तत्तद्रूपेणाज्ञानेपिमुकुलिततया भेदसादृश्ययोर्ज्ञानं जायते एव तथैवाज्ञानस्थले सुषुप्तौ ज्ञान प्रतियोगिनोऽनुयोगिन आत्मनो वोधाभावेपि अज्ञानभानं निरावाधस्यादेवेति चेन्न, तथा सति सादृश्यवदेव भावत्वप्रसङ्गात् "निर्विकल्पकबुद्धिविषयत्वं भावत्वमिति लक्षणात्। भावत्वस्वीकारेऽनादिभावस्यात्मवदेवनित्यत्वप्रसङ्गोभवेत्। नवा "इन्द्रोमायाभिः पुरुरूप ईयते" इत्यादि श्रुतयोऽज्ञाने प्रमाणम्, माया पदेन परमेश्वरशक्तेरेव कथनात्। तथा अज्ञानपदेन प्रलयकालिकजीवानां ज्ञानाभावस्यैव प्रतिपादनात्। तदेवं लक्षणप्रमाणयोरभावेनभावरूपमनादिरूपमज्ञानमिति कथनं सर्वदाऽज्ञानविजृंभितमेव। तदेवमज्ञानस्य निराकरणेन तन्मूलकाद्वैतवादोपि निराकृत एव भवतीति ज्ञातव्यम्। तथा विशिष्टाद्वैतस्थापकानेकश्रुतिस्मृतिप्रमाणेभ्यो विशिष्टाद्वैतं श्रीरामानन्दाचार्याभिमतमेव समीचीनम् "एवञ्चाखिलश्रुतिस्मृतीतिहासपुराणसामञ्जस्यादुपपत्तिबलाच्चविशिष्टाद्वैतमेवास्य ब्रह्ममीमांसाशास्त्रस्य विषयोनतुकेवलाद्वैतम्। तथाहि चिदचिद्वस्तुनोः शरीर

विकल्पनास्याः सेवेत। विद्यातोऽर्थान्तरमविद्येति वचनं व्याहतमेवभवति अर्थान्तरभावोऽविद्याया आविद्यकमेवेति वाच्यम्, तथासति परमार्थतोऽविद्यैव विद्याभवेदिति।

किञ्च संवित् शुद्धाचेतना च अविद्या तु नैतादृशी तत्केनकारणेन सेयमविद्याऽन्यैतयाऽपृथक्सिद्धत्वेन प्रकारत्वं तद्विशिष्टस्य ब्रह्मणश्च शरीरित्वेन प्रकारित्वं शाश्वतिकमेव काश्चनश्रुतयोऽभिदधते 'पृथगात्मानं प्रेरितारञ्च मत्वाजुष्टस्ततस्तेनामृतत्वमेति' 'ज्ञाज्ञौद्वावजावीशानीशौ' 'भोक्ता भोग्यं प्रेरितारञ्च मत्वा'' इत्यादिरूपेणानन्दभाष्ये बहुचर्चितत्वात्। मयापि तद्विवरणावसरे यथाकामं प्रपञ्चितत्वाद्विरम्यतेऽधुना विशेषविचार इदमींयः सति प्रसंगेपुनर्विचारितः स्यादित्यलम्।

एतावता गतप्रकरणेन अविद्याया विद्यातोऽर्थान्तरानर्थान्तरादिविकल्पो युक्तितर्कपराहतत्वात् न भवतु। परन्तु अविद्याया विद्यापेक्षया यदर्थान्तरत्वं न तद् व्यसनितया क्रियते, किन्तु यदविद्याया विद्यापेक्षयाऽर्थान्तरत्वं तदपि न पारमार्थिकम्, अपितु तत्कल्पितमेव, कल्पितभुजंगे यथा सर्पत्वं कल्पितमेव ननु पारमार्थिकं तथैव प्रकृतेऽविद्याया विद्याभिन्नत्वमपि कल्पितमेव न वास्तविकमित्याशयेनाह **अर्थान्तरभावोपी**त्यादि। अर्थात् येयमविद्या तस्या अविद्याभिन्नत्वं कल्पितमेव न वस्तुरूपम्, यथाऽविद्याब्रह्मणि कल्पित एवेति न ततो कोपि दोष इति प्रश्नाशयः। उत्तरयति, **तथासती**त्यादि। अर्थात् विद्यातोऽविद्यायां यो भेदः स च कल्पितोऽर्थात् विद्यातोऽविद्याया भेदो नास्तीति स्वीक्रियते तदाभेदानिरूपणे भवदभिमताऽविद्या विद्यारूपैव प्रसज्येत नीलघटयोर्भेदाभावेऽभेदवदिति।

वस्तुतस्तु ज्ञानभिन्नतयैवाविद्यास्वरूपनिरूपणमर्हतीत्याशयेनाह **किञ्च** इत्यादि, अर्थात् येयं संवित् सा तु शुद्धा समस्तदोषविनिर्मुक्ता तथाऽजडा घटादिविषयवत् जाड्यरहिता च इयमविद्या तु न शुद्धा किन्तु तद्विपरीता जडरूपा च विषयत्वात् एवं चेयमविद्याविद्यातो भिन्ना केनकारणेन न स्वीक्रियते भवद्भिः, अपि तु भिन्नैवमन्यताम्। तथा च शुद्धाजडसंविदपेक्षया सविकारा शुद्धजडा विद्यायाः पारमार्थिको भेद एव कुतो न निरूप्यते जलाग्निवदिति। तथा च परमार्थिको विद्या विलासो भेदः सर्वोपि एकस्या एव सकलपदार्थप्रकाशकत्वे सर्वदाभासेत इत्याकारको यो दोषः पूर्वं प्रदर्शितः स च दोषोऽद्वैतमते वज्रलेपायते एवेति न ततो विमोको भवतीति।

अथाविद्याया भिन्नत्वतदितराभ्यामनिर्वचनीयत्वं निराकृत्य अविद्यायाः स्वरूपस्यानुपपत्तिमपि दर्शयितुमुपक्रमते **अपि चयेयमविद्या** इत्यादि। अपि च येयमविद्या यस्या अभावरूपा यद्भिन्ना वा साविप्रतियोगिरूपा सा किं स्वरूपेत्यर्थः। अर्थात् विद्याया अत्यन्ताभावरूपा तदन्योन्याभावरूपा वा भवतु त्वन्मतेऽविद्या। तत्रात्यन्तभावान्योन्याभावयोः प्रतिविधया भासमाना विद्या

वेति कुतो न निरूप्यते । अपि च येयमविद्या भवन्मतप्रसिद्धा सा किं विद्याया अभाव रूपा ? विद्याया भिन्ना वा ? तत्र सा विद्या संवित्तिरूपा वेद्या वा वेदितृरूपा वा ? तत्र विद्यायावेद्यत्वे वेदितृस्वरूपत्वे वा अस्या अविद्यायास्ताभ्यां विद्यावेदितृभ्यां निवृत्तिर्न भवेत् यतो ज्ञानं विनाऽज्ञानस्यान्येन निवृत्तिरिति ते मतम् । विद्या संविदेवेति चेत् तस्या

स्वरूपप्रमाणाभ्यां किं स्वरूपेति विकल्पो विचारार्थ उपन्यस्यते तत्र प्रतियोगिस्वरूपा विद्या वेद्या, वेदितृस्वभा वा ? उभयपक्षेऽपि दोषमाह "**वेद्यत्वेवेवितृरूपत्वे**" इत्यादि । ज्ञानस्य ज्ञानान्तरविषय· त्ववेदितृस्वरूपयोरविद्यानिवर्तकत्वाभावात्, तद्रूपायाविद्याया अपि अविद्यानिवर्तकत्वाभाव प्रसङ्गस्तवाद्वैतिमते इति । यदि कदाचित् संवित्तिरूपत्वमविद्यायामन्येत, तदा तत्र दोषं दर्शयति **संविदेवेतिचे**दिति अर्थात् संवित्स्वरूपैवाविद्या, तदातस्याः संविदः सर्वदैव नित्यत्वेन सद्भावात्, तदविद्यायाः कुत्रापि न संभवो भवेत् । "नित्यं विज्ञानमनन्तं ब्रह्मेत्यादि श्रुत्या संविदो नित्यत्व सिद्धत्वात् । सर्वमूर्तसंयोगितया सर्वत्र सद्भावाच्च तादृशसंविदभावलक्षणा विद्याया असिद्धिरेव स्यात् । एवञ्च स्वस्वरूपमेव जह्यादियं स्वभावतपस्विनी अविद्येति भावः। ननु संविद्रूपाविद्या, ततो-विरुद्धैवा विद्येति रोचते तव तदापि दूषणान्न निवृत्तिर्जायते, तत्राह '**किञ्चेयं विरुद्धावे**ति । अर्थात् संवित्स्वरूपविद्या विरुद्धैवाविद्या तदा सूर्यकिरणव्याप्ते प्रदेशे दिवाकरे वा तपति सति, दिवाकर विरोधशीलस्य गाढान्धकारस्येव सर्वव्यापकज्ञानव्याप्ते सर्वत्रसंविदि वा सत्यां ना विद्यायाः समावेश इति प्रकरणस्यपिण्ड़ितो भावः । एवं चाविद्याया विद्याविरुद्धत्वेवर्णिते तस्य अविद्यायाः कुत्रापि देशेकाले वा न संभवो यतोऽद्वितीयया विद्ययैव सर्वं स्थावरजङ्गमं सूक्ष्मं स्थूलं च जगत्, सर्वमपि, विद्ययाव्याप्तं, ततो व्यतिरिक्तस्थानाभावो यत्र सानिष्कण्टकं स्थानमवाप्य स्वस्थाऽवस्थितिं प्राप्नुयात्, इति शेषः । अत्रा**द्वितीयया विद्यया** इति कथनेन विद्याभेदवती अविद्येति, अविद्याया निर्वर्चनमप्यद्वैतवादिनां दुर्वचमेवेति, व्यञ्जनयाऽभिव्यञ्जितम् ।

ननु विद्याया अत्यन्ताभावो वाऽविद्या, विंद्या भिन्ना वाऽविद्या, विद्याविरोधिनी वाऽविद्येति यथा-कथितम्, तथैव, यदि संविदभावो विद्यासंविद् भिन्ना वाऽविद्या, संविद्विरुद्धा, वाऽविद्येति कल्पत्रयं रोचयते, तदा संविदोऽद्वैतप्रतिज्ञाया हानिरेवभवेदित्याशयं मनसिनिधायोपसंहारव्याजेनाहाचार्यः "**संविद इष्येत**" इत्यादि । अथवा कल्पत्रयेपि दूषणमनुवदितुमाह "**संविद इष्येत**" इत्यादि । अयमाशयः कल्पत्रयेपि, अर्थात् संविदोऽत्यन्ताभावरूपा संविद्भिन्नरूपा, संविद्विरुद्धरूपा यदि काचिदनादिभावात्मिकाऽविद्याभवेत्तदासंविदैवैका "एकमेवाद्वितीयम्" इति श्रुतिवलाद् भवदभिमतं ज्ञानाद्वैतं न सिद्ध्येत्, यतस्ततोतिरिक्तस्याज्ञानस्य भानतया द्वैतमेवजातं ततश्च सिद्धा-न्तस्तंभरूपज्ञानद्वैतस्य हानिरेवापतेदिति ।

अविद्याया भावरूपत्वे नानादिभावात्मकात्मवत् निवृत्तिर्न भवेत् । किञ्चेयमविद्या यदि विद्याभिन्ना तद्विरुद्धा च, तदा तादृशाविद्यायाः कुत्रापि संभवो न स्यात्, दिवाकर करव्याप्तप्रदेशे गाढान्धकारवदिति । यदि च ज्ञानाभावरूपत्वं ज्ञानाविरोधित्वं वा संविद इष्येत तदा ज्ञानाद्वैतप्रतिज्ञा निराधारा भवेत् । ज्ञानविरोधिन्या संविद एव विद्यमानत्वात् ।

॥ इति अविद्यायास्वरूपनिर्वचनीयत्वानुपपत्तिप्रकरणम् ॥

अथ मन्मते त्रिविधो हि पदार्थः पारमार्थिकव्यावहारिकाध्यासिकभेदात् । तत्र कालत्रयेपि प्रतिपन्नोपाधौनाभावबोधनं सप्रथमः पारमार्थिकः । यथाऽऽत्मरूपं ज्ञानम्, वृत्तिज्ञानं ज्ञानं भवदपि नात्मरूपमपितु वृत्तिरूपम् । यस्य यावद्व्यवहारमनुवर्तनं भवति स व्यावहारिको यथाऽकाशादिप्रपञ्चः सर्गादारभ्य यावत्प्रलयमवस्थानात् । यश्च पदार्थो यावदज्ञानमनुवर्तते सप्रातिभासिकः । यथा शुक्तिरजतादिः शुक्तौ प्रतिभासमानस्य ज्ञानभावकालेऽवस्थानात्, अयमेव दृष्टिसृष्टिवादो वाचस्पत्यभिमतः । प्रतिपन्नोपाधौ शुक्तिकारूपाधिष्ठाने शुक्तिरियं न पुनः रजतमिति ज्ञानेन निषेधप्रतिपादनात् । तत्रैतेषु त्रिविध पदार्थेषु मध्ये “सत्यं ज्ञानमनन्तं चेति श्रुतिबलेन संविन्मात्रं परमार्थसत्, कालत्रयेप्यबाधात्, अन्यत् सर्वं न परमात्र सदित्येतादृशैक्यमेव परमार्थ सदैकमस्माकमभिमतम् । अविद्यादेस्तु, अपारमार्थिकत्वेन, तेषामविद्यादीनामनादिभावत्वेपि नाद्वैतमतस्य हानिर्भवतीति चेत्सत्यम् अनादित्वेनाभ्युपगतायाविद्यायाः कल्पकदोषान्तरस्याभावेना पारमार्थिकत्वायोगात् । यथा शुक्तिरजतमित्यत्र रजतस्य कल्पको दोषान्तरं चाकचिक्यं सादृश्यादिकं मूलं कारणमविद्यैव, इहचाविद्याया कल्पकदोषान्तरं नास्तींति कथमविद्याया अपारमार्थिकत्वं तदभावेनार्थत एव पारमार्थिकत्वमायातीति ।

न च विद्यायाः कल्पनां प्रति अधिष्ठानतया यथा ब्रह्मणः कारणत्वं तत्कल्पनां प्रति अब्रह्मण एव दोष विद्ययापि कारणत्वे, तत्र ब्रह्मणोऽविद्या कल्पक दोषस्य दुर्घटत्वात् । नहि विशुद्धं विशुद्धगुणकं च ब्रह्मदोषरूपतां भजते, यथा जीवनोपयुक्तममृतम् विषवद्दोषायते गुणे दोषव्यवहाराभावात् । यदि कदाचित् उपकरणमन्तरेणाप्यविद्यायाः कल्पनमिष्येत तदा मोक्षकालेपि कारणं विनापि तस्याः कल्पनमनिवारितमिति मोक्षार्थप्रयासो महाधियां विफलतामियात् । अविद्या निवृत्त्यर्थमेव परमेश्वराराधनं परन्तु तत्सद्भावेपिच्छिन्नमूलाप्यविद्या निकृत्तबदरीवृक्षवत् शतशिखरा प्रादुर्भवेत् । अर्थात् मोक्षेपि तस्या अविद्यायाः प्रादुर्भावप्रसङ्गादित्यलं मोक्षाशा शास्त्राणां महर्षिणां च स्यादिति । एवम् आत्मवदनादिभावस्य विनाशाभावेन ज्ञाननिवर्त्यत्वमप्यज्ञानस्य न स्यादिति । अप्रस्तुत प्रसङ्गाद्विशेषविवरणंनात्र कृतम्, समये करिष्यते इति दिक् ।

॥ इति विद्यायाः स्वरूपनिर्वचनानुपपत्तिवर्णनप्रकरणस्यतत्त्वदीपः ॥

किं चासौ कस्याश्रये भवति । जीवस्येति चेत् कोयं जीवो यस्येति चेत् एवमसमाधानमन्योन्याश्रयणापातात्। न च ऋतेजीवादविद्या न वा जीवमन्तरेणाविद्या । नच

अथ विद्यायाः स्वरूपानुपपत्तिं प्रदर्श्यतदनुतस्या अविद्याया आश्रयानुपपत्तिं प्रदर्शयितुं प्रकरणान्तरमुपक्रमते **किं चासौ कस्येत्यादि** । अर्थात् "अहमज्ञ" इति प्रतीतावज्ञानं भासते. तत्राधेय भूताज्ञानस्य विषयभूतं ब्रह्म यतोऽज्ञानस्य विषयो ब्रह्मैव । ब्रह्म विषयकाज्ञानवानहमित्यनुव्यवसायात् । आश्रयस्तु जीवो यतस्तस्मिन्नेवाज्ञानस्य वर्तमानत्वादिति वाचस्पतिमिश्राः । संक्षेप शारीरकाचार्यास्तु-—

"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥" इति ।

अस्यार्थः तमसोऽज्ञानस्य निर्विभाग, सर्वथा जीवेश्वरादिविभागरहितकेवलाचितिश्चैतन्यमात्रमेव, आश्रयत्व विषयत्व भागिनी शुद्धं चैतन्यमेव, अज्ञानस्याश्रयरूपं विषयरूपं च भवति । ब्रह्मविषयकं ब्रह्माश्रितं चाज्ञानमित्यर्थः । किन्तु पश्चिमोऽविद्योत्तरकाले स्वस्वरूपं प्राप्नुवन् जीवः स्वकारणभूततमसो नाश्रयो भवति न वा विषयोऽपि भवतीत्यर्थः । कारणजन्यत्वात् कार्यस्येति पूर्ववृत्तित्वाभावेन जीवो नाश्रयो नापि विषय इति ।

एवं हि अद्वैतवेदान्तिनामाचार्य भेदेन प्रक्रिया । तत्राचार्याः सम्प्रति अज्ञानस्याश्रयविषये विमर्शयितुं भूमिकामारचयन्ति **किंचासौ कस्येत्यादि**, न विद्यते समाधानमुत्तरं यस्य तदसमाधानमसमाधेयमित्यर्थः । जीवो हि अविद्यया कल्पितः, यथा घटाद्यवच्छिन्नो व्यापकोप्याकाशो घटाकाश इति कथ्यते । तत्राविद्या कल्पितो जीवभाव इत्येवं रूपेण जीवस्य कल्पने सिद्धे सति, तादृशजीवाश्रितत्वात् अज्ञानस्य सिद्धिः एवं चाविद्या सिद्धो जीवस्य सिद्धिर्जीव सिद्धौ च तस्य अविद्याया सिद्धिरित्येवं च जीवविद्यापक्षेऽद्वैतमते अन्योन्याश्रयदोषो भवति स च दोषो न समाधातुं शक्यः ।

न चासौ दोषः सिद्धान्त शिरसि पातनीयः । यतो मदीयसिद्धान्ते जीवस्याकल्पितत्वेनार्थात् पारमार्थिकत्वाज्जीवस्य । तादृश जीवेऽज्ञानाभ्युपगमेऽपि क्षत्यभावात् । किन्तु परमते एवायं दोषः प्रसरतीति । अन्योन्याश्रयमेव योजति मूलकारः **न वाजीवमन्तरेणाऽविद्येत्यादि** अर्थात् जीवस्य सद्भावमन्तरेणाश्रयाभावात् तदीयाऽविद्याया अवस्थानमसंभावितम् । अविद्याया अभावे च तदुपाधिकजीवस्यावस्थानं सर्वथैवासंभवितम् । इति जीवसिद्धौ जीवाविद्यायाः सिद्धिरविद्यासिद्धिरिति भवत्येव ते मतेऽनवस्थानम् । अस्मन्मते नु जीवस्याकल्पितत्वेन तादृशजीवेऽविद्या स्वीकारेपिनकोऽपि दोष इति ।

वीजाङ्कुरवदयं दोपः, जीवोत्पत्तेरयोगात्। ब्रह्मैवाविद्याया आश्रयः संभवतीतिचेन्न ब्रह्मणः सदा सर्वज्ञत्वेन विभ्रमासंभवात्। नचाविद्याकृतदेहात्मप्रत्ययाधीनत्वं भ्रमस्येति वाच्यम् ब्रह्मसर्वज्ञतायाः स्वाभाविकत्वश्रुतेः भेदावभासगर्भिता सर्वज्ञता मृपैवेतिचेत्,

ननु यथा वीजाङ्कुरस्थले, वीजसद्भावे एवाङ्कुर प्ररोहोऽङ्कुरसद्भावे एव वीजादय इत्येवं परस्परसापेक्षत्वेप्यनादित्वात् परस्पराश्रयो न दोषायेहापिस्यात्तत्राह **न वीजाङ्कुरवदयमित्यादि।** वीजाङ्कुरप्रवाहे जातिमूलकोऽन्योन्याश्रयो न तु व्यक्तिमूलकः तदीय प्रवाहे एकमंङ्कुरं प्रति तदुत्पादकवीजस्यापेक्षणात्। वीजं प्रति तु तदुत्पादकाङ्कुरान्तरस्यापेक्षणात् यतस्तौ वीजांकुरावनित्यौ न तु नित्याविति तत्र व्यक्तिभेदमाश्रित्य निर्वाहेपि, प्रकृते जीवाविद्ययो नैवं जीवस्य नित्यत्वाद नित्यत्वाच्चाविद्याया इति। अर्थात् वीजाङ्कुरप्रवाहस्थलेतु, अन्यान्यस्य वीजस्य तदङ्कुरस्य च जन्यजनकभावो विद्यते। प्रकृते तु नैवं संभवति। एकजीवस्थानेऽनेकजीवप्रसङ्गात्, तथा जीवानामुत्पादविनाशप्रसङ्गेन कृतनाशाकृताभ्यागमदोषप्रसङ्गादिति भावः। ननु परस्पराश्रयदोषप्रसङ्गात् न भवतु जीवोऽविद्याया आश्रयस्तथा जीवस्यानित्यत्वप्रसङ्गादपि। ततोऽमुं पक्षं विहाय नित्यं परं ब्रह्मैव विद्या विपयवत् अविद्याया आश्रयमपि भवतु तस्य नित्यत्वेनोपर्युक्तदोषा प्रसरादित्याशयेनाह **ब्रह्मण** इत्यादि। यदि ब्रह्मसर्वज्ञं तत् कथमविद्याया आश्रयरूपं भवेत्, अर्थात् सर्वं योग्यं पदार्थं सर्वकाले सर्वथावस्थितमितरानपेक्षतया स्वतो विजानतस्तस्य ब्रह्मणोऽनेक प्रकारकविभ्रमलक्षणाविद्याश्रयत्वं विरुद्धत्वात्कथमपि न घटते इति ब्रह्मण एव संसारकान्तारेऽविद्यया भ्रमणं भवतीति कथनं सर्वथैव न घटते, यतो ब्रह्मणः सर्वज्ञतया भ्रमाभावात् न ब्रह्मभ्रान्तमपि तु परमात्मा भ्रान्तिज्ञ इति। विभ्रमेऽधिष्टानाज्ञानस्य कारणत्वं तद् ब्रह्मणो नास्ति 'यः सर्वज्ञः ससर्वविदित श्रुतेः।

ननु "सत्यं ज्ञानमनन्तम्" "प्रज्ञानं ब्रह्म" इत्यादि श्रुत्या ब्रह्म संविन्मात्रमेव स्फटिककल्पमतीव स्वच्छम्, तादृशब्रह्मणि सार्वज्ञत्वमपि न परमार्थिकमपित्वविद्या वलेन कल्पितम् पारमार्थिकमाकाशादिभेदप्रपञ्च सद्भावविषयकं भ्रमलक्षणं मिथ्यैवेति प्रश्नाशयं ज्ञात्वा तन्निरस्तुमुपक्रमते **अविद्याकृत** इति। अविद्यया जायमानो योऽहंकारस्तज़्जन्यत्वं तु ब्रह्मवृत्तिसार्वज्ञत्वस्य कथमपि न संभवति श्रुतिविरोधात्। तथा हि "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च विद्यते। परास्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबल क्रिया चेति। अस्य वाक्यस्यायमर्थः तस्य भगवतोजगन्निदानस्य जानकीवल्लभस्य कार्यं भूतभौतिकं शरीरं धर्माधर्मकारितं न विद्यते। यदा शरीरमेव नास्ति तदा शरीराश्रितभौतिकं चर्मचक्षुरादिगम्यं करणं चक्षुरादिकमपि नास्त्येव। तथा तादृश परस्य समस्तुल्यस्तत्सदृशस्तदन्यश्च न कश्चन विद्यते "न तस्य प्रतिमाभुवीति श्रवणात्। यदा च

तत एव यथार्थविषयैवेतिमन्यताम् , शब्दान्तराभ्याससंख्यादिवत् । यथा शब्दान्तराभ्याससंख्यादयः शास्त्रभेदका यथार्था एव, तथा प्रकृतेऽपि किं नेष्यते ।

तत्समानो नास्ति तदा तदधिकस्य तु काऽशा तत्राह "चाभ्यधिकश्च दृश्यते" सर्वत्र नकारो योजनीयः । न कार्यं न वा करणं कारणं वा तत्समतदधिकस्तुनैव विद्यते । इत्थं च चेतन विलक्षणतया तत्स्वरूपं पुरस्कृत्य स्वेतरव्यावृत्तगुणप्रदर्शनद्वारेण परमेश्वरस्वरूपं प्रस्तौति "परास्य शक्तिरित्यादि" अस्य भगवतो जगदुत्पत्ति स्थिति प्रलयप्रयोजिका शक्तिः सामर्थ्यम् पराऽत्युत्कृष्टा । यद्यपि पदार्थमात्रे कार्यप्रयोजिका शक्तिर्विद्यते इति परान् निवर्तयितुमाह "परास्येति" यद्यपि सर्वत्र शक्तिरस्तितथाप्यस्य या शक्तिः सा तु परा सर्वतोऽतिशायिनी । अर्थात् यदन्यत्र न दृश्यते न वा संभाव्यते तादृशी शक्तिरेतस्मिन् विद्यते सापि शक्तिर्नैकाद्वयी त्रिका वा किन्तु विविधा=अनेक प्रकारिका च । यथाऽलावुलताया प्रतिपर्वणि फलान्यनेकानिसंलग्नानि तथैव भगवल्लतायामनेकशोऽण्डान्यनुस्यूतानीति श्रवणात् स्वाभाविकीज्ञानवलक्रिया चेति=सांसिद्धिकी च ज्ञानवला क्रिया च भगवतः । नैकविधं ज्ञानं वलं क्रिया वा, किन्तु विविधा=अनेक प्रकारा । यथा कस्यचिदेकविषयकमेव ज्ञानमेककालभोग्यमेव, क्रिया वा एकाकारा भगवतस्तु सर्वविषयकं त्रैकालिकं चेति । तथाभियुक्तोक्तिः—

सर्वज्ञता तृप्तिरनादिवोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभो विधज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥

इत्यादि श्रवणादपि परमेश्वरस्यैते गुणास्तदन्येऽपि अनन्तकल्याणगुणाः स्वेतरसकलविलक्षणाः सन्ति । एते ईश्वरस्य गुणा अनन्योपाधिकास्तथैव शास्त्रे श्रवणादिति । अविद्यापि यथा विद्या ब्रह्मणः स्वभाव एव, अतोऽविद्या मूलकत्वादेव स्वाभाविकमेवेति कथनं न युक्तम्, तथा सति स्वभावस्य दुरतिक्रमत्वेन कण्टकतीक्ष्णतावदेव सर्वदा ब्रह्मणोऽज्ञत्वमनिर्मोक्षश्चापतेदिति ज्ञातव्यम् । तदनेन क्रमेग परमेश्वरस्य सर्वज्ञत्वमेव विद्या कल्पितमिति निराकृत्य परमेश्वरसर्वज्ञत्वस्य भेदावभासगर्भत्वाद्यथार्थत्वमित्यपि निरसितुमुपक्रमते "भेदावभास" इत्यादि । अत्रार्थक एव यदि भेदावभासगर्भत्वात् भगवति सर्वज्ञत्वम् पारमार्थिकमिति यदि मन्यसे, तत एव, तस्मादेव कारणात्, अर्थात् भेदावभासित्वात्, भेदघटितत्वादेवामृषासत्य सत्यमिति कथंमन्यसे ! भगवति सर्वज्ञत्वं ततः सत्यमेव । यथार्थविषयकत्वमेव । ततश्च भेदस्य मिथ्यात्व कथनम् सिद्धमेव । येन भेदावभासकस्य यथार्थत्वं सिद्ध्येदित्यभिप्रायः ।

तत्रानुरूपं दृष्टान्तमाह **शब्दान्तरादिव**दिति तदेव विवृणोति **यथा शब्दान्तराभ्यासे**त्यादि । पूर्वमीमांसायां जैमिनिप्रकरणे "शब्दान्तराभ्याससंख्या संज्ञा गुणप्रकरणान्तरैः कर्म भेदो निरूपितः कर्मलक्षण्याम् । एतस्य यथावन्निरूपणं "शब्दादिभ्योऽन्तः प्रतिष्ठेत्यादिब्रह्मसूत्रीयश्री

सर्वज्ञे नित्यमुक्तेऽपि यद्यज्ञानं संभवेत् ? तेजसि तमोवत् तदा तेन तन्ननिवर्तेत ।

रामानन्दभाष्ये भाष्यकारेण कृतमिति तत एवार्थो द्रष्टव्यो ग्रन्थवाहुल्यभयान्नास्माभिः प्रदर्श्यते जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रकृतभाष्यतत्त्वदीपतोमदीयानुवादतो वानुसन्धेयोविशेषार्थिभिः । एते च शब्दान्तरादयः शास्त्रभेदकाः=तत्तद्विधिवाक्यस्य विभिन्नविभिन्नविधेयकतया भेदव्यवस्थापकोऽर्थाद् भेदप्रमाणभूताः शास्त्रार्थविचिन्तकैरभिमताः । तन्मूलकायागादिविधेय प्रत्ययाश्च यथार्था एव नत्वयथार्था, यथा तथैवेहापि सार्वज्ञत्वमपि भगवति रामाख्ये परमेश्वरे स्वतः सिद्धसर्वज्ञे पारमार्थिकार्थभेदविषयकयथार्थमेव कथं न स्यादर्थात् तदनुसाराद् यथार्थमेवेति भावः ।

भगवति श्रीरामे परमेश्वरे सांसिद्धिकसर्वज्ञे सूर्येगाढ़ान्धकारवत् जडात्मिकाया अविद्याया असंभवः प्रदर्शित आचार्येण तत्र सर्वज्ञेऽविद्योपगमेवाधकमपि दर्शयति **सर्वज्ञे नित्यमुक्तेऽपी**त्यादि नित्य मुक्तेऽपि सर्वज्ञे भगवति यद्यज्ञानं तादात्म्येन संगादिना संवद्ध्येत प्रकाशके तमोवत् तदा तस्मादीश्वरादज्ञानस्य निवृत्ति र्विनाशो न स्यात् । अर्थात् नित्यमुक्तस्वभावत्वात्सर्वज्ञत्वाच्च वन्धजनकाविद्या विरोधिनि परमेश्वरेऽविद्याऽपस्थानं प्राप्नुयात्सूर्ये तमोवत् तदाऽविद्या निवर्तकं तदन्यन्न किमपि स्यादिति तस्य अविद्याया अविनाशात् "अविद्यास्तमयो मोक्षः सा च वन्ध उदाहृत नियमस्यत्वत्सयूथ्यस्यैव वाध प्रसंगो भवन्मस्तकं प्रहरिष्यतीति न विस्मर्तव्यमिति भावः । ननु—
"तत्वमस्यादि वाक्योत्थं सम्यग् धीजन्ममात्रतः । अविद्या सहकार्येण नासीदस्ति भविष्यतीति ॥"

भवर्दीयसूक्त्यनुसारेण "तत्वमसि" "अहं ब्रह्मास्मि" इत्यादि वेदान्तमहावाक्य जनिताऽपरोक्षचिन्मात्रब्रह्मात्म्यसाक्षात्कारेण तत्वज्ञानापरपर्यायेण स्थूलसूक्ष्मसाधारणाविद्या निवृत्तिः स्यात् तत्र स्थूला विद्याऽकाशादि रूपा सूक्ष्मा चं संस्काररूपा । जायमाने तत्वज्ञाने तेनाविद्यादिति चेन्न, वाक्यस्य प्रत्यक्षज्ञानजनकत्वात् प्रत्यक्षमेव चक्षुरादीन्द्रियजनितम्, इन्द्रियार्थ सन्निकर्षजन्यंज्ञानाकरणकं वा प्रत्यक्षमिति प्रत्यक्षलक्षणत्वात् । तदन्यदनुमानादिशब्दादिज़नितं च ज्ञानं सर्वं परोक्षमेव । ततश्च शब्दप्रमाणजनितं ब्रह्मात्मैकत्वविषयकं ज्ञानं नियमतः परोक्षमेव न तु प्रत्यक्षमिति न ततोऽविद्या निवृत्तिः संभवेत् । यद्यपि तैलधारावदविच्छिन्नभावना प्रकर्प जनितं प्रत्यक्षसमानाकारकं मोक्षं प्रत्ययति, इति ममापि संमतम् । "मुक्तौ हेतुस्तु भक्त्यपरपर्यायं तैलधारावदविच्छिन्नभगवत्स्मृतिसन्तानमेव । उक्तञ्चसाधनदीपिकायामाचार्यवर्यैर्जगद्गुरुश्रीगङ्गाधराचार्यैः "रामस्य ब्रह्मणोऽनन्यभक्त्यैव मुक्तिराप्यते । भक्तिर्ध्रुवास्मृतिः सा च विवेकादिकसप्तकात् ॥" इति । ऊचुश्च तथैव भगवन्तः श्रीदेवानन्दाचार्यचरणा अपि "त्वदीया स्मृतिस्तारिकामृत्युसिन्धोस्तथा विस्मृतिः पतिका तत्र चैव । परं योगिनां हार्दमालम्वनं त्वां श्रये राघवं सच्चिदा-

ननु सर्वज्ञत्वादि वाक्यानां यत् प्रामाण्यं तत्तुव्यावहारिकम्, अद्वैतवाक्यानां तु प्रामाण्यं पारमार्थिकम्., तात्विकव्यावहारिकाभ्यां प्रामाण्यस्य द्विविधत्वादिति चेन्न, विनिगमनाविरहादेतदेव प्रमाणं व्यावहारिकं न प्रमाणमिति वक्तुमशक्यत्वात् ।

नन्दरूपम्" इत्यानन्दभाष्यकारोक्तेः (गीता २।१२) तथापि तथा स्वीकारे स्वसिद्धान्तपर्वतात् भवतः पतनं परकीय सिद्धान्त स्वीकारेणातो विशिष्टाद्वैतमेवानुसरः ।

शुकादिमहापुरुषाणां साक्षात्कारेणैवाविद्या निवृत्तेः, तदनन्तरमपि संसारानुसरण विरोधात् । ननु संभवेदयं दोषो यद्यनेकजीववादो भवेत्, नत्वेवमेकजीववादस्य स्वीकारेण सर्वसामञ्जस्यादिति चेन्न तथा सति वामदेवस्य तत्वज्ञानेन संसारकारणाविद्या निवृत्तौ कारणाभावेन संसारकार्यस्य सम्प्रत्युपलंभो न स्यादित्यादिकबहुदोषानुद्भाव्यैकजीववादस्यानेकप्रकारेणान्यत्र विविधप्रवन्धे सयुक्तिकशास्त्रानुकूलतयानिराकृतत्वान्निराकरिष्यमाणत्वाच्च । अपि च ब्रह्म स्वाश्रित स्वविषयकविभ्रमज्ञानेन संसारकान्तारे विभ्रमति विभ्रान्तपुरुषवत् जीवश्च स्वकीयविद्यया परमेश्वरं मोचयतीति कथनं महदुपहासास्पदं भवति । इति स्वमनसैवैतद्विचारणीयमिति दिक् ।

ननु भेदकप्रमाणानां सर्वज्ञत्वादि वचनानां यत्प्रामाण्यं तदपि व्यावहारिकभेदादिपदार्थ विषयकत्वेन व्यावहारिकप्रामाण्यमर्थाद् गौणं तत्प्रमाणम् पारमार्थिकप्रामाण्यं तु त्रिकालावाधित "तत्त्वमसीत्यादि" वचनानामेव । यतः परमार्थतस्तु परं ब्रह्मनिर्विशेषचिन्मात्रमेवेति तदर्थस्य पारमार्थिकतया तद्बोधकवचनानामेव पारमार्थिकप्रामाण्यं तदर्थस्यावाधितत्वात्, तदतिरिक्तवाक्यानांवाधितत्वेनान्त्यमेव प्रामाण्यं न तु पारमार्थिकत्वम् । तादृश परमार्थभूतब्रह्मणि जगत् जीवेश्वरादि भेदेऽप्यविद्यामन्तरेणानुपपद्यमान इति ब्रह्माश्रितैव साऽविद्याऽगत्या स्वीकर्तव्यातदुक्तमभियुक्तैः—

"आच्छाद्य विक्षिपति संस्कुररात्मतत्वम् जीवेश्वरत्वजगदाकृतिभि र्मृषैव ।
अज्ञानमावरण विभ्रमशक्ति योगादात्माश्रयत्व विषयाश्रयता वलेने"ति ।

एतादृशीयमविद्या ब्रह्माश्रितैवेत्याशयेन शङ्कते **ननु सर्वज्ञत्वादिवाक्यानामि**त्यादि । अर्थात् सर्वज्ञत्वादिवाक्यानां यत् प्रामाण्यं तद् व्यावहारिकमेव तत्प्रतिपाद्यार्थानां व्यावहारिकत्वात् । तत्वमस्यादि वचनानां तु यत् प्रामाण्यं तत्पारमार्थिकम् । यतस्तत् श्रुतिप्रतिपाद्यनिर्विशेषचिन्मात्रब्रह्मरूपार्थस्य त्रिकालावाधिततया तद्बोधकत्वेन पारमार्थिकप्रामाण्यमिति तदेवं क्रमेण सर्वार्थव्यवस्थापनमिति शङ्कितुराशयः ।

एतदद्वैतमतं दूषयति **विनिगमनाविरहादेवे**त्यादि । अर्थात् अमुकस्य व्यावहारिकत्वममुकस्य पारमार्थिकत्वमत्र केवलं त्वदीयपरिभाषातिरिक्तं नान्यत् किञ्चित् नियामककारणं पश्यामीति न श्रद्धेयं तव वचनमित्युत्तरम् । अयमभिप्रायः भवदीय कल्पितपरिभाषावलेन विना

किं चाश्रयप्रतियोगित्वे परस्परविरोधि च वह्याखण्डैकरसंचेति कथं वा ज्ञायसंभवेदिति वाच्यम्। प्रत्यक्त्वेन तदेव ब्रह्मब्रह्माविद्याया आश्रयो ब्रह्मत्वेन च विषय इति ब्रूषेचेत् योयं एतादृशव्यावहारिकपारमार्थिकव्यवस्थायां नान्यत् किञ्चित्प्रमाणं विद्यते। शास्त्रप्रमाणं तु नाद्वैतमतं पुष्णाति साधयतीत्यर्थः। तथाहि "ज्ञाज्ञौ" "द्वासुपर्ण सयुजा सखाया" "तत्वमसि" "अहं ब्रह्मास्मि" इत्यादिद्वैताद्वैतप्रतिपादकश्रुत्योः प्रकारनानात्वप्रकार्यैकत्वप्रतिपादनपरकत्वान्नान्यतरस्यापिवाक्यस्य मिथ्यार्थबोधनपरकत्वं विद्यते किन्तुसर्वमप्यागमवाक्यं सत्यार्थबोधनपरकमेव—

"अद्वैतवोयिकाः काश्चित्काश्चिद्द्वैतस्यबोधिकाः। घटटश्रुतयः काश्चिदन्तर्यामिप्रबोधिकाः ॥
अप्रामाण्यं भवेत तासां विरोधेऽभिमते मिथः। विशिष्टाद्वैतिभिस्तासां क्रियतेऽतः समन्वयः ॥
अद्वैतश्रुतयो बोध्या विशिष्टब्रह्मबोधिकाः। नान्यश्रुतिमतानां हि तत्त्वानां प्रतिषेधिकाः ॥
परं ब्रह्म च तद्वाच्यं त्वद्वाच्यं त्वच्छरीरकम्। तत्त्वमसीतिवाक्येन तूक्तोऽभेदस्तयोर्द्वयोः ॥
द्वैतश्रुतिसमूहस्तु विद्वद्भिः सम्मतः खलु। चिदचिदीशतत्त्वानां पार्थक्येनाववोधकः ॥
आत्मत्वमीश्वरस्याथ चिदचितोश्च देहता। सर्वाभिर्विनिवेद्येते घटकश्रुतिभिः किल ॥
वेदान्ततत्त्वविद्भिश्चकार्यकारणभेदतः। चिदचिद्भ्यां विशिष्टं हि ब्रह्म च द्विविधंमतम् ॥
स्थूलाचिच्चिद्विशिष्टं हि ब्रह्म कार्यं प्रकीर्तितम्। सूक्ष्माचिच्चिद्विशिष्टं तु ब्रह्मकारणमुच्यये ॥
ऽद्वैतं च मतं श्रौतं ब्रह्मणोश्च विशिष्टयोः। विशिष्टाद्वैतसिद्धान्तस्तस्माच्छ्रुत्यनुमोदितः ॥
अत एवास्मदाचार्यबोधायनादिसम्वतः। विशिष्टाद्वैतसिद्धान्तो लोके विजयते तराम् ॥"

इत्यादिरूपेण सर्वश्रुतिसमन्वयेजगद्गुरुश्रीश्रुतानन्दाचार्योक्तेः। तत्वमस्यादि सामानाधिकरण्यश्रुतीनामभेदप्रतिपादनपरकवाक्यानांच जडचेतनसर्वशरीरकसर्वात्मभूतब्रह्मैक्यपरत्वमिति न जीवभावादिकल्पिकाऽनाद्या परब्रह्मणि श्रीरामे कल्पयितव्येति। ब्रह्मणोऽविद्याश्रयत्वे एकं दूषणं प्रदर्श्य ब्रह्मणस्तदाश्रयत्वे दूषणान्तरं चानुवदति **किञ्चाश्रय प्रतियोगित्वेचे**त्यादि। अत्र प्रतियोगित्वमिति पदं विषयत्वरूपमेव। अत्र चैकस्यैकत्रैकदायुगपत् कर्तृकर्मभावविरोधोऽभिमतो ग्रन्थकर्तुरिति। परस्परविरोधि चेति, सदितिसत्तामात्रमखण्डैकरसं स्वप्रकाशात्मकं परंब्रह्मकथं स्वविषयकाविद्याश्रयरूपं भवेदाकारभेदाभावात्। नह्येकस्मिन्नाकारभेदाभावे युगपत् क्रियाकर्मभावो भवतीति। तत्राकारभेदेन विरोधाभावंशङ्कते **प्रत्यक्त्वेन तदेवब्रह्म** इत्यादि। प्रत्यक्त्वेन जीवत्वेनाश्रयोऽविद्याया आश्रयः तदेव ब्रह्मस्वप्रकाशत्वेन विषय इत्यर्थः। अर्थात् यत् सन्मात्रमेव ब्रह्म स्वप्रकाशरूपत्वरूपेणाहंत्वरूपेणवा, प्रत्यक्त्वेनाऽविद्याया आश्रयो भवति, विषयतया तदेव सन्मात्रं ब्रह्म आश्रय इत्याकारभेदादुपपद्यते तत्र न कोपिदोषः तत् पृच्छामि, उपर्युक्तप्रकारेणयोयं भेदः स

रूपभेदः सकस्मात्कारणादित्यस्यापि वक्तुमशक्यत्वात्तत्त्वतोऽन्योन्याश्रयात् अवस्तुत्वादविद्यायानैतद्दूषणमिति चेत् वस्तुनो दूषणत्वमिति भवता दृष्टम् । स्वसाध्यस्य पुरस्काराद्यमन्योन्याश्रयदोपः । तत्र वस्तुत्वावस्तुत्वे इतिनोत्तरं समीचीनम्। किं च यद्यविद्या वस्तु न भवेत्तदा व्यवहार्यं सा कथं स्यात्? न च खपुष्पादिकं व्यवहार्यं भवति । यदि साऽविद्या अवस्तु न तदा तस्या वस्तुत्वं ध्रुवमेवासिद्ध्यति ।

॥ इत्य विद्यायाआश्रयानुपपत्तिनिरूपणम् ॥

कस्मादागतस्तत्र ? यद्यविद्यावलादागतो भेदस्तदाऽन्योन्याश्रयदोषः प्रसज्येत । अविद्यायारूपभेदापेक्षत्वात् रूपभेदस्य च विद्यापेक्षत्वात् स्यादेवान्योन्याश्रय इति । स्वाभाविको यं ब्रह्मणो रूपभेद इति न वक्तुं शक्यते, तथा सति रूपभेदस्य स्वाभाविकत्वे ब्रह्मणः सविशेषत्वमेवस्यादिति सिद्धान्तशिरसि कुठाराघातः कृतोभवद्भिरिति । ततश्च–

"हन्यतां हन्यतां बालोनानेनार्थोस्तिजीवता । स्वपक्षहानिकर्तृत्वाद्यः कुलाङ्गारतांगतः ॥"

इति न्यायविषयतांनातिक्रमिष्यतीति जीवाविद्यापक्षवत् ईशाविद्यापक्षेप्यन्योन्याश्रय इति । अत्र पुनः शङ्कते, **अवस्तुत्वादविद्याया** अविद्या न पारमार्थिकी किन्तु अवस्तुरूपेति तादृश्या अपरमार्था विद्याया दुर्घटत्वं न दूषणमपितु भूषणमेव, अतोऽत्र दुर्घटत्वकथनं न दूषणम् , तस्मादत्रान्योन्याश्रयदूषणंनैव दूषणतांयाति । परिहरति **वस्तुनोदूषणत्वंभवता दृष्ट**मिति । अर्थाद् भवदभिमतघटपटादिप्रपञ्चे एव परस्पराश्रयदोषो भवतीति यत्र तत्र भवद्भिः प्रदर्यितः । नतु पारमार्थिके वस्तुनि कुत्रापि परस्पराश्रयदोषकथितः । तस्य व्यवहारागोचरत्वस्य स्वीकारात् । एवञ्चाविद्यायामपि परस्पराश्रयदोषोभवेदेव अविद्याया अपि व्यवहारातीतत्वात् ।

स्वसाध्यस्य पुरस्कारादित्यादि । स्वसाध्यस्य स्वाधीनसिद्धिकस्यार्थस्य स्वसिद्धौ सत्यामेवहेतुत्वकरणात् , परस्पराश्रयदोषः प्रसज्यते । तस्मादवस्तुत्वादविद्यायां दुर्घटत्वं न दूषणं नान्योन्याश्रयोऽवस्तुत्वादित्युत्तरं न समीचीनं भवतीति भावः ।

किञ्चेत्यादि अत्र प्रकरणस्य समस्तस्यायमर्थो ज्ञातो भवति अविद्या न वस्तुत्वं नवाऽवस्तुत्वम् वस्तुत्वे बाधो न स्यात् अवस्तुत्वे प्रतीयमानत्वं कारणत्वं च न स्यात्, तस्मादनिर्वचनीयत्वमिति यन्मतमद्वैतवेदान्तिनस्तस्यात्र प्रकरणे निराकरणं कृतवान् । अविद्याया अनिर्वचनीयत्वस्य तत्कार्यस्य चानिर्वचनीयत्वं कथमपि न संभवतीत्यस्याग्रे समाधास्यमानत्वात् । अत्र ग्रन्थगौरवभयाद्विरम्यते ।

॥ इत्यविद्यायाआश्रयानुपपत्तिवर्णनप्रकरणस्यतत्त्वदीपः ॥

किञ्च आकाशादिसकलस्थूलसूक्ष्मजडचेतनसाधारणप्रपञ्चस्योत्पादयित्री जडेयमविद्या विद्यतेऽद्वैतवेदान्तेऽरूपा, साकिमेका, अनेका वा ? पुनश्चतादृशविद्याया आश्रयीभूतो जीवः, एकोवा प्रतिक्षेत्रविभिन्नोऽनेको वा ?

साचाविद्यैकैवेति पक्षे शुकवामदेवादीनां विद्ययैव सा विद्या विनष्टेत्यविद्याविनाशाय भवदीयो मननश्रवणनिदिध्यासनार्थं प्रयासो विफलतामेतीति एकस्य विद्ययैवा विद्याया विनाशाय श्रवणादिक्रमपरंपरया मोक्षार्थो भवदीयः प्रयासोऽकिञ्चित्कर एव। यद्भवताकर्त्तव्यं तस्य शुकादिनैव निष्पादनात् ।

।। इति जडात्मकाविद्यायाएकानेकत्वविकल्पएकाविद्यापक्षदूषणप्रकरणम् ।।

ननु अविद्या ब्रह्माश्रिता जीवाश्रिता वेत्यादिविकल्पे न ब्रह्माश्रिता, ब्रह्मणोऽज्ञत्वापातात् । सचनेष्टः । "यः सर्वज्ञः ससर्वविदित्यादिश्रुतिविरोधेन तादृशविकल्पद्वयनिराकरणेन तत्पक्षं निराकृत्यसम्प्रति, अविद्या, एकावा विभिन्ना वा। तथाऽविद्यो जीवोऽप्येकोवाऽनेकोवेत्यादिविकल्पान् प्रतिक्षेप्तुमाचार्योपक्रमते—**किञ्च** इत्यादि । अर्थादियमविद्यैकैवजड़चेतनसाधारणसर्वप्रपञ्चस्योत्पादिका कार्यमात्रं प्रतिसाधारणकारणकालादिवत् । अथवा अविद्याऽनेका, यथा घटादि कार्यंप्रति प्रतिनियतकपालादिकारणवत् । तथा तादृशा विद्याया आश्रय एकजीवोऽनेकोवा तस्या आश्रयः । अर्थात् अविद्यैकैव, आहोस्विदनेका । तथा तस्या आश्रयो जीवः प्रतिक्षेत्रमेक एव, अनेको वेति प्रश्नयितुमतम् । तत्रैकैवाविद्या सकलकार्योत्पादिका भवतीति निरसितुमाह **"साचाविद्यैकैवेतिपक्षे** इत्यादि । मोक्षप्रयोजिकाया, श्रवणादिनिदिध्यासनपरिपाकेन प्रत्यक्षसमानाकारा संजाता सर्वसाधारणी एकैव ब्रह्मविद्या पदवाच्या तस्या एकत्वेन इयं विद्या शुकस्य पूर्वमभूदिति श्रूयते शास्त्रे । ततश्च शौकीयब्रह्मविद्ययैव संसारमूलकारणाविद्याया विनाशात् सर्वोपि मुक्तः कृतकृत्यश्चजात एवेति पुनरिदानीं मोक्षप्रतिबन्धकाविद्यानाशनार्थं श्रीमतामर्वाचीनाद्वैतिनां विद्यार्थं विद्यासाध्यमोक्षायचैतावान् श्रवणमननादीनां सम्पादनाय प्रयासो निरर्थक एवेत्याद्युत्तरमिति ।

अर्थात् शुको विमुक्तो वामदेवो मोक्षंगत इत्येवं क्रमेण मोक्षशास्त्रे उपनिषदि च प्रसिद्धिर्विद्यते । ततश्चवामदेवादेर्विद्ययैव प्रपञ्चकारिणी भूतैकाविद्याविनष्टा जातेति सम्प्रति प्रपञ्चानुवर्तनं नैव भवितव्यम् । दृश्यते चेदानीमपि तदनुवर्तनम् । वाधितानुवृत्तिपक्षेपि, अर्थादविद्या तु विनष्टा परन्तु संस्कारवशात् कियन्तं कालमविद्याया अनुवर्तनात् संसारोपलब्धिर्भवति । यथोपरतेपि कुलालव्यापारेवेगाख्यसंस्कारवशाच्चक्रभ्रमणं भवति । तदुक्तं—"चक्रभ्रमिवत् धृतशरीरः" अयमेव वाधितानुवृत्तिपक्षः । एतत्पक्षस्वीकारेपि भवादृशानामर्वाचीनानां पुनर्मोक्षार्थं तत्त्वज्ञानसम्पादनाय प्रयासो निरर्थक एव अविद्यायां च स्वयमेव निवर्तनात् कांश्चित्कालानन्तरंभवेदेति ।

।। इत्यविद्याया एकानेकत्वविद्यापक्षदूषणप्रकरणस्यतत्त्वदीपः ।।

भवेदेवं यदि शुकादयोभवेयुः । यद् विद्ययातिरस्कृतत्वान्नाद्याऽविद्या भवेदिति प्रश्नः स्यात् । मदविद्ययैव मुक्तामुक्तादिभेदः कल्पितः । दृश्यत्वान् मदीयस्वप्नदृश्यभेदप्रपञ्चवत् । यत्पुनर्ब्रह्मविद्यया तेषां मोक्षोजात इति वाक्यं तु स्वाप्नमुक्तिप्रयोजकवाक्यवदेवाप्रमाणमिति ।

अथैवमीदृशानुमानेनत्वदन्यः प्रपञ्चस्याविद्यापरिकल्पितत्वं साधयतीति सत्वया प्रतिक्षेप्यः ।

अथ पुनरप्येकजीववादेनाद्वैती प्रतिक्षिपति **भवेदेवंयदिशुकादयोभवेयु**रित्यादि । गोमयाघ्राणेनमृताखुमुर्ज्जीवयतीति न्यायेनैकज़ीववादं समर्थयितुंचेष्टतेपरः **भवेदेवंयदी**त्यादि, अयमभिप्रायः

"सवै शरीरी प्रथमः सवै पुरुष उच्यते। आदिकर्त्ता सभूतानां ब्रह्माग्रे समवर्त्तत ॥"

इति पुराणवचनमनुसृत्य-[अस्यार्थः सवै सत्यलोकस्याधिष्ठाता, प्रथमः शरीरीसमभवत् सवै पुरुषं उच्यते. अर्थात् कल्पादौ समस्तप्रपञ्चस्य सर्जकः स्वाविद्ययाऽभवत् स एव शिरः पाण्याद्यवयवसंघातात्मकशरीरवान् ज़ातः पुरुषपदेनापि तस्यैव ग्रहणं भवति, पुरिशयनात् पुरुषः पूर्णं वा जगदनेनेति पुरुषः । स एव भूतानामाकाशादिप्रमुखप्रपञ्चस्यादिकर्त्ताः सर्वप्रथमं स्वाविद्ययोत्पादकः, एतादृशं ब्रह्म अग्रे ज़गदुत्पत्तेः प्रागेव समवर्तत समुत्पन्नो ज़ातः ।] प्रथमं ज़ायमानः कमलासनः स्वकीया विद्यया सर्वानेव जनयति समुत्पादयतीत्यर्थः । एक एव जीवः स्वाविद्यया सर्वान् जनयति । समुत्पाद्य स्वाप्निकप्रपञ्चवत् सर्वं पश्यति । यथा स्वप्ने स्वप्नदृशा परिकल्पिता अनेक पुरुषास्तेनैव कल्पितास्तत्सदृशा एव शुकादयोऽपि नतु व्यावहारिकाः शुकादयः । एतेषां मोक्षप्रतिपादकशास्त्रमपि स्वाप्निकमेव, स्वाप्निकत्वादेते न प्रमाणभूता नवा तत् शास्त्रमपि प्रामाणिकम् । अर्थात् तेषां वचनमपि स्वाप्नवदेव दत्तादिमुक्तिवचनसमानमप्रमाणमेव । तादृशमुख्यजीवस्य यदा श्रवणादिक्रमेण तत्त्वज्ञानं जायते, तदा तदीयसाक्षात्कारादेवाविद्याया निवृत्तिर्भवति । तस्मान्नास्ति नानापुरुशो नवा नानाऽविद्या वा । अहमेवोक्तजीवोमूलाविद्याकल्पितः । तथा मदीयतूलाविद्ययाकल्पिता इमे परिकल्पितामदन्ये दृश्यमानानानाजीवाः । बद्धमुक्तादिभेदोऽपि स्वाप्निकवदेवेति । मदविद्यादृश्यत्वादितिग्रन्थस्य भावः ।

॥ इत्येकविद्याकल्पितैकजीववादानुवादप्रकरणस्यतत्त्वदीपः ॥

तदेवं परस्थापितैकज़ीववादमनुद्य तत्प्रतिक्षेपार्थमनुक्रमते **"अथैवमीदृशानुमानेन"** इत्यादि स्वकीया विद्यया परिकल्पितत्वं तत्र प्रपञ्चस्याकाशादिप्रमुखस्य च साधयस्यस्तुल्यन्यायेनतस्य त्वया कथं निराकरणीय इत्यर्थः । यदा कदाचित् परकीयानुमानस्याप्रयोजकत्वं मन्यसे तदा

त्वदीया विद्यानिमित्तत्वे यदेव कारणं विवक्षितं तदेव कारणं तस्यापि भवेत्सर्वज्ञसिद्धिवत् । एवं प्रकारेण परस्परविरुद्धवचनव्याघातो भवति। "मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी" इति अनर्थकं प्रजल्पतीतिवद्वभाससे ।

यथा च स्वाप्नकथनतुल्यं तथैव भवतोपि वचनमिति मोक्षार्थं भवतः श्रमो निरर्थक एवेत्याभाति । यथा शुकादीनां भूतैवपूर्वमात्मविद्यया मुक्तिस्तथैव पश्चात् कालेप्यात्मविद्ययोच्यते, तथैवाभाविन्येव मिथ्याभाविनीति ज्ञायताम् । सन्ति च स्वाप्नदृष्टानि तव दृष्टान्तवचनानि ।

मोक्षोन भविष्यतीति यद्वचनं भवतो न तदनिष्टमपित्विष्टमेव यत आत्मनो नित्य

समानमेवाप्रयोजकत्वं समानमेवत्वदनुमानस्यापीति भावः । "**सर्वज्ञसिद्धिवदिति**–सुगतो यदि सर्वज्ञः कपिलोनेतिका प्रमा । उभौ च यदि सर्वज्ञौ [वुद्धिः] मार्गभेदः कथं द्वयोः" इति न्यायेन परस्परविरोधात्तदुभयमपि परपार्थतो न सिद्ध्यतींति भावः । अथवा सर्वेषां ज्ञानानां जीवानामेकत्वस्य सिद्धिवदन्यस्य सर्वज्ञस्यैक विद्यापरिकल्पितत्वस्यापि सिद्धिर्नस्यात्साधकाभावात्, साधकत्वे नाभिमतस्याभासत्वात् । आभासदोपराहत साधक एव स्वं साधयति, धूमेन वह्निवत् । आभासस्तु हेत्वाभासोन स स्वसाधनयालं भवति धूमेन ह्रदे वह्निसाधनवदिति भावः ।

सम्प्रति परकीयमतमुपहसन्निवाह सिद्धान्ती **परस्पर** इत्यादि। इत्थमनेन प्रकारेण भवान् अन्यान् वाधते, एवं भवन्तं भवत् पक्षस्थितांश्चत्वं तदन्या वाधन्ते, तथा सुन्दोपसुन्दन्यायेनोभयोरेववाधो जायते इति मध्यस्थिता मदीया राजन्ते ।

अपिच प्रकारान्तरेणापि प्रकृतवादे दोषमाह **"यथा च स्वाप्न"** इत्यादि । यथा शुकादीनां मुक्तिवचनं स्वाप्नमुक्तिसदृशं तथा भवतोपि मुक्तिः । शुकादिनाधिगतामुक्तिर्भवद्भिः प्राप्येत्यसंभवमेव । स्वाप्नतुल्यैव मुक्तिवचनं स्यात् ततश्च मुक्त्यर्थं प्रयन्नस्ते निरर्थिकैवेत्यर्थः ।

मोक्षार्थं प्रपत्नं त्यजतां न कथमपि मोक्षः स्याददितिदर्शयितुमाह **यथा** इत्यादि। यथा खलु अध्यात्मविद्ययाशुकवामदेवादीनां मोक्षोजात एवेत्युच्यते शास्त्रे तथा भवतां तदनन्तरं भविष्यत्येव मोक्षो न मिथ्या रूपः, न भवन्नपि वस्तुन इति वक्तव्यमेवेत्यर्थः ।

ननु मदीय तत्त्वज्ञाननिष्पाद्यमानमोक्षमिथ्यात्वं कथं ? तत्राह **सन्तिच स्वप्नदृष्टान्तवचनानी**त्यादि भवदीयतत्त्वज्ञानस्याविद्यानिवर्तकत्वाभावात् । तथा चानुमानम् भवदीय तत्त्वज्ञानमविद्यया निवर्तकं न भवति, तत्त्वज्ञानत्वात् स्वाप्नतत्त्वज्ञानवदिति भावः । ननु मोक्षस्याभावित्वप्रसङ्गदृष्ठ एवेत्यत आह **मोक्षोन** इत्यादि । मोक्षाभावावादनं नानिष्टमपित्विष्टमेव । यतः सा मुक्तिर्नित्यात्मस्वरूपत्वान्नित्यैवानित्यस्य चोत्पादाभावेनोत्पादाभावो न दोषायेति

सिद्धत्वेन तदभिन्नमोक्षनित्यप्राप्तत्वात् तथा सति शान्तिकर्मणिवेतालोदयवत् ब्रह्म विद्यार्जनश्रमो निरर्थकः स्यादिति ।

सा मुक्तिर्नित्यसत्यपि .अविद्या प्रतिवद्धत्वादसतीवमृग्यमाणा भवति । यथा हस्तगतमपि चामीकरं विस्मृतं मृग्यते प्राप्य च हस्तगतमुपशाम्यति तथैव नित्यसिद्धात्म

भावः । सिद्धान्ती परिहसन्नुत्तरयति **तथे** त्यादि । तदेव शान्तिपर्वणिवेतालावाहनदक्षयज्ञसमयवदिहाप्ययं दोषरूपवेतालोदयन्यायोनातिक्रामति । अर्थात् यद्यात्मरूपत्वान्नित्यैव मोक्षस्तदा· नित्यस्योत्पादाभावस्य सर्वसिद्धत्वात्, मोक्षार्थमात्मोपासनादिप्रयासो भवदीयोनिरर्थक एव भवेत् । ततश्च मोक्षोद्देशेन "श्रोतव्योमन्तव्यो निदिध्यासितव्यः" इत्यादि, श्रवणादिविधायकशास्त्राणां वैयर्थ्येन शास्त्रस्यवैयर्थ्यमापतेदिति भावः ।

पुनरस्य परिहारंब्रूते **अविद्या प्रतिबद्धत्वाद्**त्यादि । अयमाशयः यद्यपि मोक्षो नित्योप्यात्मरूपत्वान्नोत्पाद्यादिरूपस्तथापि अविद्यया प्रतिबद्धत्वात् तिरोभूतासा, आत्म विद्याया प्रतिबन्धकस्यापगमेऽभिव्यक्तो भवति, तदभिव्यक्तये एवात्मविद्योपार्जनं सफलं भवति । यथा कुतश्चित् कारणात्स्वग्रीवागतंकण्ठचामीकरं विस्मृत्याप्राप्तं मन्यमानस्तत्प्राप्तये प्रयतते तथैवेहापि स्वाश्रिता विद्याच्छादितात्मस्वरूपमोक्षमप्राप्तमपि तदपनोदनाय विद्याप्राप्तिद्वारा मोक्षार्थं प्रयतमानो भवतीति मोक्षप्रतिपादकशास्त्राणां तदर्थं महाधियां प्रवृत्तिश्चनैवनिष्फला भवतीति प्रश्नकर्तुरभिप्रायः। एतत्तदुक्तं भवति—यद्यपि मुक्तिरात्मरूपत्वान्नित्यं सिद्धैवेति सा मुक्तिः परमात्म विद्यया नोत्पाद्या । यथा संधवनस्य पुरोडाशः इतिनोत्पाद्यकर्मरूपत्वं मोक्षस्य । नवा ग्रामादिवत् प्राप्यं कर्ममोक्षः यथादेवदत्तनिष्ठगमनरूपक्रिययाऽप्राप्तमपि ग्रामादिप्राप्तं भवति तथानात्र मोक्ष· स्यात्मस्वरूपत्वेन नित्यप्राप्तत्वात् । नापि मोक्षोविकार्म दुग्धस्य दधिवत् । आत्मस्वरूपमोक्षस्यात्मरूपत्वेनात्मनश्च "अविकार्योऽयमुच्यते" इत्यादिशास्त्रेणाविकारित्वश्रवणात् ।

अपितु संस्कार्यकर्मत्वम्, यथामलिनमादर्शतलमिष्टकाचूर्णादिना निघृष्यमाणं स्वच्छे तस्मिन् स्पष्टतया मुखादिदृश्यं समीचीनरूपेण परिदृश्यमानं भवति । यथावा यवनिकाच्छादितानर्तकी सभासद्भिः स्पष्टतया निरीक्षिता न भवति, परन्तु नृत्यप्रवर्तकेन प्रतिसीरापनयने नर्तकीनां साक्षात् क्रियतेऽर्थात् अनभिव्यक्तया नर्तक्या अभिव्यक्तिर्भवति सर्वेषामधिरोहति नर्तकी, तथैवाविद्या प्रतिबद्धायामुक्तेरत एव तिरोभूतायास्तस्यामुक्तेर्व्यक्त्यर्थ एव सफलो ब्रह्मविद्यायाः परिश्रमः । सतो विद्यमानस्यैव पदार्थस्याप्रकाशमानत्वेनाविद्यमानवत् स्थितस्याभिव्यक्त्यर्थः प्रयासो यथालोके दृश्यते तथैव प्रकृतेपि ज्ञानव्यमिति प्रश्नाशयः ।

अमुं प्रश्नं परिहर्तुमाह **हन्तकेयम्** इत्यादि । अत्र यद्यपि एका विद्यापक्षे शुकवामा-

स्वरूपानवोधादप्राप्तवदपि ब्रह्मविद्यया प्राप्तमिव भवतीति हन्तकेयमभिव्यक्तिर्याखलु ब्रह्मविद्यायाः फलमिव फलमिति भवदभिमता ? किं स्वप्रकाशस्य चैतन्यस्य स्वरूपेऽवस्थानम् सा संविदेवाभिव्यक्तिः किंवा अहं ब्रह्मास्मीति साक्षात्कारात्मिका वृत्तिरेवसेति विकल्पः । तत्र यदि स्वरूपसंविदेवाभिव्यक्तिस्तदा स्वरूपसंविदो नित्यत्वात् न तदेवं फलं स्यात् । अथ "अहं ब्रह्मास्मीति साक्षात्काराद्वृत्तिस्तथेति चेत् तथा सति तस्यैव विद्यात्वेन तदेव कथं फलं भवेत् । किञ्च यदि तत्त्वमसीति वाक्यजन्या वृत्तिस्तदा

देवादेर्ब्रह्मविद्ययैवाविद्यानिवृत्तिसंभवेन तदितरव्यक्तेस्तदर्थं प्रयत्नवैकल्यरूपदूषणमस्त्येवेति दूषणान्तरं नोचितमिवाभाति, तथापि, इदं दूषणं स्थितमेवेतिमत्वापि दूपणान्तरमेवाचार्यप्रवरोऽवोचत्–**हन्तकेयमभिव्यक्तिर्याखलुब्रह्मविद्यायांफलमितिष्यतेभवते**ति । तत्रायं विकल्पप्रकारः–किं स्वप्रकाशस्वरूपप्रकाशस्य स्वरूपेणावस्थानमेव विद्या साध्यानिष्पत्तिरेवाभिव्यक्तिः, अथवा अहं ब्रह्मास्मीति वृत्तिर्वा । इति इदं च दूषणमेकाऽविद्या नानाविद्या पक्षयोः समानमेव । किमितरानपेक्षप्रकाशैकरूपस्यान्तरणपरिणामस्य स्वरूपमेव विद्याप्रयोज्याभिव्यक्तिः प्रत्युताहं ब्रह्मास्मीति साक्षात्काररूपा वा । तत्र प्रथमकल्पे दूषणमाह–**यदिस्वरूपसंविदि**ति । प्रथमपक्षस्तदा सा तु नित्यैवेति न तत् ब्रह्मविद्यायाः फलं स्यात् यतः फलस्यजन्यत्वेन तथा संभवाभावात् । नवा द्वितीयपक्षस्तत्राह, **अथ ब्रह्माहमस्मी**त्यादि ।

"अहं ब्रह्मास्मीत्याकाराऽन्तःकरणवृत्तिरेव यदि संविदभिव्यक्तिपदेनोच्यते तदा इयमेव तवमते तदा सैव कथं ब्रह्मविद्यायाः फलं कार्यं स्याद् यतोऽभेदे कार्यकारणस्यादर्शनात् भेदे सत्येव कार्यकारणभावो भवतीति नियमात् । अर्थात् संवित्तिः–साक्षात्कारोऽविच्छिन्नतैलधारावत्। नहि ब्रह्मविद्या साध्यप्रकाशान्तरं मोक्षकाले भवता स्वीक्रियते, इति तदेव तस्याः फलमिति भवता वक्तव्यम् । परंतु तत् तदा न संभवति फलफलीभावस्य भेदसाध्यत्वात्, यागतज्जनितापूर्ववदिति भावः । एकदूषणमस्मिन् कल्पे प्रदर्श्य दूषणान्तरमपि दर्शयति **किञ्च** इत्यादि । तत्त्वमस्यादि वाक्यजन्या या वृत्तिः सैववृत्ति ब्रह्मविद्यायाः फलं सा तु वृत्तिरुत्पादविनाशशीलाऽनित्यात स्तस्या वृत्तेर्विनाशे मुक्तस्य पुनरपि संसारभयमापतितं स्यात् । अर्थान्नित्यशुद्धमुक्तात्मस्वभावस्याभिव्यक्तिर्यदि वृत्तिरूपा भवेत् तदातस्थावृत्तेरुत्पादविनाशशालितयातन्निवृत्तौ पुनरप्यविद्या छिन्नवदरीवृक्षवत्, शतशिखरा प्रादुर्भूत्वाऽत्मानमावस्यतींति मुक्तस्य पुनरपि भयं शिरसिन्यस्त स्यात्, इति भक्षितेऽपि लशुने नशान्तो व्याधिरिति न्यायातिक्रमो नस्याद् भवत इति ।

अथेयं ब्रह्मविद्या पूर्वपूर्वकालिका विद्यां विनाश्य स्वयमपि विनश्यति, कर्णप्रक्षिप्तजलवत् अर्थात् यथा सरसि स्नानावगाहने कर्णं प्रविष्टं जलं सरोवरादुत्तीर्य्य वहिरागतस्य कर्णे

भवन्मते सोत्पत्तिमत्यनित्या च तदा मुक्तस्यापि संसारभयमापतेत्। अपि च कार्योत्पादकपुष्कलकारणे सत्यपि यद्वशात् कार्यं न भवति तदेव प्रतिबन्धकमिति व्यवहारज्ञा वदन्ति। इह किं स्वहेतुतस्तदुत्पत्तुमुपक्रान्तमविद्या प्रतिबद्धत्वादुत्पत्तिं न प्राप्नोति। तत्र न मोक्षोत्पत्तिर्नित्यत्वात् नहि ब्रह्मास्मीति वृत्तिज्ञानम् नहि ब्रह्मास्मीति संवित् पुष्कलकारणम् संसारिस्तदातदस्तीति तस्या कथं प्रतिबन्धः, यतः साकारणादिदातीनोत्पद्यते किन्तु प्रतिबद्धत्वान्न जायते इति नेति।

पुनरपि जलान्तरं प्रक्षिपति तत् प्रक्षिप्तं जलान्तरं प्रथमतः कर्णं गतं जलं निःसार्य्य स्वयमपि निःसरति, यथावा मलाविलेज़ले प्रक्षिप्तं कतकरजोजलमनाविलं कुर्वत् स्वयमपि तत्र विनश्यति, यथा वा विषं विषयान्तरमपगमयत् स्वयमपि विनश्यति, तथैव पूर्वाविद्याऽविद्यान्तरं विनाश्य स्वयमपि शान्ता भवेदिति कुतोऽवरोस्यमुक्तस्य संसारभयादिति चेत्, अत्रब्रूमः, अनादि भावस्यनाशाऽयोगेन, तत्वसाक्षात्कारेणानादिभावरूपाया अविद्याया आत्यन्तिकनाशस्य कर्तुमशक्यत्वात्। यथाऽनादिभावरूपस्यात्मनो न भवति विनाशस्तद्वदिति। कदाचित्स्वाग्रहवशेनाविद्यायाः सावशेषोच्छेदस्वीकारे सूक्ष्मरूपेणावस्थिताया अविद्याया अभिव्यक्तेर्निवृत्तौ पुनः स्थूलरूपेणोन्मेषप्रसङ्गः प्रतिबन्धकविनाशे प्रतिबध्यावस्सानवदिति।

नचानादिभावरूपाया अपि तस्या अविद्याया आकाशादिप्रपञ्चवदेव मिथ्यात्वेनात्यन्तिकोच्छेदो विद्यया क्रियते इति वाच्यम्, परमेश्वरशक्तिरूपाया मायापयायरूपाविद्याया मिथ्यात्वे एव विवादात्। न हीश्वरशक्तेर्विनाशः केनचिदपि कर्तुं शक्यः। अविद्या मिथ्यात्वप्रतिपादक तर्काणामाभासत्वात्। शास्त्रस्य चान्यपर्यायादिति। एवं तत्त्वज्ञानेन सर्वदृश्यनाशे मोक्षोभवतीति तव मतम्। तत्र पृच्छामि, सर्वविनाशकतत्वज्ञानस्यनाशः केन ? तन्नाशकाभावे तेनैव द्वैतापत्तेः। नाशकान्तरस्वीकारे, तन्नाशकोऽन्यः कश्चिदन्वेषणीय इति क्रमेणानवस्थाभयात्तेनिवृत्तिर्नभवेदिति दिक्।

नन्वविद्याया नित्यमुक्तभावव्यक्तिप्रतिबन्धकत्वकथनमपि परस्यनोपपद्यते तत्राह **अपिच** इत्यादि। कार्यस्य सर्वकारणसमवधानेयद्वशात् कार्यंनोत्पद्यते तदेव प्रतिबन्धकं नतु कारणस्याभावमात्रम्। अर्थात् सति पुष्कलकारणे कार्योत्पत्तेः प्रतिबन्धकत्वम्, नहि मंजूषायां निहितास्तन्तवः कार्याभावे प्रतिबद्धा इति लोका जानन्ति, तत्र सामग्रयभावात् कार्याभावो नतु प्रतिबन्धकबलात्प्रतिबद्धास्तन्तव इति प्रतियन्ति।

भवन्मते मोक्षस्यानिष्पाद्यत्वात् तत्प्रतिबन्धकत्वमविद्यायां न संभवति। संसारिणश्च विषयप्रावण्यदशायां तत्त्वसाक्षात्कारपुष्कलकारणसंपत्तेरेवासिद्धतया तदनुदयोऽर्थान्मोक्षानुदय इति

कञ्चैको जीव इत्येतदपि परमार्थतोनोपयुज्यये, यतोजीवत्वस्याविद्याकल्पित-

न तत्रापि प्रतिवन्धकत्वमविद्याया घटते इत्यर्थः । सिद्धान्तेतु विद्या प्रागभावरूपाया अविद्याया न विद्या प्रतिवन्धकत्वम् । शुभाशुभकर्मण विद्यानुत्पत्तिप्रयोजकस्य निष्कामकर्मभिर्निरासे स्वकारणाद्विद्याया निष्पत्तिर्भवति । विद्यासामर्थ्याच्च प्रतिवन्धककर्मनिवृत्तौ कर्मणा संकुचित प्रसरणस्य स्वाभाविकमसंकुचितं प्रसरणं धर्मभूतज्ञानस्य सदामोक्षे भवतीति परापेक्षया सिद्धान्ते विशेषो ज्ञातव्यः ।

अत्र परे पुनराहुः अथैवं मन्मतेपि वस्तुतत्वाविशदप्रकाशकरीनानाभ्रमकारणभूता विद्याऽनादिरिष्यते । विद्यया तादृशाविद्याया निवृत्तौस्वाभाविको विशदावभासः सम्पद्यते । विशद प्रकाश प्रतिरोधकत्वादेव च प्रतिवन्धकत्ववचनमपि युक्तमविद्याया इति ।

तान् प्रतिब्रूमः विशदप्रकाशप्रतिरोधकत्वं किं विद्योत्पत्तिनिरोधकत्वम्, अथवा तन्निवृत्तिकरत्वम् ? तत्रनाद्यः कल्पोब्रह्मस्वरूपभिन्नत्वे विशदप्रकाशस्य ब्रह्मणः सविशेषत्वप्रसङ्गात् । तदभिन्नत्ववाच्येऽनुत्पाद्यत्वादेव तस्य तत्प्रतिरोधकत्वायोगादिति । द्वितीयपक्षस्वीकारेतद्ब्रह्मस्वरूपस्यैव निवृत्तिप्रसङ्गः । वैशद्यमेव निवर्तते, प्रकाशस्त्वनुवर्तते इति तु निर्विशेषवादिनां नैव वक्तुं शक्यते । किञ्च विशदप्रकाशप्रतिरोधिकायां सत्यामविद्यायां कथं तत्त्वस्य साक्षात्कारो भवेत्, प्रतिवन्धकसत्वात् ? सोप्यविशेषश्चेत्, प्राथमिकश्रवणजनितज्ञानवदेवाऽविद्या निवर्तकत्वायोगात् । अपिच विद्या निवृत्तौ सत्यां विशदसाक्षात्कारः साक्षात्कारे चाविद्या निवृत्तिरिति दुरुत्तरोऽन्योन्याश्रय आपततीति । किञ्चाविद्यानिवृत्त्यनन्तरभाविनो विशदानुभवस्य पूर्वमसत्वे मोक्षस्यानित्यत्वम्, प्राक् सत्वस्वीकारे संसारानुपपत्तिः प्रसज्यते । न च निवृत्ताविद्यत्वमेव स्वरूपप्रकाशस्य वैशद्यमिति वाच्यम्, स्वप्रकाशवपुषि सदाविद्योतमाने निर्विशेषे चिन्मात्रे ब्रह्मणि, अविद्या सम्बन्धायोगात्पूर्वमपि वैशद्यस्यैवोपगन्तव्यत् । दुर्घटत्वात्तत्रपदंन्यसेदविद्येति चेत्तर्हिमोक्षेप्यविद्यान्वयप्रसक्तेरिति मुक्तस्यापि भयमावश्यकमेवापततीति प्रकरणस्य भावार्थः । अक्षरार्थस्तुनातिरोहित इति स्वयमेवोहनीय इति संक्षेपः ॥

॥ इत्येकजीववादे मुक्त्यर्थप्रवृत्तिवैयर्थ्यादिनिरूपणप्रकरणस्य तत्त्वदीपः ॥

इतःपूर्वप्रकरणे एव जीववादेऽनेकदूषणानि कथितानि । सम्प्रतिजीवैकवादः प्रत्यक्षाद्युपलंभवाधितोपीत्येतद्दर्शयितुमुपक्रमते किञ्चैको जीवः इत्यादि । योयमेकजीववादस्तत्रैको जीव इतिपरमार्थतयानेष्यते, यतो मिथ्याविद्याकल्पितत्वे जीवत्वस्यापि मिथ्यात्वात्. प्रायः कारणानुगुणत्वात् कार्याणाम् । तथा च मिथ्याभूतस्यैकस्यानेकस्य वा जीवस्य स्वीकारेऽविशेषोविनाभिनिवेशिततेति ।

त्वेन मिथ्यात्वात् । तन्न जीवस्य प्रतिभासिकमेकत्वं प्रतीत्यैव पराहतत्वात् । यतः सहस्रशः संसरन्तः प्रतिभासमाना भवन्तीति । आसंसारं जीवभेदप्रयुक्ता अवाधिता स्वप्नविलक्षणाश्चव्यवहारा दृश्यन्ते । तेन यौगिकमेकत्वमपि युक्तिपराहतमेव प्रवृत्ति

योयमेकजीववादस्तत्रैको जीव इति कथनं किमेकस्यैव प्रतिभासात् स्वीक्रियते आहोस्वित् अनेकत्वेन प्रतिभासमानस्यापि युक्त्यैकत्वं निराक्रियते इत्यभिप्रायेण प्रथमकल्पे दोषं दर्शयितुमाह **तन्न** इत्यादि यदिदं प्रातिभासिकमेकत्वं तत् प्रतीत्यैव पराहतं भवति, यस्मात् सर्वेषामनेकेजीवा उपलभमाना भवन्ति ।

नानाजीवभानंतु व्यवहारकाले शुक्तौ रजतवत्, नैववाध्यत्वं किन्तु अवाध्यत्वमेव तत्राह **आसंसारम्** इत्यादि । यावद्येव संसारस्तावत्पर्यन्तं तेऽनेकेजीवाः स्वाप्निकजीवापेक्षया विलक्षणाः सर्वथाऽवाधिताः समुपलभनाना भवन्तो नोपलंभवाधिताशुक्तिरजतवदिति । स्वप्न विलक्षणाः स्वाप्निकार्थापेक्षयाऽतिविलक्षणाः अर्थादवाधिताः । अयंभावः यथा स्वप्नकालपरिदृष्टगजादिपदार्थव्यवहाराणां स्वप्नेप्यसत्वंतत्पश्चात् कालिकवाधेन, व्यवहारकाले जागरणेतु स्वत एवासत्वं स्वाप्नगजादीनामनुभूयमानत्वात् भवतु तेषां तथा परन्तु नैवं जागरणकाले जीवभेद प्रयुक्तव्यवहारविशेषणं वाधो निश्चीयते, येन न नामसत्वं निश्चीयेत । प्रत्युतान्यजीवकृतोपकारस्यानुपकारस्य वासत्वप्रतीत्यैव, आवाल्गोपालं तदनुगुणप्रवृत्तिसंरंभोदृश्यते ऽनुवर्तमानः प्रलयं यावत् तिष्ठति । अपिच व्यवहारकाले जीवभेदस्यावाध्यत्वात् जीवस्य व्यावहारिकत्वमेव परमतेपि सिद्ध्यति नतु प्रातिभासिकत्वं शुक्तिरजतवत्, जीवभेदस्य प्रातिभासिकत्वे शुक्तौ रजतवत् व्यवहारकालेविरोधोनुभूयेत नानुभूयते तस्मान्नजीवभेदस्य प्रातिभासिकत्वमपितु व्यावहारिकत्वमेव ।

जीवभेदो मिथ्या प्रतिभासमानत्वात्, स्वप्ने स्त्रीपुरुषभेदवदित्यनुमानं च व्हारदशायामवाध्यत्वेन सोपाधिकमेवेति । तथा च ब्रह्मसूत्रं "वैधर्म्याच्च न स्वप्नादिवदिति" "स्वप्नज्ञानदृष्टान्तेन जागरितज्ञानस्य निरालम्बनत्वं न शक्यते वक्तुम् । कुतः ? वैधर्म्यात् । स्वप्नादिज्ञानस्य मनः कल्पनामात्रत्वेन बाधितविषयत्वाज्जागरितज्ञानस्य तु प्रत्यक्षप्रमाणजन्यत्वेनावाधितविषयत्वात् । इत्युभयोर्ज्ञानयोर्वैषम्यात् । चकारात्दृष्टान्तभूतस्वप्नप्रत्ययोऽपि न सर्वथा मिथ्याभूतः क्वचित्तस्यापि साफल्यदर्सनात् " (आनन्दभाष्यम् २।२।२९) इत्यादिरूपकश्रीरामानन्दभाष्येऽस्य विवरणं दृष्ट्वा जीवभेदस्य व्यावहारिकत्वमेव निर्णेयमिति न जीवभेदस्य प्रातिभासिकं कथमपि सिद्ध्यतीति सिद्धान्तः ।

व्यवहारकालवाधेन हेतुना जीवभेदप्रातिभासिकत्वस्य यौक्तिकनिष्कर्षमपि निराकर्तुं दर्शयति **"तेन यौगिकमेकत्वमपि युक्तिपराहतमेवेत्यादि"** तेन जीवभेदस्य व्यवहारकालवाधेन

भेदानुमितविरुद्धवृत्तयस्तत्तत्स्वात्मवदन्येपि जीवा न निराकर्तुं योग्याः । यथाऽनुमेयवन्ह्यादेरनुमानविलक्षणावह्नय आनुमानिकवह्निभ्योभिन्नाः प्रत्यक्षेण दृश्यन्ते तथैवचेष्टाविशेषादिना परोपि जीवोऽनुमितो भवत्येव । अन्यथा लौकिकवैदिकव्यवहारः

हेतुना । सर्वेजीवा अहमेकजीवत्वात्, अहमिव, सर्वाणि शरीराणिमयैवात्मवन्ति शरीरत्वात् मदीय शरीरवदित्यादि जीवैक्ययुक्तिजीवभेदसाधकयुक्तिपराहतैवेत्यर्थः जीवभेदयुक्तेः प्रावल्यं च व्यवहाराऽवाध्यत्वादुपलंभानुगुणत्वाच्चेति वोद्धव्यमिति । जीवभेदपराहताऽभेदयुक्तिरित्युक्तम्, तत्र का सा जीवनानात्वयुक्तिरितिजिज्ञासायामाह **प्रवृत्तिभेदानुमित** इत्यादि । तत्तद् शरीरगतविलक्षणभेदानुमितास्तत्तदनुगुणविरुद्धज्ञानसङ्कल्पप्रयत्नस्तदन्ये देहिनोपि ससस्वात्मेव स्वशरीरप्रवृत्त्यनुगुणज्ञानादिमान् प्रत्यात्मसिद्धो न निराकर्तुं शक्यन्ते । पञ्चाननोप्याह "प्रवृत्याद्यनुमेयोयंरथगत्येव सारथिः । अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥" इति । अत्रप्रवृत्तिपदेन हिताहितप्राप्तिपरिहारानुकूलाचेष्टाया ग्रहणं भवति, तादृशचेष्टया परकीयदेहादौपरात्माऽनुमीयते, रथगत्या सारथिवदिति । तत्रवृत्तिग्रहणं सङ्कल्पादेरप्युपलक्षकम् । परशरीराणि सात्मकानि चेष्टावत्वात्, स्वशरीरवदिति सात्मकत्वेऽनुमिते तदात्मना स्वात्मभेदोऽर्थतः परिशेषात् सिद्ध्यति । परकीयशरीरप्रवृत्तिहेतुभूतसङ्कल्पप्रयत्नस्य, स्वासमवेतत्वे सति गुणत्वात् स्वभिन्नसमवेतत्वानुमानात् । स्वासमवेतत्वं च तस्य स्वस्य तद्भिन्नसङ्कल्पप्रवृत्तिमत्वादेव सुनिश्चितमिति ज्ञातव्यम् ।

सिसाधयिषितानां परात्मनां दृष्टान्तीभूतस्वात्मभिन्नत्वे दृष्टान्तं प्रदर्शयत्याचार्यः **यथाऽनुमेयवन्ह्यादे** रित्यादि । अत्रानुमानाः=अनुमानप्रयोजकाः सपक्षदृष्टान्तमहानसादौ परिदृश्यमाना महानसचत्वरादिवन्ह्यनुमेयात्पर्वतीयवन्हिभ्यो यथा भिन्ना एवं व्याप्तिग्रहणसमये प्रत्यक्षेण दृष्टा भवन्ति, तथाऽनुमेयेभ्यः परकीयदेहस्थितात्मभ्यः शरीरप्रवृत्तिचेतनसंकल्पप्रयत्नपूर्वकत्वव्याप्तिग्रहणसमयेकाले गृहीतं त्वदीयात्मस्वरूपंत्वद्देहप्रवृत्तिहेतुभूतसंकल्पादिमद्भिन्नत्वेन कुतो न प्रत्यक्षम्? अपितु प्रत्यक्षमेवेतियावत् । जीवानामैक्यसाधनं वन्हीनामैक्यसाधनमप्रयोजकमुपलंभवाधितं चेति हृदयम् स्वशरीरे स्वात्मवत् परशरीरे परात्मापि सिद्ध्यतीति साधितम्, तदनुपगमे वाधकमपि दर्शयति **तथैव चेष्टाविशेष** इत्यादि । परशरीरेषु परात्मनश्चेष्टाविशेषणानुकूलप्रतिकूलमध्यस्थानुहित्वैव, तत्तदनुगुणा व्यवहारा लोकेषु दृष्टा भवन्ति जीवभेदप्रयुक्ता एवाधिकारितद्भिन्नविभागादिव्यवहाराः शास्त्रीया दृष्टास्तेषां व्यवहाराणां विलोपः प्रसज्येत जीवभेदानुपगमे इतिभावः ।

अथज्ञानमात्रस्वभावक आत्मा स्वभावत एकएव, नानोपाधिसंबन्धान्नानाजीवरूपेण विभाति, तावतैव लोकवेदव्यवहारोपि संगच्छते । औपाधिकजीवभेदप्रयुक्त एव व्यवहारभेदो जीवस्वरूपासंकरश्च समाहितो भवति । उपाधि भेदोपि न पारमार्थिकोऽपितु कल्पित एवेत्याशङ्काम-

सर्वोऽपि विलुप्येत। नचोपाधिभेदात्प्रतिशरीरं जीवभेदः। तथात्वे स्वशरीरेपि शिरः पाण्याद्युपाधिभेदेन जीवभेदप्रसङ्गात्। स्वशरीरपादादिभेदेपि अनुसन्धानात् तदेकत्वं तदा तवमते सर्वत्रानुसन्धानप्रसङ्गात्।

॥ इत्येकाविद्या कल्पितैकजीववादनिरासप्रकरणम् ॥

नुद्यपरिहर्तुमाह **नचोपाधि**रित्यादि। यदि उपाधिभेदेन व्यवस्थामीहेत तदा शिरः पाणिपादाद्युपाधिभेदेनापि तत्तदवच्छिन्नचेतनस्य भेदप्रसङ्गः। एवञ्च पाणौ वृक्णे महत्यवयवेस्तनादौ जाते युवतिमृताजातावेत्यपि व्यवहारः प्रसज्येततथाचैकस्मिन्नेव देहे पादे मे वेदना शिरसि मे सुखमित्यादि प्रतिसन्धानानुपपत्तिर्भवेदितिनौपाधिकभेदः साधीयान्। ननूपाधिभेदे सत्यपि चैतन्याभेदात्प्रतिसन्धानं स्यादिति चेत्तत्राह **तथात्वे** इत्यादि, अत्र तथेतिपदमनिष्टं समवचिनोति यथा शिरः पाणिपादादौ वेदनाद्युदये एकत्वेऽनुसन्धानं तथैव सर्वत्र तवमतेन सुखःदुखानुसंधानमापतेत्। वस्तुतः सर्वस्मिन्नेवशरीरे चैतन्यस्यैकत्वात् सर्वगतसुखादिप्रतिसंधानप्रसङ्गस्यादित्यर्थः। न च शरीर भेदस्यैवात्मभेदकत्वं नतु तदवयवभेदस्यात्मभेदकत्वमिति वाच्यम्, सौभरिप्रभृतिमहात्मसु शरीर विद्यमानेपि, प्रतिसंधानस्य दर्शनेन शरीरभेदस्यापि जीवभेदप्रयोजकत्वाभावात्। न च तत्तत्पुरुषीयकर्माधीनशरीरस्यैव तत्तद्भोगावच्छेदकत्वेनैव व्यवस्थास्यात् सौभरिप्रभृतेर्युगपन्नानादेहसम्बन्धेपि तत्तदीयकर्मसम्पादित एव, नत्वस्मदादीनां तथेति वाच्यम्, औपाधिकात्मभेदवादे प्रतिकर्म व्यवस्थाया अपि दुर्घटत्वात्, उपाधे स्तदीयत्वं तत्कर्मणैव वाच्यम्, उपाधिव्यवस्थया च तत्तत्कर्मभेद इत्यन्योन्यादिति। अतो वास्तविकजीवभेदेन भोगादीनां परस्परस्तत्कार्यं निवारणीयंनान्यथेति।

ननु देहभेदेप्यात्मन एकत्वात् यदि प्रतिसंधानं समर्थयसे तदा जन्मान्तरेऽनुभूतस्य प्रतिसंधानं जन्मान्तरेस्यादिति चेत् मरणक्लेशात्, नरकक्लेशात् तथा प्रसवव्यथापीड़नाच्चचिरातीत जन्मसम्बन्धि सुखादयोनानुभूयन्ते। अयंभावः प्रबलदुखानुभवस्य संस्कारविनाशकत्वं कालस्य च तथाऽन्यकारणेनापि संस्कारप्रमोषो भवति संस्काराभावाच्चनस्मरणं भवति। यथा प्रबलवातकफपित्तजज्वरादिरोगार्दितस्याधीन विस्मरणदर्शनात्। जन्मभेदे च मरणनरकगर्भवासजन्मकालिक क्लेशाधिक्येन संस्कारस्यापगमात् कारणाभावेन पूर्वजन्मानुभूतवस्तुविषयकस्मरणं जन्मान्तरे संस्काराभावान् न जायते। कालदीर्घत्वस्यापि संस्कारनाशकत्वं जीवनादृष्टवलादेव संस्कारविशेषस्य न विनाश इत्यपि कल्प्यते, अतएव जातमात्रस्य स्तन्यपानेप्रवृत्तिर्भवति। अन्यथा प्रवृत्त्यभावे मरणमेव भवेत्। केषांचित् जातिस्मरादीनां पुण्यातिशयेन संस्कारस्याविनाशात् पूर्वजन्माद्य विस्मरणं भवतीति लोकशास्त्रमेवेति बोद्धव्यम्। समकाले जायमानेषु सुखदुःखानुभवेषु "शिरसि मे वेदना पादे सुखमित्यादिषु कालदैर्घ्यादिसंस्कारप्रमोषकाभावेपि, अस्मरणाद्यात्मनामसंकराद-

न चैवं प्रातिस्विकतत्तदविद्या कल्पिता नानाजीवाः स्वस्वस्वप्नकल्पितदृश्यकैर्जीवैरनेकैरेषा लोकयात्रोपजायते इति वाच्यम् परवार्तानज्ञत्वात् ते स्वस्वप्नैकदर्शिनः- कथं प्रवर्तयेयुः

किञ्च तवमते स्वप्रकाशत्वव्यापकत्वैकनित्यत्वादयोभवदीयमता ब्रह्मगुणा संविदोऽद्वितीयतां वाधेरन् । संवित्स्वरूपा एव गुणा अतो न संविदोऽद्वितीयतां

नैक्यादेव व्यवस्थाप्यम् । तथा चैकात्म्यधियो भ्रमरूपायाअपिनोदयावसरः आत्मभेदस्यैव स्फुट प्रतिभानादिति भावः । एवमेकाविद्याकल्पितैकजीववादे दूषणजातानि प्रपञ्चितानीति दिक् ।

॥ इत्यैकविद्याकल्पितैकजीववादनिरासप्रकरणस्य तत्त्वदीपः ॥

एकविद्याकल्पितैकजीववादं निराश्य नानाविद्याकल्पितनानाजीववादं निरसितुमुपक्रमते **नचैवंप्रातिस्विकेत्यादि** अत्र नचेति पदं निराकरणपरकं वादस्य । नायंवादो युक्त इत्यर्थः । तत्तदविद्या कल्पिताश्चितोनानाजीवविशेषाः । ते च स्वकीय स्वकीयाविद्याकल्पितं घटपटादिसमुदायं पार्थक्यैनैकविजानाति, यथा स्वप्नदृक् भिन्नभिन्नमेव स्वस्वप्नं तद्गतान् पदार्थांश्च पश्यति । व्यावहारिका अन्येजीवाः स्वेतरान् जीवान् न पश्यन्ति । स्वेन दृश्या जीवास्तु स्वाप्नवत् प्रातिभासिका, ज्ञानसमकालीनत्वात् समानोज्ञानसत्ताका एवेत्यस्य हृदयम् । अत्रान्यजीवं तद्गतगुरुक्षेपादिकं वा तदन्यो जीवस्तथा भूतो न विजानामीति चेत्तर्हि तेषां तथा विधानामेकास्मिन् स्थले समागमादिप्रसंगाभावात् सहानुभूत्यैकसाध्योऽनुवृत्तो लोकव्यवहारः कथमिव निर्वर्त्येतेत्यर्थः । स्वाविद्याकल्पितमेव पश्यन्तीत्युक्त्या परवार्तानभिज्ञत्वं-व्यावहारिकजीवान्तरवृत्तानभिज्ञत्वं सिद्ध्यति । लोकव्यवहारोपि प्रातिभासिक एवचेत्तर्हि एकजीववादप्रसङ्गः । एकजीववादे च दोषः कथित एवेति हृदयम् ।

॥ इति नानाविद्याकल्पितनानाजीववादनिरासप्रकरणस्य तत्वदीपः ॥

ज्ञानमात्रे ब्रह्मणि मायाकल्पितोमेयप्रमातृप्रभृतिभेद इति परकीयमतं मुकुलिततया निरस्यः विस्तररूपेण तमेव मतं प्रतिक्षिप्तमेतावताप्रबन्धेन अथ संविदि ज्ञानेतराभिमतं निर्विशेषत्वं प्रतिक्षेप्तुमिदमुपक्रमः **किञ्चतवमतेस्वप्रकाशत्व** इत्यादिना । अद्वैतिमताभिमतैरेवानन्दत्वविभुत्वादि धर्मैर्ब्रह्मणः सविशेषत्वप्रसक्त्यात् यत आनन्दत्वधर्माणां धर्मिब्रह्मतोभिन्नत्वस्य सर्वसंमतत्वात् । तेषामानन्दत्वादिधर्माणां ब्रह्मस्वरूपत्वाभेदात्तेषां न संविदः सधर्मत्वमिति शङ्कामनूद्यनिराकर्तुमाह **संवित्** इत्यादि । अर्थात् सम्प्रतिपन्नेपि संवित्स्वरूपे धर्मिणि न नित्यत्वविभुत्वैकत्वस्वप्रकाशत्वादौ, बौद्धतार्किकमीमांसकादीनां प्रतिपक्षीणां विवादात् स्वस्वस्वरूपभेदाच्च तेषां धर्माणां

बाधन्ते इतिवाच्यम् विवाददर्शनात् । तद्रूपाणां परस्परंविभिन्नत्वाच्च । न च ते धर्ममात्रा येनाद्वैतं नवाधेरन् यतो तादृशधर्माणां तत्वावेदकवेदान्तवाक्यप्रमाणसिद्धत्वात् । आनन्दत्वस्वप्रकाशत्वादिकब्रह्मस्वरूपमेवेष्टं भवतस्तत्रापीदं विवेचनीयम् । किमानन्दत्वादिकंब्रह्मस्वरूपमात्रम् अथवा ब्रह्मनिष्ठाब्रह्मगुणा ? अथवा आनन्दादीनां प्रत्येकं ब्रह्मेतिनाम ! अथवा समुदितानामानन्दानां ब्रह्मसंज्ञेति विकल्पः ।

प्रथमे पार्थक्येन तत् तत्पदानांवैयर्थ्यम् ब्रह्मस्वरूपंस्वीकृत्यैव वादिनां विवादात् । द्वितीयकल्पे आनन्दादिभिरेवब्रह्मणः सद्वितीयत्वं प्रसज्येत । तृतीयपक्षे ब्रह्मभेदः प्राप्नोति, तन्मात्रत्वात्तस्य यदि आनन्दादिसमुदायोब्रह्म तदा तरुवनादिवत्

नित्यत्वादीनां संवित्तौ न सम्प्रतिपन्नसंविदभिन्नत्वं तेषां युज़्यते इत्यर्थः । स्वरूपभेदश्चात्मसिद्धौ निरूपित इति तत एव विविच्यानुसन्धेयो विस्तरभयान्नात्र पुनः प्रपञ्च्यते ।

नन्वेवमपि तेषां विभुत्वादिधर्माणामपारमार्थिकत्वात् पारमार्थिकाद्वितीयत्वंनक्षतमिति चेत्तत्राह **नचते** इत्यादि ते विभुत्वादयो धर्मा न भ्रान्तिसिद्धाः । तव मतेपि ते विभुत्वादयो धर्मास्तत्वावेदक परवेदान्तवाक्यप्रमाणसिद्धाधर्माःसंविदोनित्यत्वाद् इत्येव मतम् । अर्थात् तव मते ते विभुत्वादयः पारमार्थिकाधर्मा नतुविभ्रान्ता अपारमार्थिकास्तत्तैर्विभुत्वादिधर्मैः सविशेषत्वं ब्रह्मणो दुर्वारमेव । तेषां वाधे तुल्यन्यायेन धर्मिणःसंविदोपि बाधःस्यादिति द्योतितम् **तत्वावेदक** इत्यनेन । ब्रह्मस्वरूपाभेदस्यैव तत्तत् विभुत्वादिधर्मेषु पराभिमतत्वात् तत्र प्रकारान्तरेण दुषणं दातुमाह **आनन्दत्त्व** स्वप्रकाशत्त्वादित्त्यादि । विकल्पयति=**ब्रह्मस्वरूपमेवे** त्यादि किमत्र आनन्दत्त्वादयो धर्मा ब्रह्मस्वरूपमात्रम्, अथवा ब्रह्मनिष्ठाआनन्दत्त्वादयोधर्माः । अथवा आनन्दत्त्वादीनामेव प्रत्त्येकं ब्रह्मेति संज्ञा ! अयवा समुदितानां तेषां ब्रह्मेतिसंज्ञेति विकल्पः । तत्र न प्रथमः पक्षस्तत्राह **प्रथमे पार्थक्येन तत्तत्पदानां वैयर्थ्य**मित्यादि । धर्मधर्मिगोरत्यन्ताभेदेऽनतिरिक्तार्थकाभावात् "आनन्दो ब्रह्म" "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतौ सहपाठस्यानर्थक्यं प्रसज़्येत । नहि भवति "घटः कुंभः" इत्येवं रूपेण सहपाठः कुत्रापि ।

ब्रह्मस्वरूपेणसहैक्यासंभवं पूर्पोक्तमेवस्मारयति तेष्ु विभुत्वादिधर्मेषु पूर्पोक्तरीत्याभेदश्च धर्मधर्मिणोःजगज्जन्मादिकारणमिति, द्वितीयकल्पस्वीकारेतु विभुत्वादिधर्मैर्ब्रह्मणःसद्वितीयत्वमापतेत् तत्राह **द्वितीयेति** । भवदभिमतविरुद्धैर्विभुत्वादिधर्मैः सद्वितीयता ब्रह्मण आयातीति । तृतीयकल्पस्वीकारे प्रत्त्येकसमुदायकोट्योः प्रत्येककोटिं दूषयितुमाह "**तृतीयकल्पे**समुदाय पक्षे, प्रत्येकस्मिन् ब्रह्मभेदः समापतेत् धर्माणां परस्परभेदस्य धर्मिभेदनियतत्वात् । अर्थात् प्रत्येकशोब्रह्मत्वमित्यत्र नानाब्रह्मप्रसज्यते, खण्डो गौर्मुण्डो गौः परिपूर्णो गौ नीला गौरितिवत् सत्यं-

ब्रह्म स्यात् । प्रकर्षश्चप्रकाशश्चेत्येतौ भिन्नावेवसूर्यप्रकाशवत् , तेन न कुत्रापि वाक्यार्थोऽखण्डे दृष्टान्तः संभवति । यदि जड़त्वदुःखाद्यपोहेनैकत्रवर्तित्वं तेषां, तदा किमपोहा न सन्ति सन्ति वा नोभयं वा । सत्त्वपक्षे सद्वितीयत्वम् , द्वितीयेजड़ात्मकत्वम् , तृतीय

ब्रह्म आनन्दं ब्रह्म अनन्तं ब्रह्मेति । कुतः ? तन्मात्रत्वात्—तत्तन्मात्रस्वरूपत्वाद् ब्रह्मण इति । सत्यत्वादिसमुदायो ब्रह्मेतितार्तीयद्वितीयपक्षेपि दोषं वक्ति **यदीत्यादि** वृक्षसमुदायस्य वनत्ववत् सत्यत्वादिसमुदायस्य ब्रह्मत्वे समुदायस्य समुदायिभ्योऽनन्यत्वे प्रत्येकपक्षोक्तदूषणस्यनिवृत्तिर्न भवति समुदायात्समुदायिनो विभिन्नत्वे ब्रह्मणः सावयवत्वं गुणत्वं चानिष्टमापतेदिति भावः ।

ननु "सत्यं ज्ञानमित्यादौ सत्यादिवाक्यमखण्डार्थपरकं स्वरूपलक्षणवाक्यत्वात् प्रकृष्ट प्रकाशश्चन्द्र इतिवत् रात्रौदिवा च प्रकृष्टप्रकाशः सवितेतिवदिति न ब्रह्मणः सविशेषत्वमापततीति चेत्तत्राह, **प्रकर्षश्च प्रकाचश्चे**त्यादि । निगदव्याख्यातमेवैतत् । अत्र सूर्यादि दृष्टान्तोपि न केवलं सूर्यादिस्वरूपमात्रप्रकाशनपरकोऽपितु सूर्यादिव्यवहारविषयीभूतसूर्याद्यर्थस्य साधारणाकार प्रदर्शनपरक इति निर्विशेषाद्वैतरूपोऽखण्डः समानाधिकरणवाक्यार्थौ दृष्टान्तभूतोनैव कथमपि विद्यते इति भावः । कुत्रापि समानाधिकरणवाक्ये, अविभागोऽखण्ड़ो न भवति, किन्तु सर्वत्र सखण्ड़तैव भवतीति भावः । अथ परः पुनः शङ्कते **यदिजडत्वदुःखाद्यपोहेन** इत्यादि । अयमभिप्रायः प्रश्न कर्तुः, तथाहि—अत्र श्रुतौ ज्ञानानन्दादिपदं न ज्ञानत्वानन्दत्वादिविशेषं प्रतिपादयति किन्तु ज्ञानपदं जड़त्वापोहमेव बोधयति । अपोहस्तु स्वेतरव्यावृत्तिरभावस्तु अधिकरण स्वरूपमेव वन्ह्यभाववज्जलमिति वदिति न ब्रह्मणः विशेषत्वप्रसङ्गः । जडादितत्तत्पदार्थप्रतियोगिक व्यावृत्तिस्वरूपप्रतिपादनेन चार्थवत्वं पदानामिति । अत्र विकल्पदोषं वक्तुमाह—**अपोहा** इत्यादि । अपोहो नास्त्येव किम् ,अथवा सन्ति अथवानोभय ! तत्रनोभये नसन्तो नाप्यसन्तः, अर्थात् सदसद्विलक्षणाः । तत्रापोहानां सत्वे दोषंवक्ति **सत्त्वे** इति सत्त्वे सद्वितीयं स्यादिति । अर्थात् यदि अपोहस्य सत्वं स्वीक्रियते तदा तेनैव सताऽपोहेन सतोब्रह्मणः सद्वितीयत्वं प्रसज्येत इत्यर्थः । अपोहानामसत्वेदूषणमनुवदितुमाह "जडाद्यात्मकत्वम्" परे=तत्र परपक्षस्वीकारेऽर्थात् जडाद्याद्यपोहानाम भावे सति ब्रह्मणि जडत्वादिकमापतेत् । तृतीयपक्षं नसत नासदितिपक्षनिराकरोति **तृतीय** इत्यादि । यदि अपोहे सद्व्यतिरेकेऽसत्वं स्यात् , असद्व्यतिरेके सत्वंव्यवस्थितमिति सदसद् भिन्नत्वं न कस्यापि संभवति तृतीय कोव्यभावात् । तथोक्तम्—

"परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्र विरोधतः ॥"

इत्युदयनाचार्येण

पक्षस्तुपूर्वमेव निराकृतः । तथात्वे ब्रह्मणोपिघटादिभ्यो विशेषो न स्यात् । किञ्चापोह्यजडत्वाद्यर्थस्यासमर्पणे, तत्तदपोह्येत, एकार्थप्रतिपादकपदवत् । प्रतियोगिनि दृश्येतु याभावान्तरबुद्धिः सैवाभावस्तथा च तेन सद्वितीयत्वं ब्रह्मणोऽनिवारितमेवेति ।

॥ इति सविशेषत्वोपपादनेन संविदो निर्विशेषत्वनिरसनप्रकरणम् ॥

एवं स्थितेपि दोषान्तरं वक्ति **तथात्वे** इत्यादि । घटादिभ्यो ब्रह्मापि भिन्नं न स्यात् । अपोहानां ब्रह्म स्वरूपत्वे सदसद् विलक्षणत्वे च ब्रह्मणोपि सदसद्विलक्षणत्वं स्यात् । घटादि प्रपञ्चवदेव । यथा घटादौ सत्वं स्यात्तदातस्य बाधो न स्यात् । असत्वं स्यात् तदा वन्ध्यापुत्रादिवत् प्रत्यक्षप्रतीतिर्नस्यादिति सदसद्विलक्षणत्वं तथैव ब्रह्मणोपि तथात्वमापतेदितिभावः । पुनर्दूषणान्तरमाह **किञ्चापोह्यजडत्वादि**रित्यादि । जडादिव्यावर्तकधर्मबोधनमन्तराजडादीनां व्यावृत्तिरर्थात् स्वेतर व्यावृत्तिर्न प्रतिपादयितुं शक्यते सत्यज्ञानादिपदैर्जडादिपर्यायपदैरिवेति व्यावर्तकधर्मबोधकत्वमवश्यमेव स्वीकरणीयम् । तथा च तैस्तैर्धर्मैः सत्यत्वादिभिः सविशेषत्वं ब्रह्मणो दुर्वारमेव नतु निर्विशेषत्वं तस्य कथमपि साधयितुं शक्यमिति । तत्तत् जडत्वादि, अपोह्येतद्व्यावर्त्येत ननुव्यावर्तक धर्मवत्वं पदैर्न बोध्यते, किन्तु जडादिव्यावृत्तिरूपत्वमेव बोध्यते सत्यज्ञानानन्दादिपदैर्धर्मिणो ब्रह्मणः । तत्र जडत्वादिप्रसङ्गो ब्रह्मण इति चेत्तत्राह **दृश्ये प्रतियोगिनि** इत्यादि । योग्ये प्रतियोगिनि घटादिकेऽनुपलभ्यमानेऽधिकरणज्ञानमेवतदभाव इतिज्ञानविशेषरूपत्वाद् भावस्य ज्ञानविशेषरूपैः सत्य ज्ञानादिपदलक्ष्यार्थैरभावैर्भावरूपैर्ब्रह्मणः सविशेषत्वं प्रसज्यते इत्यर्थः । अभावो ज्ञानरूप एवेति न सर्वसंमतम्, तथापि अभावस्य ज्ञानरूपत्वकथनंमतविशेषमभिप्रेत्यैव । यद्वा भावान्तरमात्रधिरिति, उपलभ्यमानं भावान्तरमित्यर्थं पर्यवस्यति । तथोक्तमभियुक्तैर्भावान्तरमभावोऽन्योन कश्चिदनिरूपणादिति । अर्थात् योग्ये घटादिके प्रतियोगिन्यनुपलभ्यमाने तत्राधिकरणे जलादौ यद्भावान्तरं शैवालादिकं समुपलभ्यते तदेव प्रतियोगिव्यपेक्षयाऽभावव्यपदेशभागिति-अधिकरण वृत्तिधर्मान्तररूपत्वादभावान्तरैः सविशेषत्वं प्रसज्यते एव ब्रह्मणः । घटादौ द्रव्ये विद्यमानोऽभावस्तस्य धर्मरूपः । धर्मस्य च स्वपरनिर्वाहकत्वेन स्वरूपमेवाभावः सति संभवे धर्मान्तरमभावोवेति यथोपलंभं व्यवस्था । यस्मिन्नधिकरणे प्रतीयमाने, इतरारोपो न घटते, तस्यैवतदभाव रूपत्वम् । सत् स्वरूपे प्रतीयमाने एव भेदानामध्यासाच्च तत्र तस्यैवनेतराभावरूपत्वमिति ।

नचाविद्ययाऽविशदं भासमाने सति भेदभ्रमः अविद्या निवृत्तौ विशदं भासमाने तु न भ्रम इति विशदस्वरूपस्याभावरूपत्वं संभवतीति वाच्यम् । वैशद्यस्य स्वरूपत्वे पूर्वमप्यविद्यादिभेदारोपायोगात् । स्वरूपातिरिक्तत्वे तु तस्यैवाभावरूपत्वं न स्वरूपस्येति प्रसङ्गात् । किञ्च निर्विशेषे स्वप्रकाशे वस्तुनि विशदाविशदभानमेव दुर्वचम् । सविशेषेतु कतिपयाकारेणभासनमविशदम्, सर्वाकारभानं विशदमिति विशेषः । किञ्च ब्रह्मणो द्रव्यत्वे सधर्मकत्वम्, अद्रव्यत्वे तु

ननु भूतभौतिकाकाशादिप्रपञ्चस्य सदसद् भिन्नत्वं प्रत्यक्षप्रमाणेन निश्चीतमागमप्रमाणेन वा ? तत्र न प्रत्यक्षं सदसद्भिन्नत्वे प्रमाण्यं प्रत्युत यथावस्थितार्थबोधकत्वेन सत्त्वासत्वयोरन्यतरस्मिन्नेव प्रामाण्यावधारणात् । ननु वस्तुनः सदसद्भिन्नत्वेऽप्रामाण्यात् । यथा पुरतो भासमाने नीलेऽवाधितनीलबुद्धिरेवजायते नरक्तादिधीर्जायते । नहि भवति स्फटिकचक्षुः संयोगेनीलमतिः प्रत्युत धवलमतिरेव भवति । नवा रसना निम्बसम्बन्धेकषायमतिर्भवतीत्येवं रूपेण सर्वे लौकिकवैदिकव्यवहाराः कस्यचिद्धर्मरूपत्वं प्रसज्यते । द्रव्याद्रव्यविलक्षणत्वं तु नैव संभवति विरोधात् । उभयविलक्षणत्वेऽनिर्वचनीयत्वं स्यात्, तच्च पूर्वं पश्चाच्च निराकृतमितिदिक् । सत्यज्ञानादिपदानामपोह लक्षणायामपि न ब्रह्मणो निर्विशेषत्वं सिद्ध्यति, उभयपदलक्षणायांतु कल्पनागौरव मात्रमेव हस्तगतं भवतीति विशेषविचारोभारमात्रमेव न फलाय भवतीत्यलम् ।

॥ इति सविशेषत्वोपपादनेन संविदो निर्विशेषत्वनिरसनप्रकरणस्य तत्त्वदीपः ॥

अथ प्रपञ्चस्यापि प्रसङ्गसङ्गत्या सदसदनिर्वचनीयत्वमिति यत् परमतं तदपि निराकर्तुमाह "**भूतभौतिकाकाशादि** इत्यादि, अर्थात् प्रपञ्चस्य भूतभौतिकस्य सदसद्भिन्नत्वमद्वैतमत सिद्धम्, तत् कस्मात्प्रमाणादवगम्यते, किं प्रत्यक्षप्रमाणेन निश्चीयते आगमेन वा प्रमाणेन ? तत्र न प्रथमः तस्य सद्भावग्राहकत्वात् । नत्वनिर्वचनीयत्वं गृह्णानीति प्रदर्शयितुमाह **तत्र न प्रत्यक्ष** मित्यादि तत्रेन्द्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षम् । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । एतत् हि स्वस्वग्राह्यमर्थं यथायथंतत्तदसाधारणाकारतो विजातीयसजातीयान्तरव्यावृत्तमेव ज्ञापयन्ति प्रत्यक्षादीनि चक्षुस्त्वक् रसना घ्राणादीनीति लोकप्रसिद्धमेव एवञ्च तत्तदसाधारणाकारेणैतानि प्रमाणानि वस्तूनां रूपशब्दादीनां सद्भावे एव प्रमाणानि नतु प्रत्पक्षंसदसदनिर्वचनीयत्वं बोधयतीति भावः । एतदेवोपपादयति **यथा** इत्यादि नीलघटादौ नीलत्वमतिस्वच्छे स्फटिकादौ धावल्यप्रतीतिश्चनैव वस्तुविषया, किन्तु परस्परव्यावृत्तद्रव्यगुणादिविषयैव एवं गव्येपयसि मधुर बुद्धिः स्वभावतः कटौ निम्बे तिक्ततामतिहरितक्यादौ कषायबुद्धिरेवजायेत, परन्तु नैकार्थविषया किन्तु परस्परव्यावृत्तगुणादिविषयैव भवति । एवञ्च परस्परविभिन्नार्थभेदविषयत्वमेव ज्ञानानां स्थितमिति भावः । तत्र नीले नीलमतिरेकाकारा एकनीलादिविषया च भवति । तत्र नीले न नील गुणभिन्नगुणत्वप्रसङ्गः । स्फटिके धवलमति ततो भिन्नाभिन्नाकाराचेत्यर्थौ नैवेत्यस्यैतादृगि तींत्यस्याक्षेपः कर्त्तव्यः ।

एवंक्रमेण ततद्वस्त्वसाधारणाकारभेदेऽवाधितबुद्धिं प्रदर्श्य व्यवहारमपि तादृशं दर्शयति प्रमाणतया **व्यावहाराःप्रतिनियताः** इति । अवाधितप्रत्यक्षादिप्रमाणतन्मूलकव्यवहारबलात्पदार्थानां तत्तदसाधारणाकारेण सत्त्वमेव स्वीकर्त्तव्यं नतु सदसद्भिन्नत्वमुपेयमिति भावः ।

प्रतिनियताः। सत्यं तथा प्रतितिपरन्तु तस्यामूलं नास्तीति चेन्न, प्रमात्मककार्यसत्वेतेन शुद्धकारणानुमानात्। क्लृप्तं चेन्द्रियलिङ्गादीनामन्वयव्यतिरेकानुविधानम्। यौगपद्यक्रमायोगाद् विधानम्। भेदो न प्रत्यक्ष इति यो भ्रमः सभेदतदितराभावविवेकाग्रहणेन भवति। भावानां स्वरूपमेव प्रत्यक्षेण परिस्फुरित, स एव भेदव्यवहारहेतु स्यात् प्रति-

शङ्कात्रातूद्यते **सत्यं तथा प्रतीति**रित्यादि। अर्थात् भवति नीलादौ नीलादिबुद्धिः परन्तु अस्यावुद्धेः किञ्चिन्मूलं नास्ति किन्तु निर्मूलेयमितिमतिरिति प्रश्नाशयः परिहरति न इत्यादि कार्यवलात्तदनुगुणं मूलकारणमवाधितबुद्धीनां याथार्थ्यव्यवस्थापकमनुमीयताम्। अर्थात् कार्येंणावाधितेन सन्मूलस्यानुमानं भवति। पर्वते वन्हिमति यावन्हिमत्वबुद्धिसत्करणजन्यैवेति। दोषरहितचक्षुरादीन्द्रियादेरेवज्ञानयाथार्थ्यें कारणत्वमन्वयव्यतिंरेकाभ्यां निर्णीतम्, तस्यापलापो न कर्त्तव्यस्तत्राह **क्लृप्तं चेन्द्रियलिङ्गादि** इत्यादि। सतिचक्षुरादीन्द्रियार्थसम्वन्धेऽवाधिते सतिज्ञानस्य याथार्थ्यमसति च न तथेति, अन्वयव्यतिरेकाभ्यां निर्णीयते। तत्र कार्यरहितकारणेऽवश्यं कार्यभूतंज्ञानंप्रमैवेति निश्चीयते अर्थात् वस्तुभेदोनिर्दुष्टेन्द्रियरूपेण प्रत्यक्षप्रमाणेनैव गृह्यते इतिभावः।

अत्र पुनः शङ्कते **यौगपद्यक्रमे** इत्यादि अत्र व्यवच्छेदपदेन भेदस्य ग्रहणम्। विधानेन तु स्वरूपस्यग्रहणं भवति। अयमाशयः—प्रात्यक्षिकबुद्धेर्युगपदेवाधिकरणतन्निष्ठभेदोभयग्राहकत्वं न संभवति, यतोभूतलाद्यधिकरणग्रहणे प्रतियोगिग्रहणस्य निरपेक्षत्वात्, विनापि प्रतियोगिग्रहणमधिकरणप्रमोत्पादात्। भेदस्याभावरूपतयाऽभावस्य च प्रतियोगिग्रहणसापेक्षत्वात्। “प्रतियोगिविशेषिताभावज्ञानं विशिष्टवैशिष्ट्यमर्यादांनातिशेते” इति नियमात् एवञ्च प्रथममधिकरण स्वरूपं गृहीत्वैव तदनन्तरं भेदग्रहणं करोतीति क्रमोपि न संभवति, प्रमितेःक्षणिकत्वात्, शद्बबुद्धिकर्मणां विरम्यव्यापाराभावाद्वा। स्वरूपभेदयोस्तज्ज्ञानयोश्चैक्यमपि न संभवति। अत स्वरूपग्रहस्यैव प्रत्यक्षप्रमितिरूपत्वम्, भेदग्रहस्यतु भ्रमलक्षणत्वमेवेति भावः। इमां शङ्कां प्रतिक्षिपति **भेदो न प्रत्यक्ष इतियोभ्रमः** इत्यादि। ऐक्यायोगादितियोभ्रमः अत्रेत्यादि तत्र भेदोनाम अन्योन्याभावः इतरेतराभावः-अन्यस्मिन् अन्यस्य संसर्गाभावरूप एव, अथवा, भेदः संसर्गाभावभेदः प्रागभावध्वंसाभावान्यताभावरूपः। इतरेतराभावः भेदः। तयोः स्वरूपयाथात्म्यज्ञानप्रयुक्तो निरुक्तविधः परेषां भ्रम इत्यर्थः भेदस्य याथार्थ्यं तावद्दर्शयति **भावाना**मिन्यादि भावानां भूतलादिनां यत् स्वरूपम् प्रत्यक्षेण परिस्फुरति प्रतियोगिव्यपेक्षया भेदव्यवहारे हेतुर्भवति, अर्थात् स्वरूपम्=स्वकीयासाधारणाकारप्रकारः- तदेव गृह्यमाणम् प्रतियोगिस्मरणसहकारेण तदितरस्मात् भेद व्यवहारकारणं भवति। यथा कंबुग्रीवादिमत्वघटस्यपटादितो भेद इति भावः। अत्र दृष्टान्तं यथा भूतलादेः स्वरूपज्ञानमेव घटाद्यनुपलंभे सति तत्तत्स्मरणसहकृतंघटादिशून्यता व्यवहारकारणं मतम्। अभावस्याधिकरणस्वरूपत्ववादिनाम्। सिद्धान्तेत्वधिकरणवृत्तिधर्मविशेषरूपत्व-

योगित्यपेक्षया ह्रस्वत्वदीर्घत्वभेदा यथैकत्र षडङ्गुलेः । एवमेव व्यवस्थितानेकप्रकारवत्तया प्रत्यक्षस्य घटादिप्रपञ्चस्य तद्भावोनापलपितुं शक्यः । आगमप्रमाणमपि कार्यपरकत्वादीदृशेऽर्थे न प्रमाणम् । प्रामाण्येपि, अन्वयायोग्यपदार्थत्वाद्बोधकं न भवति । नासत् प्रतीतेः बाधाच्च न सदित्यपि यन्न तत् प्रतीतिरेव किं न बाधान्नासज्जगत् । तस्मादविद्ययैवेयं भवन्तमाश्रितेति । किञ्चभेदप्रपञ्चनिष्ठं मिथ्यात्वं प्रपञ्चधर्मः स्वयंमेव भेदादेरिति बोध्यम्। एकस्यैव प्रतियोगिभेदेन नानाव्यवहारसाधनत्वं दृष्टान्तद्वारेण दर्शयति **ह्रस्वत्वदीर्घत्वभेदायथैकत्रषडङ्गुले** इत्यादि । एकत्रैव षडंगुलिप्रमितेदण्डादिवस्तुनि तदपेक्षया दीर्घंपदार्थान्तरमपेक्ष्य ह्रस्वव्यवहारम्, ह्रस्वे वस्तुनि तदपेक्ष्य दीर्घव्यवहारम् [यथा व्यजनात् केतनं दीर्घम्] तत्तद् वस्तुज्ञानमपेक्ष्य तत्तत्प्रतियोगिस्मरणसहकारेण जनयतीतिभावः । दार्ष्टान्तिके योजयति **एवमेव व्यवस्थितानेकप्रकारवत्तया** इत्यादि । स्वरूपलक्षणभेदस्यावक्षणे एव धर्मिग्रहणे ग्रहसंभवाद्भेदव्यवहारे एव प्रतियोगिस्मरणस्यापेक्षितत्वाच्चनानाकारविभिन्नपदार्थस्वरूपस्य तत्वं प्रत्यक्षप्रमाणप्रमितं नापलपनयोग्यमितिभावः ।

असाधारणाकाररूपस्य भेदस्य स्वपरनिर्वाहकत्वादेवानवस्थानं भवति । तदीयः प्रागभावस्तत्पूर्वावस्थारूपः ‌ प्रध्वंसाभावस्तु तदुत्तरावस्थारूपः तदत्यंताभावस्तदधिकरणस्वभावविशेषात्मकः । सामयिकाभावः कालविशेषावच्छिन्नत्तत्तदधिकरणस्वरूपात्मकः एतेषां च तत्तत्प्रतियोग्युपरक्तत्वेन व्यवहारे पुनस्तत्तत्प्रतियोगिस्मरणसापेक्षा भवतीति विवेको ज्ञातव्यः ।

एवञ्च भेदप्रपञ्चस्य सत्यत्वे एव प्रत्यक्षं प्रमाणम्, नतु तदनिर्वचनीयत्वे प्रत्यक्षं प्रमाणं भवतीति व्यवस्थापितम् 'यजेत' 'जुहोति' च इत्यादि शास्त्रमपि भेदप्रपञ्चस्य निर्वाच्यत्वे प्रमाणं न भवति, तस्मात्, आगमप्रमाणता निर्वाच्यत्वे इति दर्शयन् भेदप्रपञ्चस्य मिथ्यात्वे शास्त्रं प्रमाणमिति द्वितीयपक्षंनिरसितुंतत्प्रकरणमुत्थापयति **आगमप्रमाणमपि कार्यपरकत्वादि** त्यादि । तत्रागमः-शास्त्रम् कार्यनिष्ठत्वात् कार्यार्थप्रतिपादनपरत्वात्, ईदृशेऽर्थे—कार्यानन्वयिनिसिद्धार्थे प्रपञ्चनिर्वचनीयत्वादौ, नप्रमाऽर्थात् प्रमाणं न भवति । एतत्पूर्वमींमांसकमतमाश्रित्यकथितम् । सिद्धान्तमतेन तु कथयति **प्रामाण्येऽप्यन्वयायोग्यपदार्थत्वादि**त्यादि । सिद्धार्थे शास्त्रस्य प्रामाण्ये सत्यपि शास्त्रस्य प्रमाणशब्दमात्रस्य वाऽनिर्वचनीयत्वेन प्रामाण्यम्, न सन्नाप्यसन्नित्यादेरनन्वितार्थकत्वेन शाब्दबोधाजनकत्वादित्यर्थः तत्; अर्थात् तत्प्रतिपादकतयेव प्रतीयमानोपि शब्दसंदर्भोऽविरुद्धार्थपरतयैव नेतव्य इत्यभिप्रायः । अथानुमानसदसदनिर्वचनीयत्वेन प्रामाण्यं तत्राह **नासदिति**—प्रपञ्चः सदसद्भिन्नः प्रतीयमानत्वे सति बाध्यत्वादियुक्तिरपिनसती, प्रपञ्चः सदसत्ववान् प्रतीयमानत्वे सतिबाध्यत्वात्, तत एवाभाससमानयोगक्षेमत्वादिति । निरुपाधिकसत्वासत्वयोर्विरोधोऽत्र भवतीति ज्ञेयम् । **तस्मादविद्ययैवेय**मित्यादि । अनिर्वचनीयत्वस्याप्रामाणिकत्वात्तत्तदुपपादककल्पनंभवतोऽज्ञानमेवेत्यभिप्रायः । प्रमाणाभावाद्दूषितमपि प्रपञ्चनिष्ठसदसत्वं प्रकारान्तरेणापि दूष-

मिथ्या वा पारमार्थिकं वा ? मिथ्याधर्मस्यमिथ्यात्वे प्रपञ्चसत्यता स्यात् । पारमार्थिकत्वे, तेनैवाद्वैतव्याघातः स्यात् ॥

॥ इति प्रप्रञ्चसदसद्व्यतिरेकित्वरूपमिथ्यात्वनिरसनप्रकरणम् ॥

सर्वाणि प्रमाणानि स्वंस्वमर्थं बोधयन्ति । असतोऽर्थान्तरेभ्यश्च व्यवच्छेदमपि दर्शयन्तीति मे मतिः । तथाहि घटोऽस्तीति या बुद्धिर्जायते सा घटाद्यभावं पटादिकं वा नाववोधयति । ननु अस्तीति यदुक्तम्, तत्र घटोपि तन्मात्रमर्थान्तरं वा तन्मात्रे सदद्वैतं

यितुमुपक्रमते **किञ्चभेदप्रपञ्च** इत्यादि । यदिदं प्रपञ्चनिष्ठधर्मत्वं तत् मिथ्यासद्वा ? प्रथमे मिथ्यात्वस्य मिथ्यात्वेधर्मिणः प्रपञ्चस्य सत्यत्वमेव स्यात् । सत्यत्वनिषेधपरकमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वात् । प्रपञ्चमिथ्यात्वस्य सत्यत्वमिति द्वितीयकल्पस्वीकारेतु मिथ्यात्वस्यसत्यत्वे तत्तद् द्वारेण भेदप्रपञ्चस्यापि सत्यत्वप्रसङ्गात् । अपसिद्धान्तो द्वैतापत्तिश्च । न च भेदमिथ्यात्वं सत्यं तद्ब्रह्मस्वरूपमेवेति नद्वैतापत्तिरिति वाच्यम् तथा सति ब्रह्मणो मिथ्यावस्तुगुणत्वप्रसङ्गादिति विशेषोऽन्यत्र ज्ञातव्यः ।

॥ इति प्रपञ्चस्यसदसद्व्यतिरेकित्वरूपमिथ्यात्वनिरसनप्रकरणस्य तत्त्वदीपः ॥

एतावता प्रबन्धेन प्रपञ्चाकाशादिप्रमुखस्य मिथ्यात्वंसदसद्भिन्नत्वलक्षणं निरस्यघटादिभेद प्रपञ्चस्य सत्यत्वं व्यवस्थापयत् पराभिमतं सदद्वैतं निराकर्तुमुपक्रमते **सर्वाणिप्रमाणानीत्यादि ।** प्रमीयते परिच्छिद्यते येन तत्प्रमाणं प्रमा प्रतिकरणमिति सामान्यलक्षणम् । सजातीयविजातीय व्यवच्छेदपूर्वकयथावस्थितोर्थवोधनमेव तत्फलम् । तच्च प्रत्यक्षानुमानशब्दभेदात्त्रिविधम् ।

"प्रमायाः करणं तत्र प्रमाणंसम्मतं बुधैः । अवाधव्यवहारस्यानुगुणा तु मतिः प्रमा ।
करणंचावगन्तव्यं व्यापारशालिकारणम् । त्रिधा प्रमाणमध्यक्षानुमानशब्दभेदतः ॥"

इत्यादिरूपेण प्रमाणदीपिकायां जगद्गुरु श्रीहर्यांचार्योक्तेः । तत्रोपमानार्थापत्त्यनुपलब्धिसहितं षट्विधमिति मतान्तरम् । तत्र प्रत्यक्षानुमानादीनां विशेषलक्षणं फलं च तत्तत्प्रकरणेभ्य एव ज्ञातव्यम् । विस्तरभयान्नेह प्रतन्यते । यथोदितं सर्वमेव प्रमाणंस्वकीयमर्थमेव प्रमाणयति नतु प्रपञ्चस्य मिथ्यात्वं दर्शयति । मिथ्यात्वस्यापदार्थत्वात् । तत्र स्वस्वप्रमेयस्यासतोऽभावाद् भावान्तरेभ्यश्च व्यावृत्ताकारता प्रत्ययजनकत्वमेव प्रसिद्धमुपपन्नमपि तदेवेति मूलस्य संपिण्डितोर्थः ।

तदेवोपपादयति **तथाही**त्यादि । अत्रेदानीं घटोऽस्तीति प्रात्यक्षिकप्रत्ययस्तदानीं तत्रैतत्कालावच्छेदेन देशावच्छेदेन च स्वकीयासाधारणाकारेण घटादेर्देशकालास्तितामस्तित्वमेवावगाहते, नतु घटादेरभावमर्थान्नासत्ताम्, नवा पटत्वाद्यर्थान्तरधर्मवत्वमित्यर्थः । तथा च सद् व्यावृत्तां सदन्तरव्यावृत्तां च वस्तुतः सन्तं घटादिकमेव प्रतिपादयति प्रतीतर्या घटोऽस्तिपटोऽस्तीत्यादय इति सन्नानात्वमेव सिद्ध्यति, नतु सदद्वैतं सिद्ध्यतीति भावः । अत्र परिशङ्कते **नन्वस्तीतियदुक्तम्** इत्यादि । घटपटादिपदेनापि अस्तीत्युक्तं सन्मात्रमेवोच्यते तदा सिद्धमेव तदद्वैतम् । यदि सतोऽ-

प्रसज्यते, अर्थान्तरत्वे सदसद्भ्यां विलक्षणं तत् सिद्धम् । यद्येवम् अस्ति ब्रह्मेत्यत्र ब्रह्मौपनिषदम्, तदपि घटादिवदेवानिर्वाच्यमापतेत्तवमते । एवम् "आनन्दो ब्रह्म" इत्यादावपि-ब्रह्मणोप्ययथाभावस्तवमते प्रसज्येत तथा प्रपञ्चस्य सदसद्व्यतिरिक्तत्वमपि हीयेत । यत् यत् किञ्चिदुच्यते तस्य सर्वस्यतथात्वं भवेत् । तस्मादस्तीति धीर्घटादिषु जायमाना तत्तत् पदार्थस्य पारमार्थ्यमेव वोधिका । तथा सजातीयविजातीयव्यवच्छेदपूर्वकपदार्थानां स्वस्वव्यवस्थितस्वरूपैर्यास्थितिः सैव तदीयसत्ता नान्या, तत्राद्वैतकथा निरर्थिकेति ॥ ॥ इति सदद्वैतनिरासेन भेदप्रपञ्चस्यपारमार्थिकत्वसमर्थनप्रकरणम् ॥

न च नीलपीतादिनानाकारप्रतीतेर्बाधोयुक्तोऽनुभूयमानत्वात् । न च वेद्यं नीलार्थान्तरमपि वोध्यते तर्हि घटादेरापतितमनिर्वाच्यत्वम् । प्रतीतिवलाच्चासद्व्यावृत्तिरिति भावः । अमुं प्रश्नं दूषयति **यद्येवमस्तीत्यादि** "अस्तिब्रह्म" इत्युपनिपत् प्रतिपाद्यमपि ब्रह्मतुल्यन्यायात् सदसदनिर्वचनीयं प्रसज़्यते इति भावः । एवं सर्वत्र समानाधिकरणतत्वमस्यादिवाक्येऽनभिमत विरुद्धाकारप्रसङ्गस्तत्राह=**आनन्दः** इत्यादि । "आनन्दो ब्रह्म" इत्यादौ आनन्दादिमात्रब्रह्मपदेनोच्यते चेत्तदासत्यादिपदान्तरस्य कथनं निरर्थकम् तदतिरिक्तार्थवोधनेत्वानन्दविलक्षणत्वादि ब्रह्मणः प्रसज़्यते इत्यर्थः । आनन्दपदेनानान्दव्यावृत्तिर्ब्रह्मपदेन चानन्दव्यावृत्तिर्भवेदिति । अयथा भावः=अनानन्दत्वादिः परस्यानिष्टान्तरमपि दर्शयति **सदसद्व्यतिरिक्तत्व** मित्यादि, सदसद्व्यतिरिक्तः प्रपञ्च इत्यपिशद्वःस्वार्थात् प्रच्यवेत, त्वदुक्तरीत्या सदसद् व्यतिरिक्तान्यत्वमेव प्रपञ्चस्यतवानभिमतं सिद्ध्येतेतिभावः । यत् किञ्चिदपिवस्तु यथा येन प्रकारेणोच्यते, तस्यसर्वस्य तथा=भवत्प्रदर्शितमार्गेण तत्प्रकारराहित्यं प्रसज्यते इत्यर्थः । घटोऽस्तीत्यादौ सत्तामात्रस्य विशेष्यत्वम्, तत्र विशेषे घटादेर्भेदप्रपञ्चस्यारोपितत्वं चेति पराभिमतं प्रतिक्षिपन्निव स्वाभिमतमर्थं प्रतिपादयति **तस्मादस्तीति** इत्यादि, यतः परमतं न सम्यक् तस्मात् घटोऽस्तीति जायमानं घटादि विषयकं ज्ञानम् तत्तत्पदार्थस्य पारमार्थिकत्वमेव वोधयतीत्यर्थः । **सजातीय विजातीयेत्यादि**" सजातीयविजातीयान्तरव्यावर्तकेन स्वस्वासाधारणाकारेण तस्य तस्य घटादि पदार्थस्य यास्थितिः कालसम्बन्धप्रमाणसम्बन्धो वा सा तस्य तस्य पदार्थस्यसत्तेति गीयये । सा च सत्ता प्रतिपदार्थं व्यवस्थिता, धात्वर्थत्वाच्चकर्तृपराधीनाचातत्सत्तायां स्वतन्त्रत्वमद्वैतं च भवदभिमतं नैव कथमपि युक्तमिति भावः ।

॥ इति सदद्वैतनिरासेनभेदप्रपञ्चस्य पारमार्थिकत्वसमर्थनप्रकरणस्य तत्त्वदीपः ॥

एवमुपर्युक्तक्रमेण प्रमेयात्मकसन्नानात्वं व्यवस्थापितवानाचार्यः । तदनन्तरं ज्ञानप्रमितिनानात्वमपि व्यवस्थापयति, वौद्धाभिमतचिदद्वैतनिरासेन **नचेति** । विषयाश्रयविशेषैः प्रत्यक्षादि प्रमाणस्वगतविशेषैश्च प्रतिपुरुषानुभूयमानं संविदोज्ञानस्य नानात्वं न कथमपि निराकर्तुं शक्यंयुक्तमित्यर्थः ।

दिकं वित्तेधर्म इति यत्पूर्वमुक्तम्, तेन त्वयासंविदः किञ्चित् साधितं न वा ? अस्तिचेत् तदा पक्षे वाधः नचेत्तदानिरर्थकः प्रयास । अतः स्वाभाविकस्पष्टदृष्टभेदाः संविदः । यथावस्थाभिर्वाह्यैर्नैक्यं भवति घटादिभिरपि ज्ञानस्यैक्यं न भवति । ज्ञानज्ञेययोरैक्यं सहोपलंभनियमोपि नैकैकसंविदा संभवति, यतश्चैतन्यसामान्यं सर्वसंवेदनात्मकं नैव दृष्टम् ।

न चास्ति सामान्यसहितं सर्वसंवेदन रूपम् । सहोपलंभनियमात्, अन्योऽर्थ संविदो न भवेत् । यदेतदपराधीनस्वप्रकाशं तदेवस्वयंप्रकाशपदवाच्यमिति प्राचो वदन्ति । यस्मिन् अभासमानेपि योऽर्थोनावभासते नासौ अर्थान्तरम्, चन्द्रमसश्च-

अत्रयोगाचारमतानुयायिभिः संविदो ज्ञानस्य निर्विशेपत्वे यदनुमानमुद्भावितं तदनुमानमनूद्य प्रतिक्षेप्तुमुपक्रमते **नचवेद्यम्** इत्यादि । संविदिज्ञाने यो निर्विशेषत्वरूपः साध्यधर्मः समुपगम्यते स साध्यधर्मः पक्षे संविदिज्ञानं स्वीक्रियते नवा ? तत्र यदि उपगम्यते इति प्रथमपक्षः स्वीक्रियते, तदानिर्निमित्त एकस्मिन् धर्मेण पक्षपातस्तव प्रसक्तो भवति, यत एको धर्मःपक्षे मन्यते, अन्ये धर्माः प्रमाणसिद्धा अपिनोपगम्यते, तत्र भवतो रुचिरेव प्रमाणम् । तथा चाभ्युपगतनिर्विशेषत्वविरोधप्रसङ्ग इत्यभिप्रायः । अथवा नोपेयते चेत्साध्यधर्मः पक्षे तर्हि तादृश पक्षे साध्यसाधनाय क्रियमाणः प्रयासो निरर्थकतामञ्चतीति । अतः संविन्निर्विशेषत्वानुमानप्रतिक्षेपात्, स्वरसतो विषयाश्रयस्वगत विशेषैर्विशिष्टा विलक्षणत्वेन स्फुटं प्रतियमानाः संविदो यथावस्थितैर्घटपटवाह्यपदार्थैर्नैक्ये प्राप्नुवन्ति इति । वेद्यवेदित्रोर्वित्त्यभेदमतं निराकर्तुमयं प्रक्रमः **सहोपलंभ नियमः** इत्यादि । संविदा ज्ञानेन घटादेर्विषयस्य सहैवोपलभ्यमानत्वात् ज्ञेयज्ञात्रोर्ज्ञानाभेदः, एकस्माच्चन्द्रमसो द्विचन्द्रवदितिवक्तुं न युक्तम्, यतस्तत्तत्संवेदन विशेषेण सहोपलंभनियमाभावात् । एक विज्ञानंविना ज्ञानान्तरेणाप्यर्थोपलब्धिदर्शनात् ।

विशेषेण सहोपलंभस्य व्यभिचारेपि चित्सामान्येन सहोपलंभनियमोस्तीतिचेत्, तदपि न समीचीनम्, विशेषव्यतिरिक्तस्य चित्सामान्यस्यैवानुवृत्तस्य सर्वविषयकविज्ञानविषयस्याभावादित्यर्थः । अत्र प्रतिक्षेप्यमतस्यानुवादः पुनः **सहोपलंभनियमा** दित्यादि वाह्यार्थप्रकाशे नियमेन संविदोभानसिद्ध्यर्थं वित्तेः स्वप्रकाशत्वमाह **यदेतदपराधीनस्वप्रकाश**मित्यादि, स्वयं प्रकाशता प्रवृत्ति निमित्तः शब्दोयस्यतत् स्वयं प्रकाशता शब्दं स्वयंप्रकाशशब्दवाच्यम् । अनेन सहोपलंभनियमः सिद्धः

यस्मिन्नित्यादि । संवित्प्रकाशाभावेऽर्थस्यापि न प्रकाश इति संवित् प्रकाशाभावव्यापकाभाव प्रतियोगिप्रकाशकस्यार्थस्य संविदानन्यत्वं सिद्ध्यति, विम्वाप्रकाशेऽप्रकाशमानस्य प्रतिविम्बस्येव बिंबानन्यात्वमित्यर्थ । **अभासमान** इति । विज्ञाने आभासभाने प्रकाशमानेसति, आत्माज्ञाता—अर्थो नीलपीतादिज्ञेयात्मकम् । संविद्विवर्तत्वम्-संविदाधिष्ठानकारोपविषयत्वम्, प्रपञ्चे वेद्यवेदितृत्व प्रपञ्चः अञ्चति—गच्छति प्राप्नोतीति । अधिष्ठानसत्तातिरिक्तसत्तारहितत्वलक्षणं संविदनन्यत्वं प्रपञ्चस्य विवक्षितम् । नीलपीतादिवाह्याकारोवासनाकल्पिताज्ञाने इति योगाचारमतम् । नील-

न्द्रवत् । विज्ञानेऽभासमानेऽथात्मावभासनं न तस्मात् प्रपञ्चः संविदोविवर्तरूप इतिचेन्न, एवमतिरिक्तार्थापलपनं न कर्त्तव्यं प्रत्यक्षविरोधात् न भवदीयानुमानानुवर्तिनो भवन्ति । तथाहि इदमहं वेद्मीत्यन्यानात्मना स्फूटरूपेण त्रयं साक्षादेव प्रकाशते इति सर्वानुभवसाक्षिकम् । प्रत्यक्षविरुद्धमनुमानेनोत्थातुमर्हतिः अग्निरनुष्णा इतिवत् । किञ्चायं हेतुर्विरुद्धोयतो द्वयोः सहभावस्तवमतेपि, नहि संवित्तिः स्वात्मना सहभासते । नीलाद्युपप्लवरहितस्वच्छचैतन्यमात्रसन्तानं स्वापादौ भासते, नैवमर्थः संवेदनात् पृथक् भासते, तेन संवेदनं सत्यम् , अर्थस्त्वसन् । तदेतत् स्ववाग् वाधितम् , यत एवं

पीतादिलक्षणोऽर्थोऽविद्ययाकल्पितो ज्ञाने मायिकपक्षश्चनिराचिकीर्षितोऽत्रेति विभावनीयम् । एतद्योगाचारमतं प्रतिक्षेप्तुमाह **विज्ञाने** इत्यादि, हे वाह्यार्थापलापिन् एवं यथोक्तक्रमेण वाह्यार्थान् नीलपीतादिकानमपरिभवः, एतेषां निराकरणं न कुरु । कुतः तत्राह **प्रत्यक्षे** त्यादि । वलीयसा सर्वप्रमाणापेक्षज़्येष्ठेन सर्वोपजीव्येन, अतः सर्वप्रमाणपेक्षया वलवता इमे वाह्यार्थाः सुरक्षिताः ।

अर्थात् प्रवलतरप्रत्यक्षप्रमाणसंरक्षिता एते ज्ञातृज्ञेयभेदाः पदार्थास्त्वदीयसंविदैक्यानुमानानुवर्तिनो नभवन्तीति । इतरप्रमाणापेक्षया प्रत्यक्षस्योपजीव्यत्वेन ज्येष्ठत्वेन वलवत्वम् । ज्ञेयेषु संविदा सहैक्यसाधनार्थमर्थानां संविदश्च स्वरूपग्रहणं तावदपेक्षितम् । एतावतैवचज्ञानज्ञेयादीनां परस्परं भेदोपि सिद्ध इति प्रत्यक्षवाधितमनुमानं न प्रवर्तते इत्यर्थः । अत्र ज्वालाभेदानुमानवैषम्यप्रकारो विशेषरूपेण विचारितस्यादात्मसिद्धाविति विशेष जिज्ञासुभिस्तत एव द्रष्टव्यो विस्तरभियानेह पुनः प्रतन्यते इति संक्षेपः ।

तथाहीदमहंवेद्मि इत्यदि अन्योन्यानात्मना=परस्परविभिन्नत्वरूपेण, त्रयं ज्ञातृज्ञेय ज्ञानलक्षणं पदार्थलक्षणम् । **प्रत्यक्षप्रतिपक्षमनुमान** मित्यादि, अर्थात् प्रत्यक्षप्रमाणवाधितमनुमानं स्वानुमेयसाधनाय न प्रवर्तते, यथा "अग्निरनुष्णो द्रव्यत्वादित्यनुमानमुष्णत्वग्राहिप्रत्यक्षेण बाधितं न प्रवर्तते, यथा वा 'ह्रदो वन्हिमान् धूमात्' इत्यत्र वन्ह्यभाववान् इति निश्चयात्मक बाधेन बांधितं न ह्रदेवक्तिमत्ताबुद्धि निश्चितोति तथैवात्रापीति । अर्थात् प्रतिपक्षं विरुद्धं वन्हेरनुष्णत्वानुमानमिव प्रत्यक्षवाधितं विषयज्ञात्रोः संविदा सहैक्यानुमानंत्वदीयमिति प्रोक्तं भवतीति । किञ्च साहित्यं भेदनियतं भेदे सत्येव तद्दर्शनात् , इति ज्ञानार्थयोर्हेतुघटकं ज्ञानज्ञेययोरभेदसाधने विरुद्धमिति दर्शयितुमाहाचार्यः **किञ्चायम्** इत्यादि । संवित् संविदा संविदा सहभासते इति न योगाचारस्यापि संमतम् , तत्संविदा सहोपलंभमानमर्थजातं नियमेन ज्ञानभिन्नमेव भवेदितिभाव ।

अत्र पुनः शङ्कते योगाचारमतानुयायी **नीलाद्युपप्लवे**त्यादि विपयोपरागमन्तरेण ज्ञानं भासते स्वापकाले, नैव विषयो ज्ञानं विना कदापि भासते । तत् प्रतिविम्वस्येवार्थजातस्य मिथ्यात्वं संविदि कल्पितस्येतिभावः । एतत्पक्षं परिहरति "**तदेतत्**" इत्यादि । अर्थं विना संविदोभाने

सति सहोपलंभनियमस्य हानिप्रसङ्गात् तस्माद् यदभावेयद् भासते, तदभावेपि तदवभासते एव भानेऽपि घटादिभानवदिति संक्षेपः ।

॥ इति चिदद्वैतनिरासेनमितिमातृमेयाभिदायाथार्थ्यसमर्थनप्रकरणम् ॥

इति वाराणसिस्थानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यपीठसंस्थापकाचार्य
श्रीरामानन्दसम्प्रदायस्यचत्त्वारिंशत्तमप्रधानाचार्यजगद्गुरुश्रीरामानन्दा-
चार्य रामप्रपन्नाचार्ययोगीन्द्रप्रणीता तत्त्वत्रयसिद्धौसंवित्तिसिद्धिः ॥

卐 श्रीरामः शंकरोतु 卐

तां विना संविदन्तरेणापि विषयस्यभानं सिद्धप्रायमेवेति सहोपलंभनियमरूपभवदुक्तहेत्वासिद्धिरिति पूर्वापरस्ववचनविरोधमपि नपरामृष्टवान् एवं वदन्नितिभावः । हेत्वसिद्धिमेवोपपादयति **तस्मात्** इति । घटापटादृतेभानात् पटादृतेभानं घटस्य यथा सिद्ध्यति, तथाऽर्थमन्तरेण भानाद् ज्ञानाद् विना भानमर्थस्य सिद्ध्तीति सहोपलंभनियमो न नीलादितद्धियां सिद्ध्यतीत्यर्थः । ननु ज्ञानं विना भानमर्थस्य सिद्धतीति नैवार्थस्य प्रकाशस्य वक्तव्यत्वाद् ज्ञानस्य च स्वप्रकाशत्वाद् ज्ञानभानं विनाऽर्थभानं युज्यते इति चेदेवमपि सहोपलंभनियमो न युज्यते, ज्ञानविशेषेण ज्ञानसामान्येन वा पूर्वत्रव्यभिचारात् । परमते ऽसिद्धेश्चेति । विशेषविचारो "नाभाव उपलब्धेः" इति सूत्रीयश्रीरामानन्दभाष्ये "किञ्च यदिविज्ञानातिरिक्तः कश्चित्पदार्थ एव नस्यात्तर्हिकस्य किमर्थं विज्ञानं नीलाद्याकारतामुपयातीति वक्तव्यम् । नहि विज्ञानमेव स्वयं स्वार्थं तत्तद्रूपतामुपैति प्रयोजनाभावात्" (आनन्दभाष्यम् २।२।२८) इत्यादि रामप्रपन्नाचार्यरूपेण कृतः । एतदीयव्याख्याने भाष्यदीपेऽस्मद्गुरुप्रवरजगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रमहाभागेन बहुचर्चितत्वात् । मयापि भाष्यप्रकाशेन्यत्र च विवेचितत्वाद्विरम्यते प्रपञ्चात प्रकृतप्रकरणाद्विशेषार्थिभिस्तत एवानुसन्धेयमितिशम् ।

। इतिचिदद्वैतनिरासेनमितिमातृमेयभिदायाथार्थ्यसमर्थनप्रकरणस्यतत्त्वदीपः ।

वन्दे रामं रमानाथं जानकीवल्लभं परम् ।
अन्तरं संवित्तिसिद्धिर्हि यत्कृपालवलेशतः ॥

इति पश्चिमाम्नायविश्रामद्वारकास्थश्रीरामानन्दाचार्यपीठाधीशजगद्गुरुश्रीरामानन्दा
चार्यरामप्रपन्नाचार्ययोगीन्द्रपट्टशिष्यस्वामींरामेश्वरानन्दाचार्यप्रणीतःश्रीरामा-
नन्दसम्प्रदायस्यचत्वारिंशत्तमाचार्यकाशीस्थश्रीरानन्दप्रधानपीठाचार्य
जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रप्रणीतसंवित्तिसिद्धौ

卐 तत्त्वदीपः 卐

॥ श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥

सर्वेश्वरश्रीसीतारामाभ्यां नमः
श्रीहनुमते नमः
प्रस्थानत्रयानन्दभाष्यकाराय नमो नमः
जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रप्रणीततत्त्वत्रयसिद्धौ

卐 आत्मसिद्धिः 卐

राम एव परं ब्रह्म राम एव परंतपः । राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम् ॥
सीताकान्तसमारम्भां रामानन्दार्यमध्यमाम् । रघुवरार्यगुर्वन्तां वन्दे गुरुपरम्पराम् ॥

तत्र तत्त्वत्रये द्वितीयं तत्त्वम्—

"नित्योज्ञश्चेतनोऽजः सततपरवशः सूक्ष्मतोऽत्यन्तसूक्ष्मः
भिन्नोवद्धादिभेदैः प्रतिकुणपमसौ नैकधा सूरिवर्य्यैः ।
श्रीशाक्रान्तालयस्थोनिजकृतिफलभुक्तत्सहायोऽभिमानी
जीवः सम्प्रोच्यते श्रीरघुपतिसुमते ! तत्त्वजिज्ञासुवेद्यः ॥१।७॥" इति ।

"विद्वान्नामरूपाद्विमुक्तः" "पृथगात्मानं प्रेरितारं च मत्वाजुष्टस्ततस्तेनामृतत्वमेति" "आत्मानंचेद्विजानीयादयमस्मीतिपुरुषः । किमिच्छन् कस्य कामाय शरीरम-

पश्चिमाम्नाय श्रीरामानन्दाचार्यपीठाधीश्वर
स्वामीरामेश्वरानन्दाचार्यविरचित

तत्त्वदीपः

सीताकान्तसमारम्भां रामानन्दार्यमध्यमाम् । रामप्रपन्नगुर्वन्तां वन्दे गुरुपरम्पराम् ॥

ननु निष्फले कर्मणि प्रेक्षावतां प्रवृत्तिर्नभवति "नकुर्यान्निःफलं कर्मनात्यायामसुखोदयम्" इतिस्मृतेः । अनर्थकात्मतत्वे ज्ञानाय प्रवृत्तिर्नभविष्यतीत्याशंक्याह **"मोक्षोपायत्वंब्रूते"** इति । अर्थात्.यत आत्मज्ञानं मोक्षस्य जनकमतस्तादृशप्रकरणमारब्धव्यमेव । कथमात्मज्ञानस्यतथात्वं तत्र श्रुतिप्रमाणं दर्शयितुमाह **"विद्वान्नामरूपाद्विमुक्तः"** इत्यादि । अयमर्थः श्रुतेः, अत्र विद्वानित्यस्यात्मज्ञानवानित्यर्थः, तत्वं वेत्तिविजानाति इति व्युत्पत्तेः । तथाच विद्वांसमात्मज्ञानिनमुद्दिश्य नामरूपात्मकसंसारस्याभावं विधत्ते । ततश्च धनीसुखवानित्यत्रधनवन्तमुद्दिश्य विधानं क्रियते. तत्र "उद्देश्यतावच्छेदकप्रयोज्यत्वंतत्कालावच्छिन्नत्वं च सिद्ध्यतीति धनवानेव धनसत्ताकाले एव सुखी लक्ष्यते. नतुधनाभावे सुखी भवतीति. धनजन्यत्वंधनसमानकालिकत्वं भवद्भवति सुखजनकत्वं धनस्य ।

नुसंज्वरेत्'' ''तरतिशोकमात्मवित्'' इत्यादिवेदान्तवाक्यं परावरात्मज्ञानस्यनित्य निरतिशयज्ञानानन्दात्मकमोक्षोपापत्वं ब्रूते इति श्रूयते। तदेतत्सर्वतन्त्रप्रसिद्धमेवेत्यत आत्मतत्वनिर्णायकमात्मसिद्धिनामकं प्रकरणमारभ्यते ।

तथैव प्रकृते. आत्मज्ञानस्योद्देश्यतावच्छेदकतया. विधेयेमोक्षेजनकत्वमर्थत एव सिद्ध्यतीति। द्वितीयमन्त्रेण परमात्मप्रपत्तेरेवमोक्षजनकत्वमायातीति सिद्धान्तवेदिनः। केचनतु अनन्याभक्तेर्ज्ञान रूपतयाऽर्थतो ज्ञानस्यैव तथात्वमिति वेदयन्ति। तृतीयमन्त्रस्तु ''आत्मानं चेद्विजानीयादित्यादिना साक्षादेवात्मज्ञानस्यमोक्षहेतुत्वं सूचयति। ''तरतिशोकमिति मन्त्रस्तु प्रथममन्त्रवत् उद्देश्यतावच्छेदक प्रयोज्यत्वं विधेयेभवतीति नियमेनात्मज्ञानस्य मोक्षजनकत्वमावेदयतीति। विशेषस्त्वन्यत्रानुसन्धातव्योविज्ञैः। श्रुत्यक्षरादेव प्रकरणस्यारंभात् सर्वमङ्गलरूपा श्रुतिरेवमङ्गलम्। सीताकान्तेत्यत्र सर्वेश्वर श्रीसीतानाथ आदिस्वरूपोऽनन्तरवर्तिनः सर्वेश्वरीश्रीसीता श्रीहनुमत् श्रीब्रह्मा श्रीवशिष्ठ श्रीपराशर श्रीवेदव्यास श्रीशुकदेव श्रीपुरुषोत्तमाचार्यबोधायन श्रीगङ्गाधराचार्य श्रीसदानन्दाचार्य श्रीरामेश्वरानन्दाचार्य श्रीद्वारानन्दाचार्य श्रीदेवानन्दाचार्य श्रीश्यामानन्दाचार्य श्रीश्रुतानन्दाचार्य श्रीचिदानन्दाचार्य श्रीपूर्णानन्दाचार्य श्रीश्रियानन्दाचार्य श्रीहर्यानन्दाचार्य श्रीराघवानन्दाचार्या ज्ञेयाः। मध्यवर्तिनस्तुस्वयमाचार्याः प्रस्थानत्रयानन्दभाष्यकारा जगद्गुरुश्रीरामानन्दाचार्यचरणाः। अन्ते च महामहोपाध्यायपदविका जगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्यपादा वेदान्तकेशरिणोऽस्मत्परमगुरुचरणा एषामध्येस्थिताः श्रीभावानन्दाचार्य श्रीअनुभवानन्दाचार्य श्रीविरजानन्दाचार्य श्रीआशारामाचार्य श्रीरामभद्राचार्य श्रीरघुनाथाचार्य श्रीविश्वंभराचार्य श्रीराघवेन्द्राचार्य श्री वैदेहीवल्लभाचार्य श्रीकोसलेन्द्राचार्य श्रीरामकिशोराचार्य श्रीजानकीनिवासाचार्य श्रीसाकेतनिवासाचार्य श्रीजानकीजीवनाचार्य श्रीभरताग्रजाचार्य श्रीहनुमदाचार्याः। एतेन तत्त्वत्रयसिद्धिकाराजगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्राश्चत्वारिंशत्तमास्तट्टीकातत्त्वदीपकारः पश्चिमाम्नायश्रीरामानन्दाचार्यपीठाधीश्वरस्वामीरामेश्वरानन्दाचार्य श्चैकचत्वारिंशत्तवाचार्य इति श्रीसम्प्रदायपरम्पराशोधिता वेदितव्या। अत्र परावरात्मतत्वं विषयः परमतनिरासोनान्तरीयकतया गौणः। आत्मनिर्णयश्च साक्षात्प्रयोजनम् मोक्षस्तु परंपरयाप्रयोजनं ध्यानोत्तरं जायमानत्वात्। मोक्षाभिलाषी कश्चिदधिकारी प्रकरणविषययोः प्रतिपाद्यप्रतिपादकभाव एव सम्बन्धः। एतावताऽनुबन्धोदर्शितः

अथ यत्संदिग्धं सप्रयोजनं च तदेव विचारणीयतामादधाति। नहि भवति सवितृप्रकाशप्रकाशिते घटादौ पक्षिणां दन्तादिविषयेविचारः। इहच श्रुत्यैवात्मतत्वस्य विनिश्चये जाते संशयाभाव रूपपक्षताया अभावात् कथमात्मतत्वविचारे प्रवृत्तिरितिचेत्? अत्र केचित्समादधति—यद्यपि ''तरतिशोकमात्मविदित्यादिश्रुति वचनेन शाद्बविनिश्चये जातेपि प्रसिद्धमहाबुद्धिमतामनेकप्रकारक कुतर्कश्रवणवतः श्रुतितात्पर्ये एव संदेहेन श्रुतितात्पर्येंपि संशयेन तदाहितसंशयाद्विचारे प्रवृत्ति-

तत्र विचार्यमाणे आत्मतत्त्वेजीवेपरात्मनि च सन्ति वादिनामनेकविधाविप्रतिपत्तयः । तथाहि जीवात्मतत्वं तावत् शरीराकाराकारपरिणतभूतचतुष्टयं पृथिव्यादिकमेवात्मानं मन्यन्ते । तदन्ये तु चक्षुरादीकानीन्द्रियाण्येवात्मेति । तदितरे मन एवात्मा । प्राण एवात्मेति केचन अध्यस्तज्ञातृत्वमहं प्रत्ययाविपर्यंवोधमात्रमेवेत्यन्ये । करणकलेवरमनः प्राणज्ञानविविक्ताकाशवदेवाचेतन आगन्तुकज्ञानसुखादिविशेषगुणवानहङ्कारविपय इति तदन्ये । सांख्यास्तु ज्ञानमात्रस्वरूप एव, यथा स्वभावतो रित्याशयंमनसि निधाय प्राह "**तत्रविचार्यमाणे**" इत्यादि । वस्तुतस्तु गृहे वर्तमानयोर्विंषयान्तरे व्यासक्तयोः पुरुषयोर्गगनंमेघवन्नवेत्याकारकसंशयात्मकपक्षताया अभावेपि गगनं मेघवत्· घनगर्जनश्रवणादित्येवं विधानुमानस्य दर्शनेन संशये पक्षतात्वाभावात् । अत एव इच्छामात्रमपि न पक्षता. विनापीच्छां गर्जनश्रवणेनानुमितेरुत्पादात् । नवा सिद्ध्यभावमात्रं पक्षता, सत्यामपि प्रात्यक्षिकसिद्धौसत्यामिच्छायामनुमानेनवह्निं ज्ञास्यामीत्याकारिकायां वन्हेरनुमानस्य दर्शनात् । अतएव नहि प्रत्यक्षदृष्टेकरिणि, अनुमानेन तं ज्ञातुंयतते, प्रत्यक्षदृष्टमप्यर्थमनुमानेनवुभुत्सन्ते तर्करसिकाः" इति वाचस्पति वचनयोरविरोधः । उत्तेजकेच्छासत्वासत्वाभ्यां तदुभययोरविरोधः । तस्मात् सिषाधयिषाविरहविरहविशिष्टसिद्ध्यभाव एव पक्षता । ततश्च पक्षतायाः संशयाघटित्वात्, नविप्रतिपत्तेः संशयकार्योत्पादनद्वारेणानुमित्यात्मकविचारे उपयोगः अपितु समयवन्धादिवत् स्वकर्तव्यतानिर्वाहार्थमादौ विप्रतिपत्तिः प्रदर्शनीयैव । यद्यपीयं फलतो विचारें न जनयति तथापि स्वरूपत एवं तत्करोति, अन्यथा मूर्खस्य सभायाममन्दस्य हास्यत्वापत्तेः । अथवा विप्रतिपत्त्या मध्यस्थो वादि प्रतिवादिनोः परीक्षणं करोति नियमयति । अन्यथा सामयिकं कमपि विषयमालंव्यतयोर्विचारे क्रियमाणे विचारणीयविषयस्य विचारो न कृतः स्यादित्याशयेन विप्रतिपत्तेः प्रदर्शनमावश्यकमेवेति कृत्वाऽचार्यप्राह **तत्रेत्यादि** तत्र विचारणीयविषयेदार्शनिकास्तीर्थकरा इति शेषः । तीर्थदर्शनयोः समानत्वात् । अन्तरवस्थिताज्ञानविनाशपूर्वकतत्वज्ञानात्मकशुद्धिमुपजनयतिजीवस्येति दर्शनं तत्कुर्वन्तीति दार्शनिकास्तीर्थकरा इति ।

तत्र सर्वप्रथमोवादी चार्वाकोलोकायतिकः । अयंच सर्वत्र सुलभः सर्वस्यैव चार्वाकत्वात्, प्रत्यक्षमात्रं प्रमाणमासाद्य यस्यांकस्यामपिसभायां प्रविश्य विवादमात्रं करोति । किं वहुनाऽप्रत्यक्षेप्यात्मनि, शरीराकारपरिणतपृथिव्यादिभूतचतुष्टयमात्रमेवात्माऽर्थात्, देहएवात्मा । अयमेव सर्वथा रक्षणीयः पोषणीयश्च । नतु शरीरव्यतिरिक्तो जीवः परलोकगन्ता । अतो देहपातानन्तरंतदुद्दिश्यश्राद्धादिकरणेन वित्तव्ययोमुधैव जायते । एतादृशोपदेशकस्य वचनं श्रुत्वा तं प्रशंसत् वहुमानयति लोक इति । न च पृथिव्यादेर्जड़त्वेनतत्समुदायरूपे देहे चैतन्यं कथमिति चेत्, प्रत्येकस्मिन्नसत्त्वेपि तत्समुदाये विलक्षणशक्तेरन्यत्रदर्शनात् । यथा ज्वरनाशकताशक्तेः केवलतुलसीपत्रे-

विशुद्धोऽति स्वच्छोपिस्फटिकमणिर्जपाकुसुमादिसंनिधानवशेन तथा तथारक्तिमनैल्यादिभावेन प्रतिभासते तथैवातिनिर्मलोपि स्वरूपतः पुरुपः सत्वादिगुणविशिष्टप्रकृतसंनिधानात्सुखदुःखादिभावभासते, स्वतोनित्यंज्योतिः स्वभाव एवेति प्रतिपादयन्ति ।

अन्येतु—ज्ञानानन्दस्वभावमेवात्मानं मन्यन्ते । आश्रयस्यानुकूलतया प्राप्तः आनन्दानन्दसुखादिव्यपदेशोज्ञानविशेष एवात्मेति केचन ॥

यथाऽत्मनः स्वरूपे विप्रतिपत्तयः प्रदर्शितास्तथैव तदीयग्राहकप्रमाणेपि तानिवादिनां पृथग्भूता एव भवन्ति । तथाहि केचन प्रत्यक्षप्रमाणमात्र समधिगत आत्मेति

केवलंमधुनिचादर्शनेऽपि संमिलितयोस्तच्छक्तेः प्रादुर्भावात् । यथावा मद्यावयवप्रत्त्येकद्रव्येमादकताया अदर्शने तत्समुदायेमादकताया दर्शनात् यथावा प्रत्त्येक द्व्यणुके दृश्यत्वस्यासत्वेपितत्समुदायत्रसरेणोर्दृश्यतावदेव प्रत्त्येकभूतेषु चेतनाया, असत्वेपि तत्समुदायात्मकादेतत्सौलभ्यात् । अत्रत्यं विशेष विवरणंचार्वाकमतपरीक्षायामग्रे विवेचयिष्यामि । तस्माद्देह एवात्मेतिचार्वाकासंगिरन्ति ॥

इन्द्रियाण्येवात्मेतिकेचन इति । श्रुतौ "वगदध्रे" इत्यादिप्रकरणे इन्द्रियाणां परस्परं कलहः तेषां स्वविवादशमनार्थं प्रजापतिगमनं विवादविमोचनमित्यादि चेतनवत् गमनादिकं च चेतनकार्यमवलोक्य तेषामेवमिलितानामात्मत्वमिच्छन्ति वहवः प्राजापत्त्याः । **मन इति केचने**ति । अनित्यस्येन्द्रियस्यात्मत्वे इन्द्रियादिविलोपे स्मरणादिकंनस्यादित्यालोच्य नित्यस्य मनस एव तथात्वमिच्छन्तिकेचनचार्वाकविशेषा इति ।

प्राणमपरे इति । मनसोऽणुत्वेन तत्स्थसुखदुःखेच्छादोषादीनां साक्षात्कारो न स्यात् , प्रत्यक्षे महत्वस्य कारणत्वादित्याद्यरुचिं विभाव्य प्राणस्यैवात्मत्वमाहुः केचन, तथा पूर्वापेक्षया प्राणस्य श्रेष्ठत्वादपि ।

अत्र प्रकरणे **अन्ये केचन** इत्यादिनायस्यवादिनो यन्मतं तत् तदीयपरीक्षा समये स्पष्टरूपेणनामग्राहकतयाच विविच्य प्रदर्शितं भवतीत्यतस्तत एवावधातव्यम् ।

प्रमेयसिद्धिः प्रमाणाद्धीति नियमेन स्वरूपप्रमाणाभ्यां पदार्थसिद्धिरिति लोकोक्त्या च सिसाधयिषितवस्तुनः साधनमावश्यकमितिप्रकृते आत्मनः सिद्धौकर्त्तव्यतायामात्मनः स्वरूपं प्रमाणमेतदुभयप्रदर्शनमावश्यकम् । एतयोर्विचारो विप्रतिपत्तिप्रयोज्य एवेति प्रथमंस्वरूपविषये विप्रतिपत्तिरुदाहृतः । तदनन्तरं तदीयप्रमाणेष्वपि तत्प्रदर्शनमावश्यकमिति मनसिनिधायप्राह **यथाऽत्मनःस्वरूपेविप्रतिपत्तयः प्रदर्शिताः** इत्यादि । अयंभावः पदार्थसिद्धौ प्रत्यक्षमात्रं प्रमाणमिति चार्वाकमतम् । प्रत्यक्षानुमाने वैशेषिकबौद्धौ । प्रत्यक्षानुमानागमा इति सांख्याः । प्रत्यक्षानुमानोपमानशब्दा इति नैयायिकाः । अर्थापत्तिसहितास्त इमे इति प्रभाकराः । अनुपलब्धिः सांहता इमे,

मन्यन्ते । अन्ये केचन प्रत्यक्षेणानुमानेन च ज्ञायते । अन्येतु द्वितीयप्रमाणमात्रवेद्यः । आगममात्रवेद्य इति तदपरे । रूपाद्यभावेन मानसप्रत्यक्षप्रमाणक इत्यपि कश्चित् । इतिभाट्टाः । तत्र "केचन प्रत्यक्षप्रमाणमात्र" इत्यत्र केचनपदेन चार्वाकस्य ग्रहणम् । एतन्मते देहस्यैवात्मतयातस्य तत्समधिगम्यत्वात् । न चैतन्मते कथंचिद्द्रव्यस्यचक्षुषा ग्रहणेपि गुणकर्मजात्यादिकारूपिणां ग्रहणं कथं तेन वाच्यम् युक्त्यातत् सिद्धे । तथाहि न्यायमते संयोगादि षट् संनिकर्षसहकारेण चक्षुरूपादिरहितगुणकर्मजात्यभावादीन् प्रत्यक्षयति तथैवैतन्मतेपि नदण्डवारितं भवेत्, अन्यत्र पक्षपातात् । यथावा लौकिकसंनिकर्षैरलौकिकोपि संनिकर्षः स्वीकृतः । तेनाप्य निर्वाहे अनुमानादिकप्रमाणमङ्गीकृत्यास्तिकः स्वात्मानं सर्वज्ञमिव विजानाति । तथैवैतन्मते ह्रस्वदीर्घदीर्घतरादिव्याप्तिज्ञानादिसंनिकर्षानाश्रित्यचक्षुषैव लौकिकालौकिकसर्वमेव ज्ञानस्यादेवेति युक्त एव केचनपदेन चार्वाकस्य ग्रहणं तदीयप्रमाणविषयकप्रतिपत्तिप्रदर्शनमपि । अत्रत्यं वैशिष्ट्यं तत्वोपप्लवग्रन्थसम्बद्धं सति प्रकरणेऽत्रैवटीकायां क्वचिद्दर्शयामि ।

द्वितीय **अन्येकेचन** इत्यनेन वैशेषिकसौत्रान्तिकयोर्ग्रहणम् । इमे यथायथं प्रत्क्षानुमानाभ्यामात्मानं ज्ञातुमिच्छतः । अन्येतु द्वितीयप्रमाणमात्रवेद्यः इति । अत्रमात्रपदेन प्रत्यक्षस्य निराकरणम्-यथाघटादिविज्ञानंवाह्यघटादिसालंवनं तथा अहमिति आन्तरमपि सविषयकं विज्ञानत्वात् नीलपीतादिविज्ञानवत् । एतन्मते सर्ववस्तु विज्ञानमयम् । विज्ञानं द्विविधंवाह्यमाभ्यन्तरं च प्रवृत्तिविज्ञानमालयविज्ञानभेदेन द्विविधम् । तत्र प्रथमंवाह्यवस्तुविज्ञानम्, द्वितीयमात्मपदवाच्यम् । तदुक्तम् "तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत्स्यात् प्रवृत्तिविज्ञानंयन्नीलादिकमुल्लिखेदिति । तदेतत्सर्वं क्षणिकं सत्त्वात् । मेघमालावदित्यनुमानेन ज्ञानज्ञेयप्रपञ्चयोः क्षणिकत्वमभ्युपैति । अतएव जातविनष्टत्वादनुमानमात्रवेद्यम् । ज्ञानज्ञेययोः सहोपलंभनियमेन नियमतोऽभेद एव· भेदस्त्वाविद्यकः । तदुक्तं "सहोपलंभनियमादभेदोनीलतद्धियोः । भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये" इति । यथाऽविद्यमानमेव रजतम् विद्यमानवत् शुक्तौ प्रतिभासते, यथावा अविद्यमान एव द्वितीयश्चन्द्रमाः सद्वितीयवदाभाति तथैव वस्तुतोऽविद्यमानमेवज्ञेयंजगत् ज्ञाने पृथक्तयागृह्यते,ज्ञानज्ञेययोः सहोपलंभनियमादेवेति **आगममात्रवेद्यइतितदपरे** इति । येयमस्मीति वुद्धिविषयतया प्रतिभासते, तत्राहं बुद्धे देहादिविपयालंवनातयैवोपपादनसंभवेन येयेसंघातास्तेपरार्था इति नियमस्य क्वाचित्कतया, अनुमानस्याप्रयोजकत्वेन च, परिशेषादागममात्रवेद्यः "ब्रह्मसत्वे प्रमाणं च शास्त्रमेव सुनिश्चितम् । 'तन्त्वौपनिषद' ञ्चैतच्छ्रुतिवाक्यप्रमाणतः ॥" (श्रीबोधायनमतादर्शः १३१) इत्याद्याचार्योक्तेरितिश्रोत्रियमतम्, **मानसप्रत्यक्षग्राह्य** इति "अहंकारस्याश्रयोऽयंमनोमात्रस्य गोचरः" इति नियमेन "मनसैवानुद्रष्टव्य" इत्यादिश्रुत्याचमनोमात्रग्राह्य इतिभाट्टतार्किकयोर्मतम् ।

घटपटादिसकलप्रत्यक्षेषु ग्राहकतयैवात्मा प्रत्यक्ष इति प्रभाकरः । ज्ञानस्वरूपत्वेनोत्पाद विनाशरहितस्वभावकः स्वयं ज्योतिः स्वरूप इति सांख्याः । एतादृशश्चायमात्मा यथा संभवंशब्दानुमानयोगिप्रत्यक्षैः आत्मेतरसकलपदार्थविलक्षणस्वभावतयाविशदतया विशदतरतया विशदतमतया गृहीतोयाथार्थ्येन प्रत्यक्षीकृतो भवति ।

आत्मपरिणामेपि विप्रतिपत्तिं दर्शयन्ति । केचन आत्मापरमपरिमाणवान्,

ग्रहाकतयैवात्मा प्रत्यक्ष इति प्रभाकरमतम् । एतन्मते यद्यद्ज्ञानं भवति, तत् ज्ञातृज्ञेयज्ञप्तिविषयघटितमेव भवत्यतस्त्रिपुटिज्ञानमिति कथ्यते । तत्रात्मानो ग्राहकतयाऽर्थाद् ज्ञातृतया, विषयस्य ज्ञेयत्वेन ज्ञानस्य स्वरूपतयेति ज्ञानमात्रत्रितयावभासकतया, नीलपीतादि प्रत्यक्षे, यथा घटस्तज्ज्ञानंतदीयज्ञाताऽत्माचसर्वमेतत् त्रितयं प्रकाशते, तथैवज्ञानमात्रे एव ग्राहकतयाऽत्मनो ग्राह्यतया विषयस्यमितित्वेनमितेरिति सर्वज्ञानेषु आत्माप्रन्यक्ष एवेति । नित्यप्रकाशरूपतया स्वयं ज्योतिःस्वरूप इति सांख्यमतम्, "अत्रायं पुरुषः स्वयं ज़्योतिर्भवति" इत्यादि श्रुत्या, अनवस्था भयाद् ज्ञानस्यज्ञानान्तराऽकर्मतया, कृतप्रणाशाकृताभ्यागमदोषभयात् सर्वथोत्पादविनाशरहितोबोधरूपः स्वयं प्रकाश इति तन् मतम् ।

सिद्धान्तमतमाह **एतादृशश्चायमात्मा** इत्यादि । यथोक्तगुणविशिष्टोयमात्मा, सर्वान्तरतया गृहीतो जीवत्वेन श्रुतिप्रतिपादितस्वप्रकाशतया, बाह्यशरीरेन्द्रियादिव्यावर्तकसर्वथा नित्यत्वाणुत्वज्ञानकर्तृत्वादिप्रकारेण वेदान्ताद्यागमद्वारा विशदतया गृहातः ततः श्रवणादनन्तरागतध्यानाऽपरपर्यायमननद्वारेग विशदतरतया परिगृहीतः युक्तयुञ्जानयोगजप्रत्यक्षद्वारेण समधिगतो विशदतमतयाऽवगतः आत्मा साकेतप्राप्तिरूपमोक्षे स्वभावसिद्धविकास, संकोचक कर्माद्यभावेन सर्वथाऽसंकुचितप्रत्यक्षज्ञानप्रकाशालोकेन स्वरूपतो गुगतश्चानुभूयमानो भवतीति सिद्धान्तसिद्धं सर्वकलङ्करहितं पक्षपातविरहितैः परिगृहीतमिति ।

सर्वोंपि वेदप्रामाण्याभ्युपगन्तृक आस्तिको नास्तिको वा द्रव्यगुणादिपदार्थान्तर्गतं प्रथमं द्रव्यपदार्थान्तर्गतमेवात्मानं मन्यन्ते । तत्र "तत्रावस्थाश्रयो द्रव्यं मतं वेदान्तवेदिभिः । आमन्तुका पृथक्सिद्धोधर्मोऽवस्था प्रकीर्तिता" इत्याद्याचार्योक्ते द्रव्यस्यावस्थाश्रयत्वं गुणक्रियावत्वं समवायिकारणत्वंद्रव्यत्वं जातिमत्वं वा लक्षणमाचक्षते । अर्थात् द्रव्यं गुणानामधिकरणं भवति । एवञ्च पृथिवी प्रभृतिद्रव्येषु यथा योग्यं रूपादयो गुगास्तथा चतुर्विधपरिमाणेषु यथा योग्यं कश्चित परिमाणोपि अवश्यमेव तिष्ठतीति तथैवात्मनोपि द्रव्यत्वात् तत्र कतमत् परिमाणं विद्यते संशयात्तस्यात्मनि परिमाणदर्शनाय वादिविप्रतिपत्तिं दर्शयितुमाह **आत्मपरिमाणेपि विप्रतिपत्तिंदर्शयन्तीति** तत्परिमाणमणुह्रस्वदीर्घमहत्, भेदाच्चचतुर्विधम्, तत्र ह्रस्वदीर्घत्वयोः सापेक्षत्वेन अगौ मह-

अन्येमध्यमपरिमाणवान् अणुपरिमाणवानिति वा केचन। अन्येकेचन स्वभावतः परिमाणविरहितोपि व्याप्यवस्तुनः परिमाणद्वारा सम्पादितपरिमाणः। तत्रापि व्याप्तित्येव समावेश इति कृत्वा मुख्यतो मूलेऽणुमहतोरेव विप्रतिपत्तिः। वाद्यनुरोधात् मध्यमस्यापि परिग्रहः। तत्र न्यायसांख्यकेवलाद्वैतवादिन आत्मनो व्यापकत्वं मन्यन्ते। उपाधिभेदवलेन व्यापकस्यापि, उत्क्रान्त्यादिकं वर्णयन्ति, व्यापकस्य स्वतो निष्क्रियत्वात्। क्रियावतश्चानित्यत्वनियमेनात्मनस्तथा स्वीकारे कृतप्रणाशादिदोषापातात्। तस्मादात्मा व्यापकपरिमाणवानेव। तथा व्याप्यस्यैकदा एकत्रैवसत्वेन तत्रैव तदीयादृष्टादिकमपिस्यात् एवं स्वीकारेऽतिदूरे तत्तदर्थं निर्मीयमाणप्रासादादिस्थले तददृष्टाभावेन तदुपभोगायतत्तत्कार्यं न पर्याप्तमिति कृत्वा तस्य व्यापकत्वमेव, तथा सति जीवस्य सर्वत्र सत्वात्तदर्थं तत्रापि कार्यं भवत्येव। अन्ये जैनास्तु व्यापकस्य गमनासंभवात् मनुष्यशरीरं परित्यज्य पुत्तिकाशरीरंकर्मवशात् प्रविविक्षोर्जीवस्य पुत्तिकादिलघुशरीरे प्रवेशो न स्यात् तथा कीटपतंगादिशरीरं परित्यज्य मनुष्यशरीरं गजादिशरीरं प्रविशतो जीवस्य कार्त्स्न्येन तत्रावस्थानमपिन स्यात्। तस्मात् आत्मनोऽवयवाः संकोचविकाशशालिनस्तेचावयवाः स्वल्पशरीरप्रवेशकाले संकुचन्ति दीर्घेचविकशन्ति, ततश्च जीवस्य प्रवेशनिर्गमौनानुपपन्नौ भवेताम्। एवञ्च यावान् शरीर परिमाणस्तावानेवजीवस्यापि न तु जीवस्य परिणामो व्यापकोऽणुर्वेति।

केवलकर्मनिर्जरार्थंजीवः केवलि समुद्घातेन स्वावयवान् लोकालोकव्यापकं कृत्वाक्षणेनैवघातिकर्माणि निर्जरयतीति तत्काले कथंचित् परममहत्परिमाणको भवतीत्यनेकान्तवादिनामुद्गार इति विशेषो मत्कृतचिदात्ममीमांसातो ज्ञातव्य इति जैनमते देहपरिमाणो जीवः।

अन्येत्वत्रापरितुष्यन्तः अणुपरिमाणमेव जीवस्य स्वीकुर्वन्ति। एवं सति शरीरान्तरगमनागमनादौ न कोपि दोषो भवति। अन्ये वेदसद्युक्त्यादिपक्षपातिनः—"वालाग्रशतभागस्य शतधाकल्पितस्य च। भागोजीवः सविज्ञेयः स चानन्त्यायकल्पते" (५।९) एषोणुरात्मैष द्रष्टा' इत्यादि श्रुतिमानतः। अणुश्चचेतनो जीवोद्रव्यरूपो मतोबुधैः" (श्रीवोधायनमतादर्शः ८६०) "तत्राणुचेतनोजीवः संश्चिदानन्दलक्षणः" (श्रौतप्रमेयचन्द्रिका ५।१) "नित्योज्ञश्चेतनोऽज सततपरवशः सूक्ष्मतोऽन्त्यन्तसूक्ष्मः" (श्रीवैष्णवमताब्जभास्करः १।७) "जीवोऽणुश्चेतनो व्याप्तो ज्ञानेनाखिलवर्ष्मणि झटितितेन जानाति सर्वदेहसुखादिकम्" (श्रीरामानन्दसिद्धान्तसारः २९) "स चाणुचेतनः" (श्रौतार्थसंग्रहः) इत्यादिकसच्छास्त्रैकप्रामाण्यवन्तः सनातनीयाः श्रीरामानन्दीयास्तु आत्मनो व्यापकपरिमाणस्वीकारे तथा मध्यमपरिमाणस्वीकारे उभयपक्षेपि दोषमाकलय्य, ते तस्याणुपरिमाणमेवाद्रियन्ते। तत्र च माध्ववल्लभप्रभृतिका अन्तर्भूताः। इमेऽणुपरिमाणमेवजीवस्य रोचयन्ते। न च जीवस्याणुत्वे क्रियावत्वं स्यात् सक्रियत्वे च कार्यपृथिव्यादिवदनित्यत्वं च भवेदिति प्रकृतपक्षेपि कृतप्रणाशादिदोष आपतेदिति वाच्यं, क्रियावतो नियमतोऽनित्यत्वमेवेति नियमस्य मनसि व्यभि-

बोधमात्रेण स्वरूपत इति । एवमेनं प्रकृतजीवं कश्चित्क्षणिकं घटादिवदेव स्वीकरोति बौद्धः । यावत्पर्यन्तं शरीरे उष्मोपलभ्यते तावदेवजीवावस्थानमित्यपि प्राकृतः । प्राकृत चारात् । मनसि क्रियावत्वं विद्यते, "क्षितिर्जलं तथातेजः पवनोमन एव च । परापरत्वमूर्तत्वक्रिया वेगाश्रया अमी" इति नियमेन मनसः क्रियावत्वेप्यनित्यत्वप्रतिद्वन्दिनित्यत्वस्वीकारात् । यद्यपि मनसः स्वरूपेतत्परिमाणे विगानेपि तन्नित्यत्वेऽन्ततः प्रवाहनित्यत्वपक्षे सर्वेषामेकमतस्यैवप्रायो दर्शनात् । न च मनसोऽणुत्वे तादृशस्य तस्य शरीरस्य क्वचिदेकदेशे एव व्यवस्थितत्वात् सकल शरीरव्यापकसर्वाङ्गीणसुखाद्यनुभवो न स्यात् । भवति च निदाघे गङ्गाम्भसिनिमज्जतोनरस्य सर्वाङ्गीणसुखोपलब्धिरिति वाच्यम्, आत्मनः स्वरूपेणाणुत्वेपि ज्ञानगुणद्वारातद्व्यापित्वश्रवणात् "जीवोऽणुश्चेतनो व्याप्तो ज्ञानेनाखिलवर्ष्मणि । झटितितेन जानाति सर्वदेहसुखादिकम् ॥२९॥" इति श्रीटीलाचार्योक्तेः । तथैव—"दीपज्योतिरिव ज्ञानं जीवस्य व्यापकं मतम् । हृत्स्थो जीवोऽखिलं वेत्ति ततोदेहसुखादिकम् ॥२८॥" इत्यादिरूपेण श्रीरामानन्दसिद्धान्तसारे स्वामिश्रीवैष्णवाचार्योक्तेश्च हरिचन्दनविन्दुवदेव । यथा हरिचन्दनविन्दुः शरीरैकदेशे संलग्नोपि सर्वशरीरगतमाल्हादं करोति, तथैवात्मनोऽणुत्वेपि तदीयगुणभूतज्ञानस्य व्यापकवत्तया सर्वशरीरगतसुखाद्युपलब्धिर्न विरुध्यते । अथवा मनसः साहाय्येन तथा करोति । अतएव "शिरसि मे वेदनापादे मे सुखमित्यपि प्रतीतिः समर्थिता भवतीति । स्वरूपतोऽणुत्वेपि गुणतो व्यापकत्वस्याभ्युपगमे न कोपि विरोधस्तस्मादणुरात्मेत्यपि पक्षः प्रदर्शितः । अत्रत्यं विशेषतत्त्वं प्रदीपचिदात्ममीमांसायां श्रीआनन्दभाष्यदीपे वा द्रष्टव्यमिति दिक् । यथाऽत्मनः परिमाणेवादिनामनेकविधंमतं प्रदर्शितं विचारकारणीभूतं संशयजनकम्, एवमयमात्माकियत्कालं यावदवतिष्ठते इति कालसम्बन्धेऽपिताविप्रतिपत्तिर्दर्शयति **क्षणिक** इत्यादि अयमात्माक्षणिको जातविनाशीत्यर्थः । एतन्मतं वौद्धानाम् । एतन्मते यदा पदार्थ उत्पद्यते, तत्रोत्पादकसामग्र्या समुत्पद्यते, तत्रोत्पादकसामग्री विनाशकसामग्र्या संवलितैव, यदि प्रथमक्षणे समुत्पद्यविनाशकसामग्रीमपेक्षविनश्येत तदास्थिर एव नकोप्यस्य विनाशकः स्यात् । तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति तन्नियमात् । तस्माद्विनाशकसामग्रीसंवलित एव जायते इति यदैवोत्पादस्तदैव विनाश इति तस्य क्षणिकत्वम् । यत् सत् तत् क्षणिकम् सन्तश्चेमे आत्मादिका भावास्तस्मात् क्षणीका एव । मेघमालावदेव । तस्माद् भावत्वादेव बौद्धा आत्मानमपि क्षणिकमेव संगिरन्ति ।

नचतस्य क्षणिकत्वे कालान्तरभाविस्वर्गमोक्षादिव्यवस्था नोपपद्येतेतिवाच्यम् प्रतिक्षणमालयसंतानधाराया प्रचलनेन पूर्वपूर्वविज्ञानजनितसंस्कारस्योत्तरोत्तरसंजातेषु संक्रमणेन पूर्व पूर्वतर संतानस्य विनाशेपि तत्संस्काराणां तदुत्तरोत्तरे संचरणात् स्मरणादीनामुपपादनसंभवात् । तदुक्तम् "यस्मिन्नेवहि सन्ताने आहिताकर्मवासना । फलं तत्रैव संधत्ते कार्पासेरक्तता यथा"इति ।

प्रलयपर्यन्तजीवोऽवतिष्ठते इति ब्रह्मदेवादयः। यावद् यस्य जीवस्यमोक्षो न भवतितावत्पर्यन्तं तस्यावस्थानमिति, औडुलौमिमतानुवर्तिनां मतम् । कूटस्थनित्य इतिवहवः। एवं सर्वशरीरेष्वेक एवजीव इति कश्चित्। शरीरभेदाद्भिन्न इति वा केचन।

यथा यस्मिन् कार्पासवृक्षेलाक्षारसावसेकः क्रियते तत्रैव कालान्तरे संतानपरंपरयारक्तताऽनुगता भवति। यथावा मृगमदवासनावासितवसनादिवत् पूर्वपूर्ववासनायाः संचारो भवति तथैव पूर्वविज्ञानस्थ वासनाकर्मादीनामुत्तरोत्तरगमनात्। न चैवं तथा सतिमातृगनवासनायास्तज्जातशिशावपि संस्कारसंचारेमात्रानुभूतवस्तुनः पुत्रस्यापि स्मरणमापद्येत् मातुरालयविज्ञानपूर्ववृत्तित्वादिति वाच्यम्, उपादानोपादेयभावस्य नियामकत्वेन पूर्वदोषाभावात् अर्थात् न केवलं वासनायाः संचारेपूर्ववृत्तित्वमात्रंनियामकं येन कथितदोषापादानं शोभेत, किन्तूपादानगतवासनादेरुपादेये संचार इति नियमः। मातापुत्रस्यनोपादानमर्थात् समवायिकारणं भवति, किन्तु निमित्तकारणमेव केवलं भवति, समवायिकारणं तु पित्रोरजोवीर्यंच, जाते पुत्रे तदीयरजोवीर्याद् समुदितसंताने पूर्वकालेस्थितसंस्कारादेरेवतदुत्तरसन्ताने गमनं भवतीति। न च वासनायागुणतया गुणस्य च क्रिया रहितत्वेन कथमुत्तस्मिन् गमनमितिवाच्यम्, उत्तरस्मिन् तदुत्पत्तेरवसंक्रमपदार्थत्वात्, नत्वत्र संक्रमणं क्रिया एव येनत्वदुदीरितदोषापादानं स्यादिति। तथा च क्षणिकशरीरेऽतिशयविशेष कल्पनचैव सर्वेहलौकिकपारलौकिकव्यवस्थाया उपपादनसंभवेन प्रामाणिकस्थिरात्मवादकल्पनं मुधैवेति। एवं वाह्याङ्कुरादिष्वपिकूर्वद्रूपत्वशक्त्यैव सर्वसंभवे, सहकारिसमवधानं निरर्थकमेवेति बौद्ध समयः।

'यावच्छरीरोष्मस्थायीति चार्वाकमतं, यावत्कालमेवदेहेषूस्मणः सत्वंतावदेवकालमत्रजीवोवतिष्ठते, तदभावेप्रवसतिम्रियतेइत्यर्थः। अतएवमृतशय्यायां स्थितस्यमूमूर्षोर्जीवति नवेति संशयानाः वांधवा हृदयदेशेहस्तं निधायनिधायवायुष्मणोरस्तित्वे जीवतीति विजानन्ति, अन्यथातु अन्तिम संस्काराय नयन्तीतिचार्वाकविप्रतिपत्तिरिति। "आप्राकृत प्रलयं यावदवतिष्ठते" इतिब्रह्मदेवादयः संगिरन्ति। "द्विपरार्द्धेत्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्तकल्प्यन्ते प्रलयाय हि।" इति प्राकृतप्रलयः। तत्र "जगत्प्रतिष्ठादेवर्षे पृथिव्यप्सु प्रलीयते। आपस्तेजसिलीयन्तेतच्चवायौ प्रलीयते। वायुश्चलीयते व्यक्तं व्योम्नि व्योमोऽव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते।" पृथिव्यादिक्रमेणाव्यक्तपर्यन्तस्य यदास्वस्वकारणे लयोजायते तस्य प्राकृतप्रलय इति नाम। तत्र पञ्चभूताहङ्काराव्यक्तानां लयो भवतीत्येतस्य प्राकृतप्रलय इत्याख्या जायते। तत्र ब्रह्मदेवानुयायिनः कथयन्ति। ततश्चयावत्पर्यन्तं प्राकृतप्रलयोनजायते तत्पूर्वमेव जीवानामवस्थानं काल इति। पूर्वमतापेक्षयैतन्मते दीर्घकालावस्थानं जीवानामिति।

यथा जीवात्मविषये चार्वाकादारभ्यवेदान्तमतपर्यन्ततत्तद्वादिनां विप्रतिपत्तय उदाहृतास्तथैव परमात्मविषयेपिवादिभेदप्रयुक्ता अनेकाविप्रतिपत्तयो भवन्ति । तत्र केचन चार्वाकवौद्धजैनकर्ममीमांसकसांख्याजीवव्यतिरिक्तं सर्वज्ञत्वसर्वशक्तिमत्वादि गुणकं सर्वद्रष्टारमतिरिक्तं परमात्मानं नाभ्युपगच्छन्ति । तत्र चार्वाको लोकसिद्धराजानमेवेश्वरं भजते । जैनोजीवमेव केवलिनमाह । सांख्यमीमांसकः सृष्टौकर्मणि च नास्तीश्वरप्रयोजनम् । बौद्धः सर्वथैव तदभावमाह । ये ईश्वरं मन्यन्ते तेष्वपि परस्परवैमत्यमेव । तत्राद्वैतवादिनः कूटस्थं विज्ञानमात्रस्वरूपं ब्रह्मैव सत्यम् । यत्रेश्वरजीवादि भेदप्रपञ्चो नास्ति प्रमातृप्रमाणप्रमिति भेदोपि नास्ति, एतादृशेऽधिष्ठानेऽनेक शक्तिमदविद्ययैवाकाशादिप्रपञ्चो भासते, रज्जौसर्पवत् । तत्र समष्ट्यभिमानिचेतन-

आमोक्षमवतिष्ठन्ते जीवा इत्यौडुलोमिमतमिति । अर्थात् मोक्ष पर्यन्तंजीवानामवस्थानम् । स च जीवः कूटस्थो नित्यश्च । तत्र नित्यत्वं द्विविधं परिणामिनित्यं कूटस्थ नित्यंच । तत्रतेषुविक्रियमाणेष्वपितवेदमिति वुद्धिर्नविहन्यते तत्परिणामिनित्यम् । यथाघटादिकार्यकालेमार्दवमिति व्यवहारदर्शनेन घटादावपि मृदोऽनुवर्तनेन मृदादिकं परिणामिनित्यमेव यथावा प्रकृतिः परिणामित्वात् प्रवाहरूपेण तदनुवर्तनात् । तदपरं नित्यंकूटस्थनित्यं यथाऽत्मा । तत्र कूटस्थत्वं सर्वथा विकाररहितत्वम् । नित्यत्वं सर्वकालसत्ता, त्रिकालावाध्यत्वकालत्रयेभूतादौ सर्वथावाधराहित्यमेव । अथवा स्वरूपेणोत्पादविनाशराहित्यं वेतिजीवोनित्यः ।

जीवात्मस्वरूपे तदीयपरिमाणे तदवस्थानकाले च विप्रतिपत्तिंप्रदर्श्य जैवीयसंख्यायामपि विप्रतिपत्तिर्दर्शयितुमुपक्रमते **सर्वशरीरेष्वेकः...शरीरभेदाद्भिन्नोवे**ति ।

यथाकश्चिद् योगी, अल्पीयसाकालेनायुः कर्मक्षीणंस्याद्भोगकालश्च भूयानितिमत्वा, स्वल्पकालेनैव सर्वकर्मणांशुभाशुभानांभोगायभोगोचितमनेकशरीरं सङ्कल्पान्निर्मायभुङ्क्ते । तत्रजीवो मुख्य एक एव योगी शरीरंतु विभिन्नजातीयकमनेकविधं भवति । तथैव कश्चिदेक एव जीवोऽनेक शरीरमधिष्ठाय तत्तच्छरारानुकूलं फलभोगं करोति, अथवा प्रतिक्षेत्रं जीवोऽनेकः स्वस्वकर्मानुरूपं तत्तच्छरीरावच्छेदेन फलं भुनक्ति ।

अत्राह मायावादिनोऽनुयायी कश्चित् , एकजीव एव सर्वक्षेत्रेषु नचैकजीवादेभोगसांकर्यम् । अन्तः करणात्मकोपाधिभेदेनभोगसाङ्कर्याभावात् । अन्येतु वन्धमोक्षस्वर्गनरकादिव्यवस्थायाः प्रतिनियमदर्शनेन, तथा वन्धकालेपि कश्चिद्गुणवान् परोमूर्खः कश्चिदत्युत्कृष्टसुखवान् दरिद्रश्च कश्चित् तथाकश्चिज्जायते कश्चिन् म्रियते, कश्चिदन्धोवधिरः काण, इत्यादिजननकरण मरणादीनां प्रतिनियमदर्शनाज्जीवबहुत्वमेव रोचयन्त इत्यनेकप्रकारेणमन्यमानावादिनस्तथातथा विप्रतिपद्यन्ते जीवस्वरूपपरिमाणसंख्याभेदेषु इति ।

मीश्वरो व्यष्टयभिमानि चेतनं जीवः। एतन्मतेऽविद्यामात्रजीवेश्वरकल्पकोपाधिः। "मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभावित्युक्तेः।

मायाऽविद्ययोर्भेदमतेतु-व्यापिका माया, व्याप्या चाविद्या। तत्र निर्विशेष चैतन्यमविद्ययोपहितं सदनेकजीवरूपेण भासते, तादृशमेव चैतन्यं माययोपहितं सदीश्वरभावेन प्रकाशते। तदुक्तम् "आच्छाद्यविक्षिपति संस्फुरदात्मतत्वं जीवेश्वरत्व जगदाकृतिभिर्मृषैवेति। तत्राविद्याभेदाज़्जीवभेदः कामादिगुणप्रधानोऽविद्यावश इति कथ्यतेजीवः। मायाया एकत्वेन सत्वप्रधानतया तां स्ववशीकृत्य वर्तमानः परमेश्वरः सर्वनियामकः सर्वज्ञादिश्च भवतीति तथा तदन्ये औपाधिकमीश्वरत्वमिति। अन्येतु मायोपहितं चैतन्यमीश्वरः। मायिकान्तः करणेषु प्रतिविम्बितं जीवः। अथवा मायायां प्रतिबिम्ब ईश्वरः। अन्तःकरणेषु प्रतिबिंम्बो जीव इत्यनेकप्रकाराः भवन्ति। अन्येतु स्ववशवर्तित्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदः स्वाभाविकस्वेतरविलक्षणनिरवधिकज्ञानाद्यैश्वर्यकल्याणगुणार्णवः पुरुषविशेष ईश्वरः इत्येवमीश्वरस्वरूपे विनिश्चिन्वन्ति। अर्थात् "रमन्ते योगिनोऽन्ते सत्यानन्दे चिदात्मनि। इतिरामपदेनासौ परंब्रह्माभिधीयते।" 'राम एव परं ब्रह्म राम एव परं तपः। राम एव परं तत्त्वं श्री रामोब्रह्म तारकम्। (श्रुतिः) "रामो ब्रह्मपरात्परं श्रुतिमतं भक्त्यैव निःश्रेयसम्" (स्मृति) साकेताधिपतिः सकलकल्याणगुणाकरसर्वेश्वरश्रीराम एव परमात्मा सगुणो नित्यमुक्तमुक्तजीवैरुपासना विषय इति।

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष एवेश्वर इति पातञ्जलाः तत्र पुरुष विशेष इति कथनेन नामादिविषयेपि वैमत्यं भवति तत्रैके एकएवेश्वरो हरिहरब्रह्माभास्कर इति। नामचतुष्टयं कार्यवशाद् गृह्णातीति। त्रिमूर्तिवादिनस्तुभास्करं विहायमूर्ति त्रयमेव मन्यन्ते। विष्णुशिवयोरैक्यवादिनस्तु मूर्तिद्वयमेव स्वीकुर्वन्ति। शैवास्तुमहेशमूर्तिमात्रमङ्गीकुर्वन्ति परमेश्वररूपेण। अन्येकेचन गणपतिं तदन्येदत्तंतदन्येनरसिंहं नारायणमित्येवं क्रमेणेश्वरस्वरूपे वहवोविप्रतिपन्ना वाक्याभासयुक्त्याभास समाश्रिता सन्ति।

यद्यपि साधारणतया सर्वेपि परमेश्वरं स्वीकुर्वन्त्येव तथापि मूर्तिविशेषेण विषयाः नित्यत्वानित्यत्वभौतिकत्वाभौतिकत्वस्वार्थपरत्वादिविषयका वहवोवितर्कामतभेदेन प्रादुर्भवन्ति। तथा परमेश्वरस्य परिजनस्थानविशेषविषयका अपि वितर्का संभवन्ति।

तथा परमेश्वरग्राहकप्रमाणविषयेपि विप्रतिपत्तयोभवन्ति । तत्र शास्त्रमात्रप्रमाणग्राह्य इति केचित् । तदन्ये आगमानुमानप्रमाणक इति । श्रुतितोनुमानतश्चध्यानसंस्कृतमनो ग्राह्यश्चेति वहवः । एवमीश्वरजीवयोः सम्बन्धेपि विप्रतिपत्तयोभवन्ति । तत्रानादिविलक्षणाविद्योपादनकभेदादेवेश्वरेशितव्यलक्षणसम्बन्धो जीव परमेश्वरयोर्नतु पारमार्थिकः संबन्ध एकत्वादुभयोरित्यद्वैतवेदान्तिनः । तत्रापि प्रतिबिंबवादिनस्तु बिंवतो भेदस्येश्वरजीवयोरभावेपि प्रतिबिंवरूपजीवानां भेदप्रतिपत्तिलक्षणो विशेषो विद्यते एवेति वदन्ति ।

भास्करमतानुयायीनस्तु स्वरूपतश्चेतनत्वेन जीवेश्वररयोरभेदः पारमार्थिकः भेदस्तु अविद्योपाधिक एवेति वदन्ति विरुद्धयोर्भेदाभेदयोः केवलस्वरूपेऽसंभवादिति ।

यादवप्रकाशीयास्तु जीवेश्वरयोर्नानात्वे भेदसत्येवाभेदोऽभेदोनाम अंशांशिभावरूपएव शांशित्वादेव भेदाभेदयोरुपपत्तिः । भेदसमानाधिकरणाभेदस्यैव तादात्म्यस्य समानाधिकरण्यार्थत्वम् । सामानाधिकरणस्थले भेदसहिष्णुः अभेदस्यैव दर्शनात्, नीलोघट इत्यादि स्थले । न सर्वथाभेदस्थले सामानाधिकरण्यं यथा घटपटयोः नवा सर्वथाऽभेदेपि सामानाधिकरण्यं घटोघट इति तत्र शाद्धवोधस्या दर्शनात् । नीलोघट इति शाद्धवोधस्य सर्वसंमतत्वात् । तत्रैव सामानाधिकरण्यं तादत्म्यं यत्रभेद सहिष्णुरभेदोभवतीति । सिद्धान्तपक्षस्तु समवायः स च परतन्त्रता लक्षः परतन्त्रताऽपृथक् सिद्धिरूपा तद्रूप एव समवायोनतुन्यायमतवत् समवायो धर्मिभ्यांभिन्नः । तथा शेषशेषि लक्षणः सम्बन्धो जीवेशयोः स्वस्वामिभावश्च । तत्र परगतातिशयाधानेच्छा प्रक्लृप्तस्वरूपादिकत्वं शेषत्वम् । यथेष्टविनयोगार्हत्वं स्वत्वम् । भृत्य स्वामित्वलक्षणश्च सम्बन्धः । तत्र प्रेर्यचेतनत्वमेव भृत्यत्वम् । अयमेव स्वत्वभृत्यत्वयोर्भेदः । एवञ्च अंशांशित्वलक्षणसम्बन्धादारभ्यभृत्यस्वामित्वलक्षणपर्यन्ता अनेके संबन्धा जीवेश्वरयोः प्रदर्शिता इति सर्वेप्यभिमताः सिद्धान्ते विशेषप्रपञ्चस्तु तत्तत्प्रकरणे दर्शयिष्यते ।

एवं परमलक्ष्यरूपमोक्षस्वरूपेऽपिवादिनां स्वस्वमतानुसारेणानेकविधा विप्रतिपत्तयो भवन्ति । तथाहि, सुखदुखाद्यनुभावकस्वस्वरूपस्यात्यन्तिकोच्छेदरूप एव मोक्ष इति चार्वाकचरमवौद्धौ । “अविद्याऽस्तमयो मोक्षः साचबन्धउदाहृतः” इति नियमेनाविद्यायाः सर्वथा विनाश एवमोक्षोनत्वानन्दज्ञानलक्षणः” इति केवलाद्वैतियोगाचारौ । तथा चार्वाकमते “यावज्जीवेत्सुखं जीवेन्नास्तिमृत्योरगोचरः”इति नियमेन जीवत एव सुखादिकं भवति नतु मृतस्य यथैतन्मते तथैव शून्यवादेपि. तथैव केवलाद्वैते

तथा योगाचार मतेपिस्वरूपविनाशस्यैवेष्टतया नानन्दादिप्राप्तिरिति नैतेषां मोक्षः परम पुरुषार्थरूप इति । न्यायमतयोर्नवानामात्मविशेषगुणानामात्यन्तिकोच्छेदलक्षण एव मोक्षः । तद्दशायां काष्ठपाषाणवदेवात्मनोऽवस्थानादिति ।

सांख्यास्तु कैवल्यरूप एव मोक्षः । "वृत्ति सारुप्यमितरत्रेतिनियमेन संसारदशायां कैवल्यं विहायप्रकृतिरूपतापादनेन कैवल्यं तिरस्कृतमिव भवति. तदभावे कैवल्यमास्थायावतिष्ठते. इति कैवल्यलक्षण एव मोक्षः । अद्वैतमतैकदेशी तु ब्रह्मवेद ब्रह्मैव भवतीति नियमेन ब्रह्मभावसाधर्म्यलक्षण एव मोक्षः । अथवा ब्राह्मगुणसङ्क्रान्तिरेवमोक्षः । यद्वाब्रह्मच्छायाब्रह्मकान्तिप्राप्तिरेव मोक्षः । मीमांसकादयस्तु स्वाभाविकानन्दाद्याविर्भावरूप एव मोक्ष इति । अन्ये केचन ब्रह्मगुणानुभवजनितनिरतिशयसुखाद्यनुभवजनितपरमात्मकैङ्कर्यलक्षण एव मोक्ष इति ते यथा तथा वितर्कं मोक्षविषये कुर्वन्ति ।

एवं मोक्षसाधनेपि वादिनां विप्रतिपत्तयोऽनेकविधा भवन्ति । तथाहि. कर्मणामोक्ष इति कर्मवादिपक्षः । तमेव विदित्वेत्यादि श्रुतिबोधितज्ञानयोगलभ्यो मोक्ष इति केवलाद्वैतपक्षः । ज्ञानकर्मसमुच्चयलभ्य इति यादवप्रकाशपक्षः । दण्डचक्रादिन्यायेन ज्ञानकर्मभ्यां मोक्ष इति विशिष्टाद्वैत पक्षः । ज्ञानकर्मभ्यां संस्कृतान्तः करणस्य पराभक्तिरुदेति तादृशानन्यभक्त्यामोक्षः । मुक्तौ हेतुस्तु भक्त्यापरपर्यायं तैलधारावदविच्छिन्न भगवत्स्मृतिसन्तानमेव । उक्तश्च साधनदीपिकायामाचार्यवर्यैं र्जगद्गुरुश्रीगङ्गधराचार्यैः 'रामस्यब्रह्मणोऽनन्यभक्त्यैवमुक्तिराप्यते । भक्तिर्ध्रुवा स्मृतिः साच विवेकादिकसप्तकात् । इति । ऊचुश्चतथैव भगवन्तः श्रीदेवानन्दाचार्यचरणा अपि "त्वदीयास्मृतिस्तारिका मृत्युसिन्धोः स्तथा विस्मृतिः पातिका तत्र चैव । परंयोगिनां हार्दमालम्बलं त्वां श्रयेराघवं सच्चिदानन्दरूपम्" इति गीतानन्दभाष्योक्तेः । "रामो ब्रह्म परात्परं श्रुतिमतं भक्त्यैव निः श्रेयसम्" इति जगद्गुरुश्रीसदानन्दाचार्योक्तेश्च "भक्त्यात्वनन्यया शक्यमहमेवं विधोऽर्जुन" इति स्मृतेः । "नायमात्माप्रवचनेन लभ्योनमेधया नबहुधा श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुंस्वाम्" "मुमुक्षुर्वैशरणमहंप्रपद्ये" इत्यादि श्रुतेश्च ।

तदेवं परीक्षकाणां विप्रतिपत्तौ सत्यां निर्णायकप्रमाणाभावेन संशयानाः पुरुषामोक्षाय न घटमाना भविष्यन्ति, इति मोक्षमार्गाद्विभ्रष्टा अनर्थमेव प्राप्नुयुर्यावत्पर्यन्तं स्वरूपतः प्रमाणादितश्चात्मा परमात्मा च न निर्णीयेत । इति तयोः सपरिकरयोर्निर्णयाय प्रकृतविचारः प्रस्तूयते ।

यद्यपि, आत्मपरमात्मनोः स्वरूपतः प्रमाणतः परिमाणादितश्चभगवताव्यासेन ब्रह्मसूत्राणिनिर्मितानि । तेन सूत्रजातेन तयोरात्मपरात्मनोः स्वरूपप्रमाणपरिमाणादिभिर्निर्णयः कृत एव तथाऽनैकैः प्राचीनाचार्यैस्तादृशसूत्रार्थनिर्णायकश्रीबोधायनवृत्तिप्रमिताक्षरा प्रमिताक्षरासार श्रीआनन्दभाष्यश्रीरघुवरीयवृत्तिप्रभृतिग्रन्था अपि निर्मायातीवतदीयप्रचारः कृत एव । ततश्च तदर्थमेव नवीनग्रन्थनिर्माणे भवदीयोऽयं प्रयासः सर्वथाऽनुपयुक्त एवेति । तथापि तदर्वाचीनैराचार्यटंकभर्तृप्रपञ्चशङ्करभास्करादिभिरर्वाचीनैरात्मानं पण्डितंमन्यमानैः स्वकृतव्याख्यानैः स्वाभिमतव्याख्यानेन सूत्रार्थमन्यथा प्रकल्प्यलोकान् कुमार्गान् प्रापिताः । विमार्गगता लोका मोक्षात् विभ्रष्टा भविष्यन्ति, अनर्थं च प्राप्नुयुरितिमत्वा समस्तपूर्वाचार्यप्रपञ्चितसूत्रवृत्तिभाष्यव्याख्यानादिसाराणां यथा वदर्थं कर्तुमयं विचार आवश्यक इति तदर्थमक्षरतः स्वल्पोऽर्थतोगंभीरोऽयं विचारग्रन्थ आरभ्यते ।

प्रत्यक्षप्रमाणमहं स्थूलोऽहं कृशः, इत्यत्र स्थूलत्वकृशत्वयोर्देहधर्मत्वस्य सिद्धतयाः तत्रैवदेहेऽहंत्वस्यापि सामानाधिकरण्यानुभवाद्देह एवात्मा । अहं जानामीति प्रतीतौ

“यथाजीवात्मविषये चार्वाकादारभ्य वेदान्तमतपर्यन्ततत्तद्वादिनाम्” इत्यत आरभ्य तदर्थमक्षरतः स्वल्पोऽर्थतो गंभीरोऽयं विचारग्रन्थ आरभ्यते एतत्पर्यन्तमूलग्रन्थोऽतिरोहितार्थकः पाठकैः स्वयमेव विचारणीय इति ।

आत्मनि परमात्मनि चानेकप्रकारिका विप्रतिपत्तयः स्वरूपविषये प्रनाणादिषुच प्रदर्शिताः पूर्वम्, तासां निराकरणाय, एकैकस्य मतं प्रदर्श्य तन्निराकरणेन स्वमतं सिद्धान्तितं-स्यादित्याशयेनाग्रिमप्रकरणारंभंकर्तुं स्वमतं सिद्धान्तभूतं च प्रदर्शयितुमुपक्रमते **प्रत्यक्षप्रमाणमहं स्थूलोऽहंकृशः** इत्यत्रेत्यादि । अत्र प्रथमतश्चार्वाकमतनिरसनाय “अभाव ज्ञाने प्रतियोगिज्ञानस्य कारणत्वमिति नियमंनिर्वाहयितुं प्रथमतश्चार्वाकमतं संक्षेपेण प्रदर्श्यते “प्रत्यक्ष प्रमाणमित्यादि” तन्मते ज्ञाते एव तदीयं मतं सुलभतया निराकृतं भवेत् । सिद्धान्ते जीवात्मा शरीरेन्द्रियमनः प्राणविज्ञानेभ्योभिन्नः स्वयं प्रकाशो नित्योऽणुः प्रतिक्षेत्रं भिन्नः स्वतः सुखी, अर्थात् स्वरूपत एवानुकूलप्रकाशस्वरूपसुखावान् सुखस्वरूप इति यावत् । अथवा स्वभावत आनन्दित्वम्, दुःखादिकं तु कर्मरूपौपाधिकमिति । तत्र शरीरभिन्नआत्मा” इत्यसहमानश्चार्वाकः पूर्वपक्षयति । न देहभिन्नोजीवोऽपितु प्रत्यक्षप्रमाणेन देहरूप एव सिद्ध्यतीति तत्राह **प्रत्यक्ष प्रमाणम्** इत्यादि——

तथाहि, अत्र संक्षेपतस्तन्मतमित्थम्—यावज्जीवेत्सुखंजीवेन्नास्तिमृत्योरगोचरः । भस्मीभूतस्य देहस्य पुनरागमनं कुतः” इति । लोकगाथानुरोधेन नीतिशास्त्रकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ, धर्ममोक्षौ तु न पुरुषार्थौ तयोर्भीरुपुरुषसंभतत्वात् । कामादिकमेव पुरुषार्थमन्यमानाः प्रायः सर्वे

ज्ञाताऽत्माहमित्येवक्रमेण प्रकाशते, देह एवाहङ्कारविषयः स्थूलोहंकृशोहमिति प्रतीति दर्शनात्। स्थूलत्वादिकं च शरीरीधर्मः। अतः स्थूलत्वादि समानाधिकरणतया ज्ञायमानोहङ्कारो देहविषयक एव। अन्यथा व्यवहारविलोप एव भवेत्।

एव तथा भूता एव परिदृश्यन्ते। एतन्मते पृथिव्यापस्तेजो वायुरूपाणिचत्वारि भूतान्येव तत्वान्यभिमतानि। एतेभ्यो भूतेभ्य एव शरीराकारेण परिणतेभ्यश्चैतन्यं समुत्पद्यते, किण्वादिभ्योमदशक्तिवत्। यथावा क्रमुकतांवूलादिद्रव्याणां समवाये विलक्षणोरक्तिमा जायते। यद्यपि प्रत्येकतांवूलादिषुरक्तिमोत्पादकत्वं नास्ति तथापि तत्समुदितेभ्यस्तथा भवति। दथैव प्रत्येकपृथिव्यादिषु चैतन्यानुपलंभेपि तत्समुदयात्तदुत्पत्तौवाधकाभावात्। तथैतादृशदेहाभावेचैतन्याभावोपिजायते। नचैतन्मतमवैदिकं श्रुतावप्येवं श्रवणात्, "विज्ञानघनएवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति" इति श्रुतिरेव चैतन्यविशिष्टाहमास्पदं शरीरमेवात्मेति वदति। ननु देहातिरिक्तः कश्चिदिहलोकयात्रा निर्वाहक आत्मा विद्यते। तादृशात्मप्रतिपादकप्रमाणाभावात्। प्रत्यक्षमात्रस्यैव प्रमाणत्वात्। ननु यथा पर्वते वन्हिसत्त्वज्ञापकप्रत्यक्षप्रमाणास्याभावेपिधूमदर्शनलिंगेनाप्रत्यक्षस्यापि वन्हेः सत्त्वमनुमानं ज्ञापयति तथैव प्रकृते देहातिरिक्तात्मज्ञापकं स्यादिति चेन्न, अनुमानस्य व्याप्तिज्ञानाधीनत्वेन तादृशस्याव्याप्तिनिर्णयः प्रत्यक्षेण प्रमाणान्तरेण वा ? तत्र नाद्यः प्रत्यक्षदृष्टवन्हिधूमयोर्व्याप्तिनिश्चयेपि, परोक्षसाध्यहेत्वोस्तदसंभवेनानुमानस्य तत्राकिञ्चित्करत्वात्।

नापि प्रमाणान्तरमिति द्वितीयपक्षः प्रमाणान्तरस्य स्वीकारे प्रमाणाभावात्। तत्रानवस्था दोषग्रस्ततयानानुमानम्, तदधीनत्वात्, शद्वादीनां प्रामाण्यंतु दूरापेतमेव। परिशेषात् प्रत्यक्षमात्रमेव प्रमाणम्। तच्चाहं स्थूलोहं कृश इति, अहंत्वसामानाधिकरण्येन ज्ञायमानश्चैतन्य विशिष्टं शरीरमेवात्मेति विनिवेदयति। तस्मादेह एवात्मेति न ततो व्यतिरिक्तः स इति। एवञ्च कलत्रकनकमालादिविषयसम्पर्कजनितसुखप्राप्तिरेव मोक्षरूपः परमपुरुषार्थः। नच लौकिक सुखस्य स्वस्वकारणपराधीनतया तथा दुःख संमिलिततया कथं पुरुषार्थत्वमिति वाच्यम्, भावानवबोधात्, अयं भावः यद्यपि सुखमात्रं दुःखाघ्रातं तथापि तत्र यद्यद् दुःखप्रयोजकं तदंशं परित्यज्य सुखमात्रस्यैव भोक्तव्यत्वात्, अवर्जनीयतया यज्ञगतं तदंशस्य परिहारयुक्तः। यथा धान्यार्थी स पलानानिधान्यान्याहरति। तत्र यावानंशः सफलस्तावदेवाददाति। इतरांशं च परित्यजत्येव, तथैवेहापि। तस्माद्दुःखभयान्नानुकूलवेदनीयं सुखमपि परिहातव्यम्। "नहि मृगाः सन्तीतिशालयोनोप्यन्ते, भिक्षुकाः सन्तीति स्थालयोनाधिश्रियन्ते "इति लोकाचारात्। अनिष्टप्राप्तिभयादिष्टस्यापि परिहारोनोचित इति। तदुक्तम् "त्याज्यं सुखं विषयसंगमजन्यपुंसां दुःखोपसृष्टमिति

मूर्खविचारणैषा। व्रीहीन् जिहासति सितोत्तमतण्लाढयान्कोनामभोस्तुपकणोपहितान् हितार्थी" इति। न च पारलौकिकसुखाभावे तादृशसुखोद्देशेन विदुषां प्रवृत्तिः शास्त्रविधिश्च निरर्थक एवभवेदिति वाच्यम्? इष्टापत्तेः कश्चिद् धूर्तपण्डितस्वयं वञ्चितः परान् व्यामुह्यवित्तव्यय साध्यकर्मणि तान् प्रेरयति, स्वकीयलाभामाकल्य। वेदस्तु प्रमाणमेव न भवति, अनृतव्याघात दोषदुष्टत्वात्। "पुत्रकामः पुत्र्येष्टयायजेत" इति श्रूयते। तथा श्रुत्वा प्रवर्तमानोपि जनः तत्फलं पुत्रप्राप्तिलक्षणं न प्राप्नोतीति वेदस्यानृतत्वम्। एवम् "अतिरात्रे षोडशिनं गृह्णाति" इति विधाय पुनः "नातिरात्रे षोडशिनं गृह्णाती"ति निषेधकरणेन न वेदस्य प्रामाण्यम्। तथा "वेदस्य वर्णराशि रूपतयावर्णस्यचोत्पादविनाशशालितयातत्समुदायात्मकवेदस्याप्यनिन्यत्वेन न प्राण्यम्। न च वेदोनित्यः श्रावणत्वात् शद्बत्ववदित्यनुमानेन तस्य नित्यत्वमिति वाच्यम्। वेदोऽनित्यःकार्यत्वाद् घटादिवदित्यनुमानेन पूर्वानुमानस्य प्रतिपक्षितत्वात्। किञ्च वेदस्याप्रमाण्यमीश्वरोच्चरितत्वेन, ईश्वरसिद्धिश्चवेदादित्यन्योन्यात्, न वेदस्य प्रामाण्यम्।

अपि च तदनुयायिनामपि वेदस्य प्रमाण्ये परस्परं वैमत्यमेव दृश्यते। यथा कर्मकाण्डप्रवर्तका अध्वरमीमांसकादयः प्रतिक्षिपन्ति समुपासकम्, उपासनाकाण्डरतास्तान् प्रतिक्षिपन्ति, इत्युभययोः प्रतिक्षेपेन तदुभयभागस्य प्रामाण्यमर्थत आपतत्येवनातोवेदस्य प्रामाण्यं तदप्रामाण्ये तत्प्रतिपादितक्रिया विधीनां कथं प्रामाण्यं कश्चिन्मन्वीत। इति वेदस्य धूर्त प्रलापमात्रत्वमेव तथा विधास्तेष्वेषामाजीविकार्थमेवाग्निहोत्रादीनां निरूपणं तत्र कृतवन्तः। तस्मात् प्रमाणान्तराभावात् प्रमाणाभिमतप्रत्यक्षेण देहस्यैवात्मत्वप्रतिपादनाच्चैतन्यविशीष्ट देह एवात्मा। यथा वनितादिसंगमजनितसुखं स्वर्गोऽपवर्गोवा, तथैव कण्टकवेधजनितं सर्पादिजनितं दुःखमेव नरकयातना। एतेषां यथायथं लौकिकप्रत्यक्षेण सिद्धत्वात्। यन्मते प्रत्यक्षातिरिक्तं प्रमाणान्तरं तन्मतेऽपि तदितरसर्वप्रमाणान्तराणां प्रत्यक्षोपजीवित्वेन प्रत्यक्षाधीनत्वमेवेति सर्वतो ज्येष्ठत्वेन प्रत्यक्षस्यैव सर्वेभ्य प्रावल्यमिति तद्विरोधेन तेषां दुर्बलत्वेन प्रत्यक्षेण वाधितत्वात्, दुर्वलस्य वाध्यत्वं प्रबलस्य वाधकत्वमिति सर्वसंमत्वादिति।

तथा प्रदेशनियन्तायो भवति राजेति पदवाच्यः स एव परमेश्वरोतिग्रहानुग्रहकरणे समर्थः नतु तदतिरिक्तः स्वमनीषा कल्पितस्तत्साधकप्रमाणाभावात्। अस्य च मातापितृजनितशरीरस्यात्यन्तोच्छेद एव मोक्षः। नचायं देहवादोऽप्रामाणिकः? स्थूलोऽहं कृशोहमित्यादिप्रत्यक्षप्रतीतेरेव प्रमाणत्वात्। अहमित्याकारका प्रत्यये आत्मा प्रकाशते, स्थूलोऽहमित्यादौच स्थूलत्वादिकमहंत्वसामानाधिकरण्येन च भासत इति स्थूलत्वादिविशिष्टोदेह एवाहं पदवाच्यतयाऽऽत्मेति निश्चितो भवति। नच देहस्यात्मत्वे "ममदेह" इति प्रतीतिः कथं स्यात्, "ब्राह्मणकम्बल" इत्यादौ सर्वत्रषष्ठी विभक्तेर्भेदस्थले एव दर्शनात्, इति वाच्यम् "राहोः शिरः" इति वदत्रापि षष्ठीविभक्ते

रौपचारिकतयापि समन्वयसंभवात् । यथा राहुशिरसोरभेदेपि पष्ठी प्रयोगो न वाधितो भवति तथैव प्रकृतेपि देहात्मनोरभेदेपि पष्ष्ठीप्रयोगो न दोषाय भवतीति प्रमाणसिद्धत्वात् । यत्र सम्वन्धिनोरभेदो न प्रमाणसिद्धस्तत्रैव षष्ठीतयोर्भेदमावेदयति नतु सर्वत्र । अथवा पष्ठीसर्वत्रभेदे एव भवतीति न नियमः किन्तु तादात्म्येपिषष्ठीप्रयोगो दृश्यते । यथा "देवदत्तस्य गन्तुः" इत्यत्र देवदत्तगंत्रोरभेदएव, देवदत्ताऽभिन्नोगन्तागमनकर्त्ता, नतु देवदत्तातिरिक्तः कश्चिदन्योगमनकर्त्ता भवति तस्यैवगन्तृत्वादिप्रकरणतोलाभादिति । न च यदि देह एवात्मा, तदा " अहं जानाम्यहमिति प्रत्ययः कथं स्यात् ? अत्र शरीरस्यानेकावयवविशिष्टस्याहं पदशक्यत्वे, तदाऽनेकानां तदवयवानामपि, ज्ञानमापद्येत, घटप्रत्यक्षे घटावयवप्रत्यक्षवत् । ततश्च "अहं जानामींति प्रतीतौ देहरूपात्मवत्, देहावयवा अपि भासेरन्, नत्वेवं भवति, तस्मान्न देह आत्मा किन्तु देहातिरिक्त एव कश्चिदात्मेति वाच्यम्, अनेकावयवस्य वाह्यप्रत्यक्षे एव तदवयवानां प्रत्यक्षेति नियमस्य स्वीकारात् । नत्वान्तरप्रत्यक्षस्थलेपीति । अन्तरप्रत्क्षस्यतु, आन्तरगुणावभासे एव सामर्थ्यनियमात् । अपिच "सावयव द्रव्यप्रत्यक्षे तदवयवानां प्रत्यक्षमावश्यकम्" इति नियमस्वीकारेत्र्यसरेणुप्रत्यक्षे व्यभिचार आपतति । तथाहि त्र्यसरेणोर्द्व्णुकादितदीयावयवगत त्रित्वादिसंख्यया महत्वं समुत्पद्यते "संख्यातः परिमाणाच्च प्रचयादपि जायते परिमाणमिति नैयायिकनियमात् अवयविनि परिमाणं कारणत्रयेण भवति क्वचित् संख्यातः परिमाणं जायते क्वचित् परिमाणेन, क्वचित् प्रचयात् । तत्र "प्रचयः शिथिलाख्योयः संयोगस्तेन जायते परिमाणं तूल पिण्डादौ, अर्थात्, तूलपिण्डादौ यन्महत्परिमाणं समुत्पद्यते, तत् शिथिलाख्यसंयोगेन जन्यते घटाद्यवयविनि तत्कारणकपालगतपरिमाणेन परिमाणं जायते । त्र्यसरेणौ तु न कारण परिमाणोत्पत्तिस्तत्कारणद्व्यणुकपरमाण्वोरतीन्द्रियत्वात् । किन्तु द्व्यणुकगतसंख्ययात्र्यसरेणौ महत्परिमाणं समुत्पद्यते । ततश्च प्रत्यक्षे इन्द्रियसंनिकर्षमहत्वस्यच कारणत्वागवगमात् । एवञ्च चक्षुः संनिकर्षेमहत्वेच सतित्र्यसरेणोः प्रत्यक्षं जायते । तत्कारणावयवद्व्यणुकपरमाण्वोर्महत्वा भावेन यथोक्तनियमस्य व्यभिचारो विद्यते एव । अर्थात् द्रव्यग्राहकेन्द्रियस्य योग्यसंनिकृष्ट द्रव्यगुणग्राहकत्वमिति नियमस्तथा चातिरिक्तात्मवादे यथा संख्यादीनामात्मगुणानां कालादि संयोगानामात्मसंमवेतानां विद्यमानत्वेपि योग्यत्वाभावादेवान्तरेण मन इन्द्रियेण ग्रहणं न भवतीति स्वीक्रियते, तथैव देहात्मवादपक्षेपि देहात्मसंभवे न रूपादिगुणस्यमनसाऽग्रहणंदण्डवारितं भवेदिति । न च रूपवद्रव्यस्य चाक्षुषप्रत्यक्षे स्वसमवायिसमवेतत्वसम्वन्धेन रूपादि ग्रहणं भवतीति नियमः स्वीक्रियते इति वाच्यम्, घटादिस्पार्शनप्रत्यक्षे व्यभिचारात् । अर्थात् तत्र केवलं घटस्यत्वगिन्द्रियग्रहणं भवति परन्तु तत्र रूपस्यकारणत्वं न भवति किन्तुत्वगिन्द्रियसंयोगस्यैव कारणत्वं नतु रूपस्य कारणत्वमिति । तथैव प्रकृतेपि वोद्धव्यम् । यथातत्र

एवं सति प्रत्येकस्मिन् परमाणौ ज्ञानानुपलब्धेः, तत्स्वीकारेतु एकस्मिन्नेव शरीरेऽनेकचेतनस्वीकारः प्रसज्येत। ततश्च "चैतन्यं न देहगतविशेषगुणोऽकारणपूर्वकत्वात्, चैतन्यं न शरीरविशेषगुणोऽयावद्द्रव्यभावित्वाद्वा" इत्यनुमानाभ्यां ज्ञानस्यदेहविशेषगुणत्वं निवारयाम इति वाच्यम्, अनयोरनुमानयोः प्रत्यक्षवाधितत्वात्।

प्रत्यक्षविषयसंख्यादिग्रहणनियमः। अर्थात देहातिरिक्तात्मवादे वाह्यप्रत्येक्षे एव द्रव्यग्राहकेन्द्रियचक्षुरादेस्तादृशद्रव्यगतसंख्यादिग्राहकत्वं भवतीति नियमस्तथैव देहात्मवादेपि वाह्यप्रत्यक्षे एव द्रव्यग्राहकेन्द्रियस्य संख्यादिग्राहकत्वमिति।

गतग्रन्थेन "अहंजानामीत्यादिं" प्रत्यक्षस्य शरीरात्मविषयकत्वं प्रतिपादितवान् देहात्मवादी। ये च प्रतिवादिनोऽनुमानद्वारादेहस्यात्मत्वंनिरौति, तादृशानुमानस्य वाधनायोपक्रमते **एवं सति प्रत्त्येकस्मिन् परमाणा**वित्यादि। भवतुनामाहं जानामीत्यादि प्रत्यक्षदेहात्मवाद समर्थकत्वं परन्त्वनुमानेनतु देहस्यात्मत्वं निराकरोमि **ततश्चैतन्यं न देहगत विशेषगुणः** इत्यादिकमनुमानम्। योहि चेतनस्य विशेषगुणः सकारणगुणपूर्वकः अयंतु चैतन्यगुणो नदेहस्य देहकारणपरमाणौ तदभावात्। तथात्वेदेहे एकत्रानेकात्मप्रसङ्गात्, तथाऽयावद्द्रव्यभावित्वात् कार्य द्रव्यस्य विशेषगुणो न यावद्देहभावीमृतदेहे तदभावात्। तस्माद्देहगुणो न चैतन्यम्। ननु नभवतु देहारंभकपरमाणौ चैतन्यं येनात्मवहुत्वप्रसङ्गो भवतु, घटाद्यकारणपूर्वकोरूपादिः पिलुपाकवादिमते पाकजो दृश्यते तथैवात्रापि स्यात् तद्वदेव चैतन्यमिहस्यात्तत्राह **अयावद्द्रव्यभावित्वात्**। अर्थात् कार्यद्रव्ये यावद्द्रव्यभावी दृश्यतेऽयंतु न तथा। तथाच कार्यद्रव्यविशेषगुणत्वं व्यापकं स्वसमवायिसमवायिवृत्तिसजातीयगुणासमवायिकारणकत्वरूपं कारणगुणपूर्वकत्वम्, इति व्यापकाभावे च व्याप्यस्याप्यभाव इति नियमेन प्रकृते व्यापकनिवृत्या च ज्ञानेदेहविशेषगुणत्वस्य भावो भवति। द्वितीयानुमाने च यो यः कार्यद्रव्यविशेषगुणः स सर्वोपि यावत्पर्यन्तं द्रव्यस्यावस्थानं भवति, इति सामान्यव्याप्तिः पिलुपाकवादिमते ज्ञेयम्। एतन्मतं दूषयति देहात्मवादी तत्राह **अनयोरनुमानयोरि**ति। दूषणप्रकारं वदति **प्रत्यक्षवाधितत्वादि**ति। यत्र प्राबल्यदुर्वलभावस्तत्र प्रवलस्य दुर्वलेनवाधोनैव भवति, प्रत्यक्षमुपजीव्यतयाऽनुमानात्प्रवलमिति प्रत्यक्षवाधितविषयतानोदेत्यनुमानादितिनानुमानेनप्रत्यक्षवाधोऽपितु विपरीत एव। प्रत्यक्षेण देहे एव चैतन्यस्य निवेदनादिति। एवञ्च यथा अकारणगुणपूर्वकाणामयावद्द्रव्यभाविनां विशेषगुणभिन्नानामपि संयोगविभागद्वित्वादिसंख्यानां शरीरगुणत्वदर्शनेन "चैतन्येनदेहस्य विशेषगुणः तन्निष्ठविशेषगुणान्तरवैधर्म्यादित्याद्यनुमानेनापि चैतन्ये शरीरगुणत्वस्याभावोनैव साधयितुं योग्यः शरीरे एव ज्ञानस्योपलंभात् संयोगादिवदेव। अथवा उपर्युक्तहेतुत्रयेण देहविशेषगुणत्वस्य निषेधेपिक्षत्यभावात्। पारिभाषिकमेवात्र विशेष गुणत्वमभिमतम्, भावनाख्यसंस्कारभिन्नोयोवायुवृत्तिस्पर्शावृत्तिधर्मसमवायी-

प्रत्येकपरमाणौ चैतन्यानुपलब्धेः तत्स्वीकारे सहचेन प्रसङ्गात् । ज्ञाने विशेषगुणत्व प्रतिषेधे देहगुणत्वप्रसङ्गात् । किंचेच्छानुविधायिक्रियत्वेन्द्रियत्वादिकाः शरीरे एवोपलभ्यन्ते ते अचेतनघटादिभ्योऽत्यन्तं व्यावर्तमानादेहमेवात्मानं गमयन्ति । यथा क्रमुकताम्बुलावयवेषु प्रत्येकमविद्यमानोऽपिरागो यथा संयोगविशेषाज़्जायन्ते, तथैव देहोत्पादकपरमाणुषु विलक्षणसंयोगादेव, यथावा किण्वेभ्योमदशक्तिवत् देहेचेतनो-

तद्भिन्नत्वे सति गुरुत्वाञ्जलद्रवत्वान्यगुणत्वं तदेव विशेषगुणत्वमित्यत्र गुरुत्वादेरेव ज्ञानादेरप्यन्यत्वं प्रतिक्षेप्यमिति ।

किंचेच्छानुविधापि क्रियत्वेन्द्रियत्वादिका इत्यादि । अयंभाव यदिकदाचिदकारणपूर्वकत्वादयावद्रव्यभावित्वादिगमकहेतूनामप्रयोजकत्वकथनात् देहगुणत्वस्य ज्ञाने प्रतिषेधेपि न कापि क्षतिरित्याशयेन कथितम् **किंचेत्यादि** यदि देहविशेषगुणान्तरवैलक्षण्याद्वैधर्म्याद्वाज्ञानस्य देहविशेषगुणत्वं निराकर्त्तुं समाद्दसे तदा सम्प्रतिचैतन्यरहितघटपटादिवैधर्म्यादेहस्यज्ञानगुणत्वमेवलाघवान्स्वीक्रियताम् । **इच्छानुविधायिक्रियत्व**मित्यस्य साक्षादिच्छाधीनप्रवृत्तिमत्वं शरीरस्येत्यर्थः । घटादिवाह्यपदार्थानां तु शरीरव्यापारद्वारकमेवेति देहोज्ञानवान्, इच्छानुविधायिक्रियात्वात्, इन्द्रियत्वाद्वा, यन्नैवं तन्नैवं यथा पटादिद्रव्यम्, इतिव्यतिरेक्यनुमानेन शरीरे चेतनावत्वमपि साधनीयमिति । **यथा क्रमुकताम्बूलावयवेषु** इत्यादि । क्रमुकसुपारीति प्रसिद्ध संमिश्रितकत्थकादियुक्तताम्वूलपत्रस्यमुखे प्रक्षिप्तस्य दन्तचर्वितस्य पूर्वावयवविनाशेतदवयवानां संश्लेषविशेषेण निष्पन्नपिण्डितावयविनि, अवयवेऽविद्यमानमपिरक्तंरूपंसंवन्धविशेषत एवोत्पद्यते नतु तदवयवे पूर्वं रक्तमासीदितिकार्यद्रव्यविशेषगुणत्वस्य कारणगुणपूर्वकत्वमेव रक्ततन्तुत्वम् न रक्तवस्त्रवदितिव्याप्तौ व्यभिचारादेव सा व्याप्तिर्निराक्रियते इति ।

न च यथागोभुक्ततृणादीनां तदीयौदर्येणवह्निसम्बधेन परमाण्वन्तभंगे तृणावयवपरमाणौ पाको भवति, ततश्च यादृशं रूपरसादिकं तादृशपाकजनितपरमाणुषुरूपरसादिकं जायते । ततो भोक्तुर्भाग्यवशात् परमाणूनां संयोगे दुग्धादिकमुत्पद्यते, तथैव प्रकृते दन्तसंघट्टनेनतांवूल पत्रस्य पूर्वावयवविनाशे पुनः स्वतंत्रपरमाणुषु चर्वणजनितमुखाग्निलक्षणपाकवलेनरक्तरूपंतत्रोत्पंद्यते इति कल्प्यते इति कार्यद्रव्यगतगुणस्यकारणपूर्वकत्वनियमस्यपिलुपाकवादिमतेन न व्यभिचारो भवतीति वाच्यम्—प्रमाणाभावात् । अर्थादत्र सम्बन्धविशेषस्यैव रूपान्तरजनकत्वम् । नतुपाकाद्रूपान्तरम्, यथा हरिद्राचूर्णे सुधाजलसंयोगेन रक्तरूपजनकत्वं दृश्यते । तथा प्रकृततांबूलादिषु रूपान्तरोत्पादसंभवेन पाककल्पनायां गौरवात् । अत एव न्यायनये अवयविन्येव पाकः स्वीकृतः कल्पनागौरवं पश्यन्निति व्यभिचारो दुरुद्धर एवेति । पिलुपाकवादे भवतः श्रद्धातिशयमनुरुध्य "कार्यद्रव्यगतगुणस्य कारणगुणपूर्वकत्वमिति नियमस्य स्थलान्तरे व्यभिचारं

त्पत्तेर्नानुपपत्तिः स्यात् । अपिच शुक्लनीलादितन्तुषु अविद्यमानमपि चित्ररूपं यथोक्ततन्तुजनितपटावयविनिचित्ररूपं जायमानं चित्ररूपकारणगुणसजातीयमेव कारणगतरूपं कार्ये सजातीयगुणोत्तरमुत्पादयतीति नियमोपि व्यभिचरित एव । अपि दर्शयितुमाह **अपिच शुक्लनीलादितन्तुषु** इत्यादि । चित्रपटस्थलेऽवयवेषु नीलपीतादिकमनेक रूपमिति तादृशकारणेनावयविपटंचित्रं जायते । न च तत्र कारणगुणपूर्वकत्वमवयवरूपाणां परस्परं विरोधात् । नवा चित्रपटस्थलेऽवयवेषु पाकसंभवः नवाऽवयवेषु चित्ररूपम् । एवञ्चावयव विशेषगुणनीलादेःस्वसजातीयावयवगुणपूर्वकत्वमिति नियमस्य स्पष्टो व्यभिचारः । अत्र साजात्यं रूपत्वव्याप्ययजात्यैव विवक्षितम् । नतु रूपत्वजात्या अन्यथानीलतंतुना शुक्लपटोपि जायेतेति । अर्थात् शुक्लनीलादिकारणगुणेषु प्रत्येकमविद्यमानमपि चित्ररूपं तादृशगुणविशिष्टपटेऽवयविनि चित्ररूपं विलक्षणमेव समवैत्येवेतिकार्यगतगुणपूर्वकत्वमिति नियमस्य व्यभिचारो भवत्येव । अथैवमपि चित्रनामकं रूपान्तरमेव नास्ति तादृशचित्ररूपस्वीकारे प्रमाणाभावात् । नच नानारूपविशिष्टतन्तुभिरुत्पादितश्चित्रघटोरूपरहित एव भवतु, शुक्लादिरूपादेर्व्याप्यवृत्तित्वनियमेनाव्याप्यवृत्तिनानारूपवत्वस्यावयविनि पटे स्वीकारासंभवादिति वाच्यम् स्वसमवायिसमवेतत्वसम्बन्धे नैवावयवरूपेणैवावयविनश्चित्रपटस्य चक्षुषा प्रत्यक्षसंभवेनावयविनश्चित्रपटस्य रूपराहित्येप्यनुपपत्तेरभावात् । न च समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेनोद्भूतरूपस्यैव द्रव्यचाक्षुषप्रत्यक्षे कारणत्वमिष्यते इति वाच्यम् तथा सति सर्वस्यैव कार्यद्रव्यस्य नीरूपत्वप्रसङ्गपातात्, कारणगतरूपेणैव सर्वत्रकार्यद्रव्यस्य प्रत्यक्षसंभवेन कार्येऽवयविनि रूपस्वीकारो निरर्थक एव स्यात् । न चेष्टापत्तिः अनुभवविरोधाच्च । अर्थात् साक्षादेवकार्यद्रव्येरूपवत्वमुपलभ्यते, तथा घटोरूपवानिति व्यवहारोपि भवति, तयोस्तादृशानुभवव्यवहारयोः सर्वजनीतत्वेनाबाधितत्वमेव ज्ञायते । तस्मात्कार्यद्रव्यस्य नीरूपवत्वं नेष्टापत्त्यास्वीकर्तुंशक्ष्यति कोपि । तथा चित्रपटेपटोऽयमित्यबाधितव्यवहारेणापि चित्रंरूपं स्वीकर्त्तव्यमेव । किञ्च यदि समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन द्रव्यचाक्षुषे लाघवात्कल्प्यते तदा ततोपि अधिक लाघवेन स्वसमवायिसमवेतत्व मात्रस्यैव कारणत्वं भवतु ? तथा स्वीकारेऽणौ महत्वाभावेन त्र्यसरेणोश्चाक्षुषत्वं न स्यात्, यतः त्र्यसरेणो कारणे द्व्यणुके महत्वाभावात् । एवं लाघवात् यथोक्तनियमादरेतु लाघवाद् घटमात्रस्यैकत्वं मन्यताम् नानाघटस्वीकारे गौरवादित्यादिकं सर्वमन्यत्र द्रष्टव्यम् । तस्मादतिरिक्तं चित्ररूपमवश्यं स्वीकर्तव्यमेव तत्र कार्यद्रव्यगतगुणस्य कारणगुणपूर्वकत्वे व्यभिचार इति । नन्ववयवगतनानाशुक्लादिरूपैरवयविन्यव्याप्यवृत्त्येव कार्ये नाना रूपं कार्ये स्वीक्रियताम्, "व्याप्यवृत्तिजातीयकानामव्याप्यवृत्तित्वेविरोध" इति नियमस्य प्रायिकत्वादिति चित्रपटे न यथोक्तनियमस्य व्यभिचार इत्याशङ्क्य स्थलान्तरे कार्यद्रव्यगतगुणस्य कारणगुणपूर्वकत्वव्यभिचारं दर्शयितुमाह **अपिच करकाद्रव्यनिष्ठ** इत्यादि ।

च करकाद्रव्यनिष्ठविशेषगुणः काठिन्यमकारणपूर्वकं दृश्यते इति व्यभिचारोपीति ।

अथ ज्ञानविषयस्यशरीरस्य द्रष्टृत्वं कर्तृत्वं कथम् ? एक क्रियायामेकस्यैव कर्तृत्व

जलजातीयककरकाद्रव्यस्य तदवयवसंयोगविशेषेणुारंभकसहकारिं, अदृष्टादिसहकारि कारणवैचित्र्यात् द्रव्यत्वगुणविरांहतस्य कठिनस्पर्श एवोपलभ्यते, सच कठिनस्पर्शो न कारणगुण पूर्वकः तत्समवायिकारणजलीयपरमाणुषु कठिनस्पर्शस्याभावात्, कठिनस्पर्शस्तु पृथिवीपरमाणुगत एव । अत एव केचनकरके पृथिवीत्वमेव नतु जलत्वमिच्छन्ति । ततश्च करककार्यगतकठिनस्पर्शस्य कारणगतपूर्वकत्वंनास्तीति पूर्वनियमे व्यभिचारावश्यंभाव एव । नचावयवगतसंयोगविशेष एव कठिनत्वं नतु स्पर्शात्मकगुणान्तरमिति वाच्यम् काठिन्यस्य संयोगविशेषरूपत्वाभावात् संयोगस्यानेकनिष्ठत्वनियमात् कठिनत्वस्य तु करकमात्रवृत्तित्वात् । अर्थात् अवयवसंयोगविशेपस्य काठिन्यरूपत्वे तादृशसंयोगरूपस्य तस्यावयविन्यवर्तमानत्वेन कठिनं करकद्रव्यमित्याकारकप्रतीतिर्व्यवहारश्च न कथमपि समुपपादितःस्यात् । काठिन्यं संयोगविशेष एवेति कस्यचिन्मतमाश्रित्य यदिकाठिन्यस्य रूपत्वमापाद्येत, तदा तत्र वच्मि, यत् यदिकाठिन्यं संयोगात्मकस्तदाचक्षुरिन्द्रियग्राह्यद्रव्यघटादिगतसंयोगविभागादीनामपि चाक्षुषग्राह्यत्वनियमेन काठिन्यस्य संयोगरूपस्य चक्षुरिन्द्रियेणापि ग्रहणमापद्येत, नत्वेवं भवति किन्तु स्पर्शविशेष एव काठिन्यं तच्च त्वगिन्द्रियमात्र ग्राह्यम् "त्वगिन्द्रियग्राह्यो गुणः स्पर्श" इति तल्लक्षणात् । किञ्च काठिन्यं यदि संयोग विशेषस्तदा कन्दुकादीनां चाक्षुषे जाते तद्गतसंयोगविशेपरूपस्यापि चक्षुसा गृहीतत्वात्, पुरोवर्त्तिकन्दुकप्रस्तरादिद्रव्यं कठिनं कोमलंवेति संशयानस्य संयोगविशेषस्य तस्यचक्षुषा निर्णीततया संशयाभावः स्यात् परन्तु भवति संशयस्तस्मात् काठिन्यं न संयोगात्मकमपितु स्पर्शविशेषात्मकमेवेति । अतएव तस्य संयोगरूपत्वेउपर्युक्तदोषविशेषमाकलय्यवैशेषिकमुनिः काठिन्यस्य स्पर्शविशेषरूपत्वमेवोदाजहारेति भावः ।

ननु "अहं देहं जानामिति प्रतीतिर्भवति । तत्राहमर्थोदेह एवात्मा, ज्ञानविषयोपि देह एव, स एव कर्मतयापि भासते, ज्ञानाश्रयः कर्त्ता ज्ञानविषयश्च कर्म । न चैतदुभयमेकत्रसंभवति, नहि भवति देवदत्तो देवदत्तं भवति । तत्कस्य हेतोः ? कर्तृकर्मभावस्यभेदघटितत्वात् भवति लोके प्रतीतिर्देवदत्तो ग्रामं गच्छतीति । अत्र गमनक्रियायाः कर्त्ता देवदत्त सचान्यः गमनक्रियायाः कर्मग्रामादिकः स च ततोऽन्यः । नतु भवतिप्रतीतिर्देवदत्तो देवदत्तं गच्छतीति । तत्कथम् । तत्रगमनक्रियायां प्रथमान्तपदोपस्थाप्यो देवदत्तः कर्त्ता स एव तस्यामेव क्रियायां कर्मतयापि भासते, स्वतन्त्रः कर्त्ता कर्म च तज्जन्यं नच जन्यजनकयोरेकत्वं भिन्नत्वात् । तथैवाहं देहंजानामीत्यत्रभेदाभावेनाभेदेकर्मकर्तृभावस्य विरुद्धत्वेनोक्तप्रतीतेः कथं सामञ्जस्यमित्याशङ्कां समाधातुमुपक्रमते जगदाचार्यः **अथज्ञानविषयशरीरस्येत्यादि ।**

कर्मत्वयोर्विरोधात्, नहि भवति घटोघटं पश्यतीति। न च तदा देहातिरिक्तवादे आत्मनि अहमिति प्रतीतिः कथमिति ? न च रूपभेदादेकत्रापि कर्तृत्वं कर्मत्वमित्युभयमपि स्यात्। तदा शरीरात्मवादेपि तदेवोत्तरमन्यत्राभिनिवेशात्। अपि च परसमवेतक्रियाजन्यफलभागित्वं कर्मत्वम्, इति स्वसमवेतक्रियाजन्यफलाश्रयस्य देहस्य मुख्यकर्मत्वमेवनास्तीति न कोपिदोषः। तथा च निरस्तसमस्तदोषत्वात् देह एवा-

कर्मान्यत् तदन्यश्च कर्त्ता अर्थात् क्रियायाः आश्रयः कर्त्ता क्रियाविपयश्च कर्मेति लोकस्थितिः। तदिहदेहात्मवादेनास्ति, परन्तु देह एव द्रष्टा स एव च कर्म, तच्च लोकविरुद्धमिति। नतु देहात्मवादातिरिक्तात्मवादेपि अहं स्वात्मानं जानामीति प्रतीतिः कथमेकस्यैव कर्तृकर्मभासमानतायाः स्वीकारात्। नच रूपभेदात् अर्थात् अतिरिक्तात्मवादे अहंत्वेनात्मनः कर्मत्वम्, मनः संयोगवत्वेन कर्तृत्वं ज्ञानक्रियायामित्येवं रूपभेदादुभयमपि घटते तेन न कोपि दोष इति वाच्यम् समानत्वादिदमुत्तरं देहात्मवादे। किञ्च यदा सर्पः स्वात्मना स्वात्मनं परिवेष्टयतीति एकस्यामेववेष्टनक्रियायां स एव सर्पः कर्त्ता भवति करणं कर्मापि भवति तथैवात्रापि देहात्मवादे एकस्यैव देहात्मनो दर्शनक्रियायां कर्तृत्वकर्मत्वंनोविरुध्ययते इति, किञ्च यादृशस्य गमनादि क्रियाकर्मत्वस्य गमनक्रिया कर्तृत्वेन विरोधोजायते, ततोऽतितरां विलक्षणं ज्ञानक्रियाकर्मत्वम्, तस्मादत्र न कोपि प्रकृते विरोधो भवतीति दर्शयितुमाह **अपिच पर समवेत** इत्यादि। स्वसमवेतज्ञानफलभागिन” इति। स्वनिष्ठज्ञाननिरूपितविषयतावतः, इत्येवार्थः स्वसमवेतज्ञानफलभागिनः। विषयोहि घटादिर्ज्ञेयपदार्थः तेषु विषयता विषयि च ज्ञानं तस्मिन् विपयता भवति, तयो निरूप्य निरूपकभावः सम्बन्धो भवति, तथा च विषयिता निरूपितविषयितेति विषयिता निरूपितेति विषयताया विषयिनिरूप्यत्वेन विषयतायां ज्ञानफलत्वस्योपचारमात्रं भवति न तु मुख्यं फलत्वमस्ति। तदेव कथितं यत् स्वसमवेतज्ञानफलभागिनो देहस्य मुख्यंकर्मत्वमेव नास्ति ततोनकोपि दोषावकाश इति।

अयमाशयः—परसमवेतक्रियाजन्यफलाश्रयत्वमेव मुख्यं कर्मत्वम् यथा ग्रामं गच्छति चैत्र इत्यत्र चैत्रसमवेतगमनात्मकक्रियाजनितग्रामाद्युत्तरदेशसंयोगलक्षणफलप्राप्तिरूपस्याश्रयता ग्रामे विद्यते इति ग्रामे यथोक्तकर्मलक्षणसमन्वयेन कर्मत्वं भवति, यद्यपि गमनजनितसंयोगात्मकफलस्य द्विष्ठत्वेन यथाग्रामनिष्ठत्वं तथैव चैत्रवृत्तित्वमपि विद्यते एवेतिं चैत्रेपि कर्मत्वापात इति चैत्रे प्रथमा निर्देशवत् द्वितीययापि कर्मत्वबोधिकया भाव्यम् न चेष्टापत्तिस्तथा व्यवहाराभावात्, तथापि समानतया संयोगात्मकस्य संभवेपि वैलक्षण्यात्। ग्रामे यत् संयोगाश्रयत्वं तत् चैत्ररूपपरसमवेतगमनक्रिया जनितसंयोगात्मकफलस्यानुयोगितासम्बन्धेन चैत्र तु चैत्रसमवेतगमनात्मकक्रियाजनितसंयोगात्मकफलस्य प्रतियोगिता सम्बन्धेन। यद्यपि संयोग एकरूपः संयोगत्वेन, तथापि

त्मा न ततो भिन्नः सर्वप्रमाणरहितः कपोलकल्पित आत्मेति । तथा च ‘‘पृथिव्यापस्तेजो वायुरिति तत्वानि तेभ्यश्चैतन्यमुपजायते किण्वेभ्योमदशक्तिवदिति । इति देहात्मवादे पूर्वपक्षः ।

अत्रोत्तरयति–देहोनात्मा संभवति, अहमिति प्रत्ययेदमिति प्रत्ययर्योर्भेदेन प्रति भासनात् । तत्र स्वात्मविषयकोऽहं प्रत्ययः स्वेतरविपयकश्चेदमिति प्रत्ययः । इमौ एकस्य पुरुपस्यैकस्मिन्नेवार्थे न घटते विरुद्धत्वात् । नहि देवदत्तादिर्दण्डविशिष्टस्वात्मानसंयोगस्यैकः प्रतियोगी भवति तदपरश्चानुयोगी भवति । तत्र योऽनुयोगितयाधिकरणं तत्र मुख़्यं कर्मत्वम् , तत्रैव कर्मत्वंव्यवहरन्ति वैयाकरणाः । चैत्रेकर्तरि तु नपरसमवेतक्रियाजन्यफलाश्रयता सत्यपि संयोगस्य सत्वे । अर्थात् चैत्रे संयोगाश्रयता प्रतियोगिता सम्वन्धेनैवेतिगमनागमनक्रियाजनिता । अयं विवेकः यत्रानुयोगितासम्वन्धेन परसमवेतक्रियाजन्यफलाश्रयतातत्रैव कर्मत्वस्य मुख़्यो व्यवहारः तदन्यत्रतु कर्तृत्वं वा अपादानत्वं वाऽधिकरणत्वंवेति शाद्विकानां समयः । न च कथं तर्हि ‘‘विहगो विहगं गछतीति प्रयोगस्यैव तत्र कर्तृत्वकर्मत्वभानादिति वाच्यम् , अपेक्षाभेदेन संभवात् । यत्र यदा कर्तृत्वमभिमतं तदन्यस्मिन् कर्मत्वं यत्र च कर्मत्वभिमतं तदन्यस्मिन् कर्तृत्वस्य साधुत्वं वोद्धव्यम् । विशेषतोऽत्रत्यो विचारः शाद्विकसम्प्रदायादेवावगन्तव्यः प्रकृते तद्विचारस्यानतिप्रयोजनत्वादितिदिक् । एवञ्च गमनादिक्रियास्थले मुख्यं कर्मत्वम् । ज्ञानादिक्रियाकर्मत्वंतु विषयविषयिभावलक्षणं गौणमेवकर्मत्वं मुख्यंतु प्रतीत्यादिवाधितमेवेति ।

एवञ्च परसमवेतक्रियाजन्यफलशालित्वमेव मुख्यं कर्मत्वम् । यथा ग्रामादेर्गमनादिकर्मत्वंज्ञानादिकर्मत्वंतु विषयविषयिभावलक्षणममुख़्यमेवतत् । सविषयार्थकधातुयोगे विषयतारूपमेवकर्मत्वमितिन्यायविदः । एतादृशकर्मत्वस्य ज्ञानकर्तरिसत्वेपि आत्मानंजानातीत्यादिप्रत्ययस्यनानुपपत्तिः मुख़्यकर्मत्वस्यैवकर्तृत्वेन विरोधादिति । इति देहात्मवादतत्त्वदीपे पूर्वपक्षः ।

ननुदेह एवात्मा, तत्र किण्वेभ्योममदशक्तिवत् तत्वेभ्योजायमानदेहे चेतना शक्तेः प्रादुर्भावात् । स एवात्मा नतु तदतिरिक्तः कश्चिदात्मेतिनास्तिकशिरोमणेर्मतमिति तस्य खण्ड़नायोपक्रमते **अत्रोत्तरयतीति** अहं जानामीत्यत्रात्मविपयिणी वुद्धिरहंकारविपया सतीशरीरादि व्यतिरिक्तमान्तरं स्वविषयं कथयति । यथाघट इत्याकारिका बुद्धिः शद्वश्च स्वविषयं घटंव्यवस्थापयति । इदमिति बुद्धिस्तु देहविपयिणी स्वकीयविपयमहंकारात् पृथक् करोति । यथाऽयं घट इति वुद्धिः स्वविपयंवाह्यमान्तरा विवेचयति, अन्यथा स्वपरविभागोनिरालंवनः स्यात् । अर्थात् आन्तरवस्तुव्यवस्थापकोऽहं प्रत्ययः शद्वश्च, वाह्यवस्तुव्यवस्थाय इदमिति शद्वः, प्रत्ययश्चः अन्यथाऽयं विभागोनस्यादिति रूपभेदात् व्यवस्थाया निर्वाहे दण्डमाह, **देवदत्तादिर्दण्डविशिष्टेत्यादि** अहंत्वविरोधिधर्मोघटादौ वर्तमानो यथा इदमास्पदे घटादौ अहंत्वं

मयं दण्डीति विजानाति । तत्राहमिति बुद्धिर्वाह्यार्थव्यतिरिक्तमान्तरमुपस्थापयति । इदमिति बुद्धिस्तु आन्तरव्यतिरिक्तं वाह्यमर्थं गमयति । नत्वेकमर्थं गमयतोऽहंत्वेदन्त्वव्यावर्तयति तथैव देहे वर्तमानो इदंत्वधर्मः स्वविरोधिनो महत्वमपिं व्यावर्तयत्येवेति ।

किञ्च यदि "स्थूलोहं कृशोहमिति प्रतीतिस्नेहदेहस्यैवात्मत्वं प्रतीयात्, तदादेहस्यावयवाद्युपचयापचयेन विनाशियतया "योहंवाल्येपितरावन्वभूवम् स एव वृद्धत्वे प्रणप्तृननुभवामीति प्रतिसंधानं न स्यात् वाल्युववृद्धशरीराणामेकत्वाभावात् । तत्र वालत्वादिकं व्यावर्ततेऽहमास्पदंतु सर्वत्रानुवर्तते । तस्मात्येषुव्यावर्तमानेष्वपि यदनुवर्तते तत्तेभ्योविभिद्यते । यथाकुसुमेभ्यः सूत्रम्, कुसुमेषु व्यावर्तमानेष्वपि मालायामनुवर्तते इतिव्यावर्तमानकुसुमापेक्षया सूत्रानुमानं कुसुमाद्भिन्नमेव भवति तद्वदिह वालादिंशरीरेषु परस्परं व्यावर्तमानेष्वप्यहमिति बुद्धिरनुव्रजमाना इदमास्पदशरीरेभ्योऽहंवाच्यमात्मानं भिनत्त्येव । नच वालादिशरीराणां प्रत्यभिज्ञान गन्धोपि विद्यते तेष्वेकत्वं प्रतीयेत । तस्मादिदंकारवोध्यशरीरेभ्यो भिन्न एवात्मेति नदेहः कथमपि, आत्मपदार्थः संभवति । अहमास्पद आत्माकश्चिदान्तरः पदार्थः देहश्चेदंकारपदवाच्यः पराग् पदार्थः परस्परविरुद्धधर्साक्रान्तः प्रकाशतमोवदिति ।

अपि च शयानः पुरुषः स्वप्ने स्वकीयं देवशरीरं पश्यन् देवोचितभोगान् भुञ्जन् स्पप्न जनककर्मावसाने प्रतिबुद्धोशरीरमात्मनः पश्यन् नाहं देवोऽपितु मनुष्य इति देवत्वे वाध्यमानेपि मनुष्य शरीरमवाधितं पश्यति । तत्र देवमनुष्यशरीरयोर्भेदेपि· अवाधितमहम्पदमनुवर्तमानमेव विजानाति, तत्रापि देवमनुष्ययोर्भेदेपि, अहमाश्पदमभिन्नमेवानुवर्तमानं विजानातीत्यत इदमास्पदः शरीरात् अहमास्पदः प्रत्यगात्मा विभिन्न एव प्रसिद्ध्यतीति । अपिच योगकर्मणा व्याघ्रतां गतोयोगी, अनेक शरीरसाध्यकर्मणो भोगेन क्षयायानेकशरीरं धृत्वा कर्मक्षपणं करोति । तत्रशरीरभेदं पश्यन्नपि अभिन्नमेवाहमास्पदमाप्मानं विजानातीत्यतो नदेहआत्मा, किन्तु शरीरभेदेप्यात्माऽहमास्पदो भिन्न एवेति निश्चितं भवति । न च देहस्यानात्मत्वे तद्गतस्थौल्यादीनामात्मनिसंक्रमाभावेन "अहं स्थूल" इत्यादिप्रतीतिः कथं स्यादिति वाच्यम्, भोगसंवन्धात् । अर्थात् शरीरविरहिते आत्मनिभोगो न भवति किन्तु शरीरावच्छि एव भोगो जायते । इति भोगे आत्मनः समवायिकारणत्वं तत्रावच्छेदकतया शरीरं कारणमिति कथंचित् देहधर्म आत्मनि संक्रामय्यगौणस्तथाप्रतीतिः । अर्थात् औपचारिक एवात्मनिस्थूलत्वादिरिति कृत्वाऽहं स्थूलः कृशोवेति । मञ्चाः क्रोशन्तीतिवदिति ।

यद्यपि पूर्वपक्षिणा कथितम्, किण्वेभ्योमदवत् समुदितभूतेभ्यश्चैतन्यं प्रादुर्भवतीति, तदपि न समीचीनम्, प्रत्त्येकमपर्याप्तस्य समुदायेपि पर्याप्तमयोगात् यथाद्वित्वादिसंख्यायाः प्रत्येकस्मिन् समवायसम्वन्धेनवर्तमानतयैव व्यक्तिद्वयेपर्याप्तिर्भवति नत्वेकत्रावर्तमानस्योभयत्रापि पर्याप्तिर्भवति । यथावा प्रत्येकस्मिन् सिकताकणेऽवर्तमानेतैलोत्पादनसामर्थ्ये सिकता समुदायादपि

योवैंयधिकरण्येन इदं पद्वाच्यो देहोऽहंपद्वाच्यात्मस्वरूपो भवतीति ।

अपि च देहस्यात्मत्वेऽहमिति प्रत्यये देहावयवानामपिभानं स्यात्, स्थूलावय-

तैलं न प्रादुर्भवति, किन्तु प्रत्त्येकतिलेवर्तमाने एव तैलोत्पादनसामर्थ्यें, ततस्तत्समुदायात् प्रभूतं तैलं समुत्पद्यमानं भवति । यद्यपि प्रत्येकविष्टीनां शिविकावहनसामर्थ्यं नास्ति परन्तु मिलितास्ते-शिविकामुद्वहन्ति, तत्र प्रत्येकविष्टिसुफलोपधायककारणत्वस्य सत्वेपि योग्यतारूपकारणत्वस्याक्षतत्वात् । तथैव प्रकृते प्रत्त्येकपरमाणौलेशतोपि चैतन्योपादनसामर्थ्ये सत्येवतत्समुदाये तत्समुदायात्मकतत्वचतुष्टयजनितदेहेपि चैतन्यसद्भावः स्यादित्युत्प्रेक्षेत । किञ्च प्रत्त्येक परमाणोरतीन्द्रियत्वेन तत्समुदायात्मकदेहस्यापि तथात्वेनादृश्यत्वप्रसङ्गात् । न च तथादूरे विद्यमास्यैककेशस्य चाक्षुषत्वाभावेपि तत्समूहस्य प्रत्यक्षतावदत्रापि तथा स्यादिति वाच्यम्, पटुकरणस्य पुरुषस्य समीपेपि प्रत्यक्षता दर्शनात् दूरस्दोपि केशोनातीन्द्रियः संनिधाने तत्प्रत्यक्ष स्यानुभवसिद्धत्वात्, तस्मात् दृष्टान्तासिद्धौ देहस्य कथमपि चैतन्यविशिष्टात्मरूपत्वं न संभवतीति ।

नचादृश्यपरमाणोर्दृश्यदेहानुपादानत्वे कथमति तप्ततैलेऽदृश्यदहनशक्तेर्दृश्यदहनोत्पत्तिरिति तद्दृष्टान्तेन प्रकृतेपि, अदृश्यपरमाणोर्दृश्यदेहोपादानत्वमितिवाच्यम्, तत्रदृष्टान्तेविद्यमानस्यैव दहनस्य कारणवलेन स्थूलदहनोत्पत्तेः स्वीकारात् । न च तदाऽदृश्यद्व्यणुकेभ्यो दृश्यस्यत्र्यसरेणोरुत्पत्तिरिति वाच्यम्; त्र्यसरेणोर्महत्वसम्बन्धेन चाक्षुषत्वात् । तस्माद् यदि अवयवावयविनोरेकत्वं तदा परमाणुसमूहदेहस्य तदुत्पन्नदेहस्य वा प्रत्यक्षता नस्यादतो देहात्मवादे आत्मरूपदेहस्य प्रस्यक्षत्वं न स्यात् । मानसप्रत्यक्षत्वन्तु देहस्य नशङ्कनीयम् "परतन्त्रंवहिर्मनः" इति न्यायादिति ।

ननु यथा ममात्मेत्यत्रास्मत्पदस्येदं पदस्योभयोरपि प्रयोगो भवति न पुनरपि काचित् क्षतिस्तथैव "ममेदंशरीरमीति प्रतीतिः स्यादित्यहंत्ववेदन्तयोर्न विरोधः सहवृत्तित्वादित्याशङ्क्य देहात्मवादे दूषणान्तरं वक्तुमुपक्रमते **अपिचदेहस्यात्मत्वेऽहमितिप्रत्यये** इत्यादि "इमेवयमाशास्महे" इत्यादि वहुलं प्रयोगदर्शनेन भवतु, अहन्त्वेदन्त्वयोः सामानाधिकरण्यं तथापि देहात्मवादे दूषणान्तरं नातिक्रामति । अर्थात् स्थूलावयविनश्चक्षुरादिना ग्रहणे तदवयवस्यकतिपयस्य तदिन्द्रियेण ग्रहणमवश्यमेवभवतीति नियमः । तथाच यः पुरुषो निवारितवाह्यविषयेभ्यश्चक्षुरादीन्द्रियस्तस्यमनसास्वात्मानुसंधानं कुर्वतस्तदनुसंधानं न शरीरविषयकम्, करणचरणादिदेहावयवाविषयकत्वात् । यत् प्रत्यक्षमवयविविषयकं तदवश्यं तदवयवविषयकं भवत्येव । यथा

विनो ग्रहणे कतिपयतदवयवानां भानस्यावश्यकत्वात्, नत्वेवं भवति । न च त्र्यसरेणोर्ग्रहणे तदवयवानां ग्रहणं न भवतीति नियमोऽयव्यभिचरित इति वाच्यम्, त्र्यसरेणु भिन्नपरमाणुसद्भावे प्रमाणाभावात् । न च वायुस्पर्शने व्यभिचारः, तत्रापि अनेकावयवप्रतिभासस्य सत्वात् स्पृश्यमानघटादिवत् ।

घटाद्यवयविनश्चाक्षुषादिसमये घटोगृहीतो भवति, तथैव घटावयवा अपि गृह्यन्ते एवेति । इह तु अवहितमनसाऽत्मानमाकलयतो देहावयवानां ग्रहणं न भवति, तस्माद्देहोनैव चैतन्यवानाऽत्मा संभवतीति । नहि भवति, स्थूलोऽवयवी प्रकाशते तदीया अवयवाश्च न प्रथन्ते । यद्यपि, अवयवि ग्रहणे तदवयवग्रहणमवश्यमेव भवतीति नियमस्तु परिणामकारणवादे एव भवति तत्रावयवावयविभावस्याभावात्, किन्तु यथादुग्धमेव विशेषावस्थानान्तरमापद्यमानन्दधीति नतु दुग्धादवयवात्, दध्न उत्पत्तिर्भवति । आरंभ कारणवादे एव, अवयवेभ्योऽवयविन उत्पत्तिर्भवतीति नियमः । अत्र चावयवावयविनोर्भेद इति यदा चक्षुषा घटः संयुक्तोभवति तदा घटस्य चाक्षुषं भवति नतु तदवयवानामपि, तेषामिन्द्रियसंयोगाभावात् । अवयविनोऽवयवेभ्योऽभेदपक्षे एव प्रकृतनियमः कथञ्चित्स्वीकृत्यकथितमितिग्रन्थाशयः ,

यदाऽवयविनो ग्रहणं तदातदवयवस्यापि ग्रहणंभवतीति नियमस्यत्र्यणुकग्रहणे व्यभिचारं प्रदर्श्य तद्वारणायाह **नचत्र्यसरेणोर्ग्रहणे** इत्यादि त्र्युणकरूपमहत्ववतो द्रव्यस्य यदा चाक्षुषं भवति तत्समयेतदवयवानां परमाणूनां प्रत्यक्षं न जायते, परमाणूनामतीन्द्रियत्वेन प्रत्यक्षायोग्यत्वात् । तथा च तत्रावयविग्रहणं भवति, तदवयवास्तु न गृह्यन्ते इति, उपर्युक्तनियमस्यव्यभिचारोदुरुद्धर एवेति । समाधत्ते-त्रसरेणु **भिन्न परमाणुसद्भावे प्रमाणाभावा**दिति । वलवत् प्रमाणान्तराभावेसति निवर्तमानं प्रत्यक्षं तदभावमेव गमयति, यथाकूर्मरोमादिभ्यो निवर्तमानं प्रत्यक्षं तदभावंविनिश्चिनोतीति, नियमेनातीन्द्रियपरमाणुतः प्रत्यक्षं निवर्तते इति तादृशातीन्द्रियपरमाणोर्न प्रत्यक्षमिति तदभावेनतदभाव एवातो न यथोक्तनियमस्यव्याघातः प्रौढिवादेनग्रन्थकर्तुरुत्तरम् । अथवा शिरोमणिमतेन "जालान्तरगतेभानौ सूक्ष्मं यद्दृश्यते रजः । तस्य षष्ठितमोभागः परमाणुः स उच्यते"इति यत् प्राचीनमतिरिक्तवचनं तत्र शोभनम्, गवाक्षविवरादौ दृश्यमानत्र्यसरेणुभेदेन तदवयवावयवपरमाणुकल्पनाया प्रमाणाभावात् । तदुक्तम् "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुवहून्यपि । अदृष्टशतमात्रोपिनकल्प्योनिष्प्रमाणकः" इति । यदि प्रमाणमन्तरेणापि पदार्थसिद्धिर्महित तदा सर्वत्र सर्ववस्तु सद्भावः प्रसज्येत, कल्पनाया निरंकुशत्वात् । तथाच कश्चित् संसार एव माभवतु, इत्यपिकल्पयेत्, अन्यः कश्चित् सर्वदैव संसारो भवतु, इत्यपिकल्पयेत् जीवस्य नभवतु संसारः पर एवेश्वरः संसारे निमज्जतामित्यादि । तस्मात् त्र्यणुके एवावयवधारा निवर्तते इति नततोन्यतिरिक्तः परमाणुरिति यथोक्तनियमस्य न व्यभिचारः ।

यद्प्युक्तं देहचेतनवादिना "स्थूलोहं कृशोहमिति शरीरेऽहं प्रत्यक्षतोऽनुभूयते ततो देह एवात्मेति। तदपि न शोभनम् स्थूलोऽहमिति प्रत्यय उभयविषयकः, तत्राहं

अथवा प्रत्यक्षयोग़्यावयववतो द्रव्यस्यावयविनो ग्रहणे तदवयवस्यभानमित्येवं नियमे संकोचस्तथा च परमाणुकल्पनेपि यथोक्तनियमस्य न व्यभिचारो यतस्त्र्यणुकावयवावयवपरमाणु रूपावयवस्यातीन्द्रियत्वेनायोग़्यत्वात् त्र्यणुकप्रत्यक्षे न व्यभिचार इति। न च वहिरिद्रियग्राह्ये एवावयविनि यथोक्तनियम इत्यपि न नियमः, तथा नियमेपि प्रमाणाभावादेव। न च मन इन्द्रियेण केवलमवयविन एव ग्रहणमवयव ग्रहणमन्तरेणैवमितिचेत्, स्वातन्त्र्येणमनसोवाह्यपदार्थग्रहणे सामर्थ्याभावात् "परतन्त्रंबहिर्मन" इतिनैयायिकोद्‌गारादिति।

वायोः प्रत्यक्षे तदवयवप्रत्यक्षत्वं नास्तीति यथोक्तनियमे नास्ति व्यभिचारः। अयमाशयः—रूपादिविशिष्टावयविग्रहणे तदवयवानामपिभानमिति नियमे, वायु ग्रत्यक्षेव्यभिचारो नास्ति वायो रूपरहितत्वात्। वायुप्रत्यक्षं स्पार्शनमेव नतु चाक्षुषम्। स्पर्शाधारमात्रेण तस्यत्वगिन्द्रियमात्रग्राह्यत्वात्। तत्रापि तादृशानेकावयवप्रत्ययस्तु भवत्येव, घटस्पार्शने घटावयवस्यस्पार्शनवत् वायोः स्पर्शेतदवयवस्यापि स्पार्शनेनावयविग्रहणे तदवयवभानं भवत्येवेति। इदमुक्तं भवति—

वायोः स्पार्शनप्रत्यक्षे तदवयवानांभानं भवत्येवेति। अवयविन इन्द्रियसंनिकर्षे सति तदीयावयवानामपि यथापथं चाक्षुषस्पार्शनयोर्यथायोग़्यमावश्यकतया, योग्यसंयुक्तावयवभानस्यावयविप्रत्यक्षनियततत्वेनावयविप्रत्यक्षस्यतदवयवविषयत्वमिति नियमेपिवायुस्पार्शनप्रत्यक्षे न कोपि व्यभिचार उदेति। वायुस्पार्शने वायोरवयवस्यापि संभवात्। यथा घटाद्यवयविनः स्पार्शनेजाते घटावयवस्य स्पार्शनं भवति, तथैव प्रकृतेपीति। यदपि, त्र्यसरेणौ व्यभिचारप्रदर्शनावसरे परमाणुमस्वीकृते—तदुद्धारं कृतवान्, तदपि न शोभनम्, अवयविनंत्रसरेणुं प्रत्यक्षत्वे प्रकल्प्य तदवयवचिन्तायां तदीयमवयवान् अनुमानेनैव स्थापितवान्। त्रसरेणुः सावयवोमहत्वात् घटवत्, इत्यनुमानेन तदवयवंद्व्यणुकं प्रसाध्य, त्र्यसरेणोऽवयवाः सावयवा महदारंभकत्वात् कपालवदित्यनुमानेन तदवयवपरमाणोरपि संसाधनात्। ततश्च त्र्यसरेणो व्यभिचारः स्फुट एवेति। तत्खण्ड़नंतु प्रकृते प्रौढिवादमात्रेण। अथवा महान्तो नप्रतिक्षेपणीया महत्त्वादेवेति। विस्तरस्तु स्थलान्तरे द्रष्टव्यो विस्तरभयान्न प्रतन्यते। यद्वाऽप्रस्तुतत्वादिति संक्षेपः॥

शरीरात्मसाधक "स्थूलोहमित्यादिप्रत्यक्षप्रत्ययम् यद्प्युक्तमित्यादिना तदनुवादं कृत्वा तन्निराकरणायोपक्रमते **यद्प्युतंदेहचेतनवादिनेति** समाधत्ते **तदपि न शोभन**मित्यादि सम्पूर्ण प्रकरणस्यायमाशयः स्थूलोहमिति प्रत्यये शरीरान्तवर्तमानमहमाकारं प्रत्यगात्मानं वोधयति। स्थूलोहं जानामीत्यहं प्रत्ययोदेहद्वारा स्थूलत्वयुक्तान्तरात्मविषयक एवेति। मानस प्रत्यये शरीरभानं तु ज्ञानलक्षणासंनिकर्षेण भवति। घटोवायुमानित्यत्र यथावायुर्ज्ञान लक्षणया ज्ञायते

प्रत्ययः शरीरव्यतिरिक्तमहमाकारमान्तरं किमपि वस्तुप्रकाशयति, अपरोंऽशस्तुस्थौल्पादिगुणकं शरीरमुपस्थापयति। अत एव ममेदं कलत्रादिकमितिवन्ममायंदेह तथैव प्रकृते। स्थूलोहं जानामीत्यनुव्यवसायप्रत्यक्षेपि देहवाचकस्थूलादिशद्बोहंसंबन्धिनि प्रत्यगात्मनि गौण एव। सिद्धान्तपक्षेतु मुख्य एव देहस्यचेतनं प्रत्यपृथक् सिद्धप्रकारत्वस्वीकारात्। अपृथक् सिद्धवाचकशब्दानां धर्मिणि मुख़्यवृत्तेरुपगमात्। यथा देववाचकपदं देवदत्तशरीरावच्छिन्नप्रकारिणो बोधने समर्थमिति। यदा च समानाधिकरणप्रत्ययः शरीरवदात्मविषयकस्तदाव्यधिकरणप्रत्ययोपि तद्विषयको भवति, ममेदं शरीरम्, मम कंवलो गेहादिर्वेति। भेदज्ञानं व्यवहारश्चेति। नचासौ, औपचारिकः सर्वानुभवसिद्धत्वादिति। ततश्च यथाऽत्म शब्दस्यात्मनिवृत्तेरैकार्थ्यमविवादश्चेति, अहमर्थात्मनोरेकत्वे विवादाभावात्, देहाहंशब्दयोरैकार्थ्यमसिद्धं विवादश्चापि वर्तते एव। नचैवं प्रकृते। तस्माद्देहभिन्नचेतनस्य प्रत्यक्षप्रत्यय सिद्धतया आत्मसम्वन्धिनि शरीरेऽहं शब्दस्यौपचारिक एव प्रयोगः।

नचोपर्युक्तयुक्तिवलेनाहं जानामीति मानसप्रत्यक्षरूपानुव्यवसायज्ञानस्य यदाऽवयवविशिष्टशरीरभिन्नत्वं स्थिरीकृतं ततश्च शरीरव्यतिरिक्तात्ममाने कथमात्मनः शरीराऽभेदग्रहो विरोधिभेदस्य विद्यमानत्वादिति वाच्यम्, वाह्यघटपटादिपदार्थानां परस्परविरुद्ध परिमाणसंख़्यादीनां प्रत्यक्षसिद्धत्वेन परस्परं भेदोयथा सिद्धस्तथाऽन्तरात्मनि वाह्येन सहभेदक संख्यापरिमाणादिविरुद्धधर्माणामग्रहणात् देहात्मनोरभेदग्रहः कदाचिद्भवतीति। अर्थात् यद्यपि शरीरादितो भिन्नपरिमाणवानात्मा, अणुपरिमाणकआत्मा मध्यमपरिमाणश्चदेह इति परस्परं देहात्मनोर्भिन्नोधर्मोविद्यते. एवेति, तयोर्देहात्मनोरभेदो न युक्तस्तथापि, आत्मपरिमाणादिकं प्रत्यक्षं नभवति, आत्मनोऽणुपरिमाणतया तदीयधर्माणांपरोक्षत्वात्. प्रत्यक्षे च महत्त्वस्य कारणत्वात्, यद्यपि ज्ञानसुखादिकं प्रत्यक्षं भवति तथापि यावत्पर्यन्तं शरीरे ज्ञानादीनामसंभव ज्ञानं न भवेत् तावत् तत्सुखादिकं भेदकं न स्यात्। एवं वाह्यद्रव्यस्थितरूपादिको गुणस्तावत्पर्यन्तं वाह्यदेहादिभ्योभेदक आत्मनो न संभवति, यावत्पर्यन्तं रूपादीनामसंभवग्रहो न स्यात्। संयोग संख़्यादयस्तु सर्वद्रव्यसाधारणतया देहात्मनो भेदको न संभवेत्। एवं प्रकारेण बाधक प्रमाणस्य भेदकाकारग्रहो न संभवत्येवमुपपादितम्। तथा देहात्मनोरेकत्वज्ञाने सादृश्यमस्तीति प्रतिपादयति। आत्मन इच्छानुविधायिस्वव्यापारकत्वं देहात्मनोस्तुल्यमेवभवति इच्छाद्वारेणैवात्मा संकल्पं करोति पूर्वदृष्टं कालान्तरे स्मरति वितर्कयति। एवं यथाऽत्मावितर्कादिकमिच्छादिकं करोति तथैव देहोपि चेतनेच्छानुविधायिशयनोत्थानादिकार्याणि करोत्येवं प्रकरेणात्मदेहयो सादृश्यदर्शनेन भवति देहात्मनोरेकत्वविभ्रमो रज्जौभुजङ्गविभ्रमवत्। अर्थात् रज्ज्वामपिदैर्घ्यादिको गुणो भवति सर्पस्यापि तथा इत्येवमुभयोः सदृशत्वात्। रजतेपि चाकचिक्यं तथा शुक्ता

इत्यादिप्रतीति व्यवहारश्च भवति । न चायं भेदज्ञानं व्यवहारश्च सार्वलौकिको जायमानो भेदमूलको गौणोममात्मेतिवदिति कथनं युक्तम् , आत्मशब्दस्यात्मनि वृत्तित्वे समानार्थत्वाद् विवादाभावाच्च मुख्यत्वकथनं युक्तमेवदेहादिशब्दयोश्चैकार्थत्वस्या सिद्धेर्विवादाच्च नोपचरितार्थत्वम् ।

वपितदिति सादृश्यधर्मवत्वस्योभयत्रापि तौल्यमिति शुक्तौरजतविभ्रमो भवति तथैव देहात्मनोरपि सादृश्येनाभेदविभ्रमो जायते, इति पूर्वपक्षाशयः । देहात्मनोर्भेदविषये सिद्धान्तानुयायिनामाशयस्त्वित्थम्-सत्यमविवेकिनां देहात्मनोरभेदभ्रमः परन्तु येऽवहितमनसो विवेकिनः तेतु ज्ञातृत्वमात्राकारेण प्रकाशमानमहमाकारम् मनोमात्रगोचरं सर्वावयवरहितं पश्यन्तः स्थौल्यादिगुणयुक्त देहादिभ्यः पार्थक्येनैव जानन्ति । तत्रैकरूपतयाऽनवयवतयाऽत्मग्रह एव भेदकारणग्रहः । ततश्च प्रणिहितमनसः यथोक्तस्मरणवतः मनसा शरीरवैलक्षण्यतयात्मप्रत्यक्षं भवत्येव । योगिनस्तु सर्वदैवदेहभिन्नतयैव निरवयवं स्वेतरविलक्षणमेवात्मानं प्रत्यक्षयन्ति । स्वप्नदृगपि स्वप्ने देवदेहविशिष्टस्वात्मानं पश्यन् तदुचितभोगं कुर्वन् स्वप्नावसाने मनुष्यदेहं पश्यन् नाहं देवोऽपितु मनुष्यदेह इति तत्र जागरणे देवादिदेहस्य वाधेपि अवाध्यमानं निरवयवमहमाकारमात्मानं प्रत्यक्षयत्येवेति स्थितम् । आत्मावाह्यदेहादिव्यतिरिक्तज्ञातृत्वैकाकारेण प्रकाशमान इति । "अहंकारस्याश्रयोयं मनोमात्रस्य गोचर" इति नियमेन देहव्यतिरिक्तत्वमात्मनः प्रत्यक्षेण साधितम् 'चेतसा वेदितव्यः' इत्येतच्छ्रुतेः प्रमाणतः । अणोर्मानसप्रत्यक्षं जीवस्य चोपपद्यते" ॥८६९॥ श्रीबोधयनमतादर्शे श्रीआचार्यचरणोक्तेः ।

अनुमानप्रमाणेनापिजीवस्य शरीरातिरिक्तत्वं सिद्ध्यति अहंजानामीति ज्ञानं शरीरादिविषयकं न भवति । देहावयवाविषयकत्वात् । जानामीति प्रत्ययः आत्मव्यतिरिक्तार्थान्तरविषयको न भवति, अप्रकाशमानतदवयवप्रतिभासत्वात् , य एवं प्रकारः स तथा, यथाघटोयमिति प्रतिभासः यत् शरीरविषयकं न तदात्मविषयकम् , यथोभयवादि संमतशरीरादिविज्ञानम् । अत्र प्रथमानुमाने शरीरविषयकत्वाभावः साध्यम् द्वितीयानुमानेतु देहातिरिक्तविषयकत्वं चेत्यहं जानामीत्यपरोक्षस्य प्रदर्शितम् । एवम् , देहोऽहमिति ज्ञानविषयो न भवति, इदमाकारकप्रतीति विषयत्वात , तथा देहोऽहमिति ज्ञानविषयो नभवति वाह्येन्द्रियग्राह्यत्वात् । तत्र वाह्येन्द्रियेण चक्षुषात्वगिन्द्रियेण च वाह्यंद्रव्यं प्रत्यक्षं यथा चक्षुषा घटादिकंत्वगिन्द्रियेण च वायुर्गृहीतो भवतीतिरूपिद्रव्यं पृथिवीजलतेजांसि वायुश्च रूपरहित इति वायोः प्रत्यक्षं त्वगिन्द्रियमात्रेण रूपद्वारा पृथिव्यादीनां तूभाभ्यामिन्द्रियाभ्यां भवति । एवं चोपयुक्तानुमानेभ्योपि, अहमिति प्रत्ययस्य न शरीरादिविषयकत्वं सिद्ध्यति । "प्रवृत्त्याद्यनुमेयोऽयंरथगत्येव सारथिः । अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः" इति न्यायविदां प्रक्रियानुसारेण मनसाऽयं स्वे देहे ज्ञातो भवतीति मानस प्रत्यक्षमात्र विषयः । शरीररूपत्वेत्वात्मनः शरीरस्य रूपस्पर्शवत्वेन

तस्माद्देहभिन्नात्मनः प्रत्यक्षसिद्धत्वात्, आत्मसम्बन्धिनि शरीरे लाक्षणिकोऽहं शब्दप्रयोगः। देहात्मनोऽभेदस्तु भ्रममूलक एव पामराणामिति।

रूपस्पर्शसहकारेण पृथिव्यादिरूपिद्रव्यवत्, केवलस्पर्शाश्रयवायुवच्च वाह्येन्द्रियेणापि कदाचित्कस्यचित् प्रत्यक्षो भवेत्, नतुरूपस्पर्शादिरहितस्यात्मनः केषांचिदपिवाह्येन्द्रियग्राह्यता दृश्यते। तस्मान्नायमात्मावाह्येन्द्रियग्राह्य इति न वाह्यपदार्थः, अपितु आन्तर एव। आन्तरत्वाच्च सुखादिवत् केवलमनसैव गृहीतो भवन् चाक्षुषादिद्रव्यव्यतिरिक्त एव। यथा परकीयदेहे हिताहितप्राप्तिपरिहारानुकूलचेष्टात्मकप्रवृत्त्याऽनुमितो भवति, तथैव स्वशरीरेपि प्रवृत्त्याज्ञेयो भवति। यथा गृहान्तर्गतो वालको विविधवातायनद्वारेणानेकं मनस आल्हादजनकं वस्तुं पश्यन् शृण्वन् स्पृशन् गृहातिरिक्तो भवति नतु गृहस्वरूपो भवति, आधाराधेयभावस्य भिन्ने एव संभवात्, अभिन्ने तदभावात्, तथैव शरीराधिष्ठितः शरीरे विद्यमानो जीवात्मागवाक्षस्थानीयं चक्षुरादिद्वारा रूपस्पर्शादिकमनुभवन् शरीरात्मकाधारात् सर्वथा भिन्न एव। नतु कदाचिदपि देहस्वरूपस्तत्रानुपपत्तेः पूर्वंप्रदर्शितत्वात्। किञ्च "मृतं शरीरमुत्क्षिप्यकाष्ठलोष्ठसमंक्षितौ। विमुक्तावान्धवायान्ति धर्मस्तमनुगच्छति" इति मनुः। अयमर्थः अत्रमृतदेहस्यवने विसर्जनमात्मनश्च धर्माधर्मसहकृतस्य परलोकगमनं श्रावितमित्यतो देहेन सह भेद आत्मनः स्पष्टरूपतया प्रतिपादितः। यद्ययंजीवः शरीररूप एव तदा चितारूढदेहो भस्मसादभूदिति धर्माधर्मपाथेयस्य कथं परलोकस्य महाप्रस्थानं भवेत्। तस्मादग्निदग्धसावयवदहनादियोग्यपार्थिवादिशरीरापेक्षया, निरवयवाग्न्याद्यदाह्यपरलोकगामी कश्चिदन्यस्तवात्मा।

तदुक्तम् "अग्राह्योऽयमदाह्योयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलौऽयं सनातनः॥"

इत्यादि प्रकरणेन भगवान् जीवस्याग्राह्यत्वादिकं प्रतिपादयन् तद्भिन्नदेहस्य च ग्राह्यत्वदाह्यत्वादिकं कथयन् स्पष्टत एव देहजीवयोर्भेदं प्रतिपादितवान्। नहि दाह्यत्वानित्यत्वादिधर्मोपेत देहस्य नित्यत्वं परलोकगामित्वादिकं श्रुतमुपपद्यते वा। तस्माद्देहभिन्नजीव इति प्रत्यक्षानुमानस्मृत्यादि प्रमाणैः प्रदर्शितम्। किञ्च "सत्यं ज्ञानम्" "प्रज्ञान घनः" "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैतम्" अरूपमस्पर्शमशब्दमव्ययं तथा रसं नित्यमगन्धवच्चयत्" इत्यादिश्रुतिप्रमाणेन शरीरातिरिक्तत्वमात्मनः समर्थितं भवति। तत्र प्रथमद्वितीयमन्त्राभ्यामात्मनो ज्ञानरूपत्वम्, तच्चगुणरूपमेव, ततश्च स्वरूपज्ञानस्य पृथिव्यादिभूतपरिणामात्मक देहरूपत्वाभावात्। अशव्दमस्पर्शमित्यादिनाभूतगुणादिशब्दादिनिषेधेन शब्दस्पर्शादिमद्भूतरूपत्वस्यात्मनोर्थत एव सिद्धत्वेन न कथमपि देहरूपत्वमात्मनो भवति। विस्तरस्त्वन्यत्र द्रष्टव्यस्तत्रतत्रबहुप्रपञ्चितत्वादितिदिक्।

देहोनात्मा सङ्घातरूपत्वात् शयनासनादिवदित्यनुमानेनापि शरीरस्यानात्म रूपत्वं सिद्ध्यति। यत् सङ्घातरूपं तत्सर्वं परार्थमेव भवति, आत्मातु न परार्थः किन्तु आत्मार्थ एव। तदन्यत्सर्वमात्मार्थमेवनत्वात्मा तथा सङ्घातरूपत्वाभावात्। एवं भोक्तृत्वादपि देहादतिरिक्तः तथाऽचेतनदेहादीनामधिष्ठापकः। शास्त्रस्य महर्षीणां च मोक्षार्थं प्रवृत्तिदर्शनादपि देहभिन्नः सर्वस्य भोग्यजातस्य भोक्तृत्वात् देहादेः सङ्घात रूपत्वात् ततो व्यतिरिक्तत्वमेवेति। त्रिगुणात्मकत्वादपि जीवसिद्धिः।

देहोहि जीवो न भवति, यतः शब्दादेर्वाह्यस्य भोगस्य, तथाऽन्तरस्य च सुखादेरात्मार्थत्वं भोक्तुश्च जीवस्यानन्यार्थत्वदर्शनेनात्मासर्वस्यशेषीति प्रत्यक्षत एव सिद्ध्यति, इत्याकल्य्य, शरीरं नात्मा सङ्घातरूपत्वादित्यनुमानेन देहस्यानात्मत्वसाधकप्रयोगे हेत्वसिद्धिपरिहर्त्तुं हेतुस्वरूपं प्रतिपादयति **देहोनात्मा** इत्यादि। अयमाशयः—यद्यत्सङ्घातरूपं समुदायात्मकं तत्सर्वं परार्थमेव भवति, यथा शयनासनविहाररूपादयोनतु ते स्वप्रयोजनका अचेतनत्वात्। आत्मा तु नपरार्थरूप आनन्दरूपत्वात् "मानभूवं नभूयासमिति प्रेमात्मनीक्ष्यते" इति शयनासनादिकं यथा स्वकीयभोक्तारं स्वव्यतिरिक्तमाक्षिपति तथैव सङ्घातरूपतयाशरीरमपि स्वभोक्तारमसंहतंकमप्याक्षिपति स एवासंहतो जीव आत्मेति। न च सङ्घातरूपंशयनासनादिकं सङ्घातरूपमेव शरीरादीनां प्रयोजनाय भवत् सजातीयमेव संघातान्तरमाक्षिपति तथैव देहः संघातरूपत्वात्सङ्घातान्तरमेवाक्षिपेदितिनाहतपुरुषसिद्धिः स्यादिति वाच्यम्, भावानव बोधात्। अर्थात् यथा सङ्घातरूपेण शयनासनादिना संहतदेहस्य सिद्धिर्भवति तथैव देहोपि कमपि संघातान्तरमेवाक्षिपेत्तदाऽनवस्था प्रसज्येत। यतो देहेन संघातरूपेण संघातान्तरस्यानुमानं तदाऽनुमीयमानसंघातान्तरस्यापि सङ्घातरूपत्वेन तेनापि संघातान्तरस्य सिद्धि प्रसंगेनानवस्थादुरवस्था स्यात्। न च भवतु, अनवस्था न तावताक्षतिरिति वाच्यम् "प्राग्लोपा विनिगम्यत्वप्रमाणापगमैर्भवेत्। अनवस्थितिमास्थातुरचिकित्स्यात्रिदोपतेति" पूर्वाचार्योदितवचनेन त्रिदोषप्रसङ्गात्। अर्थात् अग्रिमाग्रिमसंघातस्य सिद्धौ पूर्वपूर्वसंघातस्य निष्प्रजनत्वेन संघातान्तरप्रवाहः किमालंवेत, उत्तरोत्तरेण पूर्वपूर्वप्रयोजनस्य संसिद्धौ पूर्वपूर्वस्य विलोपप्रसङ्गात्। अनेकसङ्घान्तरस्य सिद्धौ कस्यात्मत्वंस्यादिति विनिगमनाविरहः। प्रवाहस्य कुत्रचिदप्य विरामे तादृशप्रवाहपरंपरायाः स्वीकारे नास्ति किमपि प्रमाणम्, नवा तदनुभवोपि कस्यचिदपि संभवति तस्मात् प्राग्लोपाविनिगम्यत्वप्रमाणापगमदोषेभ्योऽनवस्थाऽसमाधेयाभवति यथा लौकिक त्रिदोषः सन्निपातज्वरोऽसमाधेयस्तथैव त्रिदोपग्रस्ताऽनवस्थापि, समाधेया नैव स्यादिति। न च शयनाशनसङ्घातो यथा संहतशरीराद्यर्थो दृश्यते तथैव संहतदेहेन जीवस्यापि संहतत्वमापद्येत, संहतत्वाच्चतस्यापि परार्थत्वं स्यात् परन्तु आत्मा तु नपरार्थोऽपितु अपरार्थः प्रत्यक्षेण

ननु यद्यपि शरीरे भौतिके आत्मप्रतियोगिकभेदस्य कालाकाशयो प्रत्यक्षाऽयोग्यत्वमेव, तथापि, देहस्यात्मत्वमचेतनत्वानुमानप्रमाणादेव सिद्धं भवति । कार्यद्रव्यनिष्ठो विशेषगुणः कारणगतविशेषगुणपूर्वक एव भवति जलीयरूपरसादिवत् ।

दृश्यते न च व्यवस्थायां सत्यामव्यवस्थायुक्ता । नवा सङ्घातस्य परार्थत्वे परस्य संघातत्वमपिप्रयोजकम् । भोक्तृत्वेनैवात्मनः स्वार्थसंघातं प्रतिपरत्वस्यकथञ्चित् संभवात् यद्यनुमाने दृष्टान्त दृष्टसर्वधर्मस्य सादृश्यमीहेत तदासर्वानुमानस्य विलोपः प्रसज्येत । अन्ततो महानसत्वपर्वतत्वेन समानत्वस्याभावादिति । तस्मात्साधर्म्यमात्रेण कस्यचिदर्थस्य सिद्धिः प्रतिषेधो वा भवतीति । एवञ्च यथोक्तक्रमेण “अहमात्मानं जानामीत्यहं ज्ञानस्य प्रत्यक्षरूपस्य परागरूपशरीरातिरिक्त विषयकत्वं व्यवस्थापितं युक्तितर्कादिना । ततश्चाहं प्रत्यय एव शरीरभेदस्वरूप इतीदंकरास्पदे शरीरे आत्मप्रतियोगिकभेदोपि प्रत्यक्षसिद्ध एव भवतीति । ततश्च सङ्घातस्यपारार्थ्येन देहस्य सङ्घातरूपत्वेनततः परआन्तरस्य तद्भिन्नजीवसिद्धिः प्रदर्शिता । एवमधिष्ठानत्वेनापि जीवस्य सिद्धिर्भवति तथाहि, यद् किञ्च देहस्य सत्वरजस्तमो गुणात्मकतयातद्व्यतिरिक्तस्यात्मनः पार्थक्येनैवत्रिगुणस्यसिद्धिर्भवति । तथा सर्वं भोग्यं जीवश्च भोक्तेति भोक्तृतयापि सिद्धिर्भवति । तथा मोक्षार्थं प्रवृत्तिदर्शनात् शास्त्रस्यमहाधियाञ्च । मोक्षोहिवन्धनविश्लेषरूपः, बन्धश्च प्रकृति रूप एव, नहि वन्धरूपस्य बन्धनिवृत्तिः स्वस्यस्वेन वियोगाभावात् , इति ततो व्यतिरिक्त एव कश्चिद्बध्यः सचकारणवशेनादृष्टादिना पूर्वं वद्ध इति तन्निवृत्तये मननादौप्रवर्तमानाः, उपासनया सञ्जातज्ञानो मोक्षभाग्भवतीति । देहव्यतिरिक्तत्वं जीवस्य भवतीति संक्षेपो विशेषस्त्वन्यत्र ।

ननु यथा घटे पटभेदो घटपदयोर्भेदेनदृश्यमानतया तयोर्भेदेपि प्रत्यक्षो भवति, इह तु देहात्मनोर्मध्ये देहस्य वाह्यप्रत्यक्षत्वेपि जीवात्मनो वाह्यप्रत्यक्षाऽविषयतया कथमात्मदेहयोर्भेदः प्रत्यक्षेण साधित इत्याशङ्क्य देहात्मनोर्भेदस्य प्रत्यक्षायोग्यत्वेपि, अतीन्द्रिययोः कालाकाशयोर्भेदोऽप्रत्यक्षोपितयोर्भेदोऽनुमानेनैवसाध्यते, तथैवप्रकृते शरीरस्यानात्मत्वम् , अचेतनत्वलक्षणानुमानेन साधयितुं शक्यते, एवेत्याशयेन समुपक्रमते **ननु यद्यपि शरीरे भौतिके** इत्यादि । समाधत्ते तथापि देहस्येत्यादि । एतदेवोपपादयति **कार्यद्रव्यनिष्ठ** इत्यादि । कार्यद्रव्यगतो विशेषगुणः कारणगुणपूर्वक एवभवति, यथाऽत्रयविजलराशौयो रूपरसादिर्भवतिसस्वकीयकारणगतगुणेनैव, नतु कारणगुणविपरीतगुणः कार्येभवति । इहतु देहावयवेषु ज्ञानस्याभावात् , कारणगुणपूर्वकं देहेचैतन्यं संभवति । यदि कदाचित् शरीरावयवेषु चैतन्यं स्वीकुर्यात् तदा, एकस्मिन्नेवदेहेऽनेकचेतनस्वीकारदोष आपतेत् । न चैतदिष्टं दृष्टविरोधात् । तस्मात्कारणगुणपूर्वकः शरीरेचैतन्यगुणः । नचाकारणगुणपूर्वक एव भवत्विति वाच्यम् , ज्ञानस्य विशेषगुणत्वेन तत्कारण-

नच "चतुर्भ्यः खलुभूतेभ्यश्चैतन्यमुपजायते किण्वेभ्योमदशक्तिवदितिवाच्यम् शक्ति पदार्थस्य सामान्यगुणत्वेन सर्वसाधारणतया तथोपपत्तिसंभवेपि चैतन्यस्य देहात्मत्व गुणत्वस्वीकारेण सर्वसाधारणत्वाभावात् । ज्ञानस्य तु कार्यत्वेन प्रत्यक्षसिद्धतया विशेषगुणत्वात् ।

गुणपूर्वकत्वस्य देहेऽसंभवादिति । पुनः शङ्कते, **चतुर्भ्यः खलु भूतेभ्यमदशक्तिवदि**ति । यथाऽनेकद्रव्ययोगेन तत्रैकामदशक्तिरुत्पद्यते तथैव पृथिव्यादिचतुर्भूतसंयोगेन ज्ञानाख्योगुणः समुत्पद्येत, ततश्च तदाश्रयत्वेन न देहस्यात्मत्वमुपपद्येतेतिभावः । उत्तरयति "**शक्तिपदार्थस्येत्यादि** शक्तिः सामान्यगुणरूपासर्वभाववृत्तित्वात्, ततश्च शक्तेः सामान्यगुणत्वेनकथञ्चिदकारण-गुणपूर्वकत्वंत्रयसरेणुमहत्ववत् संभवेदपि ज्ञानस्य तु विशेषगुणतयाऽकारणगुणपूर्वकत्वाभावात् । "संयोगशक्तिनामानौ सर्वद्रव्यगुणौ मतौ" इति श्रौतप्रमेयचन्द्रिकाकारोक्तेः शक्तिः पदार्थान्तररूपैवेति कार्यप्रतियोगिककारणानुयोगिकाकार्यदर्शनात्तत्तत्कार्येणानुमीयते नतु शक्तिः प्रत्यक्षा । "न तस्य कार्यं करणं च विद्यते……परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानवलक्रियाच" शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः" इत्यादिश्रुतिपुराणानुमोदिता तत्तत्कार्यप्रयोजिका सर्वसाधारिणी सामान्यगुणरूपेत्यतो यथा कथंचिदकारणगुणपूर्वकत्वसंभवोनत्वेवं ज्ञानस्येति । अस्याःगुणत्वकथनं विशेषणत्वरूपेण नतु परिगणितरूपत्वम् । ज्ञानंतु न सामान्यगुणात्मकम्, देहे एव तदुपगमात् विशेषगुणत्वमेव । द्रव्यत्वन्यूनवृत्तिगुणत्वमेव विशेषगुणत्वमिति सिद्धान्तिनां पन्थाः । वैशेषिकानुयायिनस्तु "ज्ञानं विशेषगुणः कार्यत्वे [जन्यत्वे] सति, एकविधप्रत्यक्षविषयत्वात् रूपरसादिवत् । चक्षुस्त्वगिन्द्रियाभ्यां ग्राह्ये संख्यादिसामान्यगुणे विशेषगुणलक्षणातिव्याप्ति, वारणाय प्रकृतलक्षणे, एकविधत्वमिति विशेषणं प्रत्यक्षे प्रक्षिप्तम् । ततश्चद्वीन्द्रियग्राह्यसंख्यादौ एकप्रकारकप्रत्यक्षविषयत्वं नास्तीति । तत्र द्विविधप्रत्यक्षत्वात् । आलोककुड्यादिसंयोगे लक्षणस्यातिव्याप्तिवारणाय एकविधप्रत्यक्षविषयजातिमत्वमेव वाच्यम्, संयोगनिष्ठसंयोगत्व-जातेर्द्रव्यग्राहकचक्षुस्त्वगिन्द्रियोभयग्राह्यत्वान्न भवत्यतिव्याप्तिः । विशेषगुणलक्षणे ज्ञानादि भिन्नत्वमिति निवेशस्तु नशङ्कनीयस्तस्यज्ञानादे विशेषगुणत्वस्य प्रमाणसिद्धत्वादिति । मद्योत्पादक द्रव्येषु प्रत्येकमपि मादकताशक्तिः सूक्ष्मरूपेण वर्तते एवेति कार्यगतगुणोत्पादकत्वं सजातीयकारणगतगुणस्यैवेति नियमे न कोपि दोषः । कारणगतो गुणः कार्यगतं सजातीयं गुणान्तरमारभते द्व्यणुकगतरूपाद्युत्पादकपरमाणुस्वरूपादिवदितिनियमघटककारणपदेन समवायिकारणस्यैव ग्रहणं नतु कारणस्य, निमित्तकारणादिगतरूपादेः कार्यद्रव्ये सजातीयरूपान्तराऽनारंभात् । नहि नीलादि दण्डेन नीलघटस्योत्पत्ति । तत्र दण्डत्वेनैवदण्डस्य कारणता नतु नीलादिरूपविशिष्टत्वेन, तथाऽदर्शनात् । यदि निमित्तकारणमपि द्रव्यकार्यं प्रतिस्वगुणमुत्पादयेत्तदा प्रागभावोत्पादितघटोऽ-

यद्यपि चित्ररूपमकारणगुणपूर्वकं तादृशचित्ररूपे व्यभिचारोद्भावनं कृतम् तदपि न समीचीनम्, नानारूपविशिष्टतन्तुभिरवयविनि चित्ररूपसंभवात्। यद्यपि प्रत्येकतन्तौ नानारूपंनास्ति, संमिलिततन्तुषु तत्संभवात्, पटावयविहेतवस्तन्तवश्चित्रा इति लोकप्रतीतेः। एवं चित्रपटहेतुषु तन्तुष्वचित्ररूपमव्याप्यवृत्त्येव चित्ररूपं विद्यते इति न

प्यभाव रूप एव स्यादिति। न चैवमत्र शरीरावयवभूतेषु प्रत्येकं चैतन्यमुपलभ्यते येन तत्समुदायजनितदेहे चैतन्यमुपेयात्। नवात्रप्रत्येकभूते चैतन्यं साध्यते। दृश्यते च प्रत्येकतिलेषु तैलसत्वे एवतत्समुदायादपि पीड़नेन तैलप्रादुर्भावः, नहि भवति सिकताभ्यस्तैलोत्पत्तिः। तत्कस्य हेतोः ? प्रत्येकस्मिन्नसत्वात्। यदि शरीरस्य प्रत्येकस्मिन् अवयवे चैतन्योपगमः स्यात्तदा, एकस्मिन्नेव देहेऽनेकचेतनसद्भावे कस्य प्राधान्यं कस्य गौणत्वं को हि नियामकः कश्च नियाम्य इति निर्णयाभावेन दर्शनस्पर्शनादि व्यवहारो नैव कथञ्चिदप्युपपादितः स्यात्। एकशरीरे एक चेतनवादेतु भवति व्यवह्रारोऽविसंवादितः। तथैकजीववादे एव अनुभवस्मरणयोर्बद्धमुक्तयोर्व्यवस्था भवति, अनेकजीवस्यैकस्मिन्देहे स्वीकारे, येनानुभवः कृतस्तदभावे तदन्यस्य स्मरणं न स्यात् “नान्यं दृष्टं स्मरत्यन्योनैकभूतमयक्रमात्” इति दर्शनस्मरणयोश्च सामानाधिकरण्यात्। नहि देवदत्तदृष्टमर्थं यज्ञदत्तः कदाचिदपि स्मरति तयोः सामाधिकरण्यादेवेति। तथा शरीरावयवानां हस्तादीनामकस्मात् खण्डने जातेऽवशिष्टावयवजनितखण्डशरीरस्थितचेतनेन पूर्वदृष्टरथादेस्तदन्यावयवजनितशरीरान्तरेण स्मरणं कथमपि न स्यात्, द्रष्टुर्विनष्टत्वादित्यादिकमधिकमन्यत्रानुसन्धेयम्। तस्माच्छरीरं नात्मा तथात्वे लौकिकपारलौकिकसर्वव्यवहारविलोपप्रसङ्गादित्ययं चार्वाकोदेहात्मवादी विद्वद्गोष्ठीभ्यो निष्काशनीयोनिष्काशितश्च पूर्वाचार्यैः—

“स्थूलश्चाहं हि गच्छामि प्रत्ययाच्चेतनस्तनु। मृते देहेतु चैतन्यं प्राणनिर्गमनान्नहि ॥८७६।
इति चेन्न वरं चैतद्विकल्पासहता यतः। देहस्यावयवे तच्चैकस्मिन् सर्वेषु वास्ति हि ॥८७७॥
नाद्यः प्रतीयते यस्माच्चैतन्यमितरत्र च। बहुचेतनवत्वंस्यादन्त्ये चैकतनावथ ॥८७८॥”

इत्यादिरूपेण सहस्रश्लोक्यां जगद्गुरुश्रीपूर्णानन्दाचार्यप्रभृतिभिः। तथैव

“देहप्राणेन्द्रियादेश्च ममेत्यादिप्रतीतितः। देहप्राणादिरूपत्वं नात्मनोमन्यते बुधैः ॥५।२०॥

एवंरूपेण जगद्गुरुश्रीश्रियानन्दाचार्येणापि गलहस्तितञ्चैतमितिदिक्।

पूर्वपक्षकृतप्रश्नस्य समाधानार्थमुपक्रमते **यदपि चित्ररूपकारणपूर्वकमित्यादि।”** अयमाशयः रूपम् व्याप्यवृत्त्यव्याप्यवृत्तीतिमतद्वयम्। तत्र“व्याप्यवृत्ति”इति मते अनेक रूपवदवयवेभ्यो जायमानपटेननीलरूपमात्रं पीतादेरपितत्र दर्शनात्, अव्याप्यवृत्तिरूपस्यासंभवात्। न चावयविनिरूपं नास्त्येव, तथा सति रूपाभावेन चाक्षुपतानस्यादतोऽवयविनि चित्ररूपमेकमपूर्वमेवोत्पद्यते

व्यभिचारशङ्का । नचैकरूपाभावेनावयविनश्चाक्षुषत्वं न स्यात्, रूपाभावादिति वाच्यम् रूपमहत्त्वयोरेव चाक्षुषे प्रयोजकत्वोपगमात् । अथवा भवतु रूपस्य व्याप्यवृत्तित्वं, तथापि कारणगतनानारूपैरेव कार्यगतचित्ररूपस्य संभवात् । न चैवं तदाऽवयवगतचैतन्येदेहात्मगतचैतन्यस्योत्पादो भवत्विति वाच्यम् सामान्यतो देहगत तदवयवगतस्य प्रमाणाभावेनास्वीकारात्, अन्योन्याश्रयाच्च । तस्मान्न देह आत्मेति। अपि च विरोधिगुणोदयं विना निवर्तमानश्चैतन्यगुणो न देहस्य संभवति चन्दनादि गन्धवदिति ज्ञानसुखादिर्न देहगुणोयावद्द्रव्यभावित्वात् । देहगुणः प्रत्यक्षयोग्यो बाह्येन्द्रियग्राह्यश्च दृष्टो ज्ञानादिस्तु न तथेति न देहगुणः । ततश्चोत्पत्तिमत्वात्परार्थत्वात् रूपादिमत्वात् शरीरस्य नात्मत्वमिति देहात्मवादः ।

इति प्राचीनमतम् । नवीनास्तु, अनेकरूपावयवैर्नानारूपविशिष्ट एव विलक्षणो जायतेऽर्थाद व्याप्यवृत्त्येव रूपमवयविनिजायते । लौकिकविषयतासम्बन्धेन द्रव्यचाक्षुषं प्रतिसामानाधिकरण्येन महत्त्वविशिष्टोद्भूरूपस्यैव कारणत्वं समवायसम्बन्धेन भवति, नतु कारणतावच्छेदककोटौ व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोर्वा प्रवेशे गौरवमात्रमेव । अतएव "लोहितो यस्तु वर्णेन मुखेपुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलोवृष उच्यते" इत्यादि शास्त्रमप्यनुकूलं भवतीति । नच तन्त्वादिकारणविविधनीलादिवर्णैः पटेऽवयविनि चित्ररूपारंभस्तथैव देहावयवगतानुद्भूतचैतन्यैर्देहे उद्भूतचैतन्योत्पत्तिरिति वाच्यम्, चैतन्यसामान्यस्यैवभूतेतदवयवे वा वृत्तित्वे प्रमाणाभावात् । **अन्योन्याश्रया**च्चेति यदिशरीरे चैतन्यं तदातदन्यथाऽनुपपत्त्यातत्कारणतदवयवेषु चैतन्यमनुमीयेत, यदातु कारणभूतावयेषु कल्पनास्याच्चैतन्यस्य तदातत्कार्यभूते देहे चैतन्येति भवत्येवान्योन्याश्रयोदुरवस्थ एव भवतीति । ततो न देहश्चेतन इति । **अपि च विरोधि गुणोदयं विना**पीत्यादि—" अयंभावः—"पाकजरूपादिकं परित्यज्य तदन्यविशेषगुणस्तदुत्तरजायमानेन निवर्तते इति भूतगुणायावद् द्रव्यभाविनः, यावत्कालं द्रव्यं भवति तावत्कालं तदीयगुणोप्यवतिष्ठते एव । आत्माकाशादेर्विशेषगुणस्तु नयावद्द्रव्य भावीनि आत्मगुणेभ्योभूतगुणस्य वैधर्म्येण न भूतगुणत्वं ज्ञानस्य अभावद्रव्यभावित्वात् । अर्थात् स्वात्ममात्रग्राह्यत्वं मनोग्राह्यत्वं मनोग्राह्यत्वं च ज्ञानसुखादेः शरीरविशेषगुणेभ्योवैधर्म्यम् । रूपरसादयस्तु देहगुणाः स्वपरग्राह्यावहिरिन्द्रियग्राह्याश्च भवन्ति, इति विरुद्धशालित्वात् ज्ञानं न भूतगुणः । तस्मात् उत्पत्तिमत्वाद्रूपादिमत्वाच्च न देह आत्मेति संक्षेपः ॥

शरीरस्य चक्षुरादिवाह्येन्द्रियप्रत्यक्षविषयत्वाद्भौतिकत्वाद्वेति प्रत्यक्षानुमानप्रमाणैरात्मत्वं निराकृत्य, तदनन्तरंवाह्यप्रत्यक्षाऽग्राह्यतयाऽन्तरत्वेनेन्द्रियस्यैवात्मत्वंव्यवस्थापयितुमुपक्रमते

अथ भवतु तदेन्द्रियमेवात्मा । तदिन्द्रियं चक्षुरादिकं नेदं पदवाच्यम् येन शरीरवदहंकारपदवाच्यं भवेत् । नवा तदिन्द्रियमुद्भूतगुणाधारतया स्थूलं येन स्थूलप्रतिभासवत् इन्द्रियविषयत्वेऽहंमिति ज्ञानस्य रूपावयवादिप्रतीतिप्रसङ्ग आपद्येत तस्मादिन्द्रियमेवात्मा । अत एवोपनिषदि चक्षुरादीनां परस्परं चेतनवत्कलहोपि श्रूयते ।

अथ भवतु तदेन्द्रियमेवात्मा इत्यादि । शरीरस्यात्मत्वे वहवो दोषा उदाहृत्य देहस्यात्मत्वं निराकृतम् परन्तु करणरूपेन्द्रियस्यात्मत्वे ते दोषाभवदुक्ता न भवन्तीति दर्शयितुमाह **तदिन्द्रियं चक्षुरादिक**मिति अयमाशयः, इदमेतदोः प्रत्यक्षविषये शक्तिः, अर्थादिदंशब्दः प्रत्यक्षमेवार्थंबोधयतीति नियमः ततश्च देहस्य स्थूलतयेन्द्रियग्राह्यतया च ग्रहणं भवतीत्यत इदं बोध्यतयानाहङ्कारविषयता, इन्द्रियस्य तु, अतीन्द्रियतयानेदं पदवोध्यता, तस्मादिन्द्रियस्याहङ्कार वोध्यत्वे नकोपि दोषः । नवा उद्भूतरूपादिगुणानिस्थूलानि तत्र भवन्ति, येनेन्द्रियविषयत्वेऽहमिति ज्ञानस्य रूपावयवादिप्रतीतिरापादिता स्यात् । किञ्चज्ञानमिन्द्रियधर्मः इन्द्रियाणां यो व्यापारस्तादृशव्यापारजनिततयेन्द्रियफलत्वात् यस्य व्यापारस्य यत् फलं तत् तस्मिन् वर्तते इति नियमात् यथाऽत्मनः पवित्रीकरणाय क्रियमाणगङ्गास्नानं देवदत्तीयव्यापारस्य फलं शुचित्वं देवदत्ते समवेतम्, यथा देवदत्तीययागादिव्यापारजनितं स्वर्गादिफलं देवदत्ते एव समवैति तथैव प्रकृते इन्द्रियव्यापारजनितज्ञानात्मकफलमिन्द्रिये एव समवेतं भवेदिति ज्ञानाधिकरणत्वादिन्द्रियमेवात्मा । नचैवमिन्द्रियस्यैव चाक्षुषादिज्ञानात्मकक्रियां प्रति कर्तृत्वं करणत्वं चापतेत् । नच तत्संभवति ? क्रियायां स्वतन्त्रस्य कर्तृत्वंभवति, करणं च कर्तृव्यापारविषयः, न चैतदुभयं परस्पर विरुद्धमेकस्य संभवतीति वाच्यम्, सर्पः स्वात्मानं स्वेनैववध्नातीत्यत्र वन्धनक्रियायां सर्पस्यैव तदुभयदर्शनात् । **अतएवोपनिषदीति** अयंभावः कदाचित् पूर्वकाले चक्षुरादयः संमिलिताः तत्रसमेत्याहं श्रेष्ठ इत्येवं विवदमाना अभूवनतस्ते विवादप्रशमनायपितरं प्रजापतिं प्रतिजग्मुः । गत्वाच विवादविषयं पितरं कथयामासुः । ततस्तेषां वचनमुपश्रुत्यसहोवाच "हे चक्षुः त्वं शरीराद्विनिर्गत्यान्यत्र गच्छ, किञ्चित्कालमन्यत्रावस्थायपुनरागच्छेति । ततश्चक्षुर्गतः पुनरागत्यपृष्टवान्, मयिगते कथं भवतां व्यवहारो जातः इति । ततस्तेवागादय ऊचुः । अन्धस्य या गतिस्तेनैव प्रकारेणास्माकमपि व्यवहारोऽभूत् । एवं प्रकारेण सर्वेषां गमनमप्यभूत्, तदनन्तरं प्राणः शरीरान्निर्गमनमिच्छन् प्रयत्नं गमनार्थमकरोत्ततस्तेवागादयोमृतप्राया अभवन्नितिदृष्ट्वापित्रा कथितम्, सर्वेषामिन्द्रियाणां मध्ये प्राण एव श्रेष्ठ इति । ततस्ते वागादयः प्रीताः शरीरमाविशन्निति । इत्येवं वागादीन्द्रियाणां कलहोब्रह्मलोकं प्रतिगमनमागनं चैतत्सर्वं श्रुत्वा दृष्ट्वा च निश्चीयते यतः इन्द्रियाणां व्यवहारः सर्वोऽपि, अस्मदादिचेतनवदेवेति । ततश्चेन्द्रियमेवात्मा ननु देह आत्मा, नवा एतदन्यग्रहतथासति गौरवात् । अतः सम्यगेवकथितं प्रश्नकर्त्रा, भवत्विन्द्रियमेवात्मेति पूर्वपक्षस्य सारः ।

यदेतदिन्द्रियाणामेवात्मेतिवदतां मतं तन्न समीचीनम् । तथाहि प्रत्येकं चक्षुरादिकमात्मा, अथवा मिलितं सर्वं तदात्मेति विकल्पासहत्वात् । तत्र यदि प्रथमः कल्प्येत तथा चक्षुषाऽनुभूतस्य चक्षुरभावेतत्सत्वेवा, इन्द्रियान्तरेण स्मरणं न स्यात् । अनुभवस्मरणयोः सामानाधिकरण्येनैव कार्यकारणभावस्य नियमात् । दृश्यते च यमहमद्राक्षं तमेवेदानींत्वञ्चस्पृशामीति । नवा संमिलितेन्द्रियग्रामस्यात्मत्वमिति द्वितीयः पक्षः ? मिलितानामपि तेषां चेतनत्वासंभवात् । शब्दादिविषयः प्रतिनियतग्राह्योजातः संभूयतैरेकं रूपादिकमनुभूयेत नवा स्मर्यते । तथा यस्य कस्यचिदेकस्येन्द्रियस्य विनाशे मरणमेवापद्येत, नत्वेवं भवति, इन्द्रियविलोपिजीवनदर्शनात् । नवा इन्द्रिय व्यापारफलतया ज्ञानमिन्द्रियसमवेतं व्यभिचारात् ।

इन्द्रियात्मवादं दूषयितुमुपक्रमते **यदेतत्** इत्यादिं । दूषणप्रकारमेव दर्शयति **तथाहि प्रत्त्येक**मित्यादि । अयमाशयः यदिप्रत्येकमिन्द्रियमात्मा, एकमिदं षाट्कौशिकं शरीरमनेकचेतनवत् स्यात् । ततश्च यथैकं नगरमनेकशासकयुक्तं भवतिं तत्र मदीयं नगरं मदीयं नगरभिति विंदन्तस्ते, कोपि तन्नगरं ज्वालयतिं, क्षतविक्षतं च करोतीतिं ग्रामस्य भवति सैवस्थितिः शरीरस्य स्यात् , कश्चित् पूर्वाभिमुखं देहं करिष्यति, इतिं विरुद्धदिक् क्रियत्वे शरीरमुन्मथ्येत निष्क्रियं प्रसज्येत । तदेवमिन्द्रयसमुदायोनानुभवकर्ता नवा स्मरणकर्ता, विंकल्पासहत्वात् , किं समुदायः संयोगरूपः संख्यारूपोवा उभयथापि तस्य गुणरूपत्वेन ज्ञानाधिक्रणत्वं न स्यात् , गुणस्य गुणानधिकरणत्वात् । गुणाधिक्रणत्वे, द्रव्यत्वप्रसङ्गात् गुणाधिकरणमेव द्रव्यत्वमिंति संयोगादेर्नगुणाधारत्वमिति तस्य ज्ञातृत्वासंभवात् , द्रव्याश्रितत्वं निर्गुणत्वमित्यादिगुणलक्षणात् "अद्रव्यं कथ्यते प्राज्ञैः संयोगरांहतं च यत्" इत्याचार्योक्तेः । यदि संयुक्तानां तेषामिन्द्रियाणां संङ्घातत्वेन विवक्षाभवेत्तदापि, वहूनामिन्द्रयाणां चाक्षुषाश्रयत्वं स्पार्शनाश्रयत्वं वा । एवञ्च चक्षुषो द्रष्टुः स्प्रष्टुश्च विभिन्नत्वात् स्मरणं नोपपद्येत नान्यदृष्टं स्मरत्यन्योनैकं भूतमपक्रमादिति ।

एवमिन्द्रियैकस्यकस्यचिद्विनाशेजीवस्य सर्वथैवविनाशोमरणमेवापद्येत् । यद्यपि केनापि कथितम् "द्रष्टुश्चक्षुषो न जिह्वा" इत्यादि, तन्न तत्रत्यवचनस्यान्यपरत्वात् आसीत् कश्चित्सत्यतपानामब्राह्मणः कुत्रचिदधिष्ठाने तपः कुर्वन् । तत्र कदाचित् कमपि स्वशरविद्धंवराहंमुनेराश्रमे आगतं दृष्ट्वा, सव्याधोमुनि तत्रागत्य पृष्ठवान् भगवन् ममलक्ष्यो वराहो भवदाश्रमे कुत्रविद्यते तमन्विषामि, तं मारयिष्यामि स्वशरीरयात्रायै । ततोमुनिर्यद्यहं सत्यंवदिष्यामि तदा शरणागतपालनं न स्यात् तथा व्याधस्य हत्याकरणेनाधोगतिः स्यादुवाच हेव्याध ? दृष्टं चक्षुषा तस्य जिह्वानास्ति, यद्वक्तव्यं वदिष्यति, या च वदिष्यति तया न व्याघ्रो दृष्ट इति । एतावतेन्द्रियस्य ज्ञातृत्वंनायातीतिनेन्द्रियाणामात्मत्वम् । **नवा इन्द्रियव्यापारफलतयाज्ञानमिन्द्रियसमवेतमिति**ज्ञानमिन्द्रियधर्मः इन्द्रिय

अथेन्द्रियाणामनित्यत्वेनात्मत्वं न भवतु, मनस्तु नित्यमिति मानस एव चैतन्यं भवतु ? तच्च मनः सर्ववाह्येन्द्रियाणामध्यक्षमिति सर्वस्यापि स्वस्वविपये प्रेरकमिति प्रमाणतो ज्ञायते व्यवह्रियते च। एवञ्च नित्यस्य तस्योत्पादविनाशरहिततयाऽनुभव स्मरणादीनामनुपपत्तेरिति, शङ्कापि न भवतीत्यतो मन एवात्मा।

फलत्वात् , व्यापारफलं यद्भवति, तत्तस्मिन् समवायेन तिष्ठति यथा स्नानव्यापारफलशौचादिकं देवदत्तसमवेतमित्यादिपूर्वपक्षे कथितम् , तदपि न समीचीनं व्यभिचारात् । तथाहि कृपाणपरशुव्यापारजन्यपापस्यद्वैधीभावफलस्य कृपाणे परशौ वा, असमवेतत्वेन तत्र व्यभिचारात् । कृपाणस्य जड़त्वेन पापासंभवात् । द्वैधीभावफलस्य च परशावसंभवः किन्तु मारके देवदत्तादिकर्तरि भवति, छेदनंचच्छेद्येकाष्ठादौ भवतीत्येवं यद्यद्व्यापारजनितं तत् तन्निष्ठमिति नियमस्य व्यभिचारो भवतीत्यतश्चक्षुरादिव्यापारजन्यस्य ज्ञानस्य चक्षुरादिककरणाश्रितत्वं भवति किन्तु करणात्मक चक्षुरादेर्यः प्रयोजकः स्वतन्त्रः कर्त्ता, तस्य चेतनत्वात् तस्मिन्नेवज्ञानं समवेतमिति ज्ञाताजीव एव । एवञ्च चक्षुरादीनामनित्यतया तद्विनाशेऽनुभवस्मरणादीनां नैवोपपत्तिः स्यादितिनेन्द्रियस्यात्मत्वं किन्तु चाक्षुषादिज्ञानस्य यः कर्त्ता स एव ज्ञातेतिसंक्षेपः इतीन्द्रियात्मवादखण्डनेतत्वदीपः ।

ननु चक्षुरादिज्ञानकरणस्यानित्येनानुभवस्मरणादीनां तदभावे उपपादनासंभवात्तेषां वाह्येन्द्रियाणामात्मत्वं न भवतु । परन्तु मनस्तु नित्यमागमापायिरहितमिति तद्विनाशाभावेन तस्यात्मवन्निन्यत्वेन स्मरणाद्यनुपपत्त्यभावेन तथात्वमस्तु ? इत्याशङ्कांनिरसितुमाह **अथेन्द्रियाणामनित्यत्वेन**इत्यादि । यमहमद्राक्षं तमेव स्मरामीत्यनुभवस्मरणमिन्द्रियस्यानित्यत्वेनैव संभवतीत्यादिका दोषा इन्द्रियाणां चेतनत्वे, तथा वहूनांचेतनानामेकत्रावस्थाने परस्परं तेषां कलहेव्यवहार विलोपो भविष्यतीत्यादिका दोषाः समुदीरितास्तेदोषामनसो नित्यत्वे सरलतयैव परिहृताभवन्तीति । **वाह्येन्द्रियाणामध्यक्ष**मित्यादि । 'मनोदशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् । तच्चान्तः करणंवाह्यपरतन्त्रंविनेन्द्रियैरित्यादिना सर्वस्येन्द्रियस्याध्यक्षता मनसि कथिता । दृश्यते च लोके, कदाचित्स्फीतालोकसंयुक्तघटे चक्षुषः संयोगे सत्यपि चक्षुषो मनसः संयोगाभावे, विषयान्तरसंसक्ते वा मनसि चाक्षुषंदर्शनं न भवति मनः संयोगे सति चाक्षुषादिज्ञानं भवति । एवंत्वगादिस्थलेपि ज्ञातव्यमिति । तस्मान्मन एव ज्ञाता, तस्य नित्यतया सर्वमुपपद्यते इति ।

अथोत्पत्तिविनाशशीलत्वादिदं प्रत्ययत्वात्तथादेहेऽहंकारप्रत्ययविषयत्वाभावाच्च न भौतिको देह आत्मेति दर्शितम् । एवमेवेदं प्रत्ययविषयत्वाभावात् चक्षुरादीनां विलोपे प्रतिसन्धानाद्यनुपपत्तिश्चस्यादतश्चक्षुरादिकमिन्द्रियं प्रत्येकं संमिलितं वा तदिन्द्रियंचक्षुरादिकंनात्मेति प्रसाधितम्। परन्तु एते दोषा नित्यस्यमनस आत्मत्वस्वीकारे न संभवन्तीत्यतोमन एवात्मेति पूर्वपक्षकर्तृ-

यदुक्तं नित्यत्वान्मन एवात्मेति तन्न शोभनम् । अतीन्द्रिये मनसिज्ञानसुखादि सत्त्वेपि तत्प्रत्यक्षानुपपत्तेः प्रत्यक्षेमहत्वस्य कारणत्वात् । तथा च मनसि महत्त्वलक्षण कारणाभावेन सुखादिप्रत्यक्षरूपकार्याभावस्यार्थतः सिद्धत्वात् । अपि च "मनोनात्मा करणत्वात् चक्षुरादिवदित्यनुमानेनापि मनसश्चैतन्यं न संभवति । या क्रिया

णा माशयमाकल्य्य तन्निरासायोपक्रमते **यदुक्तं नित्यत्वान्मन एवात्मेती**त्यादि ।

ननुयथानित्यत्वाज्जीव आत्मेति स्वीक्रियते, तथैव नित्यस्य मनस आत्मत्वस्वीकारे काक्षति स्तत्राह **अतीन्द्रियेमनसि** इत्यादि । प्रायोऽप्रत्यक्षेऽधिकरणे विद्यमाना अपि विशेषगुणाः सामान्यगुणा वा प्रत्यक्षा न भवन्ति नहि भवति घटस्याप्रत्यक्षत्वे तदीयगुणारूपादयः प्रकाशमानाः । नच घटस्याप्रत्यक्षत्वेपि तद्गतगुणादिना सहसंयुक्तसमवायसम्बन्धेन रूपादीनां प्रत्यक्षता स्यादिति वाच्यम्, प्रथमतो घटस्य संयोगे सत्येव तद्घटितसंयुक्तसमवायसम्वन्धेन प्रत्यक्षसंभवात् नान्यथेति । एवं च मनसोऽतीन्द्रियत्वेन मनस्थितज्ञानसुखादीनां प्रत्यक्षत्वं न स्यादिति । मनसि विद्यमानस्यापिज्ञानसुखादेरप्रत्यक्षत्वेकारणमाह **प्रत्यक्षे महत्वस्य कारणत्वादिति** अयंभावः "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना" इत्यादिनियमात्, यथा वर्तमाने विषये एव संयोग तत्समवायाद्यन्यतमसंनिकर्षे सति लौकिकप्रत्यक्षं भवतीति, इन्द्रियसंयोगादिसंनिकर्षे सत्येव घटादिविषयस्य प्रत्यक्षं भवति । तथैव लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रतिमहत्वस्यापि कारणत्वमावश्यकमेव । अतएव परमाणौचक्षुरादिसंयोगस्योद्भूतरूपविद्यमानत्वेपि परमाणोश्चाक्षुषंनभवति । इत्थमेव परमाणुकल्पस्य मनसि महत्वस्योद्भूतरूपस्यचाभावेन तत्र मनसि ज्ञान सुखादीनां प्रत्यक्षता न स्यात् एवञ्चाहं सुखीदुःखीवेति सर्वलोकसाक्षिकप्रतीतेरुपपादनं न भवेदतो नित्यमपि मनोनात्मा किन्तु तदतिरिक्त एव कश्चिदात्मेति । **महत्वलक्षणकारणाभावेन** इत्यादि । व्यापकाभावेन व्याप्यस्याभावो भवतीति स्थितिः यथा यत्र गुणादौ द्रव्यत्वं न भवति, अर्थाद् यत्र द्रव्यत्वस्य व्यापकस्य गुणादावभावस्तत्र गुणादौ कथमपि पृथिवीत्वस्य सत्वं न भवत्यपितु तदभाव एव भवति । यथा वा जलादौ वह्न्यभावस्य सत्वे वह्निव्याप्यस्यधूमस्याभाव एव भवति नतु कथमपि सत्वं भवति तदुक्तं "व्याप्यव्यापकभावो हि भावयोर्यादृशो मतः । तयोरभावयोस्तस्माद्विपरीतः प्रतीयते । अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते । तदभावोऽन्यथा व्याप्ये व्याप्यकः साधनात्ययः, इति ।

यथा वह्नौ साध्ये धूमादिर्हेतुर्व्याप्यो वन्हिश्चव्यापकः तयोरभावो व्यापकोवह्न्यभावश्च व्याप्यो भवति, धूमाभावोजलादावपि वर्तमानोऽयोल्केपिवर्तते, वन्ह्यभावस्तु जलादौवर्तमानोपि, अयोगोल्के न भवति, यतोवन्ह्यभावविरोधिनो वन्हेरेव तत्र सद्भाभावादित्येवं प्रकारेण वन्ह्यादेर्व्या-

सा कर्तृकरणसापेक्षैव भवति, छिदादिक्रियावत्, यथा चाक्षुषज्ञानक्रियायां चक्षुः करणं तथैव सुखादिज्ञानक्रियायां किमपि करणमेष्टव्यमिति तत्र चक्षुरादेः करणत्वा संभवात् मानस एव तत्सिद्ध्यति परिशेषात्। एवं चैकस्मिन्नेव मनसि परस्परविरुद्ध पकस्याभावो वन्ह्यभावो व्याप्यो भवति, अल्पदेशवृत्तित्वात्। तथाऽन्वये व्याप्योपि धूमो- व्यापकोऽधिकायोगोलादिष्वपिवर्तते इति धूमाभावो व्यापकोभवत्ययोगोलकरूपाधिकदेशवृत्तित्वात् यथावा शूद्रादौ निवर्तमानं ब्राह्मणत्वं शूद्रादिषु कठत्वकाण्वत्वादिकमपि निवर्तयति। तथैव मनसि प्रत्यक्षकारणं महत्वं तद्गतज्ञानसुखादीनपि निवर्तयति। इत्येवं महत्वाभावेन सुखादेरप्यभावो मनसि भवत्येव अतोनित्यमपि मनश्चक्षुरादेरात्मत्वपक्षदोषविनिर्मुक्तं भवदपि दोषसामान्यविनिर्मुक्तं न भवती त्यतो मनोपिनात्मेति। एतच्च दूषणं न्यायमतमाश्रित्योदीरितम् मतान्तरेण दोषंवक्तुमाह **अपिच** इत्यादि।

वाह्यविषकमान्तरविषयकं वा यद्ज्ञानं भवति, तादृशज्ञानस्य करणतया मनसः कल्पनं भवतीति। यथा वाह्यविषये स्वस्वविषयसंयोगविद्यमानेपि सर्वेन्द्रियेणयुगपदेव रूपादिसर्वविषयकं ज्ञानं न भवति, अतो वाह्येन्द्रियव्यतिरिक्तमपि किञ्चित्कारणं विद्यते इति कल्पते, यस्य सम्बन्धेन वाह्येन्द्रियं स्वविषयकमेवज्ञानमुत्पादयति, यस्य च सम्बन्धाभावेन तदपरं वाह्येन्द्रियं स्वविषयकं ज्ञानं नार्जयति। इति चक्षुरादिवत्, मनोपि ज्ञानकरणमेव। एवं प्रकारेण यथावाह्यार्थ विषयेषु युगपज्ज्ञानानुत्पत्तिहेतुना समस्तवाह्येन्द्रियसहकारितयाऽणुरूपनित्यस्य मनसः करणत्वं भवति, तथैवान्तरसुखदुःखादिप्रत्यक्षेष्वपि मनसः करणत्वमनुमानद्वारेणसिद्ध्यत्येव तथाहि, सुखदुःखादिसाक्षात्कारः सकरणकः क्रियात्वात् ज्ञानत्वाद्वा, रूपादिविषयक क्रियायां चक्षुरादिवत्, क्रियामात्रस्य करणसापेक्षत्वनियमेन छिदादिक्रियायां वास्यादिवत्, रूपादिज्ञानक्रियायां वाह्येन्द्रियचक्षुरादिवत्, आन्तरसुखादिविषयकज्ञानक्रियायां मनसः करणत्वं भवति। आन्तरसुखादिप्रत्यक्षे मनोमात्रस्य करणत्वं वाह्यरूपादिविषयकक्रियायांतु, वाह्येन्द्रिय साक्षादेवकरणत्वंमनसस्तु, वाह्याभ्यन्तरविषयकज्ञानक्रियायां साक्षात्करणत्वं परंपरया वा करणत्वम्। अर्थात् चक्षुरादिज्ञानक्रियायामेवकरणत्वं मनसस्तूभयत्रापि करणत्वम्। परन्तु आन्तरे साक्षात् वाह्येतु परंपरया एतावानेव विशेषः। तदेव यथा चक्षुरादेर्वास्यादेर्वाकरणतयैवसिद्धिर्भवति तथैव मनःसिद्धिरपिकरणरूपत्वेनैव नतु रूपान्तरेणेति। मनसि प्रमाणंतु, अनेकविषयसंयुक्तेष्वप्यनेकेन्द्रियेषु सर्ववियकज्ञानमेककालेन भवतीति "युगपद् ज्ञानानुपत्तिरेव। अन्यथा तानि सर्वज्ञानि युगपदेवोत्पद्येरन्निति। ननु यथाऽन्तरवस्तुविषयकप्रत्यक्षकरणतया नित्यंसर्वार्थग्राहितयामनः सिद्धमिति तस्मिन् ज्ञानकर्तृत्वमपि स्वीक्रियतां लाघवात्, परिकल्प्यतदतिरिक्तजीवाऽपेक्षया कल्पितमनसः कर्तृत्वेलाघवात् तदेव कर्तृ ज्ञानक्रियाया इति।

कर्तृत्वकरणत्वयोरसंभवान्न समावेशः। न च मनः करणान्तरमादाय स्मरणादिषु कर्त्ता, इति वाच्यम् तथा सति संज्ञामात्रे विवादस्य पर्यवसानादिति न मनसः, ज्ञानादिकर्तृत्वमिति। एवं च चक्षुरादिवत् तत् करणमेवेति।

नचैकस्मिन् विरुद्धतया कर्तृत्वकरणत्वयोः समावेशासंभव इति वाच्यम् छिदादिक्रियासु तथाऽदर्शनेपि क्रियासामान्ये तथा नियमाभावात्, यथा "सर्पः स्वात्मना स्वात्मानं वेष्टयति" इत्यादिस्थले वेष्टनक्रियायां कर्तृभूतस्य तस्यैव सर्पस्य करणत्वस्यापिदर्शनादितिचेत् तत्राहुर्योगीन्द्राः "एकस्मिन्नेव मनसि परस्परविरुद्धकर्तृत्वकरणत्वयोरसंभवादित्यादि" अयंभावः ज्ञानकरणतया प्रसिद्धस्य तस्मिन्नेवकर्तृत्वं स्यात्। यतः कर्तृत्वकरणत्वयोः परस्परं विरोधात्। स्वतन्त्रः कर्त्ता-ईप्सिततमं करणमित्यनुशासनात्। स्वेतरकारकाप्रयोज्यत्वसर्वकारकप्रयोजकत्वम्। अर्थात् स्वेच्छया स्वप्रवृत्तिकत्वलक्षणस्वातन्त्र्यरूपम् स्वेच्छानुरोधेनैव साध्यसिद्धिजनकसामर्थ्यरूपं कर्तृत्वम्। करणं तु परेच्छानुरोधेन स्वव्यावृत्तिकत्वरूपपारतन्त्र्यघटितम्। परस्याभीष्टक्रिया सम्पादने प्रकृष्टोपकारकत्वरूपं वाणादिवत्। यथोक्तलक्षणयोः कर्तृत्वकरणत्वयोः परस्परविरुद्धयोरेकत्रसमावेशासंभवात्। वेष्टनक्रियायां चेतनस्य सर्पादेरेकत्रक्रियायां रूपभेदात् कर्तृत्वं करणत्वं संभवेदपि कथंचित्, यद्यपि तथापि जडस्य भौतिकस्य मनसश्चेतनत्वे दृढतरप्रमाणाभावेन कथमपि कर्तृत्वं करणत्वं च न संभवति। अपि च लोकसिद्धव्याप्त्या या क्रिया सा करणिकेति व्याप्त्या चक्षुरादिवत् स्वेतरचेतनदेवदत्तादेः सुखादिसाक्षात्कारादौ करणरूपेणैव सिद्धत्वात् कथमपि मनसोज्ञानकर्तृत्वरूपं ज्ञातृत्वं नैव सिद्ध्यतीति।

किञ्च सर्वथा प्रत्यक्षविषयातीतेन्द्रियपदार्थेषु प्रत्यक्षमूलकानुमानादिप्रमाणान्तरस्याभावेन शास्त्रमात्रप्रमाणं न तदन्यत् प्रमाणम्। शास्त्रं च "अन्नमयं हि सोम्य ! मन आपो मयः प्राणः" इत्यादिकमेव। ततश्चविज्ञानमयस्यजीवात्मान उपकरणरूपेणैवमनसः सिद्धिर्भवतीति शास्त्रसिद्धमेव साधकतमत्वरूपंकरणमिति तस्मिन् करणरूपे मनसि परस्परविरुद्धकरणत्व कर्तृत्वोभयमपि स्यादिति भवद्वचनं न कोपि स्वीकुर्यात्, भवद्वचनेविश्वासाभावात् विश्वासे तु पक्षप्रतिपक्षभाव एव न भवेदिति।

ननु भवतु बाह्यरूपस्पर्शादिविषयेषु तथाऽभ्यन्तरसुखदुःखादिसाक्षात्कारिषु मनस एव कर्तृत्वम् आभ्यन्तरसुखाद्यनुभवेतु तन्मनोऽन्यमेवकरणान्तरं कल्प्यते तद्बलेन स्मरणादिषु कर्तृभविष्यति, तत्र मनोतिरिक्तमेव करणान्तरं भविष्यतीत्याशङ्क्य तन्निरासाय प्रक्रमते **नच मनः करणान्तरमादायेत्यादि** स्वभिन्नमन्यं किमपि करणतया स्वीकृत्य सुखादीनां स्मरणं जनयिष्यति, यथा सिद्धान्ते आत्मारूपादिवाह्यपदार्थविषयकज्ञानोत्पादने, मनोतिरिक्तं चक्षुरादिकमादायवाह्य

अथकोयं मनः पदार्थः ! नचान्तरं ज्ञानकरणं द्रव्यं तस्य स्वरूपं प्रमाणञ्च किमिति न च "युगपज्ज्ञानानुत्पत्तिरेव तथेति। सत्यं तथापि तस्य मनसस्तत्वान्तरत्वं कथमिति ? मनसः स्वीकारेपि युगपत्स्मरणानुत्पत्त्यर्थं कारणान्तरस्य संस्कारादेरावश्यकत्वात्। अस्य स्मर्तुरनेकार्थानुभवजनितसंस्काराणां विद्यमानत्वात्। तथापि तेऽर्थानस्मृता भवन्ति। संस्कारोद्बोधककारणस्य क्रमिकत्वात् क्रमिकं स्मरणमिति चेत् ? एवमति प्रणिधानमात्रोद्बोधनीयसंस्कारात्स्मृतियौगपद्यमापतेत्। यदि तु शुभाशुभादृष्टबलात्स्मृतिव्यवस्थाभिमता, क्रमिकज्ञानस्वभावाद्वा, तदा बहिरिन्द्रियेष्वपि नानार्थसम्प्रयुक्तेषु व्यवस्थोपपादनसंभवात्, आन्तरकरणान्तरस्वीकारो निरर्थकएव।

विषयकज्ञानमर्जयति, तथैव प्रकृतेपीति प्रश्नकर्तुराशयः। उत्तरयति समाधाता **तथासति संज्ञामात्रे विवादस्यपर्यवसाना**दित्यादि अयंभावः क्रियामात्रं प्रतिकर्त्ताकरणं कर्मचापेक्षितमेव भवति, यथा गमनादिक्रियादौ दृष्टम्। इहापि, आभ्यन्तरसुखादिविषयकज्ञानक्रियायामुपर्युक्तनियमेन कर्त्ताआत्माकरणं मनः। अत्रमनः करणमादाययोज्ञानंसम्पादयतिं तस्यात्मेति संज्ञाभवति, भवन्मतेतु मनएव करणान्तरमादाय ज्ञानं सम्पादयेदिति मन्मते कर्तुरात्मेति संज्ञा, भवन्मते कर्तुःमन इति संज्ञा ततश्च संज्ञानाममात्रे विवादः फलेतु न कोपि विवादः। कारणस्य कर्तुरुभयत्रापि स्वीकारात्। एवं सति मदिष्टस्यज्ञातरि, अन्तःकरणभेदस्य न काप्यनुपपत्तिर्भवति। अर्थात् संज्ञातु इच्छा प्रयोज्या अर्थेतु न कोपि विवाद इति।

परन्तु ज्ञातुरात्मनोमनः संज्ञायां लौकिकशास्त्रीयव्यवहारस्य विरोधो भवति, नहि लौकिकः शास्त्रीयोवा पुरुष आत्मनं मनः संज्ञया व्यवहरति, देवदत्तो यज्ञादिकं गमनादिकं करोति, इत्येव प्रयोगो भवति नतु मनोयज्ञादिकं करोतीति कश्चित्प्रयुङ्क्ते। अतोनात्मनि मन इति संज्ञाऔचित्यमादघाति। तस्मात्, यथा नचक्षुरादिकरणमात्माकरणत्वात्, तथैव मनोपिनात्माकरणत्वादेव वास्यादिवत्। किञ्चमनसि महत्वाभावेन प्रत्यक्षे च महत्वस्य कारणताया अन्यत्रव्यवस्थापतेन मनसिज्ञानसुखादीनां सत्वेपि तत्प्रत्यक्षत्वं न स्यात्। अपिच मनसस्तथात्वे, सर्वोपिमन प्रत्त्येतीत्येव प्रतीयात्, नत्वहं प्रत्त्येमीति विजानीयात्। तस्मान्मनसो ज्ञानदौ कर्तृत्वं न कथमपि संभवतीति संक्षेपः।

ननुमनान्तरसिद्धमनसः प्रौढिवादेन निराकरणाय तदीयस्वरूपस्य तत्र प्रमाणस्य चाभावं दर्शयित्वा स्वमतेन च तस्य मनसोबुद्धावेवान्तर्भावं प्रर्शयितुं प्रक्रमते **कोयं मनः पदार्थः ?** इति। अत्र "किं शब्द आक्षेपे। अर्थात् मनस्तत्वान्तरत्वंनास्ति नवा तत्र चं प्रमाणंकिमप्यस्तीति। **नच युगपज्ज्ञानानुपपत्ति**रिति। अन्यथाऽनुपपत्तिरेवतत्र प्रमाणम्। अन्यथाऽनुपपतिप्रमाणस्य

केचित्तु कारणजनितस्यान्तरसुखादिकार्यस्यात्मसमवेतस्यादृष्टादिनिमित्तकारणकस्यासमवायिकारणमपि किमपि वक्तव्यम्, तच्चपरिशेषादात्ममनः संयोग एवेति, सुखाद्यसमवायिकारणसंयोगाश्रयतयैव मनसः सिद्धिर्भवतीत्येवं क्रमेण संयोगाश्रयीभूतमनो रूपद्रव्यान्तरस्य सिद्धिर्भवतीति ।

सर्वतोवलीयस्त्वात् । युक्तिशतमवताय्यापि, अन्यथयितुं न शक्येति । सत्यंयुगपग्ज्ञानानुत्पत्तिरुक्ता परन्तु तत्रकारणं तुनैवोक्तम् । अदृष्टादिसहकारीविरहेणैव युगपज्ज्ञानानुपपत्तेरुपपत्तिसंभवात् । मनसः स्वीकारेपि एककालं युगपत् ज्ञानानुत्पत्तयेऽदृष्टसहकारिविरहस्यावश्यं स्वीकर्तव्यत्वात् । विद्यन्ते च नानार्थविषयकसंस्काराः तथापि ते नानार्थाः नैकदास्मृता भवन्ति, किन्तु एकस्यैवार्थस्य स्मरणं जायते अदृष्टवशात् स्मरणस्वीकारेतु तद्बलेनैव सर्वव्यवस्थोपपादनसंभवेन मनसोऽतिरिक्तद्रव्यान्तरस्य स्वीकारो निरर्थक एवेति ग्रन्थस्यमुकुलितोऽर्थः ।

मनसो द्रव्यान्तरत्वं नास्ति तथा, आत्मनः संयोगस्य सुखादिकं प्रति, असमवायिकारणत्वमपि नास्तीत्युपश्रुत्यमनः संयोगस्यजन्यसुखादीनामात्मनि समवेतानां परिशेषादसमवायि कारणत्वं साधयितुं प्रक्रमते **केचित्तु** इत्यादिना । अयंभावो भावकार्यमात्रे समवायिकारणमसमवायिकारणनिमित्तकारणमवश्यापेक्षितम् । एषु एकस्यापि कारणस्याभावेकार्यस्यानुत्पादात्, कार्येनियतपूर्ववृत्तिःकारणं कार्यंच प्रागभावप्रतियोगीतिनियमात् । कार्यं प्रतिदण्डादेः कारणत्वमन्वयव्यतिरेकगम्यम्, कपालतत्संयोगदण्डादिकारणानां सत्वे एव घटादिकार्यमुत्पद्यते इति स्थितिः । तथा च यथाघटोत्पत्तौकपालं समवायिकारणम्-तद्द्वयसंयोगोऽसमवायिकारणम् दण्डचक्रादिकं दृष्टमदृष्टं च शुभाशुभं निमित्तकारणम्, एषु सत्त्वे एव घटउत्पद्यते नान्यथेत्येवंसर्वस्य कार्यस्य कारणत्रितयाधीनत्वमेव । एवमेव, आत्मनि जायमानसुखादिकार्यस्यात्ममनः संयोगेन प्रत्यक्षीक्रियमाणकारणसुखादेरपि भावकार्यकारणत्रितयेन भवितव्यम् ।

तत्रात्मासुखस्य समवायिकारणंयत् आत्मनि सुखादेः समवेतत्वात्, आत्मनः संयोगश्चासमवायिकारणम्, प्रयत्नमदृष्टादिकं च निमित्तकारणम् । न चात्मगतो ज्ञानमेवासमवायिकारणंभवतु नतु आत्ममनः संयोग इति मनः कल्पनंमुधैवेति वाच्यम्, आत्मविशेषगुणानामसमवायित्वस्यास्वीकारात् । न च तेषाम् असमवायिकाणत्वे काक्षतिरितिवाच्यम् समावायिकारणविनाशे कार्यविनाशस्यावश्यकत्वात् । दृश्यते च कपालद्वयसंयोगरूपासमवायिकारणस्य विनाशे कार्यघटस्य विनाशः । कदाचित् कपालात्मकसमवायिकारणस्य विनाशेपि घटस्य विनाशः संभवति, तथापि द्व्यणुकसमवायिकारणे परमाणोर्नित्यत्वेन विनाशाभावेन नित्यत्वं प्रसज्येत द्व्यणुकस्येति, सर्वत्रासमवायिकारणविनाशस्यैव कार्यविनाशकत्वमिति स्वीक्रियते । एवञ्च सुखादिकार्यं प्रति यदि ज्ञानस्यासमवायिकारणत्वं मन्येत तदा सुखजनकं पूर्वकालिकं ज्ञानं प्रथमक्षणे उत्पद्यते, उत्पद्य

तन्मन्दम् । आत्मसमवेतस्य सुखादिकार्यपूर्वकालोत्पन्नानुकूलप्रतिकूलविषयसंयोगजनितज्ञानस्यैवात्मसंभवे तस्य समवायिकारणत्वात् । तत्र विषयसंनिकृष्ट एवात्मनिष्ठोऽसंमवायिकारणं भवति । तत्र च कारणमिन्द्रियसंयोगः प्रयत्नो दृष्टं चात्मनिष्ठम्, प्रयत्नस्य कारणं प्रयत्नपूर्वक्षणवृत्तिकार्यताज्ञानम् । इत्यादिक्रमेणात्मसमवेतसुखादिकं प्रत्यात्मवृत्तिगुणादिरेवासमवायिकारणं नतु, आत्ममनः संयोगोऽसमवायिकारणम् । येन तदनुरोधादप्रसिद्धात्ममनः संयोगस्यासमवायिकारणताद्वारेण मनसासिद्धिरपेक्षितास्यादिति न मनो द्रव्यान्तरम् ।

च सुखमुत्पाद्यक्षणिकत्वात् तृतीयक्षणे विनश्येत, तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वस्यैवक्षणिकत्वात् । एवञ्चप्रथमक्षणे ज्ञानं ततस्तद्बलात् द्वितीयक्षणे सुखोत्पत्तिज्ञानस्य स्थितिरित्येवं ज्ञानोत्पत्तिक्षणतृतीयक्षणे ज्ञानस्य विनाश इति स्वासमवायिकारणनाशे ज्ञानतृतीयक्षणे सुखादेः प्रत्यक्षासंभवः कारणाभावात् । तथा प्रत्यक्षे विषयस्यापि हेतुत्वेन विषयाभावे कथमिव सुखादिप्रत्यक्षंभवेदत आत्ममनः संयोगस्यकारणता स्वीकार आवश्यक एव । यथासमवायिकारणंयावत्कार्यमवतिष्ठते तथैव प्रायोऽसमवायिकारणमपि । निमित्तकारणंतु पूर्ववृत्तितयैवकारणमित्यतोमनः स्वसंयोगद्वारा कारणं भवतीति तस्य द्रव्यान्तरत्वमर्थत एव सिद्ध्यति संयोगस्य गुणतयाद्रव्यभिन्नेऽसंभवादित्याशयेनाह पूर्वपक्षी **केचित्तुकारणजनितस्यान्तरसुखादिकार्यस्य** इत्यादि । पूर्वपक्षमूलाक्षरस्तु न तिरोहित इति न पुनर्व्याख्यातःसम्प्रदायविदा स्वयमेवोहनीयः ।

समाधातोत्तरयति-‘**तन्मन्दमिति** । तदेवोपपादयति **तत्रचेत्यादि** तत्रान्तरसुखाद्युत्पत्तौ आत्मसमवेत ज्ञानमेवासमवायिकारणमिति । तथाहि—सुखादावान्तरविषयेऽनुकूले प्रतिकूले च दुःखादौअनुकूलविषयविषयकं तथा प्रतिकूलविषयविषयकम्, आत्मनि सुखादिपूर्ववृत्तिसुखदुःखकारणं च तत्र सुखादावसमवायिकारणं भवतीत्येव युक्तं लाघवात् । नतु सर्वथाऽप्रसिद्ध आत्ममनः संयोगाऽसमवायिकारणम् ‘तादृशस्य तस्य कारणत्वे गौरवात् । ज्ञानेन च रूपादितत्तद्विषयसंनिकृष्टचक्षुरसंयोग एवासमवायिकारणम् । तद्धेतुश्चेन्द्रियव्यापारः प्रयत्नं कारणम् । प्रयत्ने च चिकीर्षाद्वाराकार्यताज्ञानमेवकारणं भवति, स्मरणात्मककार्यताज्ञाने उद्बुद्धसंस्कारो भवति, अनुद्बुद्धसंस्कारात्स्मरणानुदयात् । स्मृतिकारणानुभवेहेतुज्ञानादिकारणम् । प्रमाणमनुभूतिः स्यात् स्मृतेरन्या स्मृतिः पुनः । पूर्वविज्ञानसंस्करमात्रजं ज्ञानमुच्यते” इति । संस्कारे स्मृति द्वारेण पूर्वानुभव एककारणं भवति । एवमदृष्टस्याप्यसमवायिकारणात्मनिष्ठः प्रयत्न एवेति । एवमिच्छां प्रति, इष्टसाधनताज्ञानं कारणमथवेष्टजातीयताया ज्ञानमेव कारणम्, आत्मगतद्वेषं प्रत्यनिष्टत्वज्ञानमथवा सर्पादिरनिष्टस्य साधनमित्यनिष्टसाधनताज्ञानमेवहेतुर्भवति । एवञ्च सुखःदुखेच्छाद्वेषप्रयत्ना, दृष्टसंस्कारादिजीवसमवेतगुणानामसमवायिमात्मविशेषगुणानां ज्ञानादीनामेव भवति नतु आत्ममनः संयोगस्यासमवायिकारणं भवति । कस्मिन्नात्मविशेषगुणेकस्यात्म-

यदपि नित्यद्रव्यस्य ये विशेषगुणास्ते द्रव्यान्तरसंयोगासमवायिकारणका एव पाकजरूपादौ वह्निसंयोगवत् । ततश्च मनः संयोगहेतुकतया मनसः सिद्धिरिति । तदपि न युक्तम् . दृष्टानुसारेणकार्यकारणभावस्य पाकजरूपादौ दर्शनेन प्रकृते इष्टादिप्राप्त्य-गुणस्यासमवायितेतिविविच्य प्रदर्शितम् । एवं स्थिते "आत्मविशेष गुणानां कुत्राप्यसमवायि कारणत्वं न भवतीति कथनस्य किं प्रयोजनमिति ते एव प्रष्टव्याः ।

अथवा असमवायिकारणनाशे कार्यस्य विनाशो भवतीतिनियमो यथा घटाद्यसमवायिकारणकपालद्वयसंयोगनाशे घटनाशो भवतीति प्रत्यक्षसिद्धः । यद्यपि घटादिनाशः कपालनाशे नैव भवति, कपालनाशे घटानवस्थानात्, तथापि एवं स्वीकारे, द्वयणुकनाशोन स्यात्, द्वयणुक समवायिकारणपरमाणोर्नित्यत्वेन विनाशासंभवात् । ततश्चद्वयणुकस्य तथा तत्क्रमपरंपरया घटादेरपि ध्वंसप्रतियोगित्वं न स्यात् । न चेष्टापत्तिः दण्डादिघातेन घटविनाशस्य सर्वसंमतत्वात् । नहिदृष्टेऽनुपपन्नं नामेति ।

न च कार्यद्रव्यनाशो भवत्यसमवायिकारणविनाशात्, गुणविनाशे तु नायं नियम इति वाच्यम्, उत्तरकालवर्त्तिशब्देन पूर्वशद्वस्यापिविनाशदर्शनात् । अपेक्षाबुद्धिनाशेन द्वित्वादि संख्यायाविनाशस्वीकारात् "अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपिवः "इत्युक्तेः ॥

वस्तुतस्तु आरंभवादे एवैतावतीचर्चा, परिणामवादे तु नासमवायिकरणंनामकारणंकार्यं प्रति । अत्रतूपादनकारणमात्रघटादिरूपेण दध्यादिरूपेण च परिणमते । अत्रत्यो विशेषविचारोविशिष्टाद्वैतविमर्शे द्रष्टव्यः । तस्मान्मनोन द्रव्यान्तरं नवा आत्ममनः संयोगःसुखादिविशेषगुणं प्रत्यसमवायिकारणं भवति । यद्यपि, अत्रवहुविचारणीयमवशिष्यते तथापि ग्रन्थगौरवभयाद्विरम्यते ॥

प्रकारान्तरेण मनसोनवमद्रव्यत्वं साधयितुं युक्तिं प्रदर्श्यतन्निराकरणायफक्किकान्तरमारभमाणः प्राह **यदपिनित्यद्रव्यस्यये** इत्यादि । अत्रेदमनुमानम् "सुखाद्यान्तरकार्यम्, नित्यद्रव्यसंयोगासमवायिकारणकम्; जन्यत्वे सति नित्यद्रव्यविशेषगुणरूपत्वात् । पाकज [अग्नि संयोगज] परमाणुरूपादिवत्" । तत्र सुखादौकार्येपृथिवीजलतेजोवाय्वाकाशात्मकद्रव्यान्तसंयोगस्यासमवायिकरणत्वान्मनः संयोगस्यैवासमवायित्वं सिद्ध्यतीति मनसोनवमद्रव्यस्य सिद्धिर्भवतीति । अर्थात्सुखकार्यस्यात्मसमवेतस्य समवायिकारणम्, आत्ममनः संयोगोऽसमवायिकारणम्, यतः सुखसमवायिकारणे आत्मनिससंयोगो विद्यते तथा तत्रात्मनि विद्यमानः सुखादिकंजनयति, तथा च समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नं कार्यजनकमात्मविशेषगुणभिन्नंयत् कारणं तदसमवायिकारणमित्यसमवायिकारणलक्षणाक्रान्तआत्ममनः संयोगः सुखादिकं प्रत्यसमवायिकारणं भवति । अदृष्टकालदेशादिकं तत्रनिमित्तकारणं भवतीति सुखाद्युत्पत्तिर्जायते । तत्रसुखाद्युत्पत्तौ पृथिव्यादिद्रव्यान्तरसंयोगस्यासमवायि

वगमानन्तरं सुखाद्युत्पत्तिदर्शनेन समवायिकारणासन्नत्वात् कार्यसुखस्य जनकत्वाच्चज्ञानस्यैव तथात्वस्वीकारात्। दृष्टकारणे व्यभिचारादेव कारणान्तरस्य कल्पनं नान्यथा। एवञ्च प्रसिद्धहेतावेवयत्रकार्यं समवेतं तत् समवायि, यच्च तत्र समवेतं कार्यजनकं च तदसमवायिहेतुरेतादृशंज्ञानमेव, नत्वप्रसिद्धद्रव्यान्तरसंयोगः कारणम्। एवमपि व्याप्तिवलेन यदि स्वीक्रियते तदा स्पर्शवद्द्रव्यसमवेत एव संयोगः सिद्ध्येत्।

वस्तु तस्तु न भौतिकं मनोनवा द्रव्यान्तरम्। किन्तु बुद्धावेवमनसः प्रयोगो कारणत्वस्यासंभवेन, आत्ममनः संयोगस्यैव तादृशकारणत्वसंभवेनभवदनभिमतमनः संयोगस्यैव कारणत्वसंभवेन परिशेषान्मनो रूपनवमद्रव्यान्तरस्यगलेपादुकान्यायेन सिद्धिर्भवतीतिपूर्वपक्षप्रघट्टकस्याभिप्रायः। तदेतद्वालुकाभित्तिवदनवस्थितं पूर्वपक्षं निराकर्त्तुंप्राह **तदपि नयुक्तम्**। कथं न युक्तम्। तदेवायुक्तत्वमुपपादयितुमाह **दृष्टानुसारेणकार्यकारणभावस्येत्यादि** अयमाशयः सर्वत्रान्वयव्यतिरेकाभ्यामेवकार्यकारणभावस्य निश्चयो भवति। पार्थिवपरमाणुरूपादावपि वन्हि संयोगस्य कारणत्वं तत एव सिद्ध्यति, ततश्च शरीरावयवत्र्यणुकादारभ्यदेहावयवे रूपादीनां परावृत्तिर्भवतीति दृष्टत्वात्, इतिकार्यदर्शनेन कल्पितं भवति। अत्र सुखादिस्थलेतु, अनूकूलप्रतिकुलज्ञानस्यैव कारणत्वं दृश्यते। यतः सुखसमवायिकारणे, आत्मनि ज्ञानस्य समवेतत्वात्, तत्र प्रत्यासन्नमेव ज्ञानं जनयति। अन्यथा सुखोत्पत्तेरभावात्, विज्ञानस्यैव सुखादेःसत्वमविदिते सुखादौ प्रमाणाभावात्। अतएव स्वापमूर्छादौ न तदस्तित्वंकश्चित् प्रत्येतीति न तत्र सुखादावदृश्यमानद्रव्यान्तरसंयोगस्य कल्पनावसरोभवतीति।

दृष्टकारणे व्यभिचारादेवेत्यादि। यत्र दृष्टकारणाभावो विद्यते, तत्रापिकार्योत्पत्ति र्दृश्यते तत्रैव कारणांन्तरस्यादृष्टस्य वा वलात्कारणत्वं कल्पितं भवति। यत्रतु न तथा नतत्रकारणान्तर कल्पनं भवति। अत्र सुखादौ तु दृष्टहेतौ ज्ञाने एव तत्तल्लक्षणस्य विद्यमानत्वेन ज्ञानस्यैवासमवायिकारणत्वं कल्प्यते। अन्यथा दृष्टस्य परित्यागोऽदृष्टस्य कल्पना च निरर्थिकैवस्यात्। तस्मान्नमनोद्रव्यान्तरं नवा तदात्मसंयोगोऽसमवायिकारणं सुखादाविति।

ननु भवत्वेवं तथाप्यनुमानवलेन तत्सिद्धिः स्यात्तत्राह **व्याप्तिवलेनेत्यादि** अर्थात् योयं द्रव्यान्तरसंयोगः सच भूतप्रतियोगिक एवोपलभ्यते, ततश्च प्रकृतेपि पृथिव्यादिभूतप्रभवदेहादि प्रतियोगिक आत्मानुयोगिकसंयोग एव कारणम्, नत्वभौतिकमनः प्रतियोगिकः संयोगस्य तथात्वं विशेपस्त्वाकरे द्रष्टव्यः॥

पूर्वोक्ततर्कवलान्मनसो भौतिकत्वं निराकृतं तथा नवमद्रव्यत्वमपि निराकृतमेव, ततश्चशास्त्रे परिदृश्यमानमनसो व्यवहारः कुत्रस्यादित्याद्याशङ्कामपनेतुमाह="**वस्तु तस्तु** इत्यादि।

भवति। अत एव ज्ञानवान् पुरुष एव मनस्वीति कथ्यते। तन्मन एकमेवावस्थाभेदेनानेकत्वव्यवहारः दुखितं मे मनः प्रसन्नं वा मे मनः। ''मनसैतान् कामान्'' ''मनसा ध्यायीत'' इत्यादि श्रुतेरप्युपपत्तिर्भवति। परन्तु बुद्धेरेवमनस्त्वेपि करणत्वान्न तच्चेतनमिति।

ननु भवतु सर्वान्तरः प्राण ऐव चेतनः। तादृशचेतनप्राणसम्बन्धादेवदेहे सात्मकता प्रतीतिः तत्सम्बन्धाभावादेव निरात्मकता प्रत्ययश्चोपपद्यते। गृहीतदेहाद् देहान्तरगमनं लोकान्तरगमनमप्युपपद्यते संचरणशीलत्वात्प्राणस्य। अन्यथा व्यापक परिमाणस्य मध्यमपरिमाणस्य स्पर्शादिरहितस्य क्रियाविरहिण उत्क्रान्तिगत्यादिकोनैव स्यात्। ततश्चोत्क्रान्त्यादिप्रतिपादकश्रुतयोवाधिता भवेयुरिति प्राणएवात्मेति।

एतदपि न चारुतरम्, यथा बाह्योवायुर्नात्मा तथैवान्तरं वायुरपिनात्मा वायुत्वात्। प्राणोनात्मा, सुषुप्तिकाले व्यापाररूपादात्मवैधर्म्यात् न प्राणश्चेतनत्वम् त्वक्

येयमात्मनः सर्वार्थसाधिका बुद्धिस्तत्रैवबुद्धौ मनसः समावेशः। अर्थात् ''मनोबुद्धिरहंकारश्चित्तंकरणमान्तरम्। संशयोनिश्चयो गर्वः स्मरणं विषया इमे इति। वाह्येन्द्रियसहायकमान्तरं करणमन्तः करणंमनोवुद्ध्यादिशद्बव्यपदेश्यम्, तदेव संशयनिश्चयादिवृत्तिभेदेन चतुर्धाव्यपदिश्यते संययादिवृत्तिकं यदा मनःशब्देन तस्य व्यवहारः यदातु तदेव निश्चयात्मकवृत्तिविशिष्टं भवति वुद्धिशब्देन व्यपदेशभाक् भवति।

यद्यप्यन्तःकरणमप्रत्यक्षं तथापि तस्यावस्थाभेदव्यवहारेण ज्ञायते एव। तथाहि कदाचिन्मनसोनुकूलसहकारिबलात्सुप्रसन्नं मे मनः प्रतिकूले च विषये क्षुभितं मे मन इत्यादिव्यवहारो भवतीति दृश्यते। तथा मनो वुद्धयोरेकत्वे, बुद्धिमतिनरे वुद्धिमान् मनस्वीति संगीयते। परन्तु मनसोजड़त्वेन तत्रचेतनव्यवहारोनैव भवति, करणत्वादेव चक्षुरादिवदिति विशेषोऽन्यत्रावधातव्य इति दिक्। इतिमनसात्मवा दनिराकरणेतत्त्वदीपः।

प्राणसम्बन्धादेव सात्मकत्वप्रतीतिर्भाति तदभावे, न सात्मकत्वप्रत्ययोमृतदेहवत्। एवञ्च तदन्वयव्यतिरेकदर्शनेन प्राणस्यैवात्मत्वं प्रसिद्ध्यति, किञ्चोपनिषदि, करणानामहंश्रेष्ठो ज्येष्ठश्चेत्येवं विवादे पर्यवसाने प्राणस्यैवज्येष्ठत्वादिकं निर्धारितम्। किञ्च शुक्रनिषेककालादारभ्यैवाऽस्मिन् शरीरे प्राणस्यलाभो भवति, तद्गमने च शरीरे मृतत्वव्यवहारः एतदेवकार्यमात्मनोपि तच्च कार्यं प्राणस्यैवेतिप्राणएवात्मेतिपूर्वपक्षाशयः। सिद्धान्तिनस्तुतदेतन्नानुमोदन्ते। यथा वाह्योमहावायुस्त्वगिन्द्रियग्राह्यत्वात् नात्मा भवति तथैवान्तः संचरणशीलस्यापि प्राणरूपस्य तस्य तत्वादेव नात्मत्वम्। यथा वाह्योवायुस्त्वगिन्द्रियग्राह्यस्तथैवोच्छ्वासरूपेणवहिरागतः प्राणोपित्वगिन्द्रियेण

स्पर्शनेन्द्रियग्राह्यत्वात् घटादिबाह्यपदार्थवद् प्राणोनात्मावायुत्वात् शरीरसंसक्तसलिलशैत्याभिव्यञ्जकव्यजनादिपवनवत् । सुषुप्तिकाले सर्वथा वृत्तिविहिने प्राणस्य व्यापारदर्शनात् प्राणवृत्तिवलेनैव भुक्ताशितपीतद्रव्यस्य पाचनं जायते, श्वासादयोपि प्राणस्यैव कार्यम् , शरीरान्तः सञ्चारिवायुरेवप्राणः स च वृत्तिभेदात्पञ्चविधः । सचोच्छासेन वाह्यगतस्त्वगिन्द्रियेण गृह्यते । तस्माद्वायु विशेषः प्राण आत्मा न संभवतीतिदिक्

संविदात्मपक्षः

अथ भवतु विज्ञानमेवात्मा अजडत्वात् , यत् जडस्वभावकं तन्नात्मा यथाघटादि विषयः । एवञ्च जडत्वस्य विज्ञानाद् व्यावृत्तस्य तस्मिन् स्वप्राकाशात्मत्वं व्यवस्थापयति । अजडत्वं च विज्ञानस्य स्वसत्तामात्रेण प्रकाशमानत्वादेवसिद्ध्यति ।

स्पष्टतया प्रतीतो भवति । अपि च प्राण उत्पद्यते विनश्यति चेत्युत्पादविनाशशीलत्वादेव घटादिवन्नैवात्मा संभवति । किञ्च व्यापकद्रव्यस्य निष्क्रियत्वाद् गत्युत्क्रान्त्यादिको न संभवतीति युक्तं परन्तु, अणुरूपस्यात्मनस्तु गत्यादिक उपपद्यते एव मनोवत् । अन्येतु नकेवलस्यात्मनो गत्यादि भवति किन्तु प्राणमनोभ्यां युक्तस्यगत्यादिर्भवतीति तदपि न युक्तम् । अणुरूपस्यात्मनस्तथा संभवात् । अतएव श्रुतिप्रतिपादित, उत्क्रान्ति गत्याद्यनुरोधेनात्मनो व्यापकपरिमाणवत्वं न स्वीकृतं सिद्धान्ते । विस्तरस्तु परिमाणनिरूपणावसरे प्रतिपादयिष्यति स्वयमेवाचार्यः । तस्मात् प्राणोनात्मादेहादेरात्मत्वनिराकरणावसरे ये ये दोषाः प्रदर्शितास्तेते दोषा यथायथमिहापि सञ्चारयितव्या इत्युत्तरपक्षाशयः । इति प्राणात्मवादनिराकरणेतत्त्वदीपः ।

देहात्मवादादादारभ्य प्राणात्मवादपर्यन्तपूर्यपक्षिणो निरासंकृत्वा सम्प्रति विज्ञानात्मवादिनां मतं निराकर्तुं तथा स्वकीयसिद्धान्तरहस्यमाविष्कर्तुमुपक्रमते **अथभवतु विज्ञानमेवात्मेति** यद्यपि सिद्धान्तेपि, विज्ञानात्मकत्वं प्रपिपादयिष्यतीति कथं विज्ञानवादस्य "यश्चोभयोः समोदोषः परिहारोपि तादृशः । नैकः पर्यतुयोक्तव्यस्तादृगर्थविचारणे" इति वृद्धोक्तेः तथापि स्वसिद्धान्तरहस्य प्रतिपादनावसरे विशेषतोमतद्वयभेदस्य प्रतिपादनं करिष्यति, अत्रापितत्प्रतिपादनेपिष्टपेषणमिवस्यात् ।

कथं विज्ञानस्यात्मत्वं यावता विज्ञानस्यगुणरूपत्वेन द्रव्यात्मकात्मरूपत्वात् । गुणस्य गुणानाधारत्वादिनाऽशंक्यविज्ञानस्यात्मरूपत्वमुपपादयति **अजडत्वात्** इति । अर्थात् यद्वस्तु स्वभावतजडस्वभावकं परप्रकाश्यं तद्वस्तु, नात्मरूपं यथा घटपटादि, इदंतु विज्ञानं नपरेण प्रकाशितं भवति किन्तु स्वसत्तयैव प्रकाशितं भवति । अतएवज्ञाने जातेऽहंजानामि नवेति संशयो नवा न जानामीति विपरीत प्रमाजायते, तेन ज्ञानविपयकसंशयाद्यभावात् , स्वसत्तया प्रकाशमानमेवज्ञानम् ।

न च ज्ञाने जाते विषयमात्रस्यैव प्रकाशो भवति, न तु ज्ञानमपि प्रजाशितं भवतीति, किन्तु ज्ञानेन विषये ज्ञातताख्यो धर्म उत्पद्यते, तया च ज्ञानानुमानमेव नतु ज्ञानं प्रत्यक्षमपितु धूमेन वह्निवदनुमेयमेवेति वाच्यम् ज्ञानातिरिक्तार्थधर्मस्य प्रकाशस्य रूपादिवत्प्रत्यक्षासंभवात् ज्ञाततया ज्ञानानुमानेन तेन च तदनुमानेऽन्योन्याश्रयश्चापद्येत । तस्माज्ज्ञानं स्वप्रकाशत्वादेव प्रत्यक्षं नत्वनुमेयम् ।

एवमहमस्मिनवेति संशयोनाहमस्मीति विपरीतप्रमा न जायते इति आत्मनि संशयाद्यभावादात्मनः स्वप्रकाशत्वमिति विज्ञानमेवात्मा नतु विज्ञानव्यतिरिक्तः कश्चिदात्मा ।

अत्राहभाट्टो विज्ञानं न प्रकाशं जाते विज्ञाने विषयमात्रं प्रकाशितं भवति नतुज्ञानस्यापि प्रकाशः । यथाऽयंघट इतिज्ञाने जाते घटमात्रंतदीयविषयो भवति नतु घटातिरिक्तपटोर्भानं भवति तथैव घटज्ञाने सति घटमात्रस्यैव प्रकाश इत्याशयेनभाट्टा विज्ञानस्य परप्रकाशत्वमेवमन्यते । एतदेवोपपादयति **नच ज्ञाने जाते विषयमात्रस्यैवप्रकाश** इत्यादि ननुज्ञानं यदि न स्वप्रकाशात्मकं तदातत्प्रकाशः कथमिति चेत्तत्राह **अनुमेयमेवेति वाच्यम्** इति नीलमितिज्ञानकालेऽनीलमिति प्रत्ययाऽनुदयात् । तस्मात् स्वरूपसत्त्वेनैवज्ञानेन विषयो विज्ञायते तदनन्तरम् , ज्ञानगतागन्तुप्रकाशातिशयदर्शनेन विज्ञानमनुमितं भवति । अयमत्राशयः- इन्द्रियादिसंनिकर्षेण विज्ञानोत्पत्त्यनन्तरं ज्ञानेन विषयेज्ञातताऽर्थाद् ज्ञानविषयता रूपोजायते । स एव प्रकाशशद्बेन कथितो भवति । स एव च ज्ञानकृतोऽतिशयोनाम विषयस्य सच ज्ञातुः पुरुषस्य प्रत्यक्षः तेन प्रत्यक्षेणार्थप्रकाशहेतुनाऽत्मनिज्ञाततोत्पादकज्ञानस्यानुमानं भवति, तथाहि "इयं घटत्वादिप्रकारकघटविषयकज्ञातता, घटत्वादिप्रकारकघटादिविषयज्ञानजन्या, घटत्वादिप्रकारकघटाविषयकज्ञातताात्वात्" एतादृशानुमानिकज्ञानविषयको "घटमहंजानामीति" प्रत्ययोनतुज्ञानं प्रत्यक्षमपितु, अनुमेयमेवेति न ज्ञानस्यस्वप्रकाशकत्वमितिभाट्टस्य प्रश्नाशयः । अस्यमहाशयस्य निराकरणं दर्शयन्नाह **ज्ञानातिरिक्तार्थधर्मस्य प्रकाशस्य** इत्यादि । ज्ञानभिन्नार्थधर्मः प्रकाश इति निपुणमतीनामपितावत्प्रत्यक्षं नभवति रूपादिवदेव । अर्थात् ज्ञाततहिज्ञानविषयता रूपैव । तद्विषयतया घटाद्यर्थसमबद्ध मानव्यतिरिक्ततया विंषयधर्मस्य साधनं संभवति, यतः ममघटाद्यर्थविषयकं ज्ञानं जातम् , विदितो घटोघटोमया ज्ञात इत्यादिज्ञानानां धर्मिधर्मभावव्याप्त्यासंविदा धर्मभेदस्यानुभवाभावात् । तदेवं ज्ञाततायाः सिद्धिर्न प्रत्यक्षेण नवा प्रकारान्तरेण, यतः सर्वसंमतज्ञानेनैव सकलव्यवहारस्य सिद्धि संभवेन ज्ञाततारूपातिरिक्तप्रकाशककल्पनायांप्रमाणाभावादिति । किञ्चार्थविषयकज्ञानेज्ञातुर्ज्ञानस्य ज्ञेयरूपार्थस्येति त्रितयस्यज्ञानं नियमतो भवतीति प्राभाकराः, तत्र यदिज्ञानस्य ज्ञातुश्चानवगाहने विषयमात्रस्येववोधे स्वीक्रियमाणे घटादिज्ञानोदयेपि "घटज्ञानवानहंनवेति" संशयः स्यात् "घटज्ञाना-

अपि च यस्य सम्बन्धेन पदार्थान्तरादौ जायमानो व्यवहारो धर्मभेदो वा स तस्मिन्नुपलभ्यमानस्तत्स्वरूपप्रयुक्त एव भवति नतु तत्संवन्धमूलको भवति। यथा न्यायमते सत्तासम्बन्धेन तदितरघटादौ सद्व्यवहारो यथा वा रूपसम्बन्धेन गुणादौ सत्तायां च। एवमेवज्ञानसम्बन्धाद् घटादौ प्रवर्तमानः प्रकाशते इति व्यवहारः प्रकाशभाववानहमिति विपरीतप्रत्ययो वा भवेत्, यतोज्ञातुर्ज्ञानस्यचानभासनात्, विषयमात्रस्यैवभान स्वीकारात्। परन्तु संशयादिर्ज्ञानोदयानन्तरं न कस्यापि भवतीति त्रितयविषयकत्वंज्ञानस्यैव स्वीकर्तव्यमिति ज्ञानस्य स्वप्रकाशकत्वमयत्नत एव सिद्धमितिज्ञानाद्घटादिव्यवहारवत् ज्ञानताया अपि व्यवहारसंभवेनातिरिक्तज्ञातताया: स्वीकारोऽनवसर इति। अपि च प्रत्यक्षविषयेकर्तृज्ञाततायाा उत्पादेपि अतीतानागतविषयस्य स्मरणस्थले विषयस्य विद्यमानत्वेन तत्र विदित्वमूलकप्रतीति व्यवहारयो: सत्त्वेऽसत्त्वेवा विदितत्वव्यवहारात्पूर्वमेव विदितत्वप्रतीते स्तथातम्मूलभूतायाज्ञातताया उत्पत्तिरिति नतत्रव्यवहारादिहेतुना विदितत्वस्यानुमानं कृत्वा तदनन्तरं वेदनस्यज्ञानपर्यायस्यानुमानम्, किन्तु ज्ञानस्य स्वयं प्रकाशवलादेवातीतानागतेऽर्थेविदितत्वज्ञानं ततश्चतन्मूलको व्यवहार इतिज्ञानस्य स्वप्रकाशत्वमेवायाति। स्मरणस्थले व्यवहारात् पूर्वमेव स्मरणद्वारेण घटादिविषयस्य स्मृतिविषयत्वं ज्ञात्वा ततश्च तत्रज्ञातत्वव्यहारो भवति, यथा केनचित्कश्चित् "साकेतवासंकृतवान् तत्स्मरसिनवेति पृष्टोमनोवधानंकृत्वास्मृत्वा च व्रवीति, न पूर्वं स्मरणमभूदपिसाम्प्रतं स्मरामीति। न चायमेवंव्यवहारो ज्ञाततायांलिङ्गम्, व्यवहारस्यज्ञातताामूलकत्वात्। न च स्मरणेनैवार्थस्य स्मृतत्वं ज्ञात्वा व्यवहरतीति वक्तव्यम्, यदि लिङ्गवलात्स्मृतत्वानुमानं तर्हि, अनेनैलपनात्मकलिङ्गेन स्वस्य स्वकीयांर्थविषयेप्रतीतिरानुमानिकीस्यादिति परस्याश्रयप्रसङ्गात्। स्मृतत्वप्रतीत्या तद्व्यवहार:, तेनच व्यवहारेण स्मृतत्वमिति। नच परस्पराश्रय: क्षेमाय भवतीति, एवञ्च विषयज्ञानानतरं कर्तृर्ज्ञानस्य प्रकाशितत्वेन, अहं जानामि नवा? ज्ञानाभाववान् नवाऽहमित्यादिसंशयविवर्यासयोरदर्शनेन ज्ञानस्य स्वप्रकाशकत्वमर्थत एव पर्यवस्यति।

सम्प्रति विषयनिष्ठं धर्मान्तरं प्रकाशं स्वीकृत्यापि, भाट्टमतं प्रौढिवादेन तन्निरसितुमुपक्रमते **अपिच यस्य सम्बन्धेने**त्यादि अयमाशय: अनुमानवलेन विज्ञानस्य स्वप्रकाशत्वं सिद्ध्यति। तथाहि अनुभूतिः स्वयंप्रकाशाऽनुभूतित्वात्, यन्नैवं यथा घट इतिव्यतिरेकी हेतुः। अनुभूत्यात्मकं ज्ञानम्, स्वेतराधीनतद्धर्मा, स्वसम्वन्धाद्विपयान्तरे तद्धेतुत्वात् रूपादिकम्।

रूपादिकं वस्तु स्वकीयसम्वन्धादेव घटादेश्चाक्षुपप्रत्यक्षे कारणं भवति, रूपव्यवहारेरूपं रूपान्तरापेक्षं न भवति। यदि रूपप्रत्यक्षे रूपान्तरस्यापेक्षाभवेत्तदाऽवस्थाप्रसङ्गेन घटीनां प्रत्यक्षतैव न स्यात्, तस्मात् स्वेतरचाक्षुषे रूपस्य कारणत्वेपि स्वस्मिन् स्वरूपत एव कारणम्। यथावा "अनुभूतिरनन्याधीनस्वव्यवहारा, स्वसम्वन्धादेवद्रव्यादिपदार्थान्तरव्यवहारकारणत्वात्

मानत्वं वा धर्मः । ज्ञानेतु जायमानस्तादृशव्यवहारो नज्ञानसम्बन्धापेक्षः किन्तु ज्ञानस्वरूपप्रयुक्त एवेति स्वयं प्रकाशत्वात् ज्ञानमेवात्मा । किञ्च योहिवादी ज्ञानातिरिक्तं ज्ञातारं स्वीकरोति सोपिज्ञानं तु स्वीकरोत्येव ज्ञानाभावे जानामि ज्ञानवानहमस्मीति प्रतीतिर्नस्यात् । तथा च सर्ववादिसंमततया विज्ञानमेवात्मा. न ततोव्यतिरिक्त आत्मेति विज्ञानमतम् ।

सत्तावत् । यथा द्रव्यगुणादौसत्ता सम्बन्धात्सदितिव्यवहारो भवति सत्तासतीतिव्यवहारेतु न संत्तान्तरस्यावश्यकता, किन्तु स्वरूपसत्त्वस्यैव कारणत्वेननिर्वाहात् । अन्यथाऽनवस्था । नचैवं सत्ताधाराया अनुभवो भवति केषामपीति । अनेनान्वयि अनुमानेन ज्ञानगतप्रकाशस्य ज्ञानान्तरापेक्षारहितत्वेन ज्ञानस्य स्वप्रकाशत्वमेव सिद्ध्यति । अर्थात् चक्षुरादिकारणसंवन्धे सति जायनानं ज्ञानं घटादिविषयं प्रकाशयति स्व प्रकाशस्तु न ज्ञानान्तरेणानवस्था भयात् । एतदेव ज्ञानस्य स्वप्रकाशत्वं यदन्यानधीन प्रकाशत्वम्, स्वसत्तयैव प्रकाशरूपत्वमिति । एवंचानुमानेनार्थापत्त्या च स्वप्रकाशत्वं सिद्धंभवतीति । ततश्च स्वयंप्रकाशज्ञानस्यैवात्मत्वमपि भवतु लाघवात् ।

किञ्चात्मनः स्वयंप्रकाशरूपत्वमनुमानश्रुत्यादिभिरेवसिद्ध्यति । आत्मा स्वयं प्रकाशः संवित् कर्मनामन्तरेण प्रकाशशीलत्वात्संवेदनवदेव । श्रुतिरपि स्वप्नावस्थामधिकृत्य कथयति "अत्रायंपुरुषः स्वयंज्योतिर्भवतीति । ततश्च स्वप्रकाशरूपज्ञानस्यैवात्मत्वमपि संभवेदेवेति न ज्ञानव्यतिरिक्त आत्मेति ज्ञानमेवात्मेतिविज्ञानवादिमतं सिद्धं भवतीति ।

बौद्धमते स्वप्रकाशात्मकं ज्ञानमेवात्मा । तद्विज्ञानं द्विविधम्, आलयविज्ञानप्रवृत्ति विज्ञानभेदात् । तत्राहमाकारकं विज्ञानमालयविज्ञानम्, तत्र संस्कारादीनां लीनत्वात् । विज्ञानेतरं घटादिज्ञेयमात्रविषयकं विज्ञानं प्रवृत्तिविज्ञानम् । तदुक्तम् "तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्" तत्स्यात्प्रवृत्तिविज्ञानंयन्नीलादिकमुल्लिखेदिति । अर्थात् वाह्यघटादिज्ञेयविषयकं ज्ञानं प्रवृत्तिं विज्ञानपदवाच्यम्, आन्तरज्ञेयविषयकं ज्ञानमालयविज्ञानपदवाच्यमिति तस्यैव नाम भवति, आत्मेति । तद्विज्ञानमपि क्षणिकम्, यत्सत्तत् क्षणिकं यथामालेति निदर्शनात्, मेघमालायां सत्वात्क्षणिकत्वं तथैव सत्वहेतुना विज्ञानेपि तदस्तित्वं प्रतीयते । तादृशविज्ञानस्य ज्ञानसुखदुःखेच्छाद्वेष संस्कारादयोप्याकारविशेषा एव । विज्ञानस्य क्षणिकत्वे कालान्रे पूर्वानुभूतसुखादयः कथमिव स्मृता भवेयुः "नान्यदृष्टं स्मरत्यन्यः" इति नियमात्पूर्वज्ञानसंस्कारस्योत्तरसन्तानेषु संक्रमणात् तदुपपत्तेः । मृगमदवासनावासितवसनवत् पूर्वपूर्वसंस्कारस्यातिसादृश्यादुत्तरोत्तरक्षणेषु संक्रमणेन सर्वोपपत्तिसंभवात् । स एवायमात्मेति व्यवहारस्तु "लूनपुनर्जातकेशादौ अमी त एव केशाः" इति व्यवहारवज्जातिविषयकतयैव निर्वाह्यः । नतु व्यक्तिविषयको ये न स्मरणादिकं दुरुपपादो भवेत् । न च व्यक्तिविषयकं प्रत्यभिज्ञानम् किन्तु सैवेयं गुर्जरीतिवत् प्रत्यभिज्ञानजातिविषय-

ननु अहं जानामीति प्रत्यये ज्ञानस्याधिकरणरूपतया तदतिरिक्त आत्मापि भासते, इति कथं ज्ञानमेवात्मेति प्रोच्यते ? सत्यम् आत्मातु विकल्पबुद्धिविषयत्वाद प्रामाणिक एव । विकल्पज्ञानस्य भ्रमरूपत्वात् । "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकमिति" नियमात् । ततश्च सहोपलंभनियमेन ज्ञानज्ञेययोरभेद एव प्रामाणिकः। भेदस्तु वासनारूपदोषमूलक इति विज्ञानमेवात्मा निर्विकल्पकप्रत्यक्षविषयत्वात् ।

कत्वालंवनात् । न च पूर्वज्ञानानुभूतसंस्कारस्योत्तरविज्ञानेऽनुसरणाभ्युपगमे, मात्रानुभूतविषयस्य पुत्रेण तत्कार्येणोत्पादप्रसङ्गः, विज्ञावत् मातृपुत्रयोरपि कार्यकारणभावस्य समानत्वादिति वाच्यम् , उपादानोपादेयभावस्य तत्र नियामकत्वात् । अर्थात् , यदुपादाने समवायिकारणे भवति, तदेवोपादेयेऽनुवर्तते इति नियमाकारो नतुकारणेऽवस्थितं कार्यें समवैतीति नियमः, नहि घटकारणे समवेतं रूपं घटेऽनुगच्छति नवा प्रागभावे सम्बद्धमभावत्वं कार्यें आगच्छति, तथा सति भावरूपो घटादिर्भावत्वंजह्यात् स्वीकुर्याच्चाभावत्वमिति दृष्टविपर्यय आपद्येत । पूर्वक्षणस्तूत्तरक्षणस्योपादानं तेन तद्गतसंस्कारस्य तदुत्तरक्षणे संक्रमो भवति माता तु पुत्रस्यनोपादनमपितु निमित्तकारणमेवेति न तदापत्तिर्भवति ।

ताद्दशक्षणिकमालयविज्ञानमेवात्मा नतु ज्ञेयकोटिप्रविष्ट आत्मा विकल्पज्ञानविषयः पारमार्थिकः निर्विकल्पज्ञानग्राह्यस्यैव पारभार्थिकत्वात् । यथा शुक्तौ प्रतिभासमानं रजतं न पार्थिवं तथैवज्ञानेवासनावलादविद्यावलाद् भासमानोज्ञेयो न पारमार्थिक इत्याशयं हृदिनिरुद्ध्य तदीयं पक्षमुपपादयितुमाह **नन्वहं जानामीति प्रत्यये** इत्यादि । यथा "अहंजानामीति प्रत्यये ज्ञानं भासते तथैव तदाश्रयरूपस्तदतिरिक्त आत्माऽपि भासते एवेति कथं तन्निराकृत्यज्ञानमात्रस्य सत्ताऽद्रियते इत्यर्थः । ज्ञानात्मनोर्मध्ये प्राधान्यादहमर्थस्यैवात्मत्वं नतु तद्धर्मरूपेण भासमानज्ञानस्यात्मत्वम् , अपितु गौणत्वमेव, विशेष्यविशेषणयोर्विशेष्यस्यैव प्रधानत्वम् पर्वतोवन्हिमानित्यादौ वन्हिपर्वतवदिति । उत्तरयति ज्ञानवादी **आत्मातु विकल्पवुद्धिविषयत्वादित्यादि,** सत्यमात्मनः प्रधानत्वं परन्तु सतु-आत्मा, अप्रामाणिकविकल्पविषयत्वेनाप्रामाणिक एवेति ।

कल्पनाऽपोढमभ्रातं प्रत्यक्षं निर्विकल्पमिति कल्पनया रहितं भ्रमभिन्नं निर्विकल्पकं प्रत्यक्षमित्यर्थः । अर्थात् प्रत्यक्षं निर्विकल्पकं सविकल्पकं च । तत्र स्वलक्षणवस्तुमात्रावगाहिनिर्विकल्पकं प्रमाणम् , सविकल्पकंतु धर्मधर्मभावादिभेदावगाहितया न प्रामाणिकमपितु भ्रान्तमेव । ततश्च ज्ञाता तु भेदरूयतया न साक्षात् प्रत्यक्षप्रमाणसिद्धोऽपितु भ्रमसिद्धः शुक्तौरजतवत् । निर्विकल्पक प्रत्यक्षमेव प्रमाणं स्वलक्षणसिद्धत्वात् , तदितरत्सर्वमप्रामाणिकमेव ततश्च ज्ञातुर्भ्रमसिद्धत्वेन प्राधान्यमकिञ्चित्करमेव **सहोपलंभनियमेन** इत्यादि । अपि च सहोपलंभनियमादपि ज्ञेयज्ञानयोर भेद एव सिद्ध्यति नतुतयोर्भेदः । यत् येन सहैवोपलभ्यते स ततो भिन्नो न भवति, यथैकस्मात्

अत्रोच्यते, क्षणिकं विज्ञानं प्रतिविपयं विभिन्नमेव प्रतीतं भवति । तादृशस्य चन्द्रमसो द्वितीयश्चन्द्रमा एकस्मिन् चन्द्रे उपलभ्यमाने एव द्वितीयश्चन्द्रमाभासते इति नतयोर्भेदः । एवं ज्ञाने उपलभ्यमाने एवार्थ उपलब्धो भवतीति नज्ञानाद्भिन्नोऽर्थोऽपितु तयोरभेद एव । तदुक्तम् "सहोपलंभनियमादभेदोनीलतद्धियः । भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये" इति । यथा भ्रमज्ञानवतामेव द्विचन्द्रदर्शनं विद्यावतांतु चन्द्रैकदर्शनम् । एवमिहापि निर्विकल्पकप्रत्यक्षेण ज्ञानज्ञेययोरेकत्वमेव, भ्रान्त्यातुभेदइवभानम् । तस्माज्ज्ञानार्थयोरभेद एवेति । न च ज्ञानार्थयोरभेदेऽयं घटोऽयं पट इति भेदावलंवनप्रत्ययःकथमुपपद्यते इति वाच्यं वासनावलादिति गृहाण । अनादिकालिकवासनावलात् अविद्यावलाद्वा । ततश्चवासनात्मकसमनन्तरप्रत्ययवलेनानाद्यविद्यावलाद्वा समारोपित ग्राह्यग्राहकविकल्पालंवनकस्वप्रकाशज्ञानमेव परमार्थं सत्, तदन्यत्सर्वंविकल्पसिद्धत्वादपारमार्थिकंवेति । ग्राह्यग्राहकयोर्ज्ञानादभेदे ज्ञानज्ञातृज्ञेयादिभेदो दोषसूलत्वात् । तथा च दोषमूलकत्वात् ग्राह्यग्राहकादिभेदज्ञानं मिथ्यैव, ज्ञानमात्रं तु सत्यम् । तदुक्तम् "अविभागोपि बुद्ध्यात्मा विपर्यासित दर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिवलक्ष्यते'' इति । अयमर्थः सर्वज्ञेयप्रकाशकबुद्धिरेवार्थादालयविज्ञानमेवात्मा, साच बुद्धिः सर्वप्रकारकज्ञातृज्ञेयादिभेदरहितापि, विपर्यासितदर्शनैः भ्रमात्मकज्ञानैः ग्राहकसंवित्तिभेदवानिवलक्ष्यते=नीलयति घटपटादिग्राह्यभेदचैत्रदेवदत्तादिग्राहकभेदः प्रत्यक्षपरोक्षरूपज्ञानादिभेदवान्तदेवैकं विज्ञानं भासते । यस्यापिमतेज्ञानव्यतिरिक्त आत्मा तदाधारः कल्पितो भवति तन्मतेपि स्वप्रकाशात्मकं विज्ञानमभ्युपगतमेव भवतीति वस्तुद्वयकल्पनापेक्षयैकस्यैव विज्ञानस्य क्षणिकस्यैवात्मत्वमिति विज्ञानपक्षस्य संक्षिप्तः पूर्वपक्षः ।

विज्ञानस्यैवात्मरूपत्वं, तत्रमतद्वयम् योगाचारमतम् शाङ्करमतञ्च । तयोः प्रथममतं संक्षेपेण प्रदर्शितमेव । अथ द्वितीयमतमपीत्थम्, तथाहि—बौद्धमते विज्ञानस्य क्षणिकत्वेनान्यदृष्टस्यान्येन स्मरणाद्यसंभवदोषेण यथातथं भवतु, परन्तु "सत्यं ज्ञानमनन्तम्" "प्रज्ञानं ब्रह्म" इत्यादि सिद्धो विज्ञानरूप एवात्मा, स च नित्यः श्रुत्यादिभिरेव तथा प्रतिपादनात् । तस्मिन्नेवात्मनि, एकस्मिन् ज्ञातृज्ञेयविभागः कल्पित एव रज्जौ भुजङ्गवत् । शुद्धस्य ब्रह्मणो जगत्कारणत्वेसत्यकारण जनितसंसारस्य सत्यत्वेन संसारस्य विनाशो न स्यात् तस्मात् ज्ञातृज्ञेयविभागादयोऽनिर्वचनीयानादिमायाया कल्पिता एव । तदुक्तं "शुद्धतत्वं प्रपञ्चस्य न हेतुरनिवृत्तितः । ज्ञातृज्ञेयविभागस्य मायैव जननीमता" इति । एतन्मतस्य विशेषप्रपञ्च उत्तरावसरे दर्शयिष्यते ।

स्वप्नावस्थामधिकृत्य "अत्रायं पुरुषः स्वयंज्योतिर्भवतीत्यादिनाऽत्मनः स्वप्रकाशत्वं श्रुतिसिद्धम् । विज्ञानस्य स्वकाशत्वंतु युक्तितर्काभ्यांसिद्धमिति विज्ञानस्यैवात्मत्वम्, विज्ञानभिन्नस्य सर्वस्यैव पदार्थजातस्य वासनादिदोषमूलत्वेनाभासमात्रत्वमेवेत्यतो विज्ञानस्यैवात्मत्वमिति विज्ञानवादिनां निश्चयं निराकर्तुं नित्यात्मवाद्युपक्रमते **अत्रोच्यते** इत्यादि । अर्थात् यदुक्तं क्षणिकं

तस्यात्मत्वस्वीकारे, "यमहं पूर्वमद्राक्षं तमेवेदानीं पश्यामीति प्रत्यभिज्ञाकथं स्यात् अनुसन्धातुरात्मनः स्थिरत्वे एव प्रत्यभिज्ञाया दर्शनात्। न च सा प्रत्यभिज्ञा प्रतिभावदसद्विषयैवेति वाच्यम्, निर्विषयकप्रत्यभिज्ञायाः प्रत्यक्षादिज्ञानवाधितत्वात्। साधनस्य ज्ञानरूपस्य सविषयत्वेऽशेषज्ञानानां सविषयत्वमेवस्याज्ज्ञानत्वाविशेषात्, निर्विषयत्वेतु हेत्वभावादेव साध्यस्यासिद्धिः स्यात्। आकरग्रन्थे निर्विषयकज्ञानवादिमतं विस्तरेण निराकृतमिति तत एव द्रष्टव्यम्।

विज्ञानमेवात्मेति तन्न युक्तमित्येतत्प्रतिपादयति, अर्थाद् यद्भवन्मतेक्षणिकं विज्ञानमात्मत्वमिति तदशोभनं, यतस्तथा विधस्यात्मत्वे प्रत्यभिज्ञा न स्यात्, क्षणरूपं विज्ञानं विनाश स्वभावकं नीलपीतादिविषयभेदेन विभिन्नमेव, तादृशस्य तस्यात्मत्वे प्रत्यभिज्ञानैव संभवेत् अनुभवितुरात्मनः स्थिरत्वे एव प्रत्यभिज्ञायाः संभवात्। अर्थाद् यश्चानुसंधाता तस्यैव पूर्वानुमतसंस्कारेण कालान्तरे स्मरणं भवतीति नियमात्। तच्चानुसंधातुः स्मर्तुश्चैकस्यस्थिरत्वे एव संभवति, अन्यथाऽन्यदृष्टस्यान्येन स्मरणासंभवात्। अनुभवस्मरणयोः स्थिरसमानकर्तृकत्वनियमात्। अतएव चैत्रानुभूतस्य मैत्रेण स्मरणं न भवति। यदातु स्थिरे आत्मनि स्वीक्रियमाणेऽन्यदृष्टस्यान्येन न भवति तदाका कथा क्षणिके कर्त्तरि स्वीक्रियमाणे। पुनः शङ्कते—**न च साप्रत्यभिज्ञाप्रतिवदित्यादि** यथा प्रातिभंज्ञानं न सविषयकं किन्तु निर्विषयं तथैव प्रत्यभिज्ञाया निर्विषयत्वेको दोष इत्यर्थः। तथा च "प्रत्यभिज्ञानिर्विषयताप्रतिभात्वात् मानसकृश्यनावदित्यनुमानमेव प्रत्यभिज्ञायानिर्विषयत्वे प्रमाणमिति प्रश्नाशयः।

उत्तरयति सिद्धान्ती **निर्विषयकप्रत्यभिज्ञाया** इत्यादि। अयमर्थः ज्ञानमात्रस्य सविषयकत्वनियमात्। यद् यज्ज्ञानं सत्सर्वं सविषयकमेव ज्ञानत्वात्, घटादिज्ञानवदित्याद्यनुमानेनज्ञानसविषयकत्वसाधनेन ज्ञानविशेषस्य निर्विषयत्वस्वीकारे प्रत्यक्षादिवाधात्। सर्वेप्रत्यया यथार्थाः प्रत्ययत्वात् घटादिप्रत्यक्षवत्। अयंभावः सर्वतो विश्वासभूमिर्ज्ञानमेव। शतधावोध्यमानोपिनतावत् श्रद्धते यावज्ज्ञानविषयी न क्रियते, एतादृशं सर्वविश्वासकारणं ज्ञानं यद्यर्थाद् व्यभिचरेत् तदा तस्य विश्वासभूमितैव न स्यात्। तदुक्तं "यदिस्वार्थं परित्यज्य काचिद्बुद्धिः प्रवर्तते। व्यभिचारवती स्वार्थे कथं विश्वासकारणमिति। तथा "अन्यस्य चान्यथाभानं प्रतीत्यैव पराहतम्। परस्मिन् भासमानेपि न परंभासते यतः" इति। नवा असदर्थविषयकज्ञानस्योत्पादकं किमपि कारणं विद्यते। चक्षुरादिकमेवाऽसदर्थविषयकज्ञानोत्पादने हेतुरिति वाच्यम्? चक्षुरादीनां यथार्थज्ञानोत्पादकत्वस्यैव दर्शनात्। न च यथावेत्रवीजस्यवेत्राङ्कुरजनने समर्थस्यापि, दावदहनदग्धस्य तस्यैव कदलीकाण्डजनकत्वं दोषात्, तथैव दूरत्वसादृश्यादिदोषसहकृतचक्षुरादेरेवायथार्थज्ञानजनकत्वमिति वाच्यम्, तथा सदोषदुष्टकारणस्य पुरुषस्य सर्वदर्शित्व

ननु भवतु विज्ञानस्य क्षणिकत्वं तथापि विज्ञानसन्तानाश्रयणेन प्रत्यभिज्ञानोपपादनं स्यादिति चेन्न. विज्ञानक्षणातिरिक्तस्थिरस्यस्मर्तुरेकस्यास्वीकारेण प्रत्यभिज्ञानो प्रसङ्गात् । अर्थात् दोषोहि यस्य यत् सामर्थ्यं स्वकार्यकरणे तादृशसामर्थ्यस्यैव विघातकं भवति नतु तत्रातिशयमपि जनयति, तथा सत्यन्धपुरुपस्यसर्वदृष्टत्वापातप्रसङ्गात् न च तर्हि "इदं रजतमिति" ज्ञानमपिनविभ्रमरूपं स्यादपितु प्रमैव भवेदिति वाच्यम्, इष्टापत्तेः । तथाहि इदंरजतमिति ज्ञानमंशद्वयविषयकम्, तत्रेदमाकरविपयकमनुभवात्मकं चक्षुरादिकरणजनितम्, रजतमिति ज्ञानंतु स्मरणात्मकमेव तयोश्च स्वरूपतो विषयतश्च विविक्तयोरपिभेदाग्रहप्रयुक्तोऽभेदव्यवहारोभवतीदंरजतमितिवाधकंनेदरंरजतमितिज्ञानं विवेकाग्रहप्रसंजितमभेदव्यवहारमात्रं प्रतिरुणद्धि, एतदेव वाधकस्य बाधकत्वमितिज्ञानमात्रंसर्वमपिसदर्थविपयकमेवनासदर्थविपयकं भवतीति तस्मात्सर्वज्ञानं सविषयकं भवति । यदि कदाचित्प्रत्यभिज्ञानस्यनिर्विषयत्वं कश्चिद्ब्रूयात्तदातस्य प्रत्यक्षादिवाधोदुर्वार एव स्यादिति । अर्थात् सर्वस्यज्ञानस्य सविषयकत्वनियमात्, तादृशज्ञान विशेषस्य निर्विशेषकत्वे तस्मिन् ज्ञानत्वमेवनस्याद् व्यापकाभावेन व्याप्यस्यसत्वायोगात् । तस्मात् ज्ञानविशेषे निर्विषयकत्वसाधनं प्रत्यक्षवाधितमेवेति । प्रातिभज्ञानेपि न सर्वथा निर्विषयकत्वम् । अन्यत्रविद्यमानस्यैववस्तुनोऽन्यत्रभानदर्शनात् जले सत एव कमलस्यान्यत्रभनात् । तथा प्रतिभज्ञान स्वाप्निकं ज्ञानमपि क्वचित्सत्यमेवभवतीति । निर्विशेपत्वसाधकहेतोः सविषयकत्वम् । अन्यत्रविद्यमानस्यैव वस्तुनोऽन्यत्रभानदर्शनात् । जले सत एवकमलस्यान्यत्रभानात् । तथा प्रतिभज्ञानं स्वाप्निकं ज्ञानमपि क्वचित्सत्यमेव भवतीति । निर्विशेपत्वसाधकहेतोः सविषयकत्वे, तदविशेषात् सर्वज्ञानानांसविपयकत्वं प्रसज्येत, तादृशहेतो र्निविषयकत्वे कारणाभावादेवनिर्विषयकत्वरूपसाध्यमेव नसिद्ध्येत् । तस्मात्क्षणिकविज्ञानवादिमतं न समीचीनं यथार्थख्यातिवादेविशेषोद्रष्टव्यः ।

विज्ञानस्य क्षणविनष्टत्वेन प्रतिसन्धानं न स्यादनुभवितुरभावादित्यादिदोषेण तन्मतं निराकृतमपि पुनर्विज्ञानसन्तानाश्रयणेनतदुपपादयति । मन्मते विज्ञानं द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं च । तत्रनीलपीतादिवाह्यवस्तु विषयकं ज्ञानमाद्यम् । द्वितीयंतु अहमहमित्याकारकं तत्तु आलयविज्ञानमात्मरूपम् । तदुक्तम् "तत्स्यादालयविज्ञनं यद्भवेदहमास्पदम् । तत्स्यात्प्रवृत्ति विज्ञानं यन्नीलादिकमुल्लिखेत्" इति । तत्र यत्सत् तत्क्षणिकं मेघमालावदिति नियमेनोभयप्रकारक विज्ञानस्य क्षणिकत्वेपि, आलयविज्ञानधाराया अनुवर्तनेन पूर्वपूर्वसन्ताननिष्ठसंस्कारादेरुत्तरोत्तरेऽनुवर्तनात्प्रत्यभिज्ञानस्यानुपपत्तिर्नस्यादित्याशङ्कामपनेतुमुपक्रमते "**ननु भवतु विज्ञानस्य क्षणिकत्वमित्यादि** । विज्ञानसन्तानस्य स्वीकारेण विज्ञानस्य क्षणिकत्वेपि स्मरणादीनामुपपादं नस्यादिति प्रश्नाशयः । उत्तरयति=**विज्ञानक्षणातिरिक्तस्थिरस्येत्यादि** । विज्ञानमेव क्षणोविज्ञानक्षणः ।

पपादनस्याशक्यत्वात् । स्वीकारेतु स्वसिद्धान्तपरित्यागान्यदीयसिद्धान्ताभ्युपगम प्रसङ्गाच्च । नचात्यन्तसादृश्यात् लूनपुनर्जातकेशादाविवप्रमातरि भेदाग्रहणेन प्रत्यभिज्ञाया भ्रमः स्यादिति वाच्यम् दृष्टान्तदार्ष्ट्रान्तिकयोर्भेदात् दृष्टान्तेकेशादौ स्थिरस्यैकस्य पूर्वोत्तरकालिककेशव्यक्तिद्रष्टुः समसंस्थानतया व्यक्तीनां भेदादर्शिन एकत्व भ्रमसंभवात् ।

प्रकृतेतु विज्ञानव्यक्तयः परस्परवार्तानभिज्ञानिरन्वयविनश्वरस्वभावा इति बौद्धसमय इति तेषु विज्ञानेष्वेकत्वभ्रमासंभवात् । अति सादृश्येपि अन्यकृतं स्वकृतमितिकश्चिदप्यनुसन्धत्ते । तस्मादुत्पादविनाशशीलसंतानाश्रयः स्थिरः कश्चिच्चेतनोऽवश्यंमन्तव्योऽन्यथा प्रत्यभिज्ञानोपपादनाऽशक्यत्वादिति क्षणिकवादिमतम् ।

स्मर्तुरनुसंधानकर्तुरित्यर्थः । अत्रायमाशयः अनुसंन्धानकर्तुरालयविज्ञानधाराऽन्तःपतितपूर्वकालिकार्थस्मरणकर्तुर्विज्ञानादतिरिक्तः क्षणःसस्थिरोऽभ्युपगम्यते नवा यद्यभ्युपगम्यते इति प्रथमपक्षोऽर्थादतिरिक्तः स्थिरःकश्चिदस्ति, तदास्वसिद्धान्तव्याकोपः, यतः सर्वंक्षणिकमिति स्वाभ्युपगतसिद्धान्तोदत्तजलाञ्जलिकः स्यात् । अर्थात् क्षणिकविज्ञानातिरिक्तस्य स्थिरस्यकस्याप्यनाभ्युपगमात् । यदि विज्ञानव्यतिरिक्तः स्थिरोन कश्चिन्मन्यसे तदा प्रत्यभिज्ञानं न स्यात् । अर्थात् क्षणिकक्रमिकालयविज्ञानसमुदायरूपं सन्तानं यदि समुदायितोऽनतिरिक्तं तदा प्रत्यभिज्ञानं नोपपद्येत, सन्तान मध्यतितस्यप पूर्वकालिकानुभवकर्तुर्विनष्टत्वात्, उत्तरकालिकविज्ञानक्षणस्यचानुभवाभावेन प्रतिसन्धानासंभवात् । इत्येवं सौगतस्योभयतः पाशारज्जुरितिन्यायातिपातः । स्थिरस्य कस्यचित् स्वीकारे सिद्धान्तव्याकोपोऽस्वीकारे च स्मरणाभावप्रसङ्गश्चापद्येतातस्तदिदमुभयमपि अनिष्टमेवेति ।

अत्रेदमनुसन्धातव्यम् ये च पदार्थाः क्षणिकास्तेषां समुदायोपिनसंभवति स्थिरदेशकालाद्युपाधिक्रोडीकाराभावात् सुगतसमये एकज्ञानक्रोडीकारस्यातिप्रसञ्जकत्वात् । स्वान्यसन्तानि विज्ञानस्यव्यधिकरणत्वेन सन्ताननियामकत्वासम्भवात्, न च पूर्वपूर्वविज्ञानकारणकतदुत्तरोत्तर विज्ञानपरंपरैव सन्तानमिति वाच्यम्, पूर्वत्वमात्रस्याति प्रसक्तत्वात्, पूर्वकालिकदेवदत्तविज्ञानस्यापि उत्तरकालिकयज्ञदत्तादिविज्ञानोत्पादकत्वप्रसङ्गात् विनष्टस्य कार्यकालेऽविद्यमानस्योपादानत्वायोगात् । उपादानकारणस्य कार्यसहभावित्वेनैव कारणत्वं नतु केवलंपूर्वकालिकत्वमात्रेण, नहि भवति मृत्तिकादेर्घटपूर्वत्वमात्रेण कारणत्वम् । उत्पन्नविनष्टकपालात् घटोत्पत्तेरदर्शनात् । ततश्चपूर्वत्वमात्रस्यातिप्रसक्तत्वेन सन्तानानुपपत्तेः समाधानं नैव भवतीति ।

ननु प्रथमालयविज्ञानस्य द्वितीयाद्यालयविज्ञानेन सहातिसादृश्यात्, तयोर्द्वयोरतिसादृश्येन भ्रमात्मकं प्रत्यभिज्ञानं समुपपद्येत दीपकलिकादिवदित्याशयेनशङ्कते, **नचात्यन्तसादृश्यादित्यादि** । उत्तरयति-**दृष्टान्तदार्ष्ट्रान्तिकयोरि**रित्यादि । भ्रान्तिरूपं प्रत्यभिज्ञानं न संभवेत्, तदेवोपपादयति **दृष्टान्तेकेशादा**वित्यादि दृष्टान्ते केशादौ दीपकादौवापूर्वापरादिंभिन्नकालि-

यदुक्तंक्षणिकं विज्ञानमात्मा, तन्न ज्ञानस्य प्रागभावाद्यस्याभावात् । तथात्वञ्च तस्यस्वतः सिद्धत्वात् । स्वतः सिद्धस्य प्रागभावादयो न भवन्ति । यदि स्वयमेव स्वभावमवगमयेत्तदातत्सर्वथा सदेव भवेत् गगनादिवत् गगनकुसुमवदसदेव वा भवेत् । सत्पक्षेऽभाव एव नास्तीतिकथं तत्साधयेत् । साधकस्यासत्वे साधकत्वमेव न स्यादिति न तावत्स्वतस्तत्सिद्धिरिति । नापि प्रमाणान्तरेण, ज्ञानस्य प्रमाणान्तराविषयत्वात् । प्रमाणान्तरविषयत्वे घटादिवदेव ज्ञानस्याज्ञानत्वप्रसङ्गात् । अनवस्थादिप्रसङ्गश्च

कयोः केशयोर्दीपकलिकादेर्वाऽत्यन्तसदृशयोः प्रत्यक्षकर्तातदतिरिक्तः कश्चित् स्थिरश्चेतनो विद्यते, यस्यसमीचीनं स्थलान्तरेऽसमीचीनज्ञानमपि भवति । तादृशस्थले दोषवशात् कदाचित् ममात्मकं प्रत्यभिज्ञानमुपयुज्यते, दार्ष्टान्तिकेतु क्षणिकालयविज्ञानानां द्रष्टास्थिरोऽतिरिक्तस्तुभवन्मतेनैव स्वीक्रियते । अतोविज्ञानमेवात्मा स्वभिन्नेनात्मना स्वस्मिन् तदभेदं भावयिष्यति ततश्चाभेदभ्रमो भवतीति वक्तव्यम् , परन्तु क्षणिकतया परस्परवार्तानभिज्ञतया स्वस्मात् स्वस्माद् भेदंवाऽभेदंवा ग्रहीतुंन शक्नुयात् । तस्मान्नैव प्रत्यभिज्ञानंभ्रमात्मकमिति कथनं युक्ततरमिति । यदुक्तं प्रश्नावसरे मृगमदवासनावसितवसनवत् पूर्वपूर्वविज्ञानं संस्कारस्योत्तरे संक्रकणादिकमुपपद्यते इति । तदपि नोपपद्यतेयतो निरन्वय विनाशस्याभ्युपगमात् । अर्थात् पूर्वविज्ञानस्य निरन्वयं समूलनाशनान्तरमेवोत्तरोत्तरस्योत्पादो भवतीति, तत्र पूर्वविज्ञानगतवासनादिवलादेव प्रत्यभिज्ञानं भ्रमात्मकं न घटते, धर्मधर्मिणोरुभयोरपि समूलं विनाशात् । ततश्च पूर्वधातुवृत्तिवलादपि पूर्वानुभूतवस्तुनः प्रतिसन्धानादिकं न घटते परस्परवार्तानभिज्ञत्वात् । तेन ज्ञानान्तरतद्विषयाऽग्राहित्वमेव । यदि कारणगतवासनातः तदुत्तरतत्कार्येषु वासनाद्वयमङ्गीकृत्य स्मरणादिकमुपपाद्येत तदा मात्रानुभूतपदार्थस्मरणं तत्कार्यभूतपुत्रस्यापि स्यात् । नचोपादानोपादेयभावो नियामकः, वासनायागुणरूपयाः संक्रमणासंभवात् ।

नचोत्तरस्मिन्नुत्पत्तिरेव संक्रमोनतु क्रिया रूपः संक्रम इति वाच्यम् , विज्ञानस्य क्षणिकत्वेनानन्तसंस्कारकल्पने गौरवादिदोषप्रसङ्गात् । अतो विज्ञानातिरिक्तस्थिर एवात्मेतिस्थिरात्मवाद एव श्रेयान् नतु क्षणिकविज्ञानात्मवादोऽवैदिकः श्रेयानिति ।

अथ क्षणिकविज्ञानंनात्मा, कृतप्रणाशाकृताभ्यागमादिदोषप्रसङ्गादित्युपश्रुत्यनित्यविज्ञानमेवात्मेति शङ्करमतानुयायिनः प्रत्यवतिष्ठन्ते । **यदुक्तंक्षणिक विज्ञानमात्मेति** । सत्यंतन्मतंभवद्भिर्निराकृतम् , ज्ञानस्यानित्यत्वे प्रत्यभिज्ञानोपपादनासंभवात् । तथा कृतप्रणाशाऽकृताभ्यागमादि दोषाच्च । परन्तु नित्यविज्ञानस्यात्मत्वे, नास्तिकोपि दोषः प्रत्युतनित्यविज्ञानवादः श्रुतितर्काद्यनुमोदित इति स एव वादः स्वीकरणीयः । कथमयं विज्ञानात्मवादो निर्दुष्टस्तत्राह **तन्न** इति ।

तस्माज्ज्ञानस्योत्पत्तिर्नभवति । तस्य प्रागभावाऽभावेन जन्माभावस्ततश्च जन्मसापेक्ष स्थितिविनाशादिभावविकाराणामप्यभावोऽर्थत एव सिद्ध्यति । विज्ञानस्योत्पत्त्यभावादेवाकाशादिवदेवानेकत्वमपि न भवति, व्यापकाभावेन व्याप्याभावस्यावश्यकत्वात् । नहि जन्मरहितस्य विभागो भवति । ज्ञानत्वादेवतस्येतरेतराभावादयो न भवन्ति । तस्मात् समस्तभेदविकल्परहितनिर्धमकप्रकाशमात्रैकरसकूटस्थनित्यविज्ञा

क्षणिकविज्ञानवादे दोपं तथा नित्यविज्ञानस्य सिद्धिं प्रदर्शयितुमाह **ज्ञानस्य प्रागभावाद्यभावा**दित्यादि । योहि अनित्यः पदार्थः स जायते यथा घटादिः । जायमानस्योत्पादककोटौ प्रागभावो प्रविशति । परन्तु ज्ञानस्य नित्यत्वेन प्रागभावस्यावश्यकतैवनास्ति, स्वतः सिद्धत्वात् कालादिवदिति । अतः सिद्धस्य ज्ञानस्य प्रागभावाद्यसिद्धेर्नज्ञानमनित्यं किन्तु नित्यमेव । स्वतः सिद्धस्य प्रागभावादयो न स्वतः सिद्ध्यन्ति परतोवा । स्वयमेव स्वाभावमवगमादसद्वा सद्वा साधयेत् । सत्वेऽभावमेव न विद्यते कथं साधकः, असत्वाच्च साधकत्वमेव नास्तीति न तावत् स्वतस्तत्सिद्धिरिति । अर्थात् स्वस्यासत्वे ग्राहकस्याभावादेव, स्वस्यस्वत्वे ग्राह्याभावाच्चज्ञानस्य न प्रागभावादिर्गृह्यते । ज्ञानस्यज्ञानान्तरविषयत्वेन ज्ञानान्तरेण तज्ज्ञानप्रागभावप्रागभावस्य ज्ञानमपि न संभवति ज्ञानाविषयत्वमन्तरेण ज्ञानोपरक्तप्रागभावग्रहणमेव न स्यात्, यदि ज्ञानस्यापि ज्ञानान्तर विषयत्वं कश्चिन्मन्येत, तदाज्ञानस्यापिज्ञानान्तरविषयत्वेनानवस्थैव । क्वचिदपिज्ञानप्रवाहे विषयान्तरसंचारोच्छभयात्, अनवस्थानाद्वाविश्रामे प्रथमज्ञानस्यघटादिवज्जड़त्वमापद्येत । ज्ञान विषयत्वस्यैव जड़रूपत्वस्यैव जड़त्वात् । तस्मात्प्रमाणाभावात् ज्ञानस्यप्रागभावो न विद्यते । प्रागभावाभावाच्च न ज्ञानस्यजन्यत्वमपितु नित्यप्रकाशरूपत्वमेव । **प्रागभावे**त्यादि । पदार्थमात्रस्य प्रथमं जनिस्ततस्तस्य स्थितिस्ततो विनाशः । स्थितिकालेच, अस्तित्ववृद्धिपरिमाणापक्षयाश्च । एतत्सर्वमुत्पत्यनन्तरमेव भवतीत्यतो यस्य पदार्थस्य प्रागभावादिकारणकलापान्तर्गतप्रागभावस्य निरासोजातस्तादृशपदार्थस्यस्थित्यादिका विकाराः परिहृता एव भवन्ति । उत्पत्तेरभावात् ज्ञानस्यानेकत्वमपि निराकृतम् । यत्रयत्रोत्पत्तिमत्वं तत्सर्वंनानाभवतीति नानात्वस्यव्यापकमुत्पत्तिमत्वम् । प्रकृतेविज्ञाने व्यापकस्योत्पत्तिमत्वस्य प्रागभावनिराकरणेनाभावेजाते, उत्पत्तिमत्वाभावे तद् व्याप्यस्यनानात्वस्यापि निवृत्तिर्भवत्येव । यद् जन्यं तदेवनाना दृष्टम्, यदजन्यमाकाशादिकं तत्रनानात्वंनभवति, यद्यपि घटाद्युपाधिभेदेन नित्याकाशेऽपि घटाकाशः पटाकाश इति भेदो दृश्यते, तथापि तादृशोभेदो घटादिवन्न स्वाभाविकोऽपितु आगन्तुको नतु परमार्थिकः । तथा चात्रोत्पत्तिमत्वाभावरूपव्यापकाभावेव्याप्यस्य नानात्वस्याप्यभावो विज्ञाने प्रसिद्ध्यत्येव । यथा व्यापकस्यद्रव्यत्वस्य रूपादिप्रमुखगुणादावभावे गृहीते द्रव्यत्वव्याप्यपृथिवीत्वादीनामभावो गृहीत एवभवति । सोयंभेदद्विविधः सजातीयविजातीयस्वगतभेदात् । तथोक्तम् "वृक्षस्यस्वगतोभेदः पत्रपुष्पफलादिभिः । वृक्षान्तरात्सजातीयो विजातीयः शिलादितः" इति ।

नमेवात्मा परमात्मा च नतु विज्ञानं क्षणिकम् । यथोक्तम् "यानुभूतिरजाऽमेयाऽनन्तात्मात्मेति" ।

एतादृशं विज्ञानमेव "तत्वमस्यादि वाक्यात्मकवेदान्तवेद्यम् । यथोक्तम् परागर्थप्रमेयेषु या फलत्वेन संमता" इत्यादि तदीयवार्तिकवचने । अपि च शुष्कतर्कमात्रेणैवात्मनोननित्यविज्ञानस्वरूपत्वं किन्तुश्रुतिस्मृत्यादिप्रमाणवलादपि तद्रूपत्वमेव सिद्ध्यति । "सत्यंज्ञानमनन्तं ब्रह्म" "प्रज्ञानघनंब्रह्म" "एकमेवाद्वितीयम्" "अहं ब्रह्मास्मि" "अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते" "वेदाविनाशिनं नित्यम्" "यतोवाचो निवर्तन्तेऽप्राप्यमनसा सहेत्यादि" तस्मात् क्षणिकविज्ञानस्यानात्मत्वेपि स्वतः सिद्धप्रकाशात्मकनित्यविज्ञानस्यैवात्मत्वमिति शाङ्करमतप्रश्नः ।

यथावृक्षे तदीयफलादितोयोभेदोवर्तते सस्वगतोभेदः स्वस्मिन् स्वावयवानाम् । वृक्षान्तराद्वृक्षान्तरेयोभेदः स सजातीयोभेदःवृक्षत्वेन सर्ववृक्षाणां साजात्यात्, पनसाम्रात्वेन व्यक्तिभेदात् । तत्रैव शिलादितोभेदो विजातीयो वृक्षत्वपाषाणत्वाभ्यांवैजात्यात् । तथा सद्वस्तुनोभेदत्रयं प्राप्तं निवार्यते । ऐक्यावधारणाद्वैतप्रतिषेधैस्त्रिभिःक्रमात् " इति । अर्थात् 'यद्वस्तुतत् भेदत्रयवत् इति लौकिकव्याप्त्या विज्ञानात्मकब्रह्मणि प्राप्तं भेदत्रयम्, "एकमेवाद्वितीयम्" इतिश्रुतिवाक्यघटक, एकम्, एव, अद्वैतम् इति पदैःक्रमेणनिराकृतम् । नातोविज्ञाने सर्वथैव नानात्वस्य निराकरणेन तदेकत्वं नित्यत्वादिकञ्च सिद्ध्यति । उत्पादकप्रागभावादिकारणानामभावेन नित्यं विज्ञानमेवात्मा, तदतिरिक्तं दृश्यं सर्वं तस्मिन्नेवदृक् स्वभावेमाययाकल्पितमेव, जीवेशादिविभागोपिकल्पित एवातो मिथ्यैव । सर्वमिथ्यात्वेपि स्वप्नवदेव सर्वव्यवहारोयावत्संसारमनुवर्तते । तथापि सर्वमिथ्यात्वेपि "जीव ईशो विशुद्धाचित् तथा जीवेशयोर्भिदा । अविद्यातच्चितोर्योगषडस्माकमनादयः" इतिप्राचीनोक्त्या अनादिका एव । अत्रावच्छेदवादप्रतिबिंववादादयस्तत्तदाचार्यमतिभेदादनेकविधा एव । अविद्यादीनां स्वरूपं लक्षणंच यथा संभवंतत्तत्स्थले प्रदर्शितम् । तस्माद्विगलितभेदं कूटस्थविज्ञानमेवात्मापरमात्माचेति । यथोक्तम् "याऽनुभूतिरजाऽमेयाऽनन्तात्मेति" [अस्यार्थः या सर्वानुभवसिद्धा, अनुभूतिर्ज्ञानरूपा सैव, अजानजायतेनोत्पद्यते प्रागभावरहिततयानोत्पत्तिमती । "अमेया" ज्ञानं विषयत्वं मेयत्वम्, तद्भन्निममेयत्वम्, एतावता ज्ञानाविषयत्वं कथितम् । अनन्ता" नविद्यतेऽन्तः प्रध्वंसप्रागभावोवायस्य तदनन्तम् । एतेन विनाशरहितत्वं सूचितम् । यद्वादेशकृतकालकृतवस्तुकृतान्तवत्वनिषेधेनत्रिविधपरिच्छेदरहितत्वं विज्ञापितम् । "आत्मा" यथोक्तानुभूतिरेवात्मा । तत्रात्मत्वम्, जीवात्मपरमात्मरूपत्वमेव इत्थंभूतज्ञानमेवैकं सर्वव्यापकं सर्वव्यापकंपरमात्मरूपम् । उपाधिभेदेनार्थात्, अन्तःकरणरूपापाधिभेदेनानेकजीवरूपं च, घटपटाद्युपाधिभेदेनाकाशादिवदित्यर्थः । **यानुभूतिरजेत्येति** । एतदेव यथा लक्षणकंज्ञानंतत्त्वमसीति वेदान्तमहावाक्यस्यतात्पर्य

तदेतत् शाङ्करमतमशास्त्रीयमलौकिकं चेति विशिष्टाद्वैतवादिनः संगिरन्ति ।

विषयम् । "यतोवाचोनिवर्तन्तेऽप्राप्यमनसासहे" तिश्रुत्यावाङ्मनसातीतत्वप्रतिपादनेन जीवात्म परमात्मनोऽभेदप्रतिपादनम् । किन्तु सोऽयंदेवदत्त इत्यादिवाक्यवदुभयपदेऽर्थात् तत्पदे त्वं पदे च लक्षणामाश्रित्य तात्पर्यवलेनाभेदप्रतिपादनं भवतीति तदेवज्ञानं वेदान्तवाक्यस्यतात्पर्यम् । अर्थात् नात्मा वेदान्ते शक्त्यावोधितोभवत्यपितुशाखाचन्द्रमसन्यायेन तात्पर्यत एवाधिगतो भवतीति तेषो मतम् । एवं तदीयवार्तिककरोप्याह "परागर्थप्रमेयेषु या फलत्वेन संमता । संवित् सैवैहमेयोऽर्थौ वेतान्तोक्तिप्रमाणतः । अप्रामाण्यप्रसक्तिश्च स्यादितोऽन्यार्थकल्पने । वेदान्तानामतस्तस्मान्नान्यमर्थंप्रकल्पयेत्" इति ।

तदयमर्थः परागर्थेषु वाह्यघटपटादिविषयविषयकं पारमार्थिकवेदान्तवाक्यात्मकप्रमाणजनितंज्ञानंफलरूपेण स्वीक्रियते प्राचीनाचार्यै स्तदेव प्रमाणजनितज्ञानम्, वेदान्ततन्त्रेप्रमेयरूपम्। इतोऽन्यस्मिन्, एतदरिक्तपरागर्थप्रमेयेवेदान्तवाक्यस्यतात्पर्यें परिकल्प्यमानेसति वेदान्तवाक्यनां प्रामाण्यं न स्यात्, यतो ब्रह्मव्यतिरिक्तार्थस्यमायिकतयाऽसत्यस्य प्रमाणाविषयत्वेन मिथ्यात्वात् । अर्थादेतन्मतेब्रह्ममात्रस्यसत्यत्वं तदतिरिक्तस्यासत्यत्वमेवति सुरेश्वराचार्यवचनार्थः । अर्थात् निर्विंशेषनित्यज्ञानमात्रमेवतत्तत्प्रमाणजनितान्तःकरणवृत्तिप्रतिबिंबिततया तत्तदाकारवृत्त्यवच्छिन्नतयावातत्तद्प्रकाशकत्वेन प्रमाणफलत्वव्यवहार इति । इनिनित्यविज्ञानात्मवादेतत्त्वदीपः ॥

नित्यज्ञानाद्वैतवादिमतस्य संक्षेपेण प्रश्नोगतः । एतन्मतेज्ञानंनिर्विषयमकर्तृकंच, तदेव पारमार्थिकं तदतिरिक्तं सर्वंवस्तुमाययातत्रैव प्रकल्पितमिति मिथ्यैव । तथोक्तम्—सुरेश्वराचार्येण "अक्षमाभवतःकेयं साधकत्वप्रकल्पते । किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितमिति । एतन्मतेद्विविधं ज्ञानंस्वरूपज्ञानमन्तःकरणवृत्त्यात्मकं च । तत्राद्यम् निविषयं स्वप्रकाशात्मकम् । द्वितीयंमनोजन्यत्वेन नित्यंसकर्तृकं सकर्मकं च यमधिकृत्य "अहंघटादिकं जानामीत्यादि प्रयोगा भवन्ति । प्रथमंचाधिकृत्य "अरूपमस्पर्शमशद्बमव्ययं तथाऽरसं नित्यमगन्धवच्च । अनाद्यनन्तम् "सत्यंज्ञानम् प्रज्ञानंब्रह्म" इत्यादिश्रुतयः प्रवर्तन्ते । इत्यादिकं प्रश्नरूपेणोपक्षिप्तम् । तन्मतं शास्त्रलोकविरुद्धमेवेति कृत्वातस्य विशेपरूपेण निराकरणायोपक्रमते **तदेतत् शाङ्करमतमित्यादि** तत्रालौकिकमिति लोकप्रसिद्धप्रत्यक्षादिविरुद्धंयतो "घटः सन्नित्यादिप्रत्यक्षादिना जगतः पारमार्थिकत्वस्य निवेदनात् । अत्र न जगतो मिथ्यात्वस्य प्रतिपादनात् । ततश्च लोकविरुद्धमिदंदर्शनम् । तथावेदविरुद्धमपि, वेदे "स्वर्गकामोयजेत" "स्वराजकामोवाजपेयेनयजेत" इत्यादिकं श्रूयते । सच वेदप्रतिपादितो यज्ञस्तदैव स्वरूपं लभेत यदा परलोकेहलोकयोः पारमार्थिकत्वं भवेत् । तथा यदि यागस्य स्वरूपं द्रव्यं देवता च, कर्त्ताकाश्चिज्जीवः पारमार्थिको भवेत् । ब्रह्मव्यतिरिक्तसर्वस्यमिथ्यात्वे

तथाहि, यदेतत् ज्ञानादिपर्यायभूतं संविदादिपदंतत् स्वकीयाश्रयं प्रतिस्वसत्तया यस्यकस्यचिदर्थस्य प्रकाशनशीलो ज्ञानादिपर्यायकः सकर्मकः संवेदनकर्तुरात्मनो धर्मोलोकप्रसिद्धः। इत्थमेव सर्वेषामनुभवो जायते "अहमिदं जानामीति। एतादृशस्य धर्मभूतज्ञानस्यसुखदुःखादिवदेवोत्पत्तिस्थितिनाशाश्च प्रत्यक्षत एवानुभूयते "ज्ञानमुत्पन्नं विनष्टं चेति। स्वापमूर्छादौ तस्य वेदनस्यासत्वादेवनोपलंभो भवति, यदि तत्र स्वापादौ वेदनं भवेत्तदा जागरणेपि तदनुसंधानं भवेत्, परन्तु नैव भवति, तत् स्वापादौ न सद्भावः। एवं सुषुप्तावपि न संवेदनसद्भावः प्रबुद्धस्य तत्काले "इयन्तकालं न किञ्चिदवेदिषमिति प्रबोधे ज्ञानाभावस्य स्मरणात्।

समुदाहृतहेतुर्निरालंबनः सन्सर्वथैवाप्रामाणिकत्वमियादित्येवमेतन्मतस्य वेदविरुद्धत्वमापद्यते। इत्येवं लोकवेदस्याननुकूलमिदमिति विशिष्टाद्वैतवादिनः कृतात्मसाक्षात्कारावदन्तीति। [अत्रकृतात्मसाक्षात्कार इति कथनेनाचार्यवचसः प्रामाणिकत्वेन श्रद्धातिशयो व्यञ्जितः। अविश्वासकारणं भ्रमप्रमादकरणापाटवादयः। जातेचात्मसाक्षात्कारे एतेषां दोषाणामस्तंगमिततया तद्वचनं सर्वथा प्रामाणिकमेवेति]

पराभिमतं यत् संविद्दर्शनं, तत्रसंविदद्वैते प्रत्यक्षविरोधंदर्शयितुमाह **तथाहि यदेतद ज्ञानादिपर्यायेत्यादि** परागर्थप्रमाया एवफलतया आत्मस्वरूपत्वं कथितं वार्तिककृता सुरेश्वरेण तत्र प्रत्यक्षविरोधं दर्शयति **ज्ञानादिपर्यायभूतमिति** ज्ञानादिपदं पर्यायनामकैकार्थबोधकं यस्यैतादृश आत्मधर्म [विषय] भूतो विषयप्रकाशक एव संवित्पदवाच्यो भवति, नतु तदतिरिक्तः कश्चित्पदार्थस्तादृश इति तस्यज्ञानापरपर्यायस्यान्यविशेषणधर्मतयाऽनित्यत्वेनार्थादुत्पादविनाशशीलस्य प्रमाणफलभूतस्य विषयविषयकज्ञानस्य नित्यात्मस्वरूपत्वं कथमपि न संभवति, परस्परविरुद्धप्रकाशतमसोरिव यथा तमोन प्रकाशात्मकं तथैव नित्यात्मकं न स्यादितिभावः। प्रमाणफलभूतस्य सकर्मस्य साश्रयस्य चानित्यत्वमेव दर्शयति **स्वापमूर्छादावित्यादि**—यदि स्वापेवेदनस्यवर्तमानत्वंतदातस्य योग्यत्वादुपलब्धिर्भवेदेव, स्फीतालोकवर्तिघटादिवदेव, परन्तु स्वापादौ नोपलभ्यते इत्यतस्तदा स्वापेज्ञानस्याभावनिश्चितोभवतीति। सुषुप्तोत्थितस्य प्रबोधसमयेवेदनाभावस्यैव स्मरणं भवति तावता सुषुप्तिकालेवेदनस्यासत्वमेवसिद्ध्यतीत्याशयेनाह-**एवं सुषुप्तावपीत्यादि** एतावन्तंकालं सुप्तो न किञ्चिदवगतम्" इति सुप्तोत्थितस्य स्मरणं भवति, स्मरणं चानुभवपूर्वकमिति सुषुप्तौनासीज्ज्ञानमितिज्ञायते, अन्यथाऽननुभूतज्ञानाभावस्य प्रबोधेऽवबोधो न स्यादिति। न चोक्तं ज्ञानं प्रबोधकालेजायमानमनुमानात्मकमेव सुषुप्तिकालोज्ञानाभाववान्, सामग्रीविरहात्, अतोतत्कालेज्ञानाभावस्य स्मरणात्मकत्वमेव नास्तीतिवाच्यम्, तदनुमायकहेत्वाभावात्।

नचज्ञानाभावानुमापको हेतुर्ज्ञानसामग्र्यभावएव, सुषुप्तिकालोज्ञानाभाववान् ज्ञानसामग्रीवैकल्यात्, तस्मात् सुषुप्तिकालेज्ञानाभावानुमितसामग्र्यभावेनानुमित एव, ज्ञानाभावः प्रबोधेभवति

यावदनुभूतं तत्सर्वमेवस्मर्यतेति न नियमः । अत एव संस्कारविनाशकमरणादिकारणाभावोपि नियमतो जायमानस्मरणं सुषुप्तावनुभवाभावमेव ज्ञापयति । न च संवित्प्रकाशे विद्यमानेपि विषयाभावेन विषयोपश्लिटाहंकाराभावात् स्मृतेरनुदय इति वाच्यम् विषयाभावस्य तद्ग्रहणस्य चार्थान्तरप्रकाशप्रयुक्तकार्यप्रतिबन्धकत्वासंभवात् । संविदित्रितयावभासनियमेपि तत्तदनुभवस्यैव तत्तत्संस्कारद्वारा तदर्थस्मारकत्वात् । न च स्वापेऽहमर्थो विनष्ट इति वक्तव्यम् । प्रत्यभिज्ञया तस्यस्थायित्वसिद्धेः ।

नतु तदाऽनुभवजनितस्मरणात्मक इति वाच्यं तथा सत्यन्योन्याश्रायप्रसङ्गात् , तस्मात् प्रबोधकालिकज्ञानाभावोऽसुषुप्तिकालिकानुभवजनितस्मरणात्मकमेवनत्वनुमेयम् । अनुमितौज्ञानाभावेन सामाग्र्याभावानुमानम् सामग्र्यभावेन च ज्ञानाभावानुमानेऽन्योन्याश्रयस्यापातात् । ततः स्मरणात्मकमेव सुषुप्त्यनन्तरप्रबोधकालिकं तदितितेनज्ञानाभावस्तदासिद्ध्यतीतिभावः ।

ननुस्वप्नकालेपि विद्यते एवानुभवोज्ञानस्य स्वप्रकाशरूपत्वात् । नचैवमनुभूतस्य स्मरणमवश्यमेव भवितव्यमित्याकारकनियमाभावात् अर्थात् सत्यमनुभूतं स्मर्यते, परन्तु यावदवस्तु अनुभूतं तत्सर्वमेव स्मर्तव्यमिति नियमाभावात् । ततश्च तदननुसन्धानं जागरणकाले संभवत्येव “एतावन्तं न किञ्चिदवेदिषम्” इत्याकारकप्रबोधकालिकं स्मरणं तु प्रकाशकत्वविशिष्टज्ञानाभाव विषयकमेव । स्वप्नकाले विद्यमानस्यापि स्वप्रकाशकत्वंनास्तीति तत्राह **यावदनुभूतंतत्सर्वमि**त्यादि’—यदनुभूयतेतत्सर्वमेव स्मृतं भवत्येवेति यद्यपि नियमो न सार्वत्रिकस्तथापि संस्कारविनाशकमरणादीनामभावेपि नियमतोजायमानमस्मरणं स्वापे स्मरणाभावं करोत्येवेति । तदेते संस्कारप्रमोषकास्तदुक्तम् “प्रापणान्नरकक्लेशात्प्रसूतिव्यसनादपि । चिरातिवृत्ताः प्राग्जन्मभोगा न स्मृतिगोचराः इति । अयमाशयः सकलसंस्कारविनाशकारणप्रबलदुःखहेतोरभावेपि नियमतोजायमानस्मरणं संविदः स्वापादौ, अप्रकाशत्वमेव साधयति । चिरपूर्वजाताअपिभोगाः प्रापण[मरण]नरकक्लेशप्रसवरोगादिकारणवलेनऽनुभूताइव न स्मृताभवन्तीति । स्वसिद्धान्ते तु विषयप्रकाशसमये एव धर्मभूतज्ञानस्य प्रकाशत्वस्याकारेणस्वापादिकालेविद्यमानस्यापिधर्मभूतज्ञानस्य प्रकाशाभावो न क्षतिकारको भवतीति ज्ञातव्यम् ।

अत्रपुनः सङ्कते **न च संवित्प्रकाशे विद्यमानेपीत्यादि** स्वापादिकाले विषयाभावेन विषयसम्वन्धस्याभावात् , विषयोपश्लिष्टविषयसंवन्धरहिताहंकारपदवाच्यज्ञातुरभावात् , विषयसम्बन्ध संविदएव संस्कारजनकत्वं नतुविषयसम्बन्धरहितानुभवस्य संस्कारप्रयोजकत्वमिति स्वापकालेऽनुभवस्य तदाधारज्ञातुश्चाभावात् , स्वप्रकाशस्यापि चैतन्यमात्रज्ञानस्य न संस्कारजनकत्वमिति संस्काराभावात् , प्रबोधकाले, नानुसंधानप्रसङ्ग इति प्रश्नकर्तुरभिप्रायः ।

अतएवैतावन्तं कालमहमस्वाप्समिति जागरणे स्मरणं समुपलभ्यते । न कुत्रचिदपि कर्तृकर्मविरहितं ज्ञानं संभवति, तथा कुत्राप्यनुपलब्धेः । ज्ञानसंविदादिशब्दाः सम्ब-

उत्तरयति **विषयाभावस्येत्यादि** अर्थान्तराभावस्यार्थान्तराभावग्रहणस्यार्थान्तरप्रकाशप्रयोज्यकार्यप्रतिबन्धकत्वासंभवात् । समानधर्मिणि समानप्रतियोगिकार्थाभावस्यैवतद्धर्मिणितद्वत्ताज्ञानप्रतिबन्धकत्वनियमात् । अतएव भूतलेघटोऽस्तीति ज्ञानस्य भूतलाधिकरणकघटाभाववत्तानिश्चयस्यैव प्रतिबन्धकत्वं नतु घटवत्ताज्ञानस्य पटाभाववत्ता निश्चयोजलाधिकरणक भूतलाधिकरणको वा प्रतिबन्धको भवति । समानधर्मिण्येव प्रतियोगितदभावयोर्बाध्यबाधकत्वस्य विस्तरेण साधितत्वादिति । **संविदि त्रितयावभासनियमेपीति** मीमांसकमते प्रत्येकस्मिन् ज्ञानेज्ञातृविषयकज्ञानानां नियमतः प्रकाशनात्, स्वापेपिज्ञानावभासोभवत्येवेति न शङ्कनीयम्, यतोज्ञानज्ञेयज्ञातृरूपवस्तुत्रिकस्यावभासनियमेऽपि न ज्ञातृविषयकंज्ञातारं विषयं स्मारयति नवा विषयविषयकं स्वविषयातिरिक्तं स्मारयति । अर्थात् त्रितयमानेपि तत्तत्संस्कारं प्रतितत्तदनुभवस्यैवकारणत्वमिति । एकाग्रतया संविदनुभवे स्वापादौ ततः संस्कारस्योत्पादनेऽहमर्थविलयघटपटाद्यर्थानुभवयोः प्रतिबन्धकत्वाभावात्, संवित्मात्रप्रत्यवमर्शो भवन्मतेदुर्वार एव जागरणेस्यादेवेतिभावः ।

नचैवं स्वापे ज्ञातुर्विनाशेन तत्रस्मर्ताःकः स्यात् ! इति शङ्कांनिराकर्तुमाह **नच स्वापेऽहमर्थोविनष्टः** इत्यादिं नहि स्वापादौविज्ञातुर्विलयः यतःपूर्वदिनेकृतकार्यस्य तदपरदिनेऽनुसन्धान दर्शनेन, ज्ञातुः स्थायित्वमिति पूर्वापरदिनेऽवस्थितस्य कर्तुमध्येस्वापकाले विनाशासंभवात् । अर्थात् प्रत्यभिज्ञया तस्य स्थायित्वसिद्धावकस्मान्मध्येतद्विनाशोनोपपद्यते । स्वापकाल आत्मवान् कालत्वात् प्रबोधकालवदित्यनुमानेनापितस्यज्ञातुः स्थायित्वमेव भवति नतु तद्विनाशः शङ्कनीय इति ।

एवं यथास्वापादिकालेऽहमर्थज्ञातुः सद्भावस्तथैवतत्कालेतस्यज्ञातुर्भानमपि भवत्येवेति तद्दर्शयति **अतएवैतावन्तं कालमित्यादि** सुप्तोत्थितपुरुषस्यस्वापापगमे प्रबोधकालेऽहमेतावन्तं, कालमस्वाप्समित्याकारकस्मरणदर्शनेन नतद्भानस्य सिद्धत्वात् । अर्थात् तदेतत्प्रतिसन्धानं स्वापकालिकं स्वापकालिकात्मप्रतिभासस्य समर्थकंभवतीति । नचेदमनुसन्धानमनुमितस्वापतत्सुखादिसत्ताविषयकमेव, एवं चेदमनुसन्धानं स्वापकालेऽहमर्थस्यात्मनः प्रकाशस्योपपादकं न भवतीतिवाच्यम् सुषुप्त्यंशे व्याप्तिज्ञानजन्यत्वेप्यहमर्थेऽनुसन्धानरूपत्वस्यस्वभावसिद्धस्य निराकरणासंभवात्, “प्रातःकाले चत्वरे नाहमासमित्यादिवत् । प्रातःकालानुभूतात्मस्वरूपत्वादस्यात्मस्वरूपे प्रतिसन्धानरूपत्वं यथा समुपपद्यते तथैव प्रकृते सुषुप्तावनुभूतात्मस्वरूपपरामर्शत्वादात्मांऽशेनुसन्धानरूपत्वे न किमपिबाधकमिति । नच नित्यात्मप्रकाशस्य संस्कारोत्पादने प्रमाणाभावेन कथमर्थे आत्मनि प्रतिसन्धानरूपत्वमस्येतिवाच्यम्, स्वजन्यस्वसंकारवत्वेनानुभवात्मकज्ञानस्य प्रतिसन्धाने एककारणत्वनिर्वाहाय नित्यानुभवस्यापि संस्कारजनकत्वस्य स्वीकारेणनित्यानुभवेनापि संस्कारोत्पादादिति ।

न्धिशब्दत्वात्सम्बन्ध्यान्तरसापेक्षा इति शाब्दिकाः । जानातीत्यादौ ज्ञा धातुः सकर्मकः सकर्तृकश्चेति नास्य प्रयोगः कुत्रापि कर्तृकर्मरहितस्य भवतीति ।

अथ सविषयकज्ञानस्यघटादिज्ञानवत् नित्यत्वं न भवतु, शुद्धस्य सर्वोपाधिविरहितज्ञानस्य नित्यत्वेकाक्षतिरिति चेत्तत्राह **नकुत्रचिदपिकर्तृकर्मविरहितमि**त्यादि, स्वप्रकाशात्मकज्ञानानुभवोयदा भवति तदा विषयाश्रयोपश्लिष्ट एव भवतीति लोकानामनुभवः । इदमहंजानामीत्यादौ कर्तृकर्म सहितस्यैवानुभवात्, नतुनिर्विषयकं निराश्रयंवेति । केवलज्ञानमात्रस्यानुभवस्तुनकस्यापि कुत्रचिदपि प्रसिद्ध इति ।

ननु सर्वोपिवेदान्ती स्वस्वसिद्धान्ते ज्ञानस्वरूपस्यात्मनोनिर्विषयत्वमभ्युपगच्छति तत्कथं संगतमिति चेत्तत्रोच्यते, संवित्ज्ञानानुभूत्यादीनां सविषयकज्ञाने एव प्रयोगस्यलोके दर्शनेन, तत्तदर्थस्यनिर्विषयत्वादिनिषेधः कथंचिदुपपद्यते । परन्तु धर्मभूतज्ञानस्य तु विषयप्रकाशकस्य न निराश्रयत्वम्, नित्यात्मस्वरूपे आश्रितत्वात् धर्मस्य धर्मिणमन्तरेणावस्थानासंभवात् । आत्मस्वरूपज्ञानस्यापिप्रत्यक्त्वानुकूलत्वैकत्वप्रकारतः स्वरूपप्रकाशकत्वस्यैवाभिमतत्वेन तस्यापिनिर्विषयकत्वनिर्धर्मकत्वं वा स्वीक्रियते । नच प्रत्यक्त्वादिनापितस्यमानाभावे काक्षतिरितिवाच्यम्, आत्मा एकोऽनेको वा ! इत्यादिरूपेण तस्मिन्नेकत्वानेकत्वाहंत्वानहंत्वादिसंशयस्य कस्यचित् कदाचिदप्यदर्शनेन प्रत्यक्त्वादिप्रकारेणधर्मिभूतस्वरूपज्ञानस्यापिभानमवस्यमेष्टव्यमेव । अयमर्थः धर्मभूतज्ञानं यदा विषयावभासकस्तदाऽवश्यं साश्रयं विषयकंच भवत्येव, धर्मीभूतज्ञानं तु निर्विषयकं निराश्रितमपि भवति । स्वरूपभूतमपि ज्ञानं दशाविशेषे प्रत्यक्त्वादिप्रकारेणभासमानं सविषयकं भवत्येव । अहमेकोऽनेकोवेति संशयानुरोधेन प्रत्यक्त्वेनभानंभवत्येवेति । अपिच परमप्रेमास्पदत्वात्, सुखत्वप्रकारेणाप्यात्मभानं भवत्येव । तदुक्तमभियुक्तैः—अयंमात्मापरानन्दः परप्रेमास्पदंयतः । मानभूवं नभूयासमितिप्रेमात्मनीक्ष्यते" इति । धर्मभूतज्ञानस्य सविषयत्वं संविद्ज्ञानादिशद्बानांसंवन्धिसाकांक्षत्व प्रसिद्ध्यापि संपादयितुमाह"**ज्ञानसंविदादिशद्बाः** इत्यादि, तत्र संवित् ज्ञानानुभूत्यादि शद्बाः संबन्धिशब्दाः स्वेतरसंवन्धवतोवोधकाः" नियतसंवन्ध्याकांक्षाशालित्वस्यैवतथात्वात् । यथाज्ञानं जातमित्युक्ते कस्य कर्तुरिदंज्ञानं किं विषयकं वा ज्ञानमित्येवं कर्तुर्विषयस्य च नियमतोपेक्षादर्शनात् । यथा पुत्र इति कथने कस्य पुत्र इत्येवंपितुराकाक्षा भवति, पितावेति कथने, कस्यपिता, इत्येवमाकांक्षा भवति ततः पितृपुत्रादिशद्बाः साकांक्षास्तथैवज्ञानादिपदमपि साकांक्षमेव ।

जानातीत्यादौ ज्ञाधात्वर्थो ज्ञानं कर्तृकर्मविषयसाकांक्षमेवेति । नचायमेकान्तो नियमोयत् ज्ञानप्रयोगे कर्तुःकर्मणश्चावश्यमेवापेक्षा "ज्ञानस्वरूपमित्यादि प्रयोगे कर्मकर्तृरहितकेवलज्ञानस्यैव प्रयोगात् । यथा भेदसादृश्ययोरनुयोगिप्रतियोगिसापेक्षयोरपि, भिन्नसदृशमित्यादौ प्रतियोग्याद्यन-

यदपि स्वतः सिद्धस्यानुभवस्य विद्यमानत्वे, तादृशानुभवविरोधादेव तत्काले पेक्षयोरपि प्रयोगात् । अर्थात् , भेदइति सादृश्यमितिकथनेकस्यभेद: कुत्रेति जिज्ञासायां प्रतियोगिनो घटादेरनुयोगिनोभूतलादे, सदृशमित्यत्र चन्द्रमुखयो रुपस्थितिर्भवतीति तदैवशाद्बबोधो भवतीति वाच्यम् , भिन्नत्वात् , अर्थात ज्ञानस्वरूपमित्यत्रज्ञानपदम् स्वयंप्रकाशधर्मिभूतज्ञानस्यवाचकम् , जानातीत्यादौज्ञानपदंधर्मभूतज्ञानवाचकम् ! ज्ञानस्वरूपम् अत्रत्यधर्मिवाचकज्ञानपस्यस्वं प्रकाशत्वप्रवृत्ति निमित्तकस्य संवन्धिपदाद्धर्मभूतज्ञानवाचकात् विभिन्नत्वात् । यथागोत्वजात्यवच्छिन्नचतुष्पादादिमतो गोपदात् किरणवाचकगोपदात्भेदो भवति । तत्र येन गोपदेनकिरणस्यबोधो न गोपदेन गोत्वावच्छिन्नव्यक्तेर्बोधो नवा गोत्वावच्छिन्नबोधकगोपदेन किरणस्यवाधो भवति । ततश्च न कोपिदोसो भवतीति । मन्मतेविशिष्टाद्वैतमते, ज्ञानसंविदादि पदे संवन्धिशद्बत्वप्रसिद्धिस्तु धर्मभूतज्ञानसंविदादिपदंलक्षीकृत्य भवतीति । ततश्च, स्वरूपज्ञानधर्मज्ञानयोर्भेदोवक्तुंशक्य इति विविच्य व्यवहारो भवति ।

मतान्तरे शाङ्करमतेतु स्वरूपस्यधर्मिणो ज्ञानस्य तथाधर्मभूतविपयविषयकज्ञानस्य च परस्परभेदाभावात् , एकस्यैवात्मरूपस्यनिर्विशेपत्वस्वीकारेण संवन्धिशब्दत्वंनोपपद्यते संविज्ज्ञानादिशद्बस्यतयोर्भेदस्याभावात् । निर्विशेषज्ञानमात्रस्य तु प्रवृत्तिनिमित्ताऽयोगेनैव धर्मिवाचिज्ञानवाच्यत्वमपि न संभवतीति विशेपोऽन्यत्रावधातव्य: । वस्तुतस्तु-मतान्तरेपि स्वरूपज्ञानान्तः करणवृत्तिज्ञानभेदेन ज्ञानस्य द्वैविध्यमुक्तमेव । तत्रस्वरूपज्ञानमनिर्वचनीयानादिविद्यावलेन समस्तप्रपञ्चस्य विवर्वतोपादानम्, वृत्तिज्ञानंतु लोकव्यवहारोपपादकं भवति । अक्षमाभवत: केयं साधकत्व प्रकल्पने–" इत्यादि, आश्रयत्वविपयत्वभागिनी निर्विभागचितिरेव केवला" इत्यादिना निर्विशेपचैतन्यस्यकारणत्वमुक्तं तदप्याविद्यकमेव नतु पारमार्थिकम् । वाचस्पति, ब्रह्मविपयकं जीवाश्रितमज्ञानमेवोपादानमित्यादिना ज्ञानयोर्भेद: । "चैतन्यंत्रिविधम् अन्त:करणतद्वृत्तिप्रमाणविपयावच्छिन्नभेदादिति धर्मराजाध्वरिणोक्ते: । एवञ्चतत्रापि ज्ञानद्वयं सिद्धमेवान्यथा सर्वव्यवहारोपपादनासंभवादिति कृतं विस्तरेण ।

अतोगतप्रकरणे प्रमाणफलज्ञानस्यैवात्मत्वं कथितं तदनुपपत्त्यानिराकृतम् , यत:प्रमाणफलस्य प्रमाणजन्यत्वेनागन्तुकतयाऽत्मधर्मत्वाच्च नित्यात्मरूपत्वं न भवतीत्यादिना । तत्रज्ञानस्यप्रागभवाभावात् , ज्ञानस्य नित्यत्वं साधितं परै: । यतो यस्यप्रागभावघटितसामग्र्योत्पत्तिः स न नित्योऽपित्वनित्य एव यथा घटादिर्भावः यस्य च प्रागभावो न भवनि तस्य द्विधागतिर्भवति । सर्वदा सन्नेवार्थात् नित्य एव, यथाऽकाशादि: । अथवा नियमतोऽसन्नेव भवति, यथा गगनकुसुमकूर्मरोमादि: । प्रकृते ज्ञानस्य स्वप्रकाशत्वेनतदीयप्रागभावोन भवतीति पूर्वं कथितं तन्निराकरणायाह **यदपि**

तदीय प्रागभावस्यानवस्थानात् तादृशप्रागभावेनानुभवस्य न जन्यत्वसिद्धिरिति। तदप्ययुक्तमेव, अतीतानागतयोरसंवेद्यत्व प्रसंगेन ज्ञानेन ज्ञानसमानकालिकार्थस्यैव सिद्धिरिति नियमाभावात्। नच संवित्प्रागभावस्य सिद्धिः संवित्समकालस्यैवेति वाच्यम् तथा क्वचिदप्यदर्शनात्, तथा सति संवित् सिद्धेर्नतत्प्रागभावासिद्धिः

इत्यादि ज्ञानस्य परोक्तप्रागभावासिद्धिं स्वतः परतोत्वेत्यादियुक्तिं प्रदर्शयितुमाह, **स्वतः सिद्धस्येत्यादि** स्वतः सिंद्धस्यानुभूतिसंविदादि पर्यायज्ञानस्य सत्ताकालेन तदीयप्रागभावप्रतियोगिनोः सहानवस्थानलक्षणविरोधादित्यर्थः विरोधोद्विविधः सहानवस्थानप्रतियोग्यनुयोगिभावात्मकः। तत्रजलाग्न्योर्योविरोधःसप्रथमः तदुभययोरेककाले समानदेशेचादर्शनात्। द्वितीयस्तु, अत्यन्ताभावप्रतियोगिनः। अत्रघटादिर्भावः प्रतियोगी, अभावश्चानुयोगी, अभावेप्रतियोगिता संवन्धेन प्रतियोगिनस्तत्राभावेवर्तमानत्वात्। अतः प्रतियोगिनमपसार्यैवानुयोगिनोऽवस्थानं भवति नतूभयोः पार्थक्येनोपलब्धिरिति। प्रकृते आचार्येण प्रकाशतमसोरिव सहानवस्थानलक्षण एव विरोधोदर्शितः। तथा च प्रागभावप्रतियोगिनो सहानवस्थानान्न प्रागभावेन ज्ञानस्यजन्यत्वम्।

एतन्मतं दूषयति **तदप्ययुक्तमेवेति**। कुतः पूर्वपक्षस्य तत्राह **अतीतानागतयोरित्यादि** ज्ञानसामन्यं स्वसमानकालिकमर्थमेवगृह्णातीति न नियमः। अन्यथा "रात्रावभूत्वर्षणम्" इत्यग्रिमदिवसे यदतीतवर्षणस्यज्ञानम्, तत्, तथा, "भविष्यति वृष्टिमेघोन्नते" रित्यनुमानेनानागत वर्षणस्य प्रज्ञापकं प्रमाणं स्वार्थस्यातीतानागतस्य प्रज्ञापकं न स्यात्, तत्र विषयविषयिणो विभिन्नकालिकत्वात्। **न च संवित्प्रागभावस्येति**। ननु भवतु, अन्यत्र यथातथा, परन्तु संवित्प्रागभावस्य स्वसमानकालिकज्ञानग्राह्यमेवेति नियम इतिशङ्काशयः। उत्तरयति **तथा क्वचिदप्यदर्शनादि**ति तथा सतिप्रागभावज्ञानसिद्धेर्न प्रागभावस्यासिद्धिः किन्तु सिद्धिरेव। यद्यप्ययं सिद्धान्तमते समीचीन एव, विद्यमानयत्किञ्चित् ज्ञानप्रागभावस्यवर्तमानेनैवानुज्ञानान्तरेणानुमानादिज्ञानेन ग्रहण संभवात्। अर्थात् विद्यमानं यत् किञ्चित ज्ञानप्रागभावस्य तज्ज्ञानेनाग्रहणेपिज्ञानान्तरेण तद्ग्रहण संभवात्। अहमिदानीं चक्षुरिन्द्रियजनितज्ञानस्याभाववान् [नि] उन्मीलितचक्षुष्ट्वात्। एतादृशानुमानसंभवादिति। ननु भवतु सिद्धान्ते निर्वाहः परमतेतु कागतिस्तत्प्रागभावस्य तत्समकालिकत्वाभावात्। एतन्मते एकंज्ञानं ज्ञानान्तराग्राह्यं मन्यते, तज़्ज्ञानप्रागभावस्तेनैव समानकालिकेन गृहीतः स्यात् भवन्नियमानुसारेण, परन्तु तन्न संभवति, अयोग्यत्वात्। नचानेनैवकारणेन ज्ञानस्य प्रागभावो न भवतीत्युच्येत, ऐन्द्रियकज्ञानस्वभावः स्वसमकालिकपदार्थप्रकाशकत्वमर्थात् ज्ञानसमानकालिकत्वं प्रत्यक्षज्ञाने एव नियतमिति, नतुज्ञानमात्रं प्रमाणमात्रंवा स्वसमकालिकपदार्थकमिति नियमः विभिन्नकालिकानुमानादिनाऽतीतानागतपदार्थप्रकाशकत्वस्यानुमानादौ सर्वसंमतत्वात्।

संवित्प्रागभावः संवित्समानकालिक इति तु प्रतियोगिप्रागभावयो र्विरोधादनुपपन्न एव । इन्द्रियजनितज्ञानसमानकालिकत्वमेव स्वसमानकालिकविषयप्रकाशकत्वं नतु ज्ञानस्य सर्वस्य तथात्वं प्रमाणमात्रस्यवेति ।

अपि च यदुक्तं "मानं स्वयं प्रकाशत्वात् स्वतः सच्चेत्सदास्त्यतः । तन्मेयं च सदास्त्येवमानंमेययुगेवहीति" तदपि निराकृतं भवति । यतः प्रमाणस्य स्वसत्ताकाले एव प्रमेय सहयोगः मानयोगः किन्तु देशकालादि संवद्धंमेयमेव भासते तदेव सत्यमिति।

एवञ्चप्रतियोगिपूर्वकालिकस्वप्रागभावस्य तेनैववर्तमानकालिकज्ञानेन ग्रहणे, न काचित्क्षतिरिति । प्रमाणस्य प्रमेयेन घटादिनाऽविनाभावेन प्रमाणस्य नित्यत्वे, प्रमाणाज्ञानस्य स्वयं प्रकाशतया नित्यत्वात्तदविनाऽभूतं प्रमेयमपि नित्यमेवेति यस्यमतं तन्निराकरणायाह **"अपिचयदुक्तं** मानं स्वयं प्रकाशत्वादिकारिकाद्वयम् ।

"मानं स्वयंप्रकाशत्वात् स्वतः सच्चेत् सदास्त्यतः ।
तन्मेयं च सदाऽस्त्येवमानंमेययुगे व हि ॥"

अस्यार्थः=मानं प्रमाणम् , अत्रमानपदं न करणव्युत्पत्त्यासिद्धम् , किन्तु मानंमितिर्ज्ञानम् , स्वयं प्रकाशत्वात् , अनन्याधीनप्रकाशकत्वात् , स्वतएव सत् अनन्याधीन सत्ता कत्वात् सदासर्वकालेऽस्त्येवार्थात् नित्यमेवनत्वनित्यम् । तदेवानित्यंयत्, उत्पत्तेः पूर्वविनाशानन्तरं नभवतिज्ञानन्तु त्रिकालवृत्तित्वात् , अनन्यसत्ताकत्वात् नित्यमेव । एवं चार्थात् , अग्रे वक्ष्माणकारणात् , तादृशज्ञानस्य यत् प्रमेयं परिच्छेद्यं घटादिवस्तु तदपि सदात्रिकालेपिवर्तते एव नित्यमेवेति । हि शब्दोऽत्रहेत्वर्थक, हि यस्मात् कारणात् , मानं प्रमाणज्ञानमेययुगेव, प्रमेयाऽविनाभूतत्वात्प्रमाणस्य, ततश्च प्रमाणस्यनित्यत्वं यदातन्नियतस्य प्रमेयस्यापि नित्यत्वमेवस्यात् , जलपरमाणुगतरूपरसादिवदिति । एतन्मतं निराकरोति **तदपि निराकृतं भवतीति** तदेवोपपादयति **यतः प्रमाणस्य स्वसत्ताकालेएवेत्या**दि । अयमाशयः सत्यम् , प्रमाणज्ञानमितिः स्वयं प्रकाशरूपं तथापि सत्यम् , तथापितस्य प्रमाणत एवोत्पत्तौजन्यत्वमेव नतु नित्यत्वम् , नहि जन्यंध्वंसातिरिक्तं नित्यं भवति, इति कुत्रचिदपिदृष्टचरम् । ज्ञानप्रागभावस्यापि ज्ञानंस्वतः परतोऽनुमानादिनापि संभवत्येव । ततश्चमितेर्नित्यत्वं कल्पयित्वा तदीयप्रमेयस्यापिं नित्यत्वकथनंमुधैवेति ।

प्रमाणज्ञानस्य समानकालिकपदार्थग्राहकत्वमितिनियमाभावादितिनिराकरणं ननु यदि प्रमाणं ज्ञानमसदर्थस्यापिं ग्राहकमर्थादविद्यमानस्याप्यर्थस्य ग्राहकं तदाप्रमाणज्ञानस्यार्थेन सहविनाभावः स्यात् , नहि सदसतोरविनाभावः क्वचिद्दृष्ट श्रुतोवा समुपपद्यतेवा तत्राह **देशकालादि संबद्धमित्यादि,** अयमाशयः यदायस्मिन्कालेज्ञानं तस्मिन् तस्मिन्नेवकाले प्रमेयमिति न व्याप्तिः

अतएव स्मरणं न वाह्य विषयार्थकं, विषयापगमेपि स्मरणदर्शनात्।

अनागतादिस्थले व्यभिचारात्। तत्र प्रमेयमतीतंमनागतं वा भवति, ज्ञानंतु तत्कालिकमिति कालभेदात्। किन्तु यद्देशकालसंवन्धितया यादृशाकारवत्वेन च यः पदार्थः प्रतिभासते यादृशज्ञाने तादृशपदार्थस्यतत्प्रकाराभावपर्यवसितमेव प्रमेयप्रतियोगित्वम्। अतद्रूपानवगाहित्वं प्रमेयेभवति, तद्वन्निष्ठविशेष्यविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमेव तदविनाभूतत्वमिति। एवं स्मृतेरपिना प्रामाण्यम्, अतीतानागतमपि परागर्थमतीतानागतत्वेन बोधयन्त्याः स्मृतेर्नानिर्विषयत्वमप्रामाणिकत्वम्। प्रमेयव्यभिचारो भवति, तत्रापितद्वतितत्प्रकारावगाहित्वात्, अतद्वतितत्प्रकारकत्वस्यैवा यथार्थत्वात्स्मृतिज्ञानेतु तद्वतितत्प्रकारकत्वस्यैव सत्वादिति।

यतोऽव्यधिकरणकालादौ विद्यमानमप्यतीतानागतविषयकंज्ञानं ना प्रमाणं नवा प्रमेयव्यभिचारि, तथैव स्मरणात्मकज्ञानमपिनाप्रमाणं नवाऽर्थव्यभिचारिभवति विषयस्य विनाशेपि तादृशार्थविषयकस्मरणस्य दर्शनादित्येतद्दर्शयति **अतएव स्मरणं न बाह्यर्थविषकमित्यादि,** स्मरणात्मकं ज्ञानं न प्रमारूपं, प्रमाणाजन्यत्वात्। "त्रिधा प्रमाणमध्यक्षानुमानशब्दभेदतः" इति जगद्गुरु श्रीहर्याचार्योक्तेः प्रमाणंच प्रत्यक्षानुमानशब्दभेदेन त्रिविधमेव तत्रेन्द्रिय संनिकर्षेण न स्मरणम्, अर्थाभावात्, नानुमानमव्यभिचरितलिङ्गाभावात्, नवाशब्दः "स्वर्गकामोयजेत" इतिवत् प्रकृते तदभावात्, इत्येवं स्मृतिजनकप्रमाणस्याभावेन संस्कारमात्रजनिततया न प्रमाणं स्मरणम्। संस्कारस्यापिप्रमाजनकत्वेन प्रमाणोपगमे प्रमाणविभागस्य त्रैविध्यरूपेण कथनं मुने व्याहतंस्यादतः प्रमाणाजनितत्वेन स्मृतेरप्रमारूपतां येऽनुमन्यन्तेतन्मतमपि प्रतिक्षिप्तम् **अतएव स्मरणंनेत्यादिना** न च सत्प्रमाणजनितमेवज्ञाने प्रमेति प्रमालक्षणम्, येनपरिगणितप्रत्यक्षादिप्रमाणाऽजन्यस्य स्मरणस्याप्रमात्वमापतेत्, किन्तु तद्वतितत्प्रकारकत्वमवाधितार्थविषयकत्वमेवज्ञानम्य प्रमात्वम्।

वस्तुतो वन्हिमतिपर्वते, कश्चिद्वाष्पमेव धूमोयमितिज्ञात्वा, तेन धूमाध्यस्तवाष्पेन पर्वतो वन्हिमान् धूमादित्येवमनुमितिं करोति, तत्रकारणस्थ व्यभिचारित्वेपि ततोजायमानमनुमित्यात्मक ज्ञानंप्रमैव, विषयस्य वन्हेस्तत्रावाधितत्वात्। दादृशज्ञानस्यावास्तविकत्वेऽनुमानानन्तरं प्रवृत्तस्यवन्ह्यर्थिनोविफलैवप्रवृत्तिःस्यात्, न च तथा भवति, तादृशस्थले संवादिन्या एव प्रवृत्तेरूपलंभात्। अर्थात् धूमाध्यस्तवाष्पलिङ्गकानुमित्यनन्तरं प्रवर्तमानोजनस्तत्र वन्हिमवाप्यइयंमे प्रवृत्तिः सफलावन्हे लाभादित्येवजानाति कृत्यकृत्यश्चापि भवति। तदत्रयदि प्रमाणजनितस्यैवज्ञानस्यप्रमात्वं भवेत्तदोदाहृतस्थलेऽनुमित्यात्मकज्ञानमप्रमाणमेवेति तत्रवह्वेरुपलंभो न भवेत्, किन्तूपलभ्यते एव तस्माद्यथाऽनुमानादिस्थलेऽर्थस्यावाधितत्वेन ज्ञानस्य प्रमात्वं तथैवाप्राणभूतेनापि संस्कारेण जायमानस्मरणस्थले ज्ञानस्यावाधितत्वेन, तद्वतितत्प्रकारकत्वेन वा प्रमारूपत्वमेवेति नतस्याः स्मृतेः प्रमाणान्तरेणापह्नत

ननु संविदः प्रागभावस्याविद्यमानतया प्रत्यक्षप्रमाणस्याभावेन न प्रत्यक्षप्रमाणेनतत्सिद्धिः "संवद्धं वर्तमानं च गृह्यते चक्षुरादिनेत्यादि" नियमात्। नवाऽनुमान प्रमाणेन संवित्प्रागभावस्यासिद्धि लिंङ्गाभावात्। ततः प्रमाणान्तरेण न संवित्प्रागभावसिद्धिरिति संविदो नित्यत्वमेव स्वतः सिद्धत्वात्।

स्वतः सिद्धत्वात् कारणत्वमेव प्रागभावाद्यसिद्धेरितिवदनप्रमाणाभावस्य तत्कारणतया कथनान् हेत्वन्तरदोपस्य प्रसङ्गात्। नच प्रमाणाभावः स्वापादौ प्रमाणान्तराभावस्य योग्यानुपलब्धिवलेन प्रसाधनात्।

विषयकत्वम्। न च तदा संस्कारस्यापि प्रमाजनकत्वात् संस्कारोपि प्रमाणंस्यात्। न चेष्टापत्तिः। प्रमाणविभाजकसूत्रविरोधात्, इतिवाच्यम्, नहि कस्यचिद् ग्रन्थकृतोविपरीतलेखनं युक्तिवलात्वस्तु सिद्धौवाधकमिति गदाधरनचनात्। विस्तरस्त्वन्यत्रद्रष्टव्यः।

ज्ञानस्य प्रागभावः प्रत्यक्षेण गृहीतो न संभनति, यतोयत्वर्तमानमिन्द्रियसंवद्धं तादृश वस्तुन एव प्रत्यक्षयोग्यत्वेन प्रत्यक्षप्रमाणगम्यत्वनियमात्। अन्यथाऽवर्तमानस्यापि घटादेः प्रत्यक्षत्वप्रसङ्गादिति कारणाभावादेवज्ञानप्रागभावासिद्धिः। नवाऽनुमानप्रमाणेनतत्सिद्धिरव्यभिचरितहेतोरभावादितिज्ञानप्रागभावासिद्धेः स्वतः सिद्धत्वादेवज्ञानस्य नित्यत्वमित्याशङ्कानिवारयितु ग्रन्थः। **ननु संविद** इत्यादि। तत्र ननु इत्यादिः शङ्काग्रन्थः **स्वतः सिद्धत्वाद्**इत्यादिः परिहार ग्रन्थः।

स्वतः सिद्धत्वात् ज्ञानस्य प्रागभावो न भवतीत्यर्थात् ज्ञानस्यनित्यत्वमित्यत्र प्रमाणाभावा हेतुरितिं कथने, हेत्वन्तरदोषोजायतेऽर्थात् प्रमाणाभावोप्यसिद्ध एवेति। तत्र प्रमाणाभावस्य सिंद्धिर्नवक्तव्यं तत्रहेतुमाह **स्वापादा**वित्यादि अर्थात् स्वापपदमूर्छांदौ, योग्यानुपलंभरूपएवहेतुर्विद्यते एवेति। अत्रायमाशयः अप्रकाशेपि ज्ञानस्य स्वापादिकालेऽहं न जानामीति ज्ञानाभावप्रत्यक्षं स्वापादिकाले न संभवति। स्वापस्यैव व्याघातात्। अर्थात् तात्कालिकोज्ञानाभावोज्ञानसामान्याभावरूप एव। तथापि स्वयंप्रकाशस्वभावकज्ञानस्याप्रकाशात्स्वापकालेऽभावः सिद्धः। तत्प्रतीतिस्तु अनुमानसिद्धाजागरणकाले एव स्मरणाभावनियमानुमितेन स्वापकालिकज्ञानाननुभवहेतुकेन योग्यानुपलब्धिलक्षणेन। इदमेवानुमानं ज्ञानत्वसामान्येन स्वापकाले स्वस्याप्यभावमपि विषयीकरोत्येवेति सिद्ध्यत्येव स्वकीय प्रागभावग्रहः स्वेनैव भवतीति प्रागभावाग्रहात् संविदो नित्यत्व कथनं मुधैवेतिं।

प्रमाणफलरूपस्य ज्ञानस्यात्मधर्मत्वात् प्रमाणजन्यत्वाच्च, ज्ञानस्यानित्यत्वं प्रसाध्य

किञ्च प्रत्यक्षज्ञानंस्वसत्ताकालेस्ववीषयस्य यत्सत्तांज्ञापयति तत्कालवीशेषावज्छिन्नामेव वीषयसत्तांज्ञपयति नतु वीषयस्यसार्वकालीकीं सत्तांसाधयति अहमीदानीमेवास्मिनान्यदेति प्रतीत्यादिप्रतीतेःकालविशेषावज्छिन्नैव कादाचित्की । अन्यथा सर्वदाप्रका

तस्य ज्ञानस्य प्रकारान्तरेणापितथात्वमनित्यत्वे साधयितुमुपक्रमते **किञ्च प्रत्यक्षज्ञानम्** इत्यादि । अयमाशयः संवद्धार्थप्रकाशकत्वमेव ज्ञानस्य अर्थमन्तरेण तत्स्वरूपस्यैवासंभवात् । यदा ज्ञानं तदाऽवश्यमेव तस्यविषयोऽभविता चेति तदुभयं विषयीक्रियमाणैव संवित् चकास्ति इति नियमः। परन्तु तथापिं ज्ञानस्य कदाचित्की एव सत्ता विषयस्य च नतु सार्वकालिकी ज्ञानादेः सत्ताऽपितु कालविशेषनियतैवान्यथाज्ञानवत् तदीयविषयस्यापि सर्वदाप्रकाशनात्, ज्ञानवत्तदीयविषयोपि प्रकाशमानो नित्य एव स्यात् । नतु विषयस्य कदाचिदपितथात्वं संभवति, कारणजन्यस्य तथात्वसाधनासंभवात् । एवंच प्रत्यक्ष ज्ञानस्य कदाचित्कतयाऽनित्यत्वमेव नतु एकान्तनित्यमिति प्रतिपादयति–**प्रत्यक्षज्ञानं स्वसत्ताकाले** इत्यादि कालविशेषावच्छिन्नकदाचित्कतया प्रत्यक्षप्रकाशस्य नियम एवेति । प्रमाणफलीभूतज्ञानस्यैव ज्ञानस्यान्यमते आत्मत्व स्वप्रकाशत्वयोः स्वीकारेण तन्मते एवं रूपेण प्रमितेः प्रकाशः स्यात् ।

अन्यथेति प्रत्यक्षप्रमितेः स्वसत्तासमानकालिकघटादिविषयप्रकाशकत्वनियमेन ज्ञानस्य प्रमाणजनितस्यापि नित्यत्वे, तादृशज्ञानविषयीभूतघटादेरपि नित्यत्वमापतेदिति परन्तु यावत्पर्यन्तंघटादिप्रत्यक्षविषयो भवति तावत्कालंनाध्यक्षविषयो भवति, किन्तु विद्यमानोपि कदाचिदेवाध्यक्षविषयो भवति । तथा च घटादिविषयस्ययत् कदाचित्कत्वं तन्न विषयस्य विरहप्रयुक्तं, किन्तु स्वस्य कदाचित्कप्रयुक्तमेव । एवञ्चेदृशोऽत्रानुमानाकारः प्रत्यक्षज्ञानं स्वविषयकालाव्यापकम् समानकालिकार्थभासकत्वे सति यावदर्थसत्त्वंतदप्रकाशकत्वादिति ।

यथा प्रत्यक्षज्ञानस्य युक्त्याऽनित्यत्वं साधितं तथैवानुमानादिज्ञानादीनामप्यनित्यत्वं दर्शयति **एवमनुमानादिज्ञानानामपी**त्यादि यथा प्रत्यक्षज्ञानस्य कदाचित्कत्वादनित्यत्वं तथैवानुमानादिज्ञानानामपीत्यर्थः । यथा प्रत्यक्षज्ञानंकादाचित्कतयैव प्रकाशते नतुयावद्विषयसत्वं तथैवात्रापि-इति । कथमित्थमितिंचेत् तच्छृणुः ? लिङ्गपरामर्शसापेक्षस्यानुमितेः पदज्ञानसापेक्षस्य शाब्दस्य, अहमिदानीमनुमिनोमि शाब्दयामिचेत्यादिप्रतीतयश्च कादाचित्कतामेवप्रज्ञापयन्ति-तस्मात् कारणकालपेक्षाणामनुमानादीनामनित्यत्वमेवेति । समानकालिकार्थग्राहकत्वनियमविरहितानामप्युपमानादिज्ञानानां प्रतीतं यत् कदाचित्कत्वं तन्नविषयसत्वविरहनिमित्तकं किन्तु स्वरूपनिमित्तकमेवेत्यभिप्रायः । एवं प्रकारेण प्रत्यक्षादिज्ञानानांनामग्राहिकतयाऽनित्यं प्रदर्शितमिति । ननु भवतु सविषयकप्रत्यक्षादिज्ञानानामनित्यत्वंभवतु निर्विषयकज्ञानं तु नित्यमिति स्वीकारे का क्षतिरित्याशङ्का-

शेज्ञानवद् घटादिविषयस्यापि नित्यत्वमापतेत् एवमनुमानादिज्ञानानामपिकादाचित्कतयैव प्रकाशनात् अनित्यत्वमेव। नच प्रत्यक्षानुमानादिभेदविधुराकाचिद्धी निर्विषयानिराश्रया च संभवति स्वरूपविरोधात् ज्ञानस्यसाश्रयत्वसविषयकत्वस्वाभाव्यादिति।

निराकृत्यतस्याप्यनित्यत्वं प्रदर्शयितुमुपक्रमते, **नच प्रत्यक्षानुमानादिभेदविधुरा** इत्यादिः— अत्रच प्रत्यक्षपदमनुमानपदं च भावप्रधानकम्, ज्ञान संवित् धीपदानां च स्वरसतसविषयकज्ञाने एवलोके प्रयोगोभवति नतु निर्विषयकज्ञाने प्रयोगः क्वचिदपि दृष्ट उपपन्नो वा। एवंतद्विषयस्य च साश्रयत्वनियम एव उपलंभ शास्त्रबलादेवबलाच्च स्वरूपज्ञानस्यापि कथमपिनिर्विशेषत्वं न भवत्यपितु सविशेषत्वमेव।

ननु ज्ञानं द्विविधं स्वरूपज्ञानवृत्तिज्ञानभेदात्। तत्रप्रथमज्ञानम् "सत्यंज्ञानमनन्तम्" "प्रज्ञानंब्रह्म" न सन्दृशे तिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चनैनम्" इत्यादिश्रुतिभिर्ज्ञानमात्रं नित्यनिर्विशेषरूपं स्वप्रकाशरूपंच त्रिकालाबाध्यंसत्। द्वितीयंतु वृत्तिज्ञानम्, तस्य नित्यज्ञानस्येन्द्रियलिङ्गादिजनितवृत्त्यवच्छेदकादाचित्कत्वात् विशिष्टस्यतस्यानित्यत्वं प्रतीयते, तत्र विशेष्यस्य सर्वथा नित्यत्वेपि विशेषणस्यानित्यत्वेन तद्विशिष्टतया तत्रानित्यत्वं प्रतिभाति तदेव शुद्धचैतन्यमन्तःकरणविशिष्टतया ज्ञातृ इत्यपि कथ्यते। अयमभिप्रायस्तेषाम्, चैतन्यमेकमेवनित्यम् तच्चोपाधिवशात् त्रिविधं भवति प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं च। तत्रान्तः करणावच्छिन्नं प्रमातृचैतन्यंमन्तःकरणवृत्त्यवच्छिन्नं प्रमाणचैतन्यं विषयावच्छिन्नंचैतन्यं प्रमेयचैतन्यम् तत्र यदा चक्षुरादिसंयोगे विषयेजाते सति-घृतवत्तरलमन्तःकरणंचक्षुरादिद्वारेण निःसृज्यघटादिविषयादिप्रदेशं प्राप्य विषयाकारेण परिणमते स एव परिणामोवृत्तिः चैतन्यमप्यन्तःकरणद्वारेण विषयसंबद्धोभवति, तत्रोपाध्योरेकदेशस्थैककालिकतया विभाजकत्वाभावेनान्तःकरणतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वात्तत्र विषयकं ज्ञानं भवति। तत्र प्रमाणविषयचैतन्योरेकत्वात्, ज्ञानप्रत्यक्षम् प्रमातृचैतन्ययोरेकत्वे विषयप्रत्यक्षं भवतीति। वस्तुतश्चैतन्यस्यैकत्वेप्युपाधिभेदात्तत्रभेदव्यवहार इत्यादिकं वेदान्तपरिभाषायां विस्तरेण द्रष्टव्यम् तथा चैतन्मते चेतनस्यैकत्वेपि व्यवहारोपपादनायोपयुक्तप्रक्रियाविरचिता स्वबुद्धिप्रभवा। साच प्रक्रिया न पारमार्थिकी किन्तु अनाद्यनिर्वचनीयमायाकल्पितैव ब्रह्मणि संसारवदेव कल्पितमेवेति।

तदपि नमनोरमम्, शास्त्रविरोधात् युक्तिविरोधाच्च। तथाहि निरवयवस्याणुलक्षणस्य मनसोवृत्तिरङ्गीकृता, साकिं चक्षुषाघटज्ञानेजनयितव्ये मनसःसंयोगो व्यापाररूपेणापेक्षते तथैव प्रकृते मनसो वृत्तिर्व्यापाररूपा, अथवा मृत्तिकायाघटोत्पादयितव्येमृत्तिकायाः परिणामवदत्रमनसःपरिणामरूपा वा वृत्तिः? तत्र न प्रथमः अन्तःकरणस्यवृत्त्युत्पादेपि ज्ञानव्यापारंविना विषयप्रकाशलक्षण कार्याभावात् तदुक्तम् "इन्द्रियाणां हिचरतांयन्मनोऽनुविधीयते। तदस्य हरति प्रज्ञांवायुर्नावमिवां-

नच संविदोऽन्याविषयत्वादन्यत एव ज्ञानभावासिद्धिः "अज्ञासिषम्" इति पूर्व भसि ॥" "तेनास्यक्षरति प्रज्ञा" इत्यादिस्थलेषु मन इन्द्रियद्वारेण ज्ञानप्रसरणादेवार्थप्रकाशस्य व्यवस्थापनात् । क्वचित् प्रज्ञामनसोरभेदव्यवहारस्तु ज्ञानव्यापारानुकूलव्यापारवत्वान्मनसोभाक्त एवेति । नवा मनः परिणामरूप इति द्वितीयः मनसोऽणुरूपस्य विषयाकारपरिणामासंभवात् ।

सावयवं हि वस्तु परिणमते यथादुग्धंसावयमेव दध्याकारेणपरिणमते, नचाणुरूपस्य निरवयवस्य परिणामः संभवति । नच मनः सावयवंसादिद्रव्यत्वात् , घटादिवदित्यनुमानेन मनसोऽणुत्वे निराकृते मनसः परिणामः संभवति, तथा "मनः प्रत्यक्षंज्ञानासमवायिकारणसंयोगाधारत्वादात्मवदित्वनुमानेन च तस्य नाणुत्वमिति वाच्यम् , मनसि रूपस्पर्शाद्यभावेनोपर्युक्तानुमानयोः प्रत्यक्षबाधितविषयत्वादग्नौशैत्यानुमानवत् । सर्वैरेववादिभिर्मनसोऽतीन्द्रियत्वस्वीकारेणतत्परिणामासंभवात् । नच रूपस्पर्शाभावेपि गन्धादिवत् प्रत्यक्षतास्यादितिवाच्यम् । तत्र पृथिवी संवन्धेन तत्प्रत्यक्षसंभवेपिमनसस्तदभावात् । यद्यपि रूपादिराहित्येपिजीवप्रत्यक्षदर्शने मनसो ग्राहकेन्द्रियान्तरस्यादर्शनात् । नवावाह्येन्द्रियेण मनसो ग्रहणम् , रूपस्पर्शाभावेनाकाशवदग्रहणात् । रूपस्याभाववतां द्रव्याणांवाह्येन्द्रियाग्राह्यत्वस्यान्यत्रव्यवस्थापनात् । नवारसनादिनातद्ग्रहणं तेषां गुणग्रहणे एव सामर्थ्यदर्शनात् तेन द्रव्याग्रहणाच्च । नवाऽन्तरेन्द्रियेण मनो व्यतिरिक्तान्तरेन्द्रियस्याभावात् । न च मनोजनितमनोऽन्तरेण स्पर्शादिरहितद्रव्येण द्रव्यान्तरस्यानारंभात् । मनोजातं मनइन्द्रियम् इन्द्रियमिन्द्रियतया, शरीरतया विषयतयावा भोगजनकं स्यात् ? तत्र नेन्द्रिय रूपेण मनोजनितमनोन्तरस्य भोगजनकत्वम् प्रथममनसैवतत्कार्यसंभवेन द्वितीयमनसो निरर्थकत्वात् । नवा मनोजनितद्वितीयमनसो भोगजनकत्वम् , इन्द्रियाधिकरणतयापृथिवीप्रभृतिजनित शरीरस्यैवभोगजनिततयाद्वितीयमनसोऽतथात्वेन तेन भोगजनकत्वासंभवात् , यतो द्वितीयमनसो भूताजन्यत्वात् इन्द्रियाधिष्ठानत्वाभावाच्च । तथा च मनोजनितमनोऽन्तरस्य निरर्थकत्वमेव । तेन मनसो ग्राहकं न किमति ग्राहकम् । तस्मान्मनसो विषयाकारपरिणामे नास्ति किमपि प्रमाणमिति न तस्य परिणामरूपावृत्तिः संभवति । नवा निर्विशेषत्वे चेतनस्य किमपि प्रमाणं संभवति, येन निर्विशेषचैतन्यस्यौपाधिकभेदकल्पितप्रमातृप्रमाणादिभेदः समीचीनः स्यात् । प्रत्युत निरुपाधिकज्ञातज्ञेयभेदप्रतिपादकसर्वथाऽबाधितप्रत्यक्षशास्त्रादिप्रमाणबाधितमेवेदं केवलाद्वैतमतम् ।

एतत्पूर्वप्रकरणे स्वज्ञानप्रागभावस्यस्वकीयप्रतियोगीनैव सिद्धिर्जायते इति प्रदर्श्य तदनुस्वेतरज्ञानेनापि सिद्धिर्भवतीति प्रदर्शयितुमुपक्रमते **नच संविदोऽन्याविषयत्वादित्यादि** नचज्ञानस्यान्याविषयत्वात्तदन्यतस्तदीयप्रागभावस्य सिद्धिर्नभवतीति वाच्यम् । उत्तरयति, **अज्ञासिपमिति** अतीतकालिकज्ञानस्य वर्तमानकाले स्मरणं भवति **अहमज्ञासिषमि**त्याकारकम् , तेन

कालिकज्ञानस्याद्यतनीयज्ञानेन विषयीकरणात् । प्रतिकूलानुकूलविषयनियतहानोपादानोपेक्षालिङ्गादिगम्यत्वाच्च परकीयज्ञानस्य । तदस्वीकारे शद्वार्थग्रहणासंभवेन सार्वलौकिकवैदिकव्यवहारो विलुप्त एव भवेत् । एवं गुरूपसर्पणादयोपि सर्वथाऽनुपपन्ना भवेयुः । गुरुगतज्ञानवत्वस्य प्रतीतेरभावादिकवहुतरदोषोऽवगन्तव्यः ।

स्मरणेन पूर्वभूतस्य ज्ञानस्मरणं भवतीति स्मरणेनानुभवात्मकज्ञानस्य सिद्धिर्भवतीति स्वेनैवस्वस्य ग्रहणमित्यर्थः ।

तदनेन क्रमेणातीतकालिकस्वकीयस्य ज्ञानस्य ग्राह्यत्वमितिप्रदर्श्य तदनुपरचेतोगतज्ञानान्तरग्राह्यत्वंभवतीति दर्शयितुमाह **प्रतिकूलाननुकूलेत्या**दि । सर्वोंपिलोकः शव्दंश्रुत्वा ततोऽनुकूलपदार्थविषयकज्ञानेजाते तद्ग्रहणेच्छया तत्रप्रवर्ततेशव्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तते । एवमन्येषामपि प्रवृत्तिं च दृष्ट्वाऽनुमिनोति, यदयमस्यापिशव्दादिविज्ञानमनुकूलं प्रतिकूलं वा जातं तेनायमपि प्रवर्ततेनिवर्तते वा । किं वहुना पशवो मुग्धा एवं प्रतियन्ति । तेपामपि अनुकूलशव्दादिविज्ञाने प्रतिकूले सत्येव तथा कुर्वन्ति । यथादण्डोद्यतकरं क्रूरदृष्टीनाक्रोशतः पुरुपानुपलभ्य पशवोपि ततो निवर्तन्ते । हरिततृणपूर्णपाणिं सरलशव्दंब्रुवाणं पुरुपमुपलभ्यतत्समीपङ्गच्छन्ति । तथा पुरुषा अपिकुर्वन्ति, इति सर्वेषां नः प्रत्यक्षम् । एवञ्च हानोपानादिलिङ्गेभ्यः परकीयज्ञाप्यं भवत्येव । एवं यदि ज्ञानान्तरवेद्यं न स्यात्, तदाकस्यचित्समीपे आगच्छति, स तदाऽयंकिंचिद्वक्ष्यति, अयंसन्दिग्धो विपर्यस्तो विपरीतज्ञानवान्वेति "आकारैरिङ्गितैर्गत्याचेष्टयाभाषणेन च नेत्रक्रूरविकारैश्च" इत्यादि लिङ्गेन तदाशयंज्ञात्वा तदनुकूलं पृच्छादिकं करोति । अन्यथा तदाशयमनववुद्ध्यैवप्रवर्तेत तदोन्मत्तवदुपेक्षितो भवेत् । तस्मादवश्यंपरान्तः करणगतसंशयादिकमवश्यमेवज्ञातव्यमित्यनुमानादिना परकीयज्ञानमपि ज्ञानान्तरज्ञेयं भवत्येवेतिस्वेन स्वस्य सिद्धिवत् परज्ञानान्तरेणापि परकीयज्ञानस्य सिद्धिर्भवत्येवेति । यदि ज्ञानस्यज्ञानान्तरग्राह्यं न स्वीकुर्यात्तत्रदण्डमाह **शद्वार्थग्रहणासंभवेनेति** ।

इयमत्र शाब्दवोधप्रक्रिया-प्रत्यक्षस्थले चक्षुरादिकं विषयेणसहसंयोगसंयुक्तसमवाय संयुक्तसमवेतसमवायविशेषणविशेष्यभावादन्यतमसंनिकर्षसहकारेण पदार्थानां यथायथं प्रात्यक्षिकं ज्ञानं जनयतीति स्थितिः । एवमनुमितिम्, व्याप्तिज्ञानवलेन हेतुर्जनयति, तत्र, वन्हिव्याप्यधूमवान् पर्वत इति परामर्शोव्याप्त्यतो हेतुज्ञानमर्थात् लिङ्गज्ञानं करणं ततोऽनुमितिं जनयति । नतु ज्ञायमानं लिङ्गकरणम्, इमं यज्ञशाला वन्हिमती भविष्यति भावि धूमात्, इयं यज्ञशाला वन्हिमती समभवत्, अतीतधूमादित्यादौ तत्काले धूमस्य विरहेपि, अनुमितेरानुभविकतयाज्ञायमानधूमो नानुमितिजनकोऽपितु धूमादिहेतुज्ञानमेव, स्वरूपतः स्थलविशेषे धूमस्याविद्यमानत्वेपि तज्ज्ञानस्य

तदापिपूर्वकालिकतयाऽव्यवहितपूर्ववृत्तित्वरूपजनकत्वस्याक्षतत्वात् । इतिं लिङ्गज्ञानमेवानुमितौकरणं नत्तुज्ञायमानं तत्करणमिति ।

उपमित्यात्मकज्ञाने सादृश्यज्ञानं करणमतिदेशवाक्यार्थस्मरणं व्यापारोभवत्युपमैव फलमिति । एवं शाब्दबोधे पदज्ञानंकरणम्, नतुज्ञायमानं पदं तथा मौनिश्लोकादौ ज्ञायमानस्य पदस्याभावात् । पदार्थस्मरणमर्थात्पदार्थोपस्थितिर्व्यापार:शक्तिलक्षणान्यतरवृत्तिज्ञानं सहकारकम् । तत्र पदार्थस्मरणं पदजनितमेव । अर्थात् पदजनितपदार्थस्मरणमेव व्यापारः अन्यथाघटादिपदात्, शब्दाधिकरणतयाऽकाशस्मरणेजाते तत्राकाशस्यापि शाब्दबोधविषयत्वमापद्येत ।

शक्तिश्च पदस्य पदार्थेंन सहसम्बन्धोऽर्थात्पदप्रतियोगिकः पदार्थानुयोगिकः, अस्मात्पदादयमर्थोंबोधव्य इतीश्वरेच्छारूपएव । आधुनिकसंकेते तु न शक्तिरिति प्राचीनाः नवीनास्तु "द्वादशेऽहनि पितानामकुर्यादिति" नियमेनाधुनिकसंकेतेऽपि शक्तिरस्त्येवातः इच्छामात्रे शक्तिर्नतु परमेश्वरेच्छा मात्रं शक्तिरेतादृशशक्तिं सहकृत्य पदज्ञानं पदार्थोपस्थितिद्वाराशाब्दबोधंजनयतीति । तत्रशक्तिग्रहो व्याकरणादितो भवति । तदुक्तम्—"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्यशेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः" तत्र धातुप्रकृतिप्रत्यायादीनां शक्तिग्रहो व्याकरणाद् भवति । परन्तु क्वचिद्बाधके सति त्यज्यते । यथा व्याकरणकारैस्तिबादिप्रत्ययस्य कर्तरि शक्तिरुपेयते, किन्तु गौरवात्तत्त्यज्यते । तत्रकर्तरि शक्तौशक्यतावच्छेदकं कृतिरेवेति सा नानेतिं गौरवमतोलाघवात्तिबादिप्रत्ययस्य कृतावेव शक्तिस्तत्रशक्यतावच्छेदकं कृतित्वंजातिः सा च नित्यत्वे सत्यनेकसमवेतत्वरूपेत्येकेति लाघवमतः कर्तरि न शक्तिर्व्याकरणसहमतापि, किन्तु कृतौ शक्तिर्लाघवात्, लाघवंच शक्यतावच्छेदककृतित्वस्यजातिरूपस्येति नैयायिकाः । नच तिवादिप्रत्ययेनकर्तुरकथने "अनभिहितेकर्तरि करणे च तृतीया भवतीत्यर्थक कर्तृकरणयोस्तृतीयेत्यनुशासनेन देवदत्तः पचतीत्यत्रदेवदत्तादिकर्तृवाचकपदात्तृतीया स्यात् मन्मतेतु आख्यातस्य कर्त्रर्थकतयातिवादिबोध्यकर्तुर्देवदत्तेन सहतादात्म्येन देवदत्ताऽभिन्नो देवदत्तः पाकानुकूलव्यापारवानित्यकारकः शाब्दबोधो भवति" देवदत्तः पचतीतिवाक्यात् । भवन्मते आख्यातेन कर्तुरनभिधानात् कर्तृबोधकतिबादिनातदकथनात् देवदत्तपदोत्तरतृतीया विभक्तिरेवस्यात् । ततश्च देवदत्तेन पचतीति प्रयोगोपि साधुरेवस्यादितिवाच्यम् भावानवबोधात् तथाहि "कर्तृकरणयोस्तृतीयेति पाणिनीय सूत्रस्य अनभिहिते कर्तरि करणे च तत्तद्वाचकपदात् तृतीया विभक्तिर्भवतीतिनार्थः किन्तु यदि यत्राख्यातेन कर्तृकरणगतसंख्यानोक्ता भवेत्तदा तत्र तत्तत्पदात् तृतीया भवतीत्ययमेवार्थः । प्रकृते च देवदत्तः पचतीत्यत्रतिपदेन देवदत्तादिसंख्यायाः प्रतिपादनात् अनभिहितत्वाभावेन प्रथमैव भवति न तु तृतीयेति । संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः कर्मत्वाद्यनवरुद्धः इत्यस्येतरविशेषणत्वेन तात्पर्याविषयत्व-

मर्थः । तेन चैत्र इव मैत्रोगच्छतीत्यत्र इवार्थसदृशत्वेन तात्पर्यविषयीभूतस्य चैत्रस्य तिवर्थसंख्ययाऽन्वयो न भवति । यथा व्याकरणेन पदस्य शक्तिग्रहो निश्चीयते तथैवोपमानादपिशक्ति ग्रहो भवति यथा चैतत्तथातर्कसङ्ग्रहीयोपमानप्रकरणादेवावगन्तव्यम् । एवं कोशादपि पदानां शक्तिग्रहो जायते, यथा नीलादिपदानां गुणे तद्वति च शक्तिः प्रतिपादिता कोशे परन्तु गौरवात् गुणवतिशक्तिमनादृत्य केवलं नीलादिगुणे एव शक्तिराद्रियते लाघवात् । गुणाश्रये नीलादि नीलादिपदानांतु लक्षणैव, नीलोघट इत्यादौ नीलात्मकगुणात्मघटादिद्रव्येण तादात्म्यस्य वाधितत्वेन नीलपदस्य नीलाश्रये द्रव्ये लक्षणामाश्रित्यतयो द्रव्ययोरेव तादात्म्येन शाव्दवोधस्याकरे प्रनिपादनात् एवमाप्तवाक्यादपि पदानांपदार्थेशक्तिग्रहोजायते । यथा कोकिलःपिक इत्याप्त वाक्यात् पिकपदस्यकोकिलेशक्ति ग्रहोभवति । एवं व्यवहारेणापि पदानांशक्ति ग्रहोभवति, यथाप्रयोजकवृद्धेन प्रयोज्यवृद्धंप्रति कथितं 'भो घटमानय' इति श्रुत्वा प्रयोज्य वृद्धस्तथाकृतवान् यदेतन्नयघटं तदेतच्छ्रुत्वा प्रयोज्येन ततो घटोऽपसारितः । इति दृष्ट्वापार्श्वस्थोबालोऽगृहीतशक्तिकोऽप्यावापोद्वापाभ्यां शक्तिं गृह्णाति । तत्र यद्यपि यदायदा घटस्य प्रयोगः कृतः तदा आनयनादिविशिष्टस्यैवेतिमीमांसकैकदेशी आनयनादिक्रियान्विते एव घटादौ शक्तिरितिनिश्चनोति । तथापि प्रथमतःक्रियान्विते शक्तिग्रहेपि पश्चात्तत्परित्यज्य लाघवेन घटमात्रे एव घटादिपदस्य शक्तिग्रहोवाच्यः । तत्र प्रयोजकवृद्धस्यशब्दश्रवणसमनन्तरं प्रयोज्यस्य प्रवृत्त्यादिव्यवहारेणनयनादिकमाकलय्य पार्श्वस्थो वालकः प्रयोज्य प्रवृत्तिनिवृत्तिकारणं ज्ञानमनुमिनोतीति, अनुमितज्ञानेनैव तदीयानयनादिव्यवहारं विजानाति । तत्र यदि ज्ञानं नभवेत्तदा सर्वोपि व्यवहारोविलुप्येत । तस्मात् व्यवहारोपि पदपदार्थयोः निश्चाययतीति । एवं वाक्यविशेषविवरणसिद्धपदसान्निध्यादिहेतुभिः शक्तिर्गृहीता भवतीति यथा प्रकरणमेव ज्ञातव्यम् । ततश्च शक्तिप्रतियोगिपदं तदनुयोगिचपदार्थः । तत्पदं चतुर्विधंरूढंयौगिकं योगरूढं यौगिकरूढं च । तत्र घटादिपदम् रूढम्, अवयवशक्तिनिरपेक्षतया समुदायशक्त्यैव घटत्वावच्छिन्नादेर्वोधकत्वात्, द्वितीयंतु पाचकादिपदम्, अत्र समुदायशक्तिमनपेक्ष्यैवयोगात्, पचति यः स पाचक इति धातु प्रत्ययौ मिलित्वा पाककर्तारं बोधयत् यौगिकं पाचकपदं भवतीति । यत्रावयवशक्तिविषये समुदायशक्तिर्भवतीति परस्परसहकारितयाऽर्थं कमपि विलक्षणं भवति तत् तृतीयम्, यथा पंकजपदम् अत्रावयवशक्त्यापंकजनिकर्तृत्वम् समुदायसक्त्याचपद्मत्वस्यवोधो जायते, सतिप्रसंगेकेवलावयवशक्त्या कुमुदिनीनांवोधः । यथा—

"निरर्थकं जन्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपिनिष्फलैव न येन दृष्टा नलिनीविनिद्रेति ॥"

यौगिकरूढंपदमुद्भिदादिपदमुद्भिनत्तीतिव्युत्पत्तौ, भूमिमुत्पाट्यजातानां तरुगुल्मादीनां वोधोभवति, तथा "उद्भिदा यजेत" इतिविधिवोधितयागविशेषोपि ज्ञायते । एतादृशपदस्यज्ञानं शब्दवोधकरणं

तथापदार्थस्य स्मरणं व्यापारः शक्तिलक्षणान्यतरवृत्तिज्ञानं सहकारिशाब्दवोध एव फलमिति ।

तदेतत्सर्वं यदि परज्ञानमनुमानादिना ज्ञायते इति न स्वीक्रियते तदा सर्वोंपि व्यवहारो विलुप्त एव भवेदिति । अक्षरार्थस्त्वेवम्, परकीयस्य विषयविशेषैकचन्दनादावनुकूलत्वज्ञानस्य प्रतिकूलसर्पादित्वज्ञानंवा परकीयहानोपादानमाध्यस्थप्रवृत्तिनिवृत्त्युपेक्षात्मकहेतुजनितानुमेयत्वादित्यर्थ । यदि ज्ञानं ज्ञानान्तरग्राह्यं न भवेत्तदा परज्ञानानुपगमे व्यवहाराच्छक्तिग्रहस्य परज्ञानानुमानसापेक्षतया शक्तिग्रहस्यासंभवात्, शक्तिग्रहमूलकव्यवहारस्य सर्वथाविलोपएव भवेदिति । अथवा शद्बार्थसंवन्धस्यवाच्यवाचकभावस्य बोध्यवोधकभावरूपस्य वोध [ज्ञान]स्य यदिज्ञानान्तरग्राह्यत्वं नो स्वीक्रियेत तदा व्याकरणकोशाप्तवाक्यव्यवहारादिना तत्प्रतिपादनासंभवात्सर्वेशाद्बवोधव्यवहारो भज़्येतेत्यर्थ । शव्दार्थग्रहणासंभवेनेति । तथा गुरूप सर्पणादिकमपिनिर्थकतामुपगच्छेत् ! अर्थात्, दुखावुधौनिमञ्जमानोजीवः पूर्वकृतसुपुण्योदयात् संजात वैराग्यः सुखंलेशमात्रमपि संसारमपश्यन् रोदनक्रन्दनादिकं यतस्ततः स्वकीयमपमानादिकं प्रियत्वेनाभिमतपुत्रकलत्रवन्धुवान्धवादिभ्योपि समुपेक्षितोभगवतोऽयोध्यानाथस्य शरणमेवचतुर्वर्गफल प्रापकमिति यतस्ततोभाषाप्रबन्धादितोवाऽवगत्य तथा भगवतः स्वरूपाच्छादिकां मायां भगवद नन्यभक्त्यैव विनाश्य तस्य सायुज्यादिकं प्राप्स्यामित्यवगत्य च भगवत्स्वरूपं यथावज्ज्ञातुं रामभक्तं ब्रह्मसेवापरायणंज्ञानिनं गुरुमुपसीदति । तथोक्तम् "परीक्ष्यलोकान् कर्मचितान् ब्राह्मणोनिर्वेंदमायात् नास्त्यकृतः कृतेन । स तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "दुखार्णवे निमज्जन्तं दृष्ट्वा जीवमहेतुकः । करुणासिन्धुरामस्य जायतेकोऽप्यनुग्रहः ॥३॥ पुण्यंभवति चाज्ञातं रामस्यानुग्रहेण हि । अभावो जायये तस्माद् विद्वेषप्रतियोगिकः ॥४॥ श्रीरामरामभक्तानामभिमुख्यस्य कारणम् । तज्जन्यादभिमुख्याद्धि जिज्ञासासमुदेति च ॥५॥ इत्यतः "सत्यसन्धः प्रतिश्रुत्यप्रपन्नायाभयं स्वयम् । निवर्तयेद्भयेनैनं श्रीरामः श्रितवत्सलः ॥४९॥ इत्यन्तदिव्यप्रबन्धश्रीरामप्राप्तिपद्धतौजगद्गुरुश्रीरामेश्वरानन्दाचार्यदेशिकेन्द्रेणसाधुसम्पादितमत्रत्यप्रकरणरहस्यमिति ततोऽनुसन्धेयोविशेषार्थिभिः । अत्रनिर्वेदप्रतिपादकशास्त्रेब्राह्मणात् ब्राह्मणस्यैव प्रवज़्यामधिकारोनेतरेषामिति सुनिश्चितं भवति । तथा च कथंतदन्ये तत्रसंमिलिता । इति विचारणीयमेव । अन्येतु "ब्राह्मण ग्रहणंचात्रद्विजानामुपलक्षणमितीति । एतन्मतेपि त्रैवर्णिकानामेवाधिकारोनान्येषाम् । श्रोत्रियेति कथनेनाधीतशास्त्राणामेवोपदेशकत्वम् । ब्रह्मनिष्ठेति कथनेन श्रीरामभक्तानामेव भक्तिप्रापकत्वमिति संक्षेपः ।

ज्ञानव्यतिरिक्तः सर्वोंपि पदार्थः स्वभावतोजडः, अर्थात् प्रतियोगव्यधिकरणज्ञानाभाववान् । यद्यपि जीवोपिं सुषुप्तौज्ञानाभाववान्, तदातत्रज्ञानस्याभावादिति सोपिजड़ एव भवेत् । अतएवेतरे दार्शनिकाः—जीवोपिजड़भूतस्य तस्यवन्धननिवृत्तिरूपः सुखात्मको मोक्षोनस्यादिति

यदुक्तं पूर्वं ज्ञानस्य ज्ञानान्तरविपयत्वेऽननुभूतित्वमेवापद्येत ज्ञानविषयघटादि जडवदिति तन्नयुक्तम् नहि ज्ञानविपयत्वमननुभूतित्वे प्रयोजकम्। अपितु स्वाश्रयस्य स्वसत्तया प्रकाशमानत्वं वा स्वविषय [साधन] ज्ञापकत्वमेवानुभूतित्वमिति।

एतद्द्वयं यत्र विद्यते साऽनुभूतिरेतद्द्वयं यत्र न भवति सानानुभूतिरित्येव नियामकम्। एवं च ज्ञानस्य ज्ञानविपयत्वं न ज्ञानत्वप्रकाशकत्वस्य वा विघातकम्।

मोक्षप्रतिपादकशास्त्राणां नैरर्थक्यमेवापतति। अतएव केनचित् कथितम्-वरंवृन्दावनेऽरण्ये शृगालमभिवाञ्छितम्। नतु वैशेषिकीं मुक्तिमात्मज्ञो गन्तुमिच्छतीति।

तथापि, सुशुप्तिकालेजीवेज्ञानाभावेऽपिजागरणसप्रत्यक्षादिज्ञानस्य यथायथं विद्यमानत्वेन न ज्ञानाभावे ज्ञानात्मकप्रतियोगिव्यधिकरणो रूपाभावात्, अपितुकालविशेषेसुषुप्तौ मोक्षे वा विद्यमानोपि ज्ञानसमानाधिकरण एव, एकस्मिन् वृक्षेशाखामूलादिदेशविशेषावच्छेदेन विद्यमानकपिसंयोगतदभाववत्। अथवा वर्तमानभूतानागतकालावच्छेदेनवृक्षेकपिसंयोगतदभाववत्। एवञ्च प्रतियोगिव्यधिकरणो ज्ञानभावोयत्रभवति स जड़ः जीवेतु यदाकदाचिज्ज्ञानस्य सत्वेन कालान्तरे देशान्तरे वा तदभावो न प्रतिव्यधिकरणोऽत एवजीवो नजडः किन्तु घटादिरेव पदार्थोंजडः तत्रकदाचिदपिज्ञानस्यासत्वात् अतएव सर्वोंपि दार्शनिको न्यायमतं प्रायउपजीव्यैव स्वकीयवाग् वैभवमादाय जीवेश्वरस्वरूपं यथामतिविचारयति। तथा च विपयाः स्वभावजड इति तेन तेषां प्रकाशासंभवः। यदि कदाचिज़्ज्ञानमपि स्वप्रकाशात्मकंनस्यात्तदा जगत आन्ध्यमेवस्यात्। तथा च लौकिकानामाभाणकः "अन्धस्येवान्धलग्नस्य विनिपातः पदेपदे" इति। नच ज्ञानं जडात्मकमपि ज्ञानान्तरेणानुव्यवसायादिना प्रकाशित सत् विपयप्रकाशकं स्यात्। एवं सतिदुरवस्थादुरवस्था स्यात् ज्ञानस्याज्ञानान्तरविषयत्वे स्वीक्रियमाणत्वे क्वचिद्गत्वाज्ञानधाराया विश्रामे उपान्त्य ज्ञानस्य जडत्वापातेन मूलपर्यन्तमप्रकाशापत्तिरतो ज्ञानं न ज्ञानान्तरग्राह्यं जडत्वप्रसङ्गात्। तस्मात् ज्ञानं स्वप्रकाशात्मकमेव नतु ज्ञानान्तरेणानुभाव्यम्, अनुभाव्यत्वे जडत्वप्रसङ्गात्, यतोऽनुभाव्यत्वस्यैव जडत्वप्रयोजकत्वादित्यादि स्वप्रकाशज्ञानवादिना पूर्वपक्षप्रकरणे पूर्वप्रतिपादितम्। तन्मतं निरासायोपक्रमते **यदुक्तं पूर्वंज्ञानस्य ज्ञानान्तरविषयत्वे** इत्यादि, यद्वस्तु अनुभूत्यावेद्यंतन्नानुभूतिरपितु तद्भिन्नं जडात्मकमेव, यथाघटप्रभृतिकः पदार्थः। एवंचानुभूतिरपि, अनुभाव्यस्यात् तदातस्या अनुभूतिभिन्नत्वमेवभवेदिति शंकायाभिप्रायः। उत्तरयति **तन्न युक्त**मिति। तदेवोपपादयति **नहिज्ञानविषयत्वमननुभूतित्वे प्रयोजयम्** इत्यादि। स्वाश्रयस्य स्वसत्ताया प्रकाशमानत्वमनुभूतित्वमथवा स्वविषयज्ञापकत्वंवाऽनुभूतित्वं नतु ज्ञानान्तराविषयत्वम्। अर्थात् स्वाश्रयाय स्वयमेव प्रकाशमानत्वमनुभूतित्वम्। स्वाश्रयाय स्वविषय प्रकाशकत्वं, तच्च स्वकीयवर्तमानता समये ज्ञानस्यापि विद्यते एव। उभयप्रकारकं चेदमनु-

घटादेस्तु एतादृशस्वभावाभावादेवानुभूतिभिन्नत्वं नतु ज्ञानविषयत्वेन जडत्वमिति ।

अपि चाननुभाव्यत्वस्य ज्ञानत्वप्रयोजकत्वे गगनकुसुमादेरप्यनुभाव्यत्वाभावेन तस्यापि ज्ञानत्वप्रसङ्गात् । नवाऽत्माज्ञानरूपोऽनुभवितृत्वात् । नवाऽयमननुभाव्यः स्वपरसंवेद्यत्वात् । अन्यथाऽत्मनोवेद्यत्वेऽनात्मत्वमवेद्यत्वेखपुष्पायमाणत्वं चापतेत् ।

नच गगनकुसुमादिकमसत्वादेवानात्माऽननुभूतिश्चेति वाच्यम्—एवं चेत् तदा

भूतित्वंस्वकीय वर्तमानताकाले यदि स्वाश्रयायाप्रकाशमानत्वम्, अथवा स्वविषयस्याप्रकाशकत्वकथमपि न संभवति । अपितु अनुभूतिः स्वसत्ताकाले स्वाश्रयायप्रकाशमानत्वमेव विद्यते स्वविषयज्ञापकत्वमेवविद्यते इत्येवानुभूतित्वम् । अतीतत्वादिकाले स्वाश्रयाय वर्तमानदशायां वा पुरुषान्तराय ज्ञानान्तरेण प्रकाशमानत्वेपि, अनुभूतेर्नेनिर्वचितानुभूतित्वलक्षणस्य भङ्गोभवति ।

अर्थात्-यथोक्तं लक्षणमत्र विद्यते तत्रानुभूतित्वं तत् ज्ञानान्तरवेद्यं भवतु नवाभवतु तथापि तज्ज्ञानमेव । परन्तु अननुभाव्यत्वं न ज्ञानत्वे प्रयोजकं येन भवदीयप्रश्नः समुपयुक्तः स्यादिति । ततश्च स्वप्रकाशत्वे एवज्ञानत्वं ज्ञानान्तरज्ञेयत्वेनानुभूतित्वमिति न नियमः । ग्रन्थोक्तरीत्या सर्वदोषस्य परिहृतत्वादिति । अनुभाव्यत्वं जडत्वेन प्रयोजकम्, घटादीना तु निरुक्तोभयविधज्ञानत्वाभावादेव जडत्वं नत्वनुभाव्यत्वात् । यदि कदाचिदननुभाव्यत्वस्यानुभूतित्वस्यानुभूतित्वप्रयोजकत्वं तदागगनकुसुमादेरपि, प्रत्यक्षज्ञानाननुभाव्यत्वेन तेषामप्यनुभूतित्वं प्रसज्येत । वस्तुतस्तु गगनकुसुमादेरपि स्वाप्तज्ञानशाद्बज्ञानज्ञाप्यत्वमस्त्येवेति ज्ञानविषयत्वस्याननुभूतित्वप्रयोजकत्वस्वीकारेपि न क्षतिः ।

यदपि परैरात्मनो ज्ञानरूपत्वं स्वीकृतं तद्व्यत्रोचविजृंभितमेव, आत्मनोऽनुभवित्वेन ज्ञान भिन्नत्वात् । नवाऽत्माऽननुभाव्यः ज्ञानवदेवस्वतः सिद्ध्यतोऽस्यात्मनः स्वपरसंवेद्यत्वाभ्युपगमात् नच यथा वेद्यत्वाद् घटादिर्नात्मा, तथैवात्मनोऽपि, यदिज्ञानान्तरवेद्यतास्यात्तस्यात्मनोऽप्यनात्मत्व प्रसङ्ग इतिवाच्यम्, तुल्यत्वात् । अयमाशयः यदिज्ञानविषयतयाऽत्मन्यनात्मत्वप्रसङ्गस्तदा, यदि ज्ञानान्तरविषयत्वाभावरूपमवेद्यत्वंमन्येत, तदा यथाप्रमाणाविषयत्वात् वन्ध्यापुत्रादिरसद् भवति तथाऽत्मनोपि प्रमाणाविषयतयाऽसत्वमेव स्यात्, प्रमाणाविषयत्वस्यैवासत्वापादकत्वात् । नचावेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वरूपमेव स्वप्रकाशत्वम्, एतादृशस्वप्रकाशत्वं ज्ञानवदेवात्मनोऽपि मन्यते इति वाच्यम्, अवेद्यत्वाऽपरोक्षव्यवहारविषयत्वयोः परस्परघातात् । ज्ञानाविषयत्वमवेद्यत्वं प्रत्यक्षज्ञानाविषयत्वं प्रत्यक्षव्यवहारप्रयोजकम् । एवञ्च यदि ज्ञानाविषयत्वरूपमवेद्यत्वं तदाऽपरोक्षव्यवहारविषयत्वेन संभवति । तथा यदि अपरोक्षव्यवहारविषयत्वम्, अर्थात् प्रत्यक्षविषयत्वं तदासामान्यतोऽवेद्यत्वं न स्यादित्येवं तयोः परस्परंव्याघात आपतति स च परिहार्यो भवति भवन्मते । ननु, फलव्याप्यत्वरूपवेद्यत्ववेद्यत्वाभावेनावेद्यत्वभावात्मनो व्यवहार

घटादिस्वभावजडस्यापि ज्ञानानाश्रयत्वमेवात्मभिन्नत्वेप्रयोजनकम्, तथाऽज्ञानाविरोधित्वमेवानुभूतिभिन्नत्वे प्रयोजकमिष्यताम्। ननु ज्ञानानाश्रयत्वमज्ञानविरोधित्वमेतद्द्वयमप्यनुभाव्यमेवेति चेत् तदातद्द्वयमपि कूर्मरोमादिवदेवाविषयत्वेन सदेवस्यादिति न किञ्चिदेतत्।

विषयत्वं तु वृत्तिव्याप्यतयेति तदुभयं घटते। अत्र व्यवहारविषयत्वमात्रकथने घटादावतिव्याप्तिः। अवेद्यत्वमात्र कथने धर्माधर्मादावतिव्याप्तिः। तस्मादुभयोरुपादानम्। नच योगिप्रत्यक्षविषयतया, अवेद्यत्वंधर्मादौनास्तीति वाच्यत् तेषां योग्यद्रष्टृत्वस्यैव विवक्षितत्वात्। तदुक्तं "यत्राप्यतिशयो दृष्टः स स्वार्थानतिलंघनात्। दूरसूक्ष्मादिदृष्टोस्यान्नरूपे श्रोत्रवृत्तितेति वाच्यम्, एतस्य परिभाषामात्रत्वात्। आत्मनः परकीयज्ञानविषयत्वप्रतिपादनेनावेद्यत्वघटित स्वप्रकाशत्वस्यात्मनि सर्वथैवासंभवात् यदिपि तैरुक्तम्—फलव्याप्यत्वमेवास्य शास्त्रविद्भिर्निवारितम्। ब्रह्मण्यज्ञानाशाय वृत्तिव्याप्तिरपेक्षिता। स्वयंप्रकाशरूपत्वान्नाभास उपयुज्यते" इति। तदपिन—संभवेदेवं यदि विवर्तवादो मायावादो वा शास्त्रसंमतो भवेत्। तन्मते "एकमेवाद्वितीयमित्यादि" कतिपयश्रुत्यनुसारेण, ब्रह्मणिं सजात्तीयविजातीयस्वगतभेदराहित्येन निर्विशेषत्वमेव एवञ्चनिर्विशेषब्रह्मैव शास्त्रप्रतिवादोमुख्योऽर्थ उपासनाया विषयः। तादृशे तत्र ब्रह्मणि "अनादिभावात्मकानिर्वचनीयाविद्याऽत्मात्मानमाच्छाद्याध्यारोपापवादाभ्यां तन्निरूपणंकुर्वन्ती, आत्मनिरूपणं करोति। तमेवात्मानमाश्रयं विषयं च कृत्वाऽकाशादिसकलपदार्थलोकभुवनादिकमाविष्करोतिं। ततः सैववैराग्यं संसारात् कारयित्वागुरूपसदनादिकं कृत्वा, श्रवणमनादिद्वारेण तत्वज्ञानमुत्पादयति। ततश्चात्मतत्वज्ञानेन सर्वस्य प्रपञ्चस्य विलयो भवति तदन्तर्गततत्वज्ञानमपिकतकरजो न्यायेन विनश्यति। ततोऽनाकुलमेकं ब्रह्मैव नित्यनिरतिशयज्ञानसुखात्मकमवतिष्ठते इति स एव मोक्षः।

परन्तु नायं पक्षः, आत्मनः सविशेषत्वस्य लोकयुक्तिशास्त्रैनिश्चितत्वात्। यदि सर्वथा पारमार्थिकमेक एवात्मा तदाविविधभेदाभावात्, गुरुशिष्यात्मभेदसाध्यलौकिकवैद्धिकस्वर्गमोक्षादिव्यवहारो भज्येत। "किञ्चात्मनांभेदाभावे गुरुशिष्यव्यवस्थाभङ्गोऽपि स्यात्। तदेवं शिष्यतयाकञ्चनशिक्षणीयमुपलभ्यानुपलभ्यवोपदिशत्याचार्यः ? आद्ये स्वस्मात्भिन्नमभिन्नंवा ? प्रथमे सत्यमसत्यं वा ? नाद्योऽपसिद्धान्तात्। अन्ते तु तस्यमिथ्यात्वेनोपलम्भे तस्मा उपदेशासम्भवः। सत्यत्वेनोपलम्भे तु भ्रान्तत्वेनाचार्यत्वहानिराचार्यस्य। अभिन्नत्वपक्षे कथमुपदेशः। अनुपलभ्येतिपक्षे तु कस्मा उपदिशति ? (गीतनन्दभाष्यम् २।१२) इत्याद्याचार्योक्तेः। ततश्च स्वर्गादिप्रतिपादक "स्वर्गकामोवाजपेयेन यजेत" "मोक्षकाम आत्मानमुपासीत" इत्यादिविधिप्रतिपादकवेदानां नैरर्थक्यमेव प्रसज्येत। नच व्यावहारिकभेदं स्वीकृत्यवेदस्य सार्थत्वे स्वकीयप्रतिज्ञा विरोघो-

यत्तु पूर्वमुक्तं ज्ञानं सर्वविधभेदरहितम् अनुत्पन्नत्वात् आकाशवदिति । तन्न, अजातस्यैवात्मनो देहेन्द्रियादिभेदेन मनुष्यदेवादिविभागस्य समर्थितत्वात् । अनादितया स्वीकृता ज्ञानस्याभिन्नत्वस्यावश्यंमन्तव्यत्वात् । नचात्माऽज्ञानयोर्विभागो न पारमार्थिक इति चेत् , उत्पत्तिव्याप्यपारमार्थिकभेदस्य भवन्नयेऽभावात् । दृग्दृश्य भेदोऽवाधितत्वात्पारमार्थिक एवेति सिद्धान्तात् ।

भवति । तदुक्तमुपहासं कुर्वन् परैः "भेदापह्नवमूलेन भेदं विधि निषेधयोः । स्वयं समर्थयन् मूर्खः स्ववाग् वज्रेण ताडितः । इति ।

विशिष्टाद्वैत सिद्धान्ते एतस्यमतस्यनिराकरणं कृतं बहुशस्तत्तत्स्थले अग्रेपिसति प्रसङ्गे करिष्यतेऽतोऽत्रनप्रपञ्च्यते । तस्माद्द्वैद्यत्वनानात्मत्वप्रयोजकमिति संक्षेपः ।

अथ यदुत्पद्यतेऽर्थात्प्रागभावप्रतियोगि भवति तद्विभाज्यमर्थात् भिन्नं भिन्नं भवति, तेषु स्वजातीयविजातीयस्वगतभेदप्रतियोगिभवत्येव । यथा घटादिर्भाव उत्पत्तेरनन्तरमेव सजातीयादि भेदेन घटादौ भिन्नत्वदर्शनात् । अथ यन्नोत्पद्यते तस्मिन्नविभागोऽर्थात्सजातीयस्वगतभेदो न भवति । यथाऽकाशे आकाशोह्यनुत्पन्नत्वात् सजातीयभेदवान् न दृश्यते तद्वत् संविद् ज्ञानमपि प्रागभावादिसमुत्पादककारणकलापरहितत्वान्नोत्पद्यते । उत्पत्तिरहितत्वेन अर्थादजायमानत्वात् तस्मिन्नजे ज्ञाने विभागाऽपरपर्यायो भेदोपि न भवति । ततश्च तस्मिन्नुत्पत्तिरहितत्वेनाजेज्ञाने स्वगतसजातीयविजातीयभेदोपि न भवति भेदत्रयनिषेधेन ज्ञानमेकमजं नित्यं चेतिं, यदुक्तं परेण तदिहानुद्यतत्प्रतिक्षेपायोपक्रमते **यत्तु पूर्वमुक्तंज्ञानं सर्वविधभेद रहितमनुत्पन्नत्वादिति ।** ज्ञानं सजातीयादिंभेदरहितम् अनुत्पन्नत्वात् आकाशादिवत् यदुत्पद्यते तदेवभिद्यते यथा घटादिकम् इत्यन्वयि यन्नोत्पद्यते तत्र भेदो न भवति यथा गगने इति व्यतिरेकिः । एवंचानुमानादि प्रमाण द्वारा ज्ञाते सर्वविधभेदस्यनिषेधेन ज्ञाने एकत्व नित्यत्वादिकं साधितम् । स्वरूपभेदोऽन्योन्याभाव विभागपृथक्त्वादिभेदेन सोऽनेकः । पुनश्च स्वगतभेदः सजातीयभेदो विंजातीयभेदश्च । यथा वृक्षस्य फलपत्रादिप्रतियोगिको भेदः स्वगतोभेदः वृक्षान्तराद्यो भेदः स सजातीयस्तथा शिलादितोजायमानो भेदः स विंजातीयः तदिह ज्ञानेवस्तु स्वाभाव्यात्संप्राप्तभेदत्रयम् "एकमेवाद्वितीयमित्यादि" श्रुत्यानिवारितं भवति । यतो भेदस्य समुत्पन्नवस्तुन्येव समावेशदर्शनात् , ज्ञानं चोत्पत्तिमत्वविरोधिकारणविरहादजत्वाक्रान्तमिति सर्वथाभेदगन्धरहितमेव ज्ञानमिति पूर्वपक्षाशयः ।

समाधाता विज्ञानं सर्वविधरहितम् अजत्वादित्यनुमानम् व्यभिचारदोषेणदुष्टं न स्वसाध्य साधनाय समर्थमिति प्रतिपादयितुमुपक्रमते **तन्नेति** व्यभिचारस्थलं व्यभिचारलक्षणसमन्वयं च दर्शयितुमाह **अजातस्यैवात्मनः** इत्यादि "अजोनित्यः शाश्वतोऽयं पुराणः" इत्यादि श्रुत्या सर्ववादिनिश्चयेनात्मनोऽनुत्पन्नत्वेन तत्रात्मनि हेतोरनुत्पन्नस्य विद्यमानत्वात् तत्र च सिषाधयि-

पितसाध्यस्यावर्तमानत्वात् साध्याभाववति हेतोर्वृत्तित्वमेवव्यभिचार इति व्यभिचारलक्षणसत्त्वेन तादृशहेतोरसाधकत्वात् । तथा भवदभिमतमज्ञानमनादित्वेनैवाभिमतमिति तत्रानुत्पन्नत्वंहेतुस्तिष्ठति तत्र साध्यं न तिष्ठतीत्यज्ञानेपि व्यभिचारो भवत्येव । अज्ञानात्मनोर्भेदः सर्ववादिसंमत एव । नचाज्ञानात्मनोर्यो भेदः सतु न पारमार्थिकोऽपित्वपारमार्थिकः साध्यस्तु पारमार्थिकोभेदो विवक्षित इति वाच्यम् पारमार्थिकभेदस्योत्पत्तेरभावात् । यत्परमार्थभेदवत्तदुत्पद्यते इत्याकारकव्याप्तेरभावात् परमार्थभेदस्य भवतां मतेऽप्रसिद्धेः ।

अपि च भेदः पारमार्थिकोऽपारमार्थिको वा ? तत्र नाद्यः भवन्मते तदसिद्धेर्भेदे पारमार्थिकत्वविशेषणं हेतौ विशेषणासिद्धिमावहेत न द्वितीयः तथा सति पारमार्थिकत्वविशेषणस्य निरर्थकत्वात् प्रतिवादे भेदस्य नित्यत्वेनापारमार्थिकत्वाभावात् तथोभयतः पाशारज्जुरिति । नचापारमार्थिकभेद इत्यस्य पारमार्थिकत्वेन भेदो नास्तीत्याकारको व्यधिकरणधर्मावच्छिन्नाभाव एवाभिमतः समवायितया वाच्यत्वाभाववदिति वाच्यम् तथा सति व्यधिकरणधर्मावच्छिन्नाभावस्यकेवलान्वयितया यत्परमार्थभेदवत्तदुत्पन्नमित्याकारकव्यतिरेकव्याप्तेर्निर्वचनासंभवाद् व्याप्यत्वासिद्धिदोषप्रसङ्गात् । नच "प्रज्ञानं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि शास्त्रेण ज्ञानस्य नित्यत्वं तथा सर्वभेदराहित्यं च प्रतीयते इति तस्य निर्भेदत्वं नित्यत्वं च स्यादिति वाच्यम् शास्त्रेण तस्य न निर्भेदत्वं सिद्ध्यति प्रत्युत तस्य भेदवत्वस्यैव श्रवणात् । "ज्ञाज्ञावजावीशाऽनीशौ" इत्यादि शास्त्रेषु नित्यानामेव चिदचिदीश्वरादीनां पारमार्थिकभेदस्यैव श्रावितत्वात् । तत्र चित्पदवाच्यः शरीराधिष्ठितो जीवोनित्योभिन्नश्च न स्यात् तदाकृतिहतिरकृताभ्यागमदोषौभवेताम् ज्ञानित्वाज्ञानित्वमनुष्यदेवादिव्यवस्थाऽकस्मिकीभवेत् तथाऽन्यानुभूतेन तदन्यस्य स्मरणमप्यापतेत् । तस्माज्जीवस्य चित्पदवाच्यनित्यत्वं परस्परं पारमार्थिकभेदोऽवश्यमेव सिद्ध्यतीति । तथाऽचित्पदवाच्यप्रकृते नित्यत्वं भेदवत्वं न स्यात् तदातदधीनसंसारस्यानादित्वं न स्यात् किन्तु कादाचित्कत्वमेव भवेत्तस्मात्प्रकृतेरपि प्रवाहनित्यत्वं भेदवत्वमपि मन्तव्यमेवशास्त्रप्रामाणिकैः । परमेश्वरस्य नित्यत्वं परस्परभेदवत्वं न स्यात्तदा तदुपासनया मोक्षवार्तादत्ताञ्जलिः स्यात् । तदुक्तम् "स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः । यदुपास्तिमसावत्र परमात्मा निरूप्यते । ईश्वरश्रवणमनननिदिध्यासनादीनो मोक्षोपयोगित्वात् । तथा ज्ञाने यत् सजातीयभेदोः निराकृतः, सोपि निर्वाधप्रात्यक्षिक प्रतीत्यैव निराकृतो भवति । तत्र ज्ञानजडयोः परस्परं भेदः प्रत्यक्षः स चावाधित एव । एवं जीवस्य परस्परं भेदः सजातीयो विजातीयो वा एतेषां च सर्वज्ञसर्वसर्जकपरमात्मनाभेदः शास्त्रलोकादि प्रसिद्ध एवेति । तस्मात् अजत्वहेतुना ज्ञानेयत्सजातीयविजातीयभेदस्य निराकरणं कृतम् तदजस्यैव जीवस्यशरीरेन्द्रियादिभ्यो भेदपर्यायविभागस्य समर्थनेन व्यभिचरितं प्रत्यक्षादिवाधापहृतविषयम् वन्हावनुष्णत्वानुवदेवेतिदिक् ।

यदपि पूर्वं कथितं यद्ज्ञाने नास्तिकश्चिद्धर्मोमानसिद्धः । ज्ञानत्वंतु ज्ञानधर्मो ज्ञानगतः । तदपि नमनोरमम् शास्त्रानुमानादिप्रमाणेन स्वयं प्रकाशत्वनित्यत्वादीनां सिद्धत्वेन तेनैव व्यभिचारात् । न च स्वप्रकाशत्वं नित्यत्वं च ज्ञानरूपमेवेति वाच्यं, तत्रापि विवादात् । ज्ञानस्वरूपं स्वीकृत्यतदनुमेयं क्षणिकंवेत्यादि विवाददर्शनात्वादिनाम् । एवं स्वरूपभेदाच्च । तत्र ज्ञानंनाम स्वसत्तयैवकस्यचित्प्रकाशनम् स्वयं प्रकाश-

संविदि सजातीयविजातीयभेदनिषेधकानुमाने, अजायमाने आत्मनि व्यभिचारादिदोषं प्रदर्शनेन तदनुमाननिराकरणेन पारमार्थिकभेदस्यात्मनि ज्ञाने च संसाध्य, ज्ञानेस्वगतभेदो नास्ति, ज्ञानगतज्ञानातिरिक्तधर्मस्यभावेन, स्वगतभेदोनास्तीत्यनुमानेपि दोषमुक्त्वातदनुमानस्यापि निराकरणायोपक्रमते "**यदपि पूर्वंकथितमित्यादि** । अस्याः संविदःप्रमाणसिद्धोज्ञानगतो नास्तिकश्चित् धर्मः, ज्ञानत्वंतु धर्मोनास्ति कश्चित् धर्मिभिन्नधर्मस्यानभ्युपगमादित्यर्थः प्रश्नवाक्यस्येति । उत्तरयति **तदपि न मनोरमम्** । उत्तरवाक्यं विवृणोति—**शास्त्रानुमानेनेत्यादि**, शास्त्रेणानुमानेन च स्वयं प्रकाशत्वादिकं ज्ञानधर्म इति साधनादित्यर्थः । एवञ्च ज्ञानधर्माणां स्वयं प्रकाशत्व नित्यत्वादीनां प्रमाणसिद्धत्वप्रतिपादनेनज्ञाने धर्मनिषेधकानुमाने हेतोर्वाधितत्वात् , वन्हौ शैल्यसाधकद्रव्यत्वहेतौ वाधवत् । अर्थात् संविदज्ञानधर्माणां शास्त्रादिप्रमाणसिद्धत्वप्रतिपादनात् संविदिज्ञानेधर्मसाधकहेतोर्वाधितत्वमर्थत एव सिद्ध्यतीति । अतएव ज्ञानपक्षकव्यतिरेक्यनुमाने, तथा ज्ञानत्वादिधर्मपक्षकेचान्वयिनि संविद्धर्मनिषेधकानुमाने पक्षमादायैव व्यभिचारदोषस्योद्भावनं भवतीति ज्ञेयम् । ननु ज्ञानधर्मानित्यत्वादयोज्ञानरूपा एवेतिवाच्यम् , धर्मस्यधर्मिरूपत्वसिद्धावपि तत्र धर्मे वादिनां धर्मिस्वरूपस्वीकर्तृणां विवादस्यपरस्परं दर्शनात् । ज्ञानस्वरूपतां मत्वैव च न तस्यानुमेयत्वं स्वीकुर्वन्ति केचनानुमितिगम्यत्वं स्वीकुर्वन्ति ।

यत् सत् तत् क्षणिकम । तत्रापि केचनप्रत्यक्षगम्यं केचनानुनानगम्यमित्येवं परस्परं कलहायन्ते । इत्येवं विवादविषयीभूतज्ञानधर्माणां नित्यत्वादीनामुभयमसहमतज्ञानात्मकधर्मिस्वरूपत्वंनकथमपि सिद्ध्यतीतिभावः । ननु यथा घटपटादीनामाकारप्रकारभेदाद्भेदाभवन्तितथैवज्ञानतद्धर्मयोरपि, आकारप्रकारप्रकारयोर्भेदात्तयोधर्मधर्मिणोर्ज्ञानज्ञानत्वयोर्भेद एव भवति नतु तयोरेकत्वमित्याशयेनाह **स्वरूपभेदाच्चेति** ।

अथ धर्मधर्मिणोरभेदवादिमते तयोर्भेद एव सिद्धोऽर्थात् हेत्वभाववान् पक्षः, यथाशब्दो गुणश्चाक्षुपत्वादित्यनुमाने शब्दपक्षकगुणत्वसाध्यकचाक्षुपत्वहेतौ, शब्दस्यश्रावणतया, तत्रचाक्षुषत्वं नास्ति, इति चाक्षुपत्वाभाववान् शब्द इति ज्ञाने जाते गुणत्वव्याप्यचाक्षुपत्ववान् शब्द इत्याकारकपरामर्शाभावेन शब्दे गुणत्वसाधकचाक्षुपत्वं स्वरूपासिद्धम् । तथैव प्रकृते ज्ञानज्ञानत्वयोर्भेदोऽसिद्ध इत्याशङ्कां वारयितुं तयोः स्वरूपभेदमेवोपपादनायाह **तत्रज्ञानंनाम** इत्यादि,

तातुसत्तयैवात्मने प्रकाशमानता। प्रकाशस्तु चिदचिदादिसकलपदार्थसाधारणो धर्मः। प्रकाशात्मकधर्मस्यास्वीकारे व्यवहारानुगुणस्यैव प्रकाशवाच्यत्वोपगमः।

कस्यचिदित्यस्य, कस्यचिदर्थस्येत्यर्थः। ज्ञानमित्यत्र, भावप्रधानो निर्देशस्तेन ज्ञानत्वमित्यर्थः। अथवा प्रकाशनमेव प्रकाशकम्। आत्मने स्वस्मैस्वाश्रयायवा। स्वाश्रयाय स्वविषयप्रकाशकत्वमेव संवेदननिष्ठं संवेदनत्वम्, स्वयं भासमानत्वं च संवेदनस्य स्वयं प्रकाशकत्वमित्येवं प्रकारेणज्ञानतद्गतधर्मयोः स्वरूपभेदः प्रतिपादित इति बोध्यम्।

तत्र संवेदनत्वस्वप्रकाशत्वशरीरघटकं प्रकाशशब्दार्थं दर्शयितुमाह **प्रकाशस्त्विति** अयं च प्रकाशो मीमांसकाभिमतज्ञातताऽपर्यायोज्ञानगतोधर्मविशेषरूपएव। नायं प्रकाशो जडपदार्थमात्रस्यैवधर्मः किन्तु चितोपि धर्मविशेषः। अर्थात् प्रकृतिजीवपरमेश्वराणां प्रमाणसिद्धसर्वपदार्थानामयं धर्म इति संवित्सिद्धौ प्रतिपादनात्। ननु यदि प्रकाशस्य धर्मान्तरत्वं स्वीक्रियते तदा को दोषस्तत्राह **धर्मस्यास्वीकारे** इति। व्यवहारप्रयोजत्वमेव ज्ञानाधीनं प्रकाशपदवाच्यम्। अर्थात् यावन्तो व्यवहारा भवन्ति ते सर्वेज्ञानाधीना इति ज्ञानधर्मप्रकाशात्मककारणाभावे आदानप्रदानादिकाः सर्वेपि व्यवहारा विलुप्ताभवेयुरिति प्रकाशस्वीकारोऽत्यावश्यक एवेति। नच तदाऽव्यवह्रियमाणस्थले का गतिरितिवाच्यम्, तत्कालेऽव्यवह्रियमाणत्वेपिज्ञानाधीनयोग्यताया विद्यमानत्वात्। अत्रायमर्थः कारणत्वंनामनियताव्यवहितकार्यपूर्वकालिकत्वम्। तद्द्विविधम्, फलोपधायकं योग्यता रूपंच तत्रघटं प्रतितात्कालिकदण्डादिकं तेषां दण्डादीनां तदुत्तरक्षणे एव घटोत्पादकत्वात्, तेन दण्डादिकं फलोपहितकारणं भवति। योग्यत्वं च कारणतावच्छेदकीभूतधर्मवत्वमेव, यथापर्वतीयो दण्डः स च वने विद्यमानोन तदाघटमुत्पादयति किन्तु कालान्तरे घटं जनयति, तत्रकारणतावच्छेदकदण्डत्वस्य वन्यदण्डेपि विद्यमानत्वात्। अर्थात् तात्कालिकं कारणं यद्भवति तत् फलोपहितम्, अन्यदायद्भवति जनकं तत्र योग्यतारूपैवकारणता। तथैवेहापि, अव्यवह्रियमाणस्थलेज्ञानस्य कारणता योग्यता रूपैवेति।

एवमेकत्वसंख्यावच्छिन्नत्वमेवज्ञान एकत्वधर्मो भवति। एवं कालानवच्छिन्नत्वं ज्ञानेनित्यत्वधर्मोदेशानवच्छिन्नत्वंज्ञाने विभुत्वमित्येवं ज्ञानेस्वप्रकाशत्वनित्यत्वविभुत्वैकत्वादयोऽनेके धर्मा भवन्ति, ते च सर्वेधर्माधर्मिभ्यः परस्परंच विभिन्नाएवेतिननिर्भेदत्वंज्ञाने संभवतीति किन्तु पारमार्थिक एव भेदो ज्ञाने भवतीति निर्भेदानुनानं सर्वथैव निरालंबनमित्याशयः प्रकरणस्य संक्षिप्तः।

ननु जडत्वाभावः स्वप्रकाशत्वम्, देशानवच्छिन्नत्वं व्यापकत्वमित्यर्थः। कालानवच्छिन्नत्वं नित्यत्वम्, अर्थात् यः पदार्थोजन्यते सः उत्पत्तेः पूर्वमनागतकालोपस्थितिसमयेवर्तमानकालेनावसाने भूतकालेनेत्येवं वर्तमानादिकालेनावच्छिन्नमेव भवन् अनित्य इति व्यवह्रियते। यस्तु न केनापि

कालेनावच्छिद्यते स नित्य इति कालावच्छेद्यत्वाभाव एव नित्यत्वम् । एवम् सर्वगतः पदार्थोयेन केनापि देशेन सम्बद्ध एव भवति, स च प्राचीप्रतीच्युदीच्यवाची, ऊर्ध्वात्मकोधोभागात्मक इत्येतेषु अन्यतमस्तत्र भवत्येवेति तेनान्यतमे न संवद्धः । एकदेशसंवद्धस्तद्विरोधिदेशेन संवद्धो न भवति विरोधादिति पूर्वस्यांसंवद्धो न प्रतीच्यादिभिः संवद्ध्यत इत्यादिप्रतीतेः । यस्तु न केनापि देशेन संवद्धः स सर्वव्यापकः सर्वमूर्तसंयोगीभवन् व्यापको विभुर्वा कथ्यते । ततश्चानवच्छिन्नत्वम् देशावच्छेदाभाव एव व्यापकत्वम् एवं स्वव्यवहारायपरापेक्षो जडोऽथवा ज्ञानानुभावत्वं जडत्वंजडत्वाभावश्च स्वप्रकाशत्वम् । बहुत्वाभावं एवैकत्वम् । तथा च स्वप्रकाशत्वनित्यत्वविभुत्वैकत्वानां सर्वेषामभावरूपत्वमेव नतु स्वप्रकाशत्वादयोभावात्मकाः पदार्था भवन्ति । अभावश्चाधिकरणात्मकः । यथा जलादौविद्यमानोगन्धाभावो जलात्मक एव लाघवात् , जलाधिकरणस्यक्लृप्ततया जलादित एव निर्वाहो भवति, तत्रातिरिक्ताभावस्य तदतिरिक्ततदधिकरणस्य च पार्थक्ये गौरवं भवति । अभावस्याधिकरण रूपे च क्लृप्तपदार्थेनाधिकरणेनैव निर्वाहात् लाघवं भवति । सोयमभावोऽधिकरणात्म इति मीमांसक मतम् । एवञ्च जडत्वाभावात्मकस्वप्रकाशत्वादिकानि अभावरूपाणि नतुभावात्मकानि । अभावस्यचाधिकरणरूपतयैव निर्वाहेन संविदोज्ञानस्य धर्मकत्वमावहतीतिंचेन्न, भावानवबोधात् । अयंभावः भवेदेवमभावस्याधिकरणरूपत्वे सति, परन्तु तदेव न संभवति, अभावस्याधिकरणरूपत्वेन लाघवमपितु गौरवमेव भवति, तथाहि यदि अभावोऽतिरिक्तस्तदाऽतिरिक्तेन तेनाभावेनैवनिर्वाहो जायते अधिकरणात्मकत्वेतु, तदधिकरणानामनेकत्वाद् गन्धाद्यभावस्यानेकत्वेन महद्गौरवमेवापद्येत मीमांसकस्य पण्डितंमन्यस्येति । अपिच यद्यभावोऽधिकरणात्मको भवेत्तदागन्धाभावादिजलाद्यधिकरणयोराधाराधेयभावाभावेन गन्धाभाववज्जलादिकमिति प्रतीतिः सर्वानुभवसिद्धाव्याहता भवेत् । आधाराधेययोर्भेदमूलकत्वात् नहि भवति य एवाधारः स एवाधेयः तदुक्तमुदयनाचार्येण "नहिसुशिक्षितोपि नटबटुः स्वस्कन्धमधिरोहितुं शक्नोतीति । किञ्चतयोरैक्ये पुनरुक्तिरपि स्यात् गन्धाभावे कथिते तदभिन्नजलादिकमपिप्रतीयेत, जलादिप्रयोगेतदभिन्नजलादिकमपिज्ञायेत । परन्तु नैवंकुत्रापि भवतीति । तस्मादभावोनाधिकरणरूपोऽपित्वतिरिक्त एव । किंच "योगुणो यदिन्द्रियग्राह्यस्तदभावोपि तदिन्द्रियेणैव गृहीतोभवतीति युक्तिसिद्धो नियमः । यथागन्धात्मकोगुणो घ्राणेन्द्रियेण गृह्यते यदा गन्धाभावोपितेनैव घ्राणेन गन्धग्राहकेण गृह्यते । अभावस्याधिकरणरूपत्वेतु गन्धाभावस्य जलात्मकादे घ्राणेण ग्रहणं न स्यात् , जलादीनांचक्षुरादिग्राह्यत्वात् । घ्राणरसन श्रोत्राणांद्रव्याग्राहकत्वात् । चक्षुस्त्वक् मनसामेवद्रव्यग्राहकत्वनियमात् । ततश्च गन्धप्रतियोगि ग्राहकघ्राणेनजलादीनामग्रहणेन "यो गुणोयदिन्द्रियेण गृह्यते" इत्यादिनियमोबाधित एवस्यात् । तस्मादभावोनाधिकरणरूपः किन्त्वतिरिक्त एव । एवंचाधिकरणस्यानेकत्वेप्याधेयभूताभावस्यैकत्वाद् लाघवमाधाराधेयभावश्चापि समुपपादितो भवतीति ।

एवं कालानवच्छिन्नत्वं नित्यत्वम्। एवमेकत्वं संख्यावच्छेदेनैवैकत्वमिति । न च जडत्वा-

एवं यथाऽधिकरणरूपोनाभावस्तथैवज्ञानरूपः कालरूपोपि न भवति, अप्रत्यक्षत्वापत्तेः । अर्थात् गन्धाभावादेर्यदिकालरूपत्वंतदा सर्वदैवतस्य प्रत्यक्षतानस्यात्, कालस्येन्द्रियाग्राह्यत्वात् । ज्ञानरूपत्वेतु गन्धाभावादे घ्राणादिग्राह्यता न भवेत्, ज्ञानस्यमनोग्राह्यत्वेन तदतिरिक्त ग्राह्यत्वाभावात् । ततश्चाभावो न ज्ञानरूपःकालरूपो वा संभवति । एवमाधाराधेयभावानुपपत्ते नाधिकरणरूपोऽपित्वतिरिक्त एव । किञ्चालङ्कारशास्त्रनिष्णाताअपिनाभावस्याधिकरण रूपतां मन्यन्ते । यद्यभावस्य अधिकरणरूपतानुमोदितोभवेत्तदा "निर्दूषणा गुणवतीरसभाव पूर्णासालंकृतिः कमलकोमलवर्णराजिः । सा मामकीनकवितेव मनोऽभिरामारामाकदापिहृदयान्ममनापयाति ॥" अत्रनिर्दूषणेति पदेन सामान्यभावः समुपस्थापितो भवति, सच दोषसामान्याभावोऽभावत्वादधिकरणरूपोऽर्थात्, गुणरूप एवेति दोषाभाववत्तयैव गुणवत्वप्राप्तिः संभवेन दोषाभावात् पार्थक्येन, गुणवतीतिं विशेषणं निरर्थकमेव पण्डितराजस्यातो मन्ये यदयमभावोनाधिकरणरूपोऽपितु परिगणितषडभावव्यतिरिक्तः स्वतन्त्र एव । एवञ्च निर्दूषणेति विशेषणेन दोषसामान्याभावो विधेये आधेयतावच्छेदकधर्मोऽभावत्वं विधेयतावच्छेधकसंवन्धश्च स्वरूप एव । गुणवत्यत्र गुणवत्वस्य गुणस्य वा विधेयत्वंभामिन्याश्चोद्देश्यत्वम्, ततश्चभामिनीमुद्दिश्यगुणवत्वस्य गुणस्यवा विधानम् । तत्र विधेयतावच्छेदकधर्मो गुणत्वं तत्संबन्धश्च समवाय इति, एकत्र विधेयत्वमभावस्य, तदीयो विधेयतावच्छेदकोऽभावत्वं संवन्धश्च स्वरूपः । अपरत्रविधेयोगुणो विधेयतावच्छेदकधर्मोगुणत्वंविधेयतावच्छेदकसंबन्धः स च सर्वोपिभावात्मक इति विधेयप्रभृतिसर्वस्यभावतया, तदुभयपदयोः सार्थक्यं भवतीति । अन्यथातु तादृशवैलक्षण्यभानं न स्यादतोऽभावोनाधिकरणरूप इति संक्षेपः ।

एवंचाभावानां जडत्वादिप्रतियोगिकानां कालानवच्छेद्यदेशानवच्छेद्यत्वादीनां तत्तत्प्रतियोगिकानामतिरिक्तमधिकरणवृत्तिधर्मान्तररूपत्वंवाऽधाराधेयभावप्रतीतिवलात् । ततश्च भावात्मकधर्मेण संविदः सधर्मकत्वं वा नवा भवतु किन्तु जडत्वाभावादिरूपाभावात्मकधर्मैरेव सधर्मकत्वं संविदोऽपरिहार्यमेव भवतीति । यस्मिन्प्रतीते निषेध्यवुद्धिर्नभवति तस्यैव तयाभावरूपत्वम्। अर्थात् यथाघटवद्भूतलमित्यत्र, घटाभाववद्भूतलमितिनिश्चयतदभावग्राहकतयाऽभावबुद्धिः प्रतिबन्धकः । तथैव घटाभाववद्भूतलमितिज्ञानं प्रति घटवद्भूतलमिति निश्चयोपि प्रतिबन्धको भवत्येव । तत्रोक्त लक्षणसमन्वयो भवत्येव, यस्मिन्घटाभावे प्रतीते सति, निषेध्यवुद्धिर्नभवति । अर्थात् यत्राधिकरणे घटाभावो ज्ञायते तत्राधिकरणे निषेधरूपघटाभावस्य निषेध्योघट इतितादृशबुद्धिस्तत्राधिकरणे कथमपि न भवतीति तत्र तस्यैव घटाभावस्यैवाभावरूपत्वम् । तथा घटाभाववद्भूतलमित्यत्र, यस्मिन् घटाभावाभावात्मकघटे प्रतीतेज्ञाते सति, तत्रनिषेध्यबुद्धिर्घटाभावबुद्धिर्नभवति, घटाभावाभावात्मक-

भाव एव स्वयं प्रकाशत्वं कालानवच्छिन्नं नित्यमिति न कोपि दोप इति वाच्यम् इत्थं भूतैरपिरिचतिधर्मभूतैर्व्यभिचारात् । ज्ञाने च निषेध्यत्वेनाभिमतजडत्वादिविरुद्धानेक

घटस्यैव, तत्रतदभावरूपत्वम् । अर्थात् घटाभावात्मकघटस्यैव तत्राभावरूपत्वं भवतीति । प्रकृतेच प्रतीयमानायामपि संविदिज्ञानमनित्यं नवेति संशयादिदर्शनात्, नतदभावरूपत्वमर्थात्, अनित्यत्वाभावनित्यत्वं तस्याःसंविदो भवति । किन्तु सर्वकालसम्वधित्वसर्वदेशसंवन्धित्वादिविरोधिधर्मान्तरलक्षणमेव नित्यत्वादितस्या भवतीति । [यथाघटवद् भूतलमितिज्ञानेघटाभाववद् भूतलमिति बोधो न भवति, किन्तु घटाभावाभाववद् भूतलमिति प्रतीतिव्यवहारोजायते इति घटाभावाभावो घटरूपोभवति । परन्तु घटभेदाभावो न घटस्वरूपो भवति, किन्तु घटत्वरूपएव अत्यन्ताभावाभावः प्रतियोगिरूपः भेदाभावस्तु प्रतियोगितावच्छेदकरूप एव । अतएव धर्माभावधर्मिभेदयोः समानतेति यथाघटत्वरूपधर्माभावो घटेतरपदार्थेषु, तथाघटभेदश्च स्वप्रतियोगिनं विहायैवतिष्ठतीति धर्मात्यन्ताभावधर्मिभेदौसमानावितिन्यायविदां पन्थाः] संविदिज्ञानेतु विरोधिधर्मवत्त्ववोधनं विनाजडत्वादिनिषेधकत्वं न प्रतिज्ञावाक्यस्य । प्रतिज्ञायाः विरोधिधर्मत्वबोधनेतु ज्ञानस्यसंविदः सधर्मकत्वमेवसिद्ध्यति नतु निधर्मकत्वम् । नच जडत्वविरोधिस्वरूपत्वमेव प्रतिज्ञया बोध्यते संविदोज्ञानस्य, नतु विरोधिधर्मवत्वमिति वाच्यम्, प्रपञ्चमात्रस्यार्थात् सर्वाधिष्ठानरूपायाः संविदोज्ञानस्य सर्वविरोधित्वस्यासिद्धेः । अर्थात् योहियस्याधारः तस्य तद्विरोधित्वाभावात् । यथायोदेशो घटस्याधारः सदेशो घटादेराधेयस्य विरोधि नभवतीति । यदाधार एव न भवेत्तदा तस्मिन् तस्यावस्थानमेव न स्यात् । नाह भवति वन्हि विरोधिजले वन्हेरवस्थानमपिंतु तस्य वन्हेस्तत्र जलेविलय एव भवति । एवमत्र प्रकृते सर्वपदार्थस्याधिष्ठानभूतसंविदोज्ञानस्य स्वकीयाधेयेन सह विरोधित्वमशक्यमेव, अतः सर्वाधिष्ठानसंविदोज्ञानस्य सर्वविरोधित्वं सर्वथैवासिद्धमिति । नच शुद्धया संवित् सैवसर्वाधिष्ठानम् । तदुक्तम् "आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला । पूर्वसिद्धतमसोहि पश्चिमो नाश्रयोभवति नापि गोचरः" इति । [अयमर्थः—यत् चैतन्यं सर्वविभागरहितम्; तदेवतादृशम ज्ञानस्याश्रयरूपं विषयरूपं च भवति, सर्वाधिष्ठानं मायायास्तज्जनितकार्यस्य चाधिष्ठानम् । किन्तु, पश्चिमोविद्यान्तरकालेऽज्ञानेनजायमानो जीवादिःतत्पूर्वसिद्धमायायाआश्रयो विषयो वा न भवति, कार्यस्यकारणाश्रयत्वतद्विषयत्वाभावात् "मायाख्यायाःकामधेनोर्हिवत्सौ जीवेश्वरावुभौ । यथेच्छं पिवतां द्वैतं तत्त्वंत्वद्वैतमेवहि" मायाच विद्याच स्वयमेवभवति । अर्थात् सर्वस्यवस्तुजातस्य कारणमज्ञानम् तस्याज्ञानस्याश्रयो विषयश्चशुद्धं चैतन्यं ब्रह्मचैतन्यमेव । अज्ञानजनितश्चजीवोन तस्या मायायाः कारणम् । ततश्च शुद्धमेव चैतन्यमधिष्ठानम् तस्यैवजडत्वादिधर्मविरोधित्वमितिवाच्यम्, एतादृशसंविदोज्ञानस्य सर्वविशेषधर्मविरोधित्वे स्वीकृते यथा जडत्वादिप्रत्यनीकताऽर्थात् विरोधित्वात्, शुद्धरूपायाः संविदोजडत्वादिप्रत्यनीकतापि स्यात्, तथा च जडाजडविलक्षण-

प्रकारकधर्माभावे निषेधकथनं कथनमात्रमेव भवेत् । चेत्यमप्यज्ञानमात्मनि विद्यतेतदिष्टं भवताम् । अपिचास्य षष्ठीविभक्त्या ज्ञानस्य सम्बन्धं कथयित्वा यदि तस्या अनुभूतेर्निर्धर्मकत्वं प्रतिज्ञायते तदा माता वन्ध्येति वद् विरुद्धतैव भवतीति ।

त्वमेव भवेत्, अर्थात् जडविरोधित्वे जडविलणत्वम्, अजडत्वप्रकाशविरोधित्वेऽजडवैलक्षण्यत्वमापतेत् । नचैतद्युक्तम् यथा घटादिविरोधित्वेऽघटवत्वम्, अघटविरोधिघटत्वं भवतिं । नतूभयविलक्षणत्वम् परस्परविरोधेहि न प्रकारान्तरस्थितिरिति नियमात् । तथाप्युभयविलक्षणत्वेऽनिर्वचनीयतैवापतेत् । तस्यच प्रमाणागम्यत्वेन वन्ध्यापुत्रवदसत्वमेवेति ।

ननु संविदि, अजडत्वाद्यभावस्य विद्यमानत्वे न सा संविद्जडाऽपितु अजडत्वनित्यत्वसर्वगतत्वादिरूपैवसेचिचेत्, न तथा सति अजडत्वाद्यभावेपिं यदि साऽजडैवतथा सतिसर्वधर्मत्वाभावेपि सर्वधर्मस्वरूपैव सा संविदित्यस्यापि वक्तुं शक्यत्वात् । ततश्च न संविदिसर्वधर्मप्रतिषेधो वक्तुं शक्ष्यंति । किञ्च "अहंसुखीज्ञानी" इत्यादि प्रत्यक्षेण, ज्ञानं स धर्मकं पदार्थत्वात् घटादिवदित्यनुमानेन, "यःसर्वज्ञःससर्पवित्, ज्ञाज्ञौद्वावजावीशौ" इत्यादिश्रुत्या "अजोपिसन्नव्ययात्मा भूतानामीश्वरोपि सन् । प्रकृतिं स्वामधिष्ठायसंभवाम्यात्म मायया" इत्यादिंस्मृतिप्रमाणादिंप्रमाणेनेतिहासपुराद्युपबृंहितेन संविदः सधर्मकत्वमेव सिद्ध्यतीति । यद्यप्यनेके आचार्याः स्वस्वबुद्धिविभवेनवचनाभासंतर्काभासानवलंव्य येनकेनापि प्रकारेण स्वस्वसम्प्रदायावष्टंभेन निर्विशेषवादंसंस्थापयन्तो दृश्यन्ते तथापि तेषां साहस मात्रं नतु युक्तितर्कोपबृंहितं किन्तु स्वबुद्धिप्रभवमितिदिक् । ननु भेदादिधर्मपक्षंकचित्संवन्धित्वाभावानुमाने, भेदादिकोधर्मश्चित्संवन्धित्वाभाववानित्यनुमाने व्यभिचारं दर्शयितुमाह **चेत्यमप्यज्ञानमात्मनिविद्यते** इत्यादि तत्रचेत्यम्=अनुभवयोग्यमनुभाव्यमित्यर्थः । आत्मनि=चिन्मात्रे आत्मनि—अर्थात्—अनुभाव्यमनुभवविषयभूतम् । न जानामीतिप्रतीतिसाक्षिकमज्ञानं भवन्मते आत्मन्येव तिष्ठतीति भवतां मतम् । आत्मन एवाज्ञानमिति । ततश्च हेतोः तत्र सत्वेन तत्रसाध्यस्यत्वयन्त्रासत्वादभवत्येव व्यभिचारदोष इति । किञ्च चितो धर्मत्वाभावसाधकमनुमानं न युक्तम्, प्रतियोग्यप्रसिद्धेः । अर्थात्, अस्या अनुभूते निधर्मत्वं साध्यते, तत्रानुभूतेरितिं षष्ठीविभक्या, अनुभूतेः संवन्धं कथयित्वा, तदनन्तरं तस्य संवन्धस्य निषेधे क्रियमाणे "मे माता वन्ध्येतिवद् भवति, यथा मे मातेति कथने पुत्रस्यमात्रासह संवन्धः सिद्ध इति पुनर्वन्ध्येति कथनं व्याहतार्थकं वचनं भवति । तथैव प्रकृते "अस्या अनुभूतेरित्यनेनानुभूतितदीय धर्मयोः संवन्धः सिद्धः । पुनश्चानुभूतेधर्मोनास्तीति कथनं विरुद्धार्थकमेव भवतीति ।

तस्मात् संविदोज्ञानस्य सिद्धिः प्रकाशोऽभ्युयगम्यते नवा ? तत्रयदि सम्विदः सिद्धिप्रकाशो विद्यत इतिं प्रथमः पक्षः स्वीक्रियते, तदासंविदः प्रकाशरूपधर्मेण सधर्मवत्वमापद्येत संवित् स्वप्रकाशात्मकधर्मवती, पदार्थत्वात् घटादिवत्, यत्रयत्रपदार्थत्वं तत्रतत्रधर्मवत्वं भवत्येव, घटादौ

अथ संवित् सिद्धिरूपैवेति । तदा कस्येयमिति चेत् न कस्यापीयं संविदिति चेत् तदा संवित्त्वमेव न स्यात् । सप्रतियोगिकत्वात्, पितृकलत्रादिशब्दवत् । न चात्मन इयं संविदिति वाच्यम् षष्ठ्यर्थानिरूपणात् । एवं च गगनकुसुमतुल्यैतादृशानुभूतौ वेदान्ततात्पर्यकथनं तद्विनाशार्थमेवेति ।

पदार्थत्वे सति तत्र घटत्वादिधर्मवत्त्वं भवत्येवेत्यन्वय्यनुमानम् । यत्र चधर्मवत्त्वं नास्ति तत्र पदार्थत्वमपि न भवति यथाकूर्मरोमादिकम् । नच "एषवन्ध्यासुतो याति खपुष्पकृतशेखरः । कूर्मक्षीरचयेस्नातः शशशृङ्गधनुर्धरः" इत्यादिप्रतीत्या, तेषामपि ज्ञानविषयत्वमस्त्येवेति वाच्यम्, अत्र ज्ञानविषयत्वमित्यनेन प्रत्यक्षज्ञानविषयत्वस्यविवक्षणात् । अयोग्यविषयादौ परोक्षज्ञानविषयत्वेऽपिप्रत्यक्षज्ञानविषयतायां असत्वादिति । "यदि संविदः सिद्धिर्नाभ्युपेयते" इति द्वितीयः पक्ष आद्रियेत तदा संविदः प्रकाशानभ्युपगमेशशविषाणादितुल्यत्वमेवस्यात् । यथाखपुष्पादीनां प्रकाशाभावेतुच्छत्वं तथैव संविदोपि प्रकाशानाश्रयत्वेन तुच्छत्वस्यापरिहार्यत्वमेवस्यात् । तस्मात्संविदः सिद्धिः प्रकाशेस्वीकृते तादृशधर्मेणसधर्मत्वमेव, अनभ्युपगमे शशविषाणादितुल्यत्वं स्यादतः संविदः सिद्धिर्वक्तव्यैव, तदभावेऽपदार्थत्वमेव संविदो भवेदिति संविज्ज्ञानं सधर्मकमेव न निर्धर्मकमिति संक्षेपः ।

सर्वधर्मरहितं ज्ञानमिति पक्षमतीतप्रकरणेननिराकृत्यसधर्मकत्वमेव संविदो नतु निर्धर्मकत्वं तस्या इति गतप्रकरणे सिद्धान्तिना स्थापितम् । तत्र पुनः पूर्वपक्षवादी, मृताखोर्गोमयाघ्राणेनपुनर्जीवितुमिति प्रत्यवतिष्ठते **अथसंवित् सिद्धिरूपैवेतीति** । अर्थात् येयं संवित्ज्ञानंसासिद्धिरूपैव भवति, नतु प्रकाशस्याश्रयरूपा, किन्तु प्रकाशस्वरूप एतावता न सिद्धेस्तुच्छत्वन्ध्यापुत्रादितुल्यत्वं नवा सधर्मकत्वमित्यक्षरार्थः । तदेतन्मतमाक्षेप्तुमाह, **तदा कस्येयमिति चेदिति** । यदीयं संविद् न प्रकाशधर्मिका किन्तु प्रकाशरूपैव तदेयं कस्य । यथा गृहमिति कथने गृहादेः सापेक्षत्वात्, देवदत्तादेः प्रतियोगिन अपेक्षा भवति, तथैव प्रकृते संवित् शब्दस्य सापेक्षत्वे प्रतियोगिनोऽपेक्षानियमतोभवत्येव कस्यसंवन्धिज्ञानमित्याकांक्षा ।

इत्युपश्रुत्योत्तरयति पूर्वपक्षवादी **न कस्यापीति** अर्थात् संवित्पदवाच्यं न कस्यापि संवन्धि भवति स्वतन्त्रत्वादित्यर्थः । सिद्धान्ती उत्तरयति=**तदासंवित्त्वमेव न स्यादिति** । अर्थात् यदि संवित् न कस्यापि संवित् स्यात्, तदा तस्या सत्वमेव न स्यात् प्रतियोगिसापेक्षत्वात् । यथा "पुत्र" इति कथने नियमेनः पितुरपेक्षा भवति, यतस्तदुभयोर्नित्यसापेक्षत्वात् । तथैव ज्ञानमिति कथने किं विषयकं कस्य संविदिति नियमत आकांक्षा जायते एव । कर्मणः कर्तुश्चाभावे तदुभयनियतस्यज्ञानत्वमेव न स्यात् । तस्मात् न कस्यचित्संविदिति कथनं सर्वदैवाशोभनमिति पुनः पूर्वपक्षवादी कथयति **आत्मन** इत्यादि अर्थात् ज्ञानमिदमात्मन संवन्धि आत्मन संवन्धितदिति । उत्तरयति **षष्ठ्यर्थानिरूपणादिति** अयमर्थः आत्मानुयोगिकात्मप्रतियोगिकसंविदः सिद्धि-

अचि च ज्ञानस्यनित्यत्वेपि अनित्यतापक्षवदेव प्रत्त्यभिज्ञानाऽनुपपत्तिरपरिहार्यैव । साचानुभूतिरनुभवकर्तारमात्मानं पूर्वापरकालावस्थायिनमाक्षिपति "अहमिदमन्वभुवमिति । भवन्मतेऽनुभूतिस्त्वनुभूतिरेव । न च सानुभूतिरनुभूतिं प्रति कर्त्रीकर्म वा संभवति ।

रित्यर्थः । आत्मन इत्यत्रात्मशद्बः स्वरूपवाचक एव । एवं स्वीक्रियमाणे संविदः सधर्मत्वमेवायातमिति स एव घट्टकुटीप्रभातवृत्तान्त आपततिं । अर्थात् , यथा कलत्रंप्रतिपत्युः पतित्वमिव, आत्मप्रतियोगिकःप्रकाशो धर्म एव संविदात्मनः सिद्ध्यत्येवेत्यर्थः । किंच यत्र षष्ठी विभक्तिर्भवति तत्र प्रतियोग्यनुयोगिनोभेदो नियतो भवत्येव संवन्धोहि भेदे सत्येवजायते नत्वभेदे यथा "देवदत्तस्य कंवलः" इत्यत्र देवदत्तकंवलयोभेदेनैव प्रतिभासनात् । नत्वभेदे भवति षष्ठी=देवदत्तस्य=देवदत्त इत्यादिं प्रयोगादर्शनात् । प्रथमयैवाभेदप्रतिपादनात् "नीलोघटोदेवदत्तो दण्डीत्यादिप्रयोगात् । तस्मात् षष्ठी प्रथमयोर्विकल्पस्यासाधुत्वेनवैकल्पिकप्रयोगाभावात् । भेदे षष्ठी प्रथमात्वभेद एवेति । तस्मादात्मन इत्यत्र षष्ठीदर्शनेन स्वरूपवाचकात्मनः प्रकाशोधर्म एवेति सधर्मिकसंविदिति सिद्ध्यतीति । नच "राहोः शिरः" इत्यत्र प्रतिवाचकराहोरनुयोगिभूतशिरसोर्भेदाभावेप्यभेदे एव षष्ठी तथैवेहापीतिवाच्यम्, सतिनिर्वाहेऽभेदे षष्ठीविभक्तेरसाधुत्वात् । व्यधिकरणे एव षष्ठी, सामानाधिकरण्ये षष्ठेः प्रयोगाभावात् । राहोःशिर इत्यादावयवावयविनोः कथंचिद्भेदमादायतथा प्रयोगस्य संभवात् । अत एवानन्यगतिकोयं प्रयोग इति वैयाकरणा वदन्ति । एवंच यथापितरं प्रतिपुत्रस्य पुत्रत्वं तथैवात्मप्रतियोगिकः प्रकाशाख्यो धर्मः संवित्स्वरूपात्मनः सिध्यत्येवेति। ततश्च यथावर्णितप्रकारेण संविदोज्ञानस्य निर्विशेषत्वं निराकृत्य, निर्विशेषसंविदि ये वेदान्तशास्त्रस्यतात्पर्थं वर्णयन्ति ते वस्तुतवेदान्तशास्त्रस्य प्रमाण्येकुठाराघातमेव कुर्वाणास्तेभ्योस्तिलाञ्जलिमेववितीर्यन्ति । अर्थात् वेदान्तस्य प्रमाण्यमेवमुपघ्नन्तीति वेदप्रमाण्यवादिनो गोष्ठीतोदूरमुत्सारणीयाः । विशेषविचारस्तु स्थलान्तरे द्रष्टव्यविस्तरभयादत्रविरम्यते ।

अथ विज्ञानात्मवादिनौद्वौबौद्धशंकरानुपायिनौ । तत्र प्रथमःक्षणिकविज्ञानात्मवादी । द्वितीयस्तु "सत्यंज्ञानमनन्तम् " "विज्ञानं ब्रह्म" इत्यादिश्रुतिंपुरस्कृत्य नित्यविज्ञानस्यैवात्मतामिच्छतिस्वीकरोति च । तत्राचार्यः स्थिरस्य कस्यचिदात्मनोऽसत्वे प्रत्यभिज्ञादीनामुपपादनं सर्वथैवाशक्यमिति कृत्वा क्षणिकविज्ञानात्मवादं प्रत्याख्यातवान्पूर्वानुभूतस्मरणं स्थिरात्मवादे एव संभवतीतिवदन् तदेवं क्षणिकविज्ञानात्मवादे प्रत्यभिज्ञानाद्यनुपपत्त्या निराकृते नित्यविज्ञानात्त्मवादिमतं पराभवितुं शङ्करमतमुपस्थापयति **अपिच ज्ञानस्य नित्यत्वेपीत्यादि**—नहि ज्ञानस्य नित्यत्वस्वीकारमात्रेण 'अहमिदमन्वभवम् " इत्याकारकं प्रत्यभिज्ञानमुपपन्नं स्यात्, किन्तु ज्ञातुरात्मनो नित्यत्वे सत्येव प्रत्य-

भिज्ञानमुपपादितं भवेत् । प्रतिसन्धानंतुज्ञातारं पूर्वापरकालावस्थायिनमेवोपस्थापयति । भवन्मतेतु ज्ञानंज्ञानमेव नतु ज्ञानं प्रतिज्ञानं कर्तृकर्म वा, एकक्रिया प्रतितस्यैककर्तृत्वं कर्मत्वंवा न संभवति, तथाऽदर्शनाद्विरोधाच्च । क्रियां प्रति स्वातन्त्र्यंकर्तृत्वम् परसमवेतक्रियाजन्यफलशालित्वं च कर्मत्वमिति स्मरणात् । ततश्च कर्तृकर्मणोर्लक्षणभेदेनैकस्यैव कर्तृत्वकर्मत्वयो र्विरोधात् । देवदत्तो देवदत्तं गच्छतीत्यादिप्रयोगादर्शनाच्च ।

अर्थात् ज्ञातुर्नित्यत्वे एव "अहमिदमन्वभवमित्यादेरुपपत्तिर्नतुज्ञाननित्यतामात्रेणेति । यद्यपि सिद्धान्तपक्षेपिज्ञानस्यनानुभववितृत्वं तथापि ज्ञानस्यानुभाव्यत्वं ज्ञानान्तरविषयत्वमिष्यते । अनुभवितुरहमर्थस्यात्मन एव नित्यत्वम्, तावतैव प्रतिसन्धानस्योपपादनात् । मतान्तरेतु स्वयं प्रकाशत्वेन संविदोऽननुभाव्यत्वादनुभवितृत्वाच्च संविदात्मनो यथोक्तप्रतिसन्धानं कथमपि समुपपादितं नैवस्यादित्यर्थः । तथा च यथोक्तप्रतिसन्धानबलेन ज्ञातुरेवात्मत्वं नतुज्ञानमात्रस्यात्मत्वमिति स्थितम्। अपि चात्मनोनित्यज्ञानरूपत्वमिष्येत, तदाज्ञानसविषयकत्वनियमेन सुषुप्तिकालेपि नित्यज्ञानस्यानु वर्तमानत्वेन सुषुप्तावपि विषयावभासः स्यात् । नचैतत्संभवति तत्कालेज्ञानसामग्र्या अभावात् । तत्र प्रत्यक्षज्ञानकारणविषयेन्द्रियसंयोगाद्यभावान्न चाक्षुषादिज्ञानम्, मनसोपि तदोपरमात् न मानसं ज्ञानमन्यथा सुषुप्तिरेव न भवेत् । नवाऽनुमितिज्ञानम्, तत्कारणव्याप्तिज्ञानादेरभावात् । नोपमितिः सादृश्यज्ञानाभावात्, नवाशाद्बज्ञानं तत्कारणपदज्ञानादेरभावात् । तदेवं न ज्ञाता ज्ञानरूपोऽपितु ज्ञानाधिकरणमेव । सत्यंज्ञानमनन्तमित्यादिश्रुतिस्तु जीवस्यज्ञानरूपतां न दर्शयति किन्तु परमात्मन एव तदात्मकतां दर्शयति । नच " तत्वमसीत्यादि" श्रुत्याजीवात्मनोरेकत्व सिद्धौ परमात्मवत् तस्य जीवस्यापिज्ञानरूपत्वं स्यादेवेति वाच्यम्, ईश्वरत्वजीवत्वरूप विरुद्धधर्माध्यासात् तयोरेकत्वासंभवात् । कश्चित्सुखी कश्चिद्दुःखी कश्चिज़्ज्ञानी कश्चिदज्ञानीतिप्रतीत्या यदा जीवात्मनां परस्परंभेदस्तदा जीवात्मपरमात्मनोरेकत्वस्य दूरापेतत्वात् । नच संसारकालेऽज्ञानवशात् कदाचित्परस्परभेदेपि मोक्षकालेऽज्ञाननाशाज्जीवेश्वरयोरेकत्वंस्यादिति वक्तव्यम्, भेदस्य नित्यत्वेन तन्नाशस्यासंभवात् । कदाचित्तयोर्भेदस्य विनाशेपिव्यक्तिद्वयस्य तदवस्थत्वात् । नवामोक्षदशायांजीवः सर्वदासुखीभवतीति परमात्मवत्, मोक्षकालेजीवस्यदुःखाभावेन सुखित्व प्रत्ययात् " भाराद्यपगमे सुखीसंवृत्तः" इतिवत् । नच ज्ञानादिरूपो जीवोऽपितुज्ञानाधिकरणरूपएव । नवा मोक्षकाले आनन्दरूपःतत्रानन्द इत्यास्यानन्दवानेन, अर्शादित्वान्मत्वर्थीया चूप्रत्ययात्आनन्दमित्यत्राऽनन्द इतिपुंलिङ्गतापत्तेः तदेवं जीवोवा परमात्मावा न ज्ञानरूपोऽपितु, आनन्दवानेव । ततश्चनित्यविज्ञानरूपत्वमात्मनो न युक्तम् । अपितुज्ञानव्यतिरिक्तो ज्ञातैवजीव इति सिद्ध मेतावता नित्यविज्ञानात्मवादोपि निराकृतः । एतस्यैव प्रपञ्चोऽग्रेकरिष्यति ।

। इति मायावाद्यभिमतनित्यविज्ञानात्मवादे तत्त्वदीपः ।

ननु परमार्थतः संवित्मात्र एव पदार्थः स एवात्मा । पारमर्थिके संविन्मात्रेऽधिष्ठानेऽहमर्थस्य ज्ञातुभ्रान्तिवलेनावभासो भवति । यथा पुरोवस्थितशुक्तिकायां रजतावभासो भवतीदंरजतमिति । नहि सत्याधिष्ठानमन्तरेण मिथ्यावस्तुनोऽवभासो भवतीतिचेत्सत्यम् तथा सति अनुभवितुरहमर्थस्यानुभवसमानाधिकरणतयाऽवभासः स्यात्

अस्मिन्नद्वैतमते ज्ञानमात्रमात्मा, तत्रज्ञानस्वरूपे आत्मनि, सत्याधिष्ठानेहमर्थस्य ज्ञातुरध्यासो भवति, तदनन्तरमहंजानामीति ज्ञातृविषयकः भ्रमात्मकःप्रयोगो भवति । यथा पुरोवस्थितभास्वर शुक्तिकादिद्रव्ये सादृश्यादिवलेन रजतस्यारोपो भवति "इदंरजतमिति" तत्रतादात्म्येन रजतधर्मिण एव शुक्तिकायामारोपः रजतत्वधर्मस्यैव वा समवायेन शुक्तिकाधर्मिणिभानं भवति । भ्रमे आरोप्यमाणगतधर्मेणैवाधिष्ठानस्यभानं भवति, इदंरजतमिति प्रत्ययेन रजतत्ववत्तयैव शुक्तिकायाः स्फुरणात् नतु अधिष्ठानगता साधारणधर्मेणाध्यस्तस्यभानम्, सामान्यधर्मेणेदंत्वादिनातुभवत्येव तदुक्तम् "समारोप्यस्यरूपेण विषयो (ऽधिष्ठानम्) रूपवान् भवेत् । विषयस्यतु रूपेण समारोप्यं न रूपवदिति" [अयमर्थः रज्जौसर्पभ्रमेऽयं सर्प इत्येवं रूपेणभासमानरज्जुद्रव्यस्य, समारोप्यसर्पगत सर्पत्वस्यतदसाधारणधर्मस्याधिष्ठाने भानेन तद्वत्तयाऽधिष्ठानरज्जुद्रव्यस्य भानंभवति । परन्तु विषयस्याधिष्ठानस्ययोऽसाधारणोधर्मोरज्जुत्वस्य समारोप्ये सर्पेभानं न भवतिं, यतोरज्जुत्वज्ञानकाले सर्पस्यैवाभावात्, अधिष्ठानस्य सामान्यज्ञानं भ्रमे कारणम्, तदीयं विशेषज्ञानंतुभ्रमस्य वाधकमिति रज़्जुत्वज्ञानकालेयद्यारोप्यमाणसर्पस्यसत्ताभवेत्तदा सर्पे आरोप्येऽधिष्ठाविशेषधर्मस्यभानंभवेन्नवेतिप्रश्नउदीयात् तस्मात् आरोप्यधर्मेणाधिष्ठानभानं भवति, नत्वधिष्ठानगतविशेषधर्मस्यारोपेभानं भवतीति] एवमत्र ज्ञानमात्रं नित्यंपारणार्थिकं तस्मिन् पारमार्थिकानुभूतो, अपारमार्थिकज्ञातृत्वस्य भ्रमोजायते ततश्चाहं जानामीत्याकारकज्ञातृविषयको भ्रम इति भ्रमेणैवाहमर्थस्यभानमिति तदीयंमतंनिराकर्तुं प्रक्रमते **ननु परमार्थतः संविन्मात्र एव पदार्थ** इत्यादि । अत्रज्ञातृत्वप्रतीतिर्भ्रमात्मिकैवेति पराभिमतं प्रथमतोऽनुवदति **नन्वित्यादि** संवित्ज्ञानमात्र एव परमार्थः स एवात्मा, एतादृशसत्याधिष्ठाने ज्ञानेज्ञातुरहमर्थस्य भ्रमोजायते, परमार्थभूत शुक्तिकायां पुरः स्थितायां रजतवदिति । पारमार्थिके वस्तुनि मिथ्याभूतस्यारोप इति नियमेन भ्रमोपपादनार्थमेव संविदोज्ञानस्य पारमार्थिकत्वमवश्यमभ्युपेयम् । नहि निरालंवनेवन्ध्यापुत्रादौकस्यचिद्भ्रम इति । तदेतन्मतंनिराकरोति **इति चेत्सत्यमित्यादि** अयमाशयः यत्रैकस्मिन् धर्मिणि धर्म्यन्तरस्यारोपो भवति, तादृशस्थले आरोप्याधिष्ठानयोरभेदेनार्थात् सामानाधिकरण्येभानं भवति, यथा इदंरजतमिति, अत्रारोप्यस्य रजतशुक्तिकयाऽभेदेनभानं जायते ।

यत्र स्थलविशेषेधर्मिणि धर्ममात्रस्यारोपो भवति, तत्राधिष्ठानाध्यस्तयो विरुद्धविभक्त्यैव निर्देशोभवति नतु तत्र सामानाधिकरण्यप्रतीतिः । यथाशंखेपीतत्वम्, मुखंदर्पणस्थम्, स्फटिके

अहमनुभव इति यथेदंपुरः स्थितसितभास्वरद्रव्यंशंखमुखचन्द्रादेराकारतयेव, रजतपीतदर्पणस्थत्वद्वित्वादिकम् । अत्रतु पृथक् तयाऽवभायमाने एवायमनुभवोऽहमर्थं ज्ञातारमनुभवात् पार्थक्येनैवोपस्थापयति दण्डी देवदत्त 'इतिवत् । ततश्चानुभूतिविशिष्टमस्मदर्थमवभासयन्नहं प्रत्ययः कथं विशेषणीभूतानुमात्रविषयः स्यात् दण्डात्मक विशेषणमात्रेदण्डी देवदत्त इतिवत् ।

आरुण्यं द्वौचन्द्रावित्यादि । प्रकृतेत्वहमनुभूतिरितिभानं न भवति किन्त्वहं ज्ञानवान् जानामि वा, इत्येव प्रयोगोजायते, तस्मात् परमार्थभूतायां संविदि, ज्ञातुरहमर्थस्यारोपो न भवतीत्येवयुक्तमिति । नच कदाचिदहमर्थें एव संविदआरोपोजायतामिति कथनं तु न संभवति, तन्मते सत्यालंवनकारोपस्यैव स्वीकारेण ज्ञातुरहमर्थस्यारोपितत्वेन सत्यत्वेन तस्मिन्नसत्येऽहमर्थेसत्यायाः संविद आरोपा संभवात् ।

अथ यथा "इदंरजतमित्यत्रेदमितिरजतस्य तादात्म्येनाध्यासो भवति, तथैव रजतेऽपि, इदमर्थ शुक्तिकाया आरोपोभवत्येव । आरोपानन्तरम् "इदंरजतं जानामि, रजतमिदंजानामीत्येवं क्रमेणानुव्यवसायस्य संदर्शनात् । तत्र प्रथमे इदं विषयतात्वेनावच्छिन्नं रजतविषयत्वम् तथा द्वितीयेरजत विषयतयाऽवच्छिन्नं रजतविषयत्वं भवति । प्रथमे रजतस्यतदीयतादात्म्यस्यरजतत्वस्य च भानं भवति, द्वितीयेपि, इदमिदंत्वस्यतत्सवन्धस्य च भानं भवति । वाधेजाते रजतत्वतत्तादात्म्यानां वाधोभवति, द्वितीयेतुरजततादात्म्योपहितेदम इदंत्वतत्संसर्गस्य च वाधोजायते, अवशिष्यते च केवलं स्वरूपतोऽधिष्ठानम् । एतादृशोभयमुखतादात्म्यारोपो भवतीति "अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्याहमिदंममेदमितिनैसर्गिको लोकव्यवहारः" इत्यादि, उपोद्घातभाष्यम्, ततश्चपरस्पराध्यासस्य प्रमाणिकतया संविदिज्ञातुरध्यासवत् ज्ञातरि अहमर्थेपि संविदो भविष्यति तत्र न कापिक्षतिस्तन्मतेनेति सत्यम्, यद्युभयत्रोभयाध्यासः सर्वसंमतोभवेत् । तथा सतिवाधोत्तरकालमधिष्ठानस्यापि वाधितत्वेनबौद्धमतवत् निरधिष्ठानकभ्रमस्य स्वीकारापातोभवेत्, तदाप्रच्छन्नवौद्धत्वमपहाय माध्यमिकमतप्रवेशेन स्पष्टतो वौद्धत्वमापतेदिति वेदवाह्येन सहाधिकालोपि वेदवाह्य एवेति ।

एवंचासत्येऽधिष्ठाने आरोपस्यासंमतत्वात्, नाहमर्थेऽसत्ये संविदारोपो युक्तः तथासति, अनुभवसमानाधिकरणतया, ज्ञाताऽहमर्थोऽहमनुभूतिरूप इति प्रतीयात्, परन्तु नैवं भवति किन्तु पृथगेवात्रभासते, दण्डी देवदत्तवत्, अहमनुभवामीति । तत्र पृथगवभासमानत्वं प्रकारतया प्रकारिणौ वैलक्षण्येन भासमानत्वमेव । अहं दण्डवानितिप्रतीतितुल्यत्वमहंजानामीति प्रत्ययस्येत्यहमर्थेज्ञानधर्मवत्त्वावगाहनमेव । किञ्चदण्डवानित्यत्र, यथा विशेषणभूतदण्डमात्रस्य सत्यत्वं तस्मिन् सत्येदण्डमात्रे विशेषणे पुरुषादेरारोपितत्वं न भवति किन्तूभयोः सत्यत्वे एव दण्डीपुरुष इति प्रत्ययो

ननुज्ञातृत्वमनुभूतावध्यस्तमिति कस्माज्ज्ञायते ? नचदेहात्मभ्रमवतां स्थूलोहं कृशोऽहमिति प्रतिभासनादितिचेत्, तदाऽत्मतयाभिमतानुभूतिरपि भ्रमवत एव प्रतिभासते इत्यनुभूतिरपितथास्यात् । नच तत्वज्ञानादनन्तरमपि संविदोऽनुवर्तनान्नानुभूतिरध्यस्तेतिवांच्यम्, तदाकिम् ? अयमात्मामोक्षकालेवोद्धा न भवति । ततश्चैतादृशातत्ववेदित्वापेक्षया भ्रमादिज्ञातृत्वस्यैवेष्टत्वात् ।

युक्तिसिद्धस्तथैव "अहं जानामिं" इत्यत्रापि न संविदो ज्ञानमात्रस्य विशेषणतयाऽवभासमानस्यसत्यत्वं ज्ञातुरहमर्थस्यारोपितत्वेन शुक्तौरजतं वा मिथ्यात्वंवक्तुंयुक्तम्, अपितु सर्वानुभव साक्षिकाहमर्थस्य ज्ञातुः सत्यत्वस्वीकार एव युक्तः यतोज्ञातुरहमर्थस्य त्रिकालेपि वाधानुपलब्धेः । वाधित एवार्थोमिथ्या भवति । यथाशुक्तौ रजमभ्रमानन्तरंनेदं रजतमितिवाधेजाते एव तादृशरजतेमिथ्यात्वमवसीयते नतुशुक्तिका रूपाधिष्ठानस्य वाधोभवतिवाधोत्तत्तरकालेपि तस्य यथापूर्वमवभासनात् । तथैव कदापि ज्ञातुरहमर्थस्य वाधोनोपलभ्यते, तथा सति अहमस्मिनवेति संशयः नाहमस्मीति वा विपर्ययो भवति । तस्माज्ज्ञातुरहमर्थस्यत्रिकालेवाधादर्शनान्न मिथ्यात्वमपिंतु सत्यत्वमेव । नचाज्ञानमूलकसंसारस्य तत्वज्ञानोत्तरकालेवाधात् कारणाभावेनाज्ञानकार्यभूतसंसारान्तर्गतज्ञातुरपिभाविकालिकवाधेन वाधितत्वान्मिथ्यात्वमितिवाच्यम्, ज़डचेतनात्मकसंसारस्य परमेश्वरशरीरतया, सूक्ष्मजडचेतनस्य प्रवाहनित्यत्वेन वाधस्य वक्तुमशक्यत्वात्, तस्मान्न ज्ञातुरहमर्थस्य कदाचिदपि वाधोभवतीति स्थितम् । अपि च श्रुतिस्मृत्यादिप्रमाणेनज्ञातुर्नित्यत्वमेव नतु वाधितत्वंमिथ्यात्वमिति "ज्ञाज्ञौद्वौ" इत्यादि नाप्रपञ्चितमितिसंक्षेपः ।

यथाशुक्तौ रजतमध्यस्तमध्यस्तत्वाच्च रजतंमिथ्यैव नतुसत्यम्, तथैवसंविदिज्ञाताऽहमर्थोऽध्यस्त एव, ततश्चाध्यस्तत्वान् मिथ्यैव नतुसत्य इत्यादिगतपूर्वप्रकरणे कथितम्, तस्य च यथामति निरासोपिकृतः । संप्रतिज्ञातुरहमर्थस्य मिथ्यात्वं न संभवतीति विस्तरेण प्रतिपादयितुमुपक्रमते **ननुज्ञातृत्वमनुभूतावध्यस्त**मित्यादि शुक्तिरजतवत् संविदिज्ञातुरहमर्थस्याध्यासे किं प्रमाणम्, प्रमाणभावाज्ज्ञातुरध्यासो न कथमपिसिद्ध्यतीति प्रष्टुरभिप्रायः ।

पूर्वपक्षीस्वाभिप्रायं प्रस्तौति **देहात्मभ्रमवतामित्यादि** अर्थात् यथा स्थूलोहंकृशोहमिति प्रतीति प्रसञ्जितंदेहधर्मः स्थूलत्वादिकमात्मधर्मों न भवति किन्तु देहस्यैव स इत्यात्मनि देहात्मभ्रमवतामेव भवति, तथैवेहापिज्ञातृत्वमपि भ्रान्तमेवसंविदीति । यतोभ्रान्तैर्गृह्यमाणत्वात्, ज्ञातृत्वमप्यध्यस्तमेवेति भावः । स्थूलोहमित्यादिकंतु न साधकमध्यस्तत्वेवाधितत्वात्, इतिप्रतिवन्दीमाह **तदात्मतयेत्यादि** देहात्मभ्रमवता गृहीतस्यसंविज्ज्ञानस्यात्राध्यत्वान्नमिथ्यात्वंतत्राह **नच तत्व ज्ञानानन्तरमित्यादि** तुल्यमिदं पक्षान्तरेपितत्राह—**किमयमात्मा** इत्यादि, तत्वज्ञानजनित

ननुज्ञातृत्वंज्ञानक्रियांप्रतिकर्तृत्वं तच्चविकारात्मकंजडमहङ्कारग्रन्थिस्थम् । तादृश ज्ञानकर्त्रासंपाद्यमानयागादिककर्मणः सुखदुःखात्मकशुभाशुभफलस्य वस्तुतोऽकर्ता सर्वविक्रियारहितः साक्षीशुद्धःप्रकाशमात्र आत्मैव । यदिकर्तृत्वमात्मनोभवेत्तदाऽहंप्रत्यय विषयत्वेपि, शरीरेन्द्रियप्राणादिवदेवानात्मत्वजड़त्वपराक्रत्वमनिवार्यमेवापतेत् । लोकेपि दृश्यते लौलिकपारलौकिकयागादिक्रियासुकर्तृत्वेन प्रसिद्धशरीरादितस्तादृश

इत्यादि, तत्वज्ञानजनित मोक्षात्मकफलसमयेपिज्ञातृत्वमबाधितत्वाद्विद्यते एव संविद्रूदेवेति । दुःखनिवृत्तिमात्रेणैव यदिमोक्षस्यपुरुषार्थत्वमिष्येत, तदाऽनन्दानुभवनिवृत्या तथाऽनुभवितुरहमर्थस्य च निवृत्त्याच मोक्षस्य पुरुषार्थता न स्यात् । एवं चाहमर्थस्याध्यस्तत्वस्वीकारे महदनिष्टमापतेदद्वैतवादिन इति । ननु मोक्षसमये यदि ज्ञातृत्वमात्मनो निवर्तेत तदामोक्षस्यपुरुषार्थता न स्यादित्युपश्रुत्याद्वैतवादी प्रश्नयति, ज्ञातृत्वं नात्मधर्मोऽपित्वनात्मधर्म इति ज्ञातृत्वनिवृत्तौ मोक्षे पुंमर्थत्वाभावात्मकदोषो न भवति, न ह्यनिष्ठगुणस्य दोषस्य वा निवृत्तौ तदन्यस्मिन् कश्चिद्दोषो वा गुणोभवति । नहिघटनिष्ठघटत्वस्यनिवृत्तौ पटोऽपटोभवति, तस्मादात्मातिरिक्तनिष्ठज्ञातृत्वनिवृत्तौमोक्षस्यापुरुषार्थतेत्याशंकामुपपादयितुमाह **ननु ज्ञातृत्वमित्यादि** अर्थादद्वैतीपुनः शङ्कते **ननुज्ञातृत्वमिति** तदेवोपपादयति **ज्ञानक्रियां प्रतिकर्तृत्वमित्यादि** ज्ञातृत्वंज्ञानक्रियां प्रतिकर्तृत्वंतच्चविकारि, उत्पत्तिस्थित्यादिषड्भावविकारवत्त्वात् । जडात्मकोऽहंकारात्मकग्रन्थि मध्येस्थितश्च । सचज्ञाताऽहमर्थःक्रियया यागादिकया संपाद्यमानशुभाशुभस्यफलस्य भोक्ता न भवति, किन्तु तादृशफलस्यभोक्ता सभवति यश्चनविक्रियात्मकः सर्वस्य कार्यजातस्यसाक्षीसाक्षाद्द्रष्टाज्ञानात्मकप्रकाशरूपः समुख्यआत्मा । कर्तृत्वादिकं दृश्यत्वात्, नात्मधर्मः यथाघटादयोभावादृश्यत्वान्नात्मधर्मास्तथा ज्ञातृत्वादिकमपि दृश्यत्वान्नात्मधर्माः ।

तत्राहङ्कारोऽन्तःकरणम्, तदेवभेत्तुमशक्यत्वाद् ग्रन्थिपदवाच्यम् । तस्मिन्नेव वर्तमानं ज्ञातृत्वं ज्ञानात्मना परिणामात्मकं विक्रियात्मकं जडपदार्थस्य विकारत्वाज्जडात्मकं च, यथा मृद्विकारोघटोमार्दवः कथ्यते नो सौवर्णः । आत्मनः स्वरूपं दर्शितम्, "तत्फलभुगित्यादि" कर्तृत्वस्यफलभोक्ता विकाररहितत्वादकर्ताः प्रकाशमात्रस्वरूपतया साक्षी च भवत्ययमात्मेति । कर्तृत्वन्त्वात्मनोऽहं प्रत्ययविशरिरेन्द्रियादिवन्नात्मत्वं किन्तु परार्थत्वादिप्रसङ्ग इति । आत्मा न कर्ता भवति नाप्यहमर्थोपि भवति आत्मत्वात्, अनन्यार्थत्वात्, अजडत्वात्स्वप्रकाशत्वाद्वा तथाऽविक्रियत्वात्, यन्नैवं यथाशरीरेन्द्रिय प्राणा इतिव्यतिरेक्यनुमानान्येव प्रमाणानि । ननु यः कार्यं करोति स एव तत्फलस्य भोक्ता भवतीति कर्तृत्वभोक्तृत्वयोः सर्वत्रसामानाधिकरण्यदर्शनात् । नहि भवति करोति, अन्यःफलभोक्ता च तदन्य इत्याशङ्कायामाह **दृश्यते च लोके** इत्यादि, लौकिकपारलौकिकयागादिक्रियायांज्ञातृभिन्नस्यप्रकाशमात्रस्वरूपस्यकस्यचिदात्मनोऽनुपलंभात् । तदेवमनुपलंभबाधं प्रदर्श्य, प्रत्यक्-

कर्मफलभोक्तृप्रमातुरहंप्रत्ययविषयिनःपार्थक्यमेव । तथैव प्रकृतेज्ञातुरहमर्थाद्विलक्षण एव साक्षीसचैव प्रत्यगात्मेति चेत्सत्यम् ।

अहं जानामीत्यवाधितसर्वलोकसाक्षिकप्रतीत्यासिद्धप्रत्यगात्मभिन्नस्य प्रकाशमात्रस्वरूपस्य साक्षिण आत्मनः प्रमाणेनानुपलंभात् । शरीरेन्द्रियप्राणादिभ्यो ज्ञानाधिकरणतया विविच्यमानेऽहमर्थे प्रतीपमञ्चतीवनिर्भासमानोऽहंभाव एव हि प्रमातुः प्रत्यक्त्वंनामेति । एतादृशप्रमातुरेवसाक्षित्वमपि साक्षाज्ज्ञातृत्वादेव भवति । जानान एव साक्षीभवति, नत्वजानन् साक्षीलोकेपि तथा दर्शनात् । सर्वं प्रकाशमानमेवप्रमात्रे प्रकाशते।

त्ववलेनैवाहमर्थस्यैवात्मत्वं स्वीकर्तव्यमिति । **शरीरेन्द्रियप्राणेत्यादि** आत्मधर्मज्ञानस्यशरीरादावसंभवात् देहादिवैलक्षण्यं पार्थकम् प्रायः पूर्वमेवप्रसाधितमात्मनः । तज्ज्ञातृत्वमात्मन एव नान्यस्य, यदि शरीरादिश्चेदहंकारविषयोभवेत् । तत्राहंकारस्तु शरीरादावाभिमानिक एव । तदहं भावस्य शरीरादिगतेदंभावतः प्रतीपत्वं विरुद्धत्वम् । प्रतीपमञ्चतीति प्रत्यक्सचाहङ्कारविषयः । तत्प्रत्यक्त्वादहंत्वमात्मन एवापततीति । देहादेदृश्यादिदंकारगोचरात् द्रष्टर्यात्मनि प्रतपं विरुद्धमार्गं गच्छतीवेत्युत्प्रेक्षा । **साक्षित्वमपीति** । साक्षाद्रष्टरि संज्ञायामित्यनुशासनादेवेतिभावः । यदिदंज्ञेयं ज्ञान विषयभूतं वस्तुतत्सर्वमपिज्ञात्र्यात्मन एव भासते, नतु ज्ञानमात्रात्मने प्रकाशते । ततश्च ज्ञातुरेवाहमर्थस्यैवात्मत्वं न ज्ञानमात्रस्येत्यत्राह **सर्वमित्यादि** । एतस्य चतुर्थ्यन्तप्रकाशते इत्यनेन संवन्धः । ततश्च केवलस्यज्ञानस्य साक्षित्वं न संभवति किन्तुज्ञातुरेव साक्षित्वमिति तस्यैव ज्ञातुरहमर्थस्यात्मत्वं नतु ज्ञानमात्रस्येत्यभिप्रायः । यत्तुपूर्वमुक्तं ज्ञातुरात्मत्ववत्वेज्ञातृत्वस्य विक्रयात्मकत्वेनानित्यत्व प्रसङ्गेन यागादिप्रतिपादकं विधिवाक्यस्य, तथा “अजोनित्यःशाश्वतः” इत्यादि, श्रुतिस्मृति विरोधः स्यादतोनात्माज्ञातृरूपः किन्तु सर्वथाऽविकारीति । तन्नयुक्तम् नहिपञ्चविंशतितत्वप्रतिपादकसांख्यमतवत् ज्ञानपरिणामित्वं स्वीक्रियतेवेदरहस्यज्ञातृभिः । किन्तु अर्थप्रकाशनानुकूल व्यापारवद् धर्मज्ञानाश्रयत्वमेवज्ञातृत्वम् । सविषयकधात्वर्थयोगेकर्तृत्वस्याश्रयत्वरूपताया एव स्वीकारात् । यथा सविषयकधातुयोगे कर्मत्वस्य विषयत्वरूपवदिति ।

यदपि कथितम् , यागादिक्रिया कर्तुर्देहादय एव कश्चित्परलोकगामीभोक्ता भवतीति कर्तृभिन्नस्यैव भोक्तृत्वमिति । तदपि न मनोरमम्, हानोपादानादिशारीरकक्रियाकारणज्ञानेच्छापूर्वकाभ्यन्तरप्रयत्नाश्रयत्वरूपमुख्यकर्तृत्वस्यात्मन्येव समुपपत्तिसंभवात् । शास्त्रप्रयोक्तरि “कर्ताशास्त्रार्थवत्वात्” इतिवेदादिशास्त्राभिप्रायाभिज्ञाः श्रीसंप्रदायाचार्याः श्रीव्यासमहर्षयः कथयन्ति । तथैवानन्दभाष्यकाराअपितद्व्याख्याने—“तस्माज्जीवः कर्त्तैव तथाचश्रुतिः‘ एषहिद्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मापुरुषः’ (प्र·४।९) इति स्पष्टमेवकर्तृत्त्वमभिधत्ते” इति । यदपिपूर्वं कथितं कर्तृत्वादिर्नात्मधर्मोदृश्यत्वात्, यद्दृश्यं दृशिक्रियया: कर्मरूपमर्थात् ज्ञानविषयीभूतंयत्तन्नात्मधर्मो भवति, यथा प्रपञ्चः।

तस्मात् प्रमातृभिन्नोनाम न कश्चित्साक्षी, अपितु स एव साक्षीति ।

अर्थात् यथाघटादिकपदार्थोंक्षानविषयतया आत्मधर्मो न भवति, तथैव कर्तृत्वमपि ज्ञानविषयत्वादात्मधर्मों न भवति, किन्तु विकारास्पदस्यकस्यचिदहमर्थादेरेव धर्मोंभवतीति तदपि मन्दमेव, विकल्पासहत्वात् । फलव्याप्यत्वं दृश्यत्वंवृत्तिव्याप्यत्वरूपंवा ? तत्रनाद्य: पक्ष:धर्माधर्मादीनामतीन्द्रियाणां फलव्याप्यत्वाभावेनतेषुलक्षणस्यासत्वेनाव्याप्तिप्रसङ्गात् , उद्देश्यतावच्छेदकाव्यापकत्वेन सर्वपक्षेसाध्यासाधकत्वात् । नचयोगिप्रत्यक्षगम्यत्वाद्धर्मादिष्वपिं दृश्यत्वमस्त्येवेतिवाच्यम् , तयोः शास्त्रैकप्रमाणगम्यत्वात् , न चैतावता सर्वदर्शित्वाभावोयोगिनाम् , सर्वद्रष्टृत्वपदेन सर्वयोग्यद्रष्टृत्वस्यैव विवक्षितत्वात् , नत्वयोग्यसर्वद्रष्टृत्वं विवक्षितम् , यथाऽस्मदादिप्रत्यक्षे दूरत्वविप्रकृष्टत्वयोः प्रतिबन्धकत्वं न तथा योगिप्रत्यक्षे वाधकत्वम् । नैतावता चाक्षुषवस्तुनः श्रोत्रादि ग्राह्यत्वं भवति योगिनाम् । यथोक्तम् "यत्राप्यतिशयो दृष्टः सत्वार्थानतिलंघनात् । दूरसूक्ष्मादि दृष्टौस्यान्नरूपेश्रोत्रवृत्तिता" इति । यथाऽस्मादि प्रत्येक्षेविप्रकृष्टत्वं सूक्ष्मत्वंवाध नतथा जनकत्वंयोगिप्रत्यक्षेवाधकम्, नतुचाक्षुषंवस्तुश्रोत्रादिनागृहीतं भवति तेषामिति । नवावृत्तिव्याप्यत्वं दृश्यत्वमिति द्वितीयः पक्षोपि समीचीनः ब्रह्मणः फलव्याप्यत्वाभावेपि वृत्तिव्याप्यत्वस्य स्वीकारेण तत्रापि दृश्यत्वहेतोर्विद्यमानतया ब्रह्मणोपिमिथ्यात्वप्रसङ्गात् , ब्रह्मगताज्ञानविनाशाय वृत्तिव्याप्यत्वस्वीकारात् । तदुक्तम् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारिमम् । ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ।" इति भवदाचार्येण । तस्माद्दृश्यत्वहेतुना कर्तृत्वस्यानात्मधर्मत्वं न संभवति ।

अथवा यदि दृश्यत्वं वाह्येन्द्रियग्राह्यत्वरूपम्, तदाऽन्तरप्रयत्नाधारत्वलक्षणकर्तृत्वपक्षे हेत्वसिद्धिः । अर्थात् प्रयत्नाधारत्वलक्षणकर्तृत्वं पक्षे नास्तीति नस्यानात्मधर्मत्वसाधने उपयोगः । यदिज्ञान विषत्वमात्रं दृश्यत्वंतदा, एतादृशहेतोर्दृश्यत्वस्याप्रयोजकत्वं व्यभिचारशङ्कानिवारकानुकूलतर्कराहित्यमेवेति । तस्मान्न दृश्यत्वं साध्यसाधकमिति । यदपिकर्तृत्वादौ अनात्मत्वाद्यापादनं कृतम् , तदपिभ्रममूलकमेव, मुख्यकर्तृत्वस्यैव अनात्मत्वं व्याप्यत्वात् , यत्रामुख्यं कर्तृत्वंतदेवानात्मत्वस्य साधकम् तेनमुख्यकर्तृत्वाहंप्रत्ययास्पदे अनात्मनि अनात्मत्वप्रसक्तिर्नभवतीति संक्षेपः ।

सांख्यमतसिद्धज्ञातुः स्वरूपमुपपाद्यतत्खण्डयितुं भूमिकामारभते-तथाहि "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः" इतितद्वचनंतदनुसारेणसर्वकार्यस्य परिणामिकारणं प्रकृतिः सा स्वयं न विकारात्मिकाकारणमात्रमेव नकस्यापिकार्यम् , एतन्मते कार्यकारणयोस्तादात्म्यस्वीकारेण कार्यनाशे कारणस्यापि विनाशः स्यादत' पुरुषो न कस्यापिकारणं किन्तु पुष्करपलाशवन्निर्लेपश्चेतनो बुद्धौचेतनोऽहंकरोमीति प्रतीतेरन्यथोपपादनासंभवेन पुरुषस्यचेतनत्वं स्वीक्रियते । तदुक्तम् "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वेपि तथा कर्तेवभवत्युदासीनः" इति । पुरुषस्य संवन्धेनाचेतन-

ननुसत्त्वरजस्तमोगुणात्मिकायाः प्रकृतेर्यः परिमाणलक्षणोऽहङ्कारोमहत्तत्वं बुद्धि नामकं तस्यैवाहङ्कारस्यमुख्यमात्मत्वं बुद्धेरेव वा ज्ञातृत्वमात्मत्वं च नतुतदतिरिक्तस्य वाऽत्मत्वं ज्ञातृत्वं च । तथा सति तदतिरिक्तात्मस्वीकारेगौरवप्रसङ्गात् इतिचेन्न प्राकृतिकाऽहङ्कारस्य बुद्धेर्वाऽचेतनत्वेनज्ञातृत्वासंभवात्, देहादिवत् ।

मपि वुद्धितत्वं चेतनवद्भवति, बुद्धिश्च प्रकृतेर्जडायाः परिणाम इति न साचेतना, किन्तुजडैव । किन्तु चेतनोऽहंकरोमीति प्रतीतेर्दर्शनात् तत्र पुरुषसंवन्धेन चेतनावद्व्यवहारो भवति । तथा पुरुषः सर्वथाक्रियारहितोकर्त्री प्रकृतिसंवन्धात्कर्तेवभवन् स्वस्मिन् कर्तृत्वमभिमन्यते । यथादाहकाग्निसंयोगादयः पिण्डोंप्यन्यदीयधर्मसंवन्धाद्दाहको भवति तथैव प्रकृतेपि भवति । यथा वा, आदर्शः स्वस्मिन् सूर्यप्रतिविंवमादाय प्रकाशको भवति, तथैव बुद्धौ प्रतिविंवितः पुरुषस्तद्गतधर्माननुभवति, तथा बुद्धिरपि पुरुषसंवन्धाच्चेतनेव भवति । तदुक्तम् "तस्मिंश्चिदर्पणेस्फारे समस्तावस्तुदृष्टयः । इमास्ताः प्रतिबिंबन्तिसरसीवतटद्रुमाः" इति । एतन्मतेवन्धमोक्षौ प्रकृतिगतौ पुरुषेतयोरुपचारमात्रमेव । तदुक्तम् "रूपैः सप्तभिरेव मात्मानंवध्नात्यात्मना प्रकृतिः । सैव च पुरुषार्थं प्रतिविमोचयत्येक रूपेण" । रङ्गस्य दर्शयित्वायथात्मानं नर्तकीविनिवर्ततेनृत्यात् । तथा पुरुषस्य दर्शयित्वाऽत्मानं विनिवर्तते प्रकृतिरिति । तथाबुद्धिरहंकारोवाऽहमर्थो ज्ञाताभवतीतिमतमुपपाद्य तन्निराकरणायोपक्रमते "**ननु सत्वरजस्तमः** इति । अर्थादुपर्युक्तप्रकरणेनात्मत्वंमन एव मुख्यं ज्ञातृत्वमजत्वं चेतिमतप्रकरणेन प्रदर्श्य तदनु प्रकृतेः प्राथमिकपरिणाम स्वरूपे महत्तत्वेऽथवा महत्तत्वकार्येऽहंकारेवामुख्यं ज्ञातृत्वं कथमपि युक्तिसिद्धं न भवतीति दर्शयितुमुपक्रमते **ननुसत्वरजस्तमः** इत्यादि, अविकारात्मकप्रकृतेः परिणामस्य साक्षात्कार्य रूपस्य बुद्धिनामकस्याथवा बुद्धिकार्यरूपस्याहङ्कारस्यनज्ञातृत्वम्, अर्थाद्बुद्धितत्वस्याहंकारस्य वा न संभवति कुतः ? अचेतनत्वात् तत्राचेतनत्वमनात्मत्वरूपमेवनत्वज्ञातृत्वम्, अनुमाने साध्यहेत्वोरेकत्वप्रसङ्गात् । नच साध्यहेत्वोरेकत्वे को दोष इति वाच्यम्, पक्षे हेतुसिद्धोतदभिन्नसाध्यस्यापि सिद्धतयाऽनुमानप्रयोगस्यानावश्यकत्वात् । साध्यसिद्ध्यर्थमेवहेतुप्रयोगः साध्यसिद्ध्यश्चसाध्यव्याप्यहेतुमान् पक्ष इति परामर्शादेव सिद्धेरनुमितेर्वैयर्थ्यात् ।

पक्षे हेत्वसिद्धौ साधकाभावादेव न साध्यसिद्धिरित्ययमेवदोषः साध्यहेत्वोरेकत्वेभवतीति । तथा चात्रानुमानप्रयोगः "महत्तत्वमहंकारो वा प्राकृतिकोमुख्योज्ञाता न संभवति, आत्मभिन्नत्वादनात्मत्वादित्यर्थः । तथा परिणामित्वात्कार्यत्वात्, जडत्वादस्वप्रकाशत्वात्, परार्थत्वाद् देहादिवत् । यथा शयनासनादयः संघात्मकाः पदार्थाः स्वेतरशरीरादीनां प्रयोजनायैव भवन्ति, तथा शरीरेन्द्रियादिका अपि संघातरूपा । इति स्वेतरा संहतात्मप्रयोजनका एव नतु स्वप्रयोजनकाः । तत्रोयोऽसंहत स एवा-

यथाप्रकृतिजातोदेहेन्द्रियप्राणादिकोनात्माऽचेतनत्वात् परिणामित्वात् जडत्वात् परार्थत्वाच्च तथैव प्राकृतिकत्वादिहेतुभिर्जडप्रकृतिजनिताहङ्कारस्यापिनात्मत्वं ज्ञातृत्वं वेति । नच महत्तत्वस्यातिस्वच्छतया तस्मिन् आत्मनः प्रतिबिम्बोदयात्तत्रैव ज्ञातृत्वमितिवाच्यम्, अचाक्षुषद्रव्यस्य प्रतिबिम्बाभावात्, नभसः प्रतिबिम्बवत् नच भवन्मतेवास्तविकं ज्ञातृत्वं चितावपि विद्यते । येन वन्हिसंवन्धेनायः पिण्डे उष्णता प्रतीतिवत्, चितः संवन्धेन बुद्धावपि चैतन्यमनुभूयेत । अर्थात् ज्ञातुः संवन्धात् जडेमहत्तत्वेपि ज्ञातृत्वं संभवेत्, अनुभूतं वा भवेदित्यतोऽहंकारस्यज्ञातृत्वप्रतीत्यनुपपत्तिः ।

त्मा ज्ञाता च भवति नत्वङ्कारोबुद्धितत्वंवाऽत्माज्ञातावेति । एतावता देहादिवत्, प्राकृतिकोऽकारो वा स्वतो न ज्ञाता, अचेतनादिकारणैरितिं ।

ननु साक्षात् ज्ञातृत्वाभावेपि चेतनछायापत्याऽर्थादात्मनस्तत्रबिम्बितत्वात् तदपिचेतनावद् भवतीत्यतस्तस्य ज्ञातृत्वमिति तत्राह **महतत्वस्याति स्वच्छतयेत्यादि,** अर्थादहंङ्कारबुद्ध्रयोः स्वच्छतयातयोबिम्बादयः स्यादित्यर्थः । छायाया असंभवं दर्शयति **अचाक्षुषेत्यादि** रूपस्पर्शादिरहितस्यचेतनस्यरूपादिरहितमहत्तत्वे बुद्ध्रयपरपर्यायेछायायाः प्रतिबिम्बस्यासम्भवात् । यद्रूपादिमद्द्रव्यं तद्रूपादिमतिविप्रकृष्टेऽतिस्वच्छे प्रतिविम्बे इति नियमः । तथा रूपादिमातस्वच्छेजले आदर्शे वा रूपादिमतोऽतिस्वच्छस्य विप्रकृष्टस्य सूर्यादेर्जले प्रतिबिम्वो दृश्यते, नतु स्वभावतोऽस्वच्छस्यान्यत्रप्रतिविंवो भवति । नहि भवति दूंगालस्य क्वचिदपि प्रतिबिम्बः । प्रकृते चेतनस्य प्रकाशरूपस्यापि रूपादिरहिततया स्वभावतोजडे प्राकृतिके वुद्धितत्वे प्रतिबिम्बस्य सर्वथैवासंभवात् । नहि भवति समलेकर्दमे सूर्यस्य तदन्यस्य वा प्रतिबिम्बः । तत्कस्य हेतोः ? समलत्वात्कर्दमस्येति भवतिं जलेप्रप्रकाशसूर्यस्येति । यथावा सरूपे आदर्शे रूपादिमतो विंबभूत मुखादेः । तदिहसर्वथा रूपादिरहितत्वाच्चेतनस्य पुरुषस्य प्रकृतिपरिणामभूतेऽत एव सर्वथाजडेबुद्धि तत्वेप्रतिबिम्बोदय इति । तस्मात्सूक्ष्ठूक्तमचाक्षुषस्य छायादर्शनादितिं । नवा सांख्यमते वास्तविकं ज्ञातृत्वमस्ति, अकारणत्वस्वीकाराच्चैतन्यस्य । ततश्चचित्संवन्धात् वुद्धौज्ञातृत्वं ज्ञातृत्वप्रतिभानंवा संभवेत् । यथा वन्हिसंपर्कादयः पिण्डे औष्ण्यादिप्रतिभासवदिति । किञ्च “चेतमोहंकारोमीति प्रतीत्या चैतन्यकर्तृत्वयोः सामानाधिकरण्यदर्शने यस्मिन्नधिकरणे चैतन्यं तत्रैव कर्तृत्वमपि भवन्मते तन्नसंभवतितयोर्व्यधिकरणत्वाद् बुद्धौप्राकृतिके कर्तृत्वस्याकर्तेरिचात्मनिज्ञानस्य स्वीकारेणासामञ्जस्यात् । तस्मान्न सांख्यमतं समीचीनमिति संक्षेप:श्रीवैष्णवमताब्जभास्करस्यप्रभा-किरणटीयायांबहुप्रपञ्चितत्वात् ।

अथ सुरेश्वराचार्यमतेऽहमर्थ:प्राकृतिकत्वाज्जडोपि सर्वसाधकं स्वप्रकाशात्मकमात्मानमभिव्यञ्जयति, यथांगुलयः सूर्यप्रकाश्या अपि तमेव सूर्यमभिव्यञ्जयन्ति । तादृशाहमर्थोजडोपि सर्वसाधकमभि-

यदि कश्चिदेवंब्रूयात् , ज्ञप्तिमात्रस्वरूप एवात्मा, तादृशमात्मानमभिव्यञ्जयन् जडस्वरूपोऽप्यहंकारोऽहमर्थः स्वाश्रयतया ज्ञप्तिमात्रस्वरूपमात्मानमभिव्यञ्जयति । स्वभावश्चायमभिव्यञ्जकानाम्, यत्स्वात्मस्थतयाऽभिव्यङ्ग्यमभिस्फोरयन्नभिव्यञ्जयन्ति यथाऽदर्शजलादयोमुखसूर्यविम्बादीन् । तत्कृतश्चाहं जानामीत्याकारको भ्रमः । अतएव सुषुप्तोमुक्तोवाऽहमुत्लेखाभावेपि स्वाभाविकातिशयानुभवमात्ररूपेणात्मनः प्रकाशोजायते । तस्मादेव कारणादहमर्थस्यानात्मत्वमिति तत्रेदं सुरेश्वराचार्यवचनम्––

व्यञ्जयन्ज्ञातृत्वप्रतीति निर्वाहयति । सच स्वयंनात्मा सुषुप्तौ तदभावात् । तमिमं पक्षमपहस्तयितुमुपक्रमते **यदि कश्चिदेवंब्रूयादि**त्यादि अर्थाज् ज्ञातृत्वप्रतीतेर्निर्वाहाय सुरेश्वराभिमतम्, अहमर्थस्यैव संविज्ज्ञानात्मकाभिव्यञ्जकत्वमिति पक्षमनुवदित्वानिरसनाय प्रस्तौति **ज्ञप्तिमात्र स्वरूप एवात्मेति** अभिव्यञ्जयन् प्रकाशयन् , तत्राभिव्यनक्ति स्वबलेन प्रकायविषयतामापादयतीत्यभिव्यञ्जकः, यथा तैलस्थं वन्हिमदर्शनविषयभूतमपि वन्हिकृशानुतापस्तं प्रकाशयन् , तत्राभिव्यञ्जको भवति, तथा विद्यमानमप्यात्मनं प्रकाशयन् अहमर्थस्तस्याभिव्यञ्जक इति कथ्यते । स्वाश्रयतया स्वाश्रितोर्यथा । आदर्शोमुकुर्विंवः । यथा खण्डमुण्डादिव्यक्तयो गोत्वजातेरभिञ्जकाः यथावा आदर्शः स्वस्मिन् मुखादेरभिव्यक्तिर्यथा वा जलादौसूर्यविंवस्याभिव्यक्तिः प्रतिविंबरूपेणेत्यादि । तत्कृतश्चेति, अहंकारेण प्रत्युपस्थापितश्च, “अहं जानामीत्याकारको भ्रमः । अतएव मुक्तौ सुषुप्तौ च अहंकाराभावेपि स्वाभाविकातिविशदानुभवमात्रेणात्मनः प्रकाशोजायते इत्यर्थत एवाहङ्कारस्यानात्मत्वंजडत्वं च सिद्ध्यतीति । तत्कृतश्चार्थात् , संविदभिव्यञ्जनकत्वकारणक एवाहंकारस्य संविदाश्रयत्वप्रतिभासो भवति । यथामुखाद्यभिव्यञ्जकत्वकारणको मुखसूर्यादिमत्व प्रतिभासोभवति तद्वदेवेहापीति । तत्राहं जानामीत्यत्राहं प्रकृतिपरिणामविशेषस्यैवनतुपरनार्थतो ज्ञप्तिमात्रस्यात्मनः । कुतः यतो ज्ञातृत्वप्रत्ययोभ्रमात्मकः शुक्तौ रजतवत् , रज्जौसर्पप्रत्ययवत् । अतएव यतोऽहंत्वप्रत्ययो मिथ्याऽतएव सुषुप्तिमोक्षकाले च नाहमर्थस्यभानं व्यविचारित्वात् , नाहंभावस्य भानम् , किन्तु ज्ञप्तिरूपात्मन एव भानमिति । अतएव, यस्मात् , अहमुल्लेखाभावेपि सुषुप्तिमोक्षयोः स्वाभाविकविशदज्ञानमात्ररूपेणात्मन एव प्रकाशोजायते, तस्मादेव कारणात् , अहंत्वेनोल्लिख्यमानाहमर्थंस्यनात्मत्वं किन्तु ज्ञप्तिमात्रस्यैवात्मत्वम् , अहमंशस्तु शुक्तौरजतवत् , सर्वाधिष्ठानतया भासमानात्मनि प्रतिभासनान्मिथ्येति, ततएवाहमंशोनात्मेनि । यद्यपि रज्जुसर्पवत् तदुत्तरकालेवाधो न दृश्यते, तथापि “अतोऽन्यदार्तम् ” इत्यादिश्रुतिभिर्युक्त्याप्रपंञ्चोमिथ्या दृष्यत्वादित्याद्यनुमानेनाहमर्थस्यमिथ्यात्वसाधनेनाहमर्थस्यानात्मत्वमिति । अत सुरेश्वराचार्येण कथितम्––

आत्मनश्चेदहं धर्मोयायान्मोक्षसुषुप्तयोः ।
यतोनान्वेति तेनायमन्यदीयोभवेदहमिति ॥

"आत्मनश्चेदहंधर्मोयायान्मुक्तिसुषुप्तयोः । यतोनान्वेतितेनायमन्यदीयो भवेदहम्" इति । तं प्रतिब्रूयात्, यथाशान्तोऽगारः स्वतः प्रकाशस्वरूपमादित्यमण्डलं नाभिव्यञ्जयति, तथा स्वप्रकाशस्वभावमात्मानंतत्सिद्धोऽकारो जडोप्यहमर्थो व्यञ्जय-

अथमर्थः अहत्वं यदि आत्मधर्मःस्यात्, तदामोक्षकाले सुषुप्तिकाले चाहंत्वस्यानुव्रजनं भवेत्। मोक्षादौचाहंत्वस्यानन्वयादनुव्रजनाभावाज्ज्ञायते यदिदमहंत्वंनात्मधर्मोऽपितु, तदन्यस्यैवकस्यचिद्धर्मः तथाचात्मेतरसांसारिकधर्मत्वमिति । एतदुक्तं भवति, योहियस्यधर्मो भवति स तं विहायनात्मस्वरूपं लभते, यथा घटीयो रूपरसादिर्घटंविहाय न भवति, धर्मिव्यतिरेकेण धर्मस्यस्वातन्त्र्येणावस्थानासंभवात् । योहियं विहायाप्यन्यत्रभवति स न तदीयोधर्मः यथाकालविशेषे उपलभ्यमानमौष्ण्यंवायौ परिदृश्यमानमपि न वायवीयः स्वाभाविकः । तथैवेह मोक्षादिकाले आत्मानं विहायापिवर्तते इति स नात्मनो धर्मोऽहमर्थोऽपितु आत्मेतरस्यैवेति वायौ, उष्णस्पर्शादिवदिवेतिसुरेश्वरवचनार्थः । तस्मादहंत्वंनात्मधर्मः इति स्थितम्, अपित्वात्मेतरस्यैव । वन्हिसंवन्धादपसितापकत्ववदिति प्रश्नप्रकरणस्य मुकुलितोऽभिप्रायः ।

तदिदंमतमुपक्षिपति **तंप्रतिब्रूयादित्यादि** अयमर्थः यथाकथंचित् स्वप्रकल्पोपिप्रदीपः सर्वार्थावभासकमादित्यं न प्रकाशयति तथैवात्मसंवन्धेन स्वच्छतांप्राप्तआत्मसंवन्धेन प्राप्तस्वरूपः प्रकृतिजन्यत्वाज्जडरूपोऽहंङ्कारः कथमिवात्मनः प्रकाशकःस्यात्, अर्थात् कथमपि न संभवति । यद्यपि सूर्यविम्बात्प्राप्तस्वरूव आदर्शगतसूर्यप्रतिबिम्बोऽन्धकारावृतगृहकोणेऽवस्थितमपि घटाद्यर्थमभिव्ञ्जयति, तथापि तेन प्रतिबिंवितसूर्येणाकाशगतसर्वार्थविद्योतकसूर्यस्यप्रतिभासनं न कथमपि भवति, विम्बेन, प्रतिबिम्बस्य तिरोधानात् । तथैवोदयास्तमयवर्जितनित्यप्रकाशमानस्यात्मनःप्राकृतिक जडस्वभावकयाचितमण्डनन्यायेन तत एव प्राप्तवैभवोऽहङ्कारः कथमिव प्रकाशयेत् । अथवा यथाज्वलदंगारो यदानावभासति सूर्यं न प्रकाशयति सूर्यं तदाजलनिर्वापितोऽतएव शान्तोऽङ्गारः सूर्यं नप्रकाशयति तथैवायमहङ्कारः सूर्यप्रतिकल्पंनित्यप्रकाशस्वरूपमात्मानंनैवावभासितुंक्षम इति । ततश्च "जीवन्नाखुर्नमार्जारंहन्ति हन्यात्मृतः कथमिति न्यायविषतां नातिक्रामतीति । अर्थात् सर्वार्थप्रकाशकं कदाचित्प्रकाशतेऽथ न पुनः कदाचित्प्रकाशते, इत्युत्पत्ति विनाशरहितनित्यप्रकाशस्वरूपमनुभावात्मानं नियमतःतदायत्तप्रकाशः प्रकृतिजन्यो जडस्वभावकोऽहंकारोऽभिव्यनक्तीति महदाश्चर्यमायिकवदिति । न खलु सर्वसाधकस्यसाधकान्तरनिरपेक्षस्वतः सिद्धस्य सर्वदाऽनुभवरूपस्यात्मनः प्रकाशकान्तरस्यापेक्षा भवति । तथा सति स्वप्रकाशकत्वव्याकोपात् । स्वभावजडस्याहमर्थस्य नियमत आत्मप्रकाशस्यात्मनः प्रकाशने सामर्थ्यमस्ति येनानुभवरूपस्यात्मनोऽभिव्यङ्गयत्वकथनमुपपन्नं भवेदितिभावः । अथवा भवतु नित्यप्रकाशरूपस्याप्यात्मनः केनचिदभिव्यङ्गयत्वम् भवतु वाजडस्यापि अहङ्कारस्य सात्विकतयातिस्वच्छस्यस्फटिकवद-

तीति विचित्रवचोनप्रमाणिकपरिपदि शोभते इति। किञ्चानुकूल्ये एव व्यङ्ग्यत्वव्यञ्जकत्वं भवति, नतु विरोधे। यद्यात्माव्यङ्ग्यः स्यान्तदाऽनुभाव्यतयाघटादिवज्जडो भवेदिति।

भिव्यञ्जकत्वम्, परन्तु प्रकाशाभिव्यङ्ग्यैकस्वभावस्याहमर्थस्यप्रकाशात्मकात्मनोऽभिव्यञ्जकत्वं तत्राह **किञ्चानुकूल्येएवेत्यादि** सर्वदासर्वथा चित्स्वभावस्य ज्ञातुरात्मनस्तथाजडस्वभावस्याहङ्कारस्य च परस्परं व्यङ्ग्यव्यञ्जकभावोऽर्थात् स्वभावतः प्रकाशलक्षणातुभवस्यात्मनो व्यङ्ग्यत्वं तथा जडात्मकाहङ्कारस्याभिव्यञ्जकत्वमित्येवं रूपेण तदुभययोर्व्यंग्यव्यञ्जकभावोनोपपद्यते। कुतः? विरोधात्प्रतिकूलत्वात्, स्वभावविरोधलक्षणादुक्तात्प्रतिकूलभावादित्यर्थः। अर्थात् प्रकाशो हि सर्वदा व्यञ्जक एव भवति, इति तस्य नियमः। जडश्च पदार्थः सर्यदाऽभिव्यंग्य एव भवतीति तस्य नियमः। तदिह प्रकाशस्यव्यंग्यत्वं जडस्यचाभिव्यञ्जकत्वं तदुभययोः स्वभावलक्षणप्रतिकूलतैवजायते। यथाप्रदीपः सर्वथा प्रकाशक एव दृष्टो घटादिजडपदार्थोर्व्यंगो भवति नतु घटप्रकाशौस्वस्वभावं विहायस्वान्यस्वभावं विजहाति, कदाचिदपिवह्निः शीतोष्णंचजलं भवति, तथैव कदाचिदप्यनुरूपस्यात्मनोर्व्यंग्यत्वं व्यञ्जकत्वं च जडात्मकाहंकारस्य संभवतीति। अर्थात् नियमतस्तद्व्यङ्ग्यस्वरूपस्यतद्व्यञ्जकत्वं सर्वथैव विरूपमितिकथितं भवति। अहंकारोयदाज्ञानेनाभिव्यक्तो भवेत् तदैवानुभवस्याभिव्यञ्जकत्वं तस्मिन् संभवेत्, अधिष्ठानातिरिक्तारोपितसत्तायाभवन्मतेऽस्वीकारात्। अर्थात् मिथ्यापदार्थस्य प्रतिभासाधीनसत्ताकत्वनियमेन प्रतिभासाभावेऽध्यस्तपदार्थसत्ताया एवासंभवात्। [अतएववाचस्पतिर्दृष्टिसृष्टिवादमेवमन्यते, यावज्ज्ञानं तावदेवपदार्थसद्भाव इति] ज्ञानंतु वस्यंप्रकाशत्वात्स्वयं भासमानमेवाहंकारं जडात्मकमभिव्यञ्जयेत्। ज्ञानस्याभिव्यञ्जकत्वाभावे घटादिवज्जडत्वमेवापतेत्। एवञ्च स्वप्रकाशसंविदधीनप्रकाशाहंकाराधीनप्रकाशत्वं ज्ञानस्यकथितंभवेत्, ततश्चदुरुत्तरोऽन्योन्याश्रयः प्रसज्येत, संवित्प्रकाशाधीनोहंकारप्रकाशाधीनश्चज्ञानस्य संविदः प्रकाश इति। ततश्च प्रकृतेऽन्योन्याश्रयदोषान्नानुभवाहंकारयोरभिव्यञ्जकभाव उपपद्यतेऽपितु स्वभावविरोधादभाव एव तयोरापततीति। अथ यदि कदाचित्कुसृष्ट्यातयोरभिव्यंग्याभिव्यञ्जकभावःस्वीक्रियेततदा तन्मते अनुभवस्वभावस्यात्मनोऽहंकारव्यंग्यत्वे तादृशात्मानुभूतित्वरूपत्वमेव नस्येद् घटादिवज्जडत्वमेव भवेत् तन्मते ज्ञानविषयत्वस्यैव जडत्वप्रयोजकत्वनियमात्। किञ्चज्ञानस्यापि यदिज्ञानान्तर विषयता भवेत्तदा घटादीनां सिद्धये ज्ञानानुसरणम्, ज्ञानस्वरूपस्यापिसाधनाय स्वभिन्नंज्ञानान्तर मावश्यकमिति ज्ञानधारानुसरणेऽनवस्थाभवेत्, क्वचिद्गत्वाज्ञानधाराया विश्रामेऽन्तिमज्ञानस्य प्रकाशत्वम् अथवा तत्प्रमाणाभावात् तस्याप्रमाणिकत्वेनखपुष्पायमाणत्वमेव भवेत्। ज्ञानधाराया अभिमतेतु दुरवस्थाऽनवस्था। ततश्चैकघटादिविज्ञानमेव स्यात्, नतु विषयान्तरसञ्चारः स्यात्, सुषुप्त्य-

नच सूर्यकिरणाभिव्यक्तंकरतलं सूर्यकिरणाभिव्यञ्जकं तथैवात्रापि, आत्मनाऽभिव्यक्तोप्यहंकारोऽनुभवात्मकमात्मानमभिव्यञ्जयेदिति वाच्यम् , करतलस्य सूर्यकि-

भावमोक्षाभावश्चापि स्यात् । परन्तु एतादृशज्ञानानुभवो न भवति, प्रत्युतप्रमाणाभावोपि भवतीति मूलक्षयकरीयमनवस्थेति ।

ननु भवत्वनवस्थातत्रकोदोष इति चेदत्रोच्यते-अनवस्थायास्त्रिदोषग्रस्तत्वात् । तदुक्तम्——
"प्राग्लोपाऽविनिगम्यत्व प्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्यात्रिदोषता ।।" इति ।

अयमर्थः अनवस्थितिमास्थातुः पुरुषस्य प्राग्लोपाविनगम्यत्वप्रमाणापगमाऽभिन्ना त्रिदोषतादोषत्रयात्मिका, अचिकित्स्या, चिकित्सितुमयोग्यैव भवति यथा लोकेपि वातपित्तकफत्रय प्रयोज्योरोगोभिषग् वरैरपि समाधातुमशक्यो भवति, प्राग्लोपाविनिगम्यत्वप्रमाणापगमप्रयोज्यो दोषोऽसमाधेय एवभवतीत्यत्रापि, तथाहि प्रथमज्ञानसिद्ध्ये यदिज्ञानन्तरमाद्रियते, तदा प्रथमज्ञानेन यत्कार्यंक्रियतेतत्कार्यं कल्प्यमानद्वितीयज्ञानेनैवसिद्ध्येत्, ततश्चप्रथमज्ञानस्य विलोपोभवेत् । प्रथमस्य द्वितीयस्य वा स्वीकार इति विनिगमनायामपि न किमपिप्रमाणम् । एवमनेकज्ञानस्वीकारे नास्ति किमपि प्रमाणम् । नवाकस्यचिदेवमनुभवो जायते । तथापिज्ञानप्रवाहस्वीकारे विषयान्तर संचारोच्छेदोमोक्षाभावः सुषुप्त्यभावादयोपिदोषाभवेयुरिति संक्षेपः ।

योहि येन व्यज्यते स तस्यव्यञ्जकस्यापिव्यञ्जको भवति प्रकाश्यप्रकाशकयोः परस्परं तथात्वे विरोधाभावात् , लोके तथा दर्शनादित्याशङ्कामपवदितुमुपक्रमते **नचसूर्यकिरणाभिव्यक्तमित्यादि** सूर्यकिरणेन करतलादिकं समभिव्यक्तं भवत्सूर्यकिरणस्याभिव्यञ्जकमितिदृश्यते इति दृष्टत्वादेव, व्यंग्यव्यञ्जकयोः परस्परंव्यञ्ग्यव्यञ्जकभावे नास्ति विरोधः । प्रत्यक्षप्रमाणंसर्वतो ज्येष्ठं सर्वस्यप्रामाणस्योपजीव्यञ्च । प्रत्यक्षाभावेऽनुमित्यादीनाप्यसंभवात् , यदावन्हिधूमादेः प्रात्यक्षिकसहचारादिमुखेनैवव्याप्तिनिश्चयानन्तरं पक्षतासहकारेण परामर्शो जायते तदैवलिङ्गज्ञानात्साध्यानुमितिर्जायते नान्यथेत्यतः प्रत्यक्षप्रमाणं सर्वतोज़्येष्ठमुपजीव्यञ्चेति । एवं च सर्वानुग्राहकप्रत्यक्षं प्रकाश्यप्रकाशकयोः परस्परंतथात्वेति विरोधं न दर्शयति, किन्तु साधकमेव भवति, करतल सूर्यादिकिरणस्थले, तथैव प्रकाशात्मकानुभवप्रकाश्योप्यहंकारोजड़ोपि स्वप्रकाशमात्मानं प्रकाशयेत्, तत्रनास्तिकोपिदोष इति प्रश्नग्रन्थस्यसमुदितस्याशयः । उत्तरयति, **करतलस्येत्यादि** अर्थात् करतलादिकम् , गवाक्षादिविवरप्रविष्टसूर्यरश्मीनां गतिप्रतिरोधकतयासंघातमात्रे एव कारणं भवति, नतु करतलं सूर्यकिरणस्य प्रकाशकं भवति, तेषां प्रकाशस्तु, यदा ते किरणाः संहताभवन्ति तदातेषां संहतकिरणानां स्फुटप्रकाशोजायते इति तेषां प्रकाशे न करतलंकारणमपितु संहतत्वमेव, संहतत्वे च करतलंकारणमिति करतलस्य कारणकारणत्वात्, युवकुलालजनकवृद्धकुलालस्यान्यथा

रणबाहुल्यमात्रे कारणत्वात् , तादृशाश्च सूर्यकिरणाः स्फुटमुपलभ्यन्ते इति न करतलव्यङ्ग्यत्वं सूर्यकिरणस्येति । अधिकमन्यत्र द्रष्टव्यम् ।

किञ्चकोयमभिव्यक्तिपदार्थः ? यश्चानुभवस्यात्मनोऽहंङ्कारेण सिसाधयिषितः । नतावत् सिद्धःप्रकाशरूपः, आत्मप्रकाशस्य स्वतः सिद्धतयाऽनन्याधीनसिद्धत्व स्वीकारात् । नवा तद्विषयकज्ञानम्, ज्ञानान्तरागम्यत्वात्, ज्ञानान्तरग्राह्यत्वेघटादिव

सिद्धत्वं तथैवात्रापि करतलस्यगवाक्षप्रविष्ठसूर्यकिरणप्रतिरोधेकारणत्वं, ततश्च स्फुटतरप्रकाश इतिं करतलादिकमन्यथा सिद्धमेवेत्याशयेनाह **करतलस्य सूर्यकिरणवाहुल्यमात्रे कारणत्वा**दिति । करतलं तु न सूर्यकिरणस्य प्रकाशे कारणम् , कथंचित् किरणानां गतिरोधे एव कारणम् ततश्च समुदितास्तादृशाः किरणाः प्रत्येकं प्रकाशमाना अपि स्फुटस्फुटतरादिरूपेण प्रकाशमाना भवन्तीति स्वानुभवेनैवानुभूता भवन्तीति न दृष्टान्तः समीचीन इवाभातीति ।

नच गतिं प्रतिरोधद्वारेणैव करतलस्येव, प्रकृतेसंविदोपि प्रकाशोऽहंकारेणभविष्यतीति न साम्प्रतम् , यतो दृष्टान्ते करतलादिकं मूर्तपदार्थः सूर्यरश्मयोपिमूर्तपदार्था एवेति, मूर्तेनमूर्तस्य किरणगतिप्रतिरोधो युक्तः कथंचित् , परन्तु अहंकारस्तु न मूर्तोपित्वमूर्त आत्मापि तादृश एवेति कथमहंकारस्य गतिरोधकत्वं स्यात् । नहि अमूर्तःपदार्थः कस्यापि गतिरोधको भवति, नहि आकाशादिः कस्यापिं गतिं रूणद्धि, इति दृश्यते, तथासति व्योमयानादीनामाकाशे संचाराभावप्रसङ्गात् । ततश्च गतिरोधेनापिं संवित्स्फुटप्रकाशहेतुत्वं करतलादीनामिवाहंकारस्योपयुज्यते, तस्यामूर्तत्वादितिभावः । विस्तरभयात्संक्षिप्तं प्रकरणम, जिज्ञासुभिरन्यत्रावधेयम् ।

गतप्रकरणेन जडाहंकारव्यंग्यत्वमनुभावात्मनोऽनपेक्षितं तथाऽनुपपन्नं चेतिनिवेद्यतदनु अभिव्यक्तिप्रकाशा ये ये संभावितास्तेषामत्रोपपत्तिर्नभवतीत्यतोऽहंयारस्य आत्माभिव्यंञ्जकत्वं न भवतीति दर्शयितुमुपक्रमते **किञ्चकोयमभिव्यक्तिपदार्थः** इत्यादि । अर्थादियमभिव्यक्तिः का ? येयमनुभवरूपस्यात्मनोऽहंकार द्वारा सम्पादयितुमिष्टं भवति इति ।

तत्र संभावितविकल्पं दर्शयितुमाह **नतावदिति** तत्रसिद्धिः संविदात्मप्रकाशः, तत्रसिद्धि पदज्ञाप्याप्यात्मप्रकाशस्य स्वप्रकाशतयाऽन्याधीनप्रकाशत्वाभावस्वीकारेणैतादृशात्मप्रकाशकारणत्वमहंकारस्य न कथमपि संभवतीत्यर्थः । **नवातद्विषयकज्ञानमिति** तद्विषयकमात्मविषयकज्ञानमपि अभिव्यक्तिर्नसंभवति । कुतः ? तत्राह **ज्ञानान्तरागम्यत्वात्** इति । संविदोज्ञानस्यज्ञानान्तराविषय त्वेनात्मविषयज्ञानोत्पादकत्वमपि तदभिव्यञ्जकत्वमप्यहंकारस्य न संभवति । अर्थात् तत्रज्ञानान्तरस्यानुपलब्धेः ज्ञानान्तरविषयत्वस्वीकारेतु, यथाघटोज्ञानविषयत्वान्नात्मा किन्तु जडात्मकस्तथैवात्मनोपि ज्ञानान्तरविषयत्वेऽनात्मत्वमेवस्यात् । यद्यपि ज्ञानस्य नित्यत्वेन न

देवाननुभूतित्वप्रसङ्गात् । नवा ज्ञानकरणानुग्रहो विकल्पासहत्वात् , सहिवेद्यगतज्ञानोदय प्रतिबन्धकापगमेन वा, प्रदीपवदन्धकारनिराकरणेन चक्षुरिन्द्रियस्य, वेद्यसंनिकर्षोपाधित्वेन वा व्यक्तिदर्पणादिवत् , जातिमुखादिज्ञापकचक्षुरादिवत् वेतृगतमला [कलंका] दिप्रक्षालनेन वा, शमदमादिवत् परावरात्मतत्वज्ञानोत्पादकशास्त्रादिवत् ।

तस्य कश्चिदज्ञानकरणाग्रहस्तथापि, अननुभाव्यत्वादेवानुभवरूपस्यात्मनस्तद्विषयकानुभवकरणस्य सर्वथैवाप्रसिद्धत्वेन तदनुग्रहकरणस्वरूपाभिव्यक्तिप्रकारोपिनकथंचित्संभवतीति, अथवा भवत्वनुभवस्यापि किंचिद्ज्ञानकरणं भवतु वा तदनुग्रहप्रकारस्तथापि तदीयप्रकारः प्रकृतेऽनुभस्यनित्यत्वान्नतत्संभवतीति प्रतिपादयन्, अनुग्रहप्रकारमेव विकल्पयति **विकल्पासहत्वादिति** तदेवोपपादयति **सहिवेद्यगतेत्यादि** सोऽर्थादनुग्रहः ग्राहकस्य सहकारिकारणसंपत्त्यापादनस्वरूपः । **वेद्यगतेत्यादि** वेद्यगतज्ञानोत्पत्तिप्रतिवन्धकनिराकरणद्वारेणानुग्राहको भवति, यथा चाक्षुषकार्योत्पत्तये वहलान्धकारनिरासकदीपस्य चक्षुरनुग्राहकत्ववदिति प्रथमोविकल्पार्थः । द्वितीयप्रकारंविकल्पं दर्शयति **चक्षुरिन्द्रियस्येति** करणस्यं चक्षुषोग्राह्यसंयोगसंयुक्तसमवायाद्यन्यतमसंनिकर्षप्रयोजकत्वेत्यर्थः । यथाघटादिव्यक्तयः स्वद्वारेण चक्षुरादिकरणस्य वेद्यघटत्वादिजातिगुणादि संवन्धात्मकसंनिकर्षं प्रयोजयन्ति । दर्पणाद्युपाधिश्चाक्षुकिरणपरावर्तनद्वारेणचक्षुरादेर्मुखादिगतसंयोगादिसंनिकर्षं प्रयोजयति । अर्थात्, यदा चक्षुषः संयोगोदर्पणेन सहभवति, ततो दर्पणस्यातिस्वच्छतया, दर्पणहतानेत्ररश्मयोमुखात्मकबिंबंप्राप्य तदीयप्रतिबिम्बं दर्पणेदर्शयन्ति । तत्रदर्पणादिरूपोपाधिश्चाक्षुषगतिपरावर्तनद्वारेणचक्षुषो मुखादिबिम्बेन सहसंनिकर्षजनयन्नुपकरोतीति द्वितीय विकल्पार्थः । तृतीयं विकल्पं दर्शयन्नाह **वेतृगतमलादिप्रक्षालनेने**त्यादि । तत्र मलं-कलंकोऽर्थात् ज्ञानोत्पत्तौपापादिरनेकप्रकारकः । "नाविरतोदुश्चरितात् नाशान्तोना समाहितः" इत्यादिशास्त्रेण शमदमोपरतिप्रभृतीनां तत्वज्ञानजनकस्य सहकारित्वं ज्ञापितं भवति । निष्कामकर्मणाशमदमादिना निराकृतपापरागादिदोषस्य विशुद्धान्तःकरणवत, एव पुरुष तत्वज्ञानमुत्पद्यते तदुक्तम् "ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्यकर्मणः" इति । तथा "नित्य[illegible]त्तिकैरेव कुर्वाणोदुरितक्षयम् । ज्ञानं च विमलीकुर्वन्नभ्यासेनतुपाचयेत् । अभ्यासात्पक्वविज्ञानः कैवल्यंलभते नरः" इत्यादिवचनेन चित्तशुद्धिद्वारा निष्कामकर्म भवतीत्ति कथितम् । शमादीनांतु साक्षादेव मोक्षोपयोगित्वमिति महता परिकरेणशास्त्रेप्रतिपादितमिति ।

तत्रानुग्रहविकल्पेषु प्रथमानुग्रहकल्पस्यानुपपत्तिं दर्शयितुमाह **तत्राहंकारेणानुभवगतं न किमपीत्यादि,** अहंकारेणनिवर्तनयोग्यंज्ञानोत्पत्तौ प्रतिबन्धकं न किमपिवस्त्वस्तीत्यर्थः । ननु ज्ञानोत्पत्तौ प्रतिबन्धकमात्मन्यज्ञानमेव विद्यते तदेमाहंकारायनेयस्यात्तत्राह **अज्ञानंतु** इत्यादि ज्ञानेनसहसमानौ आश्रयविषयौ यस्य, एतादृशमर्थाद्ज्ञानसमानाश्रयविषयकमज्ञानम् , ज्ञाना-

तत्राहंकारेणानुभवगतं न किमप्यपनेयं विद्यते यज्ज्ञानोत्पत्तौविरोधि भवेत् । अज्ञानंतु ज्ञानस्य समानाश्रयविषयतया, आश्रयविषयतारहिते केवले चिदात्मनि पदमाधातुं शक्नोति । नहि ज्ञानरहितो जडोघटादिरज्ञानीतिभाष्यते । न कदाचिदपि ज्ञानमात्रस्यात्मनो ज्ञातृत्वंसंभवेत् , अज्ञानं वा पदमाधातुंशक्नोति । संभवेपि वा नाहंकारेणाज्ञानायनयनं तत्वज्ञानेनैवाज्ञाननिवृत्तिरितितव सिद्धान्तात् , ज्ञानैकनिवर्त्यत्वादिति । ज्ञानं च स्वविपये एवाज्ञानंनिवर्तयति । नच तस्यात्मनो विषयत्वंतवमते इत्याश्रयत्वज्ञानविपयत्वरहिते कथमपिसंस्थातुमर्हत्यात्मनोनिधर्मत्वेनाश्रयत्वविषयधर्मस्य तत्रात्मन्यभावात् नाहज्ञानसंबन्धरहिते वस्तुनि, अज्ञानस्यासंभवः तथासत्यज्ञानीघटइत्यपिप्रतीतिंप्रसंङ्गात् । नत्वेवं प्रतीतिर्दृष्टपूर्वा । एवमेवज्ञातृत्वंकेवलज्ञानस्य संभवतीत्यज्ञानं संभवेत् । आश्रयत्वविषयत्वभागिनीनिर्विभागचितिरेवकेवला । पूर्वसिद्धतमसोहि पश्चिमोनाश्रयो भवति नापिगोचरः :” इत्यादि भवदीय प्राचीनाचार्यवचनस्नेहेन यदिज्ञानमात्मन्यज्ञानस्य सत्त्वमभ्युपगम्येत , अर्थादात्मन्यज्ञानाश्रयत्वंमन्येत, तदाप्यज्ञानस्याहंकारेण निरासाभावात् । वेद्यगतदोषापनायकत्वरूपाभिव्यञ्जकत्वंनाहंकारस्य संभवतीति, भवन्मते “तरतिशोकमात्मवित् ” “तमेव विदित्वाऽति मृत्युमेति” इत्यादि श्रुत्यनुसारेणज्ञानेनैवाज्ञानस्यनिरासस्वीकात् , नत्वहंकारेणाज्ञानवृत्तिः ज्ञानैकनिवर्त्यत्वादज्ञानस्येति । किञ्च ज्ञानंस्वकीयविषयेऽर्थात् स्वाधिकरणे एवाज्ञानं निवर्तयति । आत्मवेतमात्मविषयकमज्ञानमात्मनोऽननुभाव्यत्वाद् ज्ञानाप्रतिवध्यंनित्यं च भवेत् समानाश्रयविषयत्वेनैवज्ञानाज्ञानयोर्वाध्यवाधकभावात् , आत्मविषयकज्ञानस्वीकारेऽपसिद्धान्तः प्रसङ्गः । अयमाशयः भूतलरूपेऽधिकरणेजायमानो घटवद्भूतलमिति निश्चयो भूतलाधिकरणकघटाभाववद्भूलमितिज्ञानं प्रतिवध्नाति । नतु भूतलेजायमानो घटवत्तानिश्चयो घटाभाववज्जलमितिज्ञानं वध्नाति नवाभूतलस्थितं घटाभावज्ञानंजलं घटाघटवदितिज्ञानंप्रतिरुणद्धि । तत्कस्यहेतोः ! प्रतियोगितदभावयोर्विरुद्धाधिकरणे व्यवस्थितत्वात् । तथैव प्रकृते यदिज्ञानाज्ञानयोः समानाधिकरणे सत्वंतदैवविरोधोविरोधाच्चवाध्यवाधकभावो भवेत् । नहि घटीयरूपरसयोर्विरोधः समानाश्रयेविद्यमानत्वात् । नवा घटवत् भूतलं पटाभाववज्जलमित्यनयोर्वाध्यवाधकभावोविरोधस्यैवाभावात् ।

नतु शुद्धस्य ज्ञानरूपात्मनः फलव्याप्यलक्षणज्ञानाविषयत्वेपिवृत्तिव्याप्यत्वं तु भवत्येव, अर्थादन्तःकरणवृत्तिव्याप्यत्वन्त्विष्टमेवात्मनो नतु अन्तःकरणवृत्त्यवच्छिन्नचैतन्यव्याप्यत्वम् तदुक्तं “फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् । ब्रह्मण्यज्ञाननाशाय वृत्तिरपेक्षिता । स्वयंप्रकाशमानत्वान्नाभासउपयुज्यते” इति । यदिब्रह्मणः फलव्याप्यत्वंभवेवंत्तदैव घटादिवज्जडत्वमापतितंभवेत् । इहत्वात्माकारान्तःकरणवृत्त्यैवात्मगताज्ञानस्य निवृत्तिरितिचेत्सत्यम् , मायाजनितान्तःकरणवृत्तेर्जडत्वात् ,

त्मगतमज्ञानं केनाप्युच्छेत्तुं शक्यम् । नवा ज्ञानप्रागभावरूपमज्ञानं नानोत्पादेप्रतिवन्धकं जनकस्य प्रतिवन्धकत्वाभावात् । नवा भावत्वविशेषितमनिर्वचनीयं जगदुपादानमित्यादिकथनं तु केवलं वचनमेव । आत्मनः करणविषयत्वेन तत् संवन्धजनकत्वं न भवति । वोद्धृत्वादहमर्थस्य स्वेन स्वस्यशोधनासंभवादिति ।

आत्माश्रिताज्ञाननिवर्तकत्वाभावात् , ज्ञानाज्ञानयोर्विरोधोभवतीति ज्ञानमेवाज्ञावस्य निवर्तकं नतु जडस्य ज्ञाननिवर्तकत्वात् । यद्यन्तःकरणवृत्यवच्छिन्नचैतन्यनिवर्त्यत्वे तु आत्मनोज्ञेयत्वेनानात्मत्व प्रसङ्गादिति संक्षेपः ।

किञ्च अज्ञानं किं ज्ञानस्यप्रागभावरूपम् , अथवाभावरूपमनाद्यनिर्वचनीयंजगदुपादानरूपं वा । तत्र न प्रथमः पक्षः, ज्ञानप्रागभावरूपस्यतस्यज्ञानोत्पत्तौ प्रतिवन्धकत्वासंभवात् । तथा सतिं क्वचिदपिकार्यंनोत्पन्नंस्यात् , भवदपि क्षणिकमेवभवेत् , कार्यमिति । नवाद्वितीयः पक्षः तथां सत्यनादिभावरूपाज्ञानस्य विनाश एव न स्यात् , अनादिभावस्यात्मादेर्विनाशादर्शनात् । एवं चाज्ञाननिवर्तकज्ञानोत्पादनाय "श्रोतव्यो मन्तव्यः" इत्यादिश्रुत्याश्रवणमनननिदिध्यासनादिविधानस्यनिरर्थकत्वेन तद्विधायकश्रुतिस्मृत्यादिंप्रमाणस्याप्रामाणिकत्वमेवापतेन् । न च यथाऽनादिभावस्यापि पार्थिवपरमांणुगतश्यामत्वस्य पिलुपाकवादिमते, आमपाकनिक्षिप्तस्यपाकेन विंनाशदर्शनात् , तथैव, अनादिभावरूपस्याप्यज्ञानविनाश्यत्वंस्यादितिवाच्यम् 'अपाकजत्वेसति' इति निवेशेन तद्दोषस्य परिहारात् । अपिचयद्यनादिभावस्यापि विनाशोमन्येत तदाऽत्माकाशकालादीनामपि विनाशप्रसङ्गात् । अपिच भवदुक्ताज्ञानस्य अनिर्वचनीयत्वानिरूपणेनाप्यप्रमाणिकत्वमेव ततश्च तस्य नित्यत्वानित्यत्वंविचारोपिदूरापेत एव भवति । अपि च "यतो वा इमानिभूतानि जायन्ते" इत्यादिश्रुत्यापरमात्मन एव जगदुपादानादिश्रवणेन अज्ञानस्य जगदुपादानत्वकथनं विद्वत्सदसिकेवलमुपहासायैव भवतीति न किंचिदेतदिति । द्वितीयानुग्रहकल्पे दूषणदर्शयितुमाह **आत्मनः करणविषयत्वेनेति** । ज्ञानं प्रत्यक्षादिभेदेनानेनकप्रकारकम् । तत्र प्रत्यक्षंज्ञानं चक्षुरादिवाह्यकरणजन्यं मनोजन्यं च भवति । तत्रात्मनो रूपस्पर्शादिरहितस्य चक्षुरादिज्ञानं न भवति, चक्षुरादीन्द्रियाग्राह्यत्वादात्मन इति नात्मेन्द्रियसंयोगादिसंनिकर्षोपाधित्वेनाहंकारस्यात्मनोऽभिव्यञ्जकत्वं संभवतीति । तृतीयोऽनुग्रहपक्षे दोपं दर्शयितुमाह **वोद्धृत्वादहमर्थस्येति** स्वनिष्ठपापादिरूपकल्मषस्यकेवलेनैवस्वेन निराकरणासंभवात् । नहि दर्पणगतमलंकेवलेन दर्पणेन निराकृतं भवति, किन्तु स्वातिरिक्तेष्टकादिचूर्णनिघर्पणयाकृतं भवति । तथैवात्मगतदोपस्य न केवलमात्मनैवातीतं भवतीति संक्षेपः ।

समतीतप्रकरणेनाहमर्थस्य व्यंञ्जकत्वं निराकृत्यपरोक्तंव्यञ्जकस्वभावंनिरसितुमुपक्रमते

नवा स्वाश्रयतया व्यंग्यपदार्थस्य प्रकाशनम्, अभिव्यञ्जकस्य स्वभावः अभिव्यञ्जकेमण्यादौ प्रदीपादौ वा तथाऽर्शनात् किन्तु यथाऽवस्थितप्रकाशनानुनवास्वाश्रयतयेत्यादि प्रदीपादिर्हितैजसत्वात् घटाद्यतैजसस्य प्रकाशको भवति, तत्र प्रदीपादिः स्वाश्रयतयाऽर्थात् प्रदीपवृत्तितया प्रकाश्यं न प्रकाशयति, नहि भवति प्रतीति घटः प्रदीपे तिष्ठति प्रदीपोघटादिमान्वेत्याकारकः प्रत्ययः सर्वोंपि प्रदीपः प्रकाशयति प्रकाश्यंघटादिकमित्येव जानाति, नतु प्रदीपः स्वाश्रिततया विजानाति। अर्थाद् घटादेराधेयत्वं प्रदीपस्याधिकरणत्वं वा विजानाति। किन्तु यथावस्थितरूपेणैव प्रकाश्यं घटादिकं प्रकाशकं च विजानाति, भूतले घटोघटवद् वा भूतलमिति। ततश्चाभिव्यञ्जकः स्वाश्रयताऽभिव्यंग्यमभिव्यञ्जतीतितस्याभिव्यञ्जकस्य स्वभाव इति भवदुक्तनियमे स्पष्टो व्यभिचारोमण्यादिप्रकाशके इति। वाह्यप्रकाशके नियमस्य व्यभिचारंप्रदर्श्य, आभ्यन्तरप्रकाशकज्ञानमपि यथावस्थितपदार्थप्रकाशकत्वमेवेतिं तत्रयुक्तिं दर्शयतिं=**स्वतः प्रामाण्यादिति**। ज्ञानादेर्यथावस्थितपदार्थप्रकाशकत्वं स्वतः प्रामाण्यात्। प्रसङ्गादत्र प्रामाण्यंस्वतः परतोवेति यथामतिविज्ञायविचार्यते। अत्रायमाशयः अथकिमिदं प्रामाण्यस्वतस्त्वम्, तत्र किं स्वत एव प्रामाण्यजन्मस्वतः प्रामाण्यम्, अथवा, स्वाश्रयज्ञानजन्यत्वम्, अथवा स्वाश्रयज्ञानसामग्रीजन्यत्वम्, अथवा ज्ञानसामग्रीजन्यप्रमाश्रितत्वम्, अथवा ज्ञानसामग्रीमात्रजन्यप्रमाश्रितत्वमिति। तत्र प्रामाण्यस्वत एव जन्मेति न प्रथमः पक्षः स्वस्य स्वहेतुकत्वे विरोधात्, अर्थात् यदि स्वस्यस्वेनैवजन्मतदात्माश्रयदोषो भवेत्, नहिघटादेव घटस्यजन्मकारकव्यापारादनन्तरं जायमानस्य पूर्वमविद्यमानत्वात्। पूर्वापरकालघटितत्वात्कार्यकारणभावस्य नहि स्वमेवकारणत्वात्पूर्ववृत्तितदेवचकार्यत्वात्परकालवृत्तीति। नवा प्रमात एव प्रमाणस्यजन्म भवतीति द्वितीय पक्षोपि समीचीनः। प्रमाया ज्ञानस्यरूपतयास्वप्रामाण्यंप्रतिंसमवायिकारणत्वासंभवात्, अर्थात् स्वाश्रयप्रामाण्यजनकत्वे कारणत्रयमध्ये समवायिकारणत्वे स्वीकारे ज्ञानस्य द्रव्यत्वप्रसङ्गात् "समवायिकारणत्वंद्रव्यस्यैवेतिनियमात् तदन्यकारणत्वं तु संभवत्येव नहि, अयोग्यत्वात्। नवा प्रामाण्यस्य ज्ञानसामग्रीतोजन्मभवतीति तृतीयपक्षोपि संभवति कुतः? प्रामाण्यमुपाधिरूपं जाति रूपं वा। उभयथापितदन्यत्वसंभवात्। तथाहि यदि प्रमाण्यमुपाधिरिति तस्यप्रमाण्यस्य स्वीक्रियते, तदास्मृनित्वावधिकरणस्यज्ञानस्यवाधाभाव एव प्रामाण्यम्। नच तादृशाभावस्योत्पत्तिः संभवति, अत्यन्तान्योन्याभावयोर्नित्यत्वस्वीकारात् न्यायविद्भिरिति। नवा प्रामाण्यं जातिरूपम्, जातेर्नित्यत्वेनतज्जन्मासंभवात् "नित्यत्वे सत्यनेकसमवेतत्वस्यैवजातिलक्षणत्वादिति। नवा स्वाश्रयज्ञानसामग्रीजत्यत्वं प्रमानिष्ठ प्रामाण्यस्य स्वतस्त्वमिति तृतीयपक्षः, कुतः? तथा सति, अप्रमाया अपिज्ञानसामान्यसामग्रीजन्यतया प्रमात्वापानात्, यतोऽप्रमापि ज्ञानविशेषरूपैव विशेपसाग्र्याञ्च विशेपसामान्य सामग्रीभवत्येवानुप्रविष्टा यथानीलघटसामग्र्यां सामान्यतो घठसामग्री अनुप्रविशत्येव। यथावा शिंशपासा-

मग्र्यां वृक्षसामग्री प्रविशत्येव । अन्यथा शिंशपायांवृक्षत्वस्याकस्मिकत्वप्रसङ्गात्, तस्मात् परतस्त्वेनाभिमता प्रामाण्येपि ज्ञानसामग्रीजन्याश्रितेऽतिव्याप्तिप्रसङ्गात्, ततश्चेदंलक्षणं न युक्तमिति । नच ज्ञानसामग्रीमात्रजन्यत्वमेव प्रमायाः स्वतस्त्वम्, अप्रमातु न ज्ञानसामग्री प्रयोज़्या, अपितु पीत्तादिदोषसहकृतज्ञानसामग्रीजन्येति नाप्रमाया स्वतस्त्वापत्तिरिति वाच्यम्, विकल्पासहत्वात् । तथाहि दोषाभावसहकृतज्ञानसामान्यसामग्रीजन्यत्वमात्रंशब्दस्यार्थः, किंवा दोषासहकृतज्ञानसामग्रीजन्यत्वमर्थः ? तत्र न प्रथमः पक्षो निर्दुष्टः, एवं सतिपरतः प्रामाण्यवादिमतेतव प्रवेशप्रसङ्गात्, यतःपरतः प्रामाण्यवादिनो नैयायिकादयोपि दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव परतः प्रामाण्यमिच्छन्ति भवतामपि तदेवानुमतमित्युभययोः समानतैव नतुवैलक्षण्यं किमपीति । नवादोषासहकृतज्ञानसामान्यत्वमिति द्वितीयःपक्षोपिसमीचीनः, यतोविशेषदर्शनस्य शुक्तित्वादिज्ञानस्य रजतमित्याकारकरजतभ्रमनिवृत्तिकारणत्वे, विशेषदर्शनस्य शुक्तित्वज्ञानाभावस्यभ्रमे कारणत्वं यथार्थत एव सिद्ध्यति, यथातथैव प्रकृते "दोषसहकृतज्ञानसामान्यसामग्रीजन्यज्ञानमप्रमेति स्वीकारेप्रमांप्रतिंदोषभावस्य कारणताऽर्थत एवापतेत्, अर्थात् यथाप्रमाणज्ञानकारणस्य शुक्तित्वादिविशेषदर्शनस्याभावोऽप्रमाणज्ञानस्य कारणस्य दोषस्यचाकचिक्यादेरनेकप्रकारकस्याभावोपि यथार्थज्ञानं प्रत्यर्थतः कारणं भवेदेवेति । नच यथा पारमेश्वरज्ञाने दोषाभावेऽवर्जनीयतया नियमतो भवत्येव नतु तत्रेश्वरज्ञाने हेतुस्तथैवमदीयप्रमास्वपिदोषाभावस्यावर्जनीयतयैवोपस्थितिर्भवेत्तत्रको दोष ? नहि परमेश्वरज्ञानेपिदोषाभावस्यप्रयोजकत्वमिति वक्तुं युक्तमिति, यतस्तत्प्रयुक्तत्वं तदन्तर्गतसामग्रीप्रयोज्यत्वस्य तदन्तर्भूतसामग्रीजन्यत्वरूपत्वात्, परमेश्वरज्ञानस्य नित्यत्वेन विशिष्टसामग्रीप्रयोज़्यत्वस्य [जन्यत्वस्य] सर्वथैवासंभवादितिवाच्यम्—तत्सामग्रीजन्यत्वं विनापिनित्यद्रव्येषुपरमाणुकालाशादिषुगुणवत्व प्रयुक्तद्रव्यत्वात्, अत्रापि दोषाभावप्रयुक्तत्वस्योपपत्तिसंभवादिति । नच दोषाभावस्य विद्यमानत्वेपि, अभावत्वादेव न कारणत्वम् कारणत्वस्य भावत्वव्याप्तत्वादिति । यथाशुक्तित्वादिविशेषदर्शनाभावस्याभावत्वेपि भ्रमेकारणत्वं भवति, यथावा प्रमाणाभावस्यप्रमेयाभावंप्रतिकारणता भवति, यथावा विहितनित्यनैमित्तिककर्मणामभावस्य पापेकारणत्वं तथैव प्रकृते दोषाभावस्य कारणत्वं प्रमांप्रति भवत्येव । नहि भाव एव कारणं नाभावः कुत्रापि कारणमितिराजाज्ञा, पूर्ववृत्तित्वमात्रस्यैव कारणत्वप्रयोजकत्वमित्येव नियमात् । कार्यपूर्व वृत्तित्वं यथाभावस्यतथाऽभावस्यापि-इतितत्भावाभावसाधारणमेव । "भावो यथातथाभावः करणंकार्यवन्मतः" इत्युदयनाचार्योक्तेः । यथाघटादिःकार्यं भवति तथा करणमपिभवत्येव, तथैव यथाप्रध्वंसोऽभावोपि कार्यं भवति तथैवात्यन्ताभावादयोऽपिकारणानिभवन्त्येव, भावस्यैवकार्यत्वं कारणत्वं नत्वभावस्यतत्वमितिविनिगमनायां प्रमाणाभावादिति ।

यथाप्रामाण्यस्यस्वतस्त्वे लक्षणं न किमपि तथैव तत्रप्रमाणमपि नास्त्येव नच "प्रामाण्यंज्ञान हेतुमात्रजन्याश्रयम् , अप्रामाण्येतरत्वेसतिज्ञानैकधर्मत्वात् । तथा प्रामाण्यंज्ञानहेतुमात्रजन्याश्रयम् , अप्रामाण्यभिन्नत्वेसतिज्ञानत्वन्यूनवृत्तित्वात् प्रत्यक्षत्वादित्येव स्वतस्त्वेप्रमाणमितिवाच्यम् , विकल्पा सहत्वात् । तथाहि किं तथाविधव्यक्तिवृत्तितामात्रंविवक्षितम् , अथवाऽन्यावृत्तित्वेसति तथाविधव्यक्तिवृत्तित्वम् । तत्र नाद्यः पक्षः, अंशतः सिद्धसाधनत्वात् , अनुव्यवसायानुमित्यादीनां स्वतः प्रमाणस्य सर्वैः स्वीकारात् । नवाद्वितीयः प्रथमप्रयोगे दृष्टान्तस्य साध्यविकलत्वात्, ज्ञानत्वस्य दोष जनिताप्रमाणज्ञानवृत्तित्वात् । द्वितीयानुमाने संशयत्वादिना व्यभिचारः संशयादिकमपि अप्रामाण्येतरत्वे सतिज्ञानत्वन्यूनवृत्तिर्भवति, परन्तु न भवति ज्ञानहेतुमात्रजन्याश्रयंतिमिरादिदोषजन्यत्वात् , दृष्टान्तेसाध्यविकलता च । प्रत्यक्षत्वस्यापि परतःप्रामाण्यवादिना ज्ञानहेतुमात्रजन्याश्रयत्वस्यास्वीकारात् । यस्यमते प्रमात्वमपि ज्ञानहेतुमात्रजन्याश्रयं न भवति गुणविशिष्टज्ञानसामग्रीजन्यवृत्तित्वात् , तन्मते तदवान्तरजातिप्रत्यक्षत्वंकथंतद्धेतुमात्रजन्याश्रयकस्यादिति । तस्माज्ज्ञानस्य स्वतस्त्वेनास्ति किमपिप्रमाणमिति । अस्ति च प्रामाण्यस्यपरतस्त्वेपि अनुमानप्रयोगःअनीश्वरप्रमाविज्ञानहेत्वतिरिक्तहेतुजन्या, कार्यत्वात् , घटादिवदिति । नच ज्ञानसामग्र्या एव निरूपणाभावात् तदतिरिक्त कारणाधीनत्वंदुर्ज्ञानमितिवाच्यम् , ज्ञानसामग्र्या निरूपणाभावे, अप्रमावोधस्यापि परतस्त्वं न स्यात, यतोऽप्रमाज्ञानमपिज्ञानसामग्रीनिरूपणाधीननिरूपणकमेव, यतोऽप्रमाज्ञानस्यदोषसहकृत विज्ञानसामग्रीजन्यत्वस्यैव स्वीकारात् । तस्मादुत्पत्तौप्रमात्वस्यस्वतस्त्वं कथमपि न भवतीति । तथा ज्ञानस्यविज्ञप्तावपि स्वतस्त्वं संभवति । तथाहि नीलादिविज्ञानस्य यत्प्रामाण्यं तन्नीलज्ञानेनैव गृह्यते इति तस्य स्वतस्त्वमथवानीलादिग्राहकमात्रग्राह्यत्वेन ? तत्र न प्रथमः पक्षो नीलादिज्ञानस्य स्वगत प्रामाण्यग्राहकत्वाभावात् , इन्द्रियार्थसंनिकर्षोत्पन्नमनीश्वरप्रात्यक्षंतदिदं वहिरिन्द्रियस्यान्तरस्य वा प्रामाण्येन संनिकर्षादेवोत्पद्यते इतिवक्तव्यंप्रत्यक्षवादिना, तत्र वहिरिन्द्रियग्राह्यत्वं प्रामाण्यस्यान्तर्धर्मत्वान्न संभवतीति तस्यतत्राऽप्रमाणत्वात् । तथाहि यदेतन्नीलप्रकाशनप्रत्यक्षं तत् यद्यपि नीलात्मक विषयं प्रतिप्रत्यक्षं भवति, यस्तत्रेन्द्रियार्थसंनिकर्षाज्जायमानत्वात् , परन्तु स्वकीयप्रामाण्यग्रहणेतु कथं प्रत्यक्षंस्यात् , अर्थात्कथंप्रमाणं स्यात् ; तस्यवहिरिन्द्रियैः सह संनिकर्षाभावात् । किञ्च तत्प्रत्यक्षं विज्ञानस्यैवप्रामाण्यं गृह्णीयात् ,अथवा तदीयफलस्यापि ? तत्रनाद्यः, ज्ञानफलात्मकहेतुनाऽनुमेयतयातस्यातीन्द्रियत्वेनाप्रत्यक्षतया तत्प्रामाण्यमपि प्रत्यक्षत्वासंभवात् । फलस्य तु स्वप्रकाशतया वाह्येन्द्रियग्राह्यत्वाभावात्, तथा ज्ञाननिश्चययथार्थतत्वस्वरूपप्रामाण्यस्यापि वाह्येन्द्रियप्रत्यक्षत्वासंभवात् ।

नवा द्वितीयपक्षोपि प्रामाण्यं यदिज्ञानग्राहकमात्रग्राह्यंभवेत्तदाघटादिज्ञानानन्तरम् , इदंप्रमाणमप्रमाणंवेति संशयानवकाशात् , भवति च संशय इदंज्ञानंप्रमानेति, ज्ञानग्राहकग्राह्यत्वे, ज्ञानेजाते

तदीयप्रामाण्यस्यापि गृहीततया तादृशसंशयाभावप्रसङ्गात् । नच प्रामाण्यज्ञानग्राहकग्राह्यत्वेप्यर्थ विशेषितत्वस्य संशयिकत्ववत् तदीयप्रामाण्यस्यापि सांशयित्वंसंभवति, यथाऽयंघट इतिजाते कुंभज्ञानस्यजलं विषयोऽभवन्नवेत्येवजनानां संशयो दृश्यते, यतःसजलनिर्जस्यापि कुंभानांदर्शनात् । एवं प्रामाण्येपि संशयःस्यादेवेति वाच्यम्, जलस्य कुंभग्राहकसामग्रीमात्रजन्यत्वस्यास्वीकारात्, यद्यंगीक्रियेत तदाऽविशेषतया सकलघटानां जलवत्वप्रसङ्गात्, तस्मान्नारिकेलफलस्थितजलादिवद्भिन्नसामग्रीग्राह्यत्वादेव तत्रसंशयोभवतीति प्रामाण्ये तु नतथेत्येवं स्वीकर्तुं युक्तमिति । अपि च यदि ज्ञानगतप्रामाण्यस्य विज्ञानग्राहकसामग्रीमध्यग्राह्यत्वंस्वतस्त्ववादिंना स्वीक्रियेत, तदाशुक्तौरजतभ्रमानन्तरंतादृशभ्रमात्मकबुद्धावपि प्रामाण्यंगृहीतमेवस्यादितिसापिबुिद्धिः प्रमैवस्यात् । न चेदं रजतमितिज्ञानानन्तरं तज्ज्ञानेपि ज्ञानत्वात्प्रमात्वं गृहीतं यद्यपि भवति तथापि नेदंरजतमितिबाधकात्तदपनयनात् प्रामाण्यंतस्यज्ञानस्य न भवतीति । तदुक्तं "तस्माद्बोधात्मकत्वेन प्राप्ताबुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोह्यते" तस्माद्भ्रमज्ञाने प्राप्तमपि प्रमाण्यंनिराक्रियते इत्यत इष्टमेव स्वतस्त्ववादिनामितिं वाच्यम्, तथासतिपरतः प्रामाण्यंज्ञानस्यापतेदिति, तथाहि प्रथमतः प्राप्तमपि प्रामाण्यंशुक्तिरजतादिबुद्धिषुबाधकान्नेदं रजतमित्याकारकादपोह्यते इत्युच्यते तदा, बाधकाभावमूलक एव प्रामाण्यनिश्चयइति तस्य प्रामाण्यस्य परतस्त्वंवज्रलेपायते इति ।

नवाज्ञप्तिस्वतस्त्वे प्रमाणं विद्यते । नच प्रमास्वतो ज्ञायते, परनिरपेक्षोत्पत्तिकत्वात्, एवं प्रामाण्यं स्वतोज्ञायते, अप्रामाण्येतरत्वे सति ज्ञानैकधर्मत्वादित्यनुमानमेव प्रमाणमितिवाच्यम्, प्रथमानुमाने परतः प्रमाण्यवादिनं प्रतिहेत्वसिद्धत्वात्, प्रमाऽप्रमेतरज्ञानस्यैवाभावात् । द्वितीयानुमानेतु प्रभाकरमतेज्ञानैकधर्मे स्वयं प्रभत्वे, भट्टमते ज्ञाततायां व्यभिचारात् । प्रामाण्यं परतोज्ञायते, अनभ्यासदशायां सांशयिकत्वादप्रमावदितिसत्प्रतिपक्षदोषोपि । तस्मात् प्रामाण्यं परत एव गृह्यते नतु विज्ञानग्राहकमात्रसामग्रीग्राह्यत्वेनस्वत एव भवतीतिं पूर्वपक्षः ।

अत्राह विज्ञानग्राहकसामग्रीजन्यत्वेसति तदतिरिक्तकारणाजन्यत्वमेव प्रमायाः स्वतस्त्वमिति । नचाजन्ये ईश्वरज्ञाने एतल्लक्षणाव्याप्तिरितिवाच्यम्, ईश्वरज्ञानस्याजन्यत्वेपिज्ञानसामग्रीजन्यत्वविशिष्टकारणजन्यत्वलक्षणविशिष्टधर्मत्वाभावेनाव्याप्तेरभावात् । अर्थात् विज्ञानसामग्रीजन्यत्वविशिंष्टतदतिरिक्तसामग्रीजन्यत्वमप्रमाज्ञाने प्रसिद्धंतदत्यन्ताभाववत्वलक्षणस्य नित्येपीश्वरज्ञानेनाव्याप्तमिति । एतच्चलक्षणंप्रमामात्रे विद्यते इतिसर्वप्रमासुलक्षणसमन्वयो भवति । नवात्र लक्षणेऽतिव्याप्तिः, अप्रमायाविज्ञानसामग्रीजन्यत्वविशिष्टतदतिंरिंक्तदोषादिजन्यत्वस्यैव विद्यमानत्वेन तदभावस्याभावादिति।

एवं प्रमायाः स्वतस्त्वेऽनुमानमपिप्रमाणं भवति, प्रमाविज्ञानसामग्रीजन्यत्वेसतितदतिरिक्त कारणजन्यानभवति, अप्रमाभिन्नत्वात् घटादिवत् । नच स्वतस्त्वसाधकानुमाने, ज्ञानत्वानधिकरणत्व-

मुपाधिर्भवति, तस्यसाध्यव्यापकत्वेन साधनाव्यापकत्वात् । तथाहि, घटादिदृष्टान्तेसाध्यं विद्यते तत्र ज्ञानत्वानधिकरणत्वमुपाधिरप्यस्तीति साध्यव्याकत्वं तथाहेतुःपक्षेप्रमायांविद्यते, तत्रज्ञानत्वानधिकरणत्वंनास्तीत्युपाधेः साधनाव्यापकत्वमपीतिवाच्यम्, पारमेश्वरज्ञाने साध्यमस्ति तत्र च ज्ञानत्वानधिकरणत्वमुपाधिर्नास्ति, तस्य ज्ञानत्वेनज्ञानत्वानधिकरणत्वादित्येवंसाध्यस्य यत्रयत्रसद्भावस्तत्रसर्वत्र, ज्ञानत्वानधिकरणत्वरूपोपाधेरभावात् । प्रकृते प्रमात्वानधिकरणत्वंनोपाधिः । ततश्चप्रकृतानुमानेन प्रमायाः स्वतस्त्वंनिर्वाधमेवभवतीति । किञ्चविज्ञानसामग्रीमात्रेणैवप्रमायाउत्पत्ति संभवे, तदतिरिक्तगुणादेर्दोषाभावस्यकारणत्वकल्पनायां गौरवप्रसङ्गो भवतीति । एवञ्च "प्रमाविज्ञानकारणातिरिक्तकारणाधीनाकार्यत्वादिपरतस्त्वेयदनुमानं तदपिनिरस्तं भवतीति । प्रमादोषातिरिक्तज्ञानकारणजन्या न भवति ज्ञानत्वादप्रमावदिति सत्प्रतिपक्षादिदोषो भवति परतस्त्वे । नचैवं प्रमां प्रतियद्दोषाभावस्यकारणताऽन्वयव्यतिरेकवलेन प्राप्यते तस्य नैरर्थक्यमिति वाच्यम्, भावानववोधात्, यद्यनन्यथासिद्धान्वयव्यतिरेकौ यत्रकारणत्वावेदकौ भवतां तदैव तत्रवलेन कारणत्वंसिद्ध्यति, इहतु तावन्वयव्यतिरेकौविरोधि, अप्रमाप्रतिवन्धकतयैवचरितार्थौं भवतो न कारणतामावेदयतः । तदुक्तम्—

"तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः । अप्रामाण्यद्वयासत्वं तेनोत्सर्गोऽनपोदितः—।।" इति।

अर्थात्—"प्रत्यक्षेतु विशेष्येणविशेषणवता समम् । संनिकर्षोगुणस्तु स्यादथत्वनुमितौगुण" इतिनियमप्रदर्शितगुणादिकारणतो दोषाणांपीत्तदूरत्वादीनामनेकविधानामभावोवोधितो भवति । अर्थात् गुणसत्वेतद्विरोधिदोषाणामभावो ज्ञायते इतिगुणप्रयोज्यत्वंदोषाभावानां भवति । दोषाभावे ज्ञाते दोषाभावप्रयोज्यत्वेऽवगते, तेनाप्रामाण्यद्वयस्य संशयविपर्यययोरभावः साधितो भवतीति संशयाद्यभावोदोषाभावेनानुमीयते, दोषाभावश्चगुणप्रयोज्यइतिगुणानांदोषाभावद्वारेण संशयाद्यभावइति, तत्रैव गुणस्य कारणत्वं भवति । प्रामाण्ये तस्य कारणत्वम्, प्रामाण्यंतु सामान्यनियमप्राप्तज्ञानसामग्रीमात्रसाध्यमेव नतु तदतिरिक्तस्कश्चित्तत्र कारणतेति । नच यद्विज्ञानसामग्रीमात्रादेव प्रामाण्यमिष्यते तदाशुक्तिरजतादिमिथ्याज्ञानेष्वपि प्रामाण्यमापतेत, मिथ्याबुद्धावपिज्ञानसामान्यसामग्रीजन्यत्वस्य कारणगतदोषावगमबाधबोधाभ्यामेवापनयनादिति । नच ताभ्यामपनये दोषवाधबुद्ध्योरभावज्ञानस्यप्रामाण्यकारणकारणत्वस्य सिद्धत्वेन परतः प्रामाण्यमापद्यते, इति स एव घटकुट्टीप्रभातन्यायःशिरसि समापन्न इति वाच्यम् । दोषबाधवुद्ध्योरनुद्यमात्रेणैव प्रामाण्यग्रहस्य स्वीकारात्, तथोक्तंभट्टाचार्येण "यदास्वतः प्रमाणत्वं तदान्यन्नैवमृग्यते । निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः" इति । अन्यथा तदभावावगमस्यापिप्रामाण्यग्रहणकारणत्वेन, तदभावावगमस्यापि प्रामाण्यावगमायतत्तदभावावगमान्तराणामवस्याश्रयणीयतयाऽनवस्थायादुरवस्थत्वात् । ततश्च "प्रमाण्यं परतो ज्ञायतेऽनभ्यासदशायां सांशयिकत्वात्, अप्रामाण्यवदित्योदयनिकपरतस्त्वानुमाने, अनभ्यास-

कूलस्वभावत्वाच्च, ज्ञानतत्साधनतदनुग्राहकाणाम् । एतच्चैतेषां स्वतःप्रामाण्यास्वीकारे सर्वत्राविश्वासप्रसंगात् । गवादिव्यक्तीनां तु न गोत्वादिजात्यभिव्यञ्जकत्वंजाते निराकारतया स्वाश्रयतयाबोधकत्वमेव नतु व्यञ्जकत्वं व्यक्तेः यथोक्तव्यभिचारात् अभिव्यञ्जकतयाऽभिमत आदर्शादिस्तु नेत्रकिरणप्रतिफलनरूपदोषहेतुर्भवति, नतु मुखा-
दशार्या सांशयिकत्वादितिहेतौ व्यभिचारात् । यतः स्वतः प्रमाणत्वेनाभिमतानुमानोपमानोपमानानुव्यवसायघर्म्यध्यवसायेषुव्यभिचारात् । अनुमानादिज्ञानस्थस्वतः प्रामाण्यमाचार्यवाचस्पतिनापि व्याख्यातम् "विवादास्पदीभूतंज्ञानमर्थाव्यभिचारि समर्थप्रवृत्तिजनकत्वात् , यदिपुनरेवंनाभविष्यत्तदासमर्थां सफलांप्रवृत्तिंनाकरिष्यत् यथा प्रमाणाभास इति व्यतिरेकी । अनुमानस्य स्वतः प्रमाणतयाऽन्वयानुमानस्यापि संभवात् । तथाचानुमानस्यपरितोनिरस्तसमस्तविभुमाशंकस्य स्वत एव प्रामाण्यम् , अनुमेयव्यभिचारिलिङ्गसमुत्थत्वादिति । तथा सत्प्रतिपक्षदोषोपि भवति "विवादस्थले प्रमात्वम् , विज्ञानग्राहकसामग्रीग्राह्यम् , अप्रमामात्रवृत्तित्वानधिकरणत्वे सति ज्ञानैकवृत्तिजातित्वात् , ज्ञानत्ववदिति । एवंचोपयुक्तप्रकारेणप्रमाणस्यस्वतो ग्राह्यत्वं प्रतिपादितम् । एतदेवात्रापि कथितम् **एतच्चैतेषां स्वतः प्रामाण्यास्वीकारे सर्वत्राविश्वासप्रसङ्गादिति** स्वतः प्रामाण्यन्यायात्, प्रमाणस्वतस्त्वात्मकयुक्तिवलादित्यर्थः । ज्ञानोत्पादकसामान्यसामग्री प्रयोज्यत्वम् ज्ञानभासकसामग्रीभास्यत्वप्रामाण्यस्योत्पत्तौज्ञप्तौ च स्वतस्त्वमित्येवमुपरिप्रदर्शितमेव । ननु यदि स्वतःप्रामाण्यमिष्यते तदा क्वचिद् ज्ञानेज़ाते, इदं ज्ञानं प्रमा नवा ! इदं ज्ञानमप्रमेत्याकारकविपरीतावगाहनं कथं भवति, भवन्मते ज्ञाने गृहीते प्रामाण्यस्यगृहीतत्वादेव संशयादेरभावादितिचेन्न, ज्ञानसामग्र्यां तदतिरिक्तदोषवलादेवेति गृहाण । एवमेव स्वतः प्रामाण्यग्रहेप्यनभ्यासदशापन्नज्ञाने यः प्रामाण्यस्यसंशयादिर्भवति तदपि दोषमूलकसंशयादेवेति । प्रामाण्यस्यस्वतस्त्वं यदिनाद्रियेत तदा तत्रवाधादिकंदर्शितम् **अस्वीकार** इति । प्रत्यक्षादिसर्वज्ञानेषु अप्रमाण्यशंकयाज्ञानमात्रस्य प्रामाण्यमपगतंस्यात् तस्मात्प्रामाण्यस्यस्वतस्त्वस्वीकार आवश्यक एव । अन्यथाप्रामाण्यनिश्चयेजातेपिप्रामाण्यशङ्काक्वचिदपि प्रतिहताभवेत् , ततश्च येयं निष्कंपप्रवृत्तिः सा नकुत्रापि भवेदिति । **व्यक्तेरिति** यथाव्यक्तिर्जातिमभिजयतिस्वाश्रिततया तथाप्रकृतेपिस्यादिति, तन्निषेधति, व्यक्तेरिति, व्यक्त्यास्वाश्रिततयाजातेःप्रकाशनं यद्भवति तन्नव्यक्तेरभिव्यञ्जकत्वप्रयुक्तम्, किन्तुव्यक्त्यपृथक्सिद्धप्रकारत्वलक्षणवस्तुस्वभावादेव तत्र तथा भवति, व्यक्तिं तिरस्कृत्यजातेरनवस्थानासंभवात् जातिव्यक्त्योरपृथक्सिद्धत्वमिति अपृथक् सिद्धत्वादेव व्यक्त्याजातेः प्रकाशनं तु तत्र जातेः स्वाश्रिततयाऽभिव्यञ्जकस्तु सर्वत्र प्रकाशशीला लोकादिरेवभवतीतिव्यक्तेर्व्यञ्जत्वं न कुत्रापि संमतमिति । ननु व्यञ्जकत्वं नास्तितदाकथं व्यक्त्यादिरूपस्यादर्शादेः सवितृप्रकाशव्यञ्जकत्वं तत्राह **आदर्शादित्यादि** तत्रापिं दर्पणादेर्नाभिव्यञ्जकत्वम्, तत्रतु दर्पणादिप्रतिहतगतेश्चक्षु-

देर्व्यञ्जकोऽव्यञ्जकस्त्वालोकादिरेव। कथंचिदव्यञ्जकत्वेपि विपरीतगमनदोपप्रयोज्यस्तत्र विपरीतावभासः। नचात्रतथाऽहमर्थज्ञातुस्तादृशदोपोपनायकत्वस्वभावः। एवंसति सर्वप्रत्यक्षस्याप्रामाणिकत्वेन न किमपियथार्थं स्यादिति। ततश्च ज्ञातृरूपेणैवाहमर्थस्य सिद्धिस्ततोऽहमर्थ एव प्रत्यगात्मा न केवलंज्ञानमात्मेति।

❀ स्वापेऽहमर्थस्यभानसमर्थनम् ❀

यदप्युक्तंस्वापेमोक्षे च ज्ञानमात्रतयात्मनः स्फुरणं भवति, अहमर्थस्यभानं तु न भवति, तदपि न सुषुप्तौप्रतिसंधानवलादेवाहमर्थसद्भावस्य पूर्वमेवप्रतिपादनात्। अहमित्येकरूपेणप्रबोधपर्यन्तंज्ञातुः स्फुरणात्। नच यदि परागर्थस्याननुभवात्तमसाऽभिपतेजसः प्रतिनिवृत्त्यमुखादिविंम्बाभिमुखतया प्रसरणमेवमुखादिविंवस्यान्यथा प्रतीतोदोपरूपं प्रयोजकं भवति। प्रतिकूलरूपदोषप्रयोजकस्यादर्शादेर्व्यञ्जकत्वं भवतु, न भवतु वा! नतु व्यञ्जकप्रयोज्यमन्यथाज्ञानमिति समुदितार्थः।

प्रकृतेतु, अहमर्थस्य न दोषापादकत्वस्वभावः, एवं सतिसर्वस्यापि अप्रामाण्यात् किमपि सत्यं न स्यात्। अर्थात् अहमर्थस्यदोषापादकत्वम् ज्ञानकरणानां चक्षुरादीनाम् विपरीतज्ञानोपयोगिव्यापृतिदोषापादकत्वमेव। तथात्वे प्रमाणधीनज्ञानेहमर्थस्यापि कारणत्वात्, तदेव यदि प्रमाणदोषसम्पादकंभवेत्तदाकुत्रापि यथार्थज्ञानंनोदीयात् सर्वत्रदोपसम्पादकाहमर्थस्यविद्यमानसर्वत्रभ्रमात्मकमेवज्ञानं भवेत् न प्रमाणजनितं यथार्थज्ञानं भवेदिति सर्वत्र प्रमाणज्ञानंदत्तजलाञ्जलिकमेव भवेदिति। प्रकरणार्थमुपसंहरन्नाह **ततश्चे**त्यादि अत्रजायमानमहमर्थविषयकंज्ञानंप्रमारूपं पूर्वयुक्त्यातदर्थेभ्रमासंभवात्, ततश्चज्ञातृरूपेणैव तस्याहमर्थस्य सिद्धिर्भवतीति स एव ज्ञानाऽत्मा नतु केवलंज्ञानस्वरूपक आत्मेति।

। इत्यहङ्कारस्य संविदभिव्यञ्जकत्वनिराकरणे दत्त्वदीपः।

अहमर्थ एव ज्ञाता स एव चात्मा, यदाखलु, आत्मविषयकंज्ञानंतदाऽहमर्थं पुरस्कृत्यैव नान्यथाऽत्मज्ञानमिति सिद्धान्तोदेदविदाम्। अन्येकेचन, सुषुप्तिकाले मोक्षकाले चाहमर्थस्याभावेन तस्य व्यभिचारितत्वान्नाहमर्थ आत्मेति पक्षं निराकरिष्णुस्तदीयं मतमुपपादयन्नाह **यदप्युक्तं स्वापेमोक्षेचेत्यादि** अर्थात् मोक्षसमये स्वापकालेचाहमर्थस्याभावेनाहमर्थस्यात्मत्वस्वीकारोनो युक्तियुक्तः किन्तु ज्ञप्तिमात्रमेवात्मेतिपूर्वपक्षाशयः। उत्तरयति–**सुषुप्तौ** भवत्येवाहमर्थस्यावस्थानमित्यस्यासकृत्पूर्वं निवेदनात् अर्थात् "अहमित्येकरूपेण सर्वदाऽत्मनानुभवः सुप्तोत्थितस्याहमर्थघटितस्मरणदर्शनात्स एवाहमर्थमात्मेति। पुनः पूर्वपक्षयति **न च यदि परागर्थस्याननुभवादित्यादि** तत्तत्परागर्थस्य

भवाद्विवेकेनाहमर्थस्यभानं न भवतीतिवाच्यम्, स्वापादौविविच्यप्रकाशनाभावस्यानुभूतेरपिदर्शनात् । तत्र नाहमः नाप्यर्थान्तरस्यभानं यद्यपि, तथापि, अज्ञानसाक्षितयाऽनुभूतिमात्रंवर्तते, इत्यपिकथनं नोपयुज्यते, एतादृशस्वापकालिकानुभवस्य कस्यापि परामर्शस्यादर्शनात् । नच सुप्तोत्थितस्य "एतावन्तं न किञ्चिदवेदिषम्" इत्यादि परामर्शादेव तथा ज्ञायेते इति वाच्यम्, तथादर्शनात्कथमेतत् । नकिञ्चिन्निर्देशादितिचेत् । एवं सतितदास्वापेज्ञानमात्रमपिप्रत्याख्यातंस्यात् । अपि च स्वापप्रसिद्धमात्मानमहमितिपरामृशन्, न किञ्चिदवेदिषमिति तज्ज्ञानेनिराकुर्वन् तात्कालिकीज्ञानस्यसिद्धिमहमर्थस्यचासिद्धिंकथयन् अनुभवविरोधमपिनावधारयसि निर्विषयंनिराश्रयं च ज्ञानं न कुत्रापि संभवति, उपपद्यतेवेति ।

वाह्यार्थस्य स्वापेऽननुभवेन वाह्यार्थानुभवितृत्वमात्मनस्तथातमोगुणाभिभूततया स्फुटरूपेणेतरविवेकेनभानं न भवति, तस्मान्नाहमर्थआत्मेत्याशयः पूर्यपक्षस्य । उत्तरयति **स्वापादौविविच्यप्रकाशनाभावस्येत्यादि** यथा स्वापेऽहमर्थस्य विविच्यस्फुटरूपेणभानं न भवतीतिनाहमर्थस्यात्मत्वं स्वीक्रियतेतथैवकेवलज्ञानस्यापिस्वापेविविच्यस्फुटरूपेणभानाभावोज्ञप्तेरपिसमान इति ज्ञप्तेरप्यात्मत्वं न स्यात् । नचैतावन्तं न किञ्चिदवेदिषमित्याकारकस्मरणं सुप्तोत्थितस्य भवतीति, एतावन्तमनुसंधानं ज्ञानसाक्षितयाऽहमर्थस्यस्वापकालेसत्वंनिवेदयतीति कथमित्थं स्यादिति सिद्धान्तिन आक्षेपः । कथमेवं स्यात्: अर्थात् न कथमपि संभवतीत्युत्तरपक्षाशयः । पुनः पूर्वपक्षी कथयति **न किञ्चिदिति निर्देशात्** स्वापकाले न किञ्चिदिति कथनेन किञ्चपदवोध्यजडाहंकारस्य निषेधो भवतीतिपूर्वपक्षाशयः ततः सिद्धान्ती प्राहः यथा किञ्चनपदबोध्यस्याहंकारस्य निराकरणंतथैवकिञ्चनपदेनात्मनोपि परामर्शात् संविन्मात्रस्यापिभानं यत्पूर्वपक्षिणामभिमतं तदपि न सिद्ध्येत्, अर्थादिहंकारनिराकरणे संविदोपि निराकरणं स्वापकाले आपतेत्, संविन्निराकरणं तु भवतांकथमपि न शोभनामति । अथ **किञ्चिदिति** पदेन जडमात्रस्यैव परामर्शो भवति नतु ज्ञानस्येति चेत्तर्हि, तदाऽहमर्थस्यापिनिराकरणं न स्यात्, तस्याहमर्थस्यापि प्रत्थक्त्वेन जडत्वाभावात् । अथवा ज्ञेयमात्रस्य किञ्चिदिति पदेन ग्रहणं भवति नतु ज्ञानस्यापीतिचेत्तुल्यन्यायेन ज्ञातुरपि परामर्शो न स्यात्, यतो भवन्मते ज्ञातुरपि जडात्मकाहमर्थघटितत्वादिति ।

अपि च पूर्वपक्षकर्तुः प्रतिसन्धानविरोधोपि शिरसिन्यस्तो भवतीति दर्शयति **अपि च स्वापप्रसिद्धमात्मानमित्यादि** सुषुप्तिकाले सिद्धमात्मानमहं पदेन प्रतिसन्धायापि **न किञ्चिदवेदिष**मित्यादिना तदीयज्ञानं निराकुर्वन् तथा, स्वापकालिकवित्तिसिद्धिमहमर्थस्य न सिद्धमिति वदन्, अनुभवविरोधमपिज्ञानदुर्वलोन विजानातीतिभावः । नहि भूतलेघटोनास्तीति प्रतीत्याघटस्यसद्भावो भूतलस्य च निराकरणंकस्यचिदपि विजानाति, किन्तु भूतलस्यसद्भावं तदाधेय

स्यादेतत् ,प्रबोधकाले “सुप्तोऽहं मामपि न ज्ञातवान्” इति प्रत्ययोजायते इति । सत्यं जायते, सतुप्रत्ययोवर्णाश्रमादिवैशिष्ट्येन प्रबोधकाले संवेद्यमानंशरीरिणंमामित्यस्मद्पदवाच्यमादायस्वाप्यभाववस्थाप्रसिद्धाविशदस्वानुभवकतानाहमर्थस्य तेन रूपेणाज्ञातत्वं विज्ञापयति, नतु ज्ञस्वभावस्याहमर्थस्यापि । एवमिवायमनुभवः—“इहसुप्तोहमीघटस्यैवाभावं प्रत्येति । अर्थादाधारस्य सत्वमाधेयमात्रस्य चाभावं विजानाति एवं प्रकृते **एतावन्तं न किञ्चिदवेदिष**मिति सुप्तोत्थितपुरुषस्य परामर्शेन केवलं ज्ञानस्यैवाभावो विषयो ज्ञातुश्चसद्भाव एव प्रसिद्ध्यति । तदेतादृशमभिप्रायमविद्वान् सर्वथाज्ञानदुर्वल एवं पण्डिता मन्यन्ते इति प्रकरणस्याभिप्रायः ।

ननु एतावन्तं कालं न किञ्चिदवेदिषमिति स्मरणात्मकप्रतीत्यासविषयकसंविद एव निराकरणं भवति, नतु निर्विशेषसंविदोऽभावो भवति । अर्थात् तादृश स सविषयकज्ञानमेव निषिद्धं नतु निर्विशेषज्ञानस्यनिराकरणमिमि निर्विशेषज्ञानसत्वं तु स्वापेप्यक्षतमेवेतिचेत्तत्राह **निर्विषयं निराश्रयं चेत्यादि** अर्थात् यज्ज्ञानंतत्सर्वं सविषयकं साश्रयमेव भवति, अहं घटादिज्ञानवान् , इत्यादौ तथादर्शनात्, ततश्च स्वापादिकाले यद्यपिज्ञानंनिर्विषयकमिवाभाति तदपि साश्रयमेव न निराश्रयमसंभवात् । तच्च ज्ञानं धर्मभूतं न स्वापे प्रकाशते इति सिद्धान्तः पन्थाः जागरणादिव्यवहारकाले स्फुटतरव्यवहारोपपादनाय, तत्रजागरणे आश्रयविषयसहितमेवज्ञानं धर्मभूतं प्रकाशते, स्वापेतु व्यवहाराभावेनतदानिर्विषयकमपि धर्मभूतंज्ञानं साश्रयमेवविभातीत्यर्थः ।

स्वापादिकालेपि “न किञ्चिदवेदिषमित्याकारकप्रतिसन्धानवलेन तदाहमर्थस्यैवात्मनोऽनुसन्धानं भवतीति यद्यपिसिद्धान्तिनाप्रसाधितं, तथापि “मामप्यहं न ज्ञातवान् प्रसुप्तः” इत्याकारकप्रतिसन्धानान्तरवलेनाहमर्थस्यात्मनः स्वापेनानुभवो भवतीतिनात्माऽहमर्थ इति यदुच्यते शङ्कापक्षीयेन तन्निराकरणायप्रथमतः संक्षेपेण तन्मतमेवानुवददि **स्यादेतत् प्रबोधकाले** इत्यादि, ।

प्रबोधकाले जागरणे “मामप्यहं न ज्ञातवान् स्वापकाले” इत्याकारकपरामर्शो जायते, तन्नाहमर्थआत्मेति प्रश्नार्थ इति । तमिमंपक्षं परिहरति, अर्धस्वीकारेण **सत्यं जायते** इति । अर्थदेतादृशः परामर्शो जायते, तावताहमर्थस्य तदा निराकरणं सर्वथा न भवतीत्यर्थः । **सतु प्रत्ययः** इत्यादि जागरणकालेज्ञायमानम् “अहंब्राह्मणोऽहंब्रह्मचारी” इत्यादिवर्णाश्रमादिविशिष्टमात्मानंशरीरादिविशिष्टं “मामितिपदेनसमादाय, स्वापावस्था, प्रसिद्धाविशदस्वाभाविकानुभवैक रूपाहमर्थस्य, तेन रूपेणाज्ञातत्वमेव प्रतिपादयति, अर्थात् विशिष्टरूपेणाहमर्थस्यात्ममात्रं ब्रवीति नतुसर्वथाहमर्थस्य वियोगं स्वापे साधयति । स्वापकालिकाविशदस्वप्रकाशैकाश्रयस्य, तेन रूपेण वर्णाश्रमादिविशिष्टाकारेण, ज्ञस्वभावस्य ज्ञातृस्वरूपस्य स्वापेन, ज्ञानस्यप्रकाशो भवतीति । परन्तु ज्ञातस्वरूपमात्रस्यैव तदास्वापे प्रकाशोजायते इति । उक्तप्रतीतेरर्थं प्रदर्शयति, **एवमिवायमनु-**

दृशश्चेत्येवं प्रकारेण मामपि न ज्ञातवानहमिति । किञ्चविशुद्धआत्माऽज्ञानसाक्षितया सुपुप्तिकाले वर्तते इति भवदभिमतः । तत्र साक्षित्वंनाम साक्षाज्ज्ञातृत्वस्वरूपमेवेति पूर्वमेवकथितम् । स चायमात्माजानामीत्येवं प्रकारेणभासमानोऽहमर्थ एवेति कथमुच्यते यत्सुषुप्तावहमर्थो न प्रकाशते । स्वस्मैप्रकाशमानोहमित्येवं प्रकारेणैव प्रथते इति । तस्मात् सुषुप्तिकालादावप्यात्माहमित्येवं प्रकारेणैव प्रकाशते इति तदापि, अहमर्थस्यैवात्मत्वमायाति नतु तद्विरहितस्यकेवलज्ञप्तिमात्रस्यात्मत्वंसिद्ध्यति ।

यत्तु मोक्षकालेनाहमर्थानुगमनमिति, तन्न, बौद्धमतवत्, आत्मनाशस्यैवमोक्षत्वभ्युपगतं स्यात्, न चाहमितिधर्ममात्रं, येन धर्मरूपाहंत्वापगमेप्यज्ञानाविद्यानिवृत्तौ, भव इति । "इह सुप्तोऽहमीदृशश्चेत्येवं प्रकारेणमामपि न ज्ञातवान्" इति। ननु स्वापकालेऽज्ञानसाक्षितयैषात्माप्रकाशते इति मतम् , तदनुसारेणापि, अहमर्थस्यभानं ननिराकृतं भवतिं किन्तु तन्मतेनापि स्वापेऽहमर्थज्ञातुर्भानमवर्जनीयमेवेतिं दर्शयितुमाह **किञ्च विशुद्धआत्मा** इत्यादि, अर्थात् शाङ्करमतेपि स्वापकाले विशुद्ध एवात्माऽज्ञानसाक्षितयाभासते इत्यम्युपगमः तत्रसाक्षित्वं साक्षादेव ज्ञातृत्वमिति कथमिवाहमर्थस्य निराकरणं संभवेदिति । अर्थात् साक्षाद्रष्टरिसंज्ञायामित्यनुशासनवलात् , साक्षात्कर्तरि, एव साक्षिशब्दस्य प्रयोगो भवति परंपरिते । एवं च स साक्षी ज्ञातृत्वेन ज्ञायमानोऽहमर्थ एवेति "अहमज्ञः" एवं प्रकारेणाज्ञानसाक्षितया स्वापकालेपि, आत्मनोऽहंत्वं सिद्ध्यत्येवयदातदाकथमहमर्थस्य स्वापे निराकरणवचणं शोभेत, अपितु स्वापेऽहमर्थप्रकाशनं सर्यथाऽवाधितमेवेति । अपि च ग्रत्यक्त्वस्याहं बुद्धिव्यवस्थाप्यत्वादपि स्वापकालेपिआप्मनोऽहंत्वंसिद्ध्यत्येव तत्राह **स्वस्मै** इत्यादिस्वापकालेपिस्वस्मै प्रकाशमानोहं प्रकाशते इत्यहमर्थस्य स्वाप प्रसिद्धस्यात्मत्वंसिद्ध्यत्येवेति । प्रकरणार्थमुपसंहरति **तस्मादि**ति सुसुप्तिकालादावित्यत्रादिपदेनमोहमूर्छादीनांसंग्रहः । इति सुषुप्तावहमर्थस्यभानसर्मथनप्रकरणेतत्त्वदीपः ।

मुक्तिकाले आगन्तुकसर्वधर्मस्यनिवृत्तावहमर्थस्यापिधर्मान्तरत्वविशेषेणतस्यापिनिवृत्तिर्जायते इतिसर्वधर्मनिवृत्तौकेवलज्ञानमात्रमात्मापरिशिष्यते । तस्मादहमर्थस्यमोक्षेऽनुवर्तनं न भवति "प्रज्ञानघनः" "सत्यंज्ञानमनन्तम्" "एकमेवाद्वितीयम्" इत्याश्रितिप्रामाण्यादिति यन्मतंशङ्करानुयायिनांतदनुद्यतस्य निराकरणायानुक्रमते **यत्तुमोक्ष** इत्यादि । न कस्यापिमोक्षसमये प्रतीतिर्जायतेऽहंमुक्तो जात इतिं । मोक्षकालस्यश्रुतिमात्रसमधिगतत्वात् । यदिमोक्षेपि अहमर्थउपावर्तेत तदोपर्युक्तप्रतीतिरपिभवेन्नतु तथा कस्यापिप्रतीतिरस्ति, अदर्शनादिति । तदेतदवैदिकमिति निःसारं बौद्धमतप्रवेशश्चेति दूषयतिं-**तन्नेति** । अर्थादेतन्मतं न समीचीनम् । तदेवोपपादयति, **बौद्धमतवदित्यादि** बौद्धोहि ज्ञानाधाररूपमालयविज्ञानस्यावसानमेव, अर्थादात्मविनाशमेवमोक्षं मनुते स एव प्रकारस्तवशिरसिसमापतितः । वैनाशिकदर्शनं माध्यमिकचरमबौद्धदर्शनम् , इति तदेव-

आत्मास्वरूपेणावतिष्ठेत, अहमित्येवात्मरूपम् । ज्ञानमपितद्धर्मत्वेनतस्यैवप्रकाशते ज्ञानंमे जातमिति । तदा का कथाऽर्थान्तरस्यात्मत्वे । ।

किञ्च यः पुरुषविशेषोजननमरणादिदुःखैरात्मानमहंदुःखवानस्मि एवं तत्वतो भ्रमेण वा विजानाति, स सर्वमिदंदुःखजालंनिराकृत्यकथमहंनिरतिशयंसुखमिच्छन् तादृशमोक्षसाधनेशमदमादौप्रवर्तेयम् । अनेनोपायेन सांसारिकसुखदुःखादिकं विनाश्यैकान्तिकात्यन्तिकदुःखनिवृत्तिपूर्वकसुखविशेषलक्षणमोक्षमवाप्यस्वस्थः सुखीस्यामिति ।

एतादृशःपुरुषो यद्यहंतत्वज्ञानादिसाधनानुष्ठानेनाहमेव न भविष्यामीत्यवगच्छेत्तदामोक्षकथैवनिरर्थिकास्यात् ? अधिकारिणोऽभावात् वेदान्तविद्यामोक्षशास्त्राणि चाप्रामाण्यमुपगच्छेयुः । नचाहमुपलक्षितः कश्चित् प्रकाशोमोक्षेस्थास्यतीति वक्तव्यम् प्रकारान्तरेणाहमर्थाननुवृत्तिकथनद्वारेण भवद्भिरपि प्रतिपादनादिति । यदि कदाचिदहंत्वं धर्ममात्रम्, तदाऽहंत्वस्य धर्मस्य निवृत्त्यनन्तरमपि धर्मिरूप आत्मामोक्षेऽनुवर्तेत । अर्थादहमर्थाननुगमनंमोक्षेभवेदितिं भवत्कथनं समीचीनं भवेदिति । नतुधर्ममात्रमात्मा किन्तु स एवाहमर्थ आत्मेति । यच्चेदं ज्ञानं तदपि, आत्मधर्मत्वेन तस्यैवाहमर्थस्यैव प्रकाशते ज्ञानंमेजातमिति प्रतीतेः । अर्थात्, धर्मरूपेणप्रतीयमानस्य सर्वान्तरस्य स्वतन्त्ररूपेणमात्मत्वमपितुपराधीनतयैवाववोधो भवतीति न तस्यात्मत्वम् ।

यदातुसर्वापेक्षया, आत्मनोऽन्तरङ्गस्य ज्ञानस्यात्मत्वं तदावहिरङ्गस्य प्राणमनइन्द्रियशरीरादेः स्वातन्त्र्येणात्मत्वकथनंतुदूरापेतमेवभवति तत्राह **का कथेत्यादि** । यदितु ज्ञातृतया ज्ञानकर्तृत्वरूपेण प्रतीयमाणाहमर्थाद्भिन्नस्यज्ञानस्यनात्मत्वं तदाज्ञानव्यरिक्तप्राणादित आरभ्यशरीरपर्यन्त पदार्थस्य स्वातन्त्र्येणात्मत्वकथनं न कथमपि संभवति । शरीरादितआरभ्यप्राणान्तस्योत्पांदविनाशशालिनोऽनित्यस्यानात्मत्वंमोक्षेऽभावात्, परन्तु ज्ञातृतयाप्रसिद्धस्याहमर्थस्य तथात्वं मोक्षेपि तदनुगमनात्, मोक्षेपि-ज्ञानमात्रधर्मत्वेनप्रकाशते ज्ञानंमेजातमिति । तस्मादहमर्थ एव आत्मामोक्षेऽनुगमनादिति संक्षेपः ।

स्वापकालेमोक्षकाले चाहमर्थस्य निवृत्तिर्नभवतीति प्रतिपाद्य, मोक्षकालेऽहंभावनिवृत्तौ दोषान्तरमपि दर्शयति **किञ्च यःपुरुष विशेष** इत्यादि, पुत्रकलत्रस्रक् चन्दनादि, इहलौकिक सुखदुःखादिभोक्तृत्वं तथा स्वर्गादिपारलौकिकसांसारिकफलभोक्तृत्वमहमर्थस्यैव भनति तथा, ऐहलौकिकविषयाणामनित्यत्वं दुःखरूपतां च विचार्य्यततःसंजातवैराग्यस्य दुःखत्रयायघातात् मुमुक्षुत्वं च ज्ञातुरहमर्थस्यात्मन एव भवतीति सर्वजनप्रसिद्धम् । स च ज्ञाताऽहमर्थों यदि मोक्ष समयेस्वस्य विनाशमवगच्छेत्तदा स कथमपि मोक्षविपयकस्पृहां न करिष्यति, मृतस्यभोगाभावात् । अत एव "जीवन्नरोवर्षशतानि भुंक्ते" इति न्यायात् सर्वोंपिसर्वदास्वसत्वंमेवेच्छति, नतु स्वविनाशं

ममविनाशोत्तरं कश्चित्प्रकाशो भविष्यतीतिकृत्वातदर्थंकश्चिदपि स्वस्थः पुरुषस्तत्र प्रवृत्तिं कुर्यादिति, देहगेहादि उपलक्षितः कश्चिद् भविष्यतीति कृत्वा स्वमरणाय न कश्चिदपि तत्र प्रयत्नशीलोभवतीति ।

एतेनाहंजानामीति प्रतीतोयोऽनिदमंशश्चैतन्यमात्रस्वरूपः प्रकाशः स एवात्मा । तस्मिन्नात्मरूपाधिष्ठानेज्ञायमान आत्माधीनप्रकाशो युष्मदर्थोऽहमर्थः स नात्मा कथमपीच्छति । अत एव "आमवातकृतजडशरीरोत्थातुमसमर्थोऽनेकदुःखंभुञ्जन्नपि स्वविनाशंनेच्छति । "मानभूवं न भूयासमिति प्रेमात्मनीक्ष्यते" । मोक्षकाले स्वविनाशावगमेकथंमोक्षमिच्छेन्न कथमपीति । तथासति मुक्तेरपुरुषार्थत्वप्रसङ्गात् । नवा मोक्षकाले स्वविनाशंजानन् मोक्षसाधनतत्साधनानुष्ठानयोः कश्चिदपि प्रवर्तेत, एवंज्ञापकतयाऽनुष्ठापकतया च प्रमाणभूतानां मोक्षप्रतिपादकशास्त्राणां श्रुतिंस्मृत्यादीनां प्रमाण्यं विलुप्येत । न चैतदिष्टम्, स्वतःप्रमाणतायाः स्वीकारादितिं । **मम विनाशेति** यथा शरीरतदधिष्ठानोपलक्षितः कश्चिद्भूभागः शरीरादि विनापि स्थास्यत्येवेति देहगेहादिविनाशोत्तरमपि, इति जानन् विद्वान् स्वकीयशरीरस्य गृहादेश्च विनाशाय प्रवर्तमानो दृश्यते । तथैव ममविनाशानन्तरमपि मोक्षकालेऽहमर्थोपलक्षितः कश्चिदर्थः स्थास्यत्येव मोक्षकाले इति बुद्ध्वापि स्वस्वरूपविनाशात्मकमोक्षायज्ञाताहमर्थोनकमपि प्रवर्तेत इति । एवं चैतन्मतस्यनिराशात्मकत्वमेवापततीत्यतः प्रच्छन्नवौद्धोयमिति कृत्वाश्रुतिसारविद्भिरुपेक्षित इत्यतोज्ञाताहमर्थएवेति संक्षेपः । विस्तरस्त्वन्यत्रावधातव्यः ।

एतेनेत्यस्यपरास्तमित्यनेन सम्बन्धः । एतेनवक्ष्यमाणप्रत्यक्षादिविरोधकथनेन यदिदमुच्यते तदपिखण्डितंभवतीत्यर्थः । आत्मनो ज्ञानरूपत्वात् चित्वात् स्वयंप्रकाशत्वम्, तदनन्तरंप्रत्यक्त्वंसिद्ध्यति, तदनन्तरमात्मत्वज्ञानस्यैवनत्वहमर्थस्याहंजानामीति प्रतीतिविषयस्येति । एतन्मतंनिराकर्तुमाह **एतेन** इत्यादि । अयंभावः—अहंजानामीतिप्रत्यक्षप्रत्ययेचैतन्यमात्रस्वरूपः परागूविषय व्यतिरिक्तः प्रत्यक् यः खलु, जानामीतिज्ञायते, स प्रकाशरूपएवात्मा । एतादृशप्रकाशात्मकरूपेऽधिष्ठाने, शुक्त्यधिष्ठानेरजतादिवत्, तस्मिन्नात्मरूपेधिष्ठाने भासमानोऽधिष्ठानाधीनप्रकाशोऽहमर्थोवस्तुतो युष्मदर्थ एव. स च नात्मा, तस्य वाह्यविषयाऽगन्तुकत्वात् । तस्मिन्नधिष्ठाने इति कथनात्, अहमर्थे चिदभिन्नत्वं ज्ञापितम्, आधाराधेयभावस्थले गृहे देवदत्त इत्यादौभेदस्यदर्शनात्, इहापितस्मिन्नित्यनेनाधाराधेयभावस्यकथनात् तस्य च भेदघटितत्वादिति । तद्वलनिर्भासितत्वेति कथनेनाध्यस्तस्यास्वप्रकाशतत्वंनिवेदितं कथितम् । लक्षणतोयुष्मदर्थस्यानात्मत्वेहेतुरुक्तः । एवञ्चज्ञानंस्वप्रकाशं ज्ञानत्वात्, यन्नैवंयथाघटादिः । ज्ञानंप्रत्यक्रूपंस्वयंप्रकाशत्वात्, ज्ञानमात्माप्रत्यक्त्वादिति । तथा अहमर्थोनस्वप्रकाशः, चिद्भिन्नत्वात्, घटादिवत् । अहमर्थः पराक् अन्याधीनप्रकाशत्वात् घटादिवदेवेतिं । अनुमानत्रिकं प्रदर्शितमिति पूर्वपक्षः ।

पराग्रूप एवेति तदपि परास्तम् । कुतः ? प्रत्यक्षादिप्रमाणविरोधात् । अहं जानामीति प्रत्यक्षसिद्धश्चेतनः स युष्मदर्थ इति कथनं माता मे वन्ध्येतिवद्व्याहतार्थकमेव भवतीति, न चासावहमर्थोऽन्याधीनप्रकाशः स्वयंज्योतिरूपत्वात् । प्रकाशस्वरूपश्च, प्रकाशरूपत्वादेवायं कस्यचित् संवन्धीसूर्यादिप्रकाशवदिति नायमात्मा संभवति तस्माज्ज्ञातृतयासिद्ध्यन्नहमर्थ एवात्मा नज्ञानमात्रमात्मा ।

उत्तरयति **प्रत्यक्षादिप्रमाणविरोधात् !** अर्थादत्र चितोज्ञानमात्रस्यात्मत्वस्वीकारे धर्मिग्राहकप्रमाणवाधः कथितोऽग्निः शीत इति, तत्रधर्मिणोवन्हेर्ग्राहकं प्रमाणंस्पार्शनप्रत्यक्षम् , तेनाग्नेरुष्णस्पर्शवत्तयैवग्रहणात् शीतस्यवाधो भवति । इहापि आत्मग्राहकप्रमाणेनाहंजानामीत्यनेन ज्ञानस्यधर्मरूपतयैवग्रहणात् , धर्मितयाज्ञानस्य विषयीकरणे वाध एव भवतीति । **माता मे वन्ध्यावदिति** या प्रसवकर्तृसैवमाता भवति या च प्रसवं न करोति सा वन्ध्या, तथा च माता वन्ध्येति विरुद्धार्थकम् तथैवाहमर्थो युष्मदर्थ एवेति कथनमपिपरस्परं विरुद्धमेव । अहं प्रत्ययआत्मानं प्रतिपादयति, युष्मदर्थस्तुतद्व्यतिरिक्तंवाह्यमर्थंप्रतिपादयति । युष्मदस्मदोस्तुः अन्धकारप्रकाशवदति विरोध इति विरुद्धार्थयोः सामनाधिकरण्यस्य सर्वथैवासंभवात् । नहि भवति तमः प्रकाशयोस्तादात्म्यं परस्परसंवन्धोवासंभवात् । नन्वहमर्थपराक्त्वमात्मभिन्नत्वं चिदधीनप्रकाशत्वेन भविष्यति, अर्थात् यदाहमर्थः प्रकाशते तदाचिदधीन एव नतु स्वतन्त्रस्तस्यप्रकाश इति चिदधीनप्रकाशत्वादसावहमर्थोनात्मेत्याशयेनशङ्कते **नचासावहमर्थोऽन्याधीनप्रकाशः** इति । अर्थात् यथाघटादयः स्वभावजडा यदायदाप्रकाशन्ते ज्ञानविषयाभवन्ति तदातदास्वान्यस्यप्रकाशमपेक्षते एव तथा दर्शनात् तथैवाहमर्थोपि स्वान्यप्रकाशसापेक्ष इति घटादिवदेतस्यनात्मत्वमिति प्रश्नाशयः । तत्रोत्तरस्वरूपन्तु चैतन्यस्वभावतयाहमर्थोनान्याधीनप्रकाशः स्वयंज्योतिरूपत्वात् । स्वयंज्योतिष्ट्वं चास्य स्वप्नवस्थामधिकृत्य स्वयंश्रुतिरेववक्ति "अत्रायंपुरुषः स्वयंज्योति भवतीति । तत्रस्वयंज्योतिर्ब्राह्मणे बृहदारण्यकीये "यदाखलुयाज्ञवल्क्य ? यदाऽस्तमिते आदित्ये चन्द्रादावस्तमिते किं ज्योतिरयं पुरुष इति प्रश्नस्य प्रवाहे "यदाखलुसर्वावभासकसूर्येऽस्तमितेचन्द्रादिप्रकाशं पुरस्कृत्यसर्वोपि स्वस्वव्यवहारं करोति वन्हिनक्षत्रान्तप्रकाशास्तमये, तत्काले पुरुष एव स्वयंज्योतिःस्वभावो भवति, पुरुषपदेन चात्राहमर्थ एवोपलभ्यते, तस्यजीवनादारभ्यमरणपर्यन्तमहंपदेन ग्रहणादितिजीवनादारभ्यान्तिमश्वासपर्यन्तमनुवर्तमानतया स एवाहमर्थः आत्मा, तस्यैव श्रुतिस्वप्रकाशरूपत्वं समर्थयतीति । प्रकाशश्च साक्षेपो यथा प्रदीपः प्रकाशवतः स्वातिरिक्तधर्मिणमाक्षिपति । नतु प्रकाशो निरपेक्षः । केवलप्रकाशस्य स्वातन्त्र्येणनात्मत्वं धर्मत्वात् ततश्चजानामीतिप्रत्यक्षप्रमाणेन ज्ञातृतयैवाहमर्थस्यसिद्धिर्भवतीति स एव मुख्यआत्मेत्यावालगोपालंप्रसिद्धिः । तस्मात् न केवलं ज्ञानमात्मा नवा केवलोऽहमर्थः किन्तुधर्मभूतज्ञानप्रकारः स्वरूपतःप्रकारीज्ञातेवाहमर्थःप्रमात्मासिद्ध्यतीतिकथं तस्याधीनप्रकाशत्वमिति संक्षेपः ।

सचाहमर्थआत्मा, मोक्षकालेप्यात्मनेऽहंरूपेणैव प्रकाशते, स्वस्मैप्रकाशमानत्वात् । यस्तु स्वस्मैप्रकाशते, स सर्वोऽप्यहमित्येव प्रकाशते, यथोभयसंमतः सुखदुःखादि भजनशीलः सांसारिक आत्मेत्यन्वयदृष्टान्तः यः खलुअहमिति रूपेणनावभासतेनासौ स्वस्मैप्रकाशते इति व्यतिरेकी दृष्टान्तः । स्वस्मै प्रकाशते च मुक्तिकाले आत्मेत्युपनयः । तस्मात् सोहमित्येव प्रकाशते मुक्त इति निगमनमिति ।

मोक्षकालेपि, अहमर्थस्यैवात्मत्वात् तत्प्रकाशस्तदनुवर्तनं भवतीति तर्कबलेन प्रसाधितम् । अथमोक्षकालेमुक्तजीवस्याहंत्वेनभानं भवतीति, अनुमानेनप्रतिज्ञादिनिगमान्तेनपञ्चावयवयुक्तेन प्रदर्शयितुमुपक्रमते **सचाहमर्थआत्मामोक्षकालेपीत्या**दिप्रकरणेन । मुक्तिकालेप्यात्मनोऽहमित्येव प्रकाशते, स्वस्मैप्रकाशमानत्वात् , यः स्वस्मैप्रकाशते स सर्वः अहमित्येवप्रकाशमानोभवति । यथा संसारीआत्मेति, इत्यन्वयदृष्टान्तः । य खलुअहमित्येवं न प्रकाशते स नस्वस्मैप्रकाशते यथा घटादिर्वाह्यपदार्थ इति व्यतिरेकि दृष्टान्तः । स्वस्मै प्रकाशते च मुक्त इत्युपनयः । तस्मात् मुक्तोपि अहमित्येव प्रकाशते इति । यथा पर्वतोवन्हिमान् इति प्रतिज्ञा, धूमादिति हेतुः । यो यो धूमवान् स स वन्हिमान् यथामहानसमित्यन्वयिदृष्टान्तः । यो न वन्हिमान् स नधूमवान् यथा महाहृद इति व्यतिरेकिदृष्टान्तः । वन्हिव्याप्यधूमवानयंपर्वत इत्युपनयः । तस्माद्वन्हिव्याप्यधूमवत्वात्पर्वतो वन्हिमानिति निगमनम् । प्रतिज्ञातसाध्यस्यधूमादिषु व्याप्तिग्रहणकथनद्वारापक्षे उपसंचरणं निगमनमिति । तथैवेहापिमोक्षकालिकात्मनि पूर्वप्रतिज्ञाताहमर्थस्यपुनरुपसंहरणेनाभीष्टसिद्धिः प्रदर्शितेति । ननु दृष्टान्तदृष्टधर्मस्यहेतुद्वारापक्षे व्यवस्थापनं, भवतीति, ततश्चात्रदृष्टान्तेसंसारिकात्मनि, अज्ञानित्वं संसारित्वं च विद्यते इति मुक्तिकालिकेप्यात्मनितयोः प्रसक्तिः स्यादित्याशङ्क्य तादृशींशङ्कामपनेतुमुपक्रमते **न चैवं यथोक्तरूपेण** इत्यादि । मुक्तस्यापि संसारिवदेवाहंत्वेन भासमानत्वे, यथा संसारी, अज्ञानवान् भवति तथैवमुक्तोप्यज्ञानवान् , स्यात् , ततश्चमोक्षार्थं न कोपि प्रयासंकुर्यादितिमोक्षकथैवास्तमियादित्यर्थः प्रश्नवाक्यस्य । उत्तरयति **तथात्वे मुक्तत्वविरोधादिति** । यदि संसारिवाज्ञानित्वं तदामुक्तत्वविरोधात् , अर्थादज्ञानराहित्यमेवमोक्षः, तदापितत्सत्वे कोनामस्वस्थात्मामोक्षायप्रयतेत । अर्थात् मुक्तस्य—अहंत्वेन भासमानत्वे तस्यमुक्तस्य संसारिकात्मवत् , अज्ञानित्वादिप्रसङ्गोनापादनीयस्तथा सति मुक्तत्वविरोधात् , शास्त्रप्रतिपादित मोक्षकालिकाज्ञानादिनिवृत्त्यादिविरोधात् । मोक्षकालेऽज्ञानादीनांनिवृत्तिर्जायते इति

भिद्यते हृदयग्रन्थीश्छिद्यन्ते सर्वसंशयाः । क्षीयन्तेचास्यकर्माणि तस्मिन् दृष्टे परावरे ॥

इत्यादिनापापादिसर्वदोपकारणाज्ञानादीनामभावः परमेश्वरसाक्षात्काराद् भवतीति श्रूयते । पापादिरूपकार्यस्याभावः अज्ञानादिकारणस्याभावादेव, अज्ञानाभानश्च परमेश्वरसाक्षात्कारजन्य इति परमेश्वरज्ञानेन विरोधिअज्ञानादेरभावस्तेन च पापाद्यभावो भवतीति । तत्कथमुच्यते मुक्तस्यज्ञानिनो-

नचैवं यथोक्तरूपेण मुक्तस्यभासमानत्वे तस्य सांसारिकात्मवदेव ज्ञानित्वसंसारित्वप्रसङ्गस्यादिति वाच्यम्, तथात्वेमुक्तत्वविरोधात्, अज्ञानोपाधित्वाभावादहं प्रत्ययस्येति। न चाहं प्रत्ययस्याज्ञानोपाधित्वम्, ब्रह्मज्ञानविनाशिताज्ञानानांवामदेवादिप्राचीनमहर्षीणामपि, अहमितिज्ञानदर्शनात्। तथा च श्रुतिः "तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहंमनुरभवं सूर्यश्च" अहमेव च वर्तामिभविष्यामि च" इति तथा कथमप्य

ज्ञानादिसंभव इति। एवञ्च "मुक्तात्मा, अज्ञानवान्, संसरणधर्मवान् वा अहंत्वेन भासमानत्वात् संसारान्तर्गतजीववत्" एतदनुमानम् मोक्षविधायकशास्त्रबाधित्वादुपेक्ष्यम् यथा "नरशिरः कपालंशुचिप्राण्यंगत्वात् शंखवदित्यनुमानम्, अस्थिशुचित्वापादकम् 'नरास्थिस्पृष्ट्वासवासाजलमाविशेदित्यादिशास्त्रबाधितमस्थिः शुचित्वेप्रमाणं न भवति। यथा वा वन्हिशीतोद्रव्यत्वादित्यनुमानमग्नेः शैत्यापादकम्, स्पार्शनप्रत्यक्षबाधिततया, तथा "अग्निर्हिमस्यभेषजमित्यर्थवादशास्त्रबाधिततया न प्रमाणमितिकृत्वोपेक्षितं भवति तथैव प्रकृते मुक्तस्याज्ञानित्वापादकमनुमानं मोक्षशास्त्रबाधित विषयतया बाधितमेवेति। अथ मुक्तपुरुषस्य युक्त्याऽज्ञानवत्वं साध्यते, किन्तु यदिमुक्तात्माहंत्वेन भासेत तदाऽज्ञानादिसांसारिकधर्मवान् स्यात्, यथा यद्ययंवन्ह्यभाववान् तर्हिधूमाभाववान्स्यादेवेतिवदिहापिनियतप्रसंजनमेवक्रियते इतिचेत्तत्राह **अज्ञानोपाधित्वाभावादहं प्रत्ययस्येति** अहमितिप्रत्ययस्याज्ञानकारणकत्वाभावादित्यर्थः। आपाद्यव्याप्यापादकवत्ताज्ञानम्, आपादनेकारणं भवति। तत्रापाद्यंव्यापकमापादकं च व्याप्यम्, तथा चापाद्यापादकयोर्व्याप्यकभावे सत्येवापादानं भवति, न चात्रापाद्यापादकभावोविद्यते, तन्नियामककार्यकारणभावस्याभावात्। न चात्राज्ञानं कारणमहमितिप्रतीतिश्चकार्यम्। यतोवामदेवादिऋषीणांब्रह्मात्मापरोक्षज्ञानेनाशे ततो विनाशिताज्ञानानामपि, अहमस्मीत्याकारकप्रत्ययोजायते इतिशास्त्रेश्रवणात्। यदि कदाचिदज्ञानमहंजानामीत्याकारकप्रत्ययस्यकारणंस्यात्तदा, अज्ञानिनामेवाहंप्रत्ययः स्यात् यथाऽस्माकं संसारिणां जायते, अज्ञानाभावेचाहमिति न स्यात्, परन्तु नैवं भवति निर्गताविद्यानामपिवामदेवादीनां अहमिति प्रत्ययदर्शनात्। यथाघटदण्डयोः प्रमाणवलात्कार्यकारणभावे निश्चिते दण्डाभावे घटो न जायतेऽपितु दण्डसत्त्वेएवजायते इति लौकिकीस्थितिस्तथैव प्रकृते यद्यज्ञानामहमिति प्रतित्योः कार्यकारणभावाभावेऽज्ञत्वं यस्याविद्यते तस्यैवाहमिति प्रतीतिःस्यादपिसंसारस्येत्येवमन्वयसंभवेपि, व्यतिरेकस्तुनात्र संभवति, यतोवामदेवादीनामज्ञानरूपकारणस्याभावेपि, अहमित्या कारककार्यलक्षणप्रतीतेरभावदर्शनात्। अर्थात् वामदेवादावज्ञानात्मककारणस्य विद्यमानत्वेपि अज्ञानकार्याहमिति प्रतीतेरभावादितिव्यतिरेकव्यभिचारात्, अज्ञानाहंप्रतीत्योर्नास्तिकार्यकारणभाव इति स्थितम्। ततश्चापाद्यापादकयोः कार्यकारणभावस्याभावान्नापाद्यापादकभावस्तदभावे च न भवति, अहमिति-

विद्यादिक्लेशपञ्चकैरस्पृष्टस्य परमपुरुषस्य जगन्निदानस्यापि, अहमितिरूपेणस्वस्वरूपस्याभिलापः श्रुतिस्मृतिषु समधिगतः। तथा च श्रुतिः "हन्ताहमिमास्तिस्त्रोदेवताःस्वेनरूपेणानुप्रविश्यनामरूपे व्याकरवाणि" "स ईक्षतलोकान्नुसृजा" इति। तथा स्मृतयोपि भवन्ति, "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽमिलोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसंमूढ़ोः जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत। तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न प्रतीतेरज्ञानजन्यत्वम्, तदभावे संसारित्वापादानंमुक्तपुरुषस्येति। अज्ञानमुपाधिः प्रयोजकंयस्य सोऽज्ञानोपाधिरिति बहुव्रीहिसमास इति।

अहमिति प्रत्ययस्याज्ञानकरणकत्वं नास्तीत्यत्र वामदेव एव तथेति कथितम्, तत्र कुत्रेदंश्रुतमिति जिज्ञासायां प्रमाणभूतआचार्यःश्रुतिमुदाहरति "तद्धैतत्पश्चात्ऋषिर्वामदेवः प्रतिपेदे अहंमनुरभवंसूर्यश्च, अहमेववर्तामिं भविष्यामिचेत्यादि, गर्भेशयान एव वामदेवः स्वस्य सूर्यादिस्वरूपत्वमुदाजहार, नह्येतदविद्यावृतः संभतिः, अविद्यायाज्ञानस्यतिरस्कारात्, एतादृशकथनंकथमप्युपयुक्तं न स्यादिति। **अहमेव च वर्तामि** इत्यादि, एतद्वचनंरुद्रवाक्यंतच्चाथर्वशिरसि वेदेदृष्टत्। रुद्रश्च त्रिकालदर्शीकर्तुमकर्तुमन्यथाकर्तुंशक्तः। नैतादृशःपुरुषकथमपिअविद्यादिमान् संभवति, सोपिस्वात्मानमहंजानामीति प्रतिपद्यते, ततश्चाज्ञानाहंप्रत्यययोः कार्यकारणभावं प्रतिरुणद्धीति। न च परमपुरुषव्यतिरिक्तानांवामदेवादीनामहं प्रत्ययोभवति सतुअज्ञानस्यविनाशेपि लेशतोऽविद्याया अनुवर्तना भवतीति तत्राह **तथा कथमपि अविद्यादिक्लेशै** रित्यादि, योगशास्त्रे "अविद्यास्मिता रागद्वेषाभिनिवेशपञ्चक्लेशानांनिरुपणंकृत्वा, तदनन्तरम् "क्लेशकर्मविपाकाशयैरपरामृष्टःपुरुविशेष ईश्वरः" इत्येवं परमपुरुषीयस्वरूपं प्रतिपादितम्। तत्र सर्वदासर्वथाऽविद्यादि पञ्चक्लेशरहितस्यपरमेश्वरस्याहमित्याकारकप्रतीतिर्जायते साऽविद्यादिमूलक इतिवक्तुं न शक्यते "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषईश्वरः"इतिपरमेश्वरलक्षणम्। तत्राविद्यादिभिःसर्वदाऽसम्भद्धस्यपरमेस्वरस्यस्वात्मनियोऽहमित्यात्मनिज्ञानं तन्नाविद्यादिमूलकमिति संभवेत्। सृष्टिपूर्वकालेऽहंकाराद्युपाधेरसंभवात्, तत्कालिकोऽहंमिति प्रत्ययोभगवतःपरमपुरुषस्य न परोपाधिप्रयुक्तोऽपितुस्वरूपप्रयुक्त एवेतिप्रदर्शयितुं सृष्टिप्राक्तनकालिकसंकल्पवाक्यस्योपादानं कृतवान् "हन्ताहमिमास्तिस्त्रोदेवताः" "बहुस्र्याप्रजायेय" "स ईक्षत" इत्यादि। अत्र चिदचिदन्तर्यामिस्वरूपबोधक "हन्ताहमिंमाः" इत्यत्र "अहमितिशब्दः। तथा मुक्तप्राप्यपरमेश्वरवाचकः "यस्मातूक्षरमतीतोहमक्षरादपिचोत्तमः। अतोऽस्मिलोके वेदे च प्रथितः "पुरुषोत्तमः" इति गीतावाक्येभगवतोऽवबोधकोऽहमितिशब्दः। न चात्रसोपाधिकईश्वरोऽन्तर्यामी वा मुक्तप्राप्यो वा भवतीतिभावः। तथा मृत्युसंसारमहासागरोत्तारकंपरमशुद्धमेवस्वरूपंगभवतोऽहमितिनिर्दिष्टं तेपामहंसमुद्धर्तामृत्युसंसारसागरादित्यत्र। नहि सोपाधिक इतरानुद्धर्तुं समर्थः संभवेत् "नहि

चिरात्पार्थ मय्यावेशितचेतसाम् ।" "अहंवीजप्रद:पिता" "वेदाहंसमतीतानिवर्तमानानिचार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन" इत्यादिवचनैः स्वस्वरूप महंममादिपदेन भगवानपि व्याजहार ।

ततश्च साक्षादहमर्थात्मापेक्षयातिविलक्षणेपि देहादौ परंपरया प्रकृतिपरिणाम विशेषेणाहमित्याकारकप्रत्ययोजायते सतुभ्रमात्मक एव । तदभिप्रायकोऽहंकारस्यक्षेत्रान्तभावोपदेशो भगवतः श्रीकृष्णस्य "महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इन्द्रि-

स्वयमशक्तः परान्तारयतीति न्यायात् । अर्थात् सर्वथाऽविद्याक्लेशादिभिरसंस्पृष्टस्य परमपुरषस्य यदहमात्मनिपरमेश्वरोहमित्यादिज्ञानंजायते नतदविद्यामूलकम्, सर्वदाप्रकाशात्मके तस्मिन् तमोरूपायाअविद्याया:संभवायोगादिति । सर्गपूर्वकालेऽविद्याद्युपाधेरभावेन तत्काले जायमानोऽहमित्यात्मनि यः प्रयोग:परमेश्वरस्यजायतेस तु नस्वरूपप्रयुक्तः परोपाधिप्रयुक्तो वा ! स्वस्मिन् तदुपाधेरभावात्, परोपाधिनापरस्यसम्बन्धाभावाच्च,किन्तु स्वकीयं यत्पारमेश्वरंरूपंतत्प्रयुक्तमेवपरमेश्वरेऽहंप्रत्ययो जायते । एतदेवदर्शयितुम् "हन्तामिमास्तिस्त्रोदेवताजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणि". इत्यादि मार्गविषयकसंकल्पवाक्यस्यकथनमकरोत्, हन्ताहमिंत्यत्रचिदन्तर्यामिस्वरूपस्य प्रज्ञापकः । तथा "यस्मात्क्षरमतीतोहमक्षरादपिचोत्तम:"इत्यत्रयोयमहंशद्वः स मुक्तैः प्राप्यपरमेश्वरस्वरूपस्यवाचकः। नहि सोपाधिकईस्वरोऽन्तर्यामी वा मुक्तप्राप्यो वा भवतीतिभावः तथा "तेपामहं समुद्धर्तामृत्युसंसार सागरात्" इदमीयाहमिति पदंमृत्युसंसारतारकं शुद्धमेव भागवतं स्वरूपं दर्शयति—नांह सोपाधिरितरेषामुपाधिमोचनाय शक्तो भवति, नहिस्वभावदरिद्रोऽन्यस्य दारिद्रयं परिहर्तुं शक्तो भवति । "अहंवीजप्रदः पिता" एतद्वावाक्यघटकोऽहमिति शद्व:पितृत्वरक्षकत्वाद्यभिप्रापकः । अहंपदवाच्यंजगत्कारणस्वरूपंयत्तत्स्वरूपं भगवतोनाज्ञानोपहितम्, नवातज्ज्ञानमात्रमेव किन्तु सर्वंजानातीतिव्युत्पत्तिसिद्धंसर्वज्ञमेवेति ज्ञापनायैव "वेदाहंसमतीतानिवर्तमानानीचार्जुन" अत्राहमितिपदमुपात्तम् । ततश्चाहमर्थएवात्मा, न ततो व्यतिरिक्तोज्ञानमात्र स्वरूप इति सिद्धम् ।

अथैवमहंभावस्यात्मस्वरूपत्वं यदि मन्येत तदाहङ्कारस्यक्षेत्रे परिगणनंहेयत्वप्रतिपादनं च गीतायां यत्कृष्णेनकृतं तत्सर्वथैवासङ्गतंस्यादित्याशङ्क्य तन्निराकरणायोपक्रमते आचार्यः—

ततश्च साक्षादहमर्थात्मापेक्षयेत्यादि । परंपरया प्रकृतिपरिणामविशेषणेति ।

आव्यक्तिपरिणामविशेषोऽहंकारः सर्वस्यप्रपञ्चस्यमूलकारणंप्रकृतिः तदनन्तरम् गुणानांवैषम्यात्, प्रकृतेः सकाशात्, घर्माधर्माद्यष्टगुणकंमहत्तत्वं परिणमतेप्रकृत्याऽविर्भूतं भवति, ततश्च गर्वादिपर्यायोऽभिमानलक्षणोऽहंकारोजायते । "तस्मात्तत्संयोगादचेतनंचेतनात्रदिवलिङ्गम् । गुणकर्तृत्वेपि तथाकर्तेवभवत्युदासीन:" इति प्रकृत्य "प्रकृतेर्महान् ततोऽहंकारस्तस्माद्गणश्च पोड़शकः । तस्मादपि षोडशकात् पञ्चभ्य:पञ्चभूतानि"इत्यादिनाप्रवाहनित्यप्रकृत्याप्रधानेन प्रथमः प्रकृतिपरिणाम-

याणिदशैकं च पञ्चचेन्द्रियगोचराः" वहुमन्तव्यजनावधीरणकारणमसौगर्वापरपर्यायोऽनेकत्रशास्त्रेषु प्रायशोनिराकरणायोपादिश्यते । तस्मादहमित्याकारकः प्रत्ययोबाधक विरहित आत्मविषयक एव । अनात्मनि शरीरादौयाऽहमितिप्रतीतिः साऽविद्यारूपा भ्रम इति । तदुक्तम्—श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ! अना-

भूतमहत्तत्वम्, तस्य च कार्यंपरिणामभूतोहंकारोमहत्वापेक्षयाद्वितीयः प्रधानापेक्षया तृतीयोभिमानलक्षणोऽहंकारः प्रादुर्भवत्येवं रूपेणाहंकारआव्यक्तिपरिणामविशेष इति कथ्यते परंपरयाप्रधानस्य कार्यरूप इति । नथा च यदनहमहंपदप्रतिपाद्यापेक्षया वस्तुतोभिन्नम्, तदहं रूपं क्रियते येन सोऽहंकार इत्यहंकारपदव्युत्पत्तिः । करणंचात्रमानसमेव न वाह्यम् । अर्थात् यस्याहं पदप्रतिपाद्यत्वं नास्तितस्याहंपदप्रतिपाद्यत्वं क्रियते येन स एवाहंकारः । तथा चा वस्तुतोऽनहमिशरीरादौ- अहमित्यभिमानहेतुरनात्मनि देहादौ आत्मभ्रमकारणमहंकारः । एतादृशाहंकारस्यैवक्षेत्रान्ततयोपदेशः कृतोभगवतागीतायामिति नपूर्वापरविरोधो भवतीति फलितम् । ननु "अहंकारंबलंदर्पंकामंक्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" इत्यादौहेयतयाकथितस्याहंकारस्य, अभिजनादिहेतुकदुरभिमानभूगर्वस्वरूपत्वमेव, नतु तादृशाहंकारस्यात्ममूलत्वमितिद्योतयितुमाह **वहुमन्तव्यजनावधीरणेत्यादि**, न अहमित्यनहम्, अनहमहं भिन्नमदं क्रियते येनसोऽहंकारइत्यत्रव्युत्पत्तिरभूततद्भावेऽर्थे । विंशिष्टकुलजातशरीरादौजायमानोआत्माभिमानोऽहंकारः । स चायमभिमानः पूज्यावमानहेतुगर्वहेतुकत्वाद्गर्व इति कथ्यते, अभूततद्भावेच्युरितिच्वर्थमन्तर्भाव्यात्मन्यनात्मनिचोभयत्रापि अहंकारस्यप्रयोगो भवति । च्विप्रत्ययार्थमनन्तर्भाव्यतुव्युत्पन्नोऽहंकारआत्मनिअहंबुद्धिवाचीति भेदः । अर्थात् च्व्यर्थमन्तर्भाव्यजायमानोऽहङ्कारः, आत्मन्यनात्मनीति, उभयत्र तदनन्तर्भाव्यसंजायमानस्तुआत्मन्यहंवुद्धिवाचीतु भेदः । **तस्मादित्यादि** यस्मादहंकारपदस्यात्मनिशरीरादावुभयत्रापि प्रयोगस्तस्मादहमित्याकारिकावाधकरहितासाक्षादात्मानमेव गोचरयति, शरीरादौजायमानातु बाधितत्वाद्भ्रमरूपैव । अर्थात् प्रमाणान्तराऽवाधिताहंमितिमतिर्मुख्या, साऽत्मानमेव बोधयति, देहादौजायमानातुप्रमाणवाधिततया भ्रमरूपैवेति अहंकार शद्बस्यसमानत्वेप्यर्थानुसन्धानवलान्मुख्यत्वे गौणत्वमवाधितत्वं वाधितत्वंवेतिव्यवहारोजायते । आत्मनि प्रयुज्यमानोऽहंकार आत्मवाचीमुख्यश्च, तदन्यत्रप्रयुज़्यमानस्तु गौणोभ्रमादिरूपश्चेति । अत्रप्रमाणतया पुराणवचनमुदाहरति **तंदुक्तमिति** "श्रुयतांचाप्यविद्यायाः स्वरूपंकुलनन्दन ? अनात्मन्यात्मबुद्धिर्या"इत्यादिं । तदग्रेचेत्थमभिहितम् "आत्मन्येष नदोषायशद्बोऽहमितियोद्विज ? अनात्मन्यात्मविज्ञानंशद्बोवाभ्रान्तिलक्षणः" इति । आत्मविज्ञानम्=आत्मविषयिणी, अहमित्याकारिका मतिः । शब्दोहमित्याकारकः । अनात्मनिदेहादौजायमानाऽहंबुद्धिरेवाविद्या, अतद्वतितत्प्रकारिका-

त्मन्यात्मबुद्धिर्यासैवाऽविद्या प्रकीर्तितेति महर्षिणावाशिष्ठनन्दनेनेति नच ज्ञानप्रतिभासकस्य चिदपिशरीरादावस्तीति । येनज्ञानमात्रात्मवादिनाप्यनात्मन्यात्मबुद्धिरुपपद्येत ।

तदेवं प्रत्यक्षसिद्धत्वात् न्यायानुगमात्तर्कात्,अविद्या सम्बन्धाच्चात्माज्ञातैवाहमर्थः सिद्धो भवतीति ।

अघटेघटवदितिबुद्धिवदिति । केनेत्थमुदाहृतं कुत्र ? तत्राह, **महर्षिवाशिष्ठनन्दनेनेति** वशिष्टस्यायमितिवाशिष्ठोवशिष्ठपुत्रशक्तिनामकः तस्य नन्दनःपुत्रतेनमहर्षिणा श्रीसम्प्रदायस्यपष्ठाचार्येण श्री पराशरेण श्रीव्यासपित्रेत्थंकथितमितिभावः । तदेवम्, अहमाकारकबुद्धिरेवात्मविपयिणी, ततश्चाह मर्थ एवात्मा नतुज्ञानमात्रमात्मा, तथासतिज्ञानमात्रस्यात्मत्वे, स्थूलासंविदित्येवदेहात्मभ्रमस्याकारोभवेत् । नतुस्थूलोहमित्यहमर्थघटितस्तदाकारःस्यात्, भवति च स्थूलोहमित्याकारक एव प्रत्ययस्त स्मादपिकारणात्, अहमर्थएवात्मानज्ञानमात्रमिति । यस्यसत्वेदेहादावहमितिरुत्पद्यते यदभावे च देहेऽहंबुद्धिर्नोदेतिसोयमात्मा सुखदुःखादीनांभोक्ता ऐहिकपारलौकिकयात्रानिर्वाहकोऽहमर्थ एवेति युक्तमाश्रयितुमितितत्रेदमुक्तम् **नचज्ञानप्रतिभासकस्यचिदपिशरीरावस्थितीति येनज्ञानमात्रात्मवादिनामनात्मनि आत्मबुद्धिरुपपद्येत इति ।** सम्प्रतिप्रकरणार्थमुपसंहरन्नाह **तदेवमित्यादि प्रत्यक्षसिद्धत्वादित्यादि** घटादिकंजानामिघटादिविषयकज्ञानवानहमितिव्यवसायानुव्यवसायादितया प्रत्यक्षज्ञानाश्रयतया आवालगोपालप्रत्यक्षसिद्धतयाधर्मितयाप्रसिद्धोऽहमर्थ एव ज्ञाताऽत्मा, नतुधर्मतया प्रकारभूतज्ञानमात्रमात्मा । एतादृशाहमर्थस्य स्वापेमुक्त्यादावपि अहन्त्वेनभानं भवतीत्यपि अनुमादि प्रमाणेन साधितम् । तस्मादहमर्थ एवात्मेतिस्थितम् । तथा प्रत्यक्त्वान्यथाऽनुपपत्तिलक्षणस्तर्कोपि अहमर्थस्यात्मत्वसाधकस्तत्रतत्रप्रदर्शित एव सर्वतोवलत्वमन्यथाऽनुपपत्तिलक्षणप्रमाणस्य तदुक्तम् "अन्यथानुपत्तिश्चेदस्तिवस्तुप्रसाधिका । पिनष्टिदृष्टवैमत्यंसैवसर्वबलाधिकेति । यथा, ज्ञाताऽन्योज्ञेयश्चान्योज्ञानं च तदन्यदिति सर्वत्रान्यन्नघटंजानाति देवदत्तइत्यादौदृश्यते, परन्तु अयं नियम आत्मानंविजानामीत्यत्र न स्वीक्रियते, यतोज्ञाताज्ञेययोर्भेदाभावात् । तथा "वाच्यान्यथोपपत्तिर्वात्यांज्योवादृष्टताऽग्रहः । नह्येकत्रसमावेशश्छायातपवदेतयोरिति । तस्मात् प्रत्यक्त्वान्यथा नुपपत्तिलक्षणतर्कोपि आत्मनोऽहमर्थत्वव्यवस्थापको भवति । अर्थादात्मर्थ एव भवति नतु आत्माकेवलंज्ञप्तिरूपइति । तथा स्थूलोहंकृशोहमित्यादिदेहात्मभ्रमात्मकाविद्यासम्बन्धादपिज्ञाताऽहमर्थ एवात्मा भवति न ज्ञानमात्रमात्मेति । सचात्मासर्वकालमहमित्येवं रूपेणैवभासते नतु ज्ञानरूपेणभासते । यदिज्ञानमात्रमात्माभवेत्तदासर्वोपिज्ञानमित्येव प्रतीयात्, तत्तुनप्रत्येति किन्तुज्ञाताऽहमित्येवप्रत्येतितस्मादहमर्थएवात्माज्ञातेति, स्थूलोऽहंकृशोऽहमित्यादौस्थूलत्वकृशत्वादिकादिकं च शरीरस्य रूपस्पर्शादिमतः एवधर्मोनतुरूपस्पर्शादिरहितस्यलोकेतथादर्शनात् । नहि भवति स्थूल आकाश इतिकदापिप्रतीतिराकाशस्यरूप-स्पर्शवत्वाभावात् । तथैवप्रकृते पृथिव्यादिधर्मस्यनीरूपेआत्मनिरूपादिरहितेन कथम

।। ज्ञानात्मत्वसाधकाजडत्वहेतुदूषणम् ।।

यदपि पूर्वं कथितम् "ज्ञानमेवात्माऽजडत्वादिति तदपि न युक्तम् अजड़त्वानिरुक्तेः । अथ सदपि यन्न प्रकाशते तज्जडम् तद्भिन्नमव्यभिचरितप्रकाशसत्ताकमजडमिति ? तथा सत्येशादृशोऽजडत्वस्य सुखादावपि विद्यमानेन तेषु व्यभिचारात् ।

पिसत्वंवास्तविकमिति अस्थूलादिमत्यात्मनिस्थूलत्वादिमतिरविद्यैव, एतादृशाविद्यासम्बन्ध आत्मनिजायमान आत्मनोज्ञानरूपतांनिरौति । यत्रज्ञानसम्बन्धस्तस्मिन्नेवकालविशेषेऽज्ञानसम्बन्धोजायते, नतुज्ञानेज्ञानसम्बन्धोऽज्ञानसम्बन्धो वा, नवा ज्ञानविरहितेज्ञानाज्ञानयोःसंबन्धः नहि घटादिरचेतनोज्ञानीअज्ञानी वेति व्यवहारोदृश्यतेउपपद्यतेवेति संक्षेपः ।

आत्माज्ञातैव नतुज्ञानरूपइत्यत्र तादृशात्मनि "अहंजानामि, घटादिविषयकज्ञानवानहमपिज्ञानमित्यादिप्रत्यक्षमेव" अहंकारस्याश्रयोऽयंमनोमात्रस्यगोचर" इतिदर्शनात् । आत्मनि प्रत्यक्षंप्रमामित्यत्रमानसमेव प्रत्यक्षमभिमतम्, वाह्यविषयकज्ञानस्येन्द्रियव्यवहितत्वेन साक्षात्वाभावादिति तस्मादहंजानामिज्ञानवानहमित्यनुव्यवसायादेः साक्षादेवसाधकत्वात् ज्ञानस्याशरीरादिधर्मत्वनिराकरणात् "शरीरस्य न चैतन्यं मृतेषु व्यभिचारातः । तथात्वं चेदिन्द्रियाणामुपघाते कथंस्मृति" रित्यादौ प्रतिपादनात् । एवञ्च ज्ञानं न देहधर्मआन्तरधर्मत्वात्सुखादिवदित्यादिपरिशेषानुमानेनज्ञानाश्रयतयाऽहमर्थस्यैवज्ञातृत्वंसिद्धं भवति । "ज्ञाज्ञौ" इत्यादिशास्त्रमपिप्रमाणम् । किञ्चज्ञानसमानाश्रयत्वमेवाज्ञानस्येतिनियमः । यत्रज्ञानंभवति तस्मिन्नेवाश्रयेअज्ञानमपि भवति, नतुज्ञानानाश्रयेक्दाप्यज्ञानं भवति, नहिघटोऽज्ञानवान् भवतीतिप्रत्ययोजायते । तत्कुतः ? ज्ञानाश्रयत्वाभावात् । ततश्च यदि आत्मनो ज्ञानाश्रयत्वंतस्यातदाऽज्ञानाश्रयत्वमपि न स्यात् । शुक्तौ रजतम्, रज्जौसर्प इत्यादिभ्रान्तिरूपाऽविद्यासर्वस्यापिप्रायोभवत्येवेति, अविद्या सम्बन्धस्यान्यथानुपपत्त्यापिं ज्ञातृत्वमहमर्थस्यैव सिद्ध्यतीतिभावः ।

इतिज्ञातुरात्मनोमोक्षादौसर्वदाप्यहंभावमानसमर्थनप्रकरणे तत्त्वदीपः ।

ज्ञानमात्मा, चित्वात्, ज्ञानमात्मा, स्वयंप्रकाशत्वात्, ज्ञानमात्मा अजडत्वात्, यन्नैवं तन्नैवं यथाघटादिर्जडः "सत्यंज्ञानमनन्तंब्रह्म" "प्रज्ञानंब्रह्म" इत्यादिश्रुत्या यदिपरमात्मनोज्ञानरूपत्वंरोचयेत्तदा, ज्ञानमात्माऽजडत्वात्, यथापरमात्मा, इत्याद्यनुमानेनात्मनोज्ञानरूपत्वमेव नतु स ज्ञातेतितन्मतम् । तत्रात्मनोजडत्वहेतुवलेनज्ञानरूपत्वमसाधयत् पूर्वपक्षे । तत्रस्वप्रकात्वहेतुनां ग्रन्थाद्बहिरेवनिराकृत्य सम्प्रत्यजडत्वहेतुं व्यभिचारविरोधस्वरूपासिद्ध्यादिदोषैर्निराकर्तुमुपक्रमत **यदपि पूर्वंकथित**मित्यादि । अर्थादज्ञानमात्माऽजडत्वात्, यन्नैवंतन्नैवं यथाघटादिजडपदार्थः । इत्येवंक्रमेणज्ञानस्यधर्मभूतस्यात्मत्वप्रसाधने प्रच्छन्नवौद्धेनाजडत्वंलिङ्गमुपन्यस्तं तदजडत्वं विकल्प्यदूषयितुमाह **यदपीत्यादि** ।

नहि सुखादयोविद्यमाना अपि कदाचिदप्यनवभाना दृष्टाभवन्तउपलभ्यन्ते । स्वसत्ताप्रयोज्यप्रकाशत्वमपिनाजडत्वम्, प्रदीपादौव्यभिचारात् । ज्ञानातिप्रकाश-

यत् स्वयं न प्रकाशते विद्यमानमपितज्जडम् यथा घटादिकम् । एतद्विपरीतमव्यभिचरितप्रकाश सत्ताकंतदजडंस्वयंप्रकाशरूपमित्यर्थः । तत्राव्यभिचरितोनियतः प्रकाशोयस्याःएतादृशीसत्तायस्यतदजडम् स्वसत्ताव्यापकप्रकाशत्वमित्यर्थः तद्‌दूषयति सुखादिष्वान्तरधर्मेषुयथोदिताजडत्वस्यविद्यमानत्वेन, तेषुसुखदुःखेच्छाद्वेषप्रयत्नादिषु, आत्मत्वरूपसाध्यस्याभावात्, साध्यतावच्छेदकावच्छिन्नाप्रतियोगिताकाभांववतिहेतोर्विंद्यमानत्वस्यैव व्यभिचारलक्षणलक्षितत्वात्, पर्वतोधूमवान् वन्हेरितिंवदिति । न च वन्हिमान् धूमादित्यत्र सन्धिग्धतयावन्ह्यभाववति पर्वतेधूमस्य विद्यमानत्वेपिनव्यविचारः पक्षेपक्षसमवेतस्यादूषणत्वादिति वाच्यम् , प्रकृते तद्विलक्षणत्वात् । इहतु यथाऽत्मधर्मभूतसुखादावनात्मनि हेतोर्विंद्यमानत्वंनास्तितथैवात्मधर्मेऽनात्मनिज्ञाने आत्मत्वस्याभावाद्‌व्यभिचारस्यदुरुद्धरत्वात् । यथाऽत्मधर्मभूतं सुखादिकंनात्मेति प्रत्येतितथैवज्ञानेपि आत्मत्वस्यसद्भावेनाभ्युपैतिकश्चनेति । न खलु सुखा विद्यमानाः सन्तः कदाचिदप्यप्रकाशमानां भवन्ति, अपितुप्रकाशन्ते एवेति तेषु व्यभिचारस्यदुरुद्धरत्वादिति । न च ज्ञानमात्मा, स्वसत्ताप्रयुक्तप्रकाशत्वादिहेत्वन्तरेणज्ञानस्यात्मत्वंस्यात्, तत्र यस्यस्वसत्तयैवप्रकाशस्तत्स्वसत्ताप्रकाशस्तत्वमेवाजडत्वमिंतिवाच्यम्, तथापि स्वप्रकाशकल्पेप्रदीपे सूर्यादौ वा व्यभिचारस्यतदवस्थत्वात् अर्थात्सूर्यादीनां प्रकाशेसजातीयप्रकाशान्तरस्यानपेक्षणात् । प्रदीपदर्शनायसजातीयप्रदीपान्तरापेक्षाया अदर्शनात् । ननु प्रदीपेप्रदीपान्तरापेक्षाया अभावेपि चक्षुरादिकरणापेक्षाविद्यते एवेतिचेत्, भवतु नाम तथा, तथापि स्वसत्ताप्रयुक्ततायाअनपायात्, स्वसत्तामात्रप्रयुक्तत्वविवक्षणंतु न संभवति, एतादृशाजडत्वस्य ज्ञानेप्यभावेनहेतोर्ज्ञानात्मकपक्षेऽभावात्, हेत्वभाववान् पक्षस्यैवस्वरूपासिद्धत्वरूपत्वात् । विजातीयात्मापेक्षत्वात् प्रकाशमात्रस्येति वक्ष्यते । दोषान्तरमपि भवति, ज्ञानातिरिक्तप्रकाशस्यास्वीकारात्, प्रकाशोनामज्ञानतोऽतिरिक्तोधर्मो न भवति किन्तु ज्ञानमेवप्रकाशरूपम्, इतितत्स्वसत्ताप्रयुक्तप्रकाशत्वलक्षणोहेतुज्ञानात्मकपक्षेनास्ति स्वस्मिन् स्वस्यानवस्थानात् । यश्चज्ञानप्रकाशंनित्यमेव स्वीकुर्वन्ति तेषांमते ज्ञानस्य स्वसत्ताप्रयुक्तत्वकथनं विरुद्धमेव भवति, नहिनित्यश्चप्रयोज्यश्चेति संभवति, नित्यत्वात्, योज्यं न भवति, प्रयोज्यते नित्यता न भवेदिति । किञ्च प्रकाशत्वधर्मो यदिसंविदोज्ञानस्यस्वीक्रियेत, तदास्वसिद्धान्तव्याकोपः प्रसज्येत भवन्मतेज्ञानरूप आत्मनोद्वैतापत्तिभियानिर्विशेषत्वस्यैवाभ्युपगमात्, नित्यत्वविभुत्वादिकंनात्मधर्मः किन्तु कालानवच्छेद्यत्वाभावात्मकमेव, एवं देशानवच्छिन्नत्वमेव । अभावस्याधिकरणरूपतयानित्यत्वविभुत्वयोः तत्र सत्वेपि न द्वैतापत्तिः । भावात्मकधर्मवत्वे एव द्वैतस्यसद्भावो नतु, अभावात्मकधर्मेणद्वैतसंभव इति । किञ्च स्वस्मै स्वयंभासत्वलक्षणम् जडत्वंहेतुरा-

स्यानंगीकारेणहेत्वसिद्धेर्विरुद्धश्चेति । यदि मतमव्यभिचरितप्रकाशोपि सुखादिरन्यार्थमेव प्रकाशते इति ततश्च घटादिवत्सुखादयोजडा एव, तस्मात् सुखादिर्नात्मेति । तदा किं ज्ञानं स्वस्मैप्रकाशते ? अन्यस्मैवाहमर्थस्यजानतः प्रकाशते, अहंजानामीति अहंसुखीति । ततश्चस्वस्मैप्रकाशमानत्वमभिप्रेत्यैव प्रयुक्तोऽजडत्वहेतुः संविदिस्वरूपासिद्ध एव । अतः स्वसत्तयैवस्वात्मानं प्रति, सिद्ध्यन् जडभिन्नोऽहमर्थ एवात्मेति । ज्ञानस्यापि प्रकाशकत्वं तु अहमर्थसम्बन्धाधीनमेव ।

अतएव स्वाश्रयचेतनंप्रति प्रकटत्वम्, तदितरंप्रति अप्रकटत्वं च ज्ञानस्यभवति सुखदुःखादिवदेवेति । न चैवमात्मान्तरसम्बन्धमर्थान्तरं वा समपेक्ष्यायमात्मा स्वस्मै [आत्मने] प्रकाशते । एतत्सर्वमनुपदमेव विज्ञापयिष्ये ।

अथाहमर्थस्यज्ञानेनसहसहोपलंभनियमस्तस्याहमर्थस्यापिज्ञानेनभेदं निवारयतीतिचेत्, एवं सतिज्ञानस्यापि मिथ्यात्वप्रसङ्गात् । ज्ञानमपितेनसहोपलंभैवेति, अहमर्थात्मात्वसाधनाय यदि स्वीक्रियते तदा सहेतुः स्वरूपासिद्ध एव तत्राह **यदि मतमव्यभिचरित प्रकाशइत्यादि** सर्वंसूलमत्रानुसंधेयम् । यथाऽव्यभिचरितप्रकाशवानपि सुखादिरन्यार्थमेवप्रकाशते घटवदितिघटादिवदेव जडएवेतिनात्मेति ! तदाकिं स्वात्मार्थंप्रकाशते ? न तदपि परार्थमेवप्रकाशतेऽहं जानामीत्यहं सुखीवदिति । ज्ञानात्मकोपि प्रकाशःस्वाश्रयनिवन्धन एव । प्रकाशत्वं ज्ञानरूपत्वमेव । प्रकाशमानता वा स्वाश्रयार्थं स्वविषय प्रकाशकत्वालक्षणज्ञानत्वमेव प्रकाशमानताचात्मधर्मता हेतु के एव नहि स्वाश्रयादन्यस्मैज्ञानं स्वविषयं प्रकाशयति स्वयं वा प्रकाशते इति दिक् । तस्मात् स्वस्मैस्वयंभासमानत्वमहमर्थस्यैव दृश्यते इत्यहमर्थ एवात्मा न ज्ञानमात्रमात्मा । तत्रप्रकटता-प्रकाशतारूपैव आत्मान्तरसम्बन्धमर्थादाश्रयान्तरसम्बन्धम्, अर्थान्तरमज्ञानादिसम्वन्धमितिभावः । विशेष विवरणंत्वन्यत्रेहापि वा वक्ष्यमाणप्रकरणे द्रष्टव्यमितिं संक्षेपः ।

इतःपूर्वप्रकरणे प्रच्छन्नबौद्धमतेज्ञानस्यात्मत्वसाधकमजडत्वादिलिङ्गं प्रदर्श्य, यथान्यायं तादृश हेतूर्नांनिराकरणप्रकारोपिप्रदर्शित इति प्रच्छन्नबौद्धचर्चयाप्रकटबौद्धोपि स्मृतोभवति, स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इति प्रसङ्गत्यायोगाचारमतसिद्धसर्वंज्ञानज्ञेययोरेकत्वप्रतिपादकतन्त्रांनिराकर्तुमुपक्रमते **अथाहमर्थस्येत्यादि** । अयमाशयःभगवतोबुद्धस्यचत्वारोविनेयाः केचनवाह्यार्थास्तित्ववादिनः सौत्रान्तिकान्तिकवैभापिकाश्च । तत्रापिप्रथमःप्रत्यक्षवेद्यमर्थंविजानाति, द्वितीयस्तुसर्वमनुमेयमास्थितः । तृतीयोयोगाचारः सच ज्ञानमेवसत्यं मनुते ज्ञेयंतु ज्ञानग्राह्यंमिथ्येतिमनुते, चतुर्थस्तु सर्वशून्यतांरोचयते । यद्यप्युपदेशको भगवानेकविधामेवदेशनामुदाजहार, तथापि स्वाशयवशाद्भिन्नमेवोपदिश्यमानं जग्राह, यथावारिदविमुक्तंजलमेकरसकमेव परन्तुतत्तद्भूविकारानासाद्यानेकविधं भवति तद्वत् । तदुक्तं "देशनालोकनाथानां सत्वाशयवशानुगा । भिद्यतेवहुधालोकेउपायैर्वहुभिः पुनः ।

गंभीरोत्तानभेदेनक्वचिच्चोभयलक्षणा । भिन्नापिदेशनाऽभिन्नाशून्यताद्वयवक्षणा" इति । तत्रैतत्तृतीयमतेज्ञानमेवैकं सत्वाह्यार्थस्तु न ज्ञानादतिरिक्तस्तथात्वेज्ञानं साकारतामियात्, ततश्चविषयस्य ज्ञानाकारेनैवविरुद्धत्वात्, अतिरिक्तवाह्यार्थकल्पना निरर्थिकैव भवति तस्मान्नज्ञानातिरिक्तो वाह्यार्थः किन्तु शुक्तावध्यस्तंरजतं न स्वतन्त्रं किन्तु शुक्तिस्वरूपाधिष्ठानानुगतमेव, अधिष्ठानातिरिक्तारोपितसत्ताया अभावात् । तथैवज्ञानेऽध्यस्तोवाह्यार्थो न ततोतिरिक्तः ! तच्चज्ञानंसत्वात् क्षणिकम् । तज्ज्ञानं द्विविधं प्रवृत्तिविज्ञानभेदात्, सुखादिका आन्तरपदार्थाआलयविज्ञानस्याकारविशेषा एव तदुक्तं " यत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत्स्यात् प्रवृत्तिविज्ञानंयन्नीलादिकमुल्लिखेदिति । एवं चान्तरविज्ञानातिरिक्तो न वाह्यःपदार्थः । न च यदिंविज्ञानव्यतिरिक्तोवाह्योनास्ति तदाघटःपटःकुंभादिरिति प्रत्ययभेदःकथंप्रभवेदिति चेत् वासनाभेदादितिगृहाण । यथा परिव्राड्कामुकशुनामेकस्यां प्रमदातनौ । कुणपः कामिनीकान्तइतितिस्रोविकल्पना । अर्थात् तनुत्वेनस्त्रीदेहस्यैकत्वेपि सर्वथाकामादिरहितसर्वोपेक्षकमहात्मनांकुणप इति ज्ञानं भवति, तत्रैव कामोपहतमनसां स्ववासनाविशेषवशादियं कामिनीतिप्रत्ययः, मांसभक्षिजीवानांश्वव्याघ्रादीनांस्ववासनाविशेषवलान्मांसंमदीयंमक्ष्यमतएवकान्तमतिरमणीयमिति प्रत्ययः । यथावा "गतोस्तमर्कः" इतिवाक्ये उक्ते तत्तद्वाक्याभिप्रायेणसूर्यास्तेसन्ध्यासमयाभिसारकालश्चौर्यकालोजात इति प्रतियन्ति । यथावा स्वभावतोऽतितिक्तः सकण्टकोवृक्षोऽन्येषांपीडाकारको भवति, तदेवोष्ट्रस्यातिप्रियः, तथैवघटवासनावान् घटः कुडयादिकथनोत्तरंस्ववासनाविशेषवलात्स्वस्वाभिमतघटादिपदार्थमेवजानन्ति । स्वप्नादिवच्चेदंद्रष्टव्यम् । तथास्वप्नकालेऽविद्यमानोपि घटादिपदार्थः अविद्यावलात्प्रकाशितोभवति ज्ञानेन तथैव जागरणकालिकोप्यर्थोवस्तुतोऽविद्यमानोपि विद्यमानव देवाभाति तत्र स्वप्नकालेनिद्रादिदोषकारणका इमे पदार्थाः हस्तिगवादिकाः इदानीं तु अविद्यादिकारणकाः शुक्तिरजतादिवदित्यध्यस्तत्वात् ज्ञानोपस्थापितामिथ्याभूताज्ञायमानसत्ताका इति नवाह्योर्थःकश्चिद्वस्तुतोविद्यते किन्तुज्ञानवलादेव तथा तथाऽवभासमानाभवन्तीति न ते सत्या इति । अपिच ज्ञानार्थयोः सहोपलंभनियमादपितयोरभेद एव, नतुतयोः पार्थक्येनप्रत्ययः, यदाऽर्थस्तदाज्ञानेन सहैवोपलब्धोभवति, भेदस्तुतयोर्भ्रान्तिमूलक एव, तदुक्तम् "सहोपलंभनियमादभेदोनीलतद्धियोः । भेदश्चभ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये" अयमर्थः यदापदार्थोनीलादिरुपलभ्यते तदाज्ञानंभवत्येव यदा च ज्ञानं तदैवार्थः प्रतिभाति, नतु तथादण्डादिकमुपलभ्यते तदैवघटः किन्तु दण्डादिकारणोत्तरकाले एवघटप्रत्ययः दण्डनिष्पादितोघटो दण्डाभावेपिसमुपलब्धो भवति । अत्रतूभयोर्ज्ञानज्ञेययोः सहैवोपलंभ इति घटादिविपरीतत्वात्, तयोर्ज्ञानज्ञेययोरेकत्वमेव नतु भेदः । यथाऽद्वयेचन्द्रेद्वितीयंश्चन्द्रमातिमिरादिदोषजनितभ्रमवतासमुपलभ्यमानोऽसन्नेव नतु तौ परस्परं वस्तुतो भिन्नौ, अपित्वभिन्न एव विद्यते, भेदस्यभ्रममूलत्वात् ।

दात्मनोऽनर्थान्तरंमिथ्यारूपमेवप्रसज्येत । किञ्चासिद्धोपिभवति विकल्पासहत्वात् । तत्र न संविद्विशेषैः सहोपलंभनियमः प्रत्येकंव्यभिचरितत्वात् । नवाज्ञानविशेषंज्ञान-

ननु भ्रमोपि सतिवस्तुद्वये भवति, तथाशुक्तिकाधिष्ठितसादृश्यादिदोषोपस्थापितरजतादेरारोपो भवति, यथावाजलादौतदन्यस्यचन्द्रादेर्दोषवशाज्जायमानस्तदीयप्रतिबिम्बो जले भवति, तत्कथमत्रैकस्मिन्नेव तस्यैवारोप इति चेत् तत्राह, "इन्दाविवाद्वये" नहिदृष्टेऽनुपपन्नं भवतीति न्यायादेकत्रापिभ्रम सद्भावो न वाधित इति । अनेनप्रकारेणविज्ञानवादीनीलादिपदार्थतदीयज्ञानयोरभेदंस्वीकुर्यन्ति, तत्रानेके प्रश्नप्रकारान् प्रदर्शितवान् । तत्र सहोपनियमादिविविधप्रकारस्य विद्यमानत्वेपि प्रमुखतः सहोपलंभनियममेवपुरतआदृत्याचार्यः खण्डनकरणायोपक्रमते **अथाहमर्थस्य ज्ञानेन सहोपलंभनियम** इत्यादि मिथ्यारूपाहमर्थेनात्मनासहोपलंभनियमात्, सोप्यहमर्थआत्माज्ञानाद भिन्न एव नतु ज्ञानाद्भिन्नोहमर्थआत्मेत्यर्थः । **ज्ञानस्यापिमिथ्यात्वप्रसङ्गा**दित्युत्तरम् । मिथ्याभूतेनाहमर्थेन सहोपलंभनियमस्य ज्ञानज्ञेययोः समानसंविदस्तदभेदात् । अहमर्थेनाभेदाज् ज्ञानस्यापि मिथ्यात्वप्रसङ्गादितिभावः ।

अभिमतविरुद्धापादकत्वात् हेतोस्त्वदीयस्य विरुद्धत्वमितिहेतुदोष एतावता समुद्भावितो भवतीति । संविदोपि, अहमर्थेन सहोपलंभमुपपादयति ज्ञानमपितेन ईत्यादि । तेन=स्वप्रकाशव्यापकवतातेनाहमर्थेन, अहंकारेणसहोपलंभोयस्य तत्सहोपलंभमिति । अपि च तदुपलंभव्याप्योपलंभवत्वलक्षण एव हि सहोपलंभनियमोज्ञानज्ञेययोरभेदसाधकतयाऽभिमतो बौद्धपण्डितैः । सचायं सहोपलंभनियमोऽहमर्थस्य संविदोज्ञानस्याभेदसाध्ये पक्षे स्वरूपासिद्धोऽर्थात् हेत्वभाववान् पक्षो भवतीति तत्राह **किञ्चासिद्धोऽपिभवति विकल्पासहत्वादिति** । अत्रायं विकल्पप्रकारः किमत्रज्ञानविशेषेणघटादिना तेन तेन सहोपलंभोऽहमर्थाहंकारस्याभिमतः ? अथवा ज्ञानविशेषमात्रेण नीलादिज्ञानेन सहाहमर्थस्य सहोपलंभनियमो वा विवक्षितः । अथवा येन केनापि ज्ञानविशेषणाहमर्थस्य सहोपलंभनियमोविवक्षितइत्येवंविकल्पत्रिकं भवति । तत्र प्रथमपक्षेस्वीक्रियमाणेअसिद्धिनामको दोषोभवति । तत्राह **तत्र न संविद्विशेषैः सहोपलंभनियम** इत्यादि । चाक्षुषाद्येकतमविज्ञानप्रकाशंविनापि, अहमर्थस्य ज्ञानान्तररासनादिज्ञानप्रकाशे प्रकाशमानत्वादित्याशयेनकथितंव्यभिचारादिति द्वितीयतृतीयविकल्पेदोषमाह **नवाज्ञानविशेषे ज्ञानमात्रंवेत्यादि** । निर्विंशेषं न सामान्यमितिन्यायात् तदैवतत् सामान्यं यदितदन्तर्गतो विशेषो भवेत् विशेषाभावे किमपेक्षंसामान्यंस्यात्, यथानीलादिघटोऽनेको भवति तदा घटमात्रं सामान्यतया व्यपदिश्यतेनीलादिविशेषणकश्चघटोविशेष इतिं कथ्यते । यत्र विशेषो न भवेत्तदातत्रकश्चविशेषः कश्चसामान्यमिति । । अर्थात विंशेषाभावेसामान्यस्याप्यभावादिति विंशेषाभावकुटैरेव सामान्याभावस्यसाधनादिति । तस्मात् "ननिर्विंशेषं सामान्यमिति न्यायात्, चाक्षुषस्पार्शनाद्यनुमित्यादिव्यतिरिक्ते

मात्रं वा निर्विशेषम् । येनात्मनोऽहमर्थस्यसहोपलंभनियमःस्यादिति । ज्ञानसामान्यं विद्यमानमपिबौद्धमते न तद्वस्तुसदिति । सिद्धान्तनयेतु विषयसम्बन्धंविनापिस्वयंज्योतिःस्वरूपआत्मा विद्यते एव । स्ववाग्विरोधोपि एकं द्वावित्यादिवदेव । द्वयोर्वस्तुनोरेकक्रियासम्बन्धे एव सहशब्दःप्रयुज्यते, पुत्रेणसहागतःपितेतिवत् । नीलंतदीय ज्ञानविशेषमात्रं ज्ञानमात्रं वा भुवि नभवति । चाक्षुषादिविशेषप्रकाशव्यभिचारश्चाहमर्थस्य प्रथमविकल्पखण्डनावसरे कथित एवेति तत्तद्विशेषाभावेपि अहमर्थप्रकाशो भवत्येवेतिभावः ।

अथैवमपि ततत्तत्ज्ञानत्वावच्छिन्नज्ञाननिष्ठप्रकाशेनाहमर्थस्यव्यभिचारेपि ज्ञानत्वावच्छिन्न सामान्यतः प्रकाशस्यनास्तिव्यभिचारोऽहमर्थस्य यतोऽहर्थप्रकाशेज्ञानत्वावच्छिन्नप्रकायस्यावश्यंभावात् । अर्थात् तत्तज्ज्ञानव्यक्तिप्रकाशस्य तत्तदहमर्थप्रकाशस्य व्यक्त्यन्तरेण कदाचिद्व्यविचारसंभवेपि ज्ञानत्वरूपसामान्यधर्मपुरस्कारेण ज्ञानप्रकाशाहमर्थप्रकाशयोर्व्यभिचाराभावात्, इत्याशयेनाह **ज्ञानसामान्यं विद्यमानमपिबौद्धमते न तद् वस्तुसदितीति** । अयंभावःबौद्धमते, अनुवृत्तिप्रत्ययकारणंभावात्मकं पदार्थान्तरम्, नित्यत्वेसत्यनेकसमवेतत्वापरपर्यायंनास्त्येव "नयाति न च तत्रासीत् नचोत्पन्नं नचांशवत् । जहातिपूर्वंनाधारमहोव्यसनसंस्थितिः" इति वदन् बौद्धपण्डितः स्वातन्त्र्येणतत्स्थितिंनिराचकार । नचैवं सति "गौर्गौरितिप्रत्ययःकथंस्यादिति वाच्यम् अतद्व्यावृत्त्यैवनिर्वाहात् । अर्थात् गोत्वंनामपरिगणितपदार्थादतिरिक्तंपदार्थान्तरं नास्ति । तादृशजातिरूपस्यसत्त्वे प्रमाणाभावात्, किन्तु गोत्वादिकंगवेतरावृत्तित्वेसतिगोव्यक्तिमात्रवृत्तित्वरूपमेव भावात्मकमेवेति स्वतन्त्रस्यासत्वेपिस्वेतराभावात्मकत्वात्, तावतैवगौर्गौरित्यादिप्रत्ययानांप्रामाणिकत्व निर्वाहेणानुवृत्तप्रत्ययासाधारणकारणेसामान्यं नास्ति तन्मते । तस्माद्ज्ञानत्वावच्छिन्नसामान्यतोज्ञानप्रकाशस्य सामान्यतोऽहमर्थप्रकाशेनव्यभिचारोनास्तीति कथनं खपुष्पायमाणमिव भवतीतिभावः । बौद्धादिमतान्तरेणदोषं प्रदर्श्यसिद्धान्तरीत्यापिविनापिज्ञानप्रकाशेनाहमर्थप्रकाशोभवत्येवेति दर्शयति **सिद्धान्तनयेतुविषयसम्बन्धं विनापीत्यादि** सर्वप्रत्यक्षानुमित्युपमिति शाब्दत्मकप्रवाहस्यस्वप्नकालेऽभावेपि, अहमर्थप्रकाशोभवत्येव, अन्यथा, यदातदाऽनुभूतवस्तुनोदिनान्तरेस्मरणंनोपपद्येतानुभवितुः स्वप्नकालेऽभावेतस्यदिनान्तरेस्मरणासंभवात् । अथभवतिस्मरणं तस्मात् स्वप्नादिकाले आत्मास्तित्वमनुमानादिसिद्धमेव । स्वप्नादिकालेआत्मवान्, कालत्वात्जाग्रदादिकालवदेवेति । एवम् "अत्रायंपुरुषः स्वयंज्योतिर्भवतीत्यादि श्रुत्या, समस्तवृत्तिप्रत्ययाभावेपि स्वप्नादौस्वयंज्योतिरूपात्मनः सद्भावप्रतिपादनादिति ।

अपि च अहमर्थ आत्मास्वयं प्रकाशः संवित्कर्मतामन्तरेण प्रत्यक्षत्वात् संवेदनवत्, घटज्ञानघटयोःसम्बन्धःआत्मनिष्ठत्वात, पदविषयतावत्, इत्यानुमानाभ्यामात्मनःसंविद्रूपत्वं भवति । अत्रधर्मिभूतज्ञानस्यैवात्मत्वं प्रसाध्यते नतु धर्मभूतेन सहाभेद इति । यदि आत्माज्ञानरूपोन स्यात्

विज्ञानमितिवस्तुद्वयमभिधायतयोरभेद इति कथने "मातावन्ध्येतिवत्" व्याघातोपि भवति । अपि चात्रानेकान्तदोषोपि भवति ज्ञानेनिषिद्ध्यमानजडत्वादिभिः । नियमेनैकज्ञानसिद्धत्वमपियथोक्तप्रकारेणनिराकृतमेव भवति । विपक्षव्यतिरेकश्चासिद्धः ।

तदा आत्मनिज्ञातेतद्विषयकसंशयविपयावपिस्याताम्, संशयाद्यभावोज्ञानरूपत्वे एव स्यात् । न च ज्ञानरूपत्वमन्तरेणापि सुखादिवत्संशयाभावः स्यादितिवाच्यम्, सुखादीनांस्वसत्तायांज्ञानाव्यभिचारात्तथासंभवात् । नचात्मन्येवंसुषुप्त्यभावप्रसङ्गात् । तथा ज्ञानाकर्मत्वादप्यस्वयंप्रकाश एव, वेद्यत्वे स्वाश्रयज्ञानविषयतयाकर्तृकर्मभावविरोधात् । न च सुखादिष्वात्मनः कर्मत्वंकेवलस्यकर्तृत्वमित्याकारभेदाद्विरोधाभाव इति वाच्यम्, तथा सति गमनादिक्रियास्वपिकर्तृत्वंगमनादिविशिष्टत्वेन कर्मत्वमितिसर्वत्रकर्तृकर्मभावोदत्ततिलाञ्जलिः स्यादिति । अत्रायंपुरुषः स्वयंज्योतिर्भवतीति श्रुत्याप्यात्मनः स्वप्रकाशत्वं सिद्ध्यति । स्यादेतत् स्वप्नावस्थामधिकृत्यैतदुक्तं श्रुतौस्वप्ने च मनसोऽनुपरमात्, न स्वयंज्योतित्वम् । न च स्वप्नेमनसोरथाद्याकारपरिणतस्यज्ञानकर्मतयैवावभासमानताज्ञानकरणाभावात्करणान्तराभावान्न स्वयंज्योतित्वमितिवाच्यम्, मनस इन्द्रियत्वेन प्रत्यक्षत्वाऽनुपपत्तेः । तस्मात्मनः संयोगजनितज्ञानाधारत्वेन स्वयंज्योतिशब्दवाच्यआत्मास्वयंज्योतिरिति कथ्यते, अथवा ज्योतिः साघनत्वात् । "वाचैवायंज्योतिषा" अग्निनैवायंज्योतिषा इत्यादिप्रकरणपठितवागग्न्यादितस्मादात्मानः स्वयंज्योतिर्द्रव्यस्यात्मनो गुणरूपत्वानुपपत्तेरितिचेदत्रोच्यते-मनः प्रत्यक्षं ज्ञानासमवायिकारणसंयोगाश्रयत्वात्,आत्मवदित्यनुमानेन मनसः प्रत्यक्षोपपत्तेस्ततश्चधर्मभूतज्ञानाश्रयस्याहमर्थस्यात्मनः स्वयं प्रकाशत्वमिति ज्ञानप्रकाशाभावेप्यहमर्थप्रकाशस्य विद्यमानत्वंसिद्ध्यत्येवेतिभावः । स्ववाग्विरोधश्चापि भवति । एकद्वौवित्यादिवत्, अर्थात्, साहित्यस्यभेदघटितत्वात् सहोपलभ्यमानहेतुप्रयोगोहेतुव्यपदेशस्वरूप एव, तेन सहोपलंभहेतुना, ज्ञानाहमर्थयोरभेदसाधने प्रतिज्ञावाक्यहेतुवाक्ययोविरोधोभवत्येव, एकंद्वित्वादिवदिति । यद्यपि, एकस्मिन्नपि द्वित्वं समवायसम्बन्धेन विद्यते एव, अन्यथा प्रत्त्येकमवर्तमानस्योभयत्रापि वर्तमानत्वाभावात्, अतएव एकोद्वित्ववानित्यपिप्रतीतिर्भवत्येव, तथापिपर्याप्तिसम्बन्धेनोभयत्रैवभवति, एकंद्वावितिप्रतीतेरभावादिति । उभयत्वमुभयत्रैवपर्याप्तमिति नत्वेकत्रेतिपर्याप्तिसम्बन्धेनैकस्मिन् द्वित्वाभावेन, पर्याप्तिसम्बन्धेनैतादृशप्रयोगे एव विरोधो ज्ञातव्य इति । तदेवं प्रतिज्ञाहेतुघटकपदयोर्विरोधमुद्भाव्य प्रतिज्ञाघटकपदयोरपिविरोधंदर्शयितुमाहनीलत्तद्धियोरित्यादि, अयमाशयः "सहोपलंभनियमादभेदोनीलत्तद्धियोः । भेदश्चभ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये" इतीयंप्रतिज्ञा विषयविपयिणोरभेदसाधने । तत्र द्वित्वविशिष्टेविषये विषयिणिचानेकत्वमर्थत एवायाति, तस्मिन् एकत्वविधानं मातावन्ध्येतिवत् परस्परंव्याघातमेवापादयति, नहि मातावन्ध्येतिसम्भवतीति, तद्वदिहापियद्द्वयं न तदेकं भवति कथमपीतिव्याघातोभवत्येवेति । ज्ञानज्ञात्रोरभेदसाधनदूषणप्रसङ्गेऽस्मिन्, ज्ञानज्ञेययोरभेदसाधकप्रयोगदूषणादिसाधनदूषणप्रकारयोःसमत्वादितिध्येयम् । शद्बदोषमुदीर्य्यार्थदोषमपिदर्शयति **अपिचात्रानेकान्त** इत्यादि, तदयमर्थःसंविदोज्ञानस्यस्वप्रकाशत्वाद्-

अपि च ज्ञानज्ञेयादीनामभेदेप्रत्यक्षोवाधः त्रिपुटीज्ञानाभ्युपगमात् । नवाभेद जडत्वादिप्रकाशसमयेज्ञानप्रकाशो नियत एव । ततश्चसंविदाज्ञानेन सहोपलंभनियमवतांजडत्वमूर्तत्व-विषयत्वादीनामपिसंविदोऽभेदे संविदोज्ञानस्यापिजडत्वादिप्रसङ्गःस्यात्, धर्मधर्मिणोर्भेदस्यानुपगमात्, अभेदेप्याधाराधेयभावस्याभ्युपगमात् । घटाभावेघटोनास्तीत्यत्रघटाभावेघटाभावस्यानुभविकत्वादिति ।

एवं सर्वज्ञपुरुषस्य वद्धज्ञानानामुपलंभेनियमतो वुद्धज्ञानमप्युपलभ्यते एवेतितेषांवुद्धज्ञानसहोपलंभानांबुद्धज्ञानादभेदेबुद्धस्यापि वद्धत्वमापद्येत, तत्र तत्र चाभेदानुपगमेऽनैकान्त्यव्यभिचारोदोषो हेतौभवतीतिभावः । एवं ज्ञानज्ञेययोरभेदसाधकहेत्वन्तरमपि समत्वान्निरसनीयमेव, तथाहि नियमेनैकज्ञानसिद्धत्वमपि निराकृतं भवति । तत्रैकज्ञानसिद्धत्वमित्यस्यएकज्ञानेद्वयोः प्रकाशमानत्वमर्थः । तन्न युक्तम्, एकज्ञानविषयत्वेनाहमर्थेसंविदोऽभेदस्यसाधनेतुल्यन्यायेनाहमर्थभेदोपि संविदिज्ञाने प्रसज्येत । चाक्षुषादिज्ञानविशेषेणैवसिद्धत्वंचाहमर्थस्यासिद्धम्, ज्ञानान्तरेणरासनादिनापितत्सिद्धेः । स्वप्नकालेऽहमर्थस्वतःसिद्धेश्च श्रुतिप्रामाण्यादिति । विपक्षेवाधोपि भवति भवतु नियमेनैकज्ञानसिद्धत्वं ज्ञानज्ञेयप्रमातृणाम् । न च भवत्वभेदस्तावता काक्षतिः । तस्मादप्रयोजको हेतुरिति ।

योयं नीलादिर्विषयस्वयमस्वप्रकाशः स किं स्वकीयस्य "नीलमिदंपीतमिदमित्येवंस्वव्यवहार-साधनायस्वप्रकाशंज्ञानमपेक्षते, अथवा, ज्ञानाभिन्नत्वात्, स्वव्यवहारायज्ञानंनापेक्षते, इत्येवंसंशयात्, ज्ञानज्ञेययोरभेदो न साधयितुंशक्यःज्ञानानुरोधित्वं च नीलादेर्विषयस्यज्ञानेनसहैवोपलंभरूपमेव । तत् किं संविदभेदप्रयुक्तमथवा स्वप्रकाशेजडस्यनीलादिविपयस्य स्वप्रकाशसंविदपेक्षाप्रयुक्तमिति संशये सति । अभेदप्रयुक्तत्वनिर्णयो यावन्नभवति तावदस्याभेदसाधकत्वं न संभवति, ततश्चहेतोरप्रयोजकत्वम् । कथञ्चित्प्रयोजकत्वेपिसहोपलंभनियमोवोध्ययोरेवसाधकः स्यात्, नतु बुद्धिवोध्ययोः स्यात् । तत्र ज्ञानानांज्ञातृणां च सहोपलभ्यमानामभेदेबुद्धस्यापिवद्धत्वमापतेत् । नवाबुद्धिवोध्ययोरभेदः संभवति वुद्धेर्जडत्वसङ्गात्, तथासत्यमिथ्यार्थयोरभेदप्रसङ्गाच्च । तस्मान्नज्ञानार्थयोरभेद इति । अपि च योयं सहोपलंभः सतूपायोपेयभावेन, ज्ञानेसत्येवार्थोपलंभात् तदभावेऽभावादिनाभेदप्रयुक्तः किन्तूपायहेतुक एवेति बोध्यम् । विस्तरस्त्वन्यत्र द्रष्टव्यः ।

धर्मभूतज्ञानस्य तथा तादृशज्ञानाधिकरणधर्मिभूतज्ञानरूपात्मनोरभेद एव, तदुभययोर्ज्ञानत्वेन सहोपलभ्यमानत्वनियमेन चाभेदस्यसाधनंकृतवान्, बौद्धः परन्तु तदनुमानम्, वह्निः शीतोद्रव्यत्वादित्यनुमानंपक्षग्राहकौष्ण्यप्रत्यक्षेण स्पार्शनेन वाध्यते, तथैव ज्ञानज्ञात्रोरभेदसाधने, प्रत्यक्षज्ञानेन-वाधित एव भवतीति ज्ञानज्ञात्रोरभेदानुमानं न संभवतीति दर्शयितुमुपक्रमते **अपि च ज्ञानज्ञेयादीनामभेदे प्रत्यक्षोवाधः** इति, कुतः ? प्रत्यक्षवाधस्तत्राह **त्रिपुटीज्ञानाभ्युपगमादिति ।** अर्थात् घटमहंजानामीतिप्रत्यये विपयस्य घटादेर्ज्ञानस्य, तथा ज्ञातुरात्मनश्च प्रत्यक्षत एव परस्परं भेदस्योपलंभेन, ज्ञानज्ञात्रोरभेदसाधकानुमाने भवत्येवप्रत्यक्षवाधः । ततश्च प्रत्यक्षवाधावहतविपय

प्रत्यक्षेप्रतियोगिनःप्रत्यक्षत्वं वा दृश्यत्वं वा कारणम्, प्रतियोगिनोज्ञानमात्रेण तदुपपत्तौज्ञानविशेषस्याप्रयोजकत्वेन तदनपेक्षणात् । प्रतियोगिनोऽप्रत्यक्षत्वेपिविलक्षणाभावाज्ञायन्तेएवेतिसर्वलोलसाक्षिकानुभवात् ।

तयाज्ञानज्ञात्रोभेदसाधकानुमानंसर्वथैवाकिञ्चित्करमिति । मीमांसकोपिज्ञानमात्रंज्ञानज्ञातृज्ञेयादिविषयकं भवत्येवेतिस्वीकृत्यज्ञानज्ञात्रोरभेदं प्रतिरुणद्ध्येवेति । ननुभेदप्रत्यक्षं प्रतियोगिनः प्रत्यक्षकारणम् प्रतियोगिज्ञानमन्तरेणाभावज्ञानस्यानभ्युपगमात् । अन्यथा परमाणुप्रभृति अतीन्द्रियवस्तुनोऽभावोपिं चक्षुरादिनागृह्येत । प्रतियोगिविशेषिताभावज्ञानंविशिष्टवैशिष्ट्यवोधमर्यादांनातिक्रामतीतिनियमात्, तस्माद्भावप्रत्यक्षेप्रतियोगिनः प्रत्यक्षज्ञानंकारणमेवं प्रकृते च ज्ञानस्यानवस्थाभयेनज्ञानान्तराविषयतया, स्वयंप्रकाशत्वाभ्युपगमेनेतिज्ञानभेदस्यप्रत्यक्षंज्ञातरिं न संभवति । ततश्च ज्ञातरिज्ञानभेदासंभवात् कथं प्रत्यक्षेज्ञानज्ञात्रोरभेदानुमानं प्रत्यक्षबाधितमितिकथनं ते सङ्गतमित्याशङ्क्यतन्निराकरणायोपक्रमते **नवाभेदप्रत्यक्षेप्रतियोगिनः प्रत्यक्षत्व**मित्यादि । अयमाशयःघटत्वेनघटात्मकप्रतियोगिनस्तथाभूतलत्वेनाधिकरणभूतलादिप्रत्यक्षेसत्येवभूतलाधिकरणकघटत्वावच्छिन्नघटाभावप्रकारकप्रत्यक्षमुदेतिं । तथा तादृशाधिकरणे एव संयोगादिनाजायमानघटवत्ताज्ञानं प्रतिबन्धकं भवतिं । अन्यथाभूतलाधिकरणकपटाभावप्रकारकभूतलाधिकरणकपटाभावोपिप्रत्यक्षतः परिगृहीतोभवेत् । अतएवसमानविषयकप्रतियोगितदभावयोरेव बाध्यवाधकभावो भवतीतितान्त्रिकाणामुद्घोषः । प्रकृते भेदप्रतियोगिनःप्रत्यक्षाभावेनकथंप्रमातरिज्ञानभेदोगृहीतः ? तदभावेकथंतयोर्भेदः स्यात्, तदभावेकथंप्रत्यक्षाभेदानुभानयोः प्रतिवध्यप्रतिबन्धकभावः संभवेदिति प्रश्नस्यमुकुलिताशयः । तमिममाक्षेपं परिहरति–**प्रतियोगिनोज्ञानमात्रेणतदुपपत्तौज्ञानविशेषस्य** इत्यादि ।

सत्यमभावज्ञाने प्रतियोगिज्ञानं कारणं नतु तत्र प्रतियोगिप्रत्यक्षमेव, किन्तु ज्ञानत्वेनैवज्ञानसामान्यस्यैव, तत् प्रत्यक्षात्मकंभवतु, अनुमित्यादिकं वा, कारणतावच्छेदकेप्रत्यक्षत्वनिवेशस्याप्रयोजकत्वात्, इति ज्ञानान्तराधीनतत्प्रकाशस्यभेदप्रत्यक्षेऽकारणत्वेन, प्रकाशविशेषस्यप्रत्यक्षादिज्ञानान्तराधीनस्यानपेक्षणादिति । अयंभावः-अत्यन्ताभावप्रत्यक्षेप्रतियोगिताया अपेक्षणात् प्रतियोगिनो ज्ञानं प्रत्यक्षादिसाधारणमेव विवक्षितम् । अतएव मेरौपरमाण्वभावः पाषाणे सौरभाभावइत्येवंक्रमेण तत्तत्प्रतियोगिनोऽभावज्ञानमुपजायते । अन्योन्याभावप्रत्यक्षेतु न प्रतियोगिनो योग्यताऽपेक्षिता; किन्तु अधिकरणयोग्यतैवापेक्षिता भवति । अर्थात् अधिकरणं योग्यंभवेत् प्रतियोगीयोग्योऽयोग्यो वा भवतु तत्रनाग्रहः । अतएव स्तंभे पिंशाचभेदश्चक्षुपागृहीतो भवति, स्तंभःपिशाचोनेति प्रत्ययात् । अन्यथाऽतीन्द्रियपिशाचचक्षुरयोग्येन तद्भेदस्यस्तंभे प्रत्यक्षासंभवात् । ममतुपिशाचस्यायोग्यत्वेपिस्तंभस्ययोग्यत्वेन स्तंभे तदीयभेदस्यप्रत्यक्षत्वोपपादनं भवतीति । प्रकृते वेदनस्यज्ञानस्यप्रतियोगिनःप्रकाशस्तुस्वत एव भवतीत्यत एव ज्ञातरिआत्मनि संवेदनभेदप्रत्यक्षे न काप्यनुपपत्तिर्भवतीति ।

अथ विद्यमानंभेदप्रत्यक्षमुपेक्ष्य, सहोपलंभनियमस्याभेदेनव्याप्तिग्रहणं कथं स्यादितिभेदप्रत्यक्षेणाभेदानुमानवाधः संभवति । तथा सति ज्वालाभेदानुमानमपिज्वालैकत्वप्रत्यभिज्ञयावाध्येतेति । दृष्टान्तदार्ष्टान्तिकयोर्वैपर्म्यस्यापरिज्ञानात् तत्रहि

वस्तुतस्तत्तत्साधारणाकार एव, इतरतादात्म्याज्ञानविरोधितयातस्यतस्येतरस्माद्भेदरूपो भवतीति संक्षेपः । स च भेदः प्रतियोग्यनुयोगिनोरनवभासनेपि भासते एवेत्याशयेनाह **प्रतियोगिनः** इति । अर्थात् प्रतियोगिनो ज्ञानाभावेपि, भेदः शादृश्यंचेतरविलक्षणतया भासमानाभवन्त्येवेत्यर्थः । इयान्स्तुविशेषः—यदा प्रतियोग्यनुयोगिनोर्भानं भवति, तत्कालेभेदस्यसादृश्यस्य च स्फुटतरव्यवहारो भवति "घटःपटाद्भिद्यते" इत्यादिरूपः चन्द्रवन्मुखमित्यादिंसादृश्यव्यवहारश्च । यदातु न तयोरुपस्थितिस्तत्कालेपिं भेदत्वेनभेदस्यास्फुटव्यवहारोभवत्येवेति । एवमेव, ज्ञातुरात्मनोऽहंत्वेन यद्ज्ञानं जायते तदेवसंवित् सकाशादात्मनोभेदग्रहणं नातोऽधिकं किमपीति । संविद्भिन्नत्वव्यवहारे पुनः प्रतियोगिज्ञानसहकृतमसाधारणाकारज्ञानं कारणंभवतीतिज्ञातव्यमिति । यत्तुकैश्चिदुक्तम्, भेदस्य प्रत्यक्षं न कथमपिं संभवति, यतो यत्सत्तत्क्षणिकं जलधरपटलवदिति वस्तुमध्यान्तर्गत प्रत्यक्षस्यापिक्षणिकत्वेनप्रतियोगिज्ञानपूर्वकभेदग्रहणकालपर्यन्तमनवस्थानतयाभेदग्रहणस्यासंभवात् । युगपदेवार्थादेकस्मिन् एव प्रतियोगिस्तदभावाधिकरणग्रहणेतु, समूहालंवनज्ञानवदुपश्लेषविशेषासिद्धिप्रसङ्गस्यात् । तस्मात् भ्रमात्मक एव सर्वत्रभेदग्रहइतितन्नसमीचीनम्, तत्तदंशसाधारण रूपस्यघटत्वपटत्वादिधर्मस्यैवेतरभेदरूपत्वात्, तादृशघटत्वादिंधर्मस्य च घर्मिणिघटादौप्रथमक्षणे चक्षुरादिसम्बन्धकाले एव ग्रहणसंभवात् । क्षणिकप्रत्यक्षस्यभेदोन गृह्यते इतिरिक्तमेववचनमिति । दृष्टपूर्वाश्वतएवपूर्वोष्ट्रादिवस्तुग्रहणकाले अश्वादिपशुभ्योविलक्षण एव कश्चन प्राणीत्येवं रूपेण, इतरेभ्योभेदप्रतीतिःसर्वलोकसाक्षिकः सर्वेषामुदेत्येवेति संक्षेपः । विशेषस्त्वन्यत्रावघातव्यः ।

विषय विषयिणोर्ज्ञातुश्चाभेदसाधनायपुनरपिप्रत्युत्तिष्ठते विज्ञानवादीसौगतः **अथ विद्यमानभेदप्रत्यक्षमुपेक्ष्य** इत्यादि । उपेक्ष्यभेदप्रत्यक्षस्यतिरस्कारंकृत्वेत्यर्थः । व्याप्तिग्रहणं प्रतिबन्धग्रहणमित्यर्थः । ततश्च भेदप्रत्यक्षात्, तद्वाधसंभवः अभेदानुमानस्यवाधः संभवति । तथा सति, प्रत्यक्षस्यानुमानवाधकत्वे सतिज्वालाभेदानुमानमपिंज्वालैकत्वप्रत्यभिज्ञयावाधिता भवेत् । अयमाशयः भिन्नत्वेनगृह्यमाणयोरेवपदार्थयोःसहोपलंभनियमस्तयोरभेदव्याप्यतयागृहीतः । तेन चाभेदानुमाने, प्रत्यक्षेभेदग्रहणरूपोंऽशोभ्रमस्वरूपइति निर्णीयते । न च प्रत्यक्षात्मकोपजीव्य विरोधोऽनुमानस्य, प्रत्यक्षसिद्धवस्तुस्वरूपस्यैवव्याप्तिग्रहोपयोगिनोऽभ्युपगमात्, भेदग्रहस्य चव्याप्तिग्रहणेऽनुपयोगात् इतिपूर्वपक्षाशयः । तदेतन्निराकरोति, **दृष्टान्तदार्ष्टान्तिकयोरिस्यादि** अर्थात्दृष्टान्तदार्ष्टान्तिकयोर्विरोधमप्यल्पप्रज्ञोनविजानातीति । तदेवोपपादयति **तत्रहीत्यादि** ।

निश्चितकारणदोषसत्वेपिजायमानोऽपरोक्षावभासोनिर्दुष्टप्रत्यक्षपूर्वकमनुमानं वाधितुंनोत्सहते—तथाहि—ज्वालादौझटिति [अचिर] निर्वापितारोपितैकवर्तिषु अनेकप्रदीपादिषु, ज्वालाभेदाद्दर्शिषुरुपस्याति सादृश्यदर्शनेन "स एवायंमितिस्मरणं जायते इति प्रत्यक्षतो दृश्यते ततश्च तदन्यत्राप्यप्रतिवन्धपुष्कलकारणक्रमोपनिपातादवयवविश्लेषाच्च, सुसदृशनिरंतरप्रवृत्तिप्रदीपप्रवाहालंबनैव तथा [भेद] मतिरितिनिर्णीयते । तथैकन प्रत्यक्षत्वंबाधकत्वे प्रयोजकं नवानुमानत्वंवाध्यत्वे प्रयोजकम् । अर्थात् यत् प्रत्यक्षं तत्स्वभावतोबाधकमेवेति, यच्चानुमानंभवेत्तत् स्वभावतोवाध्यमेवभवतीति नियमः किन्तु यद्दोषमूलकं भवेत्तद्वाध्यं भवति, दोषामूलं च यत्ततबाधकम् । अन्यथानेदंरजतमितिज्ञानेन, इदंरजत मित्यस्यबाधो न स्यात्, कदाचिद्विपर्ययस्यापि संभवात् । अपिंतु दोषाघ्रातकारणेनजायमानं वाध्यम् दोषापरिवर्जितसामग्र्या जायमानंप्रमाणत्वाद्बाधकमेव । ततश्च दोषमूलत्वंबाध्यत्वे प्रयोजकमदोषमूलत्वंबाधकत्वे प्रयोजकमितिविवेकः । तथा च ज्वालाभेदानुमानम् दोषमूलकंभवद्बाकमेव । ज़्वालैक्यप्रत्यक्षज्ञानं प्रत्यक्षात्मकंसादृश्यादिदोषमूलकंभवद् वाध्यमेवभवतिं, यथाशुक्तौजायमानं रजतप्रत्यक्षं सादृश्यमूलकत्वाद्वाध्यं भवति, नतुनेदंरजतमितिवाध्यमपिवाधकमेव तस्योत्तरकालजायमानदोषरहितकारणजन्यत्वात् । तथैव प्रकृते ज्ञातृज्ञानज्ञेयभेदग्रहस्य दोषमूलत्वं नास्ति, ततश्च ज्ञात्रादिभेदग्रहोऽभेदान् प्रतिरुणद्ध्येवेति प्रत्यक्षेणैवात्रानुमानबाधो नतु तद्विपरीतं भवतीति प्रकरणाशयः ।

ज़्वालैक्यप्रत्यक्षंतुदोषमूलकमेवेति तस्यवाधो भवत्येव । तत्र प्रथमतःज्वालैक्यप्रत्यक्षेक्लृप्त कारणेदोषानुवृत्तिमुपपादयितुमाह **तथाहीत्यादि** अत्राचीरप्रशमितत्वपुनरुद्दीपितत्वकथनेन, पूर्वापरज्वालयोर्वस्तुत एव भेदो विद्यते इतिध्वन्यते तद्दर्शनमेकवर्त्तिकृत्तित्वज्ञानंचैकत्वविभ्रमेकारणमिति कथितं भवति। यश्च प्रदीपस्थनिर्वापणमुद्दीपनं च साक्षात्करोति, तस्यज्वालयोर्भेदप्रत्यक्षं वर्तते इति तेन वाधितत्वमपिनिर्वापणोद्दीपनादयद्रष्ट्टनिष्ठज़्वालैक्यप्रत्यक्षे विवक्षितम् । कथितभ्रम कारणमनिर्वापितस्थलेप्युपपाद्य दर्शयति **तदन्यत्रापी**त्यादि । तैलंवर्तिकातदवयवाग्निसंयोगश्च कारणं भवति, तस्योपर्युक्तकारणस्यसर्वत्रसर्वथाभिन्नत्वेन ज़्वालायाअनिर्वापणस्थलेपितद्भेदोऽङ्गी कर्त्तव्यः, तत्र कारणप्रवाहानुवृत्तिवलात् कार्यात्मकज्वालाया अनुवर्तनं भवति, पूर्वपूर्वतरज़्वालाया यत्कारणंतैलवर्तिकानदवयवाग्निसंयोगानांनिवृत्त्यातत्कार्यभूतपूर्वपूर्वज्वालायानिवृत्तिःकारणाभावे कार्यनिवृत्तेरवश्यं भावात् । ज्वालाकारणं तैलवर्त्तिकातदवयवविशेषाग्निसंयोग एव । वन्हेस्त्वाश्रय विनाशकत्वेन वर्त्यवयवविनाशे, आश्रयाभावाद् वन्हिरुपशान्तो भवति । तदुक्तम् अतृणेपतितोवन्हिः स्वयमेवोपशाम्यतीति । ज्वालाभेदेसत्येव एकमेवदीपंप्रज्वाल्यतदीयांपरस्परभिन्नामनेकदेवेभ्योयाजकाःसमर्पयन्ति, नतु दीपमेव ददति, तथा सत्येकस्मैप्रदत्तदीपस्यानेकत्रदाना

स्मिन् नानात्वप्रत्ययःस्वतः प्राप्तेन्द्रियवृत्तिविपर्ययुक्तः समकालोपजायमानानेक निर्दुष्टप्रत्यक्षनिराकृतविषयश्च द्विचन्द्रादौ दृष्ट इतिनासौ तत्र द्विचन्द्रादावेकत्वानुमानं वाधते । नचैवमत्रज्ञेयज्ञानज्ञातृभेदसाक्षात्कारीप्रत्ययः, इति प्रतिरोधते एवाभेदानुमानम् । न चोपलब्धिसाहित्यनियममात्रादेवज्ञानज्ञेयादीनांभेदोऽनुमेय इति वक्तव्यम्, विपक्षेबाधकादर्शनात् । संविदधीनसिद्धितयापि तथा नियमोपपादनसंभवात् । अतीन्द्रियकत्वेन च तद्वृत्तिविपर्यस्याकिञ्चित्करत्वात्, वाधकप्रत्ययस्ययोग्यानुपलब्धि

भावात्, अतएव दीपस्यैकत्वेपि तदीयज्वालायाः परस्परंभेदादनेकस्मै तस्यैकदीपगतानेकज्वालायादानं भवतीतिशिष्टाः । एवं चैकत्रदीपे एव पूर्वोत्तरज्वालयोर्भेदेसिद्धेसजातीयदीपधारायांभेदाग्रहात् सादृश्यात्मकदोषसत्वाच्चैकत्वभ्रमो भवति, “सेयंदीपकलिकेति, सैवेयंगुर्जरीवदिति । नानाभूते एकत्वभ्रमंप्रत्यक्षात्मकंप्रदर्श्य एकस्मिन्नपिनानात्वभ्रममपिदर्शयति **तथैकस्मिन् नानात्वप्रत्ययः** इत्यादि स्वभावसिद्धचाक्षुपकिरणप्रसरणस्य विषयोद्वैतीभावोङ्गुल्यवष्टंभादिप्रयुक्तस्य एव दोषश्चैकस्यापितदीयद्वित्वे भवति, तत एव द्वौचन्द्रावित्येवंतिमिरादिदोषवान् विजानाति, अतद्वतितत्प्रकारकत्वेन तादृशज्ञानंभ्रमात्मकम् । एतज्ज्ञानंद्वौचन्द्रौ, इत्याकारकम् दोषरहितपुरुषान्तरीयचन्द्रैक्य प्रत्यक्षेण वाधितं भवतीति **तथैक स्मिन्नानात्वप्रत्ययः** इत्यादिग्रन्थेन प्रदर्शितदृष्टान्तात् दार्ष्टान्तिकेपरस्यवैषम्यंदर्शयति **नचैवमत्रज्ञेयज्ञानाज्ञातृभेदसाक्षात्कारीप्रत्यय** इत्यादि । अर्थात् ज्ञातृज्ञानज्ञेयभेदनिरूपितचाक्षुषादिलौकिकविषयिताशाली, घटादिंवाह्यविषयमहंजानामि, घटोज्ञात इत्याकारकःसाक्षात्कारो भवति, अतदोषमूलको न वा, ज्ञातृज्ञानज्ञेयाअभिन्नाइत्याकारकाभेदसाक्षात्कारवाधितो भवन् दृश्यते । तस्मादभेदानुमानवाधकत्वंयथोक्तज्ञानस्य सुव्यवस्थितमेव भवतीति भावः । एतद्विपरीतमेव कस्मान्न भवति ? तत्राह **नचोपलब्धीत्यादि** नचोपलब्धिसाहित्यनियमेन ज्ञातृज्ञेययोर्ज्ञानाभिन्नत्वमेव कुतो भवति, इति प्रश्नस्योत्तरे कथयति **विपक्षेबाधकादर्शनात्** । पूर्वमभेदानुमानेऽअप्रयोजकत्वं व्यभिचारशङ्काऽनिवर्तकत्वं कथितम्, तमेवात्रानुस्मारितम् **विपक्षेबाधकादर्शनादिति** विपक्षेसाध्याभावाधिकरणे हेतोर्वृत्तित्वशङ्कायाम्, अर्थात् साध्याभावाधिकरणेहेतुवर्ततेनवेति संशयेयत्पर्यन्तं, यदिसाध्याभावाधिकरणेहेतुर्वर्तते तदासहेतुस्तादृशसाध्यस्य व्याप्यो न स्यादित्याकारकानुकूलतर्कोनोदेष्यति, तावत्पर्यन्तंसाध्यहेत्वोर्व्याप्तिसिद्धिरेव न स्यादितिव्याप्तेरसिद्धयाज्ञातृज्ञेयादीनामभेदात्मकसाध्यानुमानमेव न सेत्स्यतीत्यतस्तादृशानुमानं न ज्ञानज्ञेयादिप्रत्यक्षेवाधकत्वेनशङ्कितुमपि योग्यमिति भावः ।

ननुज्ञातृज्ञेयादिभेदज्ञानं चक्षुरादि, इन्द्रियवृत्तिप्रसृतिभेदरूपात्मकदोषमूलकंभवेदिति चेन्न, अनिन्द्रियकत्वेनचेन्द्रियवृत्तिविपर्ययस्याकिञ्चित्करत्वात् । अर्थात् ज्ञातृज्ञानादीनांचक्षुरादिवाह्येन्द्रि-

२७

पराहतत्वाच्च । अपि च विषयसिद्धिरेवसंवित्, सा च स्वप्रकाशरूपैवेति सर्वसंमतम् । तेनावर्जनीयतया नियमः । न च ज्ञातृज्ञानादीनां भेदोपिसिद्धि[ज्ञान]मन्तरेणसेद्धुमर्हतीत्यलंशुष्कविवादेन ।

नीलादिविषयप्रकाशस्तु, अनुभवसिद्धत्वान्नप्रकाशात्मकस्तदतिरिक्तप्रमाणान्तयाऽग्राह्यतयातेषामिन्द्रयाणाभेदज्ञानस्यनेन्द्रियवृत्तिभेदप्रयोज्यत्वं कथमपि संभवेत् । तथा प्रकृते बाधकज्ञानमपिनास्तिचन्द्रद्वित्वादिभ्रमवत्, तत एवोक्तम् "योग्यानुपलब्धित्वाच्चबाधकज्ञानस्येति समुदितार्थः । किञ्चभेदोभवतुज्ञानादीनांपरस्पमभेदो वा भवतु, परन्तु सर्वं तत्, ज्ञानाधीनमेव, ज्ञानाभावेऽस्तित्वस्यैव सन्दिग्धत्वात्, तत्रोक्तम्, **अपिच विषयसिद्धिरेव संवित्** साचसर्वमतेन स्वप्रकाशरूपैव, तेनावर्जनीयतयाज्ञानेनसर्वस्यसहोपलंभनियमो नतु ज्ञानज्ञेययोरभेदप्रयुक्तोऽपितूपायोपेयमूलक एव । अर्थात् विषयग्रहणंज्ञानं विना संभवतीत्यतस्तयोरभेद इति लोकानांप्रत्ययो भवति नतु अभेद मूलको विषयविषयिणोस्तमःप्रकाशवत् विरुद्धस्वभावयोरभेदस्यसर्वथैवविरुद्धत्वात् । "न सूर्यस्तमसायुक्तोनवासूर्यस्तमोमयः" इत्यभियुक्तोक्तेः । नहि भवति वन्हिर्जलमितिलोकानामनुभवो भवन् वा न तादृशोऽनुभवः प्रामाणिकः कथ्यते पण्डितानां सदसीति ।

ननुज्ञानं विनापि विषयादेःसिद्धिस्वीकारेकाक्षतिस्तत्राह **नच** इत्यादि भेदो ग्राह्यस्य विषयादे ग्राहकस्यविकल्परूपज्ञानस्यसिद्धिर्ज्ञानं विना संभवति, स्वलक्षणनिर्विकल्पकज्ञानमन्तरासिद्ध्यति कल्पनापोढमभ्रान्तंप्रत्यक्षंनिर्विकल्पकमितिनियमात् । विशेषविवरणमन्यत्र द्रष्टव्यमितिदिक् ।

।। इतिसुगताभिमतग्राह्यग्राहकविकल्पप्रत्युद्धारनिराकरणप्रकरणेतत्त्वदीपः ।।

गतप्रकरणेनक्षणिकविज्ञानस्यात्मनासहाभेदव्यवस्थापकं सहोपलंभनियमात्मकंसाधनं निराकृतवान् । तदनन्तरंनित्यविज्ञानमेवात्मेतितस्यनित्यविज्ञानस्यात्माऽभेदसाधकं हेत्वन्तरंदूषयितुमुपक्रमते **नीलादिविषयप्रकाशस्तु** इत्यादि । अर्थात् प्रकटबौद्धमतसिद्धसिद्धज्ञानात्मनोऽभेदसाधनार्थंयत्सहोपलंभनियमात्मकहेतोरुपन्यासकृतस्तस्य युक्त्यातर्केणापनयनमकरोदित्येवंप्रकटबौद्धस्यनिराकरणेनप्रच्छन्नबौद्धोपि स्मृतिपथमधिरोहतीतिं "स्मृतस्योपेक्षानर्हत्वंप्रसङ्गसङ्गतिरितिनियमेन प्रच्छन्न बौद्धस्यापिनिराकरणायप्रयतते **नीलादिविषयप्रकाशस्तु** इत्यादि । अप्रकाशात्मकस्य, ज्ञानभिन्नस्यात एव जडरूपस्यनीलादिविषयस्यायं प्रकाश इत्यनुभवःसर्वसाक्षिको भवतिं । सचानुभव एव ज्ञानज्ञेयादीनामभेदानुमाने बाधकम् । नीलादेःप्रकाश इत्येवंषष्ठीविभक्त्याज्ञानज्ञेयादीनां परस्परं भेद एव समर्थितो भवति देवदत्तस्यगौरितिवत् ! नचोक्तप्रत्यक्षप्रमाणातिरिक्तंप्रमाणान्तरमपेक्षितं ज्ञानज्ञेयादीनांभेदे । एतावता, ज्ञेयस्यज्ञानाभेदसाधकेऽनुमानेप्रत्यक्षबाधः कथितः वन्हौशैत्यसाधकद्रव्यत्वादिहेतौ, अग्निरूष्णइतिंस्पार्शनप्रत्यक्षवत् । तथा हेतोः सहोपलंमनियमात्मकहेतोः पक्षेऽभावात्मकासिद्धिरूपासिद्धदोषोपि प्रतिपादितः पुरैवेतिं । यद्यपिनीलादिविषयाणांजड़रूपत्वात्,

रस्यानपेक्षणात् । आत्मातुप्रकाशस्वभावोनजडः, एतावताऽत्माज्ञानरूपः स्वतंत्रत्वात् । पराधीनमागन्तुकयावदर्थेन्द्रियं सम्बन्धादिकारणसंनिधानमवतिष्ठमानधर्मावच्छेद्यरूपमेव ज्ञानमिति ।

आत्मातुस्वतन्त्रो न पराधीनोज्ञाताऽहमित्मेवंसदाप्रकाशते । यद्येतादृशोप्ययमनन्याधीनसिद्धिर्ज्ञानपदवाच्यं कथ्यते तथापि ज्ञानवद्वेदंज्ञानंनतुज्ञप्तिमात्रेण तथेति संक्षेपः ।

प्रकाशात्मकत्वं न कथमपिसंभवति तथापि स्वप्रकाशज्ञानसम्बन्धात् कदाचित्कप्रकाशोघटतेनीलादेर्विषययाणामपि । यथा स्वभावतोऽतिमलिनस्यापि काष्ठकुड्यादेर्जलरोगनादितरलवस्तु सम्बन्धेन कुड्यदावपिमुखादेः प्रतिविम्बो दृश्यते । अर्थादतिस्वच्छ एव जलादर्शादिःस्वस्मिन् मुखादीनां प्रतिबिम्बंदर्शयतिनत्वस्वच्छः काष्ठादिः, तथापि स्वच्छजलविशेषरोगनादिनोपलिप्तः काष्ठकुड्यादिर्जलविशेषेणोपलिप्यमानःस्वस्मिन् प्रतिविम्बमुद्गृण्हात्येव । तथैवप्रकृतेपिप्रकाशज्ञानसम्बन्धाद्विषयेपि कादाचित्कप्रकाशोघटते एव स्वभावजडस्यापिघटादिविषयाणामपीति भावः । ज्ञानाऽत्माज्ञानाभिन्नःप्रकाशस्वभाववत्वात्, अत्रहेतुरूपगम्यते साध्यंतु न तत्राह **एतावतेत्यादि** । अर्थात् स्वप्रकाशस्वभाव एव, तावताआत्मनो न ज्ञानरूपत्वंस्वतन्त्रत्वात्, ज्ञानं तु न स्वतन्त्रमपितुपरतन्त्रम्, अपितु विषयेन्द्रियसंनिकर्षादिकारणवलादापतितमागन्तुकमेवेति । तत्रज्ञानत्वंविषयप्रकाशकधीत्वमेव । जानातेरित्यादौज्ञाधात्वर्थस्यतु कर्तृधर्मत्वमेवज्ञानस्य, आत्मनस्तु धर्मिरूपत्वान्नधर्मात्मकज्ञानरूपत्वम् । ज्ञानस्वभावंतावदाह **पराधीनमाऽगन्तुक**मित्यादि ज्ञानस्यनिम्नलिखिताधर्माभवन्ति, प्रकारतैकस्वभाववत्वंज्ञानधर्मोऽर्थात्, यदाज्ञानंतत्सर्वदाप्रकाररूपमेवेत्यतस्तत्रप्रकारत्वम् । कदाचित्कत्वमपि ज्ञानधर्मःकदाचिदर्थात् विषयेन्द्रियादिकारणसमवधानेसत्येवजायतेघटादिवत्, अतःकदाचित्कम् । तथा विषयावगाहित्वंविषयप्रकाशकत्वमित्येतेधर्मरूपज्ञानस्य स्वाभाविकधर्माः । तथाऽनुवर्तमानत्वंधारारूपतया । तदाहुराचार्यसार्वभौमाः श्रीबोधायनमतादर्शे "ज्ञानेत्वतश्चप्रामाण्यमप्रामाण्यं परेण तु । धारावाहिकविज्ञानमेकमेवहिसम्मतम् ॥८५४॥ इति स्वरूपतएवानुवर्तमानम्, यावद्विषयान्तरः संचारो भवति तावत्पर्यन्तमवतिष्ठते एव प्रथमोत्पन्नंज्ञानंनतुन्यायमतवत् प्रतिक्षणं विनश्वरम् । अर्थाद् यावत्कालंविषयान्तरसंचारो न भवति तावत्पर्यन्तंपूर्वज्ञानमवतिष्ठते इत्येवं स्वभावधर्मज्ञानंभवतीतिभावः । ज्ञाता आत्मतुस्वतन्त्रःपराधीनोहमितिमानसप्रत्यक्ष एव सर्वदाप्रकाशतेः । तत्रात्मनः धर्मित्वंज्ञातृत्वमहमर्थतयाभानं चेत्येते धर्माभवन्ति । अथैवनात्मनोज्ञानभिन्नत्वेआत्मनोज्ञानमित्याकारक व्यवहारः कथमितिचेत् तदा, यथोक्तआत्माऽनन्याधीनसिद्धिकतया भवतु ज्ञानपदवाच्यस्तथापि ज्ञानवेद्येज्ञानम्, नतु ज्ञानमात्रस्वरूपः किन्तु ज्ञानाधिकरणमानन्दाद्यधिकरणं च । अर्थात् ज्ञानादनन्यं स्वमात्मकम् । आत्मनिज्ञानव्यवहारोयो भवति स ज्ञानसादृश्यात्ज्ञानसादृश्यं च तत्र स्वा-

अत एव हि "योवेदेदंजिघ्राणीति स आत्मा" इति छन्दोगाःकथयन्ति । एवम् "कतमआत्मा" इत्यादिसप्रश्नमिदमेवात्मनोलक्षणंवाजसनेयिनः कथयन्ति । "योयं विज्ञानमयःप्राणेषुहृद्यन्तर्ज्योति पुरुषः" इति । अत्र खलुयोयंसर्वलोकप्रसिद्धोऽनेकविषयविषयकवेदन[ज्ञान]प्रचुरःप्राणेषुसर्वप्रेरकतयाविद्यमानो हृदयायतनेऽन्तर्ज्योति स्वरूपोहमितिपरागभिन्नत्वेन प्रकाशितो भवति स एव पुरुषोज्ञानात्मा इत्येवंक्रमेणमदुक्तमेवात्मस्वरूपं निर्वक्ति । "एष एव हि द्रष्टाश्रोताघ्रातारसयितामन्ताबोद्धाकर्त्ताविज्ञानात्मापुरुषः" इत्येवंप्रकारेणाथर्वणा आमनन्ति । इत्थमेव "विज्ञातारमरेकेनविजानीयाधीनप्रकाशत्वरूपं स्वयं प्रकाशत्वं, स्वनिरूपितविषयतावत्वतादात्म्योभयसम्बन्धेनकिञ्चिद्विशिष्टत्वस्वरूपमेवेतिभावः । अयमाशयःज्ञानपदेनोच्यमानमात्मस्वरूपंज्ञानमपिसमानमेव, परन्तु ज्ञप्तिमात्रतयाऽत्मरूपंज्ञानं न मुख्यज्ञानरूपम् । अथवा ज्ञानाधिकरणमेवात्मरूपंज्ञानम्, नतु ज्ञप्तिमात्रतयामुख्यंज्ञानात्मकम् । एवञ्चज्ञानाधिकरणज्ञातुरात्मनोज्ञानाभेदानुमानं प्रबलप्रत्यक्षबाध्यमेव भवतीति भावः । विशेषस्त्वन्यत्रज्ञातव्यः ।

॥ इत्यद्वैताभिमतग्राह्यकविकल्पप्रत्युद्धारनिराकरणप्रकरणेतत्त्वदीपः ॥

अथातीतानन्तरप्रकरणेनसार्वलौकिक " अहंघटादिकंजानामि, घटादिज्ञानवानहमित्यादि प्रत्यक्षेण, यद्विज्ञानविषयव्यतिरेकेणताभ्यामन्यः कश्चिदहमर्थः शरीरेन्द्रियविलक्षणोज्ञाता नभवेत्तदाहमित्याकारकप्रतीतिर्नस्यादितितर्केणतदन्यतर्केणापि, जीवस्यज्ञातृत्वंप्रसाधितवान् । तदनन्तरमेतस्यैवात्मनो ज्ञातृत्वं । प्रमाणशेखरेण स्वतः प्रमाणेनापौरुषेयेणसंसाधयितुंफक्किकामिमामुपक्रमते **अतएवेत्यादि** यतोज्ञातुरहमर्थस्यप्रत्यक्षतकाम्यमात्मत्वंस्थितम् । अत एव छान्दोग्योपनिषदिप्रतिपादयति "अथयोवेदेदंजिघ्राणीति स आत्मा ? कः आत्मा ? इति प्रश्ने उत्तरयति **यो वेद जिघ्राणीति** योहि, अहं घ्राणेन्द्रियादिनागन्धरसादिकंजिघ्राणि, अर्थात् घ्राणादीन्द्रियादि, उपकरणेनगन्धरसादिविषयाननुभवामि स एवात्मेतिप्रत्युत्तरम् । एतावताघ्राणादीनामुपकरणत्वकथनेनतेषामात्मत्वंनिराकृत्यतदन्यस्यतद्विलक्षणस्याहमर्थज्ञातुरेवात्मत्वंव्यवस्थापितम् । एक क्रियायांतस्यैवकरणत्वंकर्तृत्वञ्चविरुद्धतयातत्संभवाभावात् । तस्मात् घ्राणादिकमुपकरणंशरीरमधिष्ठानमेतेषांप्रेरकोऽहमर्थएवेति । **अथयो वेदेत्यादि** वाक्यम् ज्ञातुरहमर्थस्यात्मत्वप्रतिपादनपरकमेवेति । "एवंकतमआत्मा" इत्यादिनाबृहदारण्यकोपनिषदिप्रश्नस्योत्तरप्रवाहे, एतादृशात्मन एव निर्वचनं याज्ञवल्क्येनकृतमितितत्राह **योयं विज्ञानमयोहृद्यन्तर्ज्योतिः पुरुषः** [अस्यार्थ उपनिषद्घटकयोऽयमिति पदम्, तत्, चक्षुरादीन्द्रियसहकारजनितविज्ञानप्रचुरस्यसर्वेन्द्रियाधिष्ठापकस्यज्ञातुरात्मनोहृदयमध्यप्रविष्टत्व स्वयंप्रकाशपरकत्वपरकम् । इन्द्रियादिप्रवृत्त्यनुकूलसङ्कल्पप्रयत्नवत्स्वरूपाधिष्ठनप्राप्तकर्तृत्वंज्ञातृत्वंज्ञानाधिकरणत्वं च स्वयंप्रकाशत्वात्, ज्ञानपदवाच्यस्यात्मनः प्रतिपादकंवाच्यम् "एष हि द्रष्टा"

दिति" "न पश्योमृत्युं पश्यति न रोगम् नोतदुःखताम्" एवमेवास्य परिद्रष्टुरिमाःषोडशकलाःपुरुषायणाः पुरुषं प्राप्यास्तंगच्छन्ति" तस्माद्वाएतस्मान्मनोभया- इत्यादि ।] **योयंविज्ञानमयः** इत्यादिवाक्येयोयंसार्वलौकिकानुभवसिद्धोरूपरसादिविषयानेकज्ञानप्रचुरःप्राणमध्येसर्वस्यप्रेरकतयाव्यवस्थितोहृदयरूपाधिष्ठाने स्वयंप्रकाशरूपोऽहमितिप्रत्यक्स्वरूपतयाप्रकाशितो भवति, स एव पुरुषः पुरुषपदवाच्योऽन्तरात्माजीवो ज्ञातेति । पुरिशुशयनात् पुरुषाकारत्वाद्वापुरुषपदवाच्यो भवतीति ।

एषएव ज्ञाताजीवोद्रष्टा, दर्शनस्यचाक्षुषज्ञानस्यकर्त्ता भवति । श्रोता=श्रोत्रेन्द्रियोपकरणेनाकाशगुणद्विविधशद्वस्यध्वन्यात्मकवर्णात्मकभेदभिन्नस्य ग्राहकोभवति । घ्राता=घ्राणेन्द्रियोपनीतसुरभिदुरभिभेदभिन्नपार्थिवगुणगन्धस्याघ्राताघ्राणकरो भवति । रसयिता=रसनांमधुराम्लकटुकषादीनामन्यतमानांषण्णांपृथिवीजलसमवेतानांरसास्वादकः पुरुषः । मन्ता=मननकारकः । वोद्धा वोधसम्पादकः । कर्त्ता=ऐहिकपारलौकिकक्रियासम्पादकः "कर्त्ताशास्त्रार्थत्ववादितिसूत्रानन्दभाष्यानुमतः । तदत्र आत्मनः कर्तृत्वमस्ति न वेति संशयः । "अहङ्कारविमूढात्माकर्ताहमिति मन्यते" (गी. ३।२७) "नान्यंगुणेभ्यःकर्तारम्" इत्यादिवचनैःकर्तृत्वंनास्तीतिपूर्वःपक्षः । अत्राभिधीयते—'यजेत' 'उपासीत' इत्यादिशास्त्राणामर्थवत्वादात्माकर्त्तैवनात्मभिन्नानां गुणानां तत्सम्भवत्यचेतनत्वात् " (२।३।३४) इत्यादिरूपेणस्वाशयंप्रकटितवन्तोवृत्तिकारामहामहोपाध्याया जगद्गुरवः श्रीरामानन्दाचार्यरघुवराचार्यमहाभागाः । एतेन परमतसिद्धाकर्तृत्वमात्मनो निराकृतम् । अकर्तृत्वेतु "स्वर्गकामोयजेत" अग्निनादधीत "वसन्तेवसन्तेज्योतिषायजेत" इत्यादिशास्त्राणामानर्थक्यमापतेत्, तस्मात् कर्त्ता भवतिजीवः । विज्ञानात्मा=विज्ञानप्रचुरइत्याद्यर्थ आथर्वणश्रुतेरिति तथा "विज्ञातारंकेन विजानीयात्"आत्माधीनस्यवाह्यविषयग्रहणचतुरस्यात्मनोग्रहणं न संभवतीत्याशयेनाह "विज्ञातरमितिविज्ञातारं परमेश्वरम् । जीवात्मशरीरकंकेनकरणेन विजानीयात् । अत्र किं शद्ब आक्षेपार्थें भवति । अर्थात् अन्तर्यामिप्रकरणपर्यालोचनयापरमात्मासर्वस्य चिदचिद्वर्गस्यशरीरी भवति, जडचेतनाश्चतस्य शरीरम्, तादृशसकलशरीरकपरमेश्वरस्य भक्तिज्ञानविरहितेन ग्रहणं न कथमपि भवतीतिदर्शनायेयं श्रुतिः प्रवर्तते । मोक्षकालेपिज्ञानाधिकरणपरकमेवज्ञानपदं नतुज्ञप्तिमात्रपरकं ज्ञानपदम् । एतेन मोक्षकाले सर्वोपाधेस्तत्वज्ञानेन विनाशात्, तदाजीवःशुद्धस्वकीयरूपवान् भवति, ततश्चपरमात्मनाऽभेदंप्राप्नोतीतियन्मतंतदपिनिराकृतम् । यतो मोक्षेपिज्ञानपदस्यज्ञानाधिकरणपरकत्वात् । नहि धर्मिणंविहायधर्मस्यावस्थानंकुत्रापिदृष्टंनोपपद्यतेइतिबहुशः प्रतिपादितम् । एतत्सर्वं **न पश्य**इत्यादिना प्राहतत्रसर्वंपश्यतीति पश्यः सर्वार्थदर्शीमुक्तात्मेति । मोक्षकालेज्ञानाभावप्रतिपादिकाश्रुतिर्नज्ञानाभावं प्रतिपादयति किन्तु दर्शनाभावबोधिकेत्यादिकं सर्वज्ञत्वं स्थापयति "न पश्य" इत्यादि ।

तत्र पश्यति सर्वं त्रैकालिकंयच्चत्रिकालातीतंसत्सर्वंविजानातीति पश्योमुक्तात्मा । विषयता

दन्योऽन्तर आत्मा विज्ञानमयः''इत्यादिकाः। ''सत्यंज्ञानमनन्तम्'' इत्यत्रापिब्रह्मलक्षण कथनावसरेसमुपदिष्टज्ञानशद्बो न ज्ञानमात्रवाचकोऽपितुज्ञानाधिकरणवाचक एव।

अन्यथा ज्ञाप्तिमात्रबोधकत्वेज्ञानशद्बस्य ''लिति'' इति शाब्दिकानुशासनेनाद्युदात्तत्वमापद्येत। परन्तु अन्तोदात्तोयंज्ञानशद्बोऽत्रत्यः। अस्यान्तोदात्तत्वंतुमत्वर्थीयाच्प्रत्ययकरणेनैवघटते नान्यथेति।

सम्बन्धेनज्ञानंप्रतितादात्म्यसम्बन्धेनविषयस्यकारणत्वमितिनियमोलौकिकप्रत्यक्षे एव नतु मुक्तयोगि प्रभृतिकज्ञानेऽपीति। ''नरोगंपश्यति'' स्वात्मनः प्रतिकूलंरोगादिकं न पश्यति। ''नो दुःखताम्'' कुत्रापिवस्तुनिप्रतिकूलतां न विजानाति, मुक्तस्यमोक्षसमये भगवतःपरमात्मनोविभूतितया सर्वस्य वस्तुनःस्वानुकूलत्वेनैवतदादर्शनं भवति। सर्वं हपश्यःपश्यतीत्यादितः ''नोपजनंस्मरन्निदंशरीरम्'' एतत्सर्वमन्त्रानुसन्धेयम्। मोक्षसमये '' गताःकलाः षोडशकप्रतिष्ठादेवाश्चसर्वेप्रतिदेवताश्च परेऽव्ययेसर्वएकीभवन्तीति श्रुतिप्रतिपादितकलाषोडषकस्यमुक्तौनिवृत्तौसत्यामपि मुक्तस्यस्वरूपनिरूपक धर्मभूतज्ञानानांनिवृत्तिर्नैवभवतीत्येतत् परकमेव'' ''एवमेवास्यपरिद्रष्टुरिमाः षोडषकलाःपुरुषायणाः पुरुषंप्राप्यास्तंगच्छन्ति'' एवमेवोपर्युक्तप्रकारेण अस्यपरिद्रष्टुर्मुक्तजीवस्यतत्काले इमा वक्ष्यमाणाः पृथिव्यादिकाःषोडशकलापुरुषायणाःपुरुषोन्मुखाः सत्यःपुरुषं परमात्मानंप्राप्यतस्मिन्नेवपरमात्मनि अस्तं गच्छन्ति तत्रैव विलीना भवन्ति दिवसावसानेनीडेपक्षिवत्। तत्र शरीररूपेणैवावस्थिता भवन्तीत्यर्थः। एवं ज्ञानाधिकरणत्वेनजीवात्मनोदेहेन्द्रियमनःप्राणविज्ञानादिभ्योभेदप्रतिपादकञ्च ''तस्माद्वातस्मान्मयोमयादन्योऽन्तर आत्माविज्ञानमयः'' इत्याद्याःश्रुतयःप्रमाणतयोदाहर्तव्याः। तस्माज्ज्ञानाधिकरणपरकमेवज्ञानपदम्, नतु ज्ञाप्तिमात्रपरकमिति प्रकरणस्योपसंहारः। तदेवं जीवात्मप्रकरणेयत्रयत्रजीवबोधनायज्ञानपदस्य प्रयोगोविद्यते तत्रसर्वत्रापि ज्ञानपदंज्ञानाधिकरणपरकमेव नतुज्ञप्तिमात्रपरकमिति प्रत्यक्षतर्कश्रुत्यादिप्रमाणैः प्रतिष्ठाप्यब्रह्मणःकारणत्वप्रतिपादकतल्लक्षण निर्देशेबृहदारण्यकादिसर्वत्र ''सत्यंज्ञानमित्यादिस्थले यत् ज्ञानंपदंतत्स्वप्रकाशात्मककेवलंज्ञानपरकमेवेति परमेश्वरः शुद्धज्ञप्तिमात्ररूप एवेत्यद्वैतमतनिराकरणायोपक्रमते **सत्यंज्ञानम्** इत्यादिजगत्कारणब्रह्मलक्षणनिर्देशस्थलेपीत्यादि। अत्रायमाशय-सत्यंज्ञानमित्यादिश्रुतिघटकज्ञानपदमपि नज्ञप्तिमात्रंबोधयति किन्तु ज्ञानवन्तंपरमात्मानंबोधयति। यदिज्ञानमात्रमेव बोधयेत्, तदा लितीतिस्वरप्रकरणसूत्रेणज्ञानशद्ब आद्युदात्तोभवेत्, नतु तथा किन्तु अन्तोदात्तोऽत्रज्ञानशद्बः ईदृक्त्वं च मत्वर्थीयाच् प्रत्ययेसत्येव संभवेत्। अर्थात् यदि ज्ञानमात्रवाचीभावेल्युट्प्रत्ययेकृतेसम्पन्नो भवेत् तदालित्स्वरेणाद्युदात्तः स्यात्। अयन्त्वन्तोदात्तवाची, एतच्चाच् प्रत्ययेकृतेसत्येवघटतेनान्यथा। तस्मान्मत्वर्थीयाच् प्रत्ययान्तोदात्तज्ञातृवाचकएवेतिमन्तव्यः।

ऐतरेयेपि तथैवोक्तम् ''प्रज्ञानंब्रह्मेतिनिर्दिश्य—''स एतेन प्राज्ञेन'' इत्यादि, ऐतरेयब्राह्मणो-

ऐतरेयोपनिषत्प्रकरणे "प्रज्ञानं ब्रह्म" इत्यावेद्य "स एतेन प्राज्ञेनात्मनाऽरूढउत्सर्जत् याति" इत्यत्रप्राज्ञपदेनाधिकरणवलेनात्युत्कृष्टज्ञानवन्तंभगवन्तंपरमात्मानमेव प्रदर्शितम् । इति देहादिविलक्षणप्रत्यगात्मस्वरूपनिरूपणणप्रकरणम् ॥

ननु शरीरेन्द्रियातिरिक्तजीवस्यरूपस्पर्शादिविरहितस्यास्तित्वे. प्रत्यक्षं न संभवति? रूपादिरहिततयावाह्यप्रत्यक्षासंभवात् । नवा मानसंसुखादिव्यतिरिक्तत्वात् । नाप्यनुमानमव्यमिचरितलिङ्गाभावात् । नवोपमानम्, तत्सदृशतदन्यस्याभावात् । नवा शब्दःतादृशशब्दस्यादर्शनादितिचेत् । अत्रोच्यते–अनुमानस्यैव तथात्वात् इच्छाद्वेषप्रयत्नसुखदुःखविज्ञानान्यात्मनोलिङ्गमितितर्ककुशलाअक्षपादाः ।

पनिषत्प्रकरणे, तत्रत्यप्रकरणपर्यालोचनेन–प्रज्ञानवत्परक एव । अर्थात् "प्रज्ञानंप्रज्ञानवत्ब्रह्म" इत्येवार्थः । ब्रह्मणपरमात्मनोपिज्ञानाधिकरणत्वमेव, नतुज्ञप्तिमात्रपरकत्वंतयात्वेदोषस्य कथनात् । **स एतेन प्राज्ञेनात्मना** तत्र प्राज्ञेन–प्रज्ञ एव प्राज्ञःस्वार्थेऽण्प्रत्ययः तेन प्राज्ञेनसर्वविषयकापरोक्षज्ञानवतापरमात्मनेत्येवमेवार्थः । एवम् "आनन्दंब्रह्म" इत्यत्रापि न आनन्दात्मकं तत्तादात्म्यापन्नंपरंब्रह्मेत्यर्थ । किन्तु आनन्दवान् परमात्मेत्येवार्थः । आनन्दस्यसुखापरपर्यायतयागुणत्वेन द्रव्यात्मकपरमात्मनातादात्म्यानुपपत्तेः द्रव्यस्यगुणत्वायोगात् । तथा आनन्दमित्यत्रनपुंसकत्वायोगात्, आनन्दपदस्यनित्यंपुल्लिङ्गत्वात् । तस्यब्रह्मविशेषणेविशेष्यलिङ्गस्यानुशासनसिद्धत्वात् । तत्सिद्धेज्ञातैवात्मेति । विस्तरोन्यत्रेतिदिक् ॥

॥ इतिदेहादिविलक्षणप्रत्यगात्मस्वरूपनिरूपणप्रकरणेतत्त्वदीपः ॥

ऐहिकपारलौकिकसर्वकार्येपियोगिनोजीवस्यशरीराद्यन्यतमरूपत्वेकृतप्रणाशाकृताभ्यागमदोष आपतेदित्यतस्तदतिरिक्तस्यैव तस्य "अनन्यसाधनः" इत्यादिना प्रतिज्ञातं स्वयंप्रकाशत्वमात्मनो जीवस्यसमर्थयितुंप्रमाणपरीक्षामुपक्रमते **ननुशरीरेन्द्रियातिरिक्तजीवस्येत्यादि** अर्थात् "प्रमेयसिद्धिप्रमाणाद्धि" इति नियमेनप्रमेयरूपजीवस्यास्तित्वं प्रमाणेनैवभविष्यति, तदभावेप्रमेयव्यवस्थानुपपत्तेः तस्मात्जीवरूपप्रमेयस्यास्तित्वप्रमापणायप्रमाणान्वेषणमेव प्रथमतःकर्त्तव्यमित्यतःप्रमाणपरीक्षैवावश्यकीतदर्थमयमारंभः । तत्र प्रमाणत्रिकञ्चतुष्कंवेतिपक्षद्वयम् । प्रमाणत्रिकमितिसांख्याःतदपरः पक्षोगौतमस्याप्रत्यक्षमनुमानोपमानशब्दाः प्रनाणानि । प्रत्यक्षं च द्विविधंवाह्यमाभ्यन्तरञ्चेति । तत्र रूपस्पर्शाभावेन जीवस्यवाह्यप्रत्यक्षासंभव । नान्तरमप्रसिद्धत्वात् । नानुमानादिकमव्यभिचरित लिङ्गाभावात् ! अस्ति जीवएतादृशप्रत्यक्षागमादर्शनेनशब्दप्रमाणकत्वाभावात्ततोजीवात्मनो न प्रमाणविषयत्वमितिपूर्वपक्षाशयः ।

उत्तरयति **अनुमानस्यैवतथात्वात्** अर्थात् शरीरेन्द्रियातिरिक्तजीवस्यास्तित्वेऽनुमानस्यैव प्रमाणत्वात्, अनुमानेन हि जीवस्यास्तित्वप्रसिद्धिर्भवति । यद्यपि "अहंजानामि" "ज्ञातोघटः"

अथ किमिच्छादिविशेषगुणानामात्मनासहव्याप्तिर्वन्हिविशेषेणसहधूमविशेस्यव्याप्तिर्विशेपरूपेण भवति किम् ? तथा सति धूमविशेषेवन्हिविशेषवत्, इच्छाद्यन्यतमेनैवात्मप्रमितिसंभवेनानुमानंमन्दप्रयोजनकमेवेति चेत्—आत्मनासहेच्छादिनाविशेषरूपेणइत्यादिमानसप्रत्यक्षमेवप्रमाणंविद्यतेऽतस्तदस्तित्वप्रमाणान्तरंनान्वेषणीयं भवति, तथापियथोक्तप्रत्यक्षस्य शरीरादिविषयत्वासंभवात् । अयमाशयः अथापिविलक्षणजीवात्मविषयत्वंप्रत्यक्षस्यैतत् प्रमाणमत्रैवं प्रवर्तितुमर्हतीत्येवंसामग्रीनिरूपणाद्यात्मकेन तर्केण व्यवस्थाप्यमितिभावः । अक्षपादो हि अनुमानमेवेच्छतिजीवास्तित्वविषये तथाहि तदीयंसूत्रम् “इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनोजीवस्यलिङ्गमिति” तत्रेच्छाद्यन्यतमंविलणात्मनःसाधकमिति, अक्षपादाशयः । इच्छादयःक्वचिदाश्रिता गुणत्वात् रूपादिवदित्याद्यनुमानेनेतरवाधसहकृतेन इच्छाद्वेषाद्यधिकरणतयाजीवस्यसिद्धिर्भवति । यथापरिशेषाशब्दाधिकरणतयाऽकाशसिद्धिर्भवतीति ।

इच्छादिगुणानामात्मनश्चयोयसविनाभावो निर्धारितःस किं पर्वतीयधूमविशेपस्यपर्वतीयवन्हिविशेषेणसहप्रत्यक्षमूलकसहचारदर्शनेनतत्तद्व्यक्तयोर्विशेषरूपेण वा भवति सायान्यरूपेण वन्हित्वधर्मत्वेन वा भवति । इति जिज्ञासायांविशेषरूपेणतत्स्वीकारेप्रत्यक्षादेवतत्संभवेनानुमानानुसरणंव्यर्थमेवेत्यादिकंविचारयितुंशङ्कते **अथ किमिच्छादिविशेषगुणानामित्यादि** प्रष्टुरयमाशयः व्याप्तिग्रहःसहचारमूलकोभवति “यत्रयत्रधूमस्तत्रतत्रवन्हिरित्येवं महानसादौवन्हिधूमयोर्व्याप्तिग्रहात् । तश्चशरीरेन्द्रियादिविलक्षणेनात्मनाजीवेनसहचारदर्शनेऽर्थात् यश्चजीवःसचेच्छादिमानित्येवं रूपेणसहचारदर्शनेसति, प्रत्यक्षेणैवतस्यात्मनःसिद्धिसंभवेन तदर्थमनुमानंमन्दप्रयोजनकमेव । यदि आत्मनासहेच्छादीनां सहचारो न गृह्यते, तदासहचारादर्शनात् सहचारदर्शनमूलकव्याप्तिरेव न गृह्येत । व्याप्तिग्रहणाभावेचार्थादगृहीतव्याप्तिकेन हेतुनेच्छादिनात्मानुमानमेवनस्यादित्युभयतःपाशारज्जुरितिप्रश्नकर्तुराशयः । तमिमं पूर्वपक्षंनिराकरोति **आत्मना सहेच्छादीनां विशेषरूपेण** विनाभावेत्यादि, अयमाशयः साधनेच्छाविषयीभूतसाध्यविशेपस्यहेतुविशेषेण सह, प्रातिस्विकरूपेण सहचारादर्शनेपि, सामान्यरूपेणसाध्यसाधनयोः सहचारोभवत्येव, यथापूर्वादृष्टवह्निधूमयोः सहचाराज्ञानेऽपि सामान्यतोऽर्थाद्वह्निसामान्यधूमसामान्ययोः सहचारग्रहोभवत्येव । तथैवात्मव्यक्तिइच्छाव्यक्त्योः, सहचारादर्शने तत्तद्व्यक्त्योःसामान्यरूपेणसहचारग्रहसंभवेनानुमानसंभवात् । यथारूपादिविज्ञानंसकरणकम्, क्रियात्वादित्यादौ, इन्द्रियजातीयकंकरणमनुमितं भवति, तत्रेन्द्रियजातीयकस्यमादृशानांमप्रत्ययत्वेपि, करणत्वेनाभिलषितसाध्यस्यानुमानं भवति । तथैव प्रकृतेव्यक्तिरूपेणेच्छादीनामग्रहात्सहचारग्रहाभावेपि, आश्रितत्वगुणत्वादिसामान्यधर्मेण सहचारदर्शनादेवात्मानुमानं भवत्येवेति । इदमेव च सामान्यतो दृष्टानुमानमितिगीयते तदुक्तंसांख्याचार्येण “सामान्यतस्तुदृष्टादतीन्द्रियाणां प्रतीतिरनुमानादिति ।

विनाभावाभावेपि सामान्यतोव्याप्तिग्रहणसंभवात् । तथाहि इच्छादयःक्वचिदाश्रिताः कार्यत्वादनित्यगुणत्वात् शद्धवत् । इत्यनुमानेनैतेषामिच्छादीनांशब्दवदेवक्वचिदाश्रि-

इच्छादीनांसामान्यतोदृष्टानुमानादात्माश्रितगुणत्वम् । यथाकार्यत्वादाकाशगुणःशद्धोगगनाश्रितो भवति । तत्रकार्यत्वमुत्पत्तिमत्वंप्रागभावप्रतियोगीतिं । नित्यत्वंनाविनाशित्वंध्वंसप्रतियोगित्वरूपमेव । वस्तुध्वंसेप्रागभावेचादित्वानन्तत्वदर्शनात् तयोःकदाचिन्नित्यत्वमतिः कश्चिदुपपद्येततद्दोषपरिहाराय "प्रागभावाप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वादिकमेवनित्यत्वलक्षणरोचयांवभूव । एकांशेन प्रागभावस्यानित्यत्वमेकांशेनध्वंसस्यानन्तत्वंकामलोको मन्यते यदि तदापि नक्षतिः "भिन्नरुचिर्हिलोकः" इतिन्यायात् । इच्छायांगुणत्वं च गुणत्वजातिमत्वात् । द्रव्यकर्मभिन्नेसामान्यवति, या कारणता सा किञ्चिद्धर्मावच्छिन्नाकारणतात्वात् , घटादिसमवेतकार्यनिष्ठायाकार्यतातादृशकार्यतानिरूपिततादात्म्यसम्वन्धावच्छिन्नकपालगतकारणतावत् । या या कारणताऽवश्यंकेनापिधर्मेणावच्छिन्ना भवति, निरवच्छिन्नकारणताया असंभवात् , अवच्छेदकानुगतकस्यचिदभावेकारणताया व्यत्क्यैकरूपत्वेकारणतायाअननुगमेगौरवापतेदिति । तत्रापि-अन्यूनानतिप्रसक्तधर्मएवेति, अन्यूनधर्मस्यतदवच्छेदकत्वेरूपत्वादन्यतमस्यैवावच्छेदकत्वे, रूपत्वाद्येकैवधर्मस्यरूपाद्यतिरिक्तरसादावसंवेत रूपेतरत्रयोविंशतिगुणेषुगुणत्वव्यवहारो न स्यात् , व्यवहारनियामकस्याभावात् । अतिप्रसक्तधर्मकारणतावच्छेदकत्वस्वीकारे, स्वेतरभेदानुमापकहेतौ, धूमसाधकजलहेतौव्यभिचारआपतेत् । तस्मादन्यूनानतिप्रसक्तधर्मएवसर्वत्रावच्छेदकःकरणीयः । प्रकृते नरूपत्वादिकंन्यूनवृत्तित्वात् , नवा सत्ताजातिरेवावच्छेदिकाव्यापकत्वात् । किन्तुचर्तुविंशतिगुणसाधारणगुणत्वमेवकारणतावच्छेदकम् । तत्र गुणत्वंनोपाधिरूपमननुगमादपितुजातिरूपमनुवृत्तप्रत्यासाधारणाकारणत्वात् स्वाश्रयव्यावृत्तिप्रत्ययाजनकत्वात् । ततश्चगुणत्वजातिमत्वमसमवायिकारणमत्वं वा विशेषणतैकस्वभावत्वं वा अर्थात् यदायावद्वागुणोवतिष्ठते तदातत् स्वस्मिन् विशेषणत्वस्वभावतनातिक्रामति, रूपवान् रसवानित्येवं प्रतीतिदर्शनात् । यद्यपि यथा रूपवान् घट इत्यादौरूपस्यविशेषणतयाभानंविशेष्यतयैवघटेरूपमितिप्रत्ययोआधेयतासम्बन्धेन घटस्यभानंविशेष्यतयैवप्रथमान्तार्थविशेष्यतयैवशाब्दवोधोपगमात्। अर्थात् प्रथमाविभक्तिनिर्दिष्टंतदेवोद्देश्यंभवति, तदितरंतु येन कोनापिसम्बन्धेन विशेषणं भवति । शाब्दबोधमर्यादायांरूपस्यविशेषतया, आधेयतासंबन्धेनघटादिद्रव्यस्यविशेषणतयासमुपस्थितावपिघटेरूपमित्यत्रनाधिकरणतारूपं विशेश्यत्वंरूपस्यनवाविशेषणतैकस्वभावरूपंविशेषणत्वंघटस्यवृत्त्यनियामकसम्बन्धस्याधाराधेयभावस्याभावप्रतियोगितावच्छेदकसम्बन्धताश्चास्त्रीकारादिति । एतानिउत्पत्तिमत्वनित्यत्वकार्यत्वध्वंसप्रतियोगित्वगुणत्वासमवायिकारणत्वविशेषणतैकस्वभावत्वप्रकारत्वशेपत्वादीनि सर्वाण्यपिआश्रितत्वस्यव्याप्यनिगमकानि भवन्तीति । इत्थंचेच्छादयआश्रितागुणत्वात् रूपादि-

तत्वंसिद्ध्यति । ततश्च यश्चैषामिच्छादीनां परिशेषादाश्रयः स एवात्माशब्दाश्रयतयागगनादिवत् । इच्छादीनां गुणत्वं च परिशेषादेवायाति ।

वदित्याद्यनुमानमिच्छादीनामाश्रितत्वेऽनुमानप्रमाणानिभवन्तीति, इच्छादिकाअष्टौगुणाःक्वचिद्द्रव्येआश्रिताःगुणत्वात् शव्दाश्रिताकाशवदिति । ततश्च शव्दात्मकगुणाश्रिततया यथा पृथिव्याद्यष्टद्रव्येरूपेणाकाशस्यसिद्धिर्भवतिसामान्यतोदृष्टानुमानेन तथैव प्रकृते गुणात्मकेच्छादिहेतुना परिशेषानुमानेनेच्छाद्यधिकरणपृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्यरूपेणात्मनःसिद्धिर्भवत्येव । तस्मादिच्छादीनां प्रत्यक्षतोऽविनाभावस्यात्मनाऽसंभवेपिसामान्यतो दृष्टानुमानेन सर्वंसमीहितमुपपद्यते एवेति । ननु यदीच्छादीनांगुणत्वंसिद्येततदैवगुणत्वहेतुना, गुणात्मकेच्छादिवलेनात्मसिद्धिःस्यात् ? परन्तु अद्यावधिगुणत्वमेवेच्छादौ न प्रमाणप्रमिति, कथं तेन गुणरूपेच्छां प्रयत्नादिंनातदाधारतयाऽत्मसिद्धिः प्रत्याशा, इत्याशङ्कायां प्रथमतइच्छादौगुणत्वसाधनप्रकारमेवदर्शयितुमाह **शब्दाश्रयतयेत्यादि** इच्छादयोद्रव्यगुणकर्मसामान्यविशेषसमवायाभावान्यतमाःपदार्थत्वादितिपदशक्यत्वलक्षणपदार्थत्वहेतुनाद्रव्यादिवदेव द्रव्याद्यन्यतमत्वेप्राप्तेद्रव्यकर्मसामान्यविशेषसमवायाभावभेदकानुमानैर्द्रव्यत्वादिषट्पदार्थानांनिराकरणान्तरंद्रव्यादिविशिष्टं पदार्थत्वमेवपरिशेषात्गुणत्वमिच्छादौव्यवस्थापयति । यथा महानसीयवन्हीतरपर्यतगोष्ठचत्वरवन्ह्यभाववान्पर्वतइतीतरवन्ह्यभावसहकृतवन्हिव्याप्यधूमवान् पर्वत इतिवन्हिधूमयोः सामान्यपरामर्शेजातेऽपितदनन्तरं सामान्यपरामर्शादेवेतरबाधसहकारेण पर्वतेमहानसीय वन्हिमानित्यनुमितिर्जायते, तथैव प्रकृतेइतरभेदानुमानसहकृतसामान्यतोदृष्टानुमानवलादिच्छागुणत्वं सिद्धम्, तेन गुणत्वहेतुनाद्रव्याश्रितत्वंभवति । ततश्चात्माश्रितत्वसिद्ध्यनन्तरमात्मसिद्धिर्भवति । तदेवं क्रमेण जीवसिद्धिर्भवतीति । इच्छादिंषुपदार्थत्वहेतुनाद्रव्याद्यन्यतमत्वेप्राप्तेद्रव्यादिभेदकानुमानतोद्रव्यत्वादिनिरासेद्रव्यकर्मादिभेदविशिष्टंपदार्थत्वमेवपरिशिष्यमाणमिच्छादिषुगुणत्वंव्यवस्थापयतीत्याशयेन— कथितम् **इच्छादीनां गुणत्वञ्चपरिशेषादिति** । तत्रेच्छादिकं न सामान्यविशेषसमवायाभावरूपम्, कुतः ? अनित्यत्वात् अर्थात्, नित्यत्वेसत्यनेकसमवेतम् सामान्यमनुवृत्तप्रत्ययंकारणम्, ततःसामान्यमनुगतंघटपटादिरूपानेकव्यक्तिनामेकत्वप्रत्ययनियामकं स्वयं नित्यम्, व्यक्तीनांविनाशेपिव्यक्त्यन्तरजातदर्शनात् । तथा "नित्यत्वेसत्यनेकसमवेतत्वेसति सामान्यरहितत्वमेवविशेषाणांलक्षणम्, तेच नित्यद्रव्येषुव्यावर्तकतयाविद्यमात्वेनवहवोभवन्ति । समवायस्तु संवन्धविशेषरूप एव, तत्र विशिष्टबुद्धि नियामकत्वमेवसंवन्धत्वम् । यथा घटभूतलयोराधाराधेयभावमभिव्यञ्जयन्संयोगोघटवद्भूतलमिति वुद्धिंजनयतीतिघटभूतलयोराधाराधेयभावात्मकविशिष्टबुद्धिजनकत्वात् संयोगःसम्बन्धइतिकथ्यते । एवं"रूपादिमान्घट" इत्यादिस्थलेरूपघटयोर्विशिष्टबुद्धिर्नियामकः कश्चनसम्बन्धोऽभ्युपगन्तव्यः । तत्ररूपघटयोर्नसंयोगःसंभवति, यतोरूपात्मकविशेषणगुणत्वात्गुणे च गुणान्तरानङ्गीकारेणघटानुयोगिकरूपप्रतियोगिकसंयोगासंभवात्, द्रव्ययोरेवसंयोगइतिनियमाच्च नवा रूपघटयोस्तादात्म्यमेवविशिष्ट-

तत्र न सामान्यविशेषसमवायाभावाः,अनित्यत्वात् नवा द्रव्यं कर्म वा व्यापकद्रव्य समवायादिति । इच्छादौविशेषगुणत्वं चानित्यत्वेसत्यस्मदाद्येकेन्द्रियग्राह्यत्वात्रूपादिवदिति । एवमेभिरनुमानैराश्रितत्वमिच्छादीनांसिध्यति ततःकेवलव्यतिरेकिसाधनद्वारे-बुद्धिनियामकं भवतु ? स्वरूपतोविरुद्धयोर्द्रव्यगुणयोस्तादात्म्यासंभवात् । नहि भवति घटोघटोघटवान् घटवान् वा । नवा सर्वथाविरुद्धयोःसूर्यतमसोः । अपितु सामानाधिकरणयोरेवभवति नीलोघटइतिवत्, तस्माद्रूपघटादीनांविशिष्टवुद्धिनियामको न तादात्म्यम् । नवा द्रव्यगुणयोः सर्वाधारतानियामकः कालिकसम्वन्धोपिसंभवति, जन्यद्रव्यजन्यगुणयोः कथंचित्कालिकसम्वन्धस्यसंभवेपि "रूपवान्परमाणुरित्यादौ" विशिष्टवुद्धिनियामकत्वात्, महाकालव्यतिरिक्तनित्यानुयोगिककालिकसम्बन्धस्यन्यायविद्भिरनभ्युपगमात् । ततश्चनित्येचतुष्टयेदिगात्ममनःस्सु च कालिकेनगुणस्यावस्थानाभावप्रसङ्गात् । यद्वस्तुजन्यं तथा तदन्यदपिजन्यसमानकालिकं च तदुभयं च तयोरेकस्मिन् तदपरस्यावस्थानंकालिकेन भवति । महाकालस्यसर्वाधारतयातस्यैव सर्वेश्वरत्वस्वीकर्त्तृमतेमहाकालभेदविशिष्टमपिवस्तुतिष्ठतीतिमते कथञ्चिन्निर्वाहोपिसर्वसाधारणतयानित्येवस्तुनिकालिकसम्बन्धेनगुणस्यावस्थासंभवात् । तत्र विशिष्टवुद्धिर्नोदीयात् । तस्माद्द्रव्यगुणयोर्विशिष्ट बुद्धिनियामकःकश्चनसमवायनामकःसम्बन्धोऽवश्यंस्वीकरणीय एवेति ।

अभावश्च समवायसामानाधिकरण्यान्यतरसम्बन्धावछिन्नप्रतियोगिताकाभावत्वात्मक एव । अर्थात्तदन्यतरसम्बन्धेनसत्ताभावत्वमेवाभावत्वम् । स चायंद्विविधःसंसर्गाभावान्योन्याभावभेदाद् । तत्र तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमेवान्योन्याभावत्वम् । तद्भिन्नत्वंसंसर्गाभावत्वम् । स च संसर्गाभावःप्रागभावप्रध्वंसाभावात्यन्ताभावभेदात् त्रिविधः । तत्रात्यन्ताभावान्योन्याभावौनित्यौ, प्रागभावप्रध्वंसाभावौतु नित्यकल्पौ,तत्तुल्यावित्यर्थः । एवं च सामान्यविशेषसमवायाभावानांनैयायिकाभिमतानांनित्यतयाइच्छादीनांचोत्पादविनाशयोः सर्वसिद्धत्वेनानित्यस्येच्छादिगुणस्यनित्येषुसामान्य विशेषादिषुसमावेशाभावेनाचार्यैःकथितम् **अनित्यत्वान्नेति** सामान्यादिषुप्रयत्नादीनामन्तर्भावः । इच्छादिका न सामान्यरूपा नवाविशेषसमवायाभावरूपा अनित्यत्वादिति हेतुः । अत्राभावभेदानुमानोऽनित्वमुत्पादविनाशात्मकमेव । ततश्च प्रगाभावेप्रध्वंसे वा व्यभिचारदोषोद्भावनमसामयिक एवेति ।

अत्रकेचनसामान्यविशेषसमवायाभावानामित्थंवर्णयन्ति, तथाहि "नित्यत्वेसत्यनेकसमवेतत्वमेव सामान्यलक्षणम् । अत्रनित्यत्वेसतीतिविशेषणानुपादानेऽनेकस्मिन् समवायसम्वन्धेनवर्तमानत्व मात्रकथनेनसंयोगविभागयोरपिद्विष्ठतयाऽनेकस्मिन्वर्तमानतयातयोरतिव्याप्तिस्यादतोनित्यत्वेसतीति कथनम्, तदुपादानेतु संयोगविभागयोः क्रियाजन्यत्वेनानित्यत्वेननित्यात्वघटितजातिलक्षणस्यातिव्याप्तिर्नभवतीति । सामान्यलक्षणघटक, अनेकपदानुपादाने नित्यत्वे सति समवायसम्बन्धेन वर्तमानत्वमात्र कथने आकाशीयपरिमाणेऽतिव्याप्तिः स्यात्तदीयपरममहत्परिमाणस्य नित्यत्वात् आकाशेसमवेतत्वाच्च ।

णात्ममात्राश्रितत्वं साधितं भवतीति । तथाहि–इच्छादयो न महाभूतगुणाःस्वात्मनैवगृह्यमाणत्वात् , वाह्येन्द्रियाग्राह्यत्वात् ये महाभूतगुणास्तेस्वात्मपरात्मप्रत्यक्षावाह्येन्द्रिय प्रत्यक्षाश्च यथा प्रतियतग्राह्यारूपादयः । नैवंरूपाइच्छादय इति नते इच्छादयोमहाभूत

तदुपादानेतुपरममहत्परिमाणस्यनित्यत्वेप्यनेकत्रासमवेतत्वात्–आकाशस्यैकत्वात् । न च घटादिभेदेन पदादिवदेवाकाशोपिभिद्यते एवेतिवाच्यम् , औपाधिकभेदस्यपारमार्थिकभेदाप्रयोजकत्वात् । नहि बाल युववृद्धाद्यवस्थाभेदेपिवस्तुतोदेवदत्तादिर्भिद्यमानो भवतीति कश्चिदनुभवति, तथा सति "योहंबाल्येपितरावन्वभूवं स एवाहं वृद्धत्वेप्रणप्तृननुभवामीत्यादिप्रत्यभिज्ञानादिकमनुपपद्येत । नहि बालस्थविरादिशरीराणांकिञ्चिदपिप्रत्यभिज्ञानगन्धो नास्ति, येन तेषामभेदोभवेत् । तस्मादौपाधिकोभेदोवस्तुनःपारमार्थिकभेदसाधनेनोपयुज्यते । एवमनेकसमवेतत्वमित्यस्यनानाव्यक्तिषुसमवायसम्बन्धेनवर्तमानत्वमेवार्थः, येनकेनापिसम्बन्धेनवृत्तिमत्वकथनेऽत्यन्ताभावेऽतिव्याप्तेः, एकएवघटाभावःस्वरूप सम्बन्धेन भूतलजलतेजः प्रभृतिवस्तुषुस्वरूपसम्बन्धेनवर्तते नित्यश्चापि, अत्यन्ताभावत्वादेव एवं प्रकारेणसामान्यलक्षणस्यात्यन्ताभावेऽतिव्याप्तत्वात् , समवेतत्ववृत्तित्त्वसामान्यंविहायसमवायसम्बन्धेनवृत्तिमत्वंकथितम् । तदुपादानेतुनातिव्याप्तिः संगच्छतेऽभावस्यासमवेतत्वात् । अर्थात् भावोद्विविधः समवेतासमवेतभेदात् । तत्र द्रव्यगुणकर्मसामान्यविशेषाख्याःपञ्चापि, समवेताभावाश्चापिकथ्यन्ते, अन्तिमस्त्वभावोऽसमवेतश्चतुर्विधश्चेतिं । तत्र प्रतियोगितानुयोगित्वान्यरसम्बन्धेन अथवा तदुभयसम्बन्धेनसमवायसम्बन्धवत्वं समवेतत्वम् । यथा द्रव्यगुणकर्मसामान्यविशेषाःसर्वे एते समवायसम्बन्धेन द्रव्येषु यथायथं नवसु वर्तन्ते, द्रव्यमपिद्रव्येवर्ततेऽर्थात्कार्यद्रव्यंकारणद्रव्येषुसमवायतस्तिष्ठति कार्यकारणयोः समवाय एवेतिनियमात् एवञ्चयदाघटःकपालरूपकारणेसमबायसम्बन्धेनतिष्ठति । तत्र कपाले वर्तमानसमवास्यप्रतियोगिविशेषणंघटोभवति, तथा कपालरूपकारणंसमवायस्यानुयोग्यधिकरणमितिकार्येघटादौप्रतियोगितासम्बन्धेनसमवायस्तिष्ठति । तथा कपालकारणंसमवायस्यानुयोग्यधिकरणं भवतीति कपालादिकारणे अनुयोगितासम्बन्धेनसमवायोभवतीतिकार्येकारणे च समवायो भवति, अतः कार्यंकारणं च प्रतियोगित्वानुयोगित्वसम्बन्धेनसमवायत्वात् समवेतमिति कथ्यते । द्रव्यजनकेद्रव्ये प्रतियोगित्वानुयोगित्वमित्युभाभ्यांसमवायवत्वात्समवेतत्वम् । द्रव्येद्रव्यंभवतिगुणोभवतिकर्मापि, गुणेगुणत्वंकर्मणिकर्मत्वमिति द्रव्यगुणकर्मसुप्रतियोगित्वानुयोगित्वोभयाभ्यांसमवायस्यसंभवः, यदाद्रव्यगुणकर्माणिक्वचित्तिष्ठन्ति, तदा तेषु प्रतियोगितासम्बन्धेन समवायवत्वम् , यदाद्रव्यगुणकर्मसुसामान्यादिस्तिष्ठतिद्रव्यादिषुअनुयोगितासम्बन्धेन समवायस्तिष्ठति, अर्थात् यदा यः समवायसम्बन्धेनाधेयो भवति तदा तत्र प्रतियोगितासम्बन्धेन समवायो भवति, यस्मिन्नन्य आगच्छति समवायेन, तदातदधिकरणेनानुयोगिता सम्बन्धेन समवायवद्भवतीतिद्रव्यगुणकर्माणिमुख्यतः समवेतानि भवन्तीति । यतः कदाचित्कार्यद्रव्यंकारणद्रव्येतिष्ठति, इतिद्रव्यंविशेषणंविशेष्यं चेति तत्र प्रकारद्वयेन प्रतियो-

गुणाः । न दिक्कालमनसोगुणाइच्छादयोविशेषगुणत्वात्दिगादिगुणानामप्रत्यक्षत्वाच्च। एवमकारणगुणपूर्वकत्वायावच्छरीरभावित्वादयोपि हेतवः, इच्छादीनांशरीरविशेषगुणत्वप्रतिषेधकाभवन्तीति तेऽपि अनुस्मरणीयाः। तस्मादिच्छादयोनशरीरगुणास्तद्गुणाभावायगितयाऽनुयोगितया च समवायो भवति । यदागुणोद्रव्यविशेषणो भवति तदा प्रतियोगितासम्बन्धेनसमवायो भवति, यदा तु गुणत्वंगुणे आगच्छतितत्कालेगुणः समवायस्यानुयोगी भवति, ततश्चगुणेऽनुयोगितासम्बन्धेनसमवायस्तिष्ठतिगुणत्वेतुप्रतियोगितासम्बन्धेन भवत्येवंप्रकारेणगुणेपितदुभयसम्बन्धेनसमवायवत्वमागच्छतीति गुणोपिसर्वथासमवेत एव । एवं कर्म यदा द्रव्येतिष्ठतिसमवायेन तदाकर्मणो विशेषणतयाप्रतियोगित्वमितिप्रतियोगितासम्बन्धेनसमवायाधिकरणं भवति । यदातु कर्मणिकर्मत्वंजातिरूपं तिष्ठति समवायेन, तदा समवायस्याधिकरणतया तदेव तत्रानुयोगि भवतीति तत्रानुयोगितासम्बन्धेनसमवायवद्भवतीत्यतः कर्मापिपर्यायेणप्रतियोग्यनुयोगिभवन्मुख्यत एव समवेतमिति कथ्यते । सामान्यविशेषावपिसमवेतौ । इयांस्तुविशेषःयत्सामान्येविशेपे च केवलं प्रतियोगिता सम्बन्धेनैवसमवायोभवति । अर्थात् समवायसम्बन्धेनसामान्यत्वादिकंतिष्ठति सामान्येतु न कश्चिदपिपदार्थःसमवायसम्बन्धेन तिष्ठति, येन सामान्यमपिद्रव्यादिवत्समवायः स्यात् , किन्तु केवलंव्यक्तौ तिष्ठत्येव न तदन्यः कश्चित्तिष्ठतीतिकेवलं प्रतियोगितयैवसमवायवद्भवदंशत एव समवेतं भवति । एवमेवविशेषोपिस्वाधिकरणस्यान्येभ्योभेत्तुं नित्यद्रव्येषुवर्तते एव, नतुविशेषकश्चिदन्यस्वाश्रयंभेत्तुं तत्र भवति, विशेषाणां स्वतोव्यावृत्तत्वात् । अन्यथाऽनवस्थाप्रसक्तेः । अयमाशयः-विजातीयानांघटपटादीनापरस्परंभेदकस्तद्गतासाधारणोधर्मोघटत्वपटत्वादिरेव भवति । समानजातीयानांतुपरस्परभेदकोन स्वगतसमानधर्मःतादृशधर्मस्य सर्वतस्तत्तद्व्यक्तिवृत्तित्वेनातिप्रसक्तत्वात् । किन्तुद्रव्यकार्यतत्तद्व्यक्तिकारणतत्तदवयव एव भेदकोभवति, एवञ्चघटादितआरभ्यद्व्यणुकान्तावयवानांभेदकस्तत्तदवयवभेद एव द्व्यणुकानां भेदकास्तदवयवास्तदीयाश्चरमा परमाणव एव परमाणूनांश्चयोभेदकोभवति स एव विशेषपदवाच्योभवति । एवञ्च यदितस्यविशेषस्यापि कश्चिदन्योभेदकोऽभ्युपगम्येत, तदातत्प्रवाहस्यानुपरमादनवस्थास्यादेव, प्रवाहस्योपरामेतुतेषामनन्तानांभेदकस्याभावात् सर्वंकार्यद्रव्यमेकरूपमेवभवेत्, भेदव्यवहारएवदत्तजलाञ्जलिः स्यात् । तस्मादयंविशेषपदार्थः स्वत एव सर्वतोव्यावृत्तः स्वेतरसर्वानेव स्वाश्रयान् भिनत्त्येव । इत्यादियुक्त्यानित्यद्रव्येषुविद्यमानोऽनन्तोविशेषोन्यायसिद्धान्तेसिद्धान्तितः । यथा कश्चिन्महाविद्वान् स्वाधिकविद्याक्रियादिसमन्वितगुरुभ्यः प्राप्तविद्योविद्वानिति कथ्यते, एवं तस्य गुरुरपिस्वस्वगुरुभ्योविद्यांदीक्षांचासाद्यविद्वत्तामवाप्नोति । सर्वप्रथमस्तुभगवताऽयोध्यानाथेनशासितो भवति । भगवान् श्रीरामस्तुस्वयमेवसम्बुद्धःसर्वज्ञश्च भवति "योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोति तस्मै"इतिश्रुतेः । एवञ्चस्वतोव्यावृत्तत्वमयत्रानित्यत्वेसतिनिःसामान्यत्वेसतिनित्यद्रव्यसमवेतत्वमेवविशेषस्यलक्षणं भवति । तदेवंद्रव्यगुणकर्मसामान्यविशेषाः पञ्चापिमुख्यतोऽ-

वादकप्रमाणत्वेसतिगुणत्वात्, यन्नैवं तन्नैवं यथा रूपादिकम् । इच्छादयस्तुयथोक्तसाधना इतियथोक्तसाध्या एवेति । अथवा विवादास्पदीभूतशरीरादिभ्योऽर्थान्तरगुणा इंच्छादयो यथोक्तसाधनत्वात् , उदाहरणंस्वयमेवोह्यम् । यद्वासामान्येनान्वयदृष्टान्तः, योयद्गुणशतोवासमवेताःपदार्थाःकथ्यन्ते । समवायाभावयोःप्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेनसमवायाभाववत्वमेव, यतःसमवायोऽभावश्च न कुत्रचित्समवायसम्बन्धेनतिष्ठतः, नवासमवायाऽभावयोः कश्चित्समवाय सम्बन्धेनतिष्ठति तस्मात् समवायाऽभावौअसमवेतपदार्थावितिगण्यते ।

एवञ्चयोयमिच्छादिर्नससामान्यविशेषसमवायाभावेषुसमाविष्ठो भवति, कुतः ? अनित्यत्वात् , सामान्यादिचतुष्टयं तु नित्यम् , इच्छादिकत्वनित्यमुत्पादविनाशशालित्वस्येच्छादिषुसर्वानुभवसिद्धत्वादितिनेच्छादीनामुक्तपदार्थेऽन्तर्भावः संभवतीति, ननु न भवति, उक्तरीत्यापदार्थपञ्चकेषु, इच्छादीनामन्तर्भावः परन्तु वाधकरहितत्वात् सर्वाश्रयरूपद्रव्येषुनवसु अन्यतमेषु पञ्चविधकर्मण्यन्यतमेतस्येच्छादेः समावेशः कुतो न भवतिं ? इत्याशङ्कांसमाधातुमाह **नवा द्रव्यं कर्म वा** इति । अयं भावः यदिदमिच्छादिकद्रव्यमिति, तत्किम् पृथिव्यादिपरिगणितद्रव्यरूपं तदन्यद्वा ? तत्र न प्रथमः पृथिवीजलात्मसुचतुर्दशगुणाधिकरणेष्वन्तर्भावः । तेजसि, एकादशगुणाधिकरणे वा समावेशः। अथवा नवगुणकेवायौ वा समावेशः । अथवा षड्गुणके आकाशे वा तस्येच्छादेः समावेशः । अथवा नव गुणकेमनसितस्येच्छादेःसमावेशः । अथवा पञ्चगुणकदिशितस्येच्छादेः समावेशः अथवा पञ्चगुणकेकालेतस्येच्छादे, सः स्यादिति ।

तत्र पृथिव्यांनान्तर्भावःसंभवति, तथासतिं पृथिव्यांगन्धादिकाश्चतुर्दशगुणाःसन्ति तेषां चतुर्दश गन्धादिगुणानांपृथिवीवदेवेच्छादिष्वपिसमुपलंभप्रसङ्गात् नतु तत्रेच्छादिषुगन्धादिका उपलभ्यमाना भवन्तो दृश्यन्ते । नवा जलान्तर्भावइच्छा तथा सति शीतस्पर्शादिकागुणाउपलभ्यन्ते । नवा तेजसि समावेशस्तदीयोष्णस्पर्शादीनां तत्रानुपलंभात् । नवा वायौसमावेशः तथासत्यपाकजस्पर्शादयोपि समुपलभ्येरन् । नवा नभसि, तथासत्यदृश्यत्वव्यापकत्वप्रसङ्गात् । नवा मनसि मनोगुणानां तत्र प्रसङ्गात् मनसोऽतीन्द्रियतयेच्छादींनामप्यतीन्द्रियत्वप्रसङ्गाच्च । नवात्मनिसमावेशस्तथासतिजीवचतुर्दशगुणानामपितत्रसद्भावप्रसङ्गात् । नवा कालदिशोरिच्छादीनां सः तदीयसर्वगुणवत्वप्रसङ्गात् नित्यत्वव्यापकत्वप्रसङ्गाच्च । तस्मात् परिगणितनवद्रव्येषुनान्तर्भाव इच्छादेः संभवति । नवा परिगणितपृथिव्याद्यन्यतमद्रव्यातिरिक्तंद्रव्यमिच्छादिकमितिद्वितीयपक्षोपिसंभवति ? गुणरहिंतस्यद्रव्यत्वानुपपत्तौद्रव्यान्तरस्यसुतरामेवानुपपत्तेः । एतत्सर्वंमनसिनिधायकथितं **“नवा द्रव्यमिति** कुतो न द्रव्यमिच्छादिकंतत्रहेतुमाह **व्यापकद्रव्यसमवायादिति** अर्थात् व्यापकेकस्मिंश्चिद्द्रव्येसमवायसम्वन्धेनविद्यमानत्वात् । कीदृशंद्रव्यंमिच्छादेरधिकरणंतदग्रेप्रतिपादयिष्यति । नवेच्छादिकं कर्मस्वन्तर्भवति, संयोगविभागयोरनपेक्षकारणत्वाभावात् “संयोगविभागयोरनपेक्षंकारणंकर्म”

भवापवादकप्रमाणवत्वेसतिगुणः स तेभ्योऽर्थान्तरस्यगुणः यथा पृथिवीजलादिभ्योऽर्थान्तरभूताकाशस्यशब्दइत्याकाशवदात्मापिसिद्ध्यतीति ।

।। इतिशरीरादिविलक्षणात्मनो जीवस्यानुमानिकत्वपक्षनिरूपणम् ।।

इतिंकर्मलक्षणात् । अर्थात् संयोगेविभागे वा यदन्यनिरपेक्षंकारणंभवति तदेवकर्मइतिगौतमीया वैशेषिकाश्चवदन्ति । इच्छादिकन्तु न तादृशमितिनेच्छादिकंकर्मणिसमाविष्टम् । अथवा इच्छादिकं न द्रव्यरूपम् असंयोगित्वात्, यद्द्रव्यंतदवश्यमेवसंयोगवद्भवति यथा पृथिव्यादिकम् । नेच्छादिकंक्वचिदपिसंयोगवद्भवतीति दृष्टं श्रुतं वा, नवा युक्तियुक्तमपि । एवं प्रकारेणद्रव्यकर्मसामान्यविशेषसमवायाभावेषुसमावेशप्रतिषेधेनसामान्यतोगुणरूपत्वमनिराकरोत् । अर्थाद्गुणरूपत्वंसाधितम् । तत इच्छादीनांविशेषगुणत्वसाधनायोच्यते "इच्छादयोविशेषगुणाअनित्यत्वेसत्यस्मदादिप्रतिनियतैकेन्द्रियग्राह्यत्वाद्रूपस्पर्शादिवदित्यनुमानम् । अत्रेच्छादयःसाध्यधर्मापक्षःविशेषगुणत्वंसाध्यम् विधेयमित्यर्थः, अनित्यत्वेसत्यस्मदादिवाह्यैकेन्द्रियग्राह्यत्वंहेतुः, अनेनहेतुनाशब्देविशेषगुणत्वंसिद्ध्यति, इच्छादीनाम् । यथारूपादेरनित्यत्वेसतिअस्मदादिचक्षुरादीन्द्रियमात्रग्राह्यत्वेनविशेषगुणत्वंसिद्ध्यति तथैव प्रकृतेपि । अत्रहेतुघटककतिपयपदानां प्रयोजनमर्थात्पदकृत्यमपिप्रदर्श्यते । तथाहि यदि हेतु घटकप्रथमविशेषणमनित्यत्वेसतीतिनदीयेत तदा नित्ये रूपत्वे रूपाभावेप्रभाभित्तिसंयोगेनित्यआलोकत्वेन तदभावेच 'अस्मदादिचक्षुरिन्द्रियग्राह्यत्वस्यहेतोविद्यमानत्वेपितेषुरूपत्वादिषुविशेषगुणत्वस्यसत्वंनास्ति, यतस्ते यथायथं कश्चनजातिरूपः कश्चित्सामान्यगुणरूपः कश्चनाभावरूपोवा । अतस्तेषुलक्ष्यभिन्नेषुयथोक्तलक्षणसद्भावेनव्यभिचारःस्यात्, शृङ्गित्वस्यगोर्लक्षणस्यमहिषीप्रभृत्यादौव्यभिचारवत् । तस्माद्हेतौअनित्यत्वेसतीतिविशेषणस्योपादानम् । तदुपादानेतुनातिव्याप्तिंरूपत्वतदभावालोकत्वतदभावानां सामान्यरूपत्वेनाभावरूपतया च नित्यत्वेनतेष्वनित्यत्वस्याभावात् न व्यभिचारः । निश्चित साध्याभावाधिकरणेयदिहेतोर्निश्चयस्तदाव्यभिचारः तत्र हेतोर्वृत्तित्वसंशयेतुव्यभिचारसंशयश्चेति । एकेन्द्रियग्राह्यत्वाकथनेऽनेकेद्रियग्राह्यद्वित्वादिसंख्यादौव्यभिचारवारणायेति । योगिप्रत्यक्षग्राह्यत्वस्यसूक्ष्मादिवस्तुनिव्यभिचारवारणाय 'अस्मदादीतिविशेषणम् । शब्दोपस्थापितेऽनुमेये च व्यभिचार वारणायप्रत्यक्षग्राह्यत्वकथनम् । तदत्रसंक्षेपःइच्छादयो विशेषगुणाःअनित्यत्वेसत्यस्मदाद्येकेन्द्रियग्राह्यत्वादित्यत्रेत्थंपदकृत्ये, रूपत्वजातौव्यभिचारदोषवारणाय "अनित्येसतीतिरूपत्वादेनित्यत्वंजातिरूपत्वान्नांतोव्यभिचारः । घटपटादिसंयोगेव्यविचारवारणाय 'अस्मदाद्येकेन्द्रियादिविशेष्यदलम्, संयोगादेर्द्वीन्द्रियग्राह्यत्वात्तद्वारणात्, एवमपिप्रभायांव्यभिचारोभवेत्प्रभायाश्चक्षुर्मात्रग्राह्यत्वनियमादतोगुणत्वे सतीत्यपिदेयमेव, गुणत्वोपादानेनप्रभायांव्यभिचारःप्रभायाःप्रविरलतेजोरूपतयाद्रव्यत्वात्तत्रगुणत्वाभावान्नदोषः । तथापि चक्षुर्मात्रग्राह्यप्रभामिति संयोगेव्यभिचारवारणाय एकेन्द्रियमात्रग्राह्यजातिमत्वंवक्तव्यम् तथा सति, प्रभामित्तिसंयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात्, स्थलविशेषेत्वगिन्द्रि-

येणापि संयोगत्वजाते ग्राह्यत्वात् । ननु जातिघटितलक्षणेअनित्यत्वविशेषणस्यगुणत्वविशेषणस्य च नैरर्थक्यम् , प्रभात्वजातावनित्यत्वगुणत्वयोरभावादितिचेन्न, प्रभात्वजातिंस्वीकारेमानाभावात्, तैजसत्वादिजातीनांद्वीन्द्रियग्राह्यत्वदर्शनात् । किन्तु यदि प्रभात्वजातेः प्रामाणिकत्वंस्पार्शनप्रत्यक्षत्वंस्वीक्रियेत तदाप्रदर्शितस्थलेऽव्यभिचारवारणायगुणत्वविशेषणंवक्ष्न्लेपायितम् । अत्र यदवशिष्टं तत्सति समयेऽग्रेप्रदर्शितंभविष्यति ।

[अनुमानंसर्वानुमतंप्रायस्त्रिप्रकारकंभवति, केवलान्वयि, अन्वयव्यतिरेकिकेवलव्यतिरेकीभेदात् । यत्रान्वयमात्रव्याप्तिद्वाराजायमानमनुमानं प्रथमम् , यथाघटोऽभिधेयोवाच्यत्वात् , अत्र यत्र वाच्यत्वंतत्राभिधेत्वमितिकेवलमन्वय एव नतु, यत्राभिधेंयत्वंनास्तितत्रवाच्यत्वंनास्तीतिव्यतिरेकस्य, शक्तिविषयत्वलक्षणाभिधेयत्वस्येश्वरेच्छाविषयत्वस्याभावासंभवादित्यभावमूलकव्याप्तेरभावेनकेवलान्वयित्वादिति । तथा, यत्रस्थलेऽन्वयव्याप्तिर्व्यतिरेकव्याप्तिर्भवतिं तदनुमानम् यथापर्वतोवह्निमान्धूमात्' यत्र यत्रधूमस्तत्रतत्राग्निरित्यन्वयोयथामहानसे यत्रचवह्निर्नास्तितत्रतत्रधूमोपिंनास्ति, यथा ह्रदे । अन्वयेसाध्यंव्यापकसमनियतं वा भवति साधनंव्याप्यंव्यतिरेकिव्यतिरेकानुमाने साधनाभावो व्यापकोऽधिकदेशवृत्तित्वात् , साध्याभावोव्याप्योऽल्पदेशेवर्तमानत्वात् , यथा वन्ह्यभावोऽयोगोलकेऽवर्तमानोजलादिषुवर्तते, धूमाभावसाध्यस्तुजलादावन्यत्रविद्यमानोप्ययोगोलके विद्यते एवेतिं सवन्ह्यभावोव्याप्योव्यापको भवति । तदुक्तम्—

“व्याप्यव्यापकभावस्तुभावयोर्यादृशोमतः । तयोरभावयोस्तस्माद्विपरीतोनिगद्यते ॥१॥
अन्वयेसाधनंव्याप्यं व्यापकंसाध्यमिष्यते। साध्याभावोऽन्यथाव्याप्योव्यापकःसाधनात्ययः ॥इति॥२॥

साध्यव्याप्येहेतुमान्पक्षोऽन्वये परामर्शः । साध्यभावव्यापकीभूताभावप्रतियोगिहेतुमान् पक्ष इति व्यतिरेकव्याप्तिमूलकःपरामर्शइति तदेतदन्वयव्यतिरेक्यनुमानम् । तृतीयं तु केवलव्यतिरेक्यनुमानम् , यथा पृथिवीस्वेतरेभ्योभिद्यतेपृथिवीत्वात् गन्धवत्वात् वा, यन्न पृथिवीतरेभ्योभिद्यते न तत् पृथिवी यथाजलमिति ।] एवं क्रमेणोपरिप्रदर्शितान्वयव्यतिरेक्यनुमानेनेच्छादिगुणानामाश्रयमात्रमर्थात् , अनिर्दिष्टनामककस्मिश्चिद्द्रव्यसमवेतत्वंप्रसाधितम् , अर्थात् सामान्यतोदृष्टानुमानेनेच्छादीनांसामान्यतोद्रव्याश्रितत्वंप्रसाध्यतदनु, आश्रयान्तरनिराकरणपरककेवलव्यतिरेक्यनुमानेनेच्छादीनामत्राश्रितत्वसाधनायकेवलव्यतिरेक्यनुमानानिप्रदर्श्यन्ते । तथाहि इच्छाप्रयत्नसुखदुःखप्रयत्नधर्माधर्मभावनाख्यसंस्कारादिकाविशेषगुणा न महाभूतपृथिव्यादीनां, स्वात्मन एव प्रत्यक्षत्वात् , अथवा वाह्येन्द्रियाग्राह्यत्वात् , अत्रेच्छादिकंपक्षीकृत्यतेषुमहाभूतानांपृथिवीजलतेजोवाय्वाकाशात्मक महाभूतसम्बन्धिविशेषगुणत्वाभावंसाधयति, तत्रस्वात्मनएव प्रत्यक्षत्वंहेतुः । अत्रत्यएवकारेणपरात्मप्रत्यक्षत्वंनिराकृतम् , आत्मनो ये विशेषगुणास्तेन परेणात्मनाप्रत्यक्षविषयाभवन्ति । पृथिव्यादीनां ये विशेषगुणास्ते तु यया देवदत्तस्यप्रत्यक्षास्ते यज्ञदत्तादीनामपिप्रत्यक्षाभवन्ति, रूपादिकंसर्वात्मसा-

धारणप्रत्यक्षयोग्यमितिसर्वानुभवसिद्धम्, एकस्यांनर्तकीभ्रूलतायामनेकेषां प्रतिसन्धानस्यदर्शनात्। अथवा वाह्येन्द्रियाग्राह्यत्वाद्वाहेतुःयेभूतानां पृथिव्यादिपञ्चानांरूपादिकाःशद्वान्ता विशेषगुणास्तेचक्षूरसनघ्राणत्वक्श्रोत्रलक्षणवाह्येन्द्रियैःक्रमशोगृहीता भवन्ति पुनरिच्छादिकं वाह्यकरणाग्राह्यम् तन्मनसैवतदात्मसमवेतेच्छादीनांग्राह्यत्वदर्शनात्। तदुक्तम्-“मनोग्राह्यंसुखंदुःखमिच्छाद्वेषोमतिकृतिरिरिति। अतएव परात्मसमवेतसुखादीनांस्मरणंपरात्मनो न भवति। तदप्युक्तम् “नान्यंदृष्टंस्मरत्यन्योनैकंभूतमित्युदयनः। एतदेवप्रदर्शितमाचार्येण “ये भूतगुणारूपरसादयस्तेस्वात्मपरात्मप्रत्यक्षाभवन्तिवाह्यकरणचक्षुरादिनाप्रत्यक्षविषयाअपिभवन्ति यथा रूपादयः” इति। अर्थात् भूतविशेषगुणारूपादयः सर्वसाधरणाभवन्तीत्यर्थः। न तथा सर्वसाधारणाइच्छादयस्तेतुप्रत्यात्मनियता एवेतिनेच्छादयोमहाभूतानांविशेषगुणाइच्छाप्रमुखाः किन्तु जीवसमवेताएवकेवलंप्रत्यात्मनियततत्तन्मनोग्राह्या एवेतिकेवलव्यतिरेकिणाऽनुमानेन ते इच्छादयआत्मनिष्ठा एवेति साधिताभवन्तीति विशेषोऽन्यत्रद्रष्टव्यः। एवमेते, सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यसंस्कारादिककालमनसामतीन्द्रियाणां न विशेषगुणाः एतेषु विशेषगुणवत्वस्याभावात् संख्यापरिमाणपृथक्त्वसंयोगविभागाख्याःसामान्यगुणा ये पञ्च त एवदिशिकाले च भवन्ति, नतु कश्चनापि विशेषगुणस्तयोरधितिष्ठति। मनसि च संख्यापरिमाणसंयोगविभागपरत्वापरत्ववेगाख्यसंस्कारा एते एवाष्टौ सामान्यगुणा भवन्ति। अपिच दिगादिमनोन्तत्रयाणामतीन्द्रियत्वात्तद्गताः संयोगादयोगुणा अप्यतीन्द्रिया एवेति ते नप्रत्यक्षाः अतस्तेनात्मगुणा आत्मगुणानांतुमनोग्राह्यत्वप्रतिपादनात्। अर्थात् सुखादयो न दिक्कालमनसांगुणाः पारिभाषितविशेषगुणत्वात्, रूपरसादिवत्, प्रत्यक्षविषयत्वाद्वारूपादिवदेव, ये पुनर्दिक्कालमनसांसंख्यादिकाःपञ्चतेसंख्यादयो न प्रत्यक्षा नवा विशेष गुणा वा भवन्ति। सुखादयस्तुप्रत्यक्षाविशेषगुणाश्चभवन्तीति ते नदिगादीनांगुणाअपित्वात्मन एव, विशेषगुणत्वान्मानसप्रत्यक्षविषयत्वाच्चेति।

तथासुखादयोस्पर्शवतां विशेषगुणाःअग्निसंयोगासमवायिकारणकत्वाभावेसत्यकारणगुणपूर्वकप्रत्यक्षत्वात्, अयावद्द्रव्यभावित्वात्। तत्रस्पर्शवतांपृथिव्यादीनांनैतेसुखादयोविशेषगुणाः। पाकज रूपादिकमादायव्यभिचारवारणाय “अग्निसंभोगासमवायिकारणकत्वेसतीतिविशेषणम्। इत्यादि हेतवोपि, उपपादनीयाः। विविधहेतुभिर्यत्फलितं तादृशंसामान्यानुमानप्रयोगमेवं भवति “एभिः पूर्वोक्तहेतुभिः सुखादयो न शरीरादीनांविषेषगुणा भवन्ति, तद्गुणभावायवादकप्रमावत्वेसतिगुणत्वात्-ये शरीरगुणाभाववत्वरूपसाध्यवन्तो न भवन्ति ते तद्गुणाभावत्वापवादकप्रमाणवत्वेसतिगुणत्वरूपसाधनवन्तोपि न भवन्ति,, यथारूपरसादिकाः। इमे सुखादयः पुनर्यथोक्तसाधनवन्तो भवन्तीति ते सुखादयो यथोक्तसाध्याएवेति। विवादास्पदीभूतेभ्यः शरीरादिभ्योऽर्थान्तरगुणाएवेच्छादय इति वा प्रतिज्ञावाक्यम्, हेतुश्चपूर्वोक्त एव, अर्थात् सुखेच्छादयस्तदाश्रयत्वेनविप्रतिपन्नशरीरादिव्यति

एके इदमपि न युक्तमितिसंगिरन्ति तथाहि—अन्वयव्यतिरेकिहेतुद्वारेण केवलं शरीरादिसाधारणमिच्छादीनामाश्रयमात्रंसिद्धं न तु शृङ्गग्राहिकतया सर्वविलणस्यात्मनोनवमस्यसिद्धिरायाता, न च तावन्मात्रेणात्मनः सिद्धिरभूत् ।

केवलव्यतिरेक्यनुमानं तु साधनमेव न भवति ? कुतः: सपक्षवृत्तित्वा रिक्तगुणास्तद्गुणत्वबाधकप्रमाणविषयगुणत्वादितिहेतुरुदाहरणञ्च व्यतिरेकीत्यादिः। अर्थात्प्रसिद्धद्रव्यभिन्नस्य द्रव्यभिन्नस्यान्द्रयस्यप्रसिद्धावपि तद्गुणत्वस्याप्रसिद्धच नान्वयि उदाहरणंसंभवति तस्माद् व्यतिरेक्युदाहरणमेव प्रतिपादिम् । न चैवं साध्याभावस्यापि, अनुमानात् पूर्वमप्रसिद्ध्यैव, व्यतिरेक्युदाहरणमपि न कथमपिसंभवतीतिवाच्यम्, प्रसिद्धद्रव्यव्यतिरिक्तसामान्यादिनिष्ठसमवेतत्वस्यैवसाध्यीकरणात्, प्रसिद्धद्रव्यव्यतिरिक्तसामान्यादिनिष्ठसमवेतत्वव्यतिरेकस्यरूपादिगुणेकर्मणि च प्रसिद्धिसंभवादिति । सामान्यरूपेणान्वयव्याप्तिर्वासंभवति, तथाहि, योयद्गुणभावापादकप्रमाणवत्वेसतिगुणः स ततोऽर्थान्तरस्य गुणः यथापृथिव्यादिभ्यःशब्दः विलक्षणशब्दाश्रयसिद्ध्युपजीवनेनेदम्, अर्थात् यथा विलक्षणशब्दद्वारेणाकाशस्याष्टद्रव्यातिरिक्तनवमद्रव्यस्यसिद्धिर्भवति तथैव विलक्षणपूर्वोक्तानेकहेतुभिः पृथिव्यादिप्रसिद्धाष्टद्रव्यव्यतिरिक्तनवमस्यात्मन इच्छादिद्वारेणसिद्धिर्भवतीति संक्षेपोविस्तरस्तु यथासम्प्रदायंयथाशास्त्रमवधेयम् ।

। इतिविलक्षणात्मनआनुमानिकत्वपक्षनिरूपणेतत्त्वदीपः ।

गतप्रकरणेन्यायमतमाश्रित्यानुमानेविलक्षणात्मसिद्धिंप्रदर्श्यसिद्धान्तमुखेन तं मतंनिरसितुमुपक्रमते **एके इदमपि न युक्तमितिसंगिरन्ति** इति । एके श्रोत्रियाविशिष्टद्वैतमतनिष्णातास्तन्मतप्रवर्तकाः इत्थं संगिरन्ति प्रतिपादयन्ति यत् यदिदानीमात्मसिद्धिविषयेन्यायानुयायिना कथितम् तत्कथनंतेषां नसमीचीनंयुक्तियुक्तं न भवति इत्यर्थः । कथं नन्यायमतंसमीचीनम्, तत्रहि, अन्वय्यनुमानेनाश्रयमात्रस्यसिद्धौजातायांतदनन्तरं केवलव्यतिरेक्यनुमानेनाश्रयविशेषरूपविलक्षणात्मनःसिद्धिर्भवत्येवेति नतन्मतंयुक्तमितिशङ्कांसमाधातुं केवलव्यतिरेकिणः साधकत्वमेव न भवति हेत्वाभासवादसाधारणवदिति । तत्राह **केवलव्यतिरेक्यनुमानं तु साधनमेव न भवतीति** । कथंकेवलव्यतिरेक्यनुमानंसाननं न भवति तत्राह **सपक्षवृत्तित्वाभावादसादारणव्यभिचारवदिति** । अयमर्थःकेवलव्यतिरेक्यनुमानंसाधनदशानुमापकत्वावस्थां हेतुभावमेवप्राप्नोतिं, कथं ? सपक्षान्वयविरहात् । अर्थात् साध्यहेत्वोःसहचारस्थलीयसम्बन्धाभावात् । असाधारणाऽनैकान्तिकवत् । अनैकान्तिको हेत्वाभासस्त्रिप्रकारकोभवति साधारणासाधारणानुपसंहारिभेदात् । तत्र स पक्षविपक्षव्यावृत्तःपक्षमात्रवृत्तिहेतुरसाधारणपदभाक् । तत्र पक्षमात्रेवर्तमानस्यसाधारणहेतोः साध्यसहचारग्रहविरहेणागृहीतव्याप्तिमतो यथाऽनुमापकत्वं न भवति, तथैवकेवलव्यतिरेकहेतोरपि स पक्षाभावेनव्याप्तिग्रहएव न भवति, इति कथं तस्यापिगमकत्वमनुमापकत्वं नास्त्येवेति । अर्थात् असाधारणहेतोः साध्यसहचारग्रहोपस्थापक

भावादसाधारणव्यभिचारवत् । न चैवं केवलान्वय्यनुमानमपिसाधकं न स्यात्, तस्य सपक्षस्यभावेन व्याप्तिनिश्चयाभावादव्याप्तहेतुनासाध्यानुमानं न भवतीत्यतः सोऽसाधारणोहेतुर्हेत्वाभासः साध्यसाधनायसमर्थों न भवति । तथैवकेवलव्यतिरेकिहेतुस्थलेपि सपक्षस्यसहचारग्राहकस्याभावेनव्याप्तेरनिश्चितत्वात् , तादृशहेतुनापिनानुमितिरिति ।

अथ यादृशसाध्यकयादृशपक्षकयादृशहेतुकस्थले सपक्षो विद्यते सतिसपक्षेतत्रसपक्षेयदिहहेतुर्नभवतितदैवासाधारणस्यशकलपक्षे वर्तमानस्यशद्बत्वानित्यत्वसाधनेऽसाधारणत्वंतत्वाच्चनानुमापकत्वंहेत्वाभासत्वंव्यवहारः । केवलव्यतिरेकिणि, पृथिव्यांपृथिवीतरभेदसाधकपृथिवीत्वेतु स पक्षस्यसंभावनैवनास्ति, इति कथं तस्यदोषःकथंवा तदभावेहेत्वाभासत्वंकथंवानुमापकत्वमितिचेत् , मैवंवोचः विकल्पासहत्वात् , तथाहि केवलव्यतिरेकिणिसाधनेऽनुमितेः पूर्वम् साध्यस्यक्वचिदन्यत्रप्रसिद्धिरस्ति नास्ति वा ? तत्रास्तीतिप्रथमपक्षतदातत्राधिकरणेसाध्यस्यप्रसिद्धिरर्थात् तत्रसाध्यस्यप्रसिद्धिरस्ति, तादृशप्रसिद्धे साध्याधिकरणेहेतोर्वर्तमानत्वमस्तिनवा ? प्रथमपक्षेऽर्थात् प्रसिद्धसाध्याधिकरणेहेतोर्विद्यमानत्वेमहानसे धूमवन्ह्योर्निश्चये यथाधूमस्यहेतोरन्वयित्वं नतु व्यतिरेकित्वं तथैव प्रकृतेपिसाध्यसाधनयोःपक्षातिरिक्ते सहचारदर्शनस्यसंभवेनान्वयित्वमेवापद्येत हास्यतिपरित्यक्ष्यतितुव्यतिरेकित्वमिति । यदिनिश्चितसाध्याधिकरणेहेतोरसत्वेऽवर्तमानत्वेसतिसपक्षव्यावृत्तत्वादसाधारणएवकेवलव्यतिरेकीहेतुःस्यादित्युभयतःपाशारज्जुरिति । यत्र साध्यस्यप्रसिद्धिरस्ति तत्र हेतुर्नास्तिचेदितिद्वितीयपक्षःतदासाध्याभावस्या प्रसिद्धेः साधकाभावादिति केवलव्यतिरेकित्वमपि निश्चेतुंदुर्घटमेवेति । विस्तृतविचारस्तुन्यायपरिशोधनप्रकरणेद्रष्टव्य इतिदिक् । यथा सपक्षाभावात्केवलव्यतिरेक्यनुमानस्यसाधकत्वमेव नास्ति, तदाएवमेवविपक्षाभावात् , केवलान्वयिनोपिगमकत्वं न स्यादित्याशयेन शङ्कते **न चैवं केवलान्वय्यनुमानमपीत्यादि** तत्रविपक्ष व्यतिरेकोविपक्षासत्वम् , तत्र निश्चितसाध्यवान् सपक्षोनिश्चित साध्याभाववान् विपक्षः, एतादृशविपक्षस्यासत्वात् , यथाऽसारणे सपक्षस्य व्यतिरेक इति व्यतिरेकिणो न गमकत्वं तथैव केवलान्वयिनिविपक्षस्यासत्वान्नगमकत्वं साधारणवत् अर्थात्पक्षसपक्षविपक्षरूपपक्षत्रयवृत्तिप्रमेयत्वादिहेतुवत् । अर्थात् यथा वन्हिसाध्यकप्रमेयत्वरूपसाधारणदोषग्रस्तहेतौ यथा विपक्षे निश्चितवाह्यभावाधिकरणेजलादौ प्रमेयत्वहेतोर्विद्यमानत्वेनव्यभिचरितत्वात्साधकत्वं न. भवति, साध्यसामग्रीवत् साध्याभावसाधकसामग्र्या अपि वर्तमानत्वात् , तत्र न गमकत्वम् केवलान्वयिस्थलेपि विपक्षस्यनिश्चितसाध्याभावतो विपक्षस्यैवाभावेन तत्सत्वाभावस्याप्यप्रसिद्धेः प्रतियोग्यप्रसिद्धत्वादप्रमितप्रतियोगिकाभावानभ्युपगमात् तदुक्तंब्रह्मसिद्धौ "लब्धरूपे क्वचित् किञ्चित्तादृगेव निषिध्यते । प्रमाणमन्तरेणासौ न निषेध्यस्य संभवः" इति । केवलान्वयिविपक्षाप्रसिद्धेस्तस्यपूर्ववदेवगमकत्वं न स्यादित्यर्थः । अन्वयव्यतिरेकिणिवन्हिमान्धूमादित्यन्वयादिस्थले, अन्वयव्यतिरेकोभयप्रकारकसहचारदर्शनेनव्याप्तिज्ञानस्यदृष्टत्वेन साध्यसाधनयोःसह-

विपक्षाप्रसिद्ध्यातदवृत्तित्वाभावाभावात्साधारणानैकान्तिकवदेवेति वाच्यम् , देशकालादिशंकितोपाधिविरहेऽप्यन्वयदर्शनादेव साध्यान्वयस्वभावतायाः परिनिश्चितत्वात् । न च साधनाभावाधिकरणेसाध्याभावस्यदर्शनमात्रेणसाध्यान्वितस्वभावत्वंहेतोः शक्यं निश्चेतुम् । अभावस्यानन्तदेशव्यापितयाऽनवयवेनग्रहस्यैवातिक्लिष्टत्वात् । दुष्करत्वात् । कलयालेशतोपिहेतोः साध्याभावाधिकरणेवृत्तौसम्बन्धेनियमासंभवात् । किञ्च साधनाभावप्रयोज्यं साध्याभावोऽथवानिमित्तान्तरप्रयुक्तःसाध्याभावः ? इत्याकारकसंशयग्रहग्रचारस्यादर्शनात् , केवलव्यतिरेकिहेतोर्यद्यसाधकत्वमभिमतं तदासाध्याभावसाधनाभावयोः सहचारादर्शनात् , इदं वाच्यंप्रमेयत्वादित्यादिकेवलान्वयिहेतूनामपिसाधकत्वंकथमपि न स्यादितिपूर्वपक्षकर्तुरभिप्रायः । तमिममाक्षेपमाक्षेप्तुमाह **देशकालादिशङ्कितोपाधीत्यादि** कस्मिंश्चिदपि देशेकाले वा प्रयुज्यमानोर्हेतुः साध्यसम्बन्धमन्तरेणापि प्रयोजकान्तरात् स्यादितिदेशकालविशेषयोरन्तर्भावेनशङ्कितोपाधेरनुकूलतर्केणप्रतिबन्धोजायते साध्यसाधनयोः सहचारदर्शनमात्रेणैवान्वयव्याप्तिर्निश्चीयते एव, ततश्चसाध्यान्वितस्वभावतयाऽर्थात् साध्यव्याप्त्यानिश्चयः स्यादेवेति । व्यतिरेकव्याप्तिग्रहे एव व्यतिरेकसहचारज्ञानस्यावश्यकतयाऽपेक्षितत्वेन, केवलान्वयिनिवाच्यत्वज्ञेयत्वादि हेतौ अन्वयव्याप्तिग्रहस्यव्यतिरेकसहचारस्याप्रसिद्धावपिनकाचिदप्यनुपपत्तिरित्याशयः । सिद्धान्तविदामाशयस्तुविपक्षसत्वस्यैवाप्रसिद्ध्यैवरूपपञ्चकसम्पत्तिःपक्षसत्वविपक्षासत्वाबाधितत्वासत्प्रतिपक्षितत्वस्वरूपायाः सम्पत्तिर्भवत्येवकेवलान्वयिस्थले, विपक्षासत्वस्यैवाभावरूपत्वादिति ।

अथैवमपिसाध्यहेत्वोर्व्यतिरेकयोः सहचारदर्शनादेव व्याप्तिग्रहोजायतेऽर्थात्तदुत्पद्यते, इत्याशयेन पुनशङ्कतेपूर्वपक्षवादी **न च साधनाभावाधिकरणेसाध्याभावस्येत्यादि** न च साधनस्याभावेविद्यमाने सति, साध्याभावस्यदर्शनमात्रेणैवसाध्यान्वितस्वभावत्वम् । अर्थात् साधनस्य हेतोः साध्यनिरूपितव्यतिरेकव्याप्तिमत्वंसाध्याभावव्यापकीभूताभावप्रतियोगित्वंनिर्णेतुं शक्यम् । कथं न निश्चेतुंशक्यं तत्राह **अभावस्यानन्तदेशव्यापितयेत्यादि** तत्र व्यतिरेकिणोः साध्यसाधनयोरधिकरणसापेक्षतयातदभावाधिकरणानां जलादीनामनेकत्वात् , अंशतःकलयाकुत्रचिदपि यस्मिन्कस्मिन्नपिसाध्याभावाधिकरणे हेतोर्वर्तमानत्वे व्यतिरेकसाहचर्यनियमलक्षणव्यतिरेकव्याप्तेर्निश्चयस्यासंभवादित्यर्थः । व्यतिरेकीसाध्यसाधनवतोऽधिकरणस्येतिः परिमिततया क्वचित् सम्पूर्णरूपेण ग्रहणमपिकदाचित्संभवत्येवेत्याशयः । अथैवमपियावन्तिसाधनाभावसाध्याभावयोरधिकरणानिप्रत्यक्षेणप्रमाणेननिर्णीतानि तावत्स्वधिकरणेषुसाधनाभावसाध्यभावयोः सहचारदर्शनादेव व्यतिरेकव्याप्तिर्निश्चिताभविष्यति, ततश्च तादृशव्यतिरेकव्याप्तिमत्साधनेनानुमानमपि स्यादेवेति कुतोव्यतिरेक्यनुमानंनानुमानमिति कथ्यते ? इत्याशङ्कासमाधातुमाह **संशयग्रहग्रस्तत्वाच्चेति** । किं साधनाभावप्रयोज्यः साध्याभावोऽथवा निमित्तान्तरप्रयोज्योवेति अयमाशयः व्यतिरेकव्याप्तेः

स्तत्वाच्चेति । अपि च पृथिव्यादिभ्योऽर्थान्तरगुणत्वप्रतिज्ञापिद्रव्यान्तराप्रसिद्धेरप्रसिद्धविशेषणैवेति । इति नैयायिकाभिमतात्मानानुमाननिरासः ।

एतेन सांख्योक्तात्मसाधकसंघातपरार्थकत्वादिहेतवोपिनिरस्ता इतिवेदितव्यं तथा च तन्मतम्––"संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिठानात् । पुरुषोस्तिभो-

स्वरूपं साध्याभावेहेत्वभावनिरूपितव्याप्तिघटितमेव । तत्रसाध्याभावोऽस्तु साधनाभावोमाभवतु इत्याकारकव्यभिचारशङ्कायां सत्याम्, यावदनुकूलस्तर्कोनावतरेत् तावत् पर्यन्तं साधनाभावव्याप्यत्वंसाध्याभावेनैवगृहीतुं शक्यम् । साध्यस्य च साधनकारणकत्वसाधननियतस्वभावत्वाद्यन्यथानुपपत्तिलक्षणतर्कवलेन तादृशशङ्कानिवारणंतु साध्यहेत्वो, सहचारदर्शनमूलककार्यकारणभावाद्यवधारणमन्तरेण न घटते इति केवलव्यतिरेकिणोऽनुमानस्यनानुमानत्वं कथमपि घटते इत्यभिप्रायः । अपि च साधनद्वारा साध्यस्यनिश्चयात्मकमनुमानमितिनियमः तत्र साधन निष्ठसाध्यनिरूपित एवहेतुर्भवति, ततश्चसाध्यव्याप्यहेतुमान्पक्ष इति परामर्शाऽनुमितिः तत्रसाधन निष्ठ साध्यनिरूपितव्याप्तिरेवकारणम् । तादृशस्थलेसाध्याभावगतसावनाभावव्याप्तेर्नास्त्युपयोगो व्यधिकरणत्वात्, साधकस्तुहेतुर्व्याप्तिश्चसाध्याभावनिष्ठेत्येतादृशहेतुनासाध्यसाधनायव्यतिरेकव्याप्तेरयोग्यत्वात्कारणतैव नास्तीति । नचैवंताह, धूमेऽन्वयव्याप्तिविरहकालेवन्ह्यनुमानमितिवाच्यम्, अर्थापत्तिप्रमाणादेवेतिनिश्चयः । अन्वयव्याप्तिविरहकालेऽनुमिनोमि पर्वते वन्हिमितिनानुव्यवसायः किन्तु आपाद्यानापादकंकल्पयामिति षट्प्रमाणवादिनोमहाश्रोत्रियाअनुमन्यन्ते इति विस्तरविचारोऽत्रैवस्थलान्तरेद्रष्टव्यः । यदपि विशिष्टहेतुना, पृथिव्यादिभ्योऽर्थान्तरगुणत्वप्रतिज्ञाकृता, तत्रापि, अप्रसिद्धविशेषणतादोषोद्धारो न जायते इति दर्शयितुमाह **अपिचेत्यादि** अर्थान्तरस्यगुणादेः प्रसिद्धावपिगुणगतंगुणत्वलक्षणंसाध्यमप्रसिद्धमेवेति । न च पृथिवीजलादिभ्योऽर्थान्तरसमवेतत्वमर्थात्समवायसम्बन्धेंनवृत्तिमत्वमेवसाध्यते, तच्चरूपरसत्वादौप्रसिद्धमेवेतिवाच्यम् निरुक्तसमवेतत्वस्यार्थान्तर समवेतत्वस्यक्रियाभिन्ने एव प्रसिद्धे गुणे ज्ञानेच्छादौतत्साधनायोगात् । अर्थान्तरद्रव्यसमवेतत्वस्यचानुमानात्पूर्वमसिद्धत्वेन, अप्रसिद्धविशेषतादोषाद्विमुक्तिर्नभवतीत्यभिप्रायः ।

॥ इतिनैयायिकाभिमतात्मानुमाननिरासप्रकरणेतत्त्वदीपः ॥

न्यायमतेज्ञानाधिकरणमात्मेत्यात्मलक्षणंविनिर्दिष्टम्, स च स्वापादिकालेज्ञानविशेषगुणरहितोजडवत् प्रायोभवति, तत्सिद्धान्तविरुद्धमितिमत्वामहदाडंवरेण, गतप्रकरणेनन्यायमतंनिलोठीतमाचार्येण । तत्र यथाऽनुमानिकात्मसिद्धिमकरोन्न्यायानुयायी, तन्मतस्यासारतांप्रादर्शि । ततःपरंसांख्यमतमपितत्तुल्यमेवेतिस्मृतंशास्त्रमतमितितदपिनिराकरोत्यतिदेशेन **एतेनसांख्योक्तात्मसाधकसंघातपरार्थकत्वादिहेतवोपिनिरस्ता इति**। एतेन=न्यायोक्तात्मसाधकहेतुनांनिराकरणेन सांख्यीयहेतवोपिनिराकृता-

क्तृभावात्–कैवल्यार्थंप्रवृत्तेश्च ॥इति॥ अयमर्थोऽस्याआर्यायाः–शरीरेन्द्रियादय परप्रयोजकाःसंघातत्वात् शयनासनगृहादिवत् । शरीरादीनांसंघातत्वंसमुदायात्मकत्वंपृथिव्यादिपञ्चभूतानामपि सावयवत्वंप्रत्यक्षमेव । एवं प्रकृतिमहत्तत्वाहंकारेन्द्रियाणां च वेदितव्याः । ततश्चतानेवहेतून्प्रथमतोदर्शयति, "संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोस्तिभोक्तृभावात् कैवल्यार्थंप्रवृत्तेश्चेति" ईश्वरकृष्णार्या । अनयाहिआत्मसिद्धिःप्रदर्शिता । तत्रदेन्द्रियाहंकारमहत्तत्वप्रकृत्यादिपदार्थेभ्योव्यतिरिक्तः कश्चिदात्मापुरुषोऽस्तीतिप्रतिज्ञा न च प्रतिज्ञामात्रेणवस्तुनः सिद्धिर्भवत्यपितु प्रतिज्ञार्थस्यहेतुद्वारासिद्धिर्जाजते । तदुक्तम् "संभावितःप्रतिज्ञायांपक्षःसाध्येत हेतुना । नतस्यहेतिभिस्त्राणमुत्पतन्नेवयोहतः" इति । तस्मात् प्रतिज्ञातार्थस्य साधनाय "संघातपरार्थत्वादितिप्रथमंहेतुंप्रदर्शितवानीश्वरकृष्णः । अयमाशयः शयनासनादयोयथा संघातत्वात् अवयवसमुदायरूपत्वात्, स्वेतरस्यदेवदत्तशरीरस्यप्रयोजनायैवभवन्ति तथैव, शरीरेन्द्रियादिःपञ्चमहाभूतानिपृथिवीतआरभ्याकाशान्तान्यपि, संघातत्वादर्थात् अवयवसमुदायात्मकत्वात्, परार्था एव परप्रयोजनका एव भवन्ति । नहि यथा गृहादिकसंघातरूपंसंघातरूपस्यैवशरीरस्य कृते भवति न तथा शरीरादिकं किन्तु शरीरादिकंसंघातव्यतिरिक्तस्य कृते एव भवति, सचासंहतःपरः पुरुष एव स एवात्मा । नहि जडोजडान्तरेणानुकूलनीयः प्रतिकूलनीयः प्रतिकूलनीयो वा भवति, किन्तु यश्चैतेभ्यःपरश्चेतनः यःस एवानुकूलनीयः प्रतिकूलनीयोवेति पुरुषप्रयोजनका एव शरीरादि महान्ताः सर्वेपि प्राकृतिकाः पदार्थाःस्वसजातीयप्रयोजनका इतिं असंहतःपुरुषःसिद्धो भवतीति । एवमव्यक्तप्रधानमहत्तत्वाहंकारेन्द्रियाणामपि सुखदुःखमोहात्मकतयासत्त्वरजस्तमोमोहगुणत्रयरूपसंघातरूपत्वमेवेतितेषामपिसंघातरूपत्वंमेवेतिसत्वादिष्वपिपरार्थत्वमनुमितं भवति । यथाकार्येण घटादिनास्वसमानजातीयकमेवकारणमनुमीयते तथैवात्रापि । सर्वोंपिपदार्थःसुखदुःखमोहात्मकस्तज्जनको वा । तत्रसुखंसत्वात्मकंसुखजनकं वा एवं दुःखरूपंदुःखजनकं वा रजोगुणतमोगुणोमोहात्मको मोहजनको वा यथैकैवमैत्रपत्नी, स्वपतिंरूपलावण्ययुक्तापतिंसुखयति, तत्कस्यहेतोः ? पतिस्तस्याः सुखरूपसमुद्भवात् । सैवमैत्रपत्नी स्वसपत्नीर्दुःखाकरोति, तत्कस्यहेतोः ? ताःप्रतितस्या दुःखरूपत्वात्, सैव स्त्रैणंकामुकमलभमानातंमोहयति तत्कुत ? तं प्रतितस्यामोहरूपसमुद्भवात् । अनयास्त्रियासर्वेपिभावाव्याख्याता । "सत्वंलघुप्रकशकमिष्टमुपष्टंभकंचलं च रजः । गुरुवरणकमेवतमः प्रदीपवच्चार्थतो वृत्तिः" इत्युक्तदिशासत्वगुणः सुखलाघवप्रकाशगुणयुक्तःरजोगुणश्च दुःखचलात्मकः । तमोगुणश्चगुरुराच्छादकश्च । तत्रसत्वंप्रकाशयुक्तंयथाऽग्नेः ज्ञातमपितज्यन्यमेव "सत्वात्संजायतेज्ञानं रजसोलोभ एव च । प्रमादमोहौतमसः" इत्यादिस्मृतेश्च । ततश्चसत्वादिगुणत्रयमपिसुखाद्यवयवादियुक्तत्वात्संघातात्मकमेवेति ते गुणाःपरार्था एव । तथा च तादृश गुणत्रयसमुदायात्मकमव्यक्तं प्रधानं तत्कार्यतदात्मकंमहत्तत्वंमहत्तत्वकार्यरूपोऽहङ्कारस्तथाहङ्कारकार्य-

सुखदुःखमोहात्मकतयासंघातमनुमेयंशरीरादिवदेवेति । न च ज्ञानेन्द्रियकर्मेन्द्रियाणामाहंकारित्वेन स्वीकृतस्य, तथा साध्यत्वाभिमतपारार्थ्यधर्मस्यासंहतरूपपरार्थत्वस्यान्यथात्वापादानादुभयविशेषविरोधोहेतोरितिवाच्यम् , इद्रियाणामहंकारान्वयव्यतिरेकदर्शनेन, तथा ''देवावैकारिकाः स्मृताः'' इत्यादि शास्त्रवलेन च वैकारिकापिधानसात्त्विकाहंकारभेदयोनित्वस्येन्द्रियाणां प्रमाणसिद्धतयातदपवादायोगात् । पुरुषस्यापिसंघातत्वस्वीकारे तस्यापिसंघातान्तरप्रयोजनकतया प्रमाणेऽनवस्थाप्रसङ्गामुभयविधमिन्द्रियंमनश्चैतत्सर्वंगुणत्रयविशिष्टं तयाऽवयवसमुदायरूपत्वात्परार्था इतितेभ्यःपरः पुरुषोऽसंहतःसिद्ध्यतीति । अत्र परार्थ्यसाधकहेतोर्विरुद्धत्वंशङ्कते **नचज्ञानेन्द्रिये**त्यादि उभयविशेषविरुद्धमर्थात् पक्षसाध्ययोरभिमतविशेषविरुद्धाकारापादकत्वम् । भूतभौतिकवस्तुष्वनाहंकारिकत्वेनसंघातस्य, तथासंहतपरार्थत्वेन च गृहशय्यासनादिषु भूयोभूयः सहचारदर्शनात्, व्याप्तेर्गृहीतत्वात्, पक्षमध्यपतितेन्द्रियाणांज्ञानेन्द्रियकर्मेन्द्रियाणामभिमताहंकारिकत्वविरुद्धस्यानाहंकारिकत्वस्य, साध्यमध्यप्रविष्टस्य च परस्य, अभिमतासंहतत्वविरुद्धस्यापादकत्वाद्विरुद्धत्वं भवति संघातत्वहेतोरित्याशयः । हेतोरुभयविशेषविरुद्धत्वं न भवतीत्याशयेनाह **अहंकारान्वयव्यतिरेके**त्यादि प्रतिज्ञातमविरोधमन्वयव्यतिरेकप्रदर्शनेनदर्शयति **अहंकारान्वयव्यतिरेक** इति । अयमाशयः—यदायदा अहंकारस्यवृत्तिर्जायते तदैवज्ञानेन्द्रियपञ्चकस्यकर्मेन्यिपञ्चकस्यतदुभयानुगतमनसश्च व्यापारो जायते । स्वापकालेचाहंकारवृत्तेरभावे सति, ज्ञानकर्मेन्द्रियमनसांच वृत्तिर्नभवतीत्यनुभवसिद्धम्, ततश्च तत्सत्वेतत्सत्वंतदभावेचतदभावइत्याकारकान्वयव्यतिरेकाभ्यां मनः पर्यन्तेन्द्रियाणामहंकारजन्यत्वंनिर्णीयते । अत्रार्थे आगमप्रमाणमपिप्रदर्शयति "देवावैकारिकाः स्मृताः" इतितत्रद्योतनात् प्रकाशकत्वात् चक्षुरादयोदेवपदवाच्याभवन्ति । अहंकारश्चसात्विकराजसतामसभेदेनत्रिविधोभवति, सात्विकाहंकारस्यवैकारिक इतिसंज्ञाशास्त्रेकृता । तेनप्रकाशलाघवगुणयुक्तानि चक्षुरादीन्द्रियाणिसात्विकयुक्तानिकारणात्मकत्वात् कार्यस्य घटमृत्तिकावत् । तथा च वैकारिकस्यसात्विकाहङ्कारस्यकार्यभूताइमेचक्षुरादयइतिवैकारिका इतिकथ्यन्ते । अतो न कोपि पूर्वापरविरोधः प्रकृते पदमादधातीति । पक्षेविरुद्धत्वदोषंनिराकृत्यसाध्यविशेषविरुद्धत्वमपि परिहर्तुमाह **पुरुषस्यापिसंघातस्वीकारे** इत्यादि । अर्थाद्यथाशयनासनादौवाह्यसमुदायरूपसंघातत्वंविद्यते इतिपरार्थत्वंशरीराद्यर्थत्वंभवति,ततश्चशरीरादिसंघातात्मकमेव । अर्थात् संघातान्तरस्यैवासिद्धिर्नत्वसंहतस्यकस्यचिदन्यस्य तथैव व्यक्तदेहादिसंघातेन संहतआत्मसिद्धिरपितुसंघातरूपस्यैवात्मनः सिद्धिःस्यात् । एतादृशशङ्कांनिरसिंतुमाह **पुरुषस्यापिसंघा**तत्वे इत्यादि । अयमाशयः यदि शरीरादिसंघातेनसंघातरूपएव परःसिद्ध्येत्तदापरत्वेन सिद्धोपिसंघातरूपएव भवेदेवं तदन्योपिसंघातरूपएवेति अप्रमाणिकानन्तप्रवाहात्मकानवस्थाऽपद्येत । संघातत्वहेतुनासेत्स्यमानस्यपुरुषस्यासंहतत्वमात्रस्वीकारेण व्यवस्थोपपत्तौसत्यांत्रिदूषणग्रस्तानवस्थायाअनुचितत्वात् ।

दप्रयोजकत्वाच्चसंघातस्यशेषित्वे, दृष्टान्तदृष्टसर्वधर्मस्य दार्ष्टान्तिकेस्वीकारेऽनुमानप्रमाणमेवास्तमियात् तदसंघातत्वस्यचाप्रचाल्यत्वात् । न च प्रमाणान्तरबलेनाहंकारिकत्वसंघातान्तरार्थत्वयोर्बाधेऽवाधितेन संघातपरार्थत्वेनापि न भवितव्यम् । एवञ्च संहतत्वव्यापकविरुद्धत्रैगुण्यादिरहितोऽसंहतपुरुषपदवाच्यआत्मासिद्ध्यतीति ।

एवमेवशरीरादयःसुखदुःखमोहात्मकतया परेणाधिष्ठिताःयन्त्रादिनारथादिवत् । अपिचेष्टानिष्टवेदनीयेसुखदुःखेभृत्यशत्रुवदेवानुकूलवेदनीयप्रतिकूलवेदनीयवती । दृश्य-

तत्रैते त्रिदोषा भवन्ति—

प्रागूलोपाविनिगम्यत्वप्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्यात्रिदोषता ।।इति।

यथा लौकिको वातपित्तकफप्रयुक्तःसंनिपातोभिषग्वरैरपि समाधातुमशक्यप्रायोभवति, तथैव प्रकृतेऽन्यत्रापिप्राग्लोपाविनिगम्यत्वप्रमाणापगमत्रिकप्रयोज्योऽनवस्थादोषः समाधातुंनितरामशक्यः स्यात् । तस्मात् संघातातिरिक्तमात्रस्यासंहतत्वमस्वीकारेणैवव्यवस्थोपपत्तौ सत्यामनवस्थासर्वथैवानादेया । इतिसंघातस्यपरार्थतयातेनसंघाततद्रूपेणाव्यक्तादिनापरोऽसंहतःपुरुषः सिद्ध्यतीतिभावः । अप्रयोजकत्वाच्चेति, अपिच असंहतस्याप्यात्मनश्चेतनत्वादेव भोक्तृत्वस्योपपादयितुंशक्यतयाभोक्तृत्वलक्षणपरत्वे प्राधान्ये संघातत्वस्य प्रयोजकत्वं न भवत्यर्थादप्रयोजकत्वमेवेतिभावः । यदि संघातं परत्वेप्रयोजकः स्यात् तदा संहतपरार्थत्वेनव्याप्तिः स्यात् संघातत्वस्याव्याप्तिवलेनानेकसंघातस्यकल्पनापियुक्ताभवेदिति । परन्तु नैवमस्ति, एवञ्च संहतपरार्थत्वेसंघातत्वस्यव्याप्यत्वासिद्धत्वमितिभावः । किञ्च-संघातपरत्वेनानुमानप्रमाणगम्यस्यात्मनःसंघातरूपत्वंयोग्यानुपलब्धिवलेनबाधितमपि भवति, वन्हौद्रव्यत्वेनहेतुनाशैत्यानुपलब्धिवलादिति । अथ यदि संघातत्वपरार्थत्वेनव्याप्तिर्नप्रसिद्ध्येत यदिकश्चिद्बाधको भवेत् परन्तुप्रकृतेप्रमणान्तरविरोधाभावात्तुसंघातत्वस्यपरार्थत्वेन व्याप्तिः स्यादेवेत्याशयेनाह **न च प्रमाणान्तरवलेनाहंकारिकत्वसंघातान्तरार्थत्वयोर्बाधेऽवाधितेन संघातपरार्थत्वेनापि न भवितव्यम्** अर्थात् भवितव्यमेवेति । सम्प्रतिप्रकरणार्थमुपसंहरति **एवञ्च संहतत्वव्यापकेत्यादि** यथाधूमव्यापकस्यवन्हेरभावेऽर्थाद् वन्ह्यभावेसतिधूमाभावोभवत्येव तथैव संहतत्वव्यापकस्य परार्थावस्थाभावेसति, असंहतःसत्वादिगुणत्रयरहितोऽसंहतआत्मा सांख्याभिमतःपुरुषः सिद्ध्यतीति । एतावताव्याख्यानेन संघातपरार्थत्वात् त्रिगुणादिविपर्ययादित्यंशआर्यायाव्याख्यातः । तदनु "अधिष्ठानात्" अयमंशआर्यायाव्याख्यातुमुपक्रमते **एवमेवशरीरादयसुखदुःखमोहात्मकतयापरेणाधिष्ठिताः** इति । अधिष्ठानादयमंशो व्याख्यायते तेनप्रकरणेन, तथाहि—"यथारथयन्त्रादयः स्वेतरेण चेतनपुरुषाश्वादिभिरधिष्ठिता एव गमनादिकार्यक्षमाभवन्ति, तथैवशरीरेन्द्रियादयोबाह्याआन्तराश्चैते सुखदुःखमोहात्मकतयापरेणासंहतेनपुरुषेणाधिष्ठता एव, तेन तत्र चेतनः पुरुषः सिद्ध्यति । अर्थात्, सत्वगुणःसुखात्मकस्सुखजनको वा तथा रजोदुःखात्मकंतज्जनकंचलं च, तमो मोहात्मकं

त्वाच्छरीरादयो विलक्षणद्रष्टृकाघटवदेवेति । अधिष्ठातुरनुकूलप्रतिकूलवेदकस्यद्रष्टुस्त्रैगुण्यादिविपर्ययः पूर्ववदेवज्ञातव्यः। तथा शरीरादारभ्यप्रधानान्तसर्वस्य वस्तुजातस्यसुखदुःखमोहात्मकतया, ऐकान्तिकात्यन्तिकदुःखशमनलक्षणमोक्षानुपपत्तेस्तदर्थं चशास्त्राणांमहामतीनां च प्रवृत्तिदर्शनाद् देहातिरिक्तोऽसंहतःत्रैगुण्यासंस्पृष्टः पुरुषः सिद्धः ।इति ।

प्रमादालश्यजनकं मोहात्मकंचेतिदेहादयः सुखदुःखमोहात्मतया=सुखादिलक्षणसत्वरजस्तमःसमुदायरूपतया, परेणस्वसजातीयभिन्नेनचेतनेनकेनचिदधिष्ठीयन्तेस्वस्वकार्यकरणायप्रेरिता भवन्ति, यन्त्रादिभिःसारथिप्रभृतिभिः प्रेरिताःसन्तस्तदिंगितानुरोधेनाश्वारथान्वहन्ति "विज्ञानसारथिर्यस्तुमनप्रग्रहवान् नरः । सोध्वनःपारमाप्नोति यद्विष्णोःपरमंपदमिति" इत्यादिस्थलेचेतनयुक्तस्य अर्थात् चेतनाधिष्ठितस्यैवाचेतनस्यकार्यक्षमत्वंप्रदर्श्यचेतनाधिष्ठितत्वं देहादेर्दृढीकृतमिति, अनेनप्रकारेणाधिष्ठानादित्यंशो व्याख्यातः । अतःकारिकाघटकभोक्तृभावादित्वंशव्याख्यातुमाह **अपिचेष्टानिष्टेत्यादि** तत्रेष्टः अनुकूलवेदनीययोऽनिष्टः प्रतिकूलवेदनीयः । अनुकूलत्वप्रकारकबुद्धिविषयः प्रतिकूलत्वप्रकारकमितिविषयः । भृत्यसेव्यः स चानुकूलत्वप्रकारकबुद्धिविषयो भवति, भ्रातृव्यःशत्रुश्च प्रतिकूलत्वप्रकारकबोधविषयश्च भवतीति । भोक्तृभावादित्यस्यद्रष्टृत्वपरत्वम्, इमेदेहादयसर्वेंपिपदार्थादृश्याःसन्ति, इतितेषामस्ति कश्चित्द्रष्टा, स च संघातादतिविलक्षणः । यथाघटादयोविषया विलक्षद्रष्टृकामवन्तोदृश्यन्ते तथैव देहादयोपि दृश्याः संघातरूपाविलक्षणद्रष्टृकाएवेतिं । अधिष्ठानानुकूलप्रतिकूलवेदकस्य द्रष्टुः पुरुषस्यत्रैगुण्यविपर्ययः पूर्ववदेवसंसाधनीयः । संहतपदार्थस्ययेयं प्रवृत्तिर्भवति सा प्रवृति, अधिष्ठात्रान्तराधीनैवदृश्यते, यदिअधिष्ठातापिसंहतरूपएवभवेत्तदातदीया प्रवृत्तिरपितदन्येनकेनाचिदपिप्रयोज्याभवेत् , तदाऽधिष्ठातृपरंपराप्रवाहेऽप्राप्राणिकी अनवस्थास्यादिति । तस्मादनवस्थादोषपरिहाराय, अधिष्ठातुःप्रवृत्तिर्नसंघातात्मकाधिष्ठातुःप्रयोज्या, अर्थात् यश्चशरीरादिनामधिष्ठाता सनसंघातरूपोऽपित्वसंहतः त्रिगुणादिविपरीत एव । अर्थादसंहत एवाधिष्ठाता, तस्यापिसंघातरूपरूपत्वेदुःरवस्थानवस्थास्यादित्यादिकंपूर्ववदेवज्ञातव्यम् । एवं सुखेनानुकूलनीयस्य दुःखेनप्रतिकूलनीयस्य वा भोक्तुःपुरुपस्यापिसुखदुःखमोहरूपत्वे, तस्यापि, अनुकूलवेदनीयत्वप्रतिकूलवेदनीयत्वप्राप्तेरनुकूलप्रतिकूलवेदनीयान्तरापादकत्वादनवस्थापिशाचिनी, समुपस्थिता भवेत् , यस्याः शान्तिरशक्यपरिहारास्यादतः सोऽनुकूलप्रतिवेदनीयो न त्रिगुणःसुखदुःखमोहात्मकोपितु तद्विपरीतोऽत्रिगुणोऽसंघातरूपएवेति । अर्थात् देहादिपक्षकविलक्षणद्रष्टुरनभानेन च पुरुषस्यात्मनोदेहादिवैलक्षण्यंसिद्धं भवतीति भावः ।

कारिकाघटके "कैवलार्थंप्रवृत्तेश्चेत्यंशंव्याख्यातुमाह—**तथाशरीरादारभ्यप्रधानान्तसर्वस्येत्यादि** स्थूलशरीरादितआभ्यपरमसूक्ष्माव्यक्तपर्यन्तजगतस्त्रिगुणात्मकत्वम्, तत्रसुखभागो-

अत्रापि यद्यपि संहतस्यपारार्थ्यहेतुभिः परः कश्चिदधिष्ठाता द्रष्टासिद्ध्यति । तथापि संघातस्यतस्यतस्यनासंहतत्वात्रिगुणत्वादिरभिमतविशेषात्साधयितुंशक्यः । तथाहि एकस्यसंघातस्य संघातान्तरार्थत्वनियमनियमदर्शनबलेनागच्छन्तीपरापरासंघातान्तरकल्पीयान् दुःखभागश्चाधिकस्तेनाहतः पुरुषोदुःखस्यैकान्तिकात्यन्तिकोच्छेदलक्षणतदीयप्रशमनमिच्छन्, आत्मज्ञानायप्रयतते, प्रयतमानश्चशास्त्रनिर्दिष्टतदीयोपायंप्रकृतिपुरुषविवेकमर्जितुंशास्त्रमधिकरोति, तदनन्तरंव्यक्ताव्यक्तलक्षणतत्वविवेकमधिगत्यविमुच्यस्वस्थो भवति । यद्यप्येतन्मते दुःखंनित्यं तद्विनाशोऽशक्यस्तथापितदतिभवःशक्यंकर्तुम् । संसारमोक्षौप्रकृतिगतावेते । तदुक्तं——

“रूपैःसप्तभिरेवमात्मानमावध्नातिप्रकृतिः । सैवचपुरुषार्थंप्रतिविमोचयत्येकरूपेण ।।इति।।

तत्रधर्माधर्मज्ञानवैराग्यैश्वर्यानैश्वर्येतिरूपसप्तकेनात्मानंवध्नात्यर्थात संसारभागिनीस्वांकरोति, सैवभोगपरिसमाप्तौमोक्षरूपपुरुषार्थमपेक्ष्यैकेनतत्वज्ञानात्मकरूपेणात्मानं संसाराद्विमोचयति । तदुक्तं सांख्यकारिकायामेव——

“धर्मेणगमनमूर्ध्वंभवत्यधस्ताद् गमनमधर्मेण । ज्ञानेनचापवर्गोविपर्ययादिष्यतेबन्धः ।।इति।।”

ज्ञानादपवर्गस्तद्विपर्ययाद्वन्ध इष्यते बन्धो भवतीति । यदारूपसप्तकोपेतप्रकृतिच्छायामुद्गृह्णाति चेतनस्तदातस्यचेतनस्यसंसारोयदातुज्ञानान्वितप्रकृतिच्छायामुद्गृह्णातितदाऽस्यचेतनस्यमोक्षोजात इति व्यवहारः । वस्तुतस्तुनास्यवन्धोऽपवर्गोवा तौ तु प्रकृतिगतौपुरुषे उपचर्येते । तदुक्तम्——

“प्राप्तेशरीरभेदेचरितार्थत्वात्प्रधनविनिवृत्तौ । ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ।।इति।।

यदातुसंस्काररूपेणापिप्रकृतेस्वस्थानं भवति तदास्य मोक्ष इत्यादिकंमनसिनिधाय कथितम्—देहादारभ्याव्यक्तपर्यन्तनिखिलस्यत्रिगुणात्मकतयात्यन्तिकदुःखोपशमनलक्षणमोक्षानुपपत्तेमोक्षार्थंशास्त्राणामहामतीनां विदुषां च प्रवृत्तिदर्शनात् , अस्तिसंहतशरीरादिव्यतिरिक्तोऽसंहतः त्रैगुण्यासंस्पृष्टः पुरुषपदाभिधेयआत्मेतिदिक् ।

। इति सांख्याभिमतात्मानुमाननिरूपणप्रकरणेतत्त्वदीपः ।

संघातपरार्थत्वादित्यादिहेतुभिः सांख्यैर्देहादिविलक्षणात्मःसिद्धिरुदाहृता, तत्रसंघातपरार्थत्वानुमानंदूषयितुमुपक्रमते **अत्रापि यद्यपिसंहतस्यपारार्थ्यहेतुभिरित्यादि** संघातपारार्थ्यानुमानेन सामान्यतःपरःकोपिअधिष्ठाताद्रष्टासिद्धस्तयापितस्यस्वाभिमतस्याहंतत्वस्यात्रिगुणत्वस्यसिद्धिर्नाभूत् । कथमभिमतस्यात्रिगुणत्वस्यासंहतत्वस्यसिद्धिर्न भवतीतिशंकामपनीय तदुपपत्तिंदर्शयति **तथाहीत्यादि** संघातार्थान्तरार्थत्वनियमवलादिति । एकंशयनादिकंवस्तुः यथा संघातान्तरशरीरार्थकं तथैव देहसंघातोपिसंघातान्तरनिमित्तकः स्यात् व्याप्तिवलात्, न च परंपरास्वीकारेऽनवस्थादोषः अप्रामाणिकानवस्थाया एवदोषत्वंनतुप्रामाणिकीसादोषायेति भावः । कार्यात् कारणवदेव, अर्थात् कार्यात् कारणमनुमेयंभवति घटेनकपालवत् । तत्र कपालादिकारणस्यापिकदाचित्कत्वेन, तस्यापि कार्यत्वा-

ल्पनादोषाय न भवति। यथा कार्यत्वेनानादिकारणकल्पनादोषाय न भवति। नचाप्रयोजकत्वमपि, असंघातस्यासंगतस्याशेषविक्रियारहितस्यानाधेयातिशयकूटस्थचितिमात्रशरीरस्यपुरुषस्यसंघातंप्रतिपरत्वस्यानुपपन्नत्वात् । एतद्धि तदेव भवेत् यदितस्यशेषीभवेत् , तच्चतदर्थम् , यद्येनोपक्रियते क्रियतेवा, यच्चोपकरोतिकरोति वा । न चैवं सांख्याभिमतः पुरुष इति कथं तादृशपुरुषस्य संघातं प्रतिपरत्वम् ? कथमिव वा संघास्यतादर्थ्यम् । ननु अनुपकार्योंपिपुरुषउपकार्यतयामन्यतेस्वात्मानमितिचेत् , कामं तथा मन्यताम् तथापि उपकार्यत्वेकिमायातम् । न च बालास्तलमलिनतया गगनं मन्यन्ते इति वस्तुतोगगनस्यमालिन्यं भवतीतिकोपिविजानातीति ।

तत्कारणान्तरमप्यनुमीयते इति कारणपरंपरायाःकल्पनाप्रामाणिकीतिसाकारणपरंपराकल्पनादोषाय नभवति तथैव प्रकृते एकस्यसंघातान्तरार्थत्वकल्पनाव्याप्तिबलसिद्धत्वान्नदोषाय । एवञ्च संघातस्यपरार्थत्वेपियश्यपरःसोऽसंहतोऽत्रिगुणइतिकल्पनंनोपपन्नमिति न तत्राभिमता संहतात्रिगुणात्मनः सिद्धिर्जायते इतिभावः । अथ अवयवसमुदायात्मकसंघातत्वभोक्तृत्वरूपेपरत्वेहेतुत्वाभावे न संघातपरार्थत्वेन संघातत्वस्यव्याप्तिज्ञानंसंभवतीत्याशयेनाह **न चाप्रयोजकत्वमपि** हेतोरप्रयोजकत्वमनुकूलतर्करहितत्वमिति न वक्तव्यमिति । संघातपरत्वंतदधीनातिशयभाजिसंभवेत् । तदधीनाशयोनवीनत्वं च, असंहतेसर्वथालेपरहितेऽत एवनिर्विकारेकूटस्थेचैतन्यमात्रशरीरकेऽतएवातिशयाधानायोग्येसांख्याभिमतपुरुषे कथमपि न संभवतीत्यतः संहतस्यैवकस्यचित् संघातशेषिणः सङ्घाङ्गिनोऽनुमानेनसिद्धिर्भवेत् नतु सर्वथासंघातविवर्जितस्यसांख्याभिमतपुरुषस्यसंभवतीति । अर्थात् सुखदुःखभोगरूपोऽतियोनिर्विकारकूटस्थसांख्याभिमतपुरुषस्यनैव भवेदिति । एतावता "पुरुषोऽस्तिभोक्तृभावादित्यपिनिरस्तमेवेति । यतो दृश्यतेखट्वादेः संघातरूपस्यतदपरशरीरात्मकसंघातार्थत्वमेव, तथैकशरीरं शरीरान्तरार्थम् । अतस्तदधीनातिशयभोक्तृत्वरूपेतत्परत्वेसंघातत्वस्यप्रयोजकत्वेनतदवच्छिन्नपरार्थत्वेनव्याप्तिग्रहःसंभवत्येवेतिनाप्रयोजकत्वंहेतोरिति । तदेवतस्यशेषीअङ्गीभवति, यद्येनोपक्रियते क्रियते वा यदुपकरोति, करोति वा, नैवंप्रकारकःसांख्याभिमतःपुरुष इति कथं तादृशपुरुषस्यसंघातविशेषंप्रति परत्वं कथं वा संघातस्यपुरुषार्थत्वम् । अर्थात् यद्वस्तु येन वस्तुविशेषेणोपक्रियतेक्रियतेवा, तदेवतस्यशेषीअङ्गीप्रधानं भवति तदन्यदङ्गम् । यत्तूपकरोति करोति वा तत्; तदर्थंतच्छेषोगौण इत्यर्थः । उपक्रियते, अर्थात् अतिवान् क्रियते, यथा देहोमालातीलकादिनाऽतिशयवान् भवति, यथा वा दर्शपूर्णमासोयागविशेषः प्रयाजानुयागादिनाऽतिशयवान् भवति । क्रियते-उत्पाद्यतेनिष्पाद्यते, यथा वां दण्डादिनाघटादिरुत्पाद्यते, पुरोडाशेन द्रव्यविशेषेणयागउत्पादितो भवति । तत्रोपक्रियमाणंक्रियमाणं यद् भवति तदेवाङ्गिप्रधानम् , यदुपकारकंकारकं वा तदङ्गमेव भवतीतिगौणप्रधानयोर्भेदो भवति । नैतादृशः सांख्याभिमतःपुरुषस्तस्यकूटस्थनित्यतास्वीकारेणाविक्रियत्वात् । इति तादृश

अपि च योयं विभ्रमोजायते स कस्य भवति किञ्चितिरात्मनोबुद्धेर्वाभवतीति विचारणीयम् । तत्र न तावत् चितिशक्तेरात्मनः सर्वविकाररहितायाऽतिविशुद्धाया षुरुषपुरुषस्य न संघातरूपदेहादिकं प्रतिपरत्वं नवा संघातात्मकदेहादेः पुरुषार्थत्वमिति । न च स्वरूपतोऽपकार्योप्यात्माप्रकृतिसम्पर्कादात्मानमुपकार्यतयाऽभिमन्यतेस्वात्मानमितिचेत् ? एतावता केवलमुपकार्यतायाअभिमानमात्रंजातं नतु वस्तु उपकार्योजातः नहि बालैर्मलिनतयागगनंमलिनमभिमन्यते, इति तावतागगनंमलिनं किं भवति, अर्थात् मलिनं वस्तुतोनैवभवति । अर्थात् रूपादि राहित्येनावस्थितंगगनमविवेकबालकः कदाचित् पृथिवीच्छायामारोप्यकदाचित् सौरप्रकाशमारोप्यः मणिमयकराहरूपंमलिनं वा राजहंसमालावत्, अतिस्वच्छंवेतिभ्रान्तिमूलकंव्यवहारंकरोति, न तावतारूपंनभस्तथाभवति किन्तु व्यवहारमात्रंतात्कालिकं जायते, तावतावस्तुतो न मलिनः स्वच्छोवाऽकाशो भवति । यथावा सर्पतादात्म्येनभ्रमकालेज्ञायमानोपिदण्डादिर्वस्तुतःसर्पोभवति, नायंसर्पोऽपितु दण्डएवेतिवाधानन्तरंप्रतीतिदर्शनात् । तत्रारोप्येणसर्पगतसर्पत्वप्रकारकज्ञानमात्रं भवति तेनायं सर्प इतिव्यवहामात्रं जायते, नतु ज्ञानमात्रात्रज्ज्वादिः सर्पो भवति । तथैवेहापिउपकार्यतयाऽभिमानोपिनात्मनउपकार्यत्वमितिनात्मनस्तथाविधंवास्तविकंभवतीति संक्षेपः ।

। इति सांख्याभिमतात्मानुमाननिरूपणप्रकरणीयग्रन्थस्यतत्त्वदीपः ।

ननु यद्यपिवस्तुतोऽविक्रियत्वादात्मानोपकार्यस्तथापितादृशस्यात्मनोऽनुपकार्यत्वेपि, शरीरेन्द्रियबुद्धिवेदनादिभिःप्राकृतवस्तुभिरुपकृतोऽहमित्याकारकोपकृतत्वभ्रमलक्षणएवोपकारः सचोपकारः प्राकृतदेहेन्द्रियादिभिः साध्य इतितत्परत्वमुपपद्यते इत्यादिप्रश्नकर्तुराशयमाकलय्यतन्निरासायोपक्रमते **अपि च योयं विभ्रमोजायते** इत्यादिप्रकरणेन । संसारमोक्षप्रयोजकोयोयंविभ्रमः स्वीक्रियते स च विभ्रमःकस्य भवति, यथा मालादौजायमानः सर्पत्वप्रकारकोऽयंसर्पइत्याकारकोभ्रमोजायते स धथा देवदत्तादविद्योपहतकरणस्य भवति । तथा प्रकृते योयंविभ्रमः स कस्य भवतीति विचारणीयतामापद्यते इत्याशयः । ननु ज्ञानमात्मसमवेतंसचात्माचेतनस्तस्यैवप्रमात्मकं भ्रमात्मकं वा यद्ज्ञानंतत्तस्यैवचेतनात्मनो भवति, नतु जडस्यकदाचिदपिज्ञानं जायते इति सर्वतन्त्रसिद्धान्तः । एतादृशस्थितौ "ज्ञानंकस्यभवतीति" विचारो न युक्त इति चेत्सत्यम्, यस्य मते धर्मभूतज्ञानस्याधिकरणत्वमात्मनः ज्ञानात्मनोर्भेदस्तन्मतेनायंविचारः किन्तु यन्मतेज्ञानमात्रमात्मा, घटादिविज्ञानमन्तःकरणवृत्तिरूपंतन्मते युक्त एवायंविचार इति **तत्र न तावत् चिति शक्तेरात्मनः** इति, चितिशक्तेः=चैतन्यस्वरूपस्यपुरुषस्यशक्तितद्वतोरभेदमाश्रित्यकथनम् **तावच्चिचतिशक्तेरात्मन इति ।** अर्थात् यदिदंविभ्रमात्मकंज्ञानं भवति, तन्नचेतनस्यसंभवति, आत्मनःसर्वथाऽविक्रियत्वात्, ज्ञानास्य च क्रियारूपत्वेनात्मनिसमवायासंभवात् । यथाघटाभावविशिष्टभूतलमुद्दिश्यघटविधानेबाधः अघटंघटवदित्यप्रयोगात्, तथैव विकाररहितपुरुषेविकारात्मकज्ञानवत्त्वविधाने स्पष्टोवाधोजायते,

अशुभशतकारणविभ्रमासंभवात् । नवा द्वितीयःपक्षःवुद्धेरचेतनतयाचेतनकार्यविभ्रमासंभवात् । नवाचेतनापिबुद्धिरतिस्वच्छतयाचेतनयासमापत्त्याचेतनावद्भवतीतिवाच्यम्, सर्वथानीरूपतयाचितेर्बुद्धेश्चछायातद्ग्रहणानुपपत्तेः । छायावदिवछायेतिचेत्, इवार्थनिर्वचनासंभवात् । "चितिसमानरूपत्वमेव" इवार्थः, इतिचेत् , सर्वविकाररहितचिति

तस्मात् पुरुषे विभ्रमात्मकज्ञानंसमवैतीतिकथनं वाधितमिति न प्रथमपक्षः साधीयानिवाभातीति । नवा, विभ्रमात्मकंज्ञानंवुद्धौ अन्तकरणे भवतीति द्वितीयपक्षः । "अध्यवसायोवुद्धिः" "मनोवुद्धिरहंकारश्चित्तंकरणमान्तरम् । संशयोनिश्चयोगर्वःस्मरणंविषयादिभे" इत्यादिस्वतन्त्रपरिभाषापरिभाषितमन्तकरणम् , तस्मिन्नन्तकरणेविभ्रमात्मकंज्ञानंसमवैतीतिकथनंसर्वथाऽयुक्तम् , यतस्तादृशान्तःकरणस्य चेतनत्वात् । नहि अचेतनं प्रमात्मकभ्रमात्मकज्ञानस्याधिकरणं भवतीति । यथादेवदत्तश्चेतनोविभ्राम्यति न तथा देहोदण्डादिर्वाविभ्राम्यतीति दृष्टंश्रुतमुपपद्यते वा । तस्मादन्तःकरणेविभ्रमोजायते इति द्वितीयपक्षो न युक्तः । ननु "तस्मात्तत्संयोगादचेतनं चेतनावद् भवति । गुणकर्तृत्वेपि तथा कर्तेवभवत्युदासीनः । "तस्मिश्चिद्दर्पणेस्फारेसमस्ता वस्तुदृष्टयः । इमास्ताः प्रतिविंवन्तिसरसीवतटद्रुमाः ।" इत्यादिवृद्धोक्त्या, स्वभावतोऽचेतनमप्यन्तःकरणंचेतनस्यप्रतिविम्वाश्रयतयाचेतनावद् भवति, तथा निष्क्रियोप्यात्मा कर्तृत्वादिधर्मविशिष्टान्तःकरणप्रतिविंवाश्रयतयाक्रियावद्भवति । ततश्चान्तःकरणेऽचेतनेपिविभ्रमःसंभवतीत्याशयेनाह "**अचेतनापि स्वच्छतयेत्यादि** प्रश्नः । अर्थादचेतनमपिचेतनछायापत्त्याचेतनवदेवकार्यंकरोतीतिप्रश्नः । उत्तरयति **सर्वथानीरूपतयाचितेर्बुद्धेश्चेत्यादि** आत्मनःसर्वथारूपरहितत्वेनकान्तिस्वरूपायाश्छायाया उज्वलरूपवद्धर्मभूतायाः सर्वथारूपाभाववतिचैतन्यरूपेआत्मन्यसंभवात् । तथाऽन्तःकरणेरूपरहितेतत्प्रतिफलनलक्षणसंक्रमणस्यासंभवात् । दृश्यते च सर्वत्रस्फटिकादौ वा रूपादिविशिष्टजपाकुसुमलोहितादिवर्णानांप्रतिविंवः। जलादौ वा विप्रकृष्टसूर्यनक्षात्रादीनांप्रतिविंवस्तदीयछायायाः संक्रमणंप्रतिविम्वो जायते, नतु रूपरहितेरूपरहितस्यप्रतिविंबादयः । अतएव कथितम् "शद्वगन्धरसादीनांकीदृशीप्रतिविम्वता" इति । अर्थात् नहि रूपादिरहितशद्वादिगुणानांकुत्रापिप्रतिविम्वोदयःसंभवन्तीति । एवमेवप्रकृतेरूपरहितेन आत्मनिरूपरहितान्तःकरणस्य, तथानीरूपेऽन्तःकरणे रूपादिरहितस्यात्मनो वा प्रतिविम्वादय इति । पुनः शङ्कते **छायावदिवछायेति** नात्रछायापदेन मुख्या—कान्तिरूपा सा विवक्षिता, अपितु सादृश्यरूपमेव, ततश्च चितिसादृश्यापत्तिश्चेतनोपमानत्वमिति । उत्तरयति **इवार्थनिर्वचनासंभवादिति** अर्थात् आत्मान्तःकरणयोःसादृस्यंकेनाकारेणस्यादिति । न च चितिर्ज्ञानंतादृशज्ञानसारूप्यमेवतयोरितिवक्तव्यम् , वृत्तिपरिणामसामान्याभाववत्वेन सादृश्यमित्यर्थः । उत्तरवर्ति=**सर्वविकाररहितचितिरूपत्वे** इत्यादि, पुरुषो हि सर्वविकाररहित इति ते मतम्, एतादृशसर्वविकार रहितचेतनसरूपतापत्तौ, अन्तकरणंस्वस्वरूपमेव परित्ययजेत् ततश्चान्तः करणमपिसर्वविकाररहितं

रूपत्वेचितिरन्तःकरणमपिसर्ववृत्तिरहितंस्यादितिभ्रमसुखादिविकारयोगः प्रत्यात्मसिद्धो विलुप्तएवभवेत्, चेतनत्वेनसमानरूपत्वमेवचितिबुद्धयोरितिचेत् ? भवन्मतेचितिरेव पुरुषो नतु चेतयिता तदुक्तंपतञ्जलिना "यदाचितिरेवपुरुषः किमत्रकेनव्यपदिश्यते" इति । अजडायमानत्वमिवार्थ इतिचेत् । अजडत्वं न ज्ञातृत्वातिरिक्तंकिञ्चित्, इति

स्यादिति, ततस्तस्मिन्नन्तःकरणे सुखदुःखभ्रमादयोविकारानिरालंबना भवेयुः । एवंचान्तःकरणस्य सर्ववृत्तिरहितत्वेविभ्रमादयोयेविकारास्तेकस्यस्युः । न चान्तःकरणस्यसर्ववृत्तिरांहतत्वमिष्टं, अन्तःकरणे भ्रमादिमत्वस्यसर्वानुभवसिद्धस्यनिराकरणासंभवात् । अर्थात् अन्तःकरणस्यनिर्वृत्तिकत्वेभ्रमादयस्तस्य न स्युः । अर्थात् भ्रमादिरूपवृत्तेरुपपादनार्थमेवचेतनायमानत्वं परिष्क्रियते, तदन्तःकरणंचेत् सर्ववृत्तिरहितरूपम्, इतिनैवप्रसंगोभ्रमाद्युदयस्य । एवञ्च, यदर्थमयमारंभः तत्सर्वमवसादितमितिन्यायारोपोनातिक्रामति । प्रकारान्तरेणसरूपत्वंशंकते–**चेतनत्वेन समानरूपत्वमिति** अर्थात्, आत्मान्तःकरणयोःसरूपत्वंविवक्षितं, ततश्चप्रसक्तोदोषउद्धृतोभविष्यतीत्यर्थः । ततश्चचेतनत्वेनज्ञातृत्वरूपेणैवसादृश्यंविवक्षितमिति । उत्तरयति-**भवन्मते पुरुषो नतु चेतयितेति** । ज्ञानरूप एवात्मा, नतु ज्ञानात्मनोराधाराधेंयभावस्तत्र मते । ततश्चचेतनत्वेन ज्ञातृत्वरूपेणसादृश्यंनैवसमाहितं भवतीति । तदुक्तंपतञ्जलिना "यदाचितिरेवपुरुषः" इत्यादि । यदातुज्ञानात्मनोस्तादात्म्यं नतु तयोराधाराधेयभावस्तदाकेनकस्यनिरूपणंस्यात् , आधारभिन्नेनाधेयेनविशेषणेनतदतिरिक्ताधेयेनाधारस्यनिरूपणंभवति, नतु स्वेनस्वस्यस्वेननिरूपणंभवति, तथात्वे आत्माश्रयप्रसङ्गोभवतीति । नहि घटेनैव घटस्यनिरूपणं भवति, किन्तु अन्येनान्यस्यनिरूपणं भवति, 'वेगवानश्वः" इत्यादिस्थले, वेगेनाश्वोनिरूप्यते नतु अश्वेनैव स एवाश्वो निरूप्यते इति । पुनःप्रकारान्तरेणेत्यर्थंशङ्कते **अजडायमानत्वमिवार्थ इतिचेदिति** । यथा आत्माऽजडःस्वप्रकाशरूपस्तथैवान्तःकरणमपिचेतनसंपर्कात् स्वप्रकाशात्मकमिति, एतयोरात्मान्तःकरणयोरजडायमानत्वं सम्भवती तितेनरूपेणैवतयोः समानत्वमितिप्रश्नाशयः । परिहरति **अजडत्वं न ज्ञातृत्वातिरिक्त**मित्यादि । तत्र ज्ञातुरहमर्थस्यचेतयितुरहमर्थस्यात्मन एव, स्वेतरानपेक्षप्रकाशत्वलक्षणमजडत्वंसंभवतीति, ज्ञातैवात्मेतिनिरूपणप्रकरणेप्रतिपादितम्, ततश्चैवंविधाजडत्वस्यज्ञातृत्वसमानाश्रयत्वात् , ज्ञातृत्वधर्मेणैवज्ञातृत्वस्यसमर्थनेकृतेसति, आत्माश्रयदोषस्यपरिहारोनैव भवतीतिभावः । ज्ञातृत्वैकाश्रयेणाजडत्वेन, एतदजडायमानत्वं न किञ्चिदिति । अर्थात् स्वार्थसाधनेनोपयुक्तंविवक्षितभ्रमादिवत्वोपपादकं न भवति, यतोऽसिद्धेनैवासिद्धस्योपपादनात् । सिद्धेनकारणेनासिद्धंकार्यंसाधितं भवतीतिनियमः नतु स्वयमसिद्धः परान् साधयति, यथा कार्यमसिद्धमितितत्साधनायसिद्धंकारणमपेक्षितं भवति, यदिकार्यवत् कारणमप्यसिद्धं तदाकेनकस्यसाधनंस्यात् , उभयोरसिद्धत्वात् अथवा असिद्धेन साधनेनप्रकृतार्थोपपादनस्यसर्वथैवासंभवात् । यथाऽनागतेनदण्डेन वर्तमानकालिकघटस्य संपादनं न संभवति तथैवप्रकृतेपि, असिद्धेन

पूर्वमेवनिवेदितम् । अपि च चितिसंनिधानाधीनांबुद्धिंप्रतिपादयत् कथमिवाजडत्वंस्यात् । न च चेतनान्तःकरणयोर्विम्बप्रतिविम्बयोरन्यतरस्मिन्नविद्यमानस्यविषयविशेषोपरक्तज्ञातृत्वलक्षणधर्मविशेषस्य प्रतिविम्बसंभवोभवेदित्यादिकं सर्वंप्रतिविम्बखण्डनावसरे निवेदितं तत एवद्रष्टव्यम् ।

कारणेनासिद्धकार्यस्योपपादनासंभवादितिसंक्षेपः । अथ यदिं अन्तःकरणस्याजडत्वंस्वीकुर्यात् स्वपक्ष समर्थनलोभेन तदासांख्यस्यापसिद्धान्तदोषोप्यापतति तत्राह **अपि च चितिसंनिधानेत्यादि ।**

अन्तःकरणापरपर्यायस्यबुद्धितत्वस्यसिद्धिरात्मनःसंनिधानादेवजायते, जडवर्गस्यचेतनसंपर्कादेवसिद्धिर्जायते इति सांख्यसिद्धान्तः । एवं व्यवस्थितनियमे, बुद्धिर्नजडा किन्तु प्रकाशरूपेति कथनम् "तस्मात्तत्संयोगादचेतनावदिवलिङ्गम्" इत्याद्यभिधानंकथमिवसमुपपन्नंस्यात् । अर्थात्—नैव समुपपद्यते इति । ननु बुद्धितत्वापरपर्यायस्यान्तःचितिसारूप्यस्यासंभवादभावेपि तस्मिन्नन्तःकरणे चितेरात्मनःप्रतिबिंवज्ञातृत्वादिधर्मवान् स्यात् । अर्थात् यद्यपिजडचेतनयोर्बुद्धितत्वाऽत्मनोःपरस्परं सारूप्याभावेपि, अन्तःकरणे योयं चेतनात्मनःप्रतिबिम्बोजायते, यथा जलेदर्पणादौवा, यः सूर्यस्यप्रतिविम्बःदर्पणेमुखस्य वा प्रतिबिम्बः, तथैवान्तःकरणे य आत्मनःप्रतिविम्बः स एव चैतन्यप्रतिविम्बो ज्ञातृत्वादिमान् भवति, तथा ज़लस्यचलनेजलगतः प्रतिविम्बःचलतीवलक्ष्यते, न तत्र प्रतिबिम्बेचलनंवास्तवं किन्तु जले एव तच्चलनंभ्रमात्मकमेव, तदभाववतितत्प्रकारकत्वात् । तथैवान्तकरणे योयमात्मनः प्रतिविंम्बस्तत्रैवभ्रमात्मकज्ञातृत्वादिकंभवतीतिचेत्सत्यम् । अयमाशयः चिदन्तःकरणयोर्बिंम्बाधिकरणत्वेनाभिमतयोरेकत्रापि, अवर्तमानस्यविषयविशेषोपरक्तज्ञातृत्वरूपधर्मविषस्य प्रतिबिम्बेसंभवाभावात् । अत्र बिम्बत्वेनाभिमतंशुद्धचैतन्यंपुरुषः, तथा प्रतिविम्बाधारतयाऽभिमतं तदन्तःकरणम् । तत्र बिम्बे आरोपःसंभवेत् । अत्र च प्रकृतेज्ञातृत्वंधर्मःविभ्रमोवा, प्रकृतेऽन्यतरस्मिन् विद्यते यस्यचित्प्रतिबिम्बेसमारोपोभवेदिति । अपि च विभ्रमःपुरुषेऽन्तकरणे वा विद्यते, इत्यादि विचारः तदैव समीचीनो भवेत्, यदि विभ्रमनामकःकश्चित्स्वतन्त्रःपदार्थो भवेम्, नत्वेवंविद्यते ज्ञानमात्रस्ययथार्थत्वात् स्वरूपतोविभ्रमस्यैवाभावात् । सर्वज्ञानत्वात्, घटवतिघटवद् भूतलमितिज्ञानवत्, अन्यथाऽन्याकारस्यरजताद्याकारस्येदंरजतमित्यादेर्ज्ञानस्यान्यविषयत्वेशुक्तिकादिविषयत्वेऽनुभवविरोधः स्यात् । अर्थात् ज्ञानेभासमानत्वमेव विषयत्वं नतु सत्तया विषयत्वम् नाधिकरणतया विषयत्वमतिप्रसङ्गात् । न च रजतज्ञानेशुक्तिकायाःप्रकाशः, तथात्वेरजतानुभवविरोधआपद्यते । तदुक्तमभियुक्तेन "अत्रब्रूमोयएवार्थोयस्यां संविदिभासते" इत्यारभ्य "अन्यस्यचान्यथा भानंप्रतीत्यैव पराहतम् । परस्मिन् भासमानेपि न परंभासते यतः" इति। अपि च ज्ञानस्य स्वविषयव्यभिचारे तत्रलोकानामविश्वासोपि स्यात्, तदुक्तं "यदिस्वार्थंपरित्यज्यकाचिद्बुद्धिः प्रवर्तते । व्यभिचारवतीस्वार्थेकथंविश्वासकारणमिति । किञ्च "इदंरजतमित्यादिस्थलेविद्यमान-

यदुक्तम् यद्यपि सर्वथाविकाररहितपुरुषस्तथापितदीयसान्निध्यवलात्तत्समीपस्थान्तःकरणेप्रमाणविपर्ययादिवृत्तिविशेषाजायन्ते तेन च विषयोपदर्शनंपुरुषस्य भवति । यथा सर्वथाचेष्टारहितस्यापि सार्वभौमस्यमाहात्म्यात् सेनापत्यादीनांयुद्धादिव्यापारस्तदीय विजयादिफलं भवति, तादृशफलभोक्तृत्वंसार्वभौमस्यभवति, स च राजापराक्रमीविजयीतिकथ्यते । तथैव प्रकृते पुरुषोभोक्ताद्रष्टा च व्यपदिश्यते । तन्नोपयुक्तम्, योहि द्रष्टा तस्मै दर्शनीयं दृश्यते । न च दृशिमात्रात्मवादिनः सांख्यस्यतदन्यतदुपजीविनश्चात्मनोद्रष्टृत्वंवास्तविकमस्ति । न च काल्पनिकंद्रष्टृत्वमात्मनःकल्पनायामप्यसंभवात् । सार्वभौमस्तुनात्रदृष्टान्तः संभवति, स तुसार्वभौमः सामान्यतोविशेषतोवायुद्धादिकर्मसु, सेवकानमात्यादीन् नियोजयतियुद्धादिफलं च जय विजयादिकमैश्वर्यादिकंचाश्नोति । तत्रसार्वभौमामात्ययोःसाधरणसैनिकस्यस्वस्वामिभावहेतुकक्रयप्रतिग्रहादिव्यापारवान् भवतीतिनोपयुक्तोनिर्विकारपुरुषस्य निदर्शनम् ।

। इति सांख्याभिमतात्मानुमाननिराकरणम् ।

संसर्गस्यापि भासमानत्वस्वीकारेबौद्धमतप्रवेशःस्यात् । तस्माद्विषयतःकारणतश्चविभ्राभावेन, सभ्रमःकुत्रवर्तते इत्यादिविचारोऽकाण्डताण्डव एवेति संक्षेपः ।

अथान्तःकरणे एव ‘‘प्रमाणविपर्ययनिद्रातर्कस्मृतिप्रभृतिसूत्रोक्ताविषयाकारावृत्तिविशेषाः समुत्पद्यन्ते, तत्रविषयाकारपरिणामलक्षणप्रत्यक्षादिज्ञानरूपवृत्तेःस्वीकारात्, अन्यस्मिन्नपिवृत्तिरहितस्वलक्षणदोषोऽनुपपन्नः । एवञ्चचिदात्मनोबुद्धेश्चभेदाग्रहात् चिदात्मनेज्ञातृत्वप्रतिभासोयुज्यते एवेत्याशयेनशङ्कते **यदुक्तं यद्यपीत्यादि**, यद्यपिचितिर्निर्विकारा तथापि चितिशक्तेः संनिधानबलादेवायस्कान्तमणिवत् स्वसमीपवर्तिनोऽन्तःकरणस्यप्रत्यक्षानुमानादिप्रमाणज्ञानभ्रमादिलक्षणादिवृत्तिविशेषाः समुदिता भवन्ति । तत्रचितिशक्तेःप्रधानत्वात्, चितेस्तासांवृत्तीनांसाक्षित्वंभोक्तृत्वंचोपपद्यते । यथा सर्वथायुद्धक्रिययाविरहितस्य कस्यचित्सार्वभौमराज्ञःप्रधानत्वोत्प्रवलामात्यसेनापत्यादिसमुदायकर्तृकयुद्धपराक्रमजयविजयादिफलभोक्तृत्वंप्रधानस्यैवसार्वभौमस्य भवति । सार्वभौमेनजितमित्यादिव्यपदेशात् । ननु सेनापत्त्यादौव्यावहारःपूर्वोक्तो भवति । तथैवनिर्विकारपुरुषसंनिधानादन्तःकरणेजायमानवृत्तीनांसाक्षित्वंभोक्तृत्वं च प्राधान्यान्निष्क्रियत्वेपि पुरुषस्यैवभवति नत्वन्तःकरणस्येतिशङ्काशयः । उत्तरयति=**तन्नोपयुक्तमिति**, निर्विकारस्यपुरुषस्यसाक्षित्वं न संभवति । यतः साक्षित्वं न चैतन्यमात्रत्वमपितुसाक्षाद् द्रष्टृत्वमेवतत्त्वम् । एतादृशद्रष्टृत्वं न चैतन्यमात्रस्य, शुद्धचेतनस्यकूटस्थनिर्विकारत्वादिति । ननु चितिद्रष्टृत्वंकल्पितमेवेति चेत्, सर्वथाविकाररहितेनिर्धर्मकेकूटस्थेपुरुषेद्रष्टृत्वादिभ्रमोपिनसम्भवति । यदा चैवं तदाकल्पना न स्यात् । दृष्टान्ते राजनि तु राज्ञो न व्यापारराहित्यंनिर्धर्मकत्वं वा तस्यतु सामान्यरूपेणव्यापारादिमत्वमेव, स्वस्वामिभावसम्बन्धश्च।

स्थूलोहंकृशोहमित्यादिप्रत्यक्षवाधापहृतविषयतयाविलक्षणात्मसाधकव्यतिरेकानुमानानांबाधितत्वमिति न तेनानुमानेनशरीरादिव्यतिरिक्तात्मसिद्धावश्रद्दधानाः श्रुतिप्रमाणेनैवश्रोत्रियाः शरीरादिव्यतिरिक्तात्मसिद्धिसङ्गिरन्तोश्रुदिवलादेवविलक्षणात्मासिद्धिं मन्यन्ते नतुप्रमाणान्तरेणेति । श्रुतयोहि साक्षादेवस्वमुखतोविलक्षणात्मसिद्धिं

तत्रस्वस्वामिभावेहेतवःक्रयप्रतिग्रहोत्पादनमरणादयोलोकेप्रसिद्धा एव । तदुक्तम् "सेवायापनमिच्छद्भिःसेवकैःपश्य यत्कृतम् । स्वातन्त्र्यंयत् शरीरस्य मूढैस्तदपिहारितम् " । "सुवर्णपुष्पितांपृथ्वीं विचिन्वन्ति नरास्त्रयः । शूरश्चकृतविद्यश्चयश्चजानाति सेवितुम् " इतिराजा हि धनादिनापुरुपान् क्रिणित्वातैर्युद्धंकारयति, तेन तत्र सेनाकर्तृकजयविजयफलभाग्राजैवभवतीति न राजनिदर्शनमत्रघटते ।

तदेवंराज्ञोभरणपोषणादिनिमित्तकंस्वामित्वमुपपद्यते, नतु सांख्याभिमतनिर्धर्मककूटस्थनिर्विकारस्य तथात्वं सम्भवतीतितद्दृष्टान्तप्रदर्शनमयुक्तमेवेतिसमुदिताशयः । अथ सांख्याभिमतस्यपुरुपाख्यात्मनोऽनुमानेनसिद्ध्यसम्भवेपिनैयायिकादिभिराधेयातिशयत्वेन भोक्तृत्वेन चाभिमतस्यात्मनसंघातपरार्थत्वानुमानेनसाधनंस्यादेवेतिचेत्सत्यम्—संघातस्य संघातपरार्थत्वेनव्याप्तेर्दर्शनात् । असंहतस्यपरस्यकस्यचिदात्मनः सिद्धेरसम्भवात् । न च भोक्त्रर्थत्वेनसंघातत्वस्यव्याप्तिर्भवतु । अर्थात् यत्र संघातरूपत्वं तत्र भोक्तृप्रयोजनकत्वं भवति शरीरादिवदेव । तथा च भोक्तृत्वात्, असंहतस्यात्मनःसिद्धिर्निष्कण्टकंस्यादितिवाच्यम्, शरीरेन्द्रियाणामपिशरीरान्तररूपभोक्तृप्रयोजनकत्वसाधनपर्यवसानात् । अहंतात्मनःसिद्धेरभावात् । शरीरादिभिन्नस्यभोक्तुरनुमानात्पूर्वमसिद्ध्या विलक्षणभोक्त्रर्थत्वेनव्याप्तेरग्रहात् विलक्षणस्यशरीरादिव्यतिरिक्तस्यात्मनः साधनायोग एवेति ।

। इति सांख्यतन्त्राभिमतात्मानुमाननिरासप्रकरणीयतत्त्वदीपः ।

ननु विलक्षणे आत्मनिशरीरादिभेदसाधकानुमानानांसांख्यनैयायिकाद्यभिमतानांसाधकत्वं न भवति तत्सिद्धेरेवासंभवादिति कथितम् । तेष्वनुमानेषुप्रत्यक्षबाधोपि भवतीतिदर्शयितुंतमेवप्रत्यक्षविशेषमुपस्थापयितुमुपक्रमते **स्थूलोहंकृशोहमित्यादि** । सर्वेषामावालवृद्धनांसाधारणतया वा विलक्षणभोजनवलेनशरीरावयवानामुपचयात् "अहं स्थूलः" इत्यादिप्रत्यक्षप्रतीतिर्जायते, तथा भोजनाभावें तपसिस्थितस्यशरीरावयवानामपचयात् "कृशोहंजातः" इत्यपिप्रात्यक्षकीप्रतीतिर्जायते । इयंच प्रतीतिःशरीरमेवविषयीकरोति नत्वात्मानमतिरिक्तंविषयीकरोति, आत्मनोऽवयवाभावेनतदुपचयापचययोरसंभवात् । किन्तु आभ्यां प्रतीतिभ्यांशरीरमेव विषयीभवति । ततश्चोपर्युक्तप्रतीत्याशरीरस्यैवस्थूलत्वकृशत्वादिविशिष्टस्यात्मत्वं प्रसिद्ध्यति, इति वन्हौशैत्यानुमानं यथा तदीयोष्णप्रत्यक्षेणवाधित साध्यकं सत् तत्रशैत्यं न साधयति स्थूलोहमितिप्रत्यक्षेण बाधितत्वात्, शरीरादिव्यतिरिक्तात्मानं न विलक्षणात्मानंसाधयितुंसमर्थमिति । अर्थात्, यथा वन्हिरुष्ण इतिस्पार्शनप्रत्यक्षेणबाधसत्वेन वन्हिः

प्रदर्शयन्ति । तथाहि—"स एष नेति नेत्यात्माऽगृह्योनहिगृह्यते" "स पर्यगाद्शुक्रमकायमव्रणमस्त्राविरंशुद्धमपापविद्धम् । कविर्मनीषिपरितः स्वयंभूः" "योनिमन्यप्रपद्यन्ते शरीरत्वायदेहिनः । स्थाणुमन्येऽनुसञ्जन्तियथाकर्मयथाश्रुतम्" "न जायते म्रियते वा कदाचित्, नायं कुतश्चिन्नबभूव कश्चित् । अजोनित्यः शाश्वतोयंपुराणो

शीत इति वन्हिनिष्ठशैत्यानुमितिर्नोत्थातुंशक्नोति तथैवस्थूलोहमित्यादिप्रत्यक्षबाधात् शरीरादिव्यतिरिक्ताद्यनुमानमपिनोत्थातुंशक्तंभवतीतिभावः । **प्रत्यक्षवाधापहृततया** अहंस्थूलः इत्यादिप्रत्यक्ष प्रमाणवाधितसाध्यकतयेत्यर्थः । वाधदोषस्यैवप्राचीनग्रन्थेकालात्ययापदिष्टत्वकथनम् । व्यतिरेकानुमानभेदानांतादृशानुमानविशेषाणामिति । कापिलाद्यभिमतानांन्यायानुमतानामिति । ननु यदिशरीर मेवसाध्यसाधकानुमानंप्रत्यक्षादिवाधितं, तदातादृशात्मनःसिद्धिःकथंस्यादित्यालोच्यश्रुतितात्पर्यज्ञाश्रुत्यैव तादृशात्मानंसाधयन्तिशास्त्रैकसमधिगतत्वात् ।

तादृशश्रुतिमेवदर्शयति **स एषनेतिनेत्यात्माऽगृह्यो नहि गृह्यते** योयमात्माऐहिकपारलौकिकयात्रानिर्वाहकः स, अगृह्यः श्रोत्रादीन्द्रियैर्ज्ञातुमशक्योरूपाद्यभावात् । अनयाश्रुत्याऽत्मनः शरीरादिगतप्रकारःनिषिध्यतेगौरत्वकृशत्वादिरूपः । **सपर्यगात् शुक्रमकायम्** अकायम् शरीररहितम्, एतावताकारणसूक्ष्मशरीरयोर्निषेधःकृतः । अव्रणमस्नाविरम् शरीरभिन्नंशरीरधर्मव्रणादिर्रहतम्, स्नावाशिरातद्रहितम्, एतावताषाट्कौशिकस्थूलशरीरप्रतिषेधः कृतो भवति । शुद्धंसर्वंमलविरहितम्, एतावताकारणशरीरशरीरप्रतिषेध । अतएव "अपापविद्धम्=धर्माधर्मविवर्जितम् एतावता सूक्ष्मशरीरराहित्यमात्मनोदर्शितम्, तदधिष्ठितत्वात् पुण्यपापयोः । कविःक्रान्तदर्शी, मनीषिमनस ईशितापरिभूःपरितः सर्वतोभवतीतिपरिभूः । स्वयमेवभवतीतिस्वयंभूः । एतादृशआत्मा नकथमपि कृशोहमित्यादिप्रतीत्याशरीररूपोऽपितदतिरिक्त एव, श्रुतेः सर्वप्रमाणापेक्षयाश्रेष्ठत्वात्, सर्वप्रमाणानांप्रामाण्यं श्रुत्यनुग्रहादेवेत्यग्रेवक्ष्यते । **योनिमन्ये** इत्यादि, केचनदेहिनआत्मानःस्वकीयकर्मोपासनावलात्, शरीरग्रहणाय, योनिंमनुष्यपश्वादियोनिंप्रपद्यन्ते, प्राप्नुवन्ति, तदन्येकेचनदेहिनःस्थाणुंवनस्पत्यादियोनिमाप्नुवन्ति । कर्मोपासनावलादिति । यदि आत्माशरीरादिरूपएवभवेत्, तदतिरिक्तोनभवेत्तदास्वोत्पत्तयेयोन्यादिग्रहणंनोपयुक्तंभवेदितिज्ञायते यदयंशरीरेन्द्रियादिभिन्न एवेति । **नजायते म्रियते** इत्यादि अनयाऽत्मनोजननमरणयोर्निषेधात् शरीररूपत्वप्रतिषेधः कृतोभवति, शरीर रूपत्वेजनमरणयोरवश्यं भावात्, "जातस्य हि ध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेति" स्मृतेः । **जीवापेतं** इत्यादि, जीवापेतंजीवसम्वन्धरहितं सदिदंशरीरंम्रियतेनतुजीवस्यस्वरूपतोमरणंतस्यनित्यत्वप्रतिज्ञानात् । स्वस्वकारणवलेनशरीरादेरेवोत्पत्तिर्जायते नतुचेतनस्यशरीरादिभिन्नस्योत्पत्त्यादिकं भवति, तत्र श्रुतिप्रमाणंप्रदर्शितम्, **न जायते म्रियतेवा विपश्चित्** चैतन्यमात्रस्वरूपोदेहादिविलक्षणआत्मा न जायते नवा म्रियते, किन्तु तत्संवन्धिनोदेहादेरेवजननमरणादिकंभवतीति श्रुतेरर्थः । एतावताशरीरादि

न हन्यते हन्यमाने शरीरे" "जीवापेतं वा वकिलेदंम्रियते" "नहवैशरीरस्य सतः प्रिया ऽप्रिययोरपहतिरस्ति" "अशरीरंवा वसन्तं न प्रियाप्रियेस्पृशतः" इत्यादिकाःश्रुतयः। किञ्चकालान्तरेजायमानस्वर्गनरकादिसाधनविधयः "ज्योतिष्टोमेनजयेत" इत्यादि विधिशास्त्रंशरीरेन्द्रियादिभिन्नंनित्यमजंचेतनमिति श्रुत्यनुपपत्तिप्रमाणक एवायं प्रत्यगात्मा। नात्रप्रमाणान्तरानुचिन्तनमुचितमिति। इति शरीराद्यतिरिक्तविलणात्मशास्त्रैकप्रमाणकत्वपक्षनिरूपणम् ।

भिन्नत्वमात्मनः प्रदर्शितं श्रुत्या, अन्यथा शरीररूपत्वे शरीरवदात्मनोपिजननविनाशौस्यातामेवेति । शरीरसम्बन्धित्वंयदात्मनस्तदपि न स्वाभाविकमपित्वौपाधिकमेव, मोक्षकालेतु स्वाभाविकम् शरीरत्वमेव, तत्रश्रुतिंप्रमाणयति "नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ति" अशरीरंवावसन्तं न प्रिया प्रिये स्पृशतः" [यावदयंचेतन, आत्माशरीरःशरीरोपाधियुक्तो भवतिं, अर्थात् सांसारासक्तचित्तोभवतितावत्पर्यन्तमस्यानुकूलवेदनीयप्रतिकूलवेदनीयविषयानुभवजनितसुखदुःखयोः स्पर्शाभावो न भवति, अर्थात् यावत् संसारंशरीरस्यविद्यमानतया सुखदुःखयोरभावोनैव भवति, कारणसद्भावेतत्कार्यस्यावश्यंभावात्. दण्डादिसमवधानेघटादिवदितिमोक्षकालेतुसर्वथाऽशरीरत्वमेव, तेन मुक्तौप्रियाप्रिययोः स्पर्शः परोपाधिकोवा स्वाभाविको वा न कथमपि भवति । वैषयिकसुखादिकारणशरीरस्यापगमात्कारणाभावेकार्याभाववदिति । शरीरादिव्यतिरिक्तविलक्षणात्मनिश्रुतिसमुदायंप्रमाणतयाकथयित्वातदनन्तरं श्रुत्यर्थापत्तिप्रमाणमपिविलक्षणात्मनिदर्शयितुमुपक्रमते **कालान्तरेजायमानेत्यादि** कालान्तरं=अनुष्ठानसंपादनोत्तरमनुष्ठातृदेहपातानन्तरमर्थात् मरणानन्तरंलोकान्तरेउपभुज्यमानं यत् स्वर्गादिफलम् स्वर्गश्च "यन्नदुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वपदास्पदम्" [यत्सुखंलौकिकसुखवत्नदुखेनश्लिष्टम्, यस्यचोत्तरकालेविनाशो न भवति, अर्थान्नित्यः "अपाम सोमममृताअभूम" इत्यादिश्रुत्यासुखस्यनित्यत्वात् । न च स्वर्गःक्षयी, कार्यत्वाद्घटादिवदित्यनुमानेनस्वर्गस्यक्षयित्वमितिवाच्यम्, तस्यानित्यत्वे "अपामसोममित्यादिश्रुत्याऽमृतत्वाभिधानस्यासङ्गतिकतयाश्रुतेरप्रमाण्यप्रसङ्गात्, तस्मात्, स्वर्गसुखंनित्यमिति, न च ग्रस्तमनन्तरमितिकथनं सावकाशंसार्थकं च भवतीति, तथाऽभिलाषोपनीतं च=अभिलाषाःसमीहाःतथा च यदा यद्विषयिणीच्छा भवतितद्वस्तुतदैवप्राप्तं भवति नतु कालातिक्रमोजायते]

एतादृशसुखविशेषरूपः स्वर्गः । स च स्वर्गः अनुष्ठाता, येनदेहेनानुष्ठानं कृतवान्, तादृश देहस्य विनाशानन्तरंस्वर्गसुखानुभवयोग्यंदेवादिशरीरमवाप्यतेनदैवशरीरेणसुखमुपभुनक्ति यदि अनुष्ठातुःशरीरमेवात्मा भवेत् तदाऽनुष्ठातुः फलभोक्तुश्चपरस्परं भेदात् अनुष्ठानतदीयफलस्वर्गस्य च वैयधिकरण्यमापद्येत तन्नयुक्तम् । अन्यत्रकार्यकारणयोः सामानाधिकरण्यस्यैव दर्शनात्, तस्यैवोचितत्वात् । विहिताविहितं च करोत्यन्यः फलंचान्योभुनक्तीति क्वचिददृष्टमुपपद्यते वा इति कारण

फलयोः सामानाधिकरण्यनियमस्यान्यथानुपपत्त्याशरीरात्मनोर्भेदोऽकामेनापिस्वीकर्तव्य एव । एवञ्च मनुष्यशरीरावच्छिन्नो य आत्मास्वर्गविधिमनुतिष्ठति स एवात्मादेवदेहमासाद्यफलभोक्ता भवतीति । तस्मात्, अन्यथानुपपत्तिप्रमाणेनदेहातिरिक्तत्वंतद्वैलक्षण्यञ्चात्मनःसिद्ध्यतीति । सर्वतो वलवतीयमन्यथानुपपत्तिर्योहिदृष्टशतमप्यवधूयकार्यं करोत्येव । तदुक्तम् "अन्यथानुपपत्तिश्चेदस्तिवस्तुप्रसाधिका । पिनष्टिदृष्टवैमत्यंसैवसर्ववलादिका ॥१॥ वाच्यान्यथोपपत्तिर्वात्याज्यो वा दृष्टताऽग्रहः । न ह्येकत्रसमावेशश्छायातपवदेतयोः ॥२॥ यथाअन्योज्ञाताज्ञेयश्चान्य इतिलोकेदृष्टः यथा वा अन्यः कर्त्ताकर्म चतदन्यत्, यथा वा करणमन्यत् कर्मचान्यत् कर्ता च तदन्य इतिलोकनियमः परन्तु आत्माआत्मनंविजानाति सर्पः स्वात्मनास्वात्मानंवेष्टयतीतिप्रत्यन्यथानुपपत्त्यासर्वोपिनियमःपरित्यज्यते । एवं प्रकृतेऽपिविधिशास्त्राणांकार्यकारणानांचान्यथानुपपत्यैव देहात्मनोभेदः स्वीकर्त्तव्य एव। अयंभावः यथा "स्वर्गकामोयजेतज्योतिष्टोमेन" इत्यादिस्थलेस्वर्गोद्देशेनयागस्यविधानं भवति । यागोनामपुरोडाशादिद्रव्यत्यागरूपः स च क्षणिकत्वादनन्तरमेवविनश्यति, इति यागस्यकालान्तरेजायमानं स्वर्गात्मककार्याव्यवहितपूर्वक्षणे अवस्थानाभावात्, अव्यवहितपूर्वक्षणवृत्तिरूपकारणत्वंनायातीतिकृत्वा यागस्वर्गयोर्मध्येविद्यमानमेकं यागजन्यमपूर्वंधर्मादिरूपंप्रकल्प्ययागस्य स्वजन्यापूर्वद्वारास्वर्गंप्रतिकारणत्वंनिर्वाहयति । न च तथापियागस्यकारणत्वंनायाति अपूर्वेणैवकार्यसिद्धौयागस्यान्यथासिद्धत्वात्, वृद्धकुलालजन्यतत्पुत्रेणैवपुत्रकर्तृकघटसिद्धिसंभवेवृद्धकुलालस्यान्यथासिद्धिवदितिं वाच्यम् स्वजन्यव्यापारेणव्यापारिणोऽन्यथासिद्धत्वानभ्युपगमात् "नहिव्यापारेणव्यापारिणोऽन्यथासिद्धत्वमितिलोकप्रवादात् । अन्यथादण्डजनितसंयोगेनैवघटादिकार्यसिद्धौसत्यांदण्डादिकरणानांकरणत्वमेवहीयेत । न च तदिष्टम् प्रसिद्धघटादिवत् कार्यमात्रस्याकरणकत्वप्रसङ्गात् । तस्माद् व्यापारेणतद्व्यापारिणोऽन्यथासिद्धत्वं न भवतीतिसिद्धवत् कृत्वाव्यापारद्वाराविप्रकृष्टस्यापिकरणत्वंकारकत्वं च निर्वर्त्यैव । ततश्च विप्रकृष्टस्यापियागादिकर्मणः स्वर्गादिकार्यंप्रतिजनकत्वमायाति । तत एव स्वर्गमुद्दिश्ययागादिकर्मविधायकशास्त्रंसफलंसप्रमाणकं च भवतीति । एवमेवदेहादिभिन्नत्वमात्मनो न मन्येत तदास्वर्गप्रतिपादक "यजेत" इत्यादिविधिशास्त्रामामपिवैयर्थ्यंस्यादिततदन्यथानुपपत्त्यादेहादिभिन्नत्वमात्मनः स्वीकर्त्तव्यमिति । स्वर्गादिसाधनविधिशास्त्राण्यपिंदेहादिव्यतिरिक्तंविलक्षणं नित्यमजत्वादिगुणकं चेतनमाक्षिपन्तीति श्रुतितदनुपपत्तिप्रमाणकएवायं प्रत्यगात्मा नतु प्रत्यक्षानुमानादिप्रमाणक एवेति । शरीरविनाशादनन्तरजायमानस्वर्गादिसाधनयागादिकर्मणामनुष्ठानं तादृशशास्त्रविधानं वा भोक्तुरात्मनोदेहभिन्नत्वं नित्यत्वमन्तरेण न संघटते इति विलक्षणात्मसिद्धिर्जायते एवेति सर्वमुपपद्यते न किञ्चिदपिहीयते । अथैवमपिविलक्षणात्मनोदेहभिन्नत्वेसिद्धेपितस्येन्द्रियादिभेदोनैव सिद्ध इिति चक्षुरादिकरणानामेवात्मत्वंभवतु इति चेत्सत्यम्, विकल्पासहवात् किं ? गोलकमिन्द्रियम् तदतिरिक्तं वा नाद्यस्तस्यानित्येननित्यात्मरूपत्वाभावात् । द्वितीयपक्षस्तुशास्त्रप्रमाण-

अथ शास्त्रांहिताहितप्राप्तिपरिहारमात्रंबोधयति, नतु सिद्धात्मबोधकं ततश्च शास्त्रेणात्माववोधोभवतीति कथमुच्यते । आत्मातुसिद्धवस्तुतदवबोधनं तु अनुमानागममन्तरेण न सिद्ध्येत् । शास्त्रंतु आत्मन उपकरणरूपेणैवेन्द्रियसिद्धिर्ब्रूते इतिशास्त्रेणविलक्षणात्मनस्तदतिरिक्तस्यसिद्धिर्भवत्येव ।

। इतिविलणात्मनःशास्त्रैकप्रमाणकत्वनिरूपणप्रकरणेतत्त्वदीपः ।

ननु "स्वर्गकामोयजेत" इत्यनुज्ञा "न कलञ्जंभक्षयेदितिनिषेधः "ऋतौभार्यामुपेया"दिति लौकिकी, अनुज्ञा "गुर्वङ्गनांनोपगच्छेदितिपरिहारस्तथा च, शास्त्रमात्रंहिताहितप्राप्तिपरिहारकमेव "आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानाम्" [सर्वोपिवेदभागः क्रियाकार्यार्थमात्रप्रतिपादकः अतदर्थानामक्रियार्थप्रतिपादकानान्त्वानर्थक्यं नैरर्थक्यमेवेतिजैमिनिसूत्रार्थः] एवञ्च "वज्रहस्तः पुरन्दरः" इत्यादिसिद्धवस्तुप्रतिपादकार्थवादिनां वेदभागानामानर्थकत्वंप्रसज्येत, इत्यालोच्य "विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेनविधीनांस्युः" इत्यादिना "सोरोदीत् तद्रोदीत् तद्रुद्रस्यरुद्रत्वमित्यादि, निषेधार्थवादानांवैयर्थ्यमाशङ्क्य "वर्हिषिरजतं न देयम्" इति निषेधविधिना तस्यैकार्थ्यात् तेषामक्रियार्थप्रतिपादकानामपि, अन्यशेषतयैवसर्वस्यवेदभागस्यचारितार्थ्यंप्रदर्शितम् । न चैवं तर्हि "सत्यंज्ञानमानन्दम्" इत्यादिसिद्धात्मवस्तुप्रतिपादिकागमानांकागतीति वाच्यम् "आत्मावारेद्रष्टव्यः" इत्याद्यात्मोपासनविधिपराणां तेषामुपासनाविधिशेषतयैवचरितार्थत्वसंभवात् । न च "पुत्रस्तेजातः कन्यातेगर्भिणीजाता" इत्यादिसिद्धपुत्रादिबोधकानां यत् प्रामाण्यंतदपिहीयेत इतिवाच्यम्, तत्रजातः पुत्रः तं पश्येतिविधिवाक्यशेषतयैवप्रामाण्यस्य संभवात् । एवञ्च सिद्धार्थबोधकत्वंशास्त्रस्य न कुत्रापि दृष्टम् । किन्तु हिताहितप्राप्तिपरिहारकत्वबोधनमेव । एवं स्थितौसिद्धात्माववोधकत्वभारः शास्त्रस्यशिरसिकथमुपक्षिप्यते । अर्थात् हिताहितप्राप्तिपरिहारबोधकस्यशास्त्रस्यतदवबोधकत्वात्, शासनादेवतस्यशास्त्रत्वं नतु सिद्धवस्तुप्रतिपादनात्, कार्यपरतयैवागमस्यचरितार्थत्वात् । यदपि कुत्र चिदात्मादिबोधनपरत्वंदृश्यते नतत् साक्षात् किन्तु "आत्मोपासीत" आत्मावारेद्रष्टव्यः" इत्यादि उपासनाविधीशेषतयैव "तद्रोदीत् सोऽरोदीत्" इत्यादिनिषेपार्धवादानाम् । वर्हिषिरजतं न देयमितिनिषेधविधिशेषतावदिति । न च यदि आत्मानशास्त्रप्रमाणकस्तदातदवबोधनं कुतःप्रमाणादिति चेत् ? अनुमानागममूलकप्रत्यक्षेणैवतद्बोधनात्, यथा ममगृहमित्यत्रगृहदेहयोः प्रत्यक्षेणग्रहणं तथैव "ममेदं शरीरम्" इत्यत्रापि, आत्मदेहयोः प्रत्यक्षेणैवसिद्धिर्भवति । "ममेदं शरीम्" इदमहंजानामीत्यादिस्थलेघटादिदृश्यवस्तुभ्यआत्मनः प्रत्यक्षेणैवग्रहणम् । एवमेवदेहादपिपृथग्भूत आत्मा प्रत्यक्षेणैव गृह्यते । अक्षरार्थस्त्वेवम्, देहादिव्यतिरिक्तविलक्षणात्मनि, अनुमानमात्रगम्यत्वमागममात्रप्रमाणकत्वंवेतिमतभेदेनगतप्रकरणेनोपपादितम् । सम्प्रतिमीमांसकमतमाश्रित्यात्मनः प्रत्यक्षगम्यत्वमेवेतिनिरूपयितुमुपक्रमते **अथ शास्त्रांहिताहित** इत्यादि; तत्र हितं बलवदनिष्टानुबन्धीष्टसाध-

कारणभूतप्रत्यक्षेणैवबोधितो भवति, 'ममेदंशरीरम्' 'घटादिकमहंजानामीति' प्रत्ययात् । यथा घटादिदृश्येभ्यः पार्थक्यतयाऽत्माप्रत्यक्षीक्रियते तथैव देहात्पृथग्भूतःप्रत्यक्षेणैव विषयो भवति नतु श्रौतः स आत्मेति ।

अत्रोच्यते, नात्मेन्द्रियग्राह्यः "इन्द्रियार्थसंन्निकर्षजन्यंज्ञानंप्रत्यक्षमितिप्रत्यक्ष लक्षणत्वात्, रूपस्पर्शादिमानेवार्थ इन्द्रियजनितज्ञानविषयो भवति घटादिः । आत्मानतारूपम्, तच्चशास्त्रमात्रप्रमाणैकसमधिगम्यमेव "स्वर्गकामो यजेत" ऋतौभार्यामुपेयादितिरूपम् । अहितं वलवदनिष्टजनकतारूपमेव, यथा "नकलञ्जंभक्षयेत्" तत्र "विपाक्तेनैववाणेनहतौयौमृगपक्षिणौ । तयोर्मांशंकलंजंस्यात् शुष्कमांसमथापिं वा ।" अथवा लशुनगृञ्जनादिकं "लशुनंगृञ्जनं चैवपलाण्डुंकवकानिच । अभक्ष्याणिद्विजातीनाममेध्यप्रभवाणि च । शुष्कमांसाः स्त्रियोवृद्धा वालार्कस्तरुणंदधि । प्रभाते मैथुनं निद्रा सद्यःप्राणहराणिषट् ।" इत्यादिशास्त्रेणकलञ्जभक्षणादेर्निषेधेनतस्यशास्त्रसमधिगम्यत्वमेव ।

तथा च हिताहितप्रवर्तनैकपरस्यशास्त्रस्यशिरसिसिद्धार्थात्मपरत्वस्यापिभारपरिकल्पनंमहाभारोपरोपणमयुक्तमेव भवति । "अप्राप्तेशास्त्रमर्थवत्" इतिन्यायेनकदाचित् कार्योपयोगीआत्मानन्यलभ्यो भवेत् तदा तत्र शास्त्रतात्पर्यकल्पनमपिस्वीकुर्यात्, नत्वन्यलभ्येशास्त्रतात्पर्यकल्पनंसमीचीनम् प्राप्तेकर्मणि नानेकोविधातुंशक्यते गुणः । अप्राप्तेतु विधीयन्तेवहवोप्येकयत्नतः । अप्राप्तप्रापकोवेदभागो विधिरितिविधिलक्षणात्, प्राप्तप्रापकस्तु न विधिरपित्वनुवादक एव । प्रकृते च देहादिविलक्षण आत्मा "ममेदंशरीरमित्यादिप्रत्यक्षेणैवस्फुटमधिगतो भवतिं, इतिनात्राप्राप्तप्रापकत्वंरूपं प्रामाण्यं शास्त्रस्य भवतीति विशिष्टाद्वैतवादिनं प्रति मीमांसकस्यपूर्वपक्षः ।

अथ घटादिवाह्यपदार्थवत् सुखदुःखाद्यान्तरपदार्थवत्, सर्वस्यानुभावकआत्मापीन्द्रियजनित ज्ञानप्रमाण एवेति मीमांसकाः कथयन्ति, तत्र सर्वप्रमाणज्येष्ठसर्वप्रमाणमूलभूतप्रत्यक्षेणैवात्मनोपिग्रहणसंभवेन प्रत्यक्षप्रमाणक एवेतितदात्मसाधनायशास्त्रशिरसिभारोपन्यासोऽयुक्त एव । यतः शास्त्रस्यकार्यार्थे एव प्रमाण्योपगमात् "आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामिति वचनात् । नतु सिद्धात्मप्रतिपादकत्वंशास्त्रस्यहिताहितप्राप्तपरिंहारमात्रबोधनेनहितादिशासनतयैव शास्त्रस्य चरितार्थत्वात् । सिद्धार्थप्रतिपादनपरकत्वंतु प्रत्यक्षस्यैवेति, तदात्मनोपि सिद्धार्थरूपतयातद्बोधकमपिप्रत्यक्षमेवेति यत् श्रोत्रियं प्रतिमीमांसकस्यवचनंतन्निरसितुं श्रोत्रियाविशिष्टाद्वैतवादिनउपक्रमन्ते **अत्रोच्यते** इत्यादि । सत्यम्, "प्रवृत्त्याद्यनुमेयोयंरथगत्येवसारथिः । अहंकारस्याश्रयोयंमनोमात्रस्यगोचरः" इत्यादिवचनमुपश्रुत्यमीमांसकाआत्मनोपिप्रत्यक्षप्रमाणकत्वंमन्यमाना आत्मनः प्रत्यक्ष ग्राह्यतांमन्यन्ते परन्तुतदीयंमतंविचार्यमाणेसिकताकूपवद् विशीर्यते । तथाहि योयमात्माप्रत्यक्षग्राह्यो भवतीत्युच्यते, सकिं वाह्यप्रत्यक्षविषयआन्तरप्रत्यक्षगाह्योवेति । तत्रान्तरप्रत्यक्षग्राह्यत्वमुप-

नुरूपस्पर्शादिमान् । "अशद्बमस्पर्शमरूपमव्ययम् " इत्यादिश्रुत्याऽत्मनिरूपादेः प्रतिषेधात् । नवा घटादिवदात्माप्रत्यक्षज्ञानविषयः "पराञ्चिखानिव्यतृणत् स्वयंभूः" इत्यादिशास्त्रेणात्मनःप्रत्यक्षाविषयत्वप्रतिपादनात् ।

किञ्च यदिन्द्रियग्राह्यंतद्बाह्यमेवनान्तरम् , तस्मान्नात्मेन्द्रियज्ञानविषय आन्तरत्वात् । तस्मात् आत्मानेन्द्रियप्रमाणकोऽपितुशास्त्रमात्रप्रमाणकः ।

रिष्टान्निराकरिष्यते । प्रथमपक्षोपि नसमीचीनः यत् रूपवद्द्रव्यंतदेवचक्षुपागृहीतं भवति, आत्मातु न घठादिवत् रूपि द्रव्यम्, श्रुत्याऽत्मनोरूपादिमत्वस्यनिराकरणात् "अशव्दमस्पर्शमरूपमव्ययम् , तथाऽरसंनित्यमगन्धवच्चे"त्यादिश्रुत्यारूपादिमत्वस्य तस्मिन् निषेधकरणात् , नात्माचक्षुर्ग्राह्यः चक्षुर्हिआलोकसंयोगरूपरूपादिसहकारेणरूपिद्रव्यंगृह्णाति, तथा रूपरूपत्वरूपाभावादिकं च गृह्णाति आत्मातुश्रुत्यनुभवाभ्यां रूपविरहित इति न चाक्षुषः । स्पर्शाभावेन च नत्वगिन्द्रियग्राह्यः स्पर्शसहकारेणैवत्वगिन्द्रियं स्पर्शवद्द्रव्यग्राहकं भवति, यथावायुर्घटादिवात्वगिन्द्रियगृहीतो भवति । रूपस्पर्शरहितद्रव्यंतु न चक्षुषागृह्यतेनवात्वगिन्द्रियेण, यथा द्रव्यं भवदपि गगनं न चक्षुषा नवात्वगिन्द्रिय ग्राह्यतांभजते तथैवात्मनिरूपस्पर्शाभावेनात्माचक्षुर्विषयोनवात्वगिन्द्रियज्ञानविषयो भवति कालाकाशादिवदेवेति । यत आत्मानचक्षुरादिविषयः किन्तु बाह्यपदार्थ एवेन्द्रियग्राह्यः अतःसर्वसर्जकमपिब्रह्माणमुपहसतीवश्रुतिः "पराञ्चिखानिव्यतृणत्स्वयंभूः तस्मात् पराग्पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैच्छदावृत्तचक्षुरमृतत्वमिच्छन्" अयमर्थःश्रुतेः स्वयंभूः सर्वसर्जकःप्रथमोजीवोधातासर्जनसमये एव, स्वानिस्वोपलक्षितानिचक्षुरादीन्द्रियाणिव्यतृणदिन्द्रियाणां चक्षुरादीनांहिंसनंकृतवान् अर्थात्, वहिर्मुखत्वं कृतवान् , तेनकारणेनेन्द्रियजातं पराग्वाह्यविषयमेव पश्यति । नान्तरात्मन्=अन्तरात्मानं न विजानन्ति, किन्तु परागर्थंरूपस्पर्शादिविशिष्टमेवघटादिकं विषयीकुर्वन्ति, प्रतीचमात्मानंनैवजानन्ति । प्रजापतिनायदेतेषांवहिर्मुखत्वंकृतंतदेवैतेषां हिंसनम् । इत्यादिश्रुत्या, एतदेवफलतियन्द्रियाणां विषयः प्रत्यगात्मा न भवति । एतावता, आत्मानेन्द्रियग्राह्यआन्तरत्वात् रूपादिरहितत्वाच्चेत्येवफलति । एतेनेन्द्रियग्राह्यत्वमात्मन इति मीमांसकमतं तन्निराकृतं भवतीतिश्रोत्रियोनिवेदयति । अक्षरार्थस्त्वेवं भवति, रूपादिव्यतिरेकिणि=रूपस्पर्शादिरहेतेवस्तुनि चक्षुषोऽसामर्थ्यात् द्रव्यस्यचाक्षुषादिप्रत्यक्षेउद्भूतरूपस्पर्शान्यतरस्य हेतुत्वात्, उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वन्ति पृथक्त्वसंख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वंपरिमाणयुक्तम् । क्रियाजातियोग्यवृत्तिःसमवायश्च तादृशः । गृह्णाति चक्षुः संयोगादालोकोद्भूत रूपयोरिति । ततश्चात्मनिरूपस्पर्शयोरभावादात्मनोवाह्यप्रत्यक्षत्वंनैव भवतीति । आत्मासूक्ष्मेभ्योपिनिरतिशयसूक्ष्मइति कथनेनेन्द्रियायोग्यत्वमाविष्कृतम् । योग्य एव प्रत्यक्षविषयतां प्राप्नोति नायोग्यस्यप्रत्यक्षं भवति । अतएवोद्भूतरूपादिविशिष्टस्यचक्षुसंयुक्तस्यापिपरमाणोश्चक्षुषाग्रहणं न

पुनर्भट्टःशङ्कते चक्षुरादीनीन्द्रियाणिभौतिकानि, आत्माचाभौतिक इति अभौतिकेआत्मनिभौतिकानामिन्द्रियाणांग्रहणंमाभवतु, परन्तु, मनस्त्वभौतिकमित्यभौतिकेनमनसाऽत्मनोग्रहणे काक्षतिरिति । तदपिमन्दम् इन्द्रियान्तरवन्मनसोपिभौतिकत्वात् "अन्नमयं हि सोम्यमन आपोमयःप्राणस्तेजोमयीवागिति" श्रुतेः । तन्नमनसाप्यात्मग्रहणमितिदिक् ।

भवति । इतरकारणसाकल्येपिमहत्वाभावादितिन्यायविदः कथयन्ति । अर्थात् योग्य एव प्रत्यक्षं भवति ना योग्य इति भावः। । आत्मनइन्द्रियाग्राह्यत्वे श्रुतिप्रमाणमपिदर्शितम् "पराञ्चिस्वानिव्यतृणत्स्वयंभू स्तस्मात् पराक् पश्यतिनान्तरात्मन् " इति । वाह्यार्थमात्रग्रहणपटुत्वमेवेन्द्रियाणांनत्वान्तरसूक्ष्मग्रहणसामर्थ्यमिति । किञ्चवाह्यार्थग्रहणमचित्वव्याप्यम्, यत्र वाह्यार्थग्रहणं तत्रचित्वमवश्यमेव आत्मानेन्द्रियगृहीतो भवति आन्तरत्वात् यन्नैवं यथा घटादिर्वाह्य इति ।

आत्माप्रत्यक्षो घटादिंवदेवेन्द्रियग्राह्य इतिभट्टमतम्, तन्मतस्यगतप्रकरणे निराकरणं कृतवान् स्वयुक्तिभिः श्रोत्रिय इति तदुपश्रुत्यभट्टः पुनः शङ्कते भवतुनामचक्षुरादिकम् पृथिव्यादि भूतत्वादेवभौतिकमिति भौतिकेनबहिरिन्द्रियेणाभौतिकस्यात्मनो ग्रहणं न भवतु, परन्तुमनस्तु न भौतिकमपित्वभौतिकमिति, अभौतिकेनान्तरेणमनसाऽन्तरस्यात्मनो ग्रहणंस्यादिति प्रत्यक्ष एवात्मा, ततश्चात्मनःशास्त्रैकप्रमाणकत्वकथनं न युक्तमिति प्रश्नयितुमुपक्रमते **पुनर्भट्टः शङ्कते** इत्यादिना, अवतरणेनैवमीमांसकस्यपक्षोव्याख्यातएवेति न तद्विवरणमावश्यकम् । श्रोत्रियउत्तरयति **तदपिमन्द**मित्यादिघ्राणेन्द्रियंपार्थिवंगन्धवत् पृथिवीत्वात् कुंकुमगन्धाभिव्यञ्जकगोधृतादिवदित्यनुमानेन घ्राणेन्द्रियेपार्थिवत्वंपार्थिवत्वादेव गोधृतवदगन्धग्राहकमर्थात्गन्धादिमत्वादेवघ्राणादेरिन्द्रियस्यगन्धादिग्राहकत्वंव्यवस्थितं तेन च तस्य भौतिकत्वं च व्यवस्थितम् । घ्राणरसनादिदृष्टान्तेन मनसोपिभौतिकत्वंसिद्ध्यत्येव मनोभौतिकम्, इन्द्रियत्वात् घ्राणादिवदेवेति । एवञ्च घ्राणादेभौतिकत्वात्, यथाऽभौतिकात्मग्रहणं न भवति तथैव भौतिकेन साप्यभौतिकात्मनोग्रहणं न संभवति । न च मनसि, इन्द्रियत्वं भवतु भौतिकत्वं माभवतु इति शङ्कायामनुकूलतर्काभावेकथंमनसो भौतिकत्वमिति मनसोभौतिकत्वंसाधयितुमनुकूलतर्कसंवलितं श्रुतिमुदाहरति "अन्नमयं हि सोम्यमनः" इत्यादि, हे सोम्य, श्वेतकेतोयदिदंमनोऽन्तःकरणं सुखादिग्राहकंलोकेप्रसिद्धं, तन्मनोऽन्नमयंपृथिव्या विकारात्मकमेव, अन्नमयंहीत्यत्र मयट् प्रत्ययोविकारार्थे । यद्यप्यन्नमयोयज्ञइत्यादौप्राचुर्येर्थेपिदृष्टस्तथापि प्रकृतेप्रकरणवलाद्विकारार्थकएव । अन्नमयमर्थात् अन्नस्यपृथिव्याविकाररूपमेवघटादिवत्, घ्राणवद्वा । तथा च यथा घ्राणेन्द्रियमभौतिकस्यात्मनो न ग्राहकमन्नमयेन्द्रियत्वात् तथैव भौतिकमनोपितस्य न ग्राहकमर्थात् मनोनात्मग्राहकंपार्थिवेन्द्रियत्वात् घ्राणवदेव, यथा घ्राणमिन्द्रियमितिपार्थिव गन्धादेर्गुणस्यैव ग्राहकंभवतिनत्वभौतिकसुखादेस्तथैवमनोपिभौतिकत्वात् नात्मनो ग्राहकम् । ततश्च मनइन्द्रियेणात्मनोऽग्रहणात् प्रत्यक्षप्रमाणक एवात्मेतिभाट्टमतंयुक्तिश्रुत्यादिबाधितमेवेति संक्षेपः ।

अथभाट्टः श्रोत्रियमतं प्रतिक्षिपन् पुनः शङ्कते, भवति हि सर्वलोकसाक्षिकोऽहमस्मीतिप्रत्यक्षावभासः । न चायमस्मीतिप्रत्यय ऐन्द्रियकत्वमन्तरासम्भवति दृश्यते च वहिरिन्द्रियविषयेऽपिसुखाद्यन्तराविषयेऽन्तःकरणस्यस्वातन्त्र्यंतदन्तःकरणनिमित्तकाहंप्रत्ययोयुक्तएवेति ।आत्मामानसप्रत्यक्षग्राह्योवहिरिन्द्रियाऽयोग्यत्वे सति प्रत्यक्षज्ञानविषयत्वात् , सर्वानुभवसिद्धसुखदुःखादिवदिति ।

ननु कथमुच्यते आत्मा नप्रत्यक्षोयावतावहिरिन्द्रियासंनिधानेपि "अहमस्मीतिप्रत्यय:सर्वसचेतसां जायते एव । सचायंप्रत्योनानुमानगम्यः अव्यभिचरितहेतोरभावात्, नापिशाब्दः तादृश प्रत्ययस्थलेनियमतः शब्दोपस्थानाभावात् । नापिवहिरिन्द्रियजन्य:वहिरिन्द्रियाणामभावेपि तादृशप्रत्ययस्यसद्भावात् । तस्मात् सर्वलोकानुभविकोऽयंप्रत्यक्षग्रहोजायते एवेति । परिशेषान्मनो जनित एवेति निश्चीयते । न च वहिंरिन्द्रियोपस्थापितविषय एव मनसागृह्यते इति वक्तुं योग्यम्, यतो दृश्यते स्वप्नेजागरणेपिसमयविशेषे सुखादिप्रत्ययोरथादिदर्शनं च भवतीति । तत्रान्येषां करणानामभावेकेवलंमनोनिमित्तक एव सुखादिरथादिप्रत्ययश्च, स च मानसः । यद्यपि वाह्यविषयग्रहणे "अस्वतन्त्रंबहिर्मन:" इतिन्यायेनमनस:पराधीनत्वेपि, आन्तरग्रहणेमनस:स्वातन्त्र्यस्यसर्वानुमतत्वात् । कथमन्यथास्वप्नकालेरथादीनामनुभवस्तज्जनितसंस्कारेणकालान्तरेरथादिकंस्मरामीति प्रत्ययः । तस्मादान्तरितसुखादीनामनुभवने वाह्यनिरपेक्षं मन एव कारणमिति तज्ज्ञानंमनइन्द्रियजनितं प्रत्यक्षमेवेतिप्रत्यक्षप्रमाणकआत्माभवत्येवेति न भवति भट्टमतस्यनिराकरणमित्याशयेनभाट्ट:पुनः श्रोत्रियमतंप्रतिक्षेप्तुमुपक्रमते **अथ भाट्ट** इत्यादि । परोक्षप्रतीतिभिन्नः प्रत्यय:प्रत्यक्षमितियावत् । लौकिकविषयतासम्बन्धेनजायमानः प्रत्यय इति । सुखादिविषये मनसां स्वातत्र्यंनामबहिरिन्द्रयानपेक्षज्ञानजनकतारूपमेव । आत्मामानसप्रत्यक्षग्राह्य:=मानसप्रत्यक्षनिरूपितलौकिकविषयतावानित्यर्थः । तथा चात्मनोमानसप्रत्यक्षयोग्यत्वेऽनुमानं भवति, आत्मामानसप्रत्यक्षग्राह्य:बहिरिन्द्रियाऽयोग्यत्वेसतिप्रत्यक्षज्ञानविषयत्वात् , सुखादिवत् इत्यनुमानंफलति । अत्रसर्वानुभवसिद्धोजीव:पक्षः । मानसप्रत्यक्षग्राह्यइति साध्यम् , एतावता आत्मनोऽनुमानादिविषयत्वंप्रतिक्षिप्तम् । बहिरिन्द्रियायोग्यत्वेसतीत्यादिर्हेतुः । अत्र विशेष्यमात्रस्योपादाने, रूपवान् घट इति प्रत्यक्षे, प्रत्यक्षत्वहेतोर्विद्यमानत्वेन तत्रमानसप्रत्यक्षग्राह्यत्वलक्षणसाध्याभावेन, साध्याभावाधिकरणे सद्भावे हेतोव्यभिचारदोषप्रसङ्गात् । अतोवहिरिन्द्रियाऽयोग्यत्वेसतीतिंविशेषणोपादानम् । तथा च घटादिप्रत्यक्षस्यबहिरिन्द्रययोग्यत्वेनविशेषणविशिष्टहेतोरभावेनव्यभिचारादिदोंषः ।

। इतिभाट्टाक्षेपेतत्त्वदीपः ।

आत्मामानसप्रत्यक्षग्राह्योवहिरिन्द्रयाऽयोग्यत्वेसतिप्रत्यक्षत्वात्सुखदुःखादिवदितियत् भाट्टानु-

तदेतन्मतं न युक्तम् ज्ञानेनसंवेदनपदवाच्येन निरुक्तानुमानेऽनैकान्तिकत्वात् । न च संवेदनमप्रत्यक्षम् जानामीत्यनन्योपाधिकतयाभासमानत्वात् । ज्ञानस्यपरोक्षत्वे च

मानंप्रकृतंतत् प्रभाकरमतद्वारेणदूषयितुमुपक्रमते श्रोत्रियः **तदेतन्मतं न युक्तमित्यादि**, यदेभिर्भाट्टैरनुमानेनात्मनोमानसप्रत्यक्षविषयत्वंप्रतिष्ठापितम्, तन्मतं न युक्तम् । कुतो न युक्तम्, तत्राह **ज्ञानेनेत्यादि** । अर्थात् यदेतदनुमानंतत्रत्योहेतुर्ज्ञानेसंवेदनापरपर्यायेति परन्तु तत्रसाध्यंमानसप्रत्यक्षवियत्वंनास्ति, यतोज्ञानस्यातीन्द्रियत्वेनज्ञातत्तालिङ्गकानुमानग्राह्यत्वस्वीकारेण, हेतुसद्भावेसाध्यस्य मानसप्रत्यक्षविषयत्वस्याभावात्, ज्ञानस्यज्ञाततालिङ्गकानुमितिग्राह्यत्वादिति । संवेदनेप्रत्यक्षत्वहेतोर्व्यभिचारमेवोपपादयति **न च संवेदनमप्रत्यक्षम्, जानामीत्यनन्योपाधिकतया भासमानत्वादिति** । साध्याभावाधिकरणेहेतोर्वर्तमानत्वमेव व्यभिचार इति व्यभिचारस्यलक्षणम् । तत्रसंविदि, हेतुघटकविशेषणांशस्यबहिरिन्द्रियायोग्यत्वेसतीत्यस्यसिद्धिर्यद्यप्यस्त्येवज्ञानस्यबहिरिन्द्रियाऽयोग्यवात्,— विशेष्यांश:प्रत्यग्त्वात् इत्ययमंशंतावत्साधयति, तत्राह **न च संवेदनमप्रत्यक्षम्** अर्थात् तत् संवेदनं प्रत्यक्षं न भवतीति न च वक्तव्यं किन्तु प्रत्यक्षमेव, तस्मात् प्रत्यक्षत्वरूपहेतुघटकप्रत्यक्षत्वलक्षणविशेष्यांशो नासिद्धोऽपितुसिद्ध एव संविदः प्रत्यक्षत्वस्वीकारात् । बहिरिन्द्रियाऽयोग्यत्वे सतिप्रत्यक्षत्वादितिहेतुघटकप्रत्यक्षत्वविशेष्यांश: कथंनासिद्धस्तत्राह **जानामीत्यादि** जानामीत्याकारेण, अनन्योपाधिकतया=लिङ्गज्ञानपदज्ञानादिकारणनिरपेक्षतया जानामीतिप्रत्ययस्थ **भासमानत्वात्** =प्रकाशनात्, अर्थात् परोक्षज्ञानकारणलिङ्गादिकारणनिरपेक्षतयाऽहंजानामीति प्रत्ययस्यप्रकाशदर्शनेन हेतोः प्रत्यक्षत्वस्यज्ञानेसिद्धत्वात्, ननु कथमुच्यते अनन्योपाधिकतया, अर्थात् लिङ्गादिपद ज्ञानादिकारणानपेक्षतयासंवेदनस्यप्रतिमानम्, यावता "घटत्वप्रकारकघटविशेष्यकज्ञातताघटत्व प्रकारकज्ञानसाध्यातादृशज्ञातत्तात्वादिति ज्ञाततावलेनैवज्ञानस्यानुमानं भवतीत्यनन्योपाधिकत्वमेवज्ञानप्रतिभासस्यनैवसिद्धमित्याशंकायामाह **परोक्षत्वे च** इत्यादि, यदिज्ञानं प्रत्यक्षं न स्यात्तदा तादृशसंवेदनस्यसिद्धिरेव न साधकाभावात् । अर्थात् ज्ञानव्यतिरिक्तायांज्ञाततायांज्ञानज्ञापकलिङ्गरूपेणाभिमतायांस्वातन्त्र्येणकस्यचित्प्रमाणस्याभावात्, प्रमाणेन प्रमेयसिद्धिरितिनियमेनप्रमाणाभावे ज्ञातताया:सिद्धेरभावात् । सत्याअपिज्ञातताया अतीन्द्रियत्वेन, ज्ञानस्यातीन्द्रियतेनाविनाभावग्राह्या योगात्, ज्ञानजनकसामग्र्या अर्थात्ज्ञानोत्पादिकाया ज्ञातताया एव साक्षाज्जननसंभवात् तन्मध्ये ज्ञानकल्पनायानैरर्थक्यमेवेति न ज्ञानसिद्धि:स्यात् ज्ञानस्याप्रत्यक्षत्वे, तस्माज्ज्ञानान्यथाऽनुपपत्त्यैव ज्ञानस्यप्रत्यक्षत्वमितिभाव: । ननु यथा संवेदनेहेतुर्विद्यते साध्यं न विद्यते तत्रसंवेदनेव्यभिचार उद्भावितो, यथा अयोगोलकेवह्निरस्तिधूमसाध्यंनास्तीतितद्वत् । परन्तु यथा पर्वतपक्षेधूमेनवन्हिसाधनसमयेचत्वरेधूमसद्भावेनवन्हेस्तदानीमनिश्चित इति दोषमुद्भाव्य, चत्वरेपिवन्हिनिर्णयोऽभिमत इति चत्वरादे:सपक्षकोटिप्रवेशेनव्यभिचारोनिराक्रियते तथैव प्रकृते संवेदनेहेतुसद्भावेसाध्यमपिविद्यते

ज्ञानस्यसिद्धिरेव न स्यादित्युक्तप्रायत्वात् । न च ज्ञानमपिमानसप्रत्यक्षविषयतया सपक्षान्तर्गतम् , विकल्पासहत्वात् , यदाकुतश्चिदात्मनः संयोगाद्विषयाकारासंविदुदेति, तस्मिन्नेन समये किं तद्विषयकेज्ञानमपिजायते, अथवा तदन्यकालेतद्भिन्नकारणेन ज्ञानान्तरमुत्पद्यते इति वक्तव्यम् । न चोभयविषयकज्ञानस्ययुगपदेव संभवः । तथा

चत्वरादेःसपक्षकोटिंनिक्षेपादित्याशंकांनिरसितुमुपक्रमते **न च ज्ञानमपिमानसप्रत्यक्षविषयतया सपक्षेति** । यथा चत्वरादेर्वन्हिसाधकधूमादिपक्षेनिक्षेपस्तथैवेहापिसंवेदनस्यापिसपक्षेएवप्रवेशोयावतासंवेदनस्यापिमानसप्रत्यक्षविषयत्वात् । ततश्चनात्रव्यभिचारोद्भवनम् , यतो नहि सपक्षेव्यभिचारोद्भावनंयुक्तम्, यतस्तत्रापिसाध्यस्यसिसाधयितुमिष्टत्वात् , इतिवचनात् , इतिप्रश्नाशयः । तदियंपक्षंविकल्पासहत्वादुद्धर्तुमाह **विकल्पासहत्वादिति**, विकल्पासहनान्नायंपक्षोयुक्तियुक्तः । तानेव विकल्पान् दर्शयितुमाह **यदाकुतश्चित्** इत्यादि, यस्मिन्कालेआत्मनःसंयोगात्मकासमवायिकारणवलादात्मनिघटादिविषयकज्ञानमुदेति, तदैवतेनैवात्मनःसंयोगेन ज्ञानविषयकं ज्ञानान्तरमपिसमुदेति अर्थात् विषयज्ञानस्यतथा ज्ञानविषयविषयकज्ञानस्य, अर्थादनुव्यवसायस्यापिसमुत्पत्तिर्भवति, अथवा, ज्ञानज्ञानस्यानुव्यवसायस्यान्येनव्यवसायज्ञानजनककारणव्यतिरिक्तकारणेन, अन्यदाकालान्तरेतदुत्पत्तिर्भवतीतिविकल्पद्वयम् । उत्तरयति=**नचोभयेत्यादि** अर्थादेकैवात्मनःसंयोगेनविषयविषयकव्यवसायस्तदनुव्यवसायस्यचोत्पत्तिर्भवतीतिप्रथमकल्पो न युक्तः । कुतो न युक्तस्तत्राह **तथा सतीत्यादि** अर्थात् एकसमये एवोभयोरुत्पत्तिस्वीकारे, विषयज्ञानस्योत्पत्तिसमये एव ज्ञानविषयकज्ञानस्यापिं तस्मादात्ममनःसंयोगवलादुत्पत्तिस्वीकारे पूर्वोत्तरीभूतज्ञानस्यतज्ज्ञानस्यतदन्यज्ञानादीनामनेकेषांसमुदायस्ययुगपदेवोत्पत्तिरपरिहार्यास्यात् । कार्यकारणयोः समानकालत्वेतयोःपरस्परंकार्यकारण भावस्यैवविलोपो भवेत्, कार्यंकारणोत्तरकालभावि, कारणं च कार्यान्नियमतःपूर्वकालभावि, यदादण्डादिघटादिकार्यात्, पूर्वमेवोदयमासादयतितदैवतस्यकारणत्वकार्यत्वं च तदुत्तरभाविनो घटादेः । यदि कार्यकारणयोः समकालत्वंतदाकस्यपूर्ववृत्तित्वंकस्यचोत्तरकालवृत्तित्वमितिनियमो न स्यात् नहि समानजातयोःसव्येतरविषाणयोर्मध्येएकस्यकारणत्वंतदपरस्यकार्यत्वंभवतीति दृश्यते । तत्कस्य हेतोर्नियामककारणस्यविनिगमनाभावात् । यथावा समानकालेसमागतयोर्द्वयोःसाध्वोरेकस्मिन् देवालययोर्मध्ये एकःशासकोमहंन्तपदवाच्योभवदपरश्चखडियापलटनोऽतिथिरितिकथ्यते । तत्कथं ? पूर्वकालभाविनःशासकत्वंपरकालागतस्यातिथित्वमित्येवमत्रापिद्वयोज्ञानयोर्ज्ञानानां वा समानकालिकत्वेदोष इति न युगपदुदयकारणेनैकेषाम्, तथा समानकारणजन्यत्वेकार्यभेदोपिं न स्यात् । यथावटवीजाज्जायमानानांवृक्षाणांवटवृक्षत्वं नतु कुटजकंकोलनिंवादिवृक्षाणांवटवृक्षत्वं कुत ? कारणभेदात्, तथा च कारणैकेनजायमानयोर्विषयज्ञानतज्ज्ञानयोर्भेदोपिनैवस्यादिति । (अथवाऽयंग्रन्थःप्रकारान्तरेणयोजनीयः तथाहि येनात्मनःसंयोगरूपासमवायिकारणेन घटाविषयकंप्रथममनुभवात्मकंज्ञानमुत्पद्यते,

सति विषयज्ञानोदयकाले एव विषयज्ञानस्यतज्ज्ञानपरंपराया युगपदुदयप्रसङ्गात् । न चैवं भवति कुत्रचित्, उपपद्यते वा ज्ञानसमुदायस्ययुगपदुत्पत्तिस्वीकारेविषयविषयित्वनियमश्चाकारणकएवापद्येतेतिनिर्बन्धनःस्यात् । असमसमयविभिन्नकालजन्मनाज्ञानेन तेनैवात्ममनः संयोगरूपासमवायिकारणेनतदनुव्यवसायस्योत्पत्तिर्भवति । अथवा संयोगान्तरेणानुव्यवसायस्यापिसमुत्पत्तिर्भवति ? तत्र एकेनैवासमवायिकारणात्ममनः संयोगेनोभयोरुत्पत्तिरिति प्रथमपक्षो न युक्तःअनुव्यवसायज्ञानंप्रतिकर्मकारकतयाजनकस्यव्यवसायज्ञानस्यव्यवसायज्ञानजनितानुव्यवसायकार्यस्ययुगपदुपन्यासासंभवात् करणस्यप्रत्ययपर्यायेसामर्थ्याभावात् ।

यतोऽसमवायिकारणात्ममनः संयोगस्यभेद एव ज्ञानस्यभेदेकारणंभवतीति । अन्यथा यतोऽसमवायिकारणभेदस्यज्ञानभेदहेतुत्वं न मन्येत तदासमवायिकारणादेः सर्वज्ञानोत्पत्तौसमानतयातदतिरिक्तकारणान्तरस्यापेक्षासंभवेनघटानुभवतदीयस्मरणयोरनुभवान्तरस्य घटादिविषयस्ययुगपदेवसमुत्पत्तिरापद्येत । ज्ञानभेदेऽसमवायिकारणभेदस्यनियामकत्वेतुनायंदोषः प्रादुर्भवति, यतोज्ञानसामान्यं प्रतिं सर्वत्रासमवायिकारणात्ममनः संयोगस्यविभिन्नस्यैवाभ्युपगमेन युगपत् घटानुभवतदीयस्मरणादीनामापत्तिर्नभवति, आत्ममनः संयोगस्यसर्वत्रभिन्नभिन्नस्यैव सत्वेनानुभवस्मरणादीनांविभिन्नानामेवोत्पादात् । क्रमरहितकारणेनकार्यक्रमस्यायोगात् । बाह्यसामग्रीरूपावच्छेदकक्रमभेदेनकार्यक्रमस्य भेदस्वीकारेतुयुगपदेककाले एव संप्रयुक्तेषुघटपटादिषुयुगपदेकस्मिन् काले एवानेकज्ञानानामुत्पत्ति प्रसङ्गात् । न चैवं क्वचिदपि दृश्यते समुपपद्येतयुगपदनेकज्ञानस्य, तस्मात् प्रथमःपक्षो नविचार सह इति । न च येनात्ममनःसंयोगेनविषयविषयकंव्यवसायज्ञानंप्रथममुत्पद्यते, तदतिरिक्तात्ममनः संयोगरूपकारणेनविपयकज्ञानान्तरंद्वितीयज्ञानादिकंजायते, ततश्चप्रथमपक्षोक्तंज्ञानानांयौगपद्यरूपदोषो न भवतीति, यदयंद्वितीयःपक्षःसोपिनयुक्तःविचारासहत्वादेव । तथाहिं घटादिविषयकज्ञानोत्पत्तिकाले एव मनसिकर्मतदन्तरंततो विभागस्तदनन्तरंमनसःपूर्वसंयोगो य आसीत् तादृशसंयोगस्यविनाशस्तदनन्तरंमनसउत्तरसंयोगस्यसमुत्पत्तिस्तदन्तरंज्ञानान्तरस्यानुव्यवसायादिद्वितीयज्ञानस्योत्पादः, इत्यनेकक्षणविलम्वेनजायमानद्वितीयज्ञानस्यग्रहतयाऽभिमतस्य, प्रत्यक्षतयाप्रथमज्ञानात्मक पूर्वज्ञानस्यग्राहकत्वं न स्यात् यतोज्ञानस्यक्षणिकत्वेनैतावत्कालपर्यन्तंस्थायित्वानुपपत्तेः "सम्बद्धंवर्तमानं च गृह्यते चक्षुरादिनेतिनियमात्, विपयतासम्बन्धेनज्ञानोत्पत्तौ तादात्म्यसम्बन्धेनविषयस्यकारणत्वस्याभ्युपगमात् । इहचानेकक्षणविलंवेपूर्वज्ञानस्यविनाशेनकस्यग्रहणंकरिष्यतिद्वितीयज्ञानम् ? तथापि तस्यद्वितीयज्ञानस्यपूर्वज्ञानग्राहकत्वे चिरातीतार्थात् जन्मान्तरप्रथमज्ञानस्यानेकभवानन्तरं जायमानतद्विपयकज्ञानान्तरमपिग्राहकंस्यादिति न द्वितीयपक्षोयुक्तइति ।) अपि च विषयज्ञानज्ञानज्ञानयोश्चयदियौगपद्यमेककालिकत्वंस्वीक्रियेत तदापिदूपणान्तरंवक्ति **युगपदुत्पत्तिरित्यादि** विषयता सम्बन्धेनप्रत्यक्षंप्रतिविपयस्यतादात्म्यसम्बन्धेन कारणत्वात्, अन्यथाऽतीतानागतविषययोरपिप्रत्यक्षत्वमा-

वेद्यत्वे न प्रत्यक्षत्वम्, क्षणिकतयातदग्रिमज्ञानस्यग्राहकज्ञानोदयपर्यन्तमवस्थानाभाद्येत, एतादृशनियमस्वीकारेतुविषयस्यप्रत्यक्षत्वाभिमतकालेऽविद्यमानत्वेनातीतानागतकाले प्रत्यक्षत्वं न भवति तदानींविषयाभावादिति । एतादृशश्चनियमः, योगिप्रत्यक्षेविषयस्यकारणत्वं, नास्तीतिमते । तथा च लौकिकविषमतासम्बन्धेनप्रत्यक्षेतादात्म्येनविषयस्यकारणत्वं योगिनांतु योगजप्रत्यक्षमतीतानागतयोरपिभवत्येव योगजधर्मसहकृतेनमनसेति । तथा च प्रत्यक्षे घटादिविषयस्यतादात्म्यसम्बन्धेनकारणत्वात्, कर्मतयापूर्वज्ञानजातस्यतदुत्तरज्ञानस्यानुव्यवसायापरपर्यायरूपस्यस्वजनकसमानाधिकरणपूर्वज्ञानविषकत्वंक्रमभावित्वे समुपपद्येत नतु यौगपद्यंकथमपि तथा नियमः समुपपद्येतेत्याशयः ।

ननु भवतु विषयज्ञानस्यतदुत्तरजायमानानुव्यवसायज्ञानयोर्नतावता किञ्चिदपचीयते इत्याशङ्कायामाह **असमसमयेत्यादि** असमसमयजन्मना—विभिन्नकालोत्पत्तिमता, तदुत्तरज्ञानेनवेद्यत्वं न भवति क्षणिकत्वात् । तत्रज्ञानस्यक्षणिकत्वमुभयथा भवति, यदैवज्ञानंजायते तदैवतद्विनाशोपीतिमतमेकंबौद्धस्य, ज्ञानंप्रथमक्षणेसमुत्पद्यतेद्वितीयक्षणेऽवस्थीयतेतृतीयेविनश्यति, योग्यविभुविशेषगुणानां शद्वज्ञानादीनांस्वोत्तरसमानाधिकरणगुणनाश्यत्वनियमादुपपद्यते इतिन्यायमतम्; उभयथापिज्ञानंक्षणिकमेवेतिज्ञानस्यक्षणिकत्वनियमादुत्तरज्ञानस्यानुव्यवसायरूपोत्पादकालेपूर्वज्ञानस्य व्यवसायात्मकस्यविनाशेनासत्वान्नप्रत्यक्षत्वं संभवेत्, प्रत्यक्षे तादात्म्यसम्बन्धेंनकारणत्वात् । इह च तस्यपूर्वज्ञानस्यविनष्टत्वात्, यदिपूर्वज्ञानमुत्तरज्ञानोदयकालपर्यन्तंस्थितंभवेत्, तदैवोत्तरज्ञानेनपूर्वस्य ग्रहणभवेत्, नत्वेवमिहतु तदुत्तरज्ञानोदयकालएवपूर्वस्यविनाशेननोत्तरज्ञानस्यकथमपि प्रत्यक्षतास्यादितितयोग्राह्यग्राहकभावएववार्तामात्रविषयकः स्यादिति भावः । अर्थात् ज्ञानस्यक्षणिकत्वस्वीकारात्, उत्तरज्ञानोत्पादकालेतेनैवोत्तरज्ञानेनयोग्यविभुविशेषगुणस्यस्वोत्तरवृत्तिगुणनाश्यत्वमतेनपूर्वज्ञानस्याभावात्, न कथमपि प्रत्यक्षत्वंसंभवेत् पूर्वज्ञानस्यज्ञानान्तरोत्तरकालिकज्ञानवेद्यत्वस्वीकारेपीति । अमुमभिप्रायमाश्रित्याऽवादीत् **असमसमय**जन्मनाविभिन्नकालिकार्थात् पूर्वापरीभूतज्ञानान्तरेणोत्तरज्ञानेनपूर्वज्ञानस्यवेद्यत्वोपगमेपि पूर्वज्ञानस्य न प्रत्यक्षत्वम् । कुतो न प्रत्यक्षत्वं तत्राह **क्षणिकतया**ग्रिमज्ञानस्यग्राहकस्वोत्तरज्ञानोदयपर्यन्तंपूर्वज्ञानस्यावस्थानाभावात् । अर्थात् यावत्पर्यन्तमुत्तरज्ञानंजातम् ग्राहकंज्ञानंतावत्कालपर्यन्तंपूर्वज्ञानस्यावस्थानाभावात् । कुतो न पूर्वज्ञानस्योत्तरग्राहकज्ञानकालपर्यन्तमवस्थानं तत्राह **क्षणिकतया** । अर्थात् ज्ञानस्यक्षणिकत्वेन ग्राहकोत्तरज्ञानपर्यन्तमवस्थानाभावेनोत्तरज्ञानज्ञानस्यवेद्यत्वं नैवस्यात् इतिभावः । अथ यदि ज्ञानस्यक्षणिकत्वेपूर्वोक्तोदोषस्तदाज्ञानस्यक्षणिकत्वं न मन्तव्यमितिज्ञानस्यक्षणिकत्वानुपगमेपिदोषादुद्धारो न भवतीत्ययाशयेनाह **भावे च सर्वज्ञानानामि**त्यादि, भावे=सद्भावस्वीकारे अर्थात् क्षणिकत्वेनाभिमतस्यपूर्वज्ञानस्यग्राहकद्वितीयज्ञानपर्यन्तमवस्थानस्वीकारे सर्वज्ञानानां द्वितीयादिसर्वज्ञानानांसर्वदा-

वात् । भावे च सर्वज्ञानानांसर्वदाऽवस्थानप्रसङ्गात् । कार्यविरोधित्वेत्वनन्तरमेव संस्कारजननान्नकालान्तरेस्थितिरिति न संविदोमानसप्रत्यक्षवेद्यत्वंस्यात् । न चाप्रत्यक्षंज्ञानमितिव्यभिचारस्तदवस्थ एव ।

ऽवस्थानंस्थितिप्रसङ्गात् । ज्ञानमात्रस्योदयसमयेएव विनाशककारणस्यसेवनं भवति, इति नियमः । ततश्चोत्पद्यतदैव विनष्टं न भवेत् तदा “तावत्कालेस्थिरंचैनं कः पश्चात् द्वितीयादि क्षणेनाशयिष्यति” एवंविधस्वीकारेणप्रथमज्ञानवत् सर्वमपिज्ञानंसर्वदैवावस्थितं भवेत् । ततश्चयोयं क्षणिकविज्ञानवादः स सर्वथादत्तजलाञ्जलिरेव स्यात्, इति तद्रक्षणाय क्षणिकमेव ज्ञानम् । इदानीं यदि, पूर्वज्ञानंग्राहकद्वितीयादिपर्यन्तमवस्थितमितिमन्येतसर्वमेवज्ञानंसर्वदाऽवस्थितं भवत् स्वकीयक्षणिकविज्ञानवादस्यविलोपमेवकुर्यादिति पूर्वज्ञानस्यग्राहकज्ञानपर्यन्तमवस्थानं भवतीति तववचनं सर्वदैवनिरर्थकमितिभावः ।

अथैवमपिपूर्वादिज्ञानस्यक्षणमात्रवृत्तित्वेनक्षणिकत्वम् , नवाघटादिवत् चिरमवस्थानात् स्थिरत्वम्, किन्तुस्वाकार्येणस्वोत्तरकालवर्तिनानिवृत्तिरिष्यते इतितदेवक्षणिकत्वमित्याशयेनाह **कार्यविरोधित्वेत्वनन्तरमेव** इत्यादिकार्यस्यविरोधित्वंनाशकत्वंचेद् द्विक्षणावस्थायित्वलक्षणंचेद्विज्ञानस्य अथवा सहानवस्थानलक्षणंचेदेकक्षणमात्रवृत्तित्वम् , तत्रप्रकृतेसहानवस्थानलक्षण एव विरोधो नतु कार्यस्यविरोधित्वत्वंनाशकत्वलक्षणं न द्विक्षणवृत्तित्वंतदापूर्वज्ञानस्य द्विक्षणावस्थायित्वे, अर्थात् प्रथमक्षणेउत्पद्यतेद्वितीयक्षणेऽवस्थितं भवतितृतीयक्षणेज्ञानान्तरोदयात् निवर्तते ‘योग्यविभुविशेषगुणानांस्वोत्तरवर्तिगुणनाश्यनियमात्’ ततश्च द्विक्षणावस्थायित्वे तु नैयायिकप्रक्रियायामानसप्रत्यक्षविषयत्वोपपत्तेस्तन्निषेधाऽनुपपत्तेरितिज्ञेयम् । परन्तु न्यायमतानुसरणेपि, विषयविषयकज्ञानोत्तरंद्वितीयंज्ञानंततोद्वितीयज्ञानस्यापिग्राहकं तृतीयं ज्ञानं चतुर्थादिज्ञानमित्यादिक्रमेणज्ञानधारानुवर्तनेन दुरवस्थानवस्थातुदुरतिक्रमैवेति । न च व्यवस्थायां सत्यामनवस्थायुक्ता, अनवस्थायाःत्रिदोषलग्नास्यात् । “प्रागूलोपाविनिगम्यत्वप्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्यात्रिदोषतेति । यथा वातपित्तकफानांसमानरूपेणावस्थाने तत्कालेसंनिपातनामकोज्वरविशेषोयोवातपित्तानांसंनिपातेनजन्यतेऽथवावातपित्तादिसमुदायलक्षणोमहद्भिरपिभिषग्वरैः समाधातुमशक्यप्रायोभवन् संनिपातग्रस्तवान्धवंरोदयति, तथैवत्रिदोषग्रस्तानवस्थासमाधातुमशक्यातत्स्वीकर्तृतान्त्रिकंरोदयत्येवेतिभावः । न च संवित् अप्रत्यक्षा अहंजानामीतिप्रत्ययस्यसर्वानुभवसिद्धत्वादिति,आत्मामानसप्रत्यक्षविषयोवहिरिन्द्रियायोग्यत्वेसतिप्रत्यक्षत्वात्सुखादिवदित्यनुमाने संविदिंव्यभिचारस्यसद्भावेननेदमनुमानंपूर्वपक्षीयमतमानसप्रत्यक्षग्राह्यत्वसाधनेसमर्थं भवति । यथा वह्नि हेतुनाऽयोगोलकेधूमसाध्यकमनुमानमयोगोलकेवन्हिहेतुना धूमसाधकम्, धूमरूपसाध्याभावाधिकरणेऽयोगोलकेवन्हिहेतोः प्रमेयत्वादिहेतोर्वावृत्तित्वेनव्यभिचारित्वात्तत्रायोगोलकादौ धूमस्यसाधकं न भवति, तथैवसंविदिमानसप्रत्यक्षग्राह्यत्वाभाववतिप्रत्यक्षत्वहेतोर्विद्यमानत्वेनात्मनोमानसप्रत्यक्षत्व-

ऐन्द्रियकत्वस्यानात्मत्वव्याप्यतयाविरुद्धदोषश्च भवेत् । दृष्टान्तसाध्यविकलश्च, साधनायनोपयुक्तमितिनेदमनुकूलमनुमानंनिर्दुष्टमितिभावः । अपि च आत्मनोमानसप्रत्यक्षग्राह्यत्व साधकानुमानेऽव्यभिचारवत् संविदि एतदनुमानेविरोधदोषोपि भवति अत्राह **ऐन्द्रियकत्वस्यानात्मत्वेति,** अयमाशयःसाध्याभावसाधकोहेतुर्विरुद्ध इतिविरोधलक्षणम् । अर्थात् यस्यहेतोःसाध्येन सहसामानाधिकरण्यमर्थात् व्याप्तिर्नभवति, किन्तुसाध्याभावेनसहव्याप्तिर्भवतिसविरोधोयथा "अयं गौः अश्वत्वात्" एतदनुमाने, यत्रयत्रअश्वत्वंतत्रतत्रगोत्वमिति न व्याप्तिः अश्वत्वरूपहेतोरश्वत्वेविद्य मानत्वेनतत्राश्वत्वस्याभावात् । किन्तु यत्र गोत्वाभावरूपसाध्याभावोऽश्वेतत्रैवहेतोसद्भाव इति, तत्राश्वत्वरूपहेतौ न साध्यगोत्वनिरूपिताव्याप्तिरपितुयत्राश्वेगोत्वरूपसाध्याभावोऽश्वेतत्रैवाश्वत्व हेतोः सद्भावेनैतादृशहेतोः साध्याभावनिरूपितैवव्याप्तिरर्थात् साध्याभावेनप्रतिबद्धोव्याप्योहेतुरिति न तादृशो हेतुः साध्यंगोत्वंसाधयति किन्तुतादृशगोत्वाभावप्रतिबद्धत्वात् व्याप्यत्वात् स्वाधिकरणेऽश्वेविद्यमानोहेतुरश्वेगोत्वाभावरूपसाध्यंसाधयन् विरुद्धहेतुरितिगीयते । प्रकृते च यत्रयत्र घटादिबाह्यैऐन्द्रियकत्वमर्थादिन्द्रियजनितज्ञानविषयत्वं तत्रसर्वत्रापिवाह्येअनात्मत्वंजडत्वमित्यर्थः । ततश्चैन्द्रियकत्वं हेतुरनात्मत्वव्याप्यम्, इत्यैन्द्रियकहेतुनाऽनात्मत्वस्यैवसिद्धिः स्यान्नत्वात्मनः प्रकृते तु ऐन्द्रियकत्वव्यापकस्यनात्मत्वस्यनिवृत्त्याऽत्मनि ऐन्द्रियकत्वंहेतुरपिनिवर्तते, यथाजलादौधूमव्यापकस्यवन्हेर्निवृत्त्याव्याप्यस्यधूमस्यनिवृत्तिर्भवत्येव । व्यापकाभावस्यव्याप्याभावव्याप्यत्वस्यावश्यंनिवृत्तिरितिसर्वानुमतत्वात् । तदुक्तम् "व्याप्यव्यापकभावोहिभावयोर्यादृगिष्यते । तयोरभावयोस्तस्माद्विपरीतःप्रतीयते । अन्वयेसाधनंव्याप्यंसाध्यंव्यापकमिष्यते । साध्याभावोऽन्यथाव्याप्योव्यापकः साधनात्ययः । इति । यथा वा समवायेनगुणवत्वव्यापकस्यनिवृत्त्यातद्व्याप्यस्यद्रव्यत्वस्यसामान्यादौ निवृत्तिर्भवति । एवमेवप्रकृतेअनात्मत्वजडत्वव्याप्यत्वादैन्द्रियकत्वस्यस्वव्यापकनिवृत्त्याऽत्मनिनिवृत्तिरावस्यकीति, ऐन्द्रियकत्वेनहेतुनासाध्यविरुद्धस्यव्यापकनिवृत्त्याव्याप्यस्यैन्द्रियकत्वस्या ननिवृत्तिरिति तथा च पक्षतावच्छेदकात्मत्वविरुद्धमेव मानसप्रत्यक्षग्राह्यत्वं साध्यमिति ।

ननु न ऐन्द्रियकत्वंसामान्यतोऽनात्मत्वव्याप्यमपितुबाह्येन्द्रियग्राह्यत्वमेवानात्मत्वव्याप्यम्, दृश्यते च चक्षुरादिबाह्येन्द्रियग्राह्ये एवानात्मत्वम्, नतु प्रत्यक्षग्राह्यत्वस्यानात्मत्वव्याप्यत्वम्, आत्मनोपिमनोग्राह्यत्वदर्शनात्, इत्येवं यदि बाह्येन्द्रियग्राह्यस्यैवानात्मत्वव्याप्यतेत्याग्रहस्तदापिदूषणान्तरंदर्शयति **दृष्टान्तसाध्यविकलश्चसुखदुःखादीनांप्रत्यक्षत्वस्यानभ्युपगमादित्यादि ।** अत्र "आत्मामानसप्रत्यक्षग्राह्यः बहिरिन्द्रियाऽयोग्यत्वेसतिप्रत्यक्षत्वात्सुखाद्यान्तरपदार्थवदित्यात्ममानसप्रत्यक्षविषयत्वसाधकानुमाने, आत्मा पक्षः दृष्टान्तश्चसुखादिः । तत्र दृष्टान्ते साध्यविकलत्वम्, अर्थात् दृष्टान्तेसुखादौमानसप्रत्यक्षग्राह्यत्वरूपं साध्येनास्ति, अन्वयिदृष्टान्तसुखे, मानसप्रत्यक्षग्राह्यत्वं नास्तीति, दृष्टान्तःसुखादिःप्रकृतमानसग्राह्यत्वरूपसाध्यरहित इत्यपि दृष्टान्तेसाध्यवैकल्यरूपोदोषो

भवतीति न निरुक्तानुमानपक्षे आत्मनिसाध्यकं भवति । यतोन्वयिव्याप्तिग्रहस्याभावात् , यत्रहेतुर्भवति तत्रसाध्यसद्भावे एव तस्मिन् हेतौतादृशसामानाधिकरण्यरूपाव्याप्तिःसिद्ध्यति, अत्रतुसुखादौदृष्टान्तेहेतुर्वहिरिन्द्रियाऽग्राह्यत्वेसतिंप्रत्यक्षत्वमस्तिपरन्तु तत्रसुखादौ दृष्टान्तेमानसप्रत्यक्षविषयत्वरूपंसाध्यं नास्तीत्यतः हेतुव्यापकसाध्यसामानाधिकरण्यरूपासिद्धान्तोनघटते । ततश्च तादृशहेतौसाध्यनिरूपितव्याप्तेरभावेन नानुमानंसाध्यसाधनायोग्यं भवतीति दृष्टान्तस्यसाध्यविकलत्वस्यदोषत्वं भवति । दृष्टान्ते साध्यभावेसाध्यसामानाधिकरण्यरूपव्याप्तेरग्रहात् , तदभावे चागृहीतव्याप्तिकहेतुना साधनासंभवादिति भावः । ननु भवतिसर्वेषामनुभवोऽहंसुखीदुःखीति वा, तत्कथमुच्यतेऽन्वयिदृष्टान्ते सुखादौसाध्यविकलत्वम् , ततश्च सुखवतिसुखाभावज्ञानं वन्हिमान् पर्वतो वन्ह्यभावात् , इत्यादि ज्ञानवत् , आहार्यज्ञानरूपमेवस्यादाहार्यज्ञानं च न प्रतिवन्धकं प्रतिवध्यं वा भवति, इच्छाकाले एवाहार्यज्ञानस्यसद्भावस्वीकारात् , इत्याशयेनाह **सुखदुःखादीनांप्रत्यक्षत्वस्यानभ्युपगमादिति** । यथाऽत्रान्वयिहेतौसाध्यविकलत्वंदोषस्तथैव दृष्टान्तेसाधनविकलत्वमपिंयद्यपिफलति, पूर्वपरग्रन्थोपपादन प्रकारेण, तथापि सिद्धान्तप्रक्रियावलेनसुखदुःखादेर्ज्ञानावस्थारूपत्वात् , ज्ञानस्य च स्वयंप्रकाश रूपत्वेन, ज्ञानभिन्नस्यसुखादेरपिस्वयंप्रकाशज्ञानरूपत्वमेवेतिमनसिंनिधायप्रकृते साध्यविकत्वमेवसत्यपि दोषान्तरसंनिपातेपि । कुतःसाध्यविकलत्वमेव कथितम् , सत्यपिसाधनविकलत्वेपि । तत्रोच्यते, यतोऽन्वयदृष्टान्ते, साध्यस्यसाधनस्यवा एकस्याप्यभावेन साध्यहेत्ववच्छेदेनसाध्यनिरूपितव्याप्तिग्रहणं हेतौ न संभवतिं, साध्याविकलत्वे वा व्याप्तिप्रतिबन्धकत्वस्योभयोः समानत्वात् , तथा साध्यवैकल्येव्याप्तिसिद्धिर्नभवति तथैव साधनवैकल्पेपिव्याप्तेरग्रहात् व्याप्यत्वासिद्धिरेवविवक्षिता, सा च व्याप्यत्वासिद्धिरुभयोवैकल्येसमानरूपेणैवभवतीति, एकस्यैवहेतुवैकल्यकथनेननिर्वाह्यते इतिनोभयोर्वैकल्यस्यकीर्तनंकृतवान्पार्थक्येनेति नकोपिदोषः । अथवा साधनवैकल्यस्यकीर्त्तनमुपलक्षणम् , व्याप्तिग्रह प्रतिबन्धकसर्वहेतुदोषाणाम् । अतएव प्रकृतानेकव्याप्तिग्रहप्रतिबन्धकव्यभिचारविरोधसाधनविकलानामनेकदोषाणामुद्भावनंस्वगिरै वकृतवान् , व्यभिचारादीनांसर्वेषांव्याप्तिग्रहप्रतिवन्धकत्वंसमानमेवेति । अथ यदिंव्यभिचारादीनांसर्वदोषाणांव्याप्तिग्रहप्रतिवन्धकत्वरूपफलंसमानमेवतदाव्यभिचाराद्यन्यतमदोषस्योद्भावनेनैव आत्मामानसप्रत्यक्षग्राह्योवाह्येन्द्रियाऽयोग्यत्वेसतिप्रत्यक्षत्वादित्यनुमानस्यासाधकत्वे सिद्धे दोषान्तरस्यसमानफलकस्योद्भावनंकिमर्थं कृतवान् , अनेकेषांसंकीर्तनंपिष्टपेषणन्यायंनातिवर्तते इतिवादिनः प्रश्नकर्तुरसामर्थ्यंस्वस्यतर्काटवीप्रवेशकौशल्यं च दर्शयितुं तथाकृतवानितिगृहाण । यद्यपि एकदोषोद्भावनेनैवसाधकानुमानस्यासादकत्वंभवति तथापि सर्वेषांदूषणप्रकारे भेदःइति दर्शयितुं वाचार्यस्तथाकृतवानिति । विशेषतोऽत्रत्यंतत्वंगुरूपसदनेनैवज्ञातव्यं, संक्षेप एवात्रवरमिति ।

कथं सुखादिरूपो दृष्टान्तस्तत्राह **सुखदुःखादीनांप्रत्यक्षत्वेत्यादि** । अर्थात् सुखदुःखयोः प्रत्यक्षत्वं न भवति, इन्द्रियार्थसंनिकर्षजनितज्ञानस्यैवप्रत्यक्षत्वं, तथा तद्विषयतयैवविषयस्यापिप्रत्य-

सुखदुःखादीनांप्रत्यक्षत्वस्यानभ्युपगमात् । अनभ्युपगमश्चेन्द्रियपौष्कल्यनाशयोरेवसुखदुःखत्वात् । नहि तस्मिन्नप्रत्यक्षेतत्पौष्कल्यं वैकल्यं वा प्रत्यक्षं भवति । इन्द्रिय इवाभ्यासपाटवात्तयोरपरोक्षत्वाभिमानः, मनोऽवस्थाभेदेष्विव चानुमेयमनोवादिनाम् । तस्मान्नभाट्टाक्षेपोयुक्तः ।

क्षत्वम्, यथाऽयंघट इतिज्ञानस्यचक्षुरादीन्द्रियघटार्थस्यसंयोगेन जातं ज्ञानं तद्विषयत्वात् प्रत्यक्षत्वम् मतविशेषेमनसोनेन्द्रियत्वम्, इन्द्रियप्रकरणेतत्पाठाभावात् । न च "मनःषष्ठानीन्द्रियाणिप्रकृतिस्थानिकर्षतीतिगीतावचनेनैवमनसइन्द्रियत्वंसिद्ध्यतीतिवाच्यम्, अनिन्द्रियेणापिमनसाषष्ठसंख्यापूरणेऽविरोधात् । "यजमानपञ्चमाऋत्विज इडां भक्षयन्ति" इत्यत्रानृत्विजेनापियजमानेनषष्ठत्वसंख्यापूरणेविरोधाभावात् । यथा वा "वेदानध्यापयामासमहाभारतपञ्चमान्" इत्यत्रावेदनापि महाभारतेनपञ्चत्वसंख्यापूर्त्तौविरोधादर्शनात् । अपि च "इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्चपरंमनः । मनस्तुपराबुद्धिर्बुद्धेरात्मामहान् परः" इत्यादाविन्द्रियेभ्यः परत्वंमनसोवदनिन्द्रियभिन्नत्वं श्रुतौप्रदर्शितम् । न च मनसोऽनिन्द्रियत्वे, इन्द्रियजनितार्थान्मनोजनितज्ञानस्यसुखादिविषयकस्यसुखादेश्च प्रत्यता नस्यादितिवाच्यम् प्रत्यक्षत्वे इन्द्रियजन्यत्वस्याविवक्षणात्, अन्यथापरंपरयाचक्षुरादिजनितस्यसाक्षादेवमनोजनितस्यानुमित्यादिज्ञानस्यापिपरोक्षस्यप्रत्यक्षत्वप्रसङ्गात्, अनुमित्यादिवार्तापिविलुप्येत । ईश्वरज्ञानस्यानिन्द्रियजन्यस्य प्रत्यक्षता न स्यात् । "न तस्यकार्यंकरणं च विद्यते नतत्समश्चाभ्यधिकश्च दृश्यते । परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रिया च" इत्यादिश्रुत्यापरमेश्वरस्यज्ञानसहायकशरीरेन्द्रियाणिप्रतिषिध्येश्वरस्यस्वाभाविकंप्रदर्श्यते । ततश्चानिन्द्रियजनितपारमेश्वरज्ञाने प्रत्यक्षलक्षणस्याव्याप्त्यानेदंप्रत्यक्षम् । किन्तु यत्र विषयः प्रत्यक्षोवर्तमानश्चतत्रैवतस्यप्रत्यक्षताभवति । तस्मात् सुखादिकं न प्रत्यक्षमिन्द्रियाजनितत्वात् मनसश्चेन्द्रियत्वनिराकरणादिति । अथसुखदुःखयोरप्रत्यक्षत्वे प्रत्यक्षवदवभासःसुखदुःखयोःकथं भवति ? एतादृशशङ्कायामाह **अनभ्युपगमश्चेन्द्रियपौष्कल्यनाशयोरेवसुखदुःखत्वात् । नहि तस्मिन्न प्रत्यक्ष** इत्यादि, यथाऽतीन्द्रियत्वेपिचक्षुरादीन्द्रियणां ममेदंचक्षुर्घ्राणंवा, अहंचक्षुष्मान् पश्यामि घ्राणादिमान् जिघ्रामीत्येवंप्रत्यक्षवदेवावभासोऽतीन्द्रियस्यापिचक्षुरादेः कदाचित् चाक्षुषादिवृत्तिसमयेऽनेकचक्षुरादिवृत्तिप्रतिसंधानवतश्चेतनपुरुषस्येन्द्रियविषयसंस्काराधिक्यप्रयोज्यः, तथैवेन्द्रियावस्थारूपसुखदुःखादिपरामर्शोपिप्रत्यक्षसमानाकारस्तदभ्यासप्राचुर्येणसंभवेदेवेत्यर्थः । अत्रार्थेनुरूपंदृष्टान्तं दर्शयति **मनोवस्थाभेदेष्विवेत्यादि** । अनुमेयमनोवादिनामिति, तत्रानुमेयमनोवादिनाम्=बुद्धिव्यतिरिक्तंमनोऽनुमानादिप्रमाणेनाभ्युपगच्छतामित्यर्थः । कामसंकल्पादयोमनस एववृत्तिरूपा, इति तत्र श्रुतिंप्रमाणयति "कामसंकल्पोविचिकित्साधृतिरधृतिः सर्वं मन एव " कामसङ्कल्पादिकाः सर्वोपि

यस्तु बौद्धमतमवलम्बतेसविज्ञानाभिन्नकारणजनिततयासुखदुःखयोरप्यन्तर्भावं ज्ञाने एवाभिमन्यते । कणादमतमवलम्बमानस्तु सुखदुःखयोरात्मविशेषगुणत्वमेवेति कथयति । आभ्यांसुखाधिकरणंकिमिति वक्तव्यम् स्वतः सुखादि एतद्विमर्शवाऽत्रत्यं कर्त्तव्यम् रागद्वेषादयस्तु चेतनाश्रयात्मनः एवावस्थाविशेषास्तद्वदेव प्रत्यक्षी

मनसोवृत्तिरूपा एव, तत्र वृत्तिवृत्तिमतोरभेदात्मन एवेति कथनम् । एतेषां मनोवृत्तिभेदादीनां कामादीनाम् तथा प्रत्यक्षत्वावभासः क्रमादिविषयानुभवाभ्यासवाहुल्यादेवेतिवक्तुम्, अर्थात् अनुमेयमनोवादिभिर्यथास्वाक्रियते तथैव सर्वैरप्येतद्विषये स्वीकर्तव्यमनन्यगतिकत्वादिति भावः ।

स्यादेतत्, बौद्धमतेनशरीरादीनि आत्मा किन्तु क्षणिकविज्ञानमेवात्मा, तस्यैवविज्ञानरूपात्मन आकाररूपः सुखदुःखादिविज्ञानाऽभेदआत्मनः तेनात्मनाऽभेदःसुखादेरितिसुखादिकमपिज्ञानाभिन्नत्वाज् ज्ञानरूपमेव, तदपिक्षणिकसत्वात्, यत् सत् तत्क्षणिकं यथामेघमाला, सच्चविज्ञानमिति तदपि क्षणिकमेव, तदभिन्नाभिन्नाभिन्नस्यतदभेदः इतिनियमेनसुखाभिन्नमात्मा, तदभिन्नञ्चसुखमितिज्ञानसुखयोरप्यभेद एव । तद्विज्ञानंद्विविधम्, प्रवृत्तिविज्ञानमालयविज्ञानं च । तत्र प्रथमं घटादि विज्ञानंद्वितीयंतु आलयविज्ञानम् । तदुक्तम्—

तत्स्यादालयविज्ञानंयद्भवेदहमास्पदम् । तत्स्यात् प्रवृत्तिविज्ञानंयन्नीलादिकमुल्लिखेदिति ॥

कस्तूरीसुगन्धिसुगन्धितवस्त्रवत्, प्राथमिकविज्ञानाधिष्ठितवासनयातदग्रिमविज्ञानेपिसंस्कारस्यक्रमणात् बालकालेऽनुभूतपदार्थविषयकसंस्कारवशात् वृद्धावस्थायामपिस्मरणं भवति समानाधिकरणसजातीय विज्ञाने । नतु सतानान्तरे भवति, तदुक्तम्—

यस्मिन्नेवहिसन्ताने आहिताकर्मवासना । फलं तत्रैवसन्धत्तेकार्पासेरक्ततायथेति ॥

योह्यहंबाल्येपितरावन्वभूवं स एवाहंवृद्धत्वे नप्तारमनुभवामीति, तदेतत्स्मरणसमानाधिकरणसन्ताने एव जायते नतु व्यधिकरणसन्ताने "नान्यदृष्टंस्मरत्यन्यः" इति नियमात् । एवञ्चक्षणिकविज्ञानरूपात्माऽभिन्नमेवसुखादिकंनान्यदिति । कणादमतेतु नित्य एवात्मा, नतु क्षणिकः संसारमोक्षयोर्वैयधिकरण्यापातेनकृतनाशाकृताभ्यागमदोषापाताम् । तादृशे आत्मनिपुण्यपापरूपनिमित्तकारणेन, आत्मनः संयोगरूपासमवायिकारणवलेनसमवायिकारणेतदात्मनिसुखादिकमुत्पद्यते इति तत्सुखादिकमात्मन आगन्तुकधर्मरूपमेव न ततोव्यतिरिक्तम् । अर्थात् सुखदुःखयोः क्षणिकविज्ञानलक्षणमात्माऽभिन्नत्वम्, आत्मनः आगन्तुकधर्मरूपत्वंयथाक्रमबौद्धकणादमतभेदेन व्यवस्थितमितितदुभयमतनिराकरणायोपक्रमतेसिद्धान्तीति तत्राह **यस्तु बौद्धमतमवलम्बते** इत्यादि । उत्तरयति **आभ्यामित्यादि**, बौद्धप्रक्रियामाश्रित्यकणादप्रक्रियांवासमाश्रित्यक्षणिकविज्ञानात्मकाऽत्माऽभिन्नत्वम्, नित्यस्यात्मनआगन्तुकधर्मरूपत्वंवामन्यमानाभ्यांबौद्धन्यायतत्वशास्त्रस्थंसुखदुःखाधिकरणं किम् ? तथा एतत्प्रकरणस्थितंसुखीत्यविचारंवासङ्कीयेत । अर्थात् सुखादिकं भिन्नमभिन्नं वा

भवन्तीति न तद्दृष्टान्तेनानुमानावसरः । सुखप्रयुक्तविषयीकारचैतन्यंरागस्तद्विरोध प्रयोज्यविषयीकारं तदेव द्वेषः, भूतदुःखज्ञानेनचेतश्चलनं शोकः आगामितज्ज्ञानेन-चेतश्चलनंभयम्, इतिलक्षणग्रन्थादेवावगन्तव्यमितिगुरुमुखेनात्मनोमानसप्रत्यक्षत्वानुमानदूषणम् ।

निरंशस्यैकस्य चात्मनो न स्वापेक्षयाग्राह्यग्राहकभावः संभवतिविरोधात् ।

भवेत् आगन्तुकधर्मरूपं वा भवेत्, किन्तु तयोः सुखदुःखयोरधिकरणंगुणोद्रव्यंवेतिविचारणीयतां भवतीतितत्प्रदर्शनीयम् । अर्थात् गुणस्यतथात्वेविज्ञानस्यतस्यक्षणिकत्वेनाधिकरणत्वायोगात् । नवा द्रव्यरूपत्वं तस्यतथात्वेवादिविवादात्, एतत्तत्वमग्रेप्रदर्शयिष्यते ।

रागद्वेषादयस्तु चैतन्यस्यैवास्थाविशेषास्तद्वदेव प्रत्यक्षीभवन्तीति न सुखदुःखादिरागद्वेषादि वा दृष्टान्तीकृत्यानुमानोदय इति । ननु सुखदुःखयोर्मानसप्रत्यक्षत्वेविवादेपिरागद्वेषयोरेवदृष्टान्तत्व-मस्तुतत्राह **सुखप्रयुक्तविषयीकारेत्यादि** सुखेति, सुखत्वप्रयुक्तंविषयीकरणंसमुपादेयताप्रकाशनं यस्मात् ज्ञानविशेषाद्भवति, तादृशज्ञानमेवरागः, सुखविषयकोपादेयताज्ञानलक्षणोरागोनतुज्ञान व्यतिरिक्तोरागनामकः पदार्थः । एवं समुपात्तस्यसुखस्योपघातोविनाशोयेन तद्विषयकत्याज्यता प्रका-शकज्ञानमेवद्वेषोनतुतदतिरिक्तः । ततश्चरागद्वेषयोर्ज्ञानवदेव प्रकाश इति न तयोरागद्वेषयोः पार्थ-क्येन दृष्टान्ततयोपादानं संभवतीतिभावः । ननु न भवतु रागद्वेषयोर्दृष्टान्तता ज्ञानाभिन्नत्वात् शोकः भययोस्तुदृष्टान्तत्वंकथं न स्यात् । तत्राह **भूतदुःखज्ञानेनेत्यादि,** अतीतकालिकंयद्दुःखंजातं तदनुसन्धानस्मरणपूर्वकोयोऽन्तःकरणस्यविक्षोभः स एव शोकपदाभिधेयः, तथा भविष्यत् कालिकं यत्दुःखं तस्ययत् कारणं तादृशकरणपरामर्शनिमित्तकोऽन्तःकारणेजायमानोयस्तस्यैवभयमितिसंज्ञा भवति । तयोश्चशोकभययोरन्तःकरणधर्मत्वादेवप्रत्यक्षत्वं न संभवतीतितयोर्दृष्टान्तत्वं न संभवति । मनःपर्यायस्यान्तःकरणस्यातीन्द्रियत्वेनतद्गतधर्मस्यप्रत्यक्षता, अधिकरणग्रहणानन्तरमेवाधेयस्य प्रायो ग्रहणदर्शनात् ।

। इतिगुरुमुखेनात्मनोमानसप्रत्यक्षत्वानुमानदूषणेतत्त्वदीपः ।

आत्मामानसप्रत्यक्षग्राह्योबहिरिन्द्रियायोग्यत्वेसतिप्रत्यक्षत्वात्सुखादिवदित्यनुमानेनात्मनोमानस-प्रत्यक्षविषयत्वंसाधितंपरेण । तत्र साधकोहेतुः "बहिरिन्द्रियायोग्यत्वेसतिप्रत्यक्षत्वादितिसाधकतया समुपन्यस्तः परन्तु प्रत्यक्षत्वादिहेतुनां तत्साधकतयोपन्यस्तानामन्येषामपियुक्त्याऽसाधकत्वमुपन्यस्तवा निति तेन सर्वोपिहेतुर्हेतुवदाभासमानत्वादसाधक एवेति प्रदर्श्य सम्प्रति, आत्मनो मानसप्रत्यक्ष ग्राह्यत्वेबाधकमपिप्रदर्शयितुमुपक्रमते **निरंशस्यैकस्यात्मनः** इत्यादि । एकस्यैकैकक्रियायांकर्तृकर्म भावो न संभवति विरोधात्, अर्थादात्मनो निरंशस्यस्वापेक्षयाग्राहकभावो न भवति यथा गमनादिक्रि-यायां स एवदेवदत्तोगमने स्वतन्त्रत्वात्, तथातस्यैवगमनस्य स एव देवदत्तः कर्म न भवति, यतः

आत्मनोंऽशभेदस्वीकारेतु तत्सिद्धयेचांशान्तरमवश्यंस्वीकृतंस्यादितितत्रतत्राप्यंशान्तर स्वीकारेंदुरवस्थैवाऽनवस्थाप्रसज्येत, सङ्घातरूपत्वंचात्मनः ।

इत्यात्मनोग्राह्यग्राहकभावविरोधप्रदर्शनम्

परसमवेतक्रियाफलभागिनएवकर्मत्वात् । न च स एव देवदत्तःकर्तृत्वात् प्रयोजकः कर्मत्वात् प्रयोज्यश्चभवति, कर्तृः स्वसमवेतक्रियाफलभागित्वंग्रामादेः कर्मणःपरसमवेतक्रियाफलभागित्वात् । अतएव देवदत्तोदेवदत्तंगच्छतीतिप्रयोगोऽसाधुरेवेति वैयाकरणाः । न च स्वप्रधानतयादेवदत्तः कर्त्ता गमनविशिष्टाकारेणकर्मइतिरूपभेदात् न विरोध इति वाच्यम्, तथा सति, एकस्मिन् सांशे वस्तुनि भेदसंभवेन एकस्मिन्कर्तृकर्मभावो न भवतीतिनियमोनिरालंवन एव भवेत् ।

अपि च सर्पः स्वात्मनास्वात्मानंवेष्टयतीत्यादिप्रयोगदर्शनेनसांशेवस्तुनिकथंचित्, एकस्मिन्नेवकर्तृकर्मभावस्यस्वीकारेऽपिनिरंशेआत्मनिस्वस्मिन्नेवस्वापेक्षयाग्राह्यग्राहकभावस्य विरोधादेव स्वीकारासंभवेन तस्मिन् स्वापेक्षया स एव ग्राहकोग्राह्यश्चेतिनैवकथमपिसंभवतीति । अयमेव बाधकोभवत्यात्मनोमानसप्रत्यक्षविषयत्वसाधकानुमाने । ननु उक्तविरोधश्यनिरंशेआत्मनिग्राह्यग्राहकभाव रूपस्यविद्यमाने, एतद्दोषपरिहारायात्मनोपिपदार्थान्तरवत् सांशत्वमेवमन्यतां नतु तस्यनिरंशत्वम् । एवं सति एकस्मिन् ग्राह्यग्राहकभावरूपदोषोनिरस्तःस्यादित्याशयेनाह **अंशभेदस्वीकारे** इत्यादि । सत्यमत्र ग्राह्यभावविरोधस्ययथाकथंचित्समाधानेपि, अंशभेदाश्रयणेऽनवस्थापिशाचस्यासमाधेयत्वात् । अर्थादंशभेदाश्रयणे तत् सिद्धये अंशभेदसिद्धयर्थमंशान्तराश्रयणम्, तथा तत्रतत्रेत्यनवस्थातोनिर्मोक्षोन भवति । एतदुक्तं भवति । एकश्चांशोग्राह्य, तद्ग्राहकक्रमात्मनोंऽशान्तरमवश्यमाश्रयणीयम्, यश्चाग्राहकःस्यात्, यच्चाग्राहकमात्मनोंऽशान्तरंतस्याप्यंशस्यप्रमाणीकर्तुंतद्गाहकमपितदन्यो ग्राहको भवेत्, एवंतदर्थमपिअंशान्तरंग्राहकमितिग्राहकांशानामुपर्युपरिसंचरणादूर्ध्वमुख्यानवस्थायाअवश्यमापातःस्यादेवेति । न च व्यवस्थायां सत्यामनवस्थोचिताअनवस्थायाःत्रिदोषग्रस्तत्वात् । तदुक्तं—"प्रागूलोपाविनिगम्यत्वप्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्यात्रिदोषतेति । अस्यार्थः पूर्वपूर्वग्राहकस्यग्रहणार्थमुत्तरोत्तरग्राहकस्वीकार इति तृतीयग्राहकेनतत्पूर्वतरस्यग्राह्यत्वंस्यादिति, तृतीयग्राहकेणैवप्रथमस्यग्राह्यत्वोपपत्तौग्राहकस्य विलोपतोग्राह्यत्वस्यग्राहकत्वं तृतीयेनैवसिद्धमिति द्वितीयग्राहकस्यविलोप एव, द्वितीयग्राहककार्यस्यतृतीयेनैवनिर्वाहात् । एवमनेकग्राहकसत्त्वेकस्य ग्राह्यत्वं कस्य च ग्राहकत्वमितिनियमोपि न स्यात्, नियामकहेतोरभावेन सर्वेषांग्राहकत्वादेव । एवमनेकग्राहकस्वीकारेनास्तिकिञ्चित्प्रवलं प्रमाणयद्बलादग्राहकानवस्थाभ्युपगताभवेदिति दोषत्रयग्रस्तत्वात् नानवस्थायुक्ता, तस्यामूलविध्वंसकत्वादिति । ननु कदाचित्, एकेनात्मनोंऽशेनात्मनस्तदन्यांशस्य, अन्यदाकालान्तरेअंशान्तरे तदंशस्य ग्रहणंकरणीयमितिकालभेदेनसर्त्रोपपत्तिसंभवेनानवस्थाया आपातोयद्भयाद्विभेसि, इतिचेत्तत्राह **संघातरूपत्वंचात्मनः**

ननुग्राहकावभासः श्रुत्यैवप्रदर्शितः । तन्नयुक्तःसतुस्वसिद्धान्तश्रद्धाविप्रनद्धमतिभिरेव कथितः । इन्द्रियादिप्रत्यासन्नतत्तत्पदार्थमात्रस्फुरणात् । तादृशोपिक्वचिप्रसज्येतेति । एवं चात्मनोनिरंशत्वविरुद्धंसांशत्वमेवंसति, आपद्येतेत्यर्थः । आत्मासांशत्वादवयवसमुदायवान् , आत्मनोऽवयवसमुदायरूपत्वेऽनित्यत्वे, उत्पादविनाशशालित्वं घटादिवदापद्येत, ततश्चोत्पादवत्वेयेनात्मांशेन यद्यागादिकार्यमकरोद्यस्तस्यापगमेयागादिफलस्य भोक्तातदन्य एव भवेदितिकर्तृत्वभोक्तृत्वयोर्वैयधिकरण्यं भवत् कृतहान्यकृताभ्यागमश्चदोषौस्यातामेवेतिभावः । अत्रेदंज्ञातव्यम् , गुरुमतानुयायीआत्मनोज्ञानविषयत्वं न रोचयति किन्तु विषयज्ञानकालेज्ञातृत्वबलेन प्रकाशमात्रंमनुते, ज्ञानस्यापितथैवस्वीकरोति ।

। इत्यात्मनोग्राहकभावेविरोधोद्भावनप्रकरणेतत्त्वदीपः ।

एवं यथोक्तक्रमेणप्रभाकरानुयायिंनानिरस्तेस्वपक्षेभाट्टःप्रभाकरमतं दूषयितुमाह **ननुग्राहकावभासः** इत्यादि । तत्रवेद्यमात्रस्यावभास आत्मना भवति, ग्राहकस्यावभासस्तु न ग्राहकान्तरेण, किन्तु श्रुतिप्रमाणेनैवभासोजायते नतु प्रमाणान्तरेण, येनानवस्थादिदोषापातः स्यात् , सर्वप्रमाणशेखरीभूतास्तु श्रुतिस्वतःप्रमाणम् , तेन तत्र प्रमाणान्तरान्वेषणस्यानावश्यकत्वान्नपूर्वोक्तदोषा अवतरन्तीति तद्दूषयति **तन्नयुक्तःस तु स्वसिद्धान्तेत्यादि** । स्वकीयो यः सिद्धान्तस्तत्रयोऽभिनिवेशोदुराग्रहस्तेन वशींकृतमभिनिविष्टं यत् चित्तम् मनः तेन मनसाजायमानंयदभिमानंतन्मूलक एव ग्राहकावभासवादोनतु श्रुतिप्रमाणेनग्राहकावभासवादो कथमपि सिद्ध्यतीतिभावः । ग्राहकावभासोनामज्ञानमात्रेषुसर्वज्ञानेषु, आश्रयत्वेनाधिकरणरूपेणात्मनः स्फुरणम् । एतादृशस्फुरणस्य श्रुतिभिरसिद्धौहेतुमनुभवविरुद्धं चाकलय्य, ग्राहकस्यानुभवप्रकारमाह **इन्द्रियादिप्रत्यासन्न** इत्यादि । नहि, अनुभवविरुद्धं श्रुतिः प्रतिपादयेत् , तथात्वे तस्याप्रमाणिकत्वमर्थवादरूपत्वं वा स्यात् , नतु अप्राप्तप्रापकत्वमज्ञातज्ञापकत्वरूपं प्रामाण्यं स्यात् । नहि मनुष्यद्विशिरस्कत्व शिरचतुष्टयवत्वंब्रुवती श्रुतिः प्रमाणिकीस्यादिति । स्वसिद्धान्तवादिभिःप्रभाकरमतानुयायिभिः प्रतिपादितोग्राहकावभासोनस्वीकर्त्तव्यः प्रतीतिविरोधात् । प्रतीतिस्तुतत्तत्पदार्थमात्रंप्रकाशयति नतु तदन्यत् किमपि प्रकाशयतीति प्रकरणस्यमुकुलिताशयोभवतीतिभावः ।

ननु ज्ञानमात्रे विषयप्रमितितदाश्रयस्यभानं भवत्येव, यथाऽयंघटइतिप्रत्यक्षेघटाद्यात्मक विषयस्यज्ञानस्यतदाधारस्यात्मनोऽवभासो भवत्येवेतित्रिपुटीज्ञानमेव । अन्यथाघटादिप्रत्यक्षेग्राहकस्यात्मनोऽवभासो न स्यात् तदाघटमहंपश्यामिविजानामीतिवाऽनुभवोलोकप्रसिद्धः कथमुपपन्नःस्यात्तत्राह **तादृशोपि क्वचिदस्तु प्रत्यय** इति, तादृशोघटमहं पश्यामि, इतिग्राहकादिविषयघटित प्रत्ययोज्ञानंभवतु वा कस्यचित् कुत्रचित् , नतु स प्रत्ययोग्राहावभासः । किन्तु स तु प्रत्यय आगन्तुकात्मप्रतियोगिकप्राकट्यप्रकाशादिपदवाच्योऽर्थविषयधर्मानुमितज्ञानविशिष्टमानसप्रत्यक्षसिद्धा --

दस्तुनामप्रत्ययः । सत्वागन्तुकात्मप्रतियोगिकप्रकाशादिपदाभिधेयार्थधर्मानुमितज्ञान विशिष्टमानसप्रत्यक्षसिद्धात्मनिबन्धनः ।

। इतिप्रभाकरमतेभाट्टस्यप्रत्यवस्थानम् ।

उच्यते। अहोखलुस्वानुभव एव विभ्रमः परीक्षकाणाम् , यत्स्वानुभवसमये पूर्वावस्थातो न कञ्चिद्विशेषमयमात्मनोऽवबुध्यते इति । उक्तं हि–एतदीदृश, एवायमर्थःज्ञायतेनवेति न विद्मोमम वा प्रतिभासते परस्यवेत्यपि नविद्मः इति न जातु चिदेवंत्मकारणक एव । यस्य यद्विषयेज्ञानंप्रादुर्भवति तस्यैवपुरुषस्यसोऽर्थोघटादिःप्रकाशते नतु तदन्यस्यसोऽर्थप्रकाशतेऽन्यविषयकोवाऽर्थः प्रकाशते । इतिप्राकट्यस्यार्थानुयोगिकात्मप्रतियोगिकस्यभानं भवति, ततश्चज्ञाततालिङ्गेनज्ञानानुमानमेव भवति, तच्चानुमानंकदाचिदेव भवति । तदनन्तरंप्राकट्यात्मकार्थधर्मेणज्ञानानुमानमेव भवति ज्ञानंतत्रप्रत्यक्षंज्ञानस्यातीन्द्रियत्वेन प्रत्यक्षत्वासंभवात् । ततश्चानुमितज्ञानोपरक्तात्ममानसरूपो निरुक्तानुभवश्चकदाचित्क एव नतु सार्वदिकः । अयंचानुभवो न चाक्षुषो येन विषयज्ञानेषुग्राहकस्यात्मनोभानस्यादिति भावः । अत्र च मानस प्रत्यक्षेज्ञानवत्वेनविषयत्वंकर्मत्वमात्मनोदेहादिमत्तयाचाश्रयत्वंकर्तृत्वमात्मन इतिकर्तृकर्मभावविरोधपरिहारोपिभाट्टानामभिमतः ।

। इति प्राभाकरमते भाट्टस्यापि प्रत्यवस्थानप्रकरणेतत्त्वदीपः ।

गतप्रकरणेप्रभाकरमतस्य निराकरणंकृतवानितितदुपश्रुत्यप्रभाकरःपुनर्भाट्टमतंनिरसितुमुपक्रमते **उच्यते** इति । यावन्नोत्तरंकरोमितावदेवभाट्टस्यकथनं शोभते कृतेतुसिकताकूपवदेवविशीर्यते एवेत्यर्थः । निरासप्रकारमुपपादयति **अहोखलुस्वानुभव एव विभ्रमः परीक्षकाणामिति** । यथा यदाज्ञानंजायते तदातदुपलंभोपि भवत्येव, तथैवज्ञानोत्पादानन्तरंतादृशज्ञानवत्तयाज्ञानाधिकरणस्यानुभवोप्यनुभवसिद्धएवेति । तत्रैवानुभवेयोऽविभ्रमोनास्तितालक्षणेभ्रमएवपरीक्षकाणां तस्मिननुभवेनास्तितालक्षणोभ्रमः परीक्षकत्वेनात्मानंमन्यमानानां भ्रम एव । अर्थात् यः स्वकीयमनुभवमपि ज्ञातुं न शक्नोति तस्य परीक्षकत्वं कीदृशम् ? अर्थात् स्वकीयमनुभवं न जानन्ति, इति नतेपरीक्षकाः किन्तु भेदाभाषा एव । यः खलु यदाविषयस्यभानं भवति तत्समये पूर्वावस्थापेक्षयाकमपि विशेषं वैशिटयमात्मनो न जानन्तीतिमहदाश्चर्यमिति । विषयानुभवकालेज्ञानस्यतज्ज्ञातुश्चावभासाभावेपूर्वोक्तंदोषंस्मारयति **उक्तंह्येतदित्यादि** अर्थात् ज्ञानानुभवकाले यदि ज्ञानस्यप्रकाशो न भवेत् तदा “ज्ञायते न वेत्यादिसंशयः स्यात् विपर्ययो वा स्यात् विपरीतप्रभा वा स्यात् , परन्तु न भवतिकस्यापितादृशसंशयादिरितिज्ञानकालेज्ञानप्रकाशो भवत्येवेतिज्ञातव्यम् । अथ यदि विषयविषयकज्ञानोदयसमये यदिज्ञातुरात्मनोऽवभासाभावोदोषमुद्गिरति **मम वा प्रतिभासते** इति ज्ञातृविषयकसंशयादिःस्यात् । परन्तु ज्ञानविषयको वा ज्ञातृ

प्रतीतिरस्ति, ज्ञानज्ञात्रोरनवभासे तादृश्यप्रतीतिरापद्येत, इति । सोयंपरसञ्चेति स्वसञ्चेतितस्यातिशयः सर्वत्रपरिस्फुरन्नसतिग्राहकावभासेनोपपद्येत । अनुमितज्ञानालंवनत्वेचाज्ञासिपमित्येवप्रतिभासः स्यात्, नजानामीत्याकारकः प्रतिभासः स्यात् । ज्ञानजन्यार्थातिशयदर्शनतद्व्याप्त्यनुसंधानानुमानोदयकालेऽनुमितिसतज्ञानस्यातिवृत्तत्वाद्विनाशाद् । ज्ञानानुमानासंभवःपूर्वं प्रतिपादित एव । मानसप्रत्यक्षत्वंचात्मग्राह्यधीनिरासितम् । तथा सतिस्वपरवेद्ययोरनतिशयः स्यादिति ।

। इतिप्रभाकरस्यस्वपक्षसाधनम् ।

विषयको वा संशयादिर्नभवति, परन्तु तयोर्ज्ञानज्ञात्रोश्वभासे तदुभयविपयकसंशयविपर्ययादीनांनिवारिता कः भवेत् न कोपि समर्थः स्यादिति । **सोयंपरसञ्चेति**नामस्वसञ्चेतितज्ञानस्यातिशयः स्वात्मने प्रकाशमानत्वलक्षणोऽनुभूयमानः सर्वत्रपरिस्फुरन्, ग्राहकस्यात्मनोऽनवभासने कथमपि समाहितं स्यादिति । ज्ञाततालिङ्गकज्ञानानुमानस्वीकारेभाट्टस्यदोपंदर्शयति **अनुमितज्ञानालम्बनत्वे** इत्यादि । जानामीत्यादिवर्तमानकालिकप्रतीतेर्ज्ञातताज्ञानविपयतालिङ्गानुमितिविपयकज्ञानोपनीतमानात्मकमानसप्रत्यक्षरूपत्वस्वीकारेऽतीतकालिकज्ञानालम्बनत्वात्, जानामीतिस्थानेऽज्ञासिषमित्यतीतकालघटित एव ज्ञानस्याभिलापः स्यात् । किन्तु जानामीतिज्ञानेवर्तमानकालस्य वोधः स्यात् । जानामीन्यत्र "वर्तमानेलट्" इत्यनुशासनेनवर्तमानकाले लट् विधानात्, ततश्च विपयाववोधवत् वर्तमानकालोऽपि भासत एवाज्ञासिसमित्यत्रतु न वर्तमानापदेशोऽपितु भूतकालपदेश एवानुशासनवलादिति ।

न च भूतवर्तमानयोर्विकल्पः किन्तु विरोध एव तयोर्भूतवर्तमानयोः, अर्थात् शीघ्रता दोषादेवतन्त्रकालभेदग्रहोन भासते, अतोवर्तमानत्वांशेभ्रमात्मकोजानामीतिप्रत्ययोजायते, लोकानामित्याशङ्कायामाह, **ज्ञानजन्याथातिशयदर्शनेत्यादि** । स्वज्ञानव्यवहारहेतुकमेवज्ञानानुमानमिति आत्माश्रयदोषभयान्नैव संभवतीत्यादिकं विस्तरेणपूर्वमेवनिवेदितम् । ज्ञाततालिङ्गकमपिज्ञानानुमानं न संभवति, ज्ञानेनज्ञाततायाव्याप्तिग्रहासंभवात् । ज्ञानसामग्र्यैवान्यथासिद्धत्वात् ज्ञाततायाउत्पत्तेरेवासंभवादित्यभिप्रायः । विषयज्ञानेजाते, तेनैवज्ञातुः प्रकाशःस्यादिति प्रकाशमात्मनःसाधयितुमात्मनो मानसप्रत्यक्षत्वंनिराकर्तुमाह **मानसप्रत्यक्षत्वंचात्मग्राह्यधीनिरासितम्** इति मानसप्रत्यक्षत्वमित्यतःपूर्वमात्मन इतिपदमध्याहरणीयम् । मानसप्रत्यक्षत्वमित्यत्रवहुव्रीहिसमासानन्तरंत्वप्रत्ययः आत्मग्राह्यत्वं धियोबुद्धेः स्वयंप्रकाशत्वं तच्चस्वयंप्रकाशतत्वं ज्ञानस्यतत्स्वप्रकाशत्वंमानसप्रत्यक्षानुमानायोगप्रतिपादनादेवसिद्धम् । आत्मनोमानसप्रत्यक्षत्वंचव्यभिचारात् साधकत्वाभिमतस्यखण्डितम्, साधकाभावादित्यर्थः । **धीनिरासितम्**=व्यभिचारनिरूपकत्वोपपादकात्मग्राह्येतिधियोविशेपणम् एवं ग्रहग्राहकयोः प्रकारान्तरेणभानासंभवं समुपपाद्यतदनवभासेविपयवित्तौ विपयविपयकज्ञानेपूर्वो-

ननु ज्ञाने ग्राहकस्यानवभासेकथं स्वपरवेद्ययोरनतिशयप्रसङ्गः स्यात्? यावता, नहि ग्राहकस्यावभासमूलक एव स्वपरवेद्यविशेषनियमः, किन्तु स्वसमवेतविषयबोधजन्मना तथा परसमवेतबोधजन्मना च तद्विशेषोपपत्तिसम्भवात् स्वपरसम्बन्धिज्ञानविशेषजन्मव्यवस्थापि, स्वकीयपरकीयेन्द्रियार्थसंनिकर्षादिज्ञानसामग्रीभेदमूलकैव ।

क्तातिशयासंभवं निगमयन्, आह **तथा सतीति** अत्रानतिशय=अविशेषः पूर्वापेक्षयातदपरस्य विशेषाभाव इत्यर्थः । स्वस्मैज्ञायमानत्वेन भानंभानाभावंचार्थस्यघटादिविषयस्येत्याकारकवैलक्षण्यस्याभावोविरहःस्वपरयोः प्रसज्यते, विषयवित्तौ=विषयविषयकज्ञानेज्ञानस्यज्ञातुश्चाभानेहीत्यर्थः ।

। इतिप्रभाकरीयस्वपक्षसाधनप्रकरणेतत्त्वदीपः ।

एवम्–**उच्यते** इत्यारभ्य **तथा सति स्वपरवेद्ययोरनतिशयःस्यादि**त्यन्तप्रकरणेनप्रभाकरेण-भाट्टमतप्रतिक्षेपेस्वमतस्थापनेकृते तदुपश्रुत्यभाट्टःपुनः प्रभाकरमतंप्रतिक्षेप्तुमुपक्रमते **ननु ज्ञाने ग्राकस्यानवभासे** इत्यादि। अर्थात् घटादिज्ञाने यदि ग्राहकस्यावभासो न भवति तदास्वपरवेद्ययोरनतिशयप्रसङ्गः कथं स्यात्, अर्थात्, घटादिज्ञानेस्वस्यात्मनोऽनवभासमानत्वेपिस्वस्मैभासमानत्व रूपो विशेषोऽर्थस्यार्थात् विषयस्यघटादेः स्वनिष्ठत्वादेवघटते, तदा ग्राहकानवभासेस्वपरवेद्ययोरनतिशय प्रसङ्गः कथमिव स्यात्, नैव प्रसङ्गः प्रसज्यते इत्यर्थः। कथं न अनतिशयप्रसङ्गः स्यात् तत्राह **यावता** इत्यादि । नहि ग्राहकस्यात्मनोयदासिद्धिर्भवतिं तदैव स्वपरवेद्यविशेषः स्यात्, अर्थात् स्वपरवेद्यविशेषात्मकेकार्येनग्राहकज्ञानंकारणंविद्यते घटादिकार्येंदण्डादिवत्, अनयोर्नकार्यकारणभावो विद्यते, येनकारणाभावेसतिकार्याभावोऽर्थत एव सिद्ध्येत, दण्डादिकारणाभावेघटाभाववत् । अर्थात् विषयवोधाश्रयत्वमेवस्वस्यातिशयोऽपूर्वोविषयज्ञानकाले इति । न च विषयज्ञानकालेवित्तेर्ज्ञानस्य वेदितुर्ज्ञानाश्रयस्यात्मनोरनवभासेपूर्वोक्तः संशयः "ज्ञायते नवा मम प्रतिभासते परस्य वा प्रतिभासते" इत्याकारकः संशयो न निराकृतो भवतीतिवाच्यम्, स्वज्ञानजनितघटाद्यर्थविषयधर्मप्रकाशस्य स्वंप्रतिप्रत्यक्षत्वात् "ममप्रकाशतेविषयोनवेत्याकारकसंशयस्यावकाशाभावात्। ज्ञानस्यफलीभूत प्रकाशेनभूतितत्समये एव ज्ञानस्यानुमानप्रमाणसिद्धत्वात् "ममज्ञानं प्रकाशतेनवेत्याकारकसंशयस्यममज्ञानंजातमन्यस्यवाजातमितिसंशयस्याप्यनवकाशात्। नैयायिकप्रक्रियानुसरणेतु "योग्यविभुविशेषगुणानांस्वोत्तरवर्त्तिगुणनाश्यत्वनियमात्, ज्ञानस्यद्विक्षणमात्रावस्थायित्वात् व्यवसायानन्तरानुव्यवसायवलादेवप्रथमज्ञानविनाशेनानुव्यवसायानन्तरंपूर्वोक्तसंशयस्यानवकाशीकरणात् । ज्ञानस्यज्ञातुश्चापिविषयविषयक ज्ञानेऽवभासेपि पूर्वोक्तसंशयानवतारात्। स्वसमवेतविषयविषयकवोधोत्पादनसंभवात्। स्वसमवेतज्ञानोत्पत्तौपरसमवेतज्ञानोत्पत्तौ च स्वकीयपरकीयचक्षुरादीन्द्रियार्थसंनिकर्षस्यभेदेनैवज्ञानस्य भेदः । अर्थादीन्द्रियार्थसन्निकर्षरूपकारणभेदादेवस्वस्यपरस्य वा ज्ञानंजायते, ज्ञाने तस्यैवकारणत्वात् कारणभेदस्य च कार्यभेदेकारणत्वादिति । ननु यथेन्द्रियार्थसंनिषौंज्ञानजन्मनिहेतुस्तथैवात्मप्रकाशस्यापि तत्र

न चात्मनःसिद्धिरपिज्ञानसामग्र्यामनुप्रविशति ? इन्द्रियवदेवानवभासमानस्यैवज्ञानंप्रतिकारणत्वसंभवात्। न च विषयज्ञानंतदवबोधएवात्मवोध इति कथनं युक्तम्? नहि विषयान्तरज्ञानं विषयान्तरस्यज्ञानं भवति, तथासत्यतिप्रसङ्गात् । अपि च यदधीनाभावानांरूपभेदस्यव्यवस्था भवति तदपि संवेदनज्ञानं तदानींतत्कालेज्ञातंनिलीनमेव कारणम् घटादिबोधेनिलीनेन्द्रियवदिति । कुतः खलुकारणात् बोधाश्रयस्यात्मनांप्रतिभासः प्रस-

कारणं भवतु ? तदनुरोधेन विषयवित्तौ, आत्मप्रकाश आवश्यक इति चेन्न, यथा, अर्थज्ञानेज्ञायमानं निलीनमिन्द्रियमेव कारणं न ज्ञायमानंसदिन्द्रियादिकंकारणं तथैवाप्रकाशमान एवात्माज्ञानजन्मनि कारणं भवतीत्याशयेनैव कथितं **न चात्मसिद्धिरपि ज्ञानोत्पादकसामग्र्यामनुप्रविशति** इन्द्रियादिवदेवानवभासमानस्यैवात्मनोज्ञानहेतुत्वस्य स्वीकारात् । अर्थादनुमानस्थले यद्धूमादीनां कारणत्वं तत् तदीयज्ञानस्यैव नतु ज्ञायमामस्य हेतोरतीतानागतहेतुज्ञानादपि घनगर्जनादिस्थलेऽनुमित्युत्पत्तिदर्शनात् । एवमेवोपमितौशाब्दबोधे च सादृश्यज्ञानपदज्ञानादीनामेव करणत्वम् , परन्तु नायं नियमोऽपरोक्षस्थले, तत्रातीन्द्रियस्यकारणत्वेनप्रत्यक्षतःपूर्वं तज्ज्ञानाकरणत्वम् संभवात्, किन्तु निलीनमज्ञायमानमेवद्रव्यमतीन्द्रियमिन्द्रियं हेतुर्भवति । अतएव "ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति" प्रत्यक्षलक्षणम्, "इन्द्रियार्थसन्निकर्षजन्यंज्ञानंप्रत्यक्षमितिलक्षणंविहायपूर्वोक्त लक्षणं कृतवान् एवमीश्वरप्रत्यक्षेऽव्याप्तिमनुमित्यादौ चातिव्याप्तिमशक्यमिन्द्रियार्थसंनिकर्षजन्यत्वं विहाय ज्ञानाकरणकमितिलक्षणं कृतवान् । अतएव विषयवोधे आत्मनःकरणत्वंज्ञायमानस्यैवकथितम्, **इन्द्रियादिवदेवानवभासमानस्यैव** हेतुत्वादित्यादिना । ननु आत्मसिद्ध्यघटितापिविषयबोधसामग्रीआत्मप्रकाशेकारणं भवतु ? तत्राह **न च विषयप्रसङ्गादिति** । इन्द्रियार्थसंनिकर्षायोग्यता घटिताविषयिकज्ञानसामग्रीयमार्थज्ञानंजायते, एतादृशीसामग्री, अयोग्यात्मबोधमुत्पादयितुं नैव समर्थाभवतीति । **अतिप्रसङ्गात्** घटादिबोधसामग्रीवलात्पटादिविषयकबोधस्यापि समुत्पादप्रसङ्गात् तस्मादन्यकारणेनान्यस्योत्पादइतिवक्तुं नैवयुक्तमिति । ननु यदा विषयस्यघटादेरवोधो भतति, तस्मिन् समये बोधस्यज्ञानस्यप्रकाशो न भवतीत्याशङ्कायामाह **अपि च यदधीनांभावाना**मित्यादि । प्रमाणाधीनाप्रमेयसिद्धिः "प्रमेयसिद्धिःप्रमाणद्धि" इति वृद्धोक्तेः । प्रमाणं खलुप्रत्यक्षादिकम्, तद्बलात् पदार्थस्यसाधनं भवति, प्रमाणं च स्वलक्षणाधीनस्थितिकम् । अर्थात् भावानांद्रव्यादिपदार्थानां रूपभेदव्यवस्था भवति, यदधीनायत्प्रयोज्या भवति, इदं द्रव्यंगुणोवेत्यादिक्रमेणघटादीनांपृथक्तया सिद्धिर्ज्ञानाधीनमेव भवति ज्ञानस्यैवज्ञेयप्रकाशत्वेनप्रमाणत्वात्, तत् संवेदनंज्ञानंप्रमाणरूपम् तदानीं विषयप्रकाशनसमयेविलीनमज्ञातमेव नतु ज्ञातं सत्, अर्थस्यप्रकाशकम्, अन्यथा ज्ञायमानत्वेन ज्ञानस्यविषयसाधकत्वेज्ञानानवस्थायाः पूर्वमेवप्रतिपादनादतोनिलीनमेवज्ञानमर्थस्यरूपभेदसिद्धौ साधकं

क्तिः१ "यदाहुः इदमहंजानामीति त्रितयावभासः सार्वत्रिकः" इतिदप्यनुभवानारूढ़मेवेत्यनन्तरमेव निराकृतम् ।

। इति भाट्टेन प्रभाकरमतदूषणम् ।

भवतु तर्हिंग्राहकतयैवसर्वपदार्थग्रहणसमये आत्मनोपिसिद्धिः । ज्ञानस्यस्वतःसिद्धिरवश्यमेवाभ्युपगन्तव्या, सर्वप्रकारकसाधनान्तरस्यप्रतिक्षेपात् सत्याश्चतस्याः कदाचिदनवभासादर्शनात् । यथा च संविदः प्रकाशाव्यभिचारस्तथाप्रपञ्चितप्रागेवनात्रतत्प्रदर्श्यनिराकरणीयम् । सतो विद्यमानस्यापि घटादिप्रमेयजातस्यस्वप्नमूर्छादिकालेऽनु

भवति । यथा चक्षुरादिकमतीन्द्रियत्वान्निलीनमेवार्थसाधकं भवति तथैवप्रकृतेपि । अर्थात् पदार्थानांद्रव्यादीनांजातिगुणादिविशेषस्यव्यवस्था यदधीनाज्ञानात्मकप्रमाणाधीना, तदपि संवेदनं विषयप्रकाशकालेऽज्ञायमानम् प्रकाशमानस्वरूपंस्वरूपसदेवज्ञापकं भवति, चक्षुरादिवत्, यथाचक्षुरादिकंविषयप्रकाशनसमयेऽप्रकाशमानस्वरूपं सदेवप्रकाशकं तथैवप्रकृतेपीतिभावः । ततश्चस्वरूपजज्ञानेनैवविषयविशेषसिद्धिवत् स्वरूपंसत्, अज्ञायमानज्ञात्रैवस्ववेद्यविषयातिशयसिद्धिर्जायते एवेति नतस्यज्ञातुः प्रकाशमानत्वेनकारणत्वमिति भावः । प्रभाकराणांमतमनुवदति **यदाहुः** इत्यादि **इदमहंजानामीतित्रितयावभासः सार्वत्रिक** इति । तत्र सार्वत्रिकः—प्रत्यक्षानुमानादि सर्वविषयज्ञानव्यापीत्यर्थः । एतन्मतं प्रतिक्षिपति **तदप्यनुभवानारूढ**मित्येवंरूपेणनिराकृतमेव । अनुभवारूढमितिकथनेनत्रितयावभासेसाधकाभावः कथितः, अनन्तरमेव प्रतिक्षिप्तमित्यनेनबाधकस्य प्रदर्शनंकृतम् ।

। इति भाट्टेन प्रभाकरमतदूषणेतत्त्वदीपः ।

यथा ज्ञानं स्वविषयं साधयतीतिज्ञानस्यतस्यस्वभावस्तथैव स्वस्वाश्रयस्यापि प्रकाशेकारणमितिज्ञानस्यायंस्वभावः स्वभावश्चसर्वस्यपदार्थजातस्यदुरपन्हव एव । तदुक्तम्—"अतीत्यहिगुणान्सर्वान् स्वभावोमूर्ध्निवर्तते" इति न्यायादिति पुनरपिप्रभाकरः शङ्कते **भवतु तर्हिंग्राहतयैवेत्यादि** तत्र ग्राहकतया=ज्ञानाश्रयतयाऽर्थात् ज्ञानाधिकरणतयैवेति । विषयविषयकबोधज्ञानसामग्रीवलेन विषयमेव यद्यपि जायते, जायमानं तादृशविषयविषयकज्ञानंस्वसामर्थ्यवलेनस्वस्याविषयमपि स्वस्वाश्रयं च प्रकाशयत्येवेति सर्वत्रज्ञानेषु स्वग्राहकतयाआत्मानंप्रकाशयतीतिभावः । ननु संभवेदपि ज्ञानस्यविषयवत्, स्वस्यस्वग्राहकस्यापि प्रकाशकत्वस्वभावो यदि ज्ञानस्यस्वप्रकाशकत्वंसिद्ध्येयत नत्वे वं ज्ञानस्यस्वप्रकाशकत्वं तु नाद्यापि सिद्धमित्याशंङ्क्य ज्ञानस्यस्वप्रकाशकत्वं युक्त्यासाधयितुं प्रभाकरमतेन तत्तावद्दर्शयति, एवं स्वप्रकाशत्वंज्ञानस्यकथयित्वाज्ञानस्यविषयप्रकाशकारणत्वस्वभावं च साधयति=**सतोविद्यमानस्यापि घटादिप्रमेयजातस्य** इत्यादि। यद्यपि स्वप्नसमयेवाह्या घटादि विषया वर्तन्ते एव नतुतेषांविषयाणामभावो जायते, तथापि सन्तोपि ते प्रकाशमाना न भवन्ति, अयं

पलब्धेरितिस्वीकृतं तावत् संविदोज्ञानस्यविषयसाधकत्वम् । अतस्तस्मादेवकारणात्क्लप्तार्थान्तरसाधनभावतयासंविदैवात्मनो ग्राहकस्यसिद्धिरभ्युपगन्तव्या ।

यत्तु विषयविषयकज्ञानस्याभावेपिस्वप्नसमयेऽयमात्माप्रकाशत एवेति । तद् यद्यपि युक्त्यासिद्ध्यपि तथापि प्रतीत्यनुसारेणव्यवहरतां न प्रमोदमञ्चति ।

अपि च मोक्षकालेपिआत्मनोज्ञानंभवतीतिमतंतदप्यसंभवप्रायमेवज्ञानकारणस्य-

घटोऽयंपट इति, ज्ञायते यत् सतामपितेषां सद्भावेपिप्रकाशकस्यकस्यचिदभावः स्वप्नकालेइन्द्रियादीनामुपरमात्, तेषांज्ञानंनास्तीति, तस्मात् तत्रात्मनोमनसोविषयाणांसत्वेपिज्ञानसाधनाभावेनज्ञानाभावः । ततश्चज्ञानस्यैवप्रकाशकत्वं नान्यस्यकस्यचित्तथात्वं स्वीक्रियते । अर्थात् स्वप्नसमयेमूर्छाकालेज्ञानस्यनिवृत्त्याविषयप्रकाशाभावः, जागरणेतु इन्द्रियसन्निकर्षादिनाजायमानज्ञानेनविषयप्रकाशो जायते इत्यन्वयव्यतिरेकाभ्यांज्ञानस्यैवविषयप्रकाशकत्वमितितस्यप्रकाशकत्वंसिद्ध्यतीति । **अतस्तस्मादेवकारणादिति** परप्रकाशकत्वेनान्विष्यमाणस्यज्ञानस्यैवप्रमातुरात्मनोपि प्रकाशकत्वमपि युक्तियुक्तमिति न पार्थक्येनात्मनः स्वयं प्रकाशत्वमपिकल्पनीयमिति । यद्यपि जागरणाद्यवस्थामधिकृत्यतत्प्रवाहेस्वप्नावस्थामधिकृत्य—"अत्रायंपुरुषः स्वयंज्योतिर्भवति"इत्यादिश्रुत्यादित्यादिप्रकाशस्यास्तमयेस्वप्नावस्थायामात्मन एव स्वयंप्रकाशत्वं प्रतिपादितम्, तथापि तादृशश्रुत्यर्थेगजनिमीलिकामादधानस्तथाकथितवान् । इदमीयविशेषविचारः स्वयमेवकरिष्यतीतिनात्रतत्प्रपञ्च आवश्यक इति कृत्वा विरम्यते । । इतिपुनःप्राभाकरेणस्वमतस्थापनप्रकरणेतत्त्वदीपः ।

प्रभाकरमतानुयायी "अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति श्रुतिबलात् स्वापादिसमयेपि आत्मनोज्ञानंभवत्येवेति तदीयमतमनुद्यतत्खण्डयितुमुपक्रमते **यत्तु विषयविषयकज्ञानस्य** इत्यादि । सत्यपि विषयविषयकवित्तेः स्वापेउपरामेपितदाप्ययमात्माप्रकाशते एव, अर्थादात्मनोज्ञानं विषयविषयकंभवत्येव । अर्थात् सुप्तोत्थितपुरुषस्य "सुखमहमस्वाप्सं न किञ्चिदवेदिषम्" इत्याकारकं स्मरणं भवतीति सर्वसिद्धमेव, स्मरणंचानुभवमन्तरेण न संभवतीति स्मरणान्यथानुपपत्त्याऽनुभवः स्वापेस्वीकर्तव्यमेवेति स्वापसमयेज्ञानमात्मनोभवत्येवेति मन्तव्यम् । अतः स्वापादिकालेपि आत्मनःप्रकाशो भवत्येवेति स आत्माज्ञानवानेवेतिप्रभाकरस्यपूर्वपक्षः । तदुत्तरयति **तथापि प्रतीत्यनुसारेण** इत्यादि । सुखमहमस्वाप्समित्येवं स्मरतः स्वापे आत्मप्रकाशमन्तरेणानुपपद्यमानत्वलक्षणयुक्तियुक्तमपिप्रकाशमानत्वमात्मनस्तथापि अनुभवमात्रशरणानां न मनोऽनुरञ्जयतीति, उपपद्यमानमपीत्यत्रअपिपदस्योपपत्तिरपि— नास्त्येवेत्यर्थःसुखमहमस्वाप्समितिस्मरणस्यान्यथाप्युपपत्तिसंभवात्, अन्यथासिद्धत्वादित्यर्थः तदन्यथासिद्धिप्रकारमग्रेस्वयमेवदर्शयिष्यते । एतावता प्रकरणेन स्वापे आत्मनः प्रकाशं निषिध्य, मोक्षकाले आत्मास्वयंप्रकाशते इति यन्मतं तदपि निराकर्तुमाह **अपि च मोक्षकालेपीत्यादि** करणकलेवरादिविनाशानन्तरमेवात्मनोमोक्षो भवति, ततश्च

मोक्षकालेऽभावेनतज्ज्ञानस्यासंभवात्, कारणाभावेकार्याभावस्यौत्सर्गिकत्वात् । न च मुक्तस्यज्ञानंनित्यमेवेतिवाच्यम्, तथा सतिमोक्षस्यसार्वदिकत्वप्रसङ्गात् । न च तर्हि मुक्तस्यसर्वज्ञत्वप्रतिपादकश्रुतीनां का गतिः ? तादृशश्रुतेरर्थवादत्वेन विधायकत्वासंभवात् । विनाशितसकलशरीरेन्द्रियज्ञानकर्मवासनानुवन्धस्यमुक्तस्य न किञ्चिदपिस्वपरज्ञानोदयकारणकंसंभाव्यते । न च मनसि नित्येन्द्रियत्वेन तादृशमनःसंयोगादेवमोक्षकाले ज्ञानं जायते, तदपि न युक्तम् स्वरूपतो गगनवत्, नित्यस्यापिविद्यमानस्य मनस इन्द्रियत्वेनज्ञानोत्पादकत्वस्यधर्माधर्ममूलकत्वात् । ततश्चधर्माधर्मसहकृतं मन एव ज्ञानोत्पत्तौकारणंमनसोनित्यत्वेन्द्रियत्वेपि । यथा नित्यत्वेपिश्रोत्रस्यादृष्टमूलकमेव शब्दोत्पत्तौकरणत्वम् ।

ज्ञानंप्रति अवच्छेदकयोः करणकलेवरयोस्तदामोक्षकालेऽभावेनकथमनित्यंज्ञानंसांसारिकवत् तस्यमुक्तस्यादर्थात् नैवकथमपि संभवति, यथा दण्दादिसहकारिकारणबिधुरस्यकुलालस्यघटादिप्राप्तिर्न भवति कारणमन्तरेणकार्यासंभवात्तथैवजन्यज्ञानकारणस्यमोक्षकालेऽभावेन मुक्तस्य ज्ञानं न कथमपिसंभवेदित्युत्तरपक्षस्यसमुदिताशयः ।

ननुकारणसाध्यज्ञानंशरीरादिकारणाभावान्नमुक्तस्य भवतु, परन्तुमुक्तस्ययद्ज्ञानंतन्नित्यमेव भवतु ? इत्याशङ्कांसमाधातुमाह **न च मुक्तस्यज्ञानं नित्यमेवेतीति** उत्तरयति **तथा सति मोक्षस्यसार्वदिकत्वप्रसङ्गादिति** । यदि नित्यज्ञानत्वान्मुक्तस्तदातदीयज्ञानस्यसर्वदाऽवस्थानेन नित्यमुक्तत्वंस्यात्, ततश्चसंसाराभावोप्यापतेत्, न चैतद् युक्तम् ‘योनिमन्ये प्रपद्यन्तेशरीरत्वायदेहिनः’’ इत्यादिश्रुतिविरोधआपतेत्, तस्मान्मुक्तस्यज्ञानंनित्यमितिकथनमयुक्तमिति । ततश्च नित्यत्वेन मुक्तज्ञानस्यसर्वदाऽवस्थानेन संसाराभावआपतेत्, संसाराभावस्वीकारे “योनिमन्येंप्रपद्यन्ते” इत्यादिसंसारसाधकश्रुतिविरोधः ।

नतु तर्हिमुक्तिकालेसर्वज्ञस्यसर्वज्ञत्वं भवतीति तस्यसार्वज्ञत्वप्रतिपादकश्रुतीनांकागतिरित्याशङ्क्य, सार्वज्ञश्रुतीनामर्थवादत्वेनापिचारितार्थ्यसंभवादित्याशयेनाह **तादृशश्रुतेरर्थवादत्वेन** इत्यादि । मोक्षकालेऽज्ञानतत्कार्याभावनिमित्तकामोक्षसाधनप्रशंसापरकाः सार्वज्ञत्वादिप्रतिपादकश्रुतय इत्यर्थः एतदेव विभज्य प्रतिपादयति **विनाशितसकलशरीरेन्द्रियेत्यादि** अर्थात् मुक्तस्य ज्ञानोदयकारणं न शरीरेन्द्रियादिशरीरादिनाविनाशात्, किन्तु ज्ञानवासनाकर्मवासना तदीयसंस्कारमात्रंतस्यज्ञानोदयेकारणं नतुवासनातिरिक्तंकिमपिकारणं संभाव्यतेयद्बलादस्यज्ञानोदयो भवेत् । निरस्तसमस्तदेहेन्द्रियवासनानुवन्धस्यमुक्तस्य, येन स्वस्वरूपविषयकमर्थान्तरादिविषयकं वा ज्ञानादिकं समुक्तोऽर्जयेत् । तदाधर्माधर्मसहकाराधीनत्वात्तदीयज्ञानस्येति । न च मोक्षकाले देहेन्द्रियादेरनित्यत्वेज्ञानकारणत्वानुपपत्तावपिनित्यस्य मनइन्द्रियस्यसर्वदाऽवस्थानेन न तस्यैव

योगजधर्मसहकृतमनसः संयोग एव मुक्तस्यज्ञानोत्पादेसाधनंस्यादिति न वाच्यम्, “क्षीयन्तेचास्यकर्माणि तस्मिन् दृष्टेपराऽवरे” “तदा विद्वान् पुण्यपापेविधूयनिरञ्जनः परमंसाम्यमुपैति” इत्यादिश्रुतिभिः सकलपापकर्मविनाशस्यप्रतिपादनात् । मोक्षस्य धर्मफलत्वेमुक्तस्यपुनरावृत्तिप्रसङ्गात् “न स पुनरावर्तते” इंत्यादिनाश्रुतौमुक्तस्यपुनरा-

तदीयज्ञानोत्पत्तौकरणत्वं स्यात्, ततश्च मनोवलेन तदीयंज्ञानंमोक्षकालेपिस्यादितिवाच्यम्, यद्यपि स्वरूपतोमनोनित्यम्, तथापि स्वरूपतो न मनस इन्द्रियत्वं ज्ञानजनकत्वं किन्तु धर्माधर्मसहकारेणैवज्ञानादिजनकत्वं नतु स्वतन्त्रस्य तस्यमनसस्तथात्वमिति गृहाण । यथा धर्माधर्मावरुद्धम्, अर्थात् पुण्यपापलक्षणादृष्टनिमित्तकोपकरणत्वावस्थाविशिष्टम् । श्रोत्रवदिति, यथा कर्णशष्कुल्यवच्छिन्नगगनस्यैवश्रोत्वम्, नतु स्वरूपतआकाशस्य तथात्वम् । तस्य चाकाशस्यादृष्टसहकारे सत्येवशद्बादिप्रत्यक्षेकरणत्वम्, नतु धर्माधर्मयोरभावे । इति यथाऽदृष्टकारणक एवाकाशस्य श्रोत्रत्वंशद्बादिग्राहकेन्द्रियत्वं तथैव प्रकृतेमनसइन्द्रियत्वंज्ञानजनकत्वं चादृष्टवलाद् भवति । मोक्षकाले च संसारप्रयोजकशुभाशुभकर्मणोऽभावात् स्वरूपतोनित्यस्यापिमनसोनेन्द्रियत्वं नवाज्ञानकरणत्वमिति न मुक्तस्यसमवायिकारणस्यचाभावात् । अयमाशयः मोक्षकालेऽनित्यस्यैवासत्वम्, मनसस्तुनित्यस्य न विनाशः परन्तु यावदिदं मनोधर्माधर्मसहकृतं तावदेव स्वकार्यंकुर्यादिन्द्रियं करणं च भवति । मोक्षेतु कर्मणोपि, अनित्यतयाऽवस्थानाभावेनतत्सहकाराभावात् तादृशेन मनसामुक्तस्य न ज्ञानं भवति नवा तदितरः संसारोपि भवतीति सर्वसांमञ्जस्यं भवतीति न कस्यचिदपिप्रश्नस्यावसरो भवतीति विशेषोऽन्यत्रद्रष्टव्यः ।

एतावतागतप्रकरणेनभाट्टेनप्रभाकरमतेखण्डितेपुनःशङ्कतेप्रभाकरानुयायी **योगजधर्मसहकृत** इत्यादि । ननु योगजधर्मसहकारेणमनसोनित्यस्यैवमोक्षकालिकज्ञानेसाधनत्वं भवतु ? अर्थात्तादृशमनः संयोग एव मोक्षकालिकज्ञानोदयेऽसमवायिकारणं भवतु । अत्र मनः संयोस्ययोगजधर्मानुगृहीतत्वमर्थाद्योगजधर्मसहकारित्वम् योगजधर्मप्रभावान्मुक्तिकालेपिमनसइन्द्रियत्वमनुवर्तते एवेतिमानसमेवात्मज्ञानमोक्षकालेऽपिसंभवत्येवेतिप्रश्नस्यभावः । नैतन्मनोरमं तत्राह **क्षीयन्ते चास्येत्यादि** अर्थाद् मोक्षकाले यदि योगजधर्मस्यानुवर्तनं भवेत्तदाश्रुतिविरोधः स्यात् । श्रुतिमेवोदाहरति **भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयत्तेचास्यकर्माणितस्मिन्दृष्टेपरावरे** इति । अस्यार्थः तस्मिन् चिदचिच्छरीरकेवेदान्तवेद्येपरमात्मनिश्रीरामेदृष्टेसाक्षात्कृतेसति, प्रत्यक्षसमानाकारोपासनज्ञानेनध्यानेनविषयीकृते सति, अस्यध्यातुरुपासकस्य, हृदयग्रन्थिरन्तःकरणगतंसर्वमपिमोक्षप्रतिवन्धकंमलंभिद्यतेविनष्टं भवति, यथा रात्रिप्रसरितान्धकारस्यसूर्यतेजसा सर्वथाविनाशोजायते यथा वा मृत् पिण्डः कठोरोपिशिलातलप्रक्षेपेशतधाविभिद्यते, तथैव ध्यातुर्हृदयगतं सर्वमपिमलंसमूलंविनष्टं भवति । तथाध्यातुर्हृदयेऽवस्थिताःयेशंशयाः श्रीरामोवोपासनीयोऽन्योवा इत्याकारकास्तेसर्वेऽपिछिन्नाभिन्नाभवन्ति, तथाऽस्य-

वृत्तेर्निषेधात् “सत्यसन्धः प्रतिश्रुत्यप्रपन्नायाभयंस्वंयम् । निवर्तयेद्भयेनैनं श्रीरामः श्रितवत्सलः” इतिस्मृत्युक्तेश्च । “नास्त्यकृतःकृतेन” “तद्यथेहकर्मचितोलोकःक्षीयतेएवमेवामुत्रपुण्यचितो लोकः क्षीयते” इत्यादिशास्त्रदर्शनाच्च ।

ध्यातुरन्तःकरणे यानिसञ्चितानिशुभाशुभकर्माणिसर्वाण्यपिविनश्यन्ति, ततश्चध्यातुर्निष्प्रत्यूहमयत्नोपनतमिवसाकेतगमनं भवतीति । इयं श्रुतिः कर्मणां निषेधंकुर्वतीमोक्षकालेतदभावमेवदर्शयतीति कथं मोक्षकालेयोगजधर्मसाहाय्यंमनसःकथं वा मोक्षज्ञानम्, कथंवाऽत्मनोमानसःप्रत्यक्षविषयत्वमिति । तथा “तदा विद्वान्पुण्यपापेविधूयनिरञ्जनःपरमंसाम्यमुपैति” यदाखलुध्यातोपासकः सर्वशरीरकंभगवन्तं पश्यति-प्रत्यक्षसमानाकारकज्ञानेनसाक्षात्करोति तदा अत्रैवपुण्यपापंस्वर्गनरकादिपापकंकर्मविधूयविनाश्य “अश्वइवरोमाणि” इतिश्रुत्यन्तरात् । अतएव निरञ्जनःसर्वमलरहितो भगवतःपरमसमतांप्राप्नोतीत्यर्थः । इत्यादि, शुक्लेतरसकलकर्मणांमोक्षकालेऽभावं दर्शयति । मोक्षकालेकर्मसद्भावस्वीकारेप्रस्तुतश्रुतिविरोधः स्पष्ट एव । तस्मान्नमोक्षेकर्मसंभावनेति । अपि च यदि मोक्षो धर्मस्यफलरूपोभवेत् स्वर्गादिवत्तदास्वर्गादिवदेवनिवृत्तोपि स्यात् । अर्थात् यथा यागादिकर्मणासमुपार्जितः स्वर्गोभोगान्तरं स्वजनककर्मणः स्वजन्यफलस्यावसानेततःस्वर्गान्निवृत्तिर्जायतेसंस्थापककर्मणामुपभोगेन विनाशादिति स्वर्गिणांपुनरावर्तनं भवति, तथैवापवर्गस्यापिधर्मफलत्वेउपभोगेनमोक्षजनककर्मणांविरामेमुक्तस्यापिपुनरावर्तनंस्यादेव, परन्तुनैवं श्रुयते, प्रत्युत “न स पुनरावर्तते” इत्यादिश्रुत्या मोक्षगतानामपुनरावृत्तिश्रवणादिति तादृशश्रुतिविरोधो भवत्यतोमोक्षः स्वर्गादिवत् न कथमपिधर्मफलभूतः । अर्थात् मोक्षसमयेआत्मविषयकज्ञानस्ययद्वा सर्वविषयकज्ञानस्यधर्मोत्पाद्यत्वस्विकारेजन्यभावस्य निवृत्तेरवश्यं भवति घटस्वर्गवदितिनियमेनपुनरपिअज्ञानतत्कार्यादिकप्रसङ्ग इत्यर्थः । कर्मणांशुभाशुभादिनामनित्यत्वमुत्पादविनाशित्वमित्यत्र श्रुतिप्रमाणंचोदाहरति

“नास्त्यकृतः कृतेन” “तद्यथेहकर्मचितोलोकः क्षीयते एवमेवामुत्रपुण्यचितोलोकः क्षीयते

इत्यादि श्रवणात् । श्रुत्यर्थस्त्वित्थम्, यथा येनप्रकारेणकर्मणाकृष्यादिक्रिययासंपादितः सञ्चितो लोकोधान्ययवादिकः उपभोगेनकालपरंपरयाक्षीयतेविनश्यति, नतु सार्वदिको भवति, ते एवमेवैतद् दृष्टान्तानुसारेणामुत्रस्वर्गादिस्थानविशेषेपुण्यचितोविधिबोधितयागादिकर्मणासञ्चितः इन्द्रयमादिलोकोपि उपभोगेन संचायककर्मणाविरामेक्षीयते विनस्यति । स्वर्गोविनाशीभावत्वेसतिकार्यत्वादित्यनुमान प्रमाणितः। किञ्च यथा श्रुत्याकार्यभूतस्वर्गादिफलस्यानित्यत्वंप्रदर्शितं तथैव श्रुत्यन्तरात्, फलभूतस्यापिमोक्षस्यचिरस्थेमानत्वमपिदर्शितं भवति, “परीक्ष्यकर्मचितान् लोकान् ब्राह्मणोनिर्वेदमायात् । नास्त्यकृतः कृतेन । स तद्विज्ञानार्थंगुरुमेवाभिगच्छेत्समित्पाणिर्ब्राह्मणश्रोत्रियंब्रह्मनिष्ठम्” ब्राह्मणोजात्याब्राह्मणवंशजातः कर्मचितान्, कर्मणाशुभाशुभकर्मणाचितान् सञ्चितान्, आचकीटपतंगेभ्यआचदेवर्षिप्रमुखान् सुखलेशविरहितान् रात्रिन्दिवंहाहाकारेणसंक्षुभितान् इत्थंभूतानेकप्राणिसंकुलान् परीक्ष्य=सर्व-

न चात्मसत्तयैव तदानीं मोक्षसमये तज्ज्ञाननिमित्तत्वंभवत्वितिवाच्यम् प्रक्लृप्तत्यागाप्रक्लृप्तकल्पनादोषप्रसङ्गात् । मोक्षकालेज्ञानस्यात्ममात्रनिमित्तकत्वे च सर्वदा आत्मस्वरूपवत्तदपिविद्यतेएवेति संसारानवतारप्रसङ्गात् तथा बन्धमोक्षयोरविशेषप्रसमनित्यंसुखलेशविवर्जितंदु:खवहुलं च विचार्य्यनिर्वेदवैराग्यम्, आयात् प्राप्नुयात् मनुष्यलोकादारम्य प्रजापतिलोकपर्यन्तं स्पृहामुपादेयतां च परित्यज्यवैराग्येमनः स्थापयेत् । ततचैषणात्रयविमुक्तः-कुतश्चिदात्मज्ञानसकलशरीरकं परमात्मानं ज्ञात्वा, तद्विज्ञानार्थं श्रोत्रियंब्रह्मनिष्ठं च गुरुमभि, गच्छेत् । गुरुणाविदितपरमेश्वरध्यानमेवसर्वदु:खरहितमोक्षंप्रतिकारणमितिश्रवणमननध्यानात्तमेवोपासीत। । ततस्तदीयकृपयैवमोक्षमवाप्तो भवति । स चाकृतो नित्योमोक्षःकृतेनयागादिकर्मणाप्राप्तो न भवति किन्तु परमेश्वराराधनेनैव भवतीतिक्रियाज्ञानसमुचितभक्तौमनोनिवेशयेत् "भक्त्यात्वनन्यया शक्यअहमेवंविधोऽर्जुन" इतिभगवद्वचनात् । तदत्रास्मत्परमगुरवोमहामहोपाध्याया जगद्गुरुश्रीरामानन्दाचार्यरघुवराचार्यमहाभागाअर्थचन्द्रिकायाम् "एवंविश्वरूपोऽहमनन्ययामदेकगोचरयाभक्त्याऽनुरक्त्या तु तत्वेन याथार्थ्येनज्ञातुंशक्यस्तत्वेनद्रष्टुंसाक्षात्कर्तुञ्चशक्यस्तत्वेनप्रवेष्टुं-सायुज्यवाप्तुञ्चशक्यः । सन्ध्यभावस्त्वार्षः । तुशब्दोऽत्रैवकारार्थकःसाधनान्तराणिव्यवच्छिनत्ति ।

नन्वनन्यभक्तेर्ज्ञानंप्रतिकारणत्वेन तत एव कृतकार्यत्वेनदर्शनप्रवेशनयोः कारणता न स्यादिति चेन्न 'अधिकंप्रविष्टं नतु तद्धानिः' इतिन्यायाद्भक्तेरेवतयोरपिकारणत्वाक्षतेः तथाहि भक्तेरनन्यत्वमत्रप्रयोजनान्तरनिरपेक्षत्वमेव । एवं च सद्गुरुमुखाद्वेदान्तशास्त्रश्रवणेनादौप्राप्यस्यभगवत्स्वरूपस्ययाथात्म्यानुभवो जायते । अयञ्चानन्यभक्तेःप्राथमिकम्फलम् । अनन्तरमेतज्ज्ञानविशिष्टोत्कटदिदृक्षयोपास्यस्वरूपसाक्षात्कारोजायते । एतत्साक्षात्कारजननीभक्तिरेवपरभक्तिपदेनाभिधीयतेसाम्प्रदायिकैस्ततश्चसाक्षात्कारानुभवविशिष्टपरभक्त्या भगवत्सायुज्यमवाप्यते । सायुज्यफलिकेयमेव च परभक्तिपदेनव्यपदिष्यते । एतद्भक्तिसहकृतामेववेदानुवचनादीनांभगवद्दर्शनप्रयोजकत्वं "तमेतंवेदानुवचनेन" इतिश्रुत्याऽवगम्यते । ये तु केवलज्ञानेन सायुज्यमाहुस्तेषामयमसङ्गतएवेतिध्येयम्" (गी० ११।५४) इति संक्षेपोविस्तरास्तुततएवानुसन्ध्येयः ।

ननु मोक्षसमये आत्मैवस्वसत्तयाकारणं भवतु, नतु तदतिरिक्तं किञ्चिदपिज्ञानकारणम्। अर्थात् ज्ञानसामान्यंप्रतिसमवायिकारणमात्मद्रव्मम्, असमवायिकारणमात्मनः संयोगः एतस्यज्ञान समवायिकारणेआत्मनिसमवेतत्वात् ज्ञानात्मककार्योत्पादकत्वाच्च, तथा निमित्तकारणमदृष्टादिकं यथायथमितिस्थितिः । तत्रज्ञानात्मककार्यंप्रतिआत्मैवकारणं भवतु नतु तदतिरिक्तंमनोमनःसंयोगो वा ततश्चात्मैवमोक्षसमयेज्ञानस्यकारणं भवतु नतु तदतिरिक्तंकिञ्चिदपेक्षितमित्याशङ्कांदर्शयितुमाह **न चात्मसत्तयैव तदानींमोक्षकाले** तज्ज्ञाननिमित्तं भवत्वितिप्रश्नः उत्तरयति **प्रक्लृप्तत्यागाप्रक्लृप्तकल्पनादोषप्रसङ्गादिति** । आत्ममात्रस्यैवज्ञानंप्रति यदि कारणत्वंस्वीक्रियेत तदा ज्ञानकारणतयासर्वानुमतस्येन्द्रियादेःकारणत्वम्, तस्येदानींपरित्यागः स्यात्, नैयायिकादिभिरपि

ज्ञात् । न शरीरेन्द्रियादिप्रतिबद्धतयासम्प्रतितदभाव इतिवाच्यम्, तदेव प्रतिबन्धकं भवति, सतिपुष्कलकारणेपिकार्यँविरुणद्धि । न चात्मनोज्ञानंप्रतिकारणत्वं सिद्धम् , करण कलेवरवतामेव ज्ञानोत्पाददर्शनात् । क्लृप्तज्ञानकारणस्यदेहादेरेवज्ञानप्रतिवन्धकत्व कथनमुन्मत्तवचनवदेवाभाति । अतो मोक्षकालेनास्तिज्ञानम् । तात्कालिकमोक्षकालिकज्ञानसुखादिवचनंतुआत्मज्ञानविधिशेषतयागुणवादेननेतव्या । अतो विषयवित्तिकाले एवात्मनियमाद् यथोक्तरीत्याऽर्थज्ञानेषुवेदितृतयाज्ञानग्राहकतयैवात्मसिद्धिरिति, विषयवित्तिकाल एवात्मनोभांनम् । । इति गुरुमतोपपादनप्रकरणम् ।

मनः प्रभृतिकेन्द्रियाणांतत्संयोगानां कारणत्वस्यस्वीकारात्’ स च नियमएतन्मतेपरित्यक्तो भवेत् । तथा क्लप्तस्यैवकेवलस्यात्मनः ज्ञानकरणत्वेन च कल्पनं प्रसज्येत । तस्मान्नायं पक्षः पण्डितानां मोदमावहतीति भावः । अस्मिन् कल्पेनैतावद्दूषणमपितु दोषान्तरमपि विद्यते तद्दर्शयितुमाह **आत्ममात्रनिमित्तकत्वे च सर्वदाऽत्मस्वरूपवत्तदपि विद्यते एवेति संसारानवतारप्रसङ्गादिति** । यदि ज्ञानमात्ममात्रनिमित्तकमस्तु न कारणान्तरप्रयोज्यंतदाऽत्मस्वरूपं यथा सर्वदा विद्यते, तथाऽत्ममात्रनिमित्तकमुक्तिकालिकज्ञानमपिस्थास्यत्येवेतिसर्वदामोक्ष एव नतु कदापि संसार इति संसारानवतारःसंसाराभाव आपतेत् , यतोज्ञानस्याज्ञानतन्मूलके संसरणप्रतिबन्धकत्वात् , ज्ञानाज्ञानयोर्विरोधात् , ज्ञाने सतिनाज्ञानं नवाऽज्ञानकार्यरूपं संसरणं वा भवेदिति । अथ यदि विशदतत्वसाक्षात्काररूपज्ञानसद्भावेपि यदि संसारस्यसद्भावमिच्छेत्कश्चित्तदापिदोषंदर्शयति **बन्धमोक्षयोरविशेषप्रसंगाद्** इति । मुक्तिकालिकत्वज्ञानस्यसाक्षात्कारिज्ञानस्यसंसारकालेपिसद्भावस्वीकारेसंसारापेक्षयामोक्षे किं वैलक्षण्यं स्यात् , अर्थात् किमपिंवैलक्षण्यं न स्यात् , उभयत्रापि तत्त्वज्ञानस्यात्ममात्रनिमित्तकस्यात्मरूपवत् , सत्वस्यविद्यमानत्वादिति भावः । ननु कथमुच्यते संसारमोक्षयोरविशेषोयावतासंसारकालेदुःखध्वंसोनविद्यतेऽपितुदुःखमेव विमोक्षकालेतु दुःखप्रध्वंसोविद्यते इतिदुःखतत्प्रध्वंसावेव विशेष इति चेत्तर्हितावन्माग्रमेव दुःखप्रध्वंस एव मोक्षकालेभवेदितिमोक्षकाले ज्ञानसुखादीनांसद्भावोनिरर्थक एवस्यात् ।

अथात्मनोमोक्षकालिकज्ञानेकारणीभूतस्य, नित्यत्वेपिंनसंसारकालेप्रसङ्गोयतःसंसारकालेशरीरेन्द्रियादेरेवनित्यज्ञानप्रतिबन्धकत्वादित्याशयेनाह **न शरीरेन्द्रियादिप्रतिबद्धतयासम्प्रतितदभाव** इति । संसारकालेदेहेन्द्रियादिकं वर्तते इति तदेवनित्यज्ञानस्यप्रादुर्भावेप्रतिबन्धकं भवति, यथा चन्द्रकान्तमण्यादिनाप्रतिबद्धोविनाशितशक्तिको वह्निः स्वरूपतो विद्यमानोपिनोत्पादयतिदाहकार्यं स्वसंयुक्तकाष्टे तथैव प्रकृते देहेन्द्रियादिनाप्रतिबद्धत्वात् मोक्षकालिकंनित्यमपिज्ञानं न प्रादुर्भवति । तस्मात् संसारमोक्षावस्थयोर्नाविशेषदोष इति प्रश्नयितुराशयः । तदेतदिन्द्रजालमिवाबोधविजृंभितमितितदुत्तरयति **तदेव प्रतिबन्धकमित्यादिं**, तस्यैव प्रतिबन्धकत्वमुच्यते यत् खलुकार्योदये

इदमपिपूर्वोक्तवचनमात्मतत्वानभिज्ञस्येति न तत्रवेदान्ततत्त्वाभिज्ञानामादरः । विषयवित्तिज्ञानं विषयवित्तिरेव । न तया वित्त्याऽत्मवित्त्याआत्मवित्तिःस्वरूपं वा सिद्धं भवितुमर्हति, अतद्विषयत्वात् । योहि यस्यज्ञानस्यविषयो न भवति न सपदार्थस्तेनज्ञानेन स्वसिद्धिमासादयति । यथा रूपज्ञानेन रसस्यसिद्धिर्नकुत्रापिसेद्धुमर्हति । एवमेव विषयविषयकज्ञानस्य न भवतो ज्ञानज्ञाताचेति नविषयवित्त्याज्ञानस्वरूपंज्ञाता च न कथमपिसिद्ध्यतः ।

पुष्कलकारणेसत्वेपिकार्योत्पत्तिंविरूणद्धि, यथादाहकारणसमवधानेपिमण्यादिसमवधानेदाहादिकार्यं न मण्यादीनांप्रतिबन्धकत्वंदाहकार्योत्पादविरोधित्वात्, प्रकृतेतु न देहादेःप्रतिबन्धकत्वम् अपितु देहादिविशिष्टात्मन एवज्ञानजनकत्वदर्शनेनविशेषणविधयातेषामपिदेहादीनामुत्पादकत्वस्यानुभविकत्वात् । आत्मनस्तुज्ञानंप्रतिपुष्कलकारणत्वमेव न सिद्धम्, केवलस्यानुत्पादकत्वात् करणकलेवरसहितस्यैवतथात्वमितिप्राप्ताप्राप्तविवेकन्यायेनकरणादेरेवहेतुत्वंनतुकेवलस्यात्मनः। प्रत्युतदेहादेरेवकारणत्वंलोकेदृष्टमिति, यत् कारणंतस्यैव प्रतिबन्धकत्वकल्पनंनतरांशोभामञ्चति । तस्मान्नमोक्षकालेज्ञानं भवतीति । तात्कालिकमोक्षकालिकज्ञानसुखादिवादात्स्वात्मज्ञानविधिशेषतयागुणवादेन नेतव्याः । अर्थात् मोक्षेदुःखंनास्ति किन्तु दुःखाभावो वर्तते इति दुःखाभावेसुखस्योपचारः । यथाभारापगमेसुखी अहंसंवृत्त इतिं, अभावस्याधिकारणरूपत्वात्, तथा च दुःखनिवृत्तिपरकाःसुखवादामुक्तौ । मोक्षेज्ञानं विद्यते इति वचनंतु तदानींज्ञानप्रागभावस्यनास्तिताभिप्रायकम्, एते च ज्ञानसुखादिवादा, आत्मज्ञानस्यप्रशंसामात्रपरकास्तद्विधिशेषभूता एवेति । सम्प्रति प्रभाकरमतं संक्षिपति "अतो विषयवित्तिसमयेएवात्मसिद्धिं नियमात्पूर्वोक्तरीत्याविषयज्ञानादावेवज्ञाततयैवात्मसिद्धिर्भवतीति ।

। इतिविषयवित्तिकालेएवात्मनोभानमितिगुरुमतोपपादनप्रकरणेतत्त्वदीपः ।

एवं यथोक्तप्रकारेण प्रभाकरमतस्यसमर्थनंश्रुत्वा प्रक्षिपतिप्रभाकरमतंसिद्धान्ती **इदमपि पूर्वोक्तवचनमित्यादि** । आत्मतत्वंयथावदजानांनामेवपूर्वोक्तवचनं शोभते, नतु सिद्धान्त परिपुष्टमतीनाम् । कुतः ? नहि अन्यज्ञानेनान्यस्यसाधनं भवतीति कुत्रचिदपि दृष्टम् । एतदभिप्रायेण सिंद्धान्ती ब्रूते **विषयवित्तिज्ञानं विपयवित्तिरेवेति** । विषयवित्तिर्विषयकज्ञानमेव "यस्यां संविदियोर्थोऽवभासते स एव तादृशज्ञानस्य विषयः" इति नियमेन विषयज्ञानेनविषयमात्रस्यसिद्धिः स्यात्, नतु विषयज्ञानेनआत्मवित्तिःस्वरूपंवासेत्स्यति । कुतः ? तयोर्द्वयोर्विषयज्ञानाविषयत्वात् । तत्रात्मवित्तिः- आत्मधर्मभूतं ज्ञानम्, स्वरूपम् आत्मस्वरूपमेव । तदिमौधर्मभूतज्ञानम्, आत्मा च विषयज्ञानेनसिद्धिंनार्हतः तयोर्विषयज्ञानेभासमानत्वाभावात्, योहि विषयोयत्रावभासते स एव तद्विषयो भवतीतिनियमात् । न च धर्मभूतंज्ञानमात्मा च विषयज्ञानेभासेते इति तौ विषयज्ञानस्य न विषयौ इति तयोः स्फुरणंविषयज्ञाने न संभवतः । योहि पदार्थोयस्यज्ञानस्य

ननुस्वसंवेद्यस्वभावोऽयम्, यदयं स्वविषयकसंविदासिद्धिं समासादयति । वित्तिज्ञानंतु वित्तिर्ज्ञानमेव वेदिता चात्मावेदितैवेतिकुतस्तयोर्ज्ञानज्ञात्रोर्वेद्यस्वभावेऽन्तर्भावः । पूर्वमेवोक्तंतयोर्मानसप्रत्यक्षाविषयत्वमनुमेयासंभवश्चाव्यभिचरितलिंगाभावात् । कुतस्तर्हितस्यासिद्धिः स्वत एव स्वयंप्रकाशासंवित् ।

विषयतया नप्रकाशते स पदार्थस्तेनज्ञानेन स्वसिद्धिंनासादयति । यथारूपादिविषयकज्ञानेनरसस्य तदन्यस्य वा पदार्थस्यसाधनं न भवति । कुत एवम् ? अतद्विषयत्वात्, नहि रूपज्ञानेरसोभासते । तथोक्तं—

"यदि स्वार्थंपरित्यज्यकाचिद् बुद्धिःप्रवर्तते । व्यभिचारवती स्वार्थे कथंविश्वासकारणम् ॥

"अयथार्थस्यबोधस्यनोत्पत्तावस्तिकारणम्," इत्यादिना, अतद्विषयकज्ञानस्यभ्रमत्वेनायथार्थवोधस्यानभ्युपगमात् । नहिभ्रमज्ञानेनवस्तुसिद्धिर्भवतीतिविशेषरूपेणान्यत एव ज्ञातव्यम् । तदेवं विषयवित्तेरविषयौज्ञानात्मानौविषयवित्त्या कथं सेद्धुमर्हतो नैव विषयवित्त्यातयोः साधनंसंमत इति ।

। इति प्रभाकरमतनिरासेतत्त्वदीपः ।

यद्यपि ज्ञानंज्ञाता वा नज्ञानस्यविषयः किन्तु अविषयोरपितयोवित्तिवेदित्रोज्ञानवलादेवसिद्धिर्भवति, इत्येवंप्रभाकरःपुनःशङ्कते **ननुस्वसंवेद्यस्वभावोयमित्यादि** वित्तिज्ञानंतुवित्तिरेवज्ञानमेव, नतु वित्तिविषयः, नवाघटादिविषयवज्जड़ात्मिका । तथा वेदिताआत्मावेदिताआत्मैवसर्वदाज्ञानस्याश्रय एव भवतीति तयोर्वित्तिवेदित्रोः स्वभावः । स्वभावस्तुसर्वभावानांविलक्षणोनसपर्यनुयोज्यः, एकस्ययादृशःस्वभावो न तादृशः स्वभावः कथंनान्यस्यवचनंसुवचनम्, कण्टकतैक्ष्ण्यादिवत् । एवं वेदिताऽत्मावेदितैव भवति, नतु कदाचिदपिवेद्योऽज्ञाता वा भवति, भावानांविलक्षणस्वभावत्वात्, अविषयोरपिज्ञानज्ञात्रोर्ज्ञानवलादेव सिद्धिर्भवत्येवेति ज्ञानविषयतयातयोर्वित्तिवेदित्रोरसिद्धिर्विषयवदिति कथनं सर्वदैवायुक्तमिति भावः ।

ननुज्ञानान्तरविषयत्वेनज्ञानात्मनोःप्रकाशसंभवे, तयोरविषयत्वेपिज्ञानवलादेवसिद्धिरिति न युक्तमित्याशङ्कायामाह **पूर्वमेवोक्तमित्यादि** । मानसप्रत्यक्षायोग्यत्वेन न तयोर्मानसप्रत्यक्षविषयतयासिद्धिर्नवाऽव्यभिचरितहेत्वाभावादेवनानुमानविषयत्वेनसिद्धिः किन्तु विषयज्ञानवलादेवतयोः सिद्धिः । तत्रैकस्यक्रियात्वेनतदपरस्यात्मनआश्रयतयैवसिद्धिरिति भावः । स्ववलादेवज्ञानस्यसिद्धिर्भवतीतिशङ्कासमाधानद्वारेणदर्शयति **कुतस्तर्हितस्यासिद्धिरिति,** केनप्रमाणेनवित्तेर्ज्ञानस्यसिद्धिरिति पूर्वपक्षः । उत्तरयति, **स्वत एवेति** । स्वस्यस्वतएवसिद्धौस्यादात्माश्रयदोष इति तदुद्धारपूर्वकं स्वत एव सिद्धिरित्यंशमुपपादयति **स्वयंप्रकाशासंविदिति** । एतदुक्तं भवति, घटोयमित्यादिविषयज्ञानकाले संविदः प्रथानभवेत्तदासापिसंविदर्थतोजडैव भवेत्, विषयस्तुसर्वदैवजड एवं केन कः प्रकाशेत, ततश्च "अन्धस्येवान्धलग्नस्यविनिंपातःपदेपदे" इति न्यायातिक्रमणं न स्यात् ।

मैवम् , सा संविदपिविषयवदेवान्यस्यैवप्रकाशमानतयाप्रकाशते इति न संवित्स्वतः सिद्ध्यति । यदि संविदःस्वतएवसिद्धिस्तदा सा कथमेकस्यैव प्रकाशते न सर्वान्प्रतिप्रकाशते । एकत्रैव संविदः समवायात् इति चेत्–यत्र समवेतासंवित्तस्यैवप्रकाशते नान्यस्य, अन्येनसमवायाभावात् , यद्येवंतर्हिंआत्मसम्बन्धनियतः संविदःप्रकाशः, आत्मभावाऽभावानुविधानात् । यद्युच्येत, प्रकाशस्वरूपाया एव

अतः प्रकाशमानैव संवित् विषयं प्रशयतीतिवक्तव्यम् । तत्र विषयस्तु स्वभावतोजडःविषयज्ञानमपि चेत्तथैव तदाजगदान्ध्यंस्यादित्यकामेनापिविषयप्रकाशनकाले तदीयंज्ञानमपिंप्रकाशते एवेति मन्तव्यमितिसंविदःप्रकाशमानत्वात् स्वयंप्रकाशा संवित् । ततश्च स्वयंप्रकाशरूपसंविदाश्रयतयाऽत्मनः सिद्धिर्भवतीति ।

। इतिगुरुमतस्योपपादनेतत्त्वदीपः ।

गुरूक्तं प्रभाकरकथितंसंविदोज्ञानस्यस्वप्रकाशत्वमाक्षिपति सिद्धान्तानुयायी **मैवमित्यादि** ग्रन्थेन तदेवोपपादयाति **सा** इत्यादिना । अन्यस्यप्रकाशमानतयैवविषयादेवप्रकाशते इति मन्यसे, अर्थात् यथा विषयोघटपदादिःस्वव्यतिरिक्तस्यज्ञानस्यप्रकाशेनैवप्रकाशते, तदा नविषयःस्वप्रकाशोऽपितुजड एव भवतीतित्वमपिमन्यसे तथैवयदिसंविदपिस्वान्यास्यप्रकाशमानतयैवप्रकाशते इति मन्यसे तदा संविदोपिप्रकाशकत्वं न स्यादपितुजडत्वमेवसंविदोप्यापद्यते । अर्थात् संविदाश्रयभूताऽत्माधीनप्रकाशत्वादेवतस्मै एव प्रकाशमानत्वं संविदोज्ञानस्यघटते इति संविदःस्वतःसिद्धत्वं भवदुक्तं न कथमपि सिद्धयतीतिसिद्धान्तवादिन आशयः । अस्य परिहारंप्रभाकरःपुनःशङ्कते, **संमवायादिति** । एतत् स्वयमेवोपपादयति **यत्र** इत्यादि या संवित् ज्ञानं यस्मिन् पुरुषेसमवायसम्बन्धेनविद्यतेतादृशपुरुषायैव सा संवित् प्रकाशते । कुतः ? तेनैवसहतस्याःसमवायात् पुरुषान्तरेणतस्याःसमवायोऽर्थात् सम्बन्धो न विद्यते, तेन सर्वान् प्रति न प्रकाशते कञ्चिदेवप्रतिप्रकाशते इति सर्वान् प्रतिसंविदः प्रकाशःस्यादितिपरकीयशंकायाःसमाधानंजातमेव भवतीति । अर्थात् स्वभावादेवस्वयंप्रकाशायसंविदात्मनोऽपृथक्तयाऽत्मनः एव प्रकाशते नान्यस्मैप्रकाशते इति । पुनराक्षिपतिप्रतिक्षेप्ता **यद्येवमित्यादि** एवं तर्हिंसंविदःप्रकाशो न स्वतः सिद्धः किन्तु आत्मःसम्बन्धप्रयोज्य एव, यत आत्मनःसम्बन्धेसतिसंविदःप्रकाशो भवति, आत्मनःसम्बन्धाभावे सतितस्याःप्रकाशो न जायते, यथा यस्य कृते, एवं दण्डादिसम्बन्धेघटादिकार्योत्पादस्तदभावे च न घटादिकार्योत्पत्तिरिति, अन्वयव्यतिरेकाभ्यांघटादिकंप्रतिदण्डादेःप्रयोजकत्वमायाति, तथैवात्मसम्बन्धेसत्येवसंविदःप्रकाशस्तदभावे, न तथेत्यन्वयव्यतिरेकाभ्यामात्मसम्बन्धप्रयोज्य एव संविदः प्रकाशो नतु स्वतःसिद्धः । अर्थात् आत्मनःसम्बन्धान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकत्वात्संवित्स्वप्रकाशस्यात्मनःसम्बन्धकारण… मेवसिद्धयतीत्यर्थोनिर्गलितः । पुनरत्रप्रभाकरः शंकते, **अद्युच्येतप्रकाशस्वरूपाया**

तस्याः प्रतियोगिविशेषावच्छेदायैवात्मापेक्षा नतु स्वरूपसिद्ध्यर्थमितिचेत्, कथमयंनिश्चयोऽकारि ? यदि प्रतियोगिनिरपेक्षतयैवकदाचिदात्मस्वरूपवत् संवित्प्रकाशेत, तदैवं निश्चीयेतापि न च तथा विद्यते, आश्रयप्रतियोगिसापेक्षैवसंयोगपुत्रत्वादिवत् संविदः स्वरूपसत्तेति नपार्थक्येन तत् सिद्धेरवकाशः ।

एव तस्याः इत्यादि संवित् प्रकाशस्वभावा एव, एवं भूताया अपि तस्या, आत्मसम्वन्धापेक्षा, सा नस्वप्रकाशार्थम्, किन्तु "प्रतियोगिविशेषावच्छेदायैव तदपेक्षाः अर्थात् प्रतियोगीविषयोघटादि पदार्थः स एव विशेषः=विशेषणम् तदवच्छेदायैव-तत्सम्बन्धार्थमेवार्थात् विषयप्रकाशकत्वप्रयोजनार्थमेव, अर्थात् विषयप्रकाशार्थमेवात्मसम्बन्धमपेक्षते संवित् नतु स्वप्रकाशार्थमात्मसम्बन्धमपेक्षते सा संवित्, स्वप्रकाशत्वं तु तस्याःस्वभाव एव, परन्तु विषयप्रकाशायैवात्सम्बन्धमपेक्षते इति प्रश्नाशयः । प्रभाकरोपस्थापितामुपपर्त्तिपरिहर्त्तुमाह **कथमयम्** इति । एवं पूर्वोक्तोनिश्चयः कुतः कस्मात् प्रमाणात् निश्चितो भवति प्रामाणाभावादेवंपूर्वोक्तप्रकारकः अर्थात् विषयप्रकाशायात्मसम्बन्धमपेक्षते संवित् नतु स्वप्रकाशायेत्याकारक इतिं तत्र पूर्वोक्तनिश्चयस्यासंभवमेवोपपादयति **यदि प्रतियोगिनि**रपेक्षैवकदाचिदात्मस्वरूपमिव संवित् प्रकाशमानाभवेत्, तत एवम् भवदुक्तम् निश्चयं स्वीकुर्मः । तत्र प्रतियोगिनोऽपेक्षामन्तरेणविषयापेक्षांविनानैवेतियावत् । **एवम्** विषय प्रकाशार्थमेवात्मसम्वन्धमपेक्षते संवित् नतु स्वप्रकाशंप्रत्यात्मसम्वन्धमपेक्षते, इत्याकारकंनिश्चयमिति । तथा यथोक्तनिश्चयमङ्गीकुर्म इत्यर्थः । **न च तथा** इति नान्यदा किन्तु विषयप्रकाशकाले एव स्वाश्रयायैवप्रकाशमानायाः संविदोज्ञानस्यस्वप्रकाशेविषयात्मसम्वन्धाधीनत्वमभ्युपगन्तव्यमिति भावः । एतदुक्तं भवति यथा वर्तमानकालेज्ञानज्ञेययोर्विषयिभावलक्षणः सम्बन्धोऽनुभवबलात् स्वीकृतो भवति, तथाऽतीतानागतज्ञानेष्वपिविषयेण सम्वन्धोज्ञानस्यविषयविषयिभावलक्षणःसम्वन्धान्तरापेक्षयाविलणःस्वरूपसम्वन्धविशेषोभवत्येवेति । यद्यपिं विषयेविषयताज्ञाने च विषयितेतितयोर्द्विष्ठत्वाभावेन, न तयोः पार्थक्येनसम्बन्धत्वम्, किन्तु विषयतानिरूपितविषयित्वंसम्वन्धःविषयितानिरूपितविषयत्वं वा सम्बन्धः । अथवा द्विष्ठसंयोगादिसम्बन्धापेक्षयाऽयंसम्बन्धोविलक्षण एव । आधेयतानिरूपिताधिकरणतादिवदेव, तत्रापि केवलाधेयतायाआधेयमात्रेस्वरूपसम्बन्धेनवृत्तित्वादित्यादिकमधिकमन्यत्रैवद्रष्टव्यम् । ननु येयं संवित् सातु विषयाश्रयशून्यैव नतुसविषयासाश्रया च । अन्तःकरणं तथा तदीयवृत्त्युपधानोपाधिकंकेवलं तस्याः संविदःसाश्रयत्वसविषयत्वादिप्रतीतिमात्रमेव, अर्थात् स्वरूपतःसंवित्नाश्रयविषयतावती किन्तु तादृशत्वंतस्याउपाधिमात्रप्रयोज्यमितिसासाश्रया स विषया च प्रतीयते, प्रतीतिमात्रं तत् नतु स्वाभाविकमित्याशयेनाह **आश्रयप्रतियोगिसापेक्षैवेत्यादि** "घटवद् भूतलम्, भूतलेघटः" इत्यादौभूतलाधिकरणकघटप्रतियोगिकसंयोगात्मकसम्बन्धस्यभानं भवति, संयोगस्यद्विष्ठत्वेनसम्वन्धत्वात्, तस्यसंयोगस्यप्रतियोगिविशेषणंघटः अधिकरण-

सत्या एव संविदः प्रकाशाव्यभिचारात् स्वरूपप्रयुक्त एव प्रकाश इति चेत् ? सत्या एव संविदः किमात्मसम्बन्धव्यभिचारोऽस्ति ? अपि चैवं सुखादयआन्तराअपि भवन्मतेस्वतःसिद्धाभवेयुः न हि ते सुखादयो न प्रकाशन्ते इति ।

मनुयोगिभूतलम्, यो यत्र येन सम्बन्धेन वर्तते स तस्य सम्बन्धस्यप्रतियोगीति, तथा यस्मिन् वर्तते तस्यसंयोगस्यानुयोगि आधारो भवति, इति नियमः तदिह भूतले विद्यमानस्यघटसंयोगस्य तत् प्रतियोगिविधयाघटस्य चाधिकरणंभूतलमेव, संयोगस्यप्रतियोगिविशेणं वा घटः । यथाघटस्याभाव इति प्रतीतो, अभावस्यप्रतियोगिघटादिर्भवतिं, अनुयोगीतुतदभाव इति तत्र प्रतियोग्यनुयोगिभावः । तथा सम्बन्धस्यापिं प्रतियोग्नुयोगिनौ भवतः । देवदत्तस्य पुत्र इत्यादौपुत्रत्वस्यस्वरूपसम्बन्धेनाश्रयः पुत्रस्तस्य पितातुप्रतियोगीभवति, यतः पितृनिरूपितपुत्रत्वस्यपुत्राश्रितत्वात् । "घटोयमित्यत्रतु भासमानघटविषयकज्ञानस्यप्रतियोगीघटादिविषयः, आत्मातु तादृशज्ञानस्याश्रयोऽधिकरणम्, आत्मन्येवज्ञानस्यसमवेतत्वात् । सिद्धिःस्थितिःप्रकाशश्चेति । तथा च निर्विषयत्वेनाश्रयशून्यतयास्थितिः प्रकाशोवा संविदोनैव भवतीति । केवलज्ञानस्यानुभवस्तु न कुत्रापि भवतीति, दृष्ट इत्यनुपलंभबाधित एवेति । ततश्च संवित् प्रकाशे, आश्रयतयाऽत्मसम्बन्धस्यापेक्षादुर्वारै वेति भावः ।

ननु विद्यमानानामेव संविदः संवित् सत्ताव्यापकप्रकाशत्वेनस्वप्रकाशत्वंसंविदोभविष्यतीतिपुनःशंकते प्रभाकरः । **सत्या एव संविदः प्रकाशाव्यभिचारात् स्वरूपप्रयुक्त एव प्रकाशः** यावत् पर्यन्तं ज्ञानमवतिष्ठते तावत् पर्यन्तं प्रकाशस्य व्यभिचारोन भवति, तस्मात् ज्ञानस्यस्वरूपप्रयुक्त एव प्रकाश इति प्रश्नाशयः । इमांशङ्कां परिहरति **सत्याः** इत्यादि-अर्थात् विद्यमानाया एव संविदआत्मसम्बन्धस्यव्यविचारोऽस्ति ? अर्थात् नास्ति इति, ततश्च विज्ञानस्य वर्तमानतासमयेयदाऽत्मसम्बन्धो विद्यते तदाऽत्मसम्बन्धस्यनियतपूर्ववृत्तित्वस्यसत्वेनतस्याआत्मसम्बन्ध कारणकत्वंकोनामविहन्तुंशक्नुयादित्यात्मसम्बन्धस्यप्रयोजकत्वमस्त्येवेति । अयमाशयः तदाचात्म सम्बन्धस्यज्ञानात्मककार्यनियतपूर्ववृत्तित्वस्य विद्यमातत्वात् तथा समवायिकारणतयाऽवश्यापेक्षणीयत्वात् समवायिकारणाभावे न कार्यें स्वसत्तां कथमप्यासादयितुं शक्यमिति । किञ्चानन्तरोदिरितनिरुक्तहेतुनासंविदःस्वप्रकाशत्वसाधनेवर्तमानतासमयेसुखादेरपिभासमानतया तेषां सुखादीनामपि स्वप्रकाशत्वमापतेत्, अविदित सुखादेः सत्वे प्रमाणाभावादित्याशयेनदोषान्तरमपिदर्शयति **अपि चैवम्** सुखदुःखादयोपिस्वतःसिद्धाभवेयुरिति । अर्थात् स्वसत्ताकालेसुखादीनामपिंभासमानत्वेन तत्र सुखादिषुहेतोःसत्वात् साध्यस्य च स्वतः सिद्धत्वस्याभावेनव्यभिचारःस्फुट एव भवतीति । तथा च धूमसाध्यकप्रमेयत्वहेतुस्थलवदस्यापि हेतोर्व्यभिचरिततया न यथोक्तसाध्यकत्वमिति संक्षेपः ।

स्यादेतत् लौकिकविषयतासम्बन्धेन ज्ञानंप्रतितादात्म्यसम्बन्धेनविषयस्यकारणत्वमितिनियमो यथा घटोयमित्याकारकंजायमानंघटादिज्ञानंप्रतिसमवायसम्बन्धेनात्मनस्तत्र कारणतत्वम्, तदेवज्ञानं-

ननु घटादिरूपार्थान्तरस्यसाधकंज्ञानमेवेतिसर्ववादिसिद्धम् । ततश्च स्वतःप्रकाशरूपज्ञानेनैव बाह्याभ्यन्तरसकलपदार्थसिद्धेरुपपादनसंभवेनानेकस्वप्रकाशभावान्तरकल्पनमयुक्तमेवेति चेत् सत्यम्, सर्वार्थस्य तद्विषयकज्ञानस्य च साक्षाद् द्रष्टाऽत्मैवेति सर्वमतम्, ततश्चात्मन एव स्वतः सिद्धत्वमस्तु किमनेकस्वतःसिद्धकल्पनाव्यसनेन

यदाविषयतासम्बन्धेनोत्पद्यते, अर्थात् विषयतासम्बन्धेनज्ञानंविषयैःसमुत्पद्यते, तत्र घटादि विषयेतादात्म्यसम्बन्धेन घटादिर्विषयो वर्तते, ततश्चकार्यम्, विषयतयाविषये, तत्र तादात्म्य सम्बन्धेनविषयोपितिष्ठतीतिकार्यस्यकारणस्य च सामानाधिकरण्यंनिर्वहति, अन्यथाकार्यकारणयोर्वैयधिकरण्ये तयोः कार्यकारणभाव एव न स्यात् । सोयं विषयनिष्ठप्रत्यासत्याकार्यकारणभावव्यवस्था, अपरस्तु कार्यकारणभावःसमवायसम्बन्धेन भवन्नात्मनिष्ठप्रत्यासत्येतिगीयते, अत्र समवायसम्बन्धेन कार्योत्पत्तौसमवायादिनैव कारणता, यथाऽनुमितिः समवायेनात्मन्युत्पद्यते तत्रैवात्मनिसमवायेनमनःसंयोगोधर्माधर्मादिकमपि वर्तते इति ज्ञानात्मककार्यंप्रति आत्ममनःसंयोगादिकारणमपिविद्यते कार्यं ज्ञानमपितत्रैवात्मनिसमवायेन भवति । समवायिकारणंतुद्रव्यमेवेति "समवायिकारणत्वंद्रव्यस्यैवेति विज्ञेयम्" इति सर्वत्र द्रव्यस्यैव समवायिकारणत्वम्, ततश्च ज्ञानादिकार्यमात्मनि, तदात्मनि, आत्मातादात्म्येन वर्तते इति कार्यकारणयोःसमानाधिकरण्यंनिर्वहति, इति । इत्थञ्च विषयता सम्बन्धेनज्ञानकार्यंप्रतितादात्म्यसम्बन्धेनविषयस्यकारणतेति एवं संवित्प्रकाशेलोकसिद्धकार्यकाणभावानुरोधेन विषयस्यकारणत्वं भवतीति सर्वानुमतम्, तथैवंभवाद्दशानामनुरोधेनात्मसम्बन्धस्यापिकारणत्वं स्वीक्रियताम्, तावतानक्षतिः । परन्तु एतावन्मात्रेणसंविदोज्ञानस्यस्वयंप्रकाशत्वे न कापिहानिर्भवति, यतोज्ञानस्यसजातीयज्ञानान्तरानपेक्षत्वात् तत् सिद्धेरस्वप्रकाशत्वसिद्धेःसंभवात् । सजातीय ज्ञानान्तराधीनप्रकाशत्वे एव स्वप्रकाशत्वं न स्यात्, विषयवत्, यथा विषयःसजातीयज्ञानसापेक्षो भवन् न स्वप्रकाशोपितु जड एव । तथैव संविदपिसजातीयज्ञानान्तरापेक्षसिद्धिकाभवेत्तदातस्याः स्वप्रकाशत्वंहीयेतापि, नत्वेवमपितुसजातीयज्ञानान्तरानपेक्षसिद्धिकत्वात् नापयाति ततःस्वप्रकाशत्वमिति ।

आत्मातु न स्वप्रकाशो यथा विषयो नस्वप्रकाशः, किन्तु बाह्यपदार्थप्रकाशकस्यसर्वतन्त्रप्रसिद्धस्यज्ञानस्यैवसर्वप्रकाशकस्यात्मप्रकाशकत्वमपिस्वीकर्तव्यम्, लाघवात् यदैकस्यैवज्ञानस्यप्रकाशकत्वं तदासर्वान्तर्गतात्मनोपितेनैवप्रकाशसंभवे बहुनां प्रकाशकत्वंगौरवंममानभिमतमपीत्याशयेनपुनर्गुरुमतानुयायीशङ्कते **ननु घटादिरूपार्थान्तरस्यसाधकं ज्ञानमेवेत्यादि** सर्वोहिवादी, पदार्थमात्रस्यबाह्याभ्यन्तरस्यसाधकंज्ञानमेवेच्छति, तदनुसारेणास्माभिरपिज्ञानस्यैवस्वप्रकाशत्वमाश्रितम् । इत्थं भूतेन स्वप्रकाशात्मकज्ञानेनैव सर्वपदार्थस्यसिद्धिसंभवात्, तदतिरिक्तात्माद्यनेकपदार्थस्य स्वयं प्रकाशकस्याभ्युपगमोनिरर्थक एवाभातीतिप्रश्नस्यमुकुलितोऽर्थः सम्पद्यते, प्रश्नग्रन्थस्यविवरणमवतरण ग्रन्थेनैवगतार्थं भवतीति नपुनस्तद्विस्तृतम् । तमिममाक्षेपं परिहरति सिद्धान्ती **सत्यमित्यादि-**

किञ्चयोयस्यसाक्षीतिं न लोकसिद्धम्, विषयविषयकज्ञानस्याप्यात्मैवसाक्षीभवतीति । अथवा भवतु विषयविषयकज्ञानं स्वप्रकाशरूपम्, तथापि न तैरर्थविषयकज्ञानैरात्माप्रत्यक्षीभवति साक्षित्वात् । यस्य साक्षीपुरुपोयम् तेन नासौ प्रत्यक्षोघटसाक्षात्कारीवघटादिविषयेन । अर्थसंविदाञ्च साक्षात्कारीचेतनःपुरुपो नतु सताभिः प्रत्यक्षीभवति ।

। इति गुरुमतखण्डनप्रकरणम् ।

सर्वोंपि पदार्थः सजातीयस्वसाध्यनिरेपेक्ष एव भवति स्वसिद्धये । तेनायमा-ग्रन्थमुखेन । सत्यंज्ञानमेवसर्वस्यप्रकाशकम्, परन्तु विपयतद्विपयिणोज्ञानस्य सर्वपदार्थसाक्षी भवति, आत्मैवेतितावन्मात्रस्यस्वप्रकाशकत्वं भवतु, किन्तु तदतिरिक्तानेकस्वयं प्रकाशकल्पनायां गौरवंभवतीति, सर्वार्थानांसर्वज्ञानानां च साक्षात्कर्तुरेकस्यैवात्मनःस्वयंप्रकाशत्वंकल्पनीयंतथात्वे एव लाघवात् । नत्वनेकज्ञानानां स्वप्रकाशत्वं तथा सतिगौरवात्, विषयाणामिव तदीयज्ञानानामात्मनो प्रकाशमानत्वादेक आत्मैव स्वप्रकाशोभवतुनाम । तदन्ये सर्वेभावा ज्ञानज्ञेयरूपाः सर्वेंपदार्थाआत्माधीन प्रकाशा एव भवन्तु । तथा सतिं महल्लाघवं भवति, तथा, अत्रायं पुरुषः स्वयं ज्योति भवतीत्यादिश्रुतयोप्यनुगृहीताःस्युरितिदिक् । एवं संविदोज्ञानस्यापि “तमेव भान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभाती” त्यादिश्रुतिप्रसिद्धसर्वावभासकाधीनप्रकाशत्वमेव नतु मुख्यं स्वप्रकाशत्वं ज्ञानस्येति कथितं भवति । अथवा स्वसजातीयज्ञानान्तरानपेक्षप्रकाशत्वेन यथाकथंचिद् ज्ञानस्यभवतुनामस्वप्रकाशत्वंज्ञानस्येति, तथापि सर्वप्रकाशकआत्माकथमिवज्ञानधीन प्रकाशइत्यावेदयितुमाह **किञ्चयोयस्य साक्षीत्यादि** यस्य यः साक्षीद्रष्टा भवति, तस्य साक्षिणस्तेन साक्ष्येन प्रकाशःसिद्धिर्भवेदिति न लोकप्रद्धिम्, यथा यस्य घटादेरात्मा भवति तेन साक्ष्यभूतेन घटादिनासाक्षिणआत्मनःसिद्धिर्भवतीतिं न लोकप्रसिद्धम्, अपितु तद्विपरीत एव नियमः साक्षिणैव साक्ष्यस्यावभासनादिति ।

अर्थात् यद्यपि यथा कथंचिद् भवतु नाम, यटादिविषयकज्ञानानां स्वप्रकाशः तथापि तैर्विषयविषयकज्ञानैर्नात्माप्रत्यक्षीकृतो भवति, यत आत्मनःसर्वसाक्षित्वात्, यस्य साक्षीभवत्यात्मा-तेनैवसाक्ष्येन घटादिनाप्रकाशितो भवति । नहि भवति घटप्रकाशकस्यदेवदत्तस्यसाक्ष्येनघटेनप्रकाशो भवतीति कुत्रापि दृष्टं श्रुतंवा, न वा तदुपपद्यते अनुभवविरोधात् । तथा “येन सर्वं जानाति तं केन विजानीयादि”त्यादिश्रुतिविरोधोपि, एतस्मिन् मते आपततीति । तस्मात् कथितरीत्या, ज्ञानेनात्मप्रकाशासंभवेनताद्दशात्मनः स्वयं प्रकाशत्वमन्वेष्टव्यमेवेतिसंक्षेपः ।

। इतिसिद्धान्तिनाकृतगुरुमतखण्डने तत्त्वदीपः ।

गतप्रकरणेनात्मनोज्ञानाधीनप्रकाशकत्वेयथामतिसिद्धान्तिनावाधकदोषःप्रर्शितः, तदनुआत्मनः स्वतःप्रकाशत्वेसाधकंयुक्तियुक्तंदर्शयितुमुपक्रमते **सर्वोंपिपदार्थः सजातीय** इत्यादि । सजातीय-

त्माऽपिस्वेतरानपेक्षस्वसिद्धिक एव, नतु स्वप्रकाशोऽन्याधीनप्रकाशः । नहि कोपि पदार्थःस्वप्रकाशायासाधारणसजातीयपदार्थान्तरमपेक्षमाणोभवतीति दृष्टम् । यथा घटपटादिर्विषयःस्वसिद्ध्यर्थंस्वसजातीयंघटपटादिकंनापेक्षते, किन्तु स्वविजातीयंप्रदीपादि प्रकाशमेवापेक्षते, तादृशालोकेनैवतत्सिद्धिर्जायते ।

एवमालोकोपिनालोकान्तरमपेक्षते, नवा स्वप्रकाश्यमपेक्षतेऽपितु स्वविजातीयं चक्षुरादिकमेवकरणमपेक्षते । तथा चक्षुरादिकमपि न सजातीयमिन्द्रियान्तरं स्वापेक्षप्रकाशमालोकं स्वविषयंघटादिकं वा किन्तु स्वविजातीयंज्ञानमेवापेक्षते । एवं ज्ञानमपिज्ञानान्तरमिन्द्रियादिकं वा नापेक्षतेस्वसिद्धये, परन्तु स्वविजातीयं स्वाधिकरणमात्मानमेवस्वतन्त्रमपेक्षते । एवमात्मापिस्वसजातीयमात्मान्तरं वा ज्ञानमिन्द्रियादिकं वा स्वकीयापरोक्षतायैनापेक्षते इत्यनन्यापेक्षैवात्मस्वरूपस्यसिद्धिर्भवतीति । तदेवं सिद्धान्तरीत्याऽत्मनः स्वप्रकाशत्वसमर्थनम् ।

मत्र स्वासाधारणधर्मरूपेण, यथा घटस्यसजातीयम्=घटगतासाधारणरूपम्, घटत्वमेव, ततश्च घटस्यसजातीयंघटत्वरूपेणघटान्तरमेव नतु घटादिकप्रदीपेन्द्रियादिकं वा, व्यापकरूपेणसाजात्य विवक्षणेतु, प्रमेयत्वरूपेण घटस्य सजातीयंघटान्तरं यथा भवति, तथैव सर्वोपिभावोऽभावो वा समवेतोऽसमवेतो वा भवेत्, पदार्थमात्रस्यप्रमेयत्वात् तथा च यस्य सजातीयमपेक्षितं तद्गतासाधारणरूपेणैव तथात्वमेष्टव्यम् । एवञ्च घटस्य सजातीयं घटान्तरमेव, आलोकस्य सजातियमालोकान्तरमेव, नतु सर्वस्यसर्वमिति । तथा च सर्वे ये प्रकाशमानाघटपटादिकाभावास्ते स्वसजातीयम्=स्वस्यात्यन्तसजातीयंस्वगतासाधारणानुगतधर्मविशिष्टम्, तथा स्वसाध्यम् स्वाधीन प्रकाशं च भावमनपेक्ष्यैव भवन्तीति, आत्मापि प्रकाशमानआत्मत्वेनसजातीयमात्मान्तरंस्वापेक्ष प्रकाशंज्ञानादिकंचानपेक्ष्यैवप्रकाशते इत्येवमनुमेयम् । एवं प्रकारेणात्मनोज्ञानाधारस्यस्वप्रकाशत्वं फलतीति । **नहि कोपि पदार्थः** इत्यादि, यथाघटादिःस्वसिद्धयेऽर्थात् स्वस्यप्रकाशायस्वात्यन्त सजातीयंघटान्तरंनापेक्षते, घटवत् घटान्तरस्यापिजडत्वविशेषेणप्रकाशरूपत्वाभावात् । किन्तु घटोऽपेक्षते स्वविजातीयंप्रकाशस्वभावकचन्द्रसूर्यप्रदीपादिष्वन्यतममेवापेक्षते । एवमेव प्रकाशमानोप्यालोकःस्वप्रकाशायस्वसमानजातीयमालोकान्तरंनापेक्षते नवाऽलोकापेक्षप्रकाशंजडघटादिकमेववाऽपेक्षते, किन्तु स्वप्रकाशायस्वविजातीयमिन्द्रियं रूपवतां प्रत्यक्षे चक्षुरादिकंस्पर्शवतां च स्पार्शनेत्वगिन्द्रियमेव । एवं चक्षुरादीन्द्रियंस्वसिद्धयेनेन्द्रियान्तरमपेक्षते, नवा स्वापेक्षप्रकाशमालोकादिकं नवा स्वसाध्यंविषयंघटादिकम् । किन्तु तानीन्द्रियाणिस्वसिद्धयेस्वकीयंसंवेदनं ज्ञानापरपर्यायमपेक्षते । एवं संवेदनंज्ञानमपिस्वसिद्धयेनापेक्षते सजातीयंसंविदन्तरंस्वाधीनसिद्धकं वा, किन्तु स्वविजातीयंस्वाधारभूतं स्वतन्त्रमात्मानमेवापेक्षते । एवमात्मास्वसजातीयमात्मत्वाक्रान्तमात्मान्तरंस्वाधीन

तदेवं चैतन्यमात्रस्वभावस्यात्मनोधर्मिणश्चैतन्यं स्वाभाविकमेव । तदेव ज्ञानमंनेकविषयसम्पर्कात् घटादिविषयभेदेन तत्तद्विषयकमिति व्यपदिश्यते । यथा सिद्धिकमिन्द्रियंविषयं वा नापेक्षते इति स्वव्यतिरिक्तानपेक्षैवात्मस्वरूपसिद्धिरिति । एवं चात्मनः पूर्वोक्तयुक्त्यास्वप्रकाशत्वंसिद्ध्यति, नतु ज्ञानस्य तथात्वम् । विषयस्यस्वप्रकाशत्वंतुदूरायेतमेव, तस्य स्वप्रकाशत्वंसर्वमतविरुद्धमेवेति । अत्रायमाशयः । इयानत्रविशेषः यत् स्वविषयकानुव्यवसायादि लक्षणज्ञानान्तरानपेक्षप्रकाशत्वरूपं स्वप्रकाशत्वंज्ञानस्यात्मनश्चसमानमेव; किन्तु स्वेतरसकलनिरपेक्ष प्रकाशत्वंतु सर्वावभासकात्मस्वरूपस्यैवेति दिक् ।

। इति सिद्धान्तिनात्मनःस्वप्रकाशत्वसमर्थनप्रकरणे तत्त्वदीपः ।

एवं पूर्वोक्तप्रकारेणात्मनोज्ञानवेद्यत्वमर्थाद् वित्तिविषयत्वंनिरस्यतादृशात्मनः स्वयंप्रकाशत्वमेवेति युक्त्योपपादितम् । एवञ्च यथोक्तस्वरूपस्यात्मनः साक्षादेवघटादिविषयप्रकाशकत्वं भवति, किन्तु आत्मनोज्ञातुधर्मिणः स्वस्यधर्मभूतंविशेषणीभूतंयज्ज्ञानंतद्द्वारीकृत्यैवबाह्याभ्यन्तरविषयान् प्रकाशयति, यथाऽद्वैतमतेसर्वावभासकोप्यात्मा, इन्द्रियादिजनितत्तद्विषयाकारान्तःकरणजनितवृत्तिद्वारीकृत्यैवघटादिकमवभासयति स्वतोऽव्यापकत्वात् सर्वार्थसम्बद्धोपि । अतएवेन्द्रियसंयोगादिकालेविद्यमानोपिनार्थान् बाह्यानवभासयति, तथैव प्रकृतेपि स्वयंप्रकाशोप्यात्मा साक्षाद् विषयान् नावभासयति किन्तु स्वधर्मभूतज्ञानंद्वारीकृत्यैवपरंपरयातान् विषयानवमोक्षयन् प्रकाशक इति कथ्यते । तच्चद्वारभूतं चैतन्यमात्मनःस्वाभाविकं शाश्वतमेव । नतु न्यायमतवत्तदागन्तुकमनित्यमिति यावत् । यथा न्यायमते आत्मनिअविद्यमानमपिज्ञानम्, अदृष्टादिनिमित्तकारणसहकारेणात्मनः संयोगात्मकासमवायिकारणवलेनजायमानंजन्यत्वादनित्यमिति कथ्येते, तथा न मम श्रुतिप्रवणस्यमते, किन्तु तज्ज्ञानं धर्मभूतं नित्यमेवकेवलंविषयसंनिधानाज्जायमानमिव भवतीति समर्थयितुमुपक्रमते **तदेवं चैतन्यमात्रस्वभावस्य** इत्यादि । चैतन्यमात्रस्वभावस्य=स्वयंप्रकाशस्वरूपस्यात्मनोधर्मिणः । चैतन्यम्=चितिर्धभूतंज्ञानंस्वाभाविकमेव नतु परोपाधिकम् - येनधर्मभूतंज्ञानमनित्यंस्यादितिमतान्तरवत् । अथा त्मभावानुवन्धित्वेनात्मवत् तदपि नित्यमेवेति यावदात्मभावित्वे, अर्थात् यावत्कालमात्मातिष्ठति । तावकालपर्यन्तावस्थायित्वे, उत्पादविनाशराहित्येधर्मभूतज्ञानस्यघटादिविषयसंपर्कात् घटज्ञानं मे उत्पन्नं च विनष्टमित्यादिउत्पादविनाशालंबनोव्यवहारः कथंभवेद्ज्ञानस्येत्याह **तदेवज्ञानम्** इत्यादि अत्रज्ञानस्यार्थेनघटादिनासम्बन्धस्तत्तदिन्द्रियपदद्वारेणजायते पूर्वं चक्षुपा घटं पश्यति, तत्रार्थस्य चक्षुपा संयोगस्ततश्चतदर्थजनितंज्ञानंतमेवविषयीकरोतीति तज्ज्ञानं तदीयम् । तथा च चक्षुरादीन्द्रियद्वारातत्तदर्थसम्बद्धंज्ञानमेवघटादिज्ञानमितिपटादिकज्ञानमेव तदीयं ज्ञानमिति । तत्र च तत्तदर्थप्रतियोगिकसंयोगादिसंसर्गस्येन्द्रियेण चक्षुरादिना, विषयेण च घटादिनातस्मिन्काले समुत्पन्नमित्यनित्यम्,

सौरश्चान्द्रो वा प्रकाशोघटपटादिविषयसंसर्गभेदात् घटपटादिप्रकाश इति व्यपदिश्यते । तथैवात्मनःप्रकारभूतंज्ञानं तत्तत् पदार्थसम्बन्धात् घटज्ञानंपटादिज्ञानंवेतिभेदेनव्यपदिश्यमानं भवतीति । तेन चैतन्यस्यज्ञानस्यदशाविशेषज्ञातुरात्मनोधर्मविशेषत्वादेवात्मनोऽपरोक्षाभवन्ति । यथा न्यायमतेज्ञानस्यविषयभेदावच्छेदादयः ।

। इत्यात्मधर्मज्ञानस्यनित्यत्वोपक्षेपः ।

अथात्मनोयच्चैतन्यंतदागन्तुकंकारणजनितमितिन्यायमार्गविदांमतम् । तन्मतानुयायिनोनवीनमीमांसकाः इत्थंसंगिरन्ति, विषयेन्द्रियसंन्निकर्षान्वयव्यतिरेकदर्शनात् स्वकारणवलात् संजातघटादिवदेवानित्यमेव । तथा च तादृशसंसर्गस्यसंयोगसंयुक्तसमवाय, तत्समवेत समवायादिविशिष्टस्यतत्तद् ज्ञानेपि, उत्पादविनाशव्यवहारोभवतीति । तथाचोत्पादविनाशौ न ज्ञानगतौ येन ज्ञानस्याप्युत्पत्तिर्विनाशोवा कल्पितः स्वाभाविकः किन्तु तादृशसंसर्गतस्योत्पादादेरेवभानम् । यथा खलु स्वरूपतआकाशोनित्योव्यापकश्च परन्तु व्याप्यघटादेरुत्पत्तौतादृशघटसम्वद्ध आकाशोघटाकाशसंज्ञामासाद्य घटाकाशोजात इति व्यवहारः, तादृशघटस्यतदुपलक्षितआकाशोविनष्ट इति चापि व्यवहारो जायते । तत्र मुख्य उत्पादादिंघटगतआकाशेतुतदुपाधिकोगौण एव । नैतावताऽकाशस्यनित्यत्वं यातिं, अनित्यत्वं चागच्छति । तथैव प्रकृते संसर्गस्यैवोत्पादादि भवति ज्ञानेतद्व्यवहारस्तु तदुपाधिकोगौणोनैतावताधर्मभूतज्ञानमुत्पादादिदोषवान् भवति । गगनवदेव धर्मं भूतात्मनोज्ञानं स्वभावतोनित्यं भवति, अनित्यरूपधर्मस्तुपरापेक्षोज्ञानगतस्वाभाविकधर्मापहारको नैवेति । अत्रार्थेऽनुरूपं दृष्टान्तंदर्शयति स्वयमेव **यथासौरश्चान्द्रो वा प्रकाश** इत्यादि, यथा सौरः प्रकाशआलोकस्तत्तर्थभेदेनघटादिपदार्थभेदेन घटप्रकाशः पटप्रकाशोवेतिप्रख्यायते, एवमात्मनः प्रकारलक्षणंचैतन्यंघटपटाद्यर्थविशेषसम्बन्धात्, घटज्ञानंपटज्ञानंवेत्यादिसंज्ञांप्राप्नोति । ते च विषय प्रकाशोपयुक्तदशाविशेषाज्ञाननिष्ठाज्ञानस्यविकाशरूपाअपिधर्मत्वात्, स्वधर्मनिष्ठाकारत्वादात्मनोऽपरोक्षाःप्रत्यक्षा एव भवन्तीति भावः । अत्र दृष्टान्तमाह **यथेत्यादि** । यथा न्यायमतेज्ञाननिष्ठ घटपटादिविषयकत्वाकाराअनुव्यवसायज्ञानग्राह्य एवाभिमतास्तथैवै तन्मते विषयसंसर्गावस्थाभेदाज्ञानस्यप्रत्यक्षा एवेति सिद्धान्तिनामभिमतमितिसंक्षेपोविस्तरस्त्वन्यत्रद्रष्टव्यः ।

। इत्यात्मधर्मभूतविषयविषयकज्ञानस्यनित्यत्वोपप्रकरणे तत्त्वदीपः ।

स्थूणानिखननन्यायेनपूर्वंज्ञानस्यनित्यत्वमाक्षिप्यतदनुज्ञानस्योत्पादविनाशराहित्यलक्षणनिन्यत्वं स्थापयितुंप्रथमतः पूर्वपक्षमतमेव दर्शयति **अथात्मनो यच्चैतन्यमित्यादि** तत्रपूर्वपक्षिणोऽभिनवमीमांसका मुरारीमिश्रप्रभृतयोभट्टमतानुयायिनः । तत्रात्मनो यत् चैतन्यंधर्मभूतज्ञानम्, तदागन्तुकमेव, अर्थात् आत्मनि आत्ममनःसंयोगेसति ज्ञानमुत्पद्यते इति तदनित्यमागन्तुकमुत्पादविनाशवत्वेन जन्यमेवेति न्यायमतानुयायिनां पन्थाः । तन्मतमेवालम्ब्यदार्शनिकविचारंकुर्वाणाः ते इत्थं विचार-

व्रजाम्यागच्छामीत्यादिवत्, जानामिज्ञास्याम्यज्ञातिषमित्यादिकालविशेषावच्छिन्नत्व प्रतीतिदर्शनात् । जाग्रत्स्वप्नमोक्षकालेष्वप्यात्मनोज्ञानाधारत्वे प्रबुद्धसुप्तमुक्तादिव्ययन्ति । तथाहि **विषयेन्द्रिय संनिकर्षे त्यादि**---अयमाशयः प्रत्यक्षज्ञानमिन्द्रियार्थसंनिकर्षजन्यमेव, यत् इन्द्रियार्थसंनिकर्षेसत्येवघटादिज्ञानानांजायमानत्वदर्शनात् । इन्द्रिार्थसंन्निकर्षाभावेसतिविषये घटादिज्ञानस्योत्पादादर्शनेनान्वयव्यतिरेकाभ्यांकारणत्वनियामकत्वेनाभिमताभ्यामेव घटादिज्ञानस्य दर्शनात् । तथानुमित्युपमितिशाद्बादिज्ञानेषुलिङ्गज्ञानसादृश्यज्ञानपदज्ञानादीनामन्वयव्यतिरेक दर्शनेन तत्तत्स्थलेतेषांतेषामुत्पादकानांसत्वेएवानुमित्यादेरुत्पाददर्शनेन तत्तज् ज्ञाने तेषां तेषामेव कारणत्वेनप्रत्यक्षादिज्ञानमनित्यमेव । नहि कारणजन्यत्वातिरिक्तं किमपिजन्यत्वनियामकमिति प्रत्यक्षादिज्ञानमप्यनित्यमेव । एवम् गच्छतिगतोगमिष्यतीत्यादौकालभेदोज्ञायते इति कालावच्छिन्नत्वं तेन च गमनादिक्रियायाजन्यत्वम्, तथैव जानामिज्ञानवान्, ज्ञास्यामीत्यादिक्रमेण ज्ञानेष्वपिकालपरिच्छिन्नत्वंपरिज्ञायते, तेनकालपरिच्छिन्नत्वस्यज्ञानप्रतिभासमानत्वेनज्ञानस्यानित्यत्वमेवायाति । कालपरिच्छिन्नत्वस्यानित्यत्वप्रयोजनकत्वात् । तच्चकालपरिच्छिन्नत्वं जानामीत्यादि प्रतीत्या ज्ञायते इतिज्ञानमप्यनित्यमेवेतिनिर्णीयते । इत्थं च तत्तद्धेतुजन्यत्वात्कालपरिच्छिन्नत्वाज्ज्ञानमनित्यमेवेतिज्ञानानित्यत्वेयुक्तिरुदाहृतेतिं । विशेषविचारइदमीयोऽन्यत एवावधातव्यः । एवं धर्मभूतविषयविषयकज्ञानस्यानित्यत्वेयुक्तिमुपपाद्यज्ञानस्य नित्यत्वेबाधकमपि दर्शयति **जाग्रत्स्वप्न** इत्यादि, तत्रेन्द्रियजनितज्ञानावस्थाजाग्रदवस्था, बाह्येन्द्रियनिरपेक्षःपूर्वानुभवजनितज्ञानावस्थास्वप्नः, यत्रमनसोप्युपरामोभवति न किमपि वेदितं भवति तादृशी अवस्थासुषुप्तिः, अत्रात्मस्वरूपज्ञानव्यतिरिक्तधर्मभूतज्ञानस्याभावोऽज्ञानमात्रंसुप्तोत्थितस्य, न किञ्चिदवेदिषमित्याकारकस्मरणान्यथानुपपत्त्यैवज्ञायते इति विषयकज्ञानव्यतिरेक एवेतिनिर्णीयते । तुरीयावस्थामोक्षस्यैवनामान्तरम् । जीवनमरणयोरन्तरालेमूर्छावस्थाप्येका दृश्यते, सा चावस्थाऽदिपदग्राह्या । जागरणसुषुप्तयोर्भेदस्तुज्ञानज्ञानाभाव प्रयुक्त एव, अर्थात् जागरणे इन्द्रियादीनामनुपरमात् तज्जनितज्ञानस्याभावोऽस्तित्वंप्रतीयते, सुषुप्तौतु, इन्द्रियादीनांज्ञानोत्पादकानामुपरमात्, न ज्ञानमपितु तदभाव इति तस्यां सुषुप्त्यवस्थायां ज्ञानाभाव इत्येतावानेवतयोर्भेदः स्पष्टतयावेदितो भवतीति । अथ यदि धर्मभूतज्ञानमात्मवदेवैकान्ततोनित्यमेव भवेदितिजागरणस्वप्नवत्, सुषुप्तिकालेपिनित्यस्यज्ञानस्यावस्थानेन, अयं सुषुप्तोऽयं प्रबुद्धोविषयाननुभवतीति व्यवस्थानैवकथमप्युपपादिताभविष्यति, दृश्यते च सुप्तप्रबुद्धव्यवस्था, तदनुरोधेनधर्मभूतज्ञानस्यानित्यत्वमकामेनापिमन्तव्यमेव, ततश्चज्ञानतदभावव्यवस्थाऽनायासेनैवोपपादिता भवतीति तादृशज्ञानस्यानित्यत्वंस्वीकृतंसवैरपितस्यतथात्वंस्वीकर्त्तव्यमेवेति । अर्थात्, ज्ञानस्य यदिं नित्यताऽस्थीयेत तदा सुप्तप्रबुद्धव्यवस्था, तथा, वद्धमुक्तव्यवस्थपिनैवकथञ्चित्, संसारावस्थाया एव नामान्तरम्, विगतसंसारावस्थायानामान्तरम्, यदि एतत् स्थितौ, वद्धस्यापिज्ञाना-

वस्थानोपपद्येत । नित्यस्यात्मसमवेतज्ञानस्यप्रतिकर्मव्यवस्थापिदुरुपपादैव भवेत् तदाहि प्रकाशनतया 'तस्याः संविद्' इंत्येकस्यामेव संविदिसर्वमेववस्तुजातं प्रकाशेत चित्रघटादावनेकरूपवत् । नवा किञ्चिदपिवस्तुजातंकदापि न प्रकाशेत, अविशेषात् । अन्यदाऽनित्यत्वेधर्मभूतज्ञानस्यस्वीकारेतुयदर्थसन्निकर्षप्रयुक्तेन्द्रियलिङ्गादिना या धीर्जन्यते सा तदीयैवेतिसर्वव्यवस्थासमुपपद्यते ।

। इतिधर्मभूतज्ञानस्यनित्यत्वस्थापनम् ।

दिकं यथा तथा, मुक्तस्यापिज्ञानवत्, तदितरात्मविशेषगुणादीनामपि यथा पूर्वमवस्थानेनबन्धनविश्लेषलक्षणमोक्षस्तुपराभूत एव भवेदितिवद्धमुक्तादिव्यवस्थान्यथाऽनुपपत्त्यावश्यंज्ञानस्यानित्यत्वमभ्युपेतं भवतीति । न चोक्तव्यवस्थामात्रमनुपपद्यतेज्ञाननित्यत्वपक्षे, किन्तु येयं सर्वानुभवसिद्धा प्रतिकर्मव्यवस्था, एकस्यैकदाप्रतिनियतविषयकज्ञानमेवनान्यस्य, घटेन जलाहरणमेव न कार्यान्तरम्, पटेन प्रावरणमेव न बन्धनादिकमित्येवं रूपा प्रतिकर्मव्यवस्थापिज्ञानस्यनित्यत्वे न संभवति । ततश्चज्ञानस्यनित्यत्वेसर्वदासर्वस्यसर्वविषयकभानप्रसङ्गआपतेदित्याशयेनाह, **नित्यस्यात्मसमवेत** इत्यादि । ज्ञानस्यनित्यस्यात्मनिसमवायसम्वन्धेनसर्वदा समवस्थितस्य विद्यमानत्वे, प्रतिकर्मव्यवस्था=विषयभेदनियमः "इदं ज्ञानंघटादिविषयकं न पटादिविषयकम् "घटेनजलाहरणं नतु कार्यान्तरम्" "पटेन प्रावरणं न कार्यान्तरम्" इत्येवंविषयभेदनियमोनोपपादितो भवेद् ज्ञानस्य नित्यत्वे इति । प्रतिकर्मव्यवस्थायाअनुतपत्तिमेवोपदादयितुमाह **तदाहि प्रकाशनतया तस्याः** इत्यादि । तदा=तत्समयेतस्याःसंविदःप्रकाशनशीलतया=प्रकाशकस्वभावतया, एकस्मिन् यत् किञ्चित् विषयकेज्ञानेसर्वापिसंनिकृष्टासंनिकृष्टपदार्थमात्रमपिसमानरूपेण, प्रकाशितं भवेत्, अथ यदि नानेकविषयान् प्रकाशयति तदाज्ञानस्य प्रकाशकत्वाभावादेकोपि विषयः, प्रकाशितो न भवेत् । अर्थात् ज्ञानस्यसर्वस्यापिनित्यत्वेनविषय प्रकाशनस्वभावतयाअपेक्षणीयस्यान्यस्यकस्यचिदप्यभावात्, एककाले एव निखिलान् सम्वद्धान संवद्धान् पदार्थान्प्रकाशयेत् । अथ न पदार्थान् निखिलान् प्रकाशयतिचेत्तदातुल्ययुक्त्याकमपि न प्रकाशयेदितिसत्यपिंज्ञानेपदार्थस्यप्रकाशो न स्यात् तथा च कदाचित्कमपिविषयप्रकाशयतिकमपिविंषयं न प्रकाशयतीत्येवं रूपा व्यवस्था कथमपि न घटेत् । तस्माज्ज्ञानमनित्यमेव नतु नित्यमिति ।

तदेवं ज्ञानस्यनित्यत्वपक्षे दोषान्प्रदर्श्यज्ञानस्यानित्यत्वपक्षेसर्वव्यवस्थायाःसामञ्जस्यंदर्शयितुमाह—**अन्यदा** इत्यादि । अन्यदाअन्यस्मिन्ननित्यत्वपक्षेज्ञानस्य, अर्थात् ज्ञानस्यानित्यत्वेस्वीक्रियमाणेतु, येनार्थेन संनिकृष्टेन्द्रियलिङ्गादिना या संविद्ज्ञानमुत्पद्यते, तज्ज्ञानं तदीयं तेन च ज्ञानेन तादृशार्थस्यैवप्रकाशनं नत्वर्थान्तरस्य, अर्थान्तरे तदर्थनिकृष्टेन्द्रियादिरूपकारणाभावेन नतज्ज्ञानं तदीयं नवातेनतस्यप्रकाशनं घटते । अर्थात् ज्ञानस्यानित्यत्वेदूष्यमाणेतु घटादिप्रतिनियतार्थे

स्यादेवम्—चक्षुरादीन्द्रियद्वारेणवहिर्निसृत्यचैतन्यमेवतत्तदर्थेन सम्बद्ध्यमानं भवत् तत्प्रकाशकतयातदीयत्वेनावस्थितं भवति । अनुरागस्यचागन्तुकतयाचक्षुरादीन्द्रियानुविधानंकालावच्छेदःस्वप्नावस्थाचोपपद्यते । तन्नयुक्तमर्थान्तरसंनिकर्षेऽर्थान्तरस्यसम्बन्धासंभवात् । चैतन्यमपि तथैवनिष्क्रम्यते इतिचेन्न—अमूर्तपदार्थस्याकाशवन्निष्क्रमणप्रवेशयोरसंभवात् । गुणश्च चैतन्यंगुणवन्तं विहाय कथमन्यत्रयास्यति । न चार्थोऽन्तः प्रविशति । सतु वाह्यदेशसम्बद्धःसर्वलोकप्रत्यक्षः जात्यादिषुचानुपपत्तिःसमानैव ।

संनिकृष्टेन्द्रियादिना जायमानं तादृशार्थविषयकमेवेतिसर्वापि व्यवस्थाऽतिसरलतयाऽव्यवस्थापिताघटते एवेति न कोपिदोषःपदमाधातुं योग्यो भवति । तत्र चक्षुः स्पर्शनादिं, इन्द्रियाणांसंनिकर्षःसंयोग संयुक्तसमवेतसमवायसमवायसमवेतसमवायविशेषणविशेष्यभावलक्षण एव । अनुमितौतुलिङ्गस्य विनाभावव्याप्तिलक्षणः । एवमेव यथायथंसर्वत्रैवबोध्यम् । तस्मात् ज्ञानानित्यत्वपक्षेदोषा भावात् सर्वव्यवस्थोपपादनाच्चानित्यत्वपक्ष एव श्रेयान् ।

। इतिधर्मभूतज्ञानस्यानित्यत्वमतोपस्थापनप्रकरणेतत्त्वदीपः ।

अत्र ज्ञानस्य नित्यत्वेपीन्द्रियादेर्ज्ञानप्रसरणोपयोगित्वंकालावछिन्नत्वप्रतीतिदर्शनादिन्द्रियप्रसरणस्य कादाचित्कत्वमूलकत्वंचयत्सिद्धान्तिनामभिमतंतद्दूषयितुमनुवदन्नाह पूर्वपक्षी **स्यादेव मित्यादि** तत्रचैतन्यं ज्ञानम्, सम्वध्यमानमनुरज्यमानमित्यर्थः । तत्प्रकाशतया=तत्प्रकाशकत्वेन तदीयत्वेन=तद्विषयकतया प्रतिविषयं व्यवस्थितं भवतीति । अनुरागस्येति, इन्द्रियार्थसंनिकर्षस्यान्वयव्यतिरेकस्तुज्ञानस्यार्थविषयसम्बन्धे एवोपक्षीणं भवति । सम्बन्धानन्तरमेव विषयप्रकाशकत्वम् । तत्र सम्बन्धस्यनित्यत्वेनतद्विशिष्टस्यज्ञानस्यार्थप्रकाशकस्यातीतत्वादिप्रतीतिरूपपद्यते । विद्यमानत्वेपि ज्ञानस्यार्थसम्बन्धव्यतिरेकेणार्थप्रकाशनादेव स्वापादेरुपपत्तिरितिं, अन्यथासिद्धत्वंज्ञानानित्यत्वसाधकानामिति । तद्दूषयति **तन्नयुक्तमिति** । **अर्थान्तरेत्यादि** प्रसरणेनेन्द्रियस्यार्थसम्बन्धेपिज्ञानस्यार्थेन सम्बन्धाभावात् । पुनः शङ्कते **चैतन्यमपीति** चक्षुरादिद्वारा चैतन्यमपिनिष्क्रम्यार्थेन घटादिनासम्बद्ध्यते इत्याशयः । परिहरति **अमूर्तस्येति** स्पर्शरहितस्य अमूर्तस्याप्य विभुत्वान्निष्क्रमणादिघटतेज्ञानस्य । आकाशस्यतुव्यापकत्वादेवनिष्क्रमणंनेतिचेत्तत्राह **गुणश्च** इत्यादि, ज्ञानस्यगुणत्वाद् गुणिनमात्मानमन्तःस्थितंबाह्येनिष्क्रमणंनैव घटते । न चमूर्तापिजातिर्विनस्यन्तमपहाययथाऽन्यत्रगच्छति तथाऽत्रापिकुतोनेत्याशङ्कायामाह **जात्यादिदिषु चानुपपत्तिः** समानैवेति संक्षेपः ।

। इतिज्ञाननित्यत्वपक्षेज्ञानार्थसंनिकर्षानुपपत्तिनिरूपणप्रकरणे तत्त्वदीपः ।

ज्ञानस्यात्मविरलत्वनिरूपणम्

यद्युच्येत, योऽयंप्रत्यगात्मेतिजीवः स च प्रकारद्वयेनावस्थितो भवतीति । बहुलरूपेणप्रविरलरूपेण च तत्र बहुलः प्रत्यक् चेतनक्षेत्रज्ञादिपदतयाऽपदिश्यते स चात्मा ज्ञानसुखादिमान्बद्धोमुक्तश्चेत्यपिगीयते । विरलस्तु ज्ञानसंविदादिपदवाच्यः ।

अथात्रजैनशासनानुमतस्य कस्य चिन्मतस्यप्रदर्शनं करोति तन्निराकरणाय तत्राह **यद्युच्येत योयं प्रत्यगात्मेतीत्यादि** सामान्यत एतन्मतस्यायमभिप्रायः तथाहि ते जैनाचार्याः संगिरन्ति "आदीपमाव्योमसमस्वभावंस्याद्वादमुद्रानतिभेदिवस्तु । तन्नित्यमेवैकमनित्यमन्यदितित्वदाज्ञाद्द्विषतांप्रलापाः" इति सर्वोहिपदार्थःप्रदीपादारभ्यव्योमपर्यन्ताः नित्याअनित्याश्चप्रदीपोपिस्वर सतैलवार्तिकादिविनाशात् परमाणुरूपेणात्रतिष्ठते, इति प्रदीपसंज्ञांविहायपरमाणुरूपतां भजन् कारणरूपेणनित्य एव । यदा खलु त एव प्रदीपपरमाणवोविलक्षणसंगादिक्रमेणपरमाणुभावं परित्यजन् प्रदीपपर्यायंलभतेतदाप्रदीपत्वेनानित्यः कारणरूपेऽर्थात्, द्रव्यरूपेणनित्यएवेति द्रव्यपर्यायाभ्यांसर्वोपिपदार्थोनित्यश्चानित्यश्चापि भवतीति ।

ननु नित्यत्वानित्यत्वयोःपरस्परविरोधात्कथमेकस्मिन् समावेशःस्यात् तदुक्तं "नैकस्मिन्न संभवात्" इत्यत्र । तन्न, अपेक्षाभेदेनोभयोरप्येकत्रसमावेशः संत्रभत्येव, यथास्वरूपत एकैव स्त्री, माताभगिनीपुत्रीति नानापदेनव्यपदिश्यतत्रपितरमपेक्ष्यपुत्रीतिकथ्यतेस्वापत्यमपेक्षमाणा मातेति, स्वोदरंचापेक्ष्यभगिनीतिगीयमाना, एककालेएवविरुद्धमातृत्वादिधर्मवती भवति तथैव प्रकृतेपीति । यथावा, एकस्मिन्नेववृक्षे एकस्मिन्नेवकालेमूलमवच्छेदकीकृत्यकपिसंयोगाभावःशाखावच्छेदेन तदैव तत्रकपिसंयोगस्यविरुद्धस्यसमावेशो भवतीति न तत्र कोपि विवदते । तत्कस्य हेतोः ? अवच्छेदकभदेनविवादस्यप्रशमनात् । तथैव प्रकृतेपि ज्ञेयम् । अर्थात् द्रव्यरूपेण सर्वोपिपदार्थोनित्यःपर्यायरूपेणानित्यःरूपान्तरेणसन् भवति । एतदेवपदार्थानां सत्वम् तदुक्तम् वाचकमुख्येनोमास्वातीनामकेनाचार्येण "उत्पादव्ययध्रौव्ययुक्तं सदिति" प्रमाणनयतत्वालोकाऽलंकारे । सर्वोपिपदार्थउत्पादस्थितिविनाशयुक्तत्वादेव सत् भवतीति । तथैवेहात्मनोपिवहुलविरलादिनामरूपद्वयं भवतीति जैनमतंसंक्षिप्यप्रदर्शितंपूर्वपक्षिणेतितदेवेहाचार्योदर्शयति **यद्यु च्येत** यश्चायं जीव, प्रत्यगात्मा, सद्विधाऽवतिष्ठते, बहुलोविरलेश्च । तत्र बहुलोनिविठावयवसंश्लेषः सम्बन्ध युक्तो भवति । विरलस्तुशिथिलावयवसंश्लेषवान् । तत्र बहुलः प्रत्यक् चेतनक्षेत्रज्ञादिपदवाच्यो धर्मीआत्मेति कथ्यते । विरलस्तुजीवाधीनतयाप्रत्यगर्थस्यैकदेशरूपतया तदधीनस्थितिकत्वेनज्ञानादिपदवाच्ययागुणरूपः । अर्थात् मूलत एक रूपोपि बहुलोधर्मी द्रव्यमिति कथ्यते । विरलस्तुजीवाधीनास्थितितयानैकदेशोगुणपदवाच्यः । विरलस्याप्यात्मप्रदेशत्वादेवनात्मनोविच्छेदी भवति, विरलतया च प्रसरणादिकमपि भवति । आत्माहिसंकोचविकाशशालीः यदास्वल्पशरीरंप्राप्नोत्य

स च प्रत्यगर्थाधीनतयाऽगुणतया उपदिश्यते तेजो वदिति । अत्र यथा बहुलं तेजः सूर्योऽग्निश्चेति । विरलंतु प्रभाप्रकाशोज्योतिरिति च । अतश्चैतन्यज्ञानस्यविरलात्मप्रदेशरूपतयाऽलोकादिवदेवगमनादिकंकर्मसंयोगवियोगादिकमप्युपपन्नं भवतीति ।

एतन्मतमपिनोपपद्यते–निरवयवस्य मूर्तत्वविरहिततस्यसर्वथा संगवर्जितस्यजीवात्मनोबहुविरलत्वादिधर्मसमुदायादिकस्यात्मन्यननुमतत्वात् । यदि तेजोवदुपर्युक्तंधर्मजातंकश्चिन्मन्यते तदातेजोवदेवजीवात्मनोऽपि, अचेतनत्वान्नित्यत्वानित्यत्वादिमते जडत्वसावयवत्वादिदोष आपतेत् । ततश्च कृतहान्यकृताभ्यागमादिदोषा आपतेयुः ।

दृष्टवलात्तदाऽत्मनोयेऽवयवास्तेसंकुचिता भवन्ति, यदा स एव पुत्तिकाशरीरंपरित्यज्यहस्तिशरीरं प्रविशतितदाऽत्मीयाःप्रदेशाविकासभावंप्राप्नोति । अतएवायमस्मिन् तन्त्रेशरीरपरिमाणवान्, अर्थान्मध्यमपरिमाणवानिति, नाणुपरिमाणो नवा व्यापकपरिमाणवान्, अणुपरिमाणत्वे, निदाघकाले जान्हवीजलनिमग्नस्यसर्वांगीणसुखाद्युपलब्धिर्नस्यात्, अणुत्वेनशरीरैकदेशेएवावस्थानात् । नवा तृतीय पक्षः व्यापकतयानिष्क्रियस्यलोकान्तरेगमनागमनाद्यनुपपत्तेः तस्मात् यादृशंशरीरं यदाप्राप्नोति तदा तदानुकूल्येनतदवयवाबहुलीभवन्ति विरलाश्च भवन्तीतिनिष्कण्टकोयंस्याद्वादतन्त्रः । अत्रते इमे सप्तभङ्गा भवन्ति, स्यादस्ति १ स्यान्नास्तीति-२ स्यादस्ति च नास्ति च ३ स्यादवक्तव्यः ४ स्यादस्ति चावक्तव्यश्च ५ स्यान्नास्ति चावक्तव्यश्च ६ स्यादस्ति च नास्ति चावक्तव्यश्च ७ । यथायोग्यमिमेसप्तभङ्गाः प्रतिपदार्थयोजनीयाः । एतेषां विशेषविवरणंस्याद्वादशास्तादेवावगन्तव्यं दिङ्मात्रमिहप्रदर्शितम् । अत्रानुरूपंतृष्टान्तंदर्शयति **यथा बहुलं तेजश्चेति** । यथा तेजो द्रव्यं यदा निविडावयवसंश्लेषविशिष्टं तदा तस्याग्निरिति प्रदीपोभौमोवेति व्यवह्रियते । यदातु तदेवतेजोवयवंशिथिलावयवसंश्लेषवद् भतति तदा प्रकाशो वा प्रभावेत्येवं रूपेण प्रथते । ततश्च विरलात्मप्रदेशतया, आलोकवदेवात्मप्रदेशरूपस्यक्षानपदवाच्यस्यगमनागमनंसंयोगोवियोगश्चापि भवतीति प्रश्नग्रन्थस्य समुदिताशयः । नेदं मतम्, यतोऽस्मिन्मते निरवयवादिमतआत्मनः सावयवत्वादिदोषआपतति, ततश्च तस्यात्मनोऽनित्यत्वादिकं भवेदित्याशयेनोत्तरयति **एतन्मतमपिनोपपद्यते** इत्यादि, कथमेतंनोपपन्नमितितदेवोपपादयति **निरवयवस्येत्यादि** । यदि आत्मनः सावयवत्त्वं स्यात् तदैवावयवत्वेनवहुलत्वं विरलत्वं च संभवति, तमन्तरेण निविडावयव संश्लेषलक्षणबहुलत्वस्यप्रविरलावयवसंश्लेषवत्वरूपत्वं भवेत् । परन्तु निरवयवस्यामूर्तस्यासङ्गस्यात्मनोबहुलत्वादेरनुपपत्तेः । ‘सपर्यगात् शुक्रमकायमव्रणम्” इत्यादिश्रुत्याऽत्मनःशरीरादिप्रतिषेधेन सावयवत्वस्यार्थत एव प्रतिषेधात् । “द्वेवावब्रह्मणोरूपेमूर्तञ्चामूर्तं च” इत्यादिश्य अर्थात् “आदेशोनेतिनेति” इत्यादिनातस्मिन्नात्मनिमूर्तत्वस्यनिषेधात् । तत्रपरिच्छिन्नपरिमाणवत्वम्, क्रियावत्वम्, स्पर्शराहित्यं वा ? न चात्माक्रियावान् परिच्छिन्नः स्पर्शादिमान् वा भवति । ईदृशस्यात्मनः

अथायमात्माऽवयवरहितेन सर्वतः सर्वार्थप्रकाशनसामर्थ्ययुक्तज्ञानेनयुक्तत्वात्सर्वव्यापकः । अथ यदि ज्ञानं सर्वव्यापकं सर्वार्थप्रकाशकं तदाऽऽत्मनः सर्वदैव सावयवत्वापादकवहुलविरलादिधर्मवत्वादिधर्मानुपपत्तेः । यदि हि आत्मनः सावयवत्वादिकमभिलषितं भवेत् तदा सावयवत्वानित्यत्वादिकं धर्मजातं स्वीकृतं स्यात् । आत्मनि, नतु कोपि आत्मवादी तथा मन्येत । यदि स्वसिद्धान्तमोहादेवं कुर्यात् । तदा शरीरादिवदेवात्मनोप्यचेतनत्वं प्रसज्येत । अर्थात् यथा करणकलेवरादीनिसावयत्वादचेतनमवेत नत्वात्मनित्यत्वमितितानिनात्मद्रव्याणि, तथैवात्मनोप्यचेतनत्वे तस्यापिदेहादिवदेवानित्यत्वान्नात्मतत्वमेव भवेत् । अर्थादात्मनः सावयवत्वे च स्पर्शवत्वसलेपत्वविकारित्वानित्यत्वाचेतनत्वादीनिशरीरवदेव प्रसज्येत । यथा स्पर्शादिमत्वे शरीरादीनामनित्यत्वादिकमिति न तान्यात्मरूपाणि तथैव प्रकृतेपिवोध्यम्, अस्यमतस्य सविस्तरंनिराकरणंस्याद्वादमीमांसा प्रकरणे श्रीवैष्णवमताब्जभास्कर-प्रभा-किरणे चिदात्ममीमांसा याञ्च कृतमिति तत एव विशेषजिधृक्षुभिर्द्रष्टव्यम् ।

। इति ज्ञानस्यात्मबहुलविरलप्रदेशमतदूषणप्रकरणे तत्त्वदीपः ।

ज्ञानात्मनोःस्वरूपविचारप्रस्तावेमतान्तरंप्रदर्शयति, **अथायमात्मेत्यादि,** एतन्मतेसर्वदासर्वार्थप्रकाशकंज्ञानं यदात्मनस्तज्ज्ञानं सर्वव्यापकंविभु इत्युच्यते । एतादृशज्ञानेनैवसर्वार्थप्रकाशनसंभवादात्मनःस्वप्रकाशत्वेनैतेषामादरः यथोक्तज्ञानेनैवात्मनोपिवाह्यपदार्थप्रकाशनसंभवेन पार्थक्येनतस्यात्मनः स्वप्रकाशत्वानभ्युपगमादिति **अवयवरहितेन**=अनवयवेनकात्स्र्येनेति यावत् । ततश्च सदासर्वकालंसर्वार्थ एव प्रकाशनेसमर्थमुपयुक्तं यद्ज्ञानं तादृशज्ञानवान् सर्वव्यापक आत्मेत्यर्थः फलितः । ननु यदा सर्वार्थप्रकाशनशीलज्ञानवानात्मा, तता तादृशात्मनासर्वविषयकं ज्ञानं कथं न भवति, अर्थात् तादृशज्ञानेसर्वेऽर्थाःकथं न सर्वदाभान्तीति शङ्कामपनोदितुमाह **अथयदिज्ञानम्** इत्यादि । अथ यदि सर्वार्थप्रकाशनशीलमस्यज्ञानं तदा तादृशात्मनःसर्वदासर्वार्थविषयकज्ञानंकुतो न भवतीति प्रश्नाशयः । उत्तरयति **इतिचेत्तमोगुणप्रतिवन्धादिति** । यथान्धतमसेचक्षुःसंयोगस्यविद्यमानत्वेपिचक्षुरिन्द्रियेणचाक्षुषंघटज्ञानं न जायते, कुतः अन्धकारेणप्रतिवन्धात्, तथैवात्मनोज्ञानं सदपि तमो गुणेनाव्रियमाणंघटादिकं न प्रकाशयतीत्युत्तरंज्ञेयम् । ननु यदि ज्ञानं तमसोऽवृत्तंसन्नप्रकाशयतिं तदाआलोकसहकृतचक्षुःसंयुक्तघटादीनामपिकदाचिदपि प्रकाशो न स्यात्, तमसाऽच्छादनस्यविद्यमानत्वेन न कोप्यर्थःप्रकाशितः स्यादित्याशङ्कायामाह **सत्वाधिक्ययुतकरणैः** इत्यादि । अत्रायमाशयः यथा प्रदीपेनान्धकारेऽपसारितेसन्निहितघटादिकमेव चक्षुषा प्रकाशितं भवतिं, सूर्यालोकेनापसारितेऽन्धकारे ततोऽधिकपदार्थस्यचक्षुषाप्रकाशो जायते । तथैव प्रकृते सत्वगुणयुतकरणेन यावतस्तमोगुणस्यनिरसनंतावदेव तत्रप्रकाशनं भवति । अर्थात्, प्रदीपालोकादिनातमोवत्, सत्वोद्रिक्तैश्चक्षुरादिज्ञानकरणैः सत्वोद्भवतारतम्येनाल्पेतमसिमहतिवातमसिनिरासिते सतिज्ञानं तत्तदिन्द्रियार्थमल्पंवाऽधिकं वा प्रकाशयतीत्यर्थः ।

सर्वार्थस्फुरणं कुतो न भवतीति चेत् ? तमोगुणप्रतिवन्धादितिगृहाण । सत्वाधिक्ययुतकरणैः स्वकीयपाटवानुसारेण निराकृते तमोगुणेतत्तदर्थानांप्रकाशोजायते । अतो विनापिज्ञानार्थयोर्निष्क्रमणप्रवेशौसम्पद्यत एवार्थविशेषोपरागोज्ञानस्येति ।

यद्येवं तथापि, अर्थातिशयमात्रहेतुत्वादिन्द्रियलिङ्गादीनांज्ञानवदेवज्ञापकत्वं न स्यात्, ज्ञानकारणत्वाभावात् । न चार्थप्रकाशस्यज्ञानत्वम्, तथा सति प्रकाशमानतयाघटादिविषयाणामपिज्ञातृत्वमापतेत् । यथोक्तम् "आत्मधर्मस्य चैतन्यस्य विषयेणसहसंयोगोज्ञानमित्युच्यते" इति ।

गाढान्धकारेतु चक्षुरादीनां सत्वोत्कटयं न भवतीत्याशयःफलति । एतन्मतमपि निराकरोति **यद्येवं तथापीत्यादि** एवं चार्थगतप्रकाशलक्षणातिशयमात्रे, ज्ञानवदेवेन्द्रियादेः कारणत्वमेव भवेत्, किन्तु अर्थविषयकज्ञाने इन्द्रियादेः कारणत्वं न भवेत्, यतोऽर्थविषयक ज्ञानस्यभवद्भिर्नित्यत्वस्वीकारात्, नहि नित्यस्यहेतुर्भवतिनित्यत्वादेव, अनित्यमेव वस्तुकारणसापेक्षं भवति नित्यस्य तुतदनपेक्षत्वनियमात्, तदेवतस्यनित्यत्वं यत् कारणानपेक्षत्वं कारणापेक्षायां नित्यत्वमेव जह्यात् । ज्ञानस्यैवप्रकाशहेतुत्वंसाक्षात् तदन्यस्यतु ज्ञानद्वारेणैव भवति प्रतिवन्धकसंतमसादेर्निरसनद्वारा कथंचिदेवेन्द्रियादेःकारणत्वम् । तथा चैतन्मते, इन्द्रियादेर्यद् ज्ञानकरणत्वनियमः प्रतिष्ठापितश्चाक्षुषज्ञानंवेत्यादिरूपः स नियमो निराकृत एवभवेत्, यतो भवद्भिर्ज्ञानकरणत्वस्या स्वीकारात् ।

ननु भवतु ज्ञानं नातिरिक्तंकिमपिवस्त्वन्तरम्, किन्तु घटादिविषयनिष्ठः प्रकाश एव ज्ञान पदवाच्यस्तत्कारणत्वात् चक्षुरादीन्द्रियाणांज्ञापकत्ववचनमपियुक्तं भवतीत्याशङ्कांनिराकर्तुमुपक्रमते **नचार्थप्रकाशस्यज्ञानत्वमिति,** योयमर्थगतप्रकाशःतस्यैवज्ञानमितिपरिभाषेतीत्यर्थः । तदेतन्निराकरोतिं **प्रकाशमानतया** इति । यदि प्रकाशएवज्ञानम्, तदायथाज्ञानस्याश्रयआत्माज्ञानेति कथ्यते, तथैव प्रकाशस्यैवज्ञानरूपत्वेप्रकाशाश्रयीभूतघटाविषयोपिज्ञातृपदेनव्यवह्रियेत । **प्रकाशमानतया**=प्रकाशस्याश्रयतयाघटादिविषयोपिज्ञातास्यात् । विषयतासम्वन्धेन यद्यपि ज्ञानस्य विषयविषयत्वमस्ति, तथापि समवायेन ज्ञानाश्रयत्वन्नास्तीति । इहापि समवायसम्वन्धाभिप्रायेणैवविषयस्यज्ञातृत्वप्रसङ्गआपादितोविषयतयातु तथात्वस्यानुमतत्वेपि ज्ञातृत्वमात्मगतमेवेति । अत्रैव प्रसङ्गान्मतान्तरमपिदर्शयति **यथोक्तम्**=आत्मधर्मस्यचैतन्यस्य विषयेणसहसंयोग एव ज्ञानमिति । अर्थात् चैतन्यमात्मनोधर्मस्तस्यात्मधर्मस्यघटादिनाविषयेण सहसंयोग एव ज्ञानम्, अर्थात् संयोग एव ज्ञानम्, स च ज्ञानात्मकः संयोगश्चक्षुरादीन्द्रियाधीन इति तज्जनकतया, चक्षुरादेरिन्द्रियस्यज्ञापकत्वमुपपद्यते इतिभावः । एतस्मिन् मतान्तरेपिपूर्वोक्त

तत्रापि संयोगस्यद्विनिष्ठतया पूर्वोक्तदोष एव भवतीति । अनुभवविरोधोऽप्यत्र भवति "अहमिदानीं जानामि" "नेदानीं विजानामि" इत्यात्मसमवायिनोरेव ज्ञानज्ञानाभावयोरेवानुभवात् । अविकृतप्रकाशाकरणसमुदाये विद्यमानेऽपि सूर्यप्रकाशेप्रकाशकत्वव्यवहारो यथा तथैव प्रकृतेपिस्यादिति न युक्तम् । तत्रहि दिनमणिकिरणानां द्रव्यरूपतयातस्मिन् , आकुञ्चनप्रसरणद्रव्यान्तनेणसंयोगो विभागादिर्वासंभवात् समुपपद्यते कदाचित्तथाव्यवस्था, इहतु ज्ञानस्यगुणत्वान्नात्रकादाचित्कव्यवहारःस्यात् ।

। इति नित्यसर्वगतज्ञानवदात्मवादनिरासप्रकरणम् ।

दोषमेवापादयति **तत्रापि संयोगस्य द्विनिष्ठतयेत्यादि,** संयोगविभागादेर्द्विनिष्ठत्वेन चैतन्य संयोगस्यैवज्ञानरूपत्वंभवेत्तदाचैतन्यसंयोगाश्रयघटादिविषयस्यज्ञातृत्वापत्तिदोषस्तदवस्थ एव भवति, नहि आत्मव्यतिरिक्तः कोपि पदार्थो ज्ञातृतया व्यवहारंलभत इत्यर्थः । अर्थगतप्रकाशस्यचैतन्यार्थसंयोगस्य वा, ज्ञानरूपत्वे, पूर्वोक्तदोषातिरिक्तदोषान्तरंदर्शयितुमाह, **अनुभवविरोधः इति** । अनुभव विरोधमेवोपपादयति **अहमिदानीं** वर्तमानकाले घटादिविषयंजानामि न खलु पटादिकं जानामि" इत्यादिस्थले आत्माधिकरणतयैवज्ञानस्यसत्वंतदभावोवा अनुभूतो भवति । एवञ्च ज्ञानतदभावयोरात्मनिष्ठतयैवानुभवो भवति । एतादृशानुभवबलात् , घटादिविषयसम्बद्धंनित्यमुत्पादविनाश रहितं चैतन्यमेवज्ञानपदवाच्यमित्यवश्यंस्वीकरणीयम् । तत् स्वीकारेपिचक्षुरादीन्द्रियादेर्ज्ञापकत्वं न स्यादित्येवंदोषोऽस्मिन् पक्षे निराकृतोनैव भवतीति । न च ज्ञानजनकज्ञानविषयत्वरूपंज्ञापकत्वंचक्षुरादीन्द्रियादेर्न भवतु तावताकाक्षतिरितिवाच्यम् । चक्षुरादीन्द्रियसंनिकर्षादिनासंयोग संयुक्तसमवायादिनैव घटाद्यर्थप्रकाशसंभवोपपत्तेर्नभवतु प्रकाशव्यतिरिक्तं चैतन्यमित्यस्यापिवक्तुं शक्यतयाऽर्थविषयकज्ञानसिद्धेरप्यसंभवप्रसङ्गात् । न च जानामीत्याद्यनुभवानुरोधेनातिरिक्तं ज्ञानं स्वीकर्त्तव्यमितिच्चेत् तदा, चक्षुरादेर्ज्ञापकत्वमनुभवबलादेवास्थीयते इत्यपि वक्तुं शक्यतयासर्वंतुल्य मेवेतिभावः । ननु सर्वदायोग्यसर्वार्थप्रकाशनसमर्थरश्मिसमूहयुक्तेपिदिनकरे "इदंवस्तुजातमिदानीं सूर्यः प्रकाशयति, तदानीं न प्रकाशयतीत्याकारककदाचित्कप्रकाशकत्वप्रतीतिर्भवति कादाचित्क व्यवहारो भवतीति दृश्यते, तथैव नित्यचैतन्यविशिष्टेऽप्यात्मनि, प्रकाशकत्वव्यवस्थोपपन्नास्यादिति ज्ञाननित्यत्वेपि न कोपि दोषः तत्राह **अविकृतप्रकाशकारण** इत्यादि । इमाशङ्कां परिहरन्नाह **तत्र हि दिनमणिकिरणानामित्यादि** दिंनकरकिरणस्तु तेजो विशेषत्वात् द्रव्यरूपाःपृथिव्यादिनवानां द्रव्यत्वात् , तादृशकिरणानांसंकोचविकाशशालितया, बाह्यार्थसम्बन्धस्यकादाचित्कत्वंसंभवेदपि, परन्तु द्रव्यभिन्नस्यगुणात्मकस्य चैतन्यस्यसर्वथोत्पादविनाशरहितस्यार्थात् नित्यस्यनित्यव्यापकात्मनिसमवायसम्बन्धेन विंद्यमानस्यसर्वगतस्य च चैतन्यस्य कदाचित्कविपयसम्बन्धो न संभवेत् , गुणरूपे तस्मिन् गुणरूपसयोगासंभवात् , "गुणेगुणानाङ्गीका

अथोच्येत, यदिदमात्मानो ज्ञानं तद्द्विधाविभज्यते, तत्रप्रथममात्माश्रितमात्म विषयकं च । द्वितीयमात्माश्रितंविषयविषयकं च । तत्र प्रथममुत्पादविनाशरहितं नित्यमात्मस्वरूपप्रयुक्तमनवरतमनुवर्तते । द्वितीयं तु घटाद्यर्थसम्बन्धीन्द्रियादिकारणकंतत्तदर्थप्रकाशकतयोत्पद्यतेविनश्यति च । एतद् द्वतीयज्ञानमपेक्ष्यैव स्वापजागरादिव्यवस्थासमुपपद्यते । तत्रोच्यते, तदैवेयं व्यवस्थोपपद्येत, यद्यात्मनिनित्यज्ञानमस्तीत्यत्र प्रमाणंकिमपि भवेत् ।

ननु स्वीकृतस्तावत्सर्वोपि जागरणावस्थाया सर्वदैवात्मनोनुऽभवो भवतीति । स्वापादिकालेतुआत्मानुभवोऽनुमानादेव भवति, स्वापकालिकस्य विषयविषयकज्ञानारादिति नियमात् । संयोगस्तु द्रव्ययोरेव भवति नतु द्रव्यभिन्नेगुणादौ वा भवति । यदि गुणोपि गुणवान् स्यात् तदागुणत्वंविहायद्रव्यरूप एव स्यात् गुणवत्वंसमवायिकारणत्वं वा द्रव्यमिति नियमेन यदि गुणान्तरं भवेत् तदा यस्मिन् गुणे गुणान्तरवत्तासगुणोद्रव्यमेव भवेदिति । यदि ज्ञानस्य विषयसम्बन्धो भवेत्तदाज्ञानस्यनित्यत्वेनसर्वदैव विषयप्रकाशो भवेत् । परन्तु कस्यचिदपिंविषयस्यसर्वदाप्रकाशोऽदृष्टः संभवेदुपपद्यते वा ।

। इतिनित्यसर्वगतज्ञानवदात्मवादनिरासप्रकरणे तत्त्वदीपः ।

अत्रैव प्रसङ्गात् ज्ञानविषयेमतान्तरमुपस्थापयति **अथोच्येत** इति । पूर्वपक्षमुपपादयति, **यदिदमात्मनो ज्ञानमित्यादि,** ज्ञानं द्विविधम्, नित्यमनित्यं च, तत्र नित्यमेकमात्मनो ज्ञानं तदात्मनोधर्मभूतमात्मस्वरूपमात्रविषयकम् । द्वितीयंतु, अनित्यंविषयविषयकंस्वकारणाधीनंतदप्यात्म समवेतमिन्द्रियार्थसंनिकर्षजातम् । द्वितीयमनित्यज्ञानमभिलक्ष्यैवस्वापजागरणाद्युपपत्तिरितिनित्यानित्य ज्ञानभेदाभ्युपगमपक्षोऽयम् । अत्रापिपक्षेनात्मनः स्वप्रकाशत्वमिच्छन्ति । अमुपक्षं निराकरोति **तत्रोच्यते** इत्यादि । एकं ज्ञानमात्माश्रितमात्मविषयकं च तदपरन्त्वात्माश्रितविषयविपयकं स्वकारणाधीनकत्वात् । उत्पादविनाशशीलं घटाविवदनित्यं च । तत्र द्वितीयसंभवेपि, प्रथमपक्षेआत्माश्रितमात्मविषयकं च नित्यमेकमेव ज्ञानं विद्यते, एतत्कथने न किमपि प्रमाणं विद्यते, तस्मादश्रद्धेयंमतमित्युत्तरपक्षाशयः ।

स्वापकालेनित्यंज्ञानमस्तीत्यत्र किमपि प्रमाणं नास्तीतिकथितंपूर्वम् । स्वाप्रकालेपि नित्यज्ञानमस्तीतिप्रतिपादयितुं पुनः शङ्कते कश्चिदितितदनुवाद्यतन्मतं निरसितुमुपक्रमते **ननु स्वीकृतस्ताव**दित्यादि, अर्थात्, स्वापकालिकस्यात्मप्रकाशस्यज्ञानमन्तरेणोपपादनस्याशक्यत्वात् स्वापकालेआत्मविषयकंज्ञानमवश्यं मन्तव्यम्, तत्काले च चक्षुरादिकरणानामुपरमात् तात्कालिकं तज्ज्ञानंनित्यमेवेतिपरिशेषाज्ज्ञायते इत्याशयवान् स्वापकाले आत्मप्रकाशंसाधयितुं प्रयतते, तत्राह, **ननु स्वीकृतस्तावदित्यादि,** जागरणकालेसर्वदैवात्मानुभवः स्वीकृत एव सर्वोपिस्वापकालेतदनु-

भावस्योत्तरोत्तरकालंस्मर्यमाणत्वात् [परामृश्यमानत्वात्] यत्कालिकोऽभावः परामृश्यते, तत्कालिकेन तदाश्रयस्वरूपज्ञानेनापि भवितव्यमेव, मध्यान्हकालपरामृश्यमान इव प्रातःकालदृष्टतडागादिवृत्तिनिगजाद्यभावे । यत्कालिकाभावाश्रयतया यः पदार्थः परामृश्यते स पदार्थस्तत्कालिकस्वरूपानुभववान्, यथा प्रातःकालानुभूततडागतटादिः । स्वापकालिकार्थानुभवाभावाश्रयतया चायमात्मापरामृश्यमानोभवतीत्यतस्तत्कालिकस्वरूपानुभववानित्येवं निश्चीयते, इतिचेन्मैवम्, व्यभिचरितत्वात्, प्रातस्तत्रनाहमासमितिस्वाभावभूमितयाऽवगतेन प्रातरनवगतपर्वततडागादिना अभावप्रपत्तिकालेप्रतिपिपत्सितभावसमकालवर्तिनः तदाश्रयस्सरूपस्त्ववगत्याविद्यमानत्वे तत्कालतयाऽवगमप्राप्तस्यप्रतियोगिनोऽनवगत्या च भाव्यमेवाभावज्ञानस्येत्येतावत् ।

भवोऽनुमानात्वेवसाध्यो भवतीति । अत्रवाक्ये प्रतिज्ञा विवक्षिताहेतुवाक्यं, **तात्कालिकस्येत्यादि** उत्तरोत्तरेतिकथनंतु दिनभेदाभिप्रायेण कथितम्, स्वापोत्तरकालं प्रबोधकालमितियावत् । उदाहरणवाक्यंतु **यत् कालिकाभावाश्रयतयेत्यादि** । व्याप्तिप्रतिपादकं वाक्यं मध्ये निवेशितम् । ततश्चात्रायमनुमानाकारः फलितो भवति, आत्मास्वप्नकालिकस्वरूपप्रकाशवान् स्वप्नकालिकज्ञानाभावाश्रयतयाऽनुसंधीयमानत्वात्, यो यत्कालिकाभावाश्रयतयाऽनुसन्धीयमानो भवति, स तत्कालिकानुभवविषयो भवति, यथा प्रातःकालीनगजाद्यभाववत्तयाऽनुसन्धानविषयः प्रातःकालपरिदृष्टतडागतटादिरिति । तमिममनुमानप्रयोगघटकलिङ्गं व्यभिचारदोषेणदूषयितुमाह, **मैवम्** इत्यादि **व्यभिचरित्वादिति** व्यभिचारदोषमेवोपपादयति **प्रातस्तत्रनाहम्** इत्यादि, अननुभूते प्रातःकालेमध्यदिनेदैवात्स्मृते यस्मिन् गिरीनदीतडागादौ प्रातस्तद्वृत्तितयास्वस्याप्रतिसंन्धानवलात् स्वस्याभावः प्रातःकालिकःपरामर्शविषयोभवति, तदवच्छेदेनात्रव्यभिचारोभवतीतिज्ञातव्यः । ननु तात्कालिकाश्रयज्ञानाभावेतात्कालिकाभावाश्रयतयातस्यप्रतिसन्धानंकथं संगच्छते तत्राह, **अभाव प्रतिपत्ति** इत्यादि । अवगमप्राप्तस्य=प्रतिपत्तियोग्यस्येति । यत्कालिकपदभाववत्तया, प्रतिसन्धीयमानत्वं यस्य, तत्र प्रत्यनुसन्धाने तस्य तत्कालेऽवस्थानमेवापेक्षितम्, प्रतीतिस्तु—अभावप्रतिपत्तिसमये एवापेक्षितो भवति । तथा तात्कालिकतद्वृत्तितयाप्रतिपत्तियोग्यस्यप्रतियोगिनःस्तथाऽप्रतिपत्तिश्चाभावज्ञाने एवापेक्षितो भवति । यत् कालिकोऽभावः परामृश्यते तत्काले तदाश्रयप्रतीतिर्भवतु मा वा इत्यत्रनाग्रहः, इतिसाश्रयप्रतीतिर्नापेक्षिता । अर्थात् अभावज्ञानेप्रतियोगिज्ञानमेवकारणम्, अत्यन्ताभावप्रत्यक्षेप्रतियोगिनो योग्यताया एवापेक्षितत्वात् । अन्यथाऽयोग्येवस्तुनिगन्धाद्यभावस्य प्रत्यक्षत्वं न स्यात् । अन्योन्याभावप्रत्यक्षे एवाधिकरणयोग्यतायाअपेक्षणात्, अतएव स्तंभादौपि शाचादिभेदः प्रतीयते, तत्र प्रतियोगिनोयोग्यतायाअनपेक्षणात् । एवञ्च "स्वापकाले" एतावन्तंकालं न किञ्चिदवेदिपंमूढोऽहमासमित्यादिप्रतिसन्धानेननात्मानुभवः कथमपिसिद्ध्यतीति भावः ।

[अन्तरेणापि] विनापिस्वापकालिकमात्मानुभवमिहतदुभयमुपपद्यते, प्रत्यभिज्ञयैव[प्रबोधे] जागरणकाले स्वरूपसिद्धेः । जाग्रत्कालिकानुभवस्यपटीयसः स्वापेपिसतोऽनुभवस्यस्मर्तव्यस्यसतस्तदानींस्मरणाभावदर्शनाच्च ।

सुखमहमस्वाप्सं न किञ्चिदवेदिसमित्यादिवृत्तयस्तु नस्मरणात्मिकाः किन्तु प्रबोधकालिकशरीरेन्द्रियलाघवपाटवादिपर्यालोचनपूर्विका एव, जातिवेषसंस्थानादिवदेव । तेपि हि परामृश्यमाना भवन्ति, एवं जातीयकोहमीदृशेनवेषेणानेन संस्थानेन चात्रेयन्तं कालमस्वाप्समिति । स्मृतिरूपत्वेपिपूर्वज्ञानस्यजाग्रत्कालिकत्वदेवनिद्रालक्षणयावृत्त्या, प्रमाणविपर्ययतर्कादिवृत्त्यभावकारणतमोगुणालंबनयाप्रतीत्यैव तत्कालप्रसिद्धस्यात्मनः स्मरणं जायते, नतु स्वाभाविकसंवेदनसिद्धस्यप्रकाशस्य वा, तत्र प्रमाणा-

अन्तरेणापिस्वापकालीकमात्मानुभवम् इत्यादि, इहात्राभावप्रतिपत्तिकाले, **तदुभयम्**—स्वप्नकालिकात्मस्थितेः प्रबोधकालेजागरणेऽवगमः प्रतियोगिनःसंवेदनस्य, स्वापकालिकत्वेनास्मरणं च, एतदुभयमपिप्रत्यभिज्ञयैव “सुखमहमस्वाप्सम्” इत्यादिप्रत्यभिज्ञाबलेनैव स्वापकालिकस्यात्मस्वरूपस्यप्रबोधेजागरणकालेचावगमउपपद्यते एवेति । “पटीयसः अतिशयेनपटुरितिपटीयान् तादृशस्य स्फुटप्रकाशस्यानुभवस्यस्वापसमयेसत्वेविद्यमानत्वे, तादृशस्यैवानुभवस्यप्रबोधेजागरणसमये स्मरणं भवति । स्मरणाभावाच्च तस्यानुभवस्यतदभावस्यविद्यमानत्वेपिस्वापकालिकस्यात्मनि, प्रबोधकाले परामर्शोऽर्थात्स्मरणंसमुपपद्यते एवेति भावः । अथ स्वापसमयेसुखत्वरूपेणात्मनोभानंविना “सुखमहमस्वाप्समित्याकारकस्मरणस्यान्यथाऽनुपपत्त्या, अन्यथानुपपत्तिप्रमाणेनस्वापसमयेपितादृशात्मनो भवतीति, अवश्यमेवस्वीकर्तव्यमन्यथा तदनुपपत्तेरित्याशङ्कायामाह **सुखमहमस्वाप्सम्** इत्यादि । सुखमस्वाप्समित्याकारकं ज्ञानं न स्मरणात्मकम्, किन्तु प्रबोधकालिककरणपाटवादिपूर्वकमेव, अर्थात् सुप्तप्रबुद्धस्यप्रबोधकालिकानुमित्यादिजनितमेव । सुप्त एवाहं प्रबुद्ध, इत्यादिप्रत्यभिज्ञाऽक्षिप्तस्वापसामयिकात्मसत्ताविषयकमेवेदमनुसंधानं नतु स्मृतिरूपमितिभावः । **जातिवेषसंस्थानादिवदिति,** यथा स्वानसमये जातिवेषसंस्थानादेः प्रतिभानाभावेपि, यथा जात्याद्यंशस्यभानमनुमानादिलभ्यं भवति । तथैवात्रापिसुखाद्यंशस्य स्वापेमानाभावेपिसुखाद्यंशस्यप्रतिसन्धानमनुमित्यादिप्रमाणेनैव भवतीतिभावः । तदेव दर्शयति **तेपि परामृश्यमाना भवन्ति** प्रबोधकाले नतु स्वप्नेऽनुभूताः यथा ब्राह्मणादिजातीयकोहममुकवेषेणामुकसंस्थानेनास्मिन् स्थलेसुप्तोहमासमित्यादि । न च जात्यादीनां प्रतिसन्धानं स्वप्नकाले जातं येनेदानीं सुप्तोत्थितस्यस्मरणमितिकल्पयितुं शक्यम् । किन्तु प्रमाणान्तरबलेनैवोपस्थापितं भवति प्रबोधकाले तस्मादिदंजाग्रत्कालिकएवानुभवोनत्वेपांस्मरणमिदानीमितिभावः । स्वापकालेभवतुनामानुभवस्तथापि तादृशोऽनुभवोनात्मसत्ताप्रयुक्तः, भवतु वा स्वापकालेऽज्ञानसाक्षितयाऽऽत्मनः प्रतिभासः किन्तु स आत्मनः प्रतिभासोनात्मस्वरूपप्रयुक्तआत्मा-

भावात् । निद्राऽपिप्रमाणविषयतर्कादिवत् वृत्तिविशेष एव तदाह भगवान् पतञ्जलिः "अभावप्रत्ययालंबनावृत्तिर्निद्रेति ।" प्रयोगश्च विमताऽत्मस्वरूपसिद्धिर्विषयानुभवमूला, आत्मस्वरूपसिद्धित्वात् जाग्रत्कालिकात्मस्वरूपसिद्धिवत् । तथा, आगन्तुकं ज्ञानम्, आत्मविशेषगुणत्वात्, सुखदुःखादिवत् न च सुखादयोनात्मगुणाः अप्रसिद्धाश्रयान्तरत्वे सति, अहमितिप्रत्ययसामानाधिकरण्येन प्रकाशमानत्वाद् ज्ञानवत् ।

। इति ज्ञानस्यानित्यत्वेपूर्वपक्षः ।

वभासः किन्तु, अनित्यतात्कालिकाज्ञानविषयकानुभवप्रयुक्त एवेति । एतावतानात्मनः स्वप्रकाशत्वं सिद्ध्यतिं, नवाऽत्मनि नित्यंज्ञानमस्तीत्यपिसिद्ध्यतीतिभावः ।

ननु अज्ञानं नामज्ञानविरोधित्वमतएव तादृशाज्ञानविषयकवृत्तेः स्वापे स्वीकारे, स्वापस्यैवविघातः, यतः स्वापेनाशेवृत्तेर्विराम एवेति, तत्काले तमो विषयकवृत्तेसत्वेस्वाप एव न स्यात् । अर्थात् वृत्तिसामान्याभावस्यैवस्वापत्वात्तत्राह **निद्रापिप्रमाणविषय** इति यथा प्रमाण विपर्ययादिकंवृत्तिविशेषरूपं तथैव निद्राप्येकावृत्तिविशेषलक्षणैव । तदाहभगवान् पतञ्जलिः "अभावप्रत्ययालंवनावृत्तिर्निद्रेति" [अभावप्रत्ययम्, अभावात्मकविषयमालभतेयावृत्तिः सा निद्रावृत्तिः, अर्थादभावादिविषयकवृत्तेस्तदानीमभावेपि, अभावविषयिणीयावृत्तिः सैवनिद्राप्रमाणविपयादिज्ञानवृत्त्यभावहेतुभूततमोवृत्तिरेवनिद्रेत्यर्थः] ततश्चात्मावृत्तेर्निद्रात्वकथनात्, आत्मतमोऽतिरिक्तविषयकज्ञानसामान्याभावस्यैव स्वापस्वरूपत्वावश्यमेवेष्टव्यमिति भावः । ननु घटादिविषयकज्ञाने विद्यमाने एव तादृशज्ञानवत्तयैवात्मानुभवोनान्यथा तदनुभव इत्याशङ्कायांप्रयोगंदर्शयति **प्रयोगश्चार्थादनु**-मानप्रयोग इत्थं भवति, **विमता आत्मस्वरूपसिद्धिः** विषयानुभवमूला, आत्मस्वरूपसिद्धित्वात्, जाग्रतस्तत्सिद्धिवत्, तथा, ज्ञानम्, आगन्तुकम्, आत्मविशेषगुणत्वात्, सुखदुःखादिवदिति ।" तत्रविमताऽत्मसिद्धिरितिपक्षः । अर्थात् नित्यानित्यज्ञानप्रयुक्ततत्वस्वरूपप्रयुक्तत्वविप्रतिपत्तिविषयः स्वापकालिकात्मस्वरूपप्रकाशः" इत्यन्तःपक्षोधर्मिनिर्देशः- तत्र पक्षे विषयानुभवसाधनेन च तस्य ज्ञानस्यानित्यत्वंफलितं भवति । ज्ञानस्यचानित्यत्वे च द्वितीयःप्रयोगोज्ञानमागन्तुकमित्यादि, ज्ञानमागन्तुकंस्वकारणजनितमनित्यमित्यर्थः । आत्मविशेषगुणत्वादिति हेतुः । यत्र सुखादौ आत्मविशेषगुणत्वंहेतुरस्तितत्रानित्यत्वमपिविद्यते एवेत्यादि, क्रमेणज्ञानस्याप्यात्मविशेषगुणत्वात्तत्रापिसाध्यमनित्यत्वंसिद्ध्यत्येवेति । दृष्टान्तेसुखादौ, आत्मविशेषगुणत्वरूपोहेतुरस्तिनवेतिसंशयंनिराकर्तुमाह **न च सुखादयोनात्मविशेषगुणाः** इत्यादि । अहं प्रत्ययसामानाधिकरण्येन अहं प्रत्ययविषयाहमर्थवृत्तित्वेनेत्यर्थः । अहमर्थस्यात्मनोधर्मतयाप्रतीयमानस्य 'अहंस्थूलःकृशः" इत्यादिप्रतीतिसिद्धस्थूलत्वादेः शरीरलक्षणमाश्रयान्तरंलोकप्रमाणेन सिद्धमितिः तन्निवारणार्थम्, अप्रसिद्धाश्रयान्तरत्वेसतीतिसत्यन्तंविशेषणं हेतुघटकतयाप्रक्षिप्तम्, तथा च स्थूलत्वाश्रयोदेहोनाप्रसिद्धोऽपितु

अत्राहुरात्मस्वरूपवेदिनोयदात्मनश्चैतन्यं तत्स्वत एव नान्यतः स्वरूपोपाधि धर्मत्वात् तेजसः प्रकाशवत् । चैतन्याश्रयत्वमेवात्मनः स्वरूपं न तदतिरिक्तं तस्य स्वरूपम् । यच्चैतन्यरहितंतन्नात्माघटादिवत् । न च चितिशक्त्याऽत्मत्वं, मोक्षे तन्नाशप्रसङ्गात् । बोधेनैवघटादिभ्यआत्मनोभेदसिद्धौबोधशक्तेस्तदन्यस्यकल्पनानिलोकप्रसिद्ध एवेति । सुखादेरपरोक्षत्वादिन्द्रियधर्मत्वमपिनिराकृतमित्याशयः प्रकरणस्य ।

। इति ज्ञानस्यानित्यत्वपूर्वपक्षप्रस्तावेतत्वदीपः ।

गतप्रकरणेन, विषयप्रकाशस्यकदाचित्कत्वात्, आत्मनोधर्मभूतज्ञानमागन्तुकंस्वकारणजन्यत्वेन ज्ञानमनित्यमेवेतिप्रतिपादितम् । आत्मनःस्वरूपप्रकाशोपि न सार्वदिकः किन्तु विषयविषयकज्ञानकालेज्ञानद्वारेणैवात्मप्रकाशो भवति नत्वात्मनःप्रकाशस्वतो भवतीति शङ्कांनिरस्यज्ञानस्यनित्यतां साधयितुमुपक्रमते **अत्राहु** रित्यादि । यदिदमात्मनोधर्मभूतंज्ञानंतदात्मस्वरूपप्रयुक्तमेव नतुपरतो भवति । तज्ज्ञानमात्मनोनित्यत्वान्नित्यमेवनानित्यम् । यतो ज्ञानस्यात्मस्वरूपकधर्मत्वात् । ज्ञानस्येति न ज्ञानरहितमात्मस्वरूपंव्यवस्थितं भवेत्, यथा सूर्याग्निप्रभृतिकं तेजोधातुः । प्रकाश विरहितंनात्मनः स्वरूपंलभते तथैव प्रकृतेबोधविरहितआत्मापि स्वात्मस्वरूपमेव न प्राप्नुयात् । अतोऽशेषविशेषगुणोच्छेदलक्षणमोक्षकालेपिज्ञानवत्वमेवात्मस्वरूपमित्येववक्तुं युक्तमिति । यतो ज्ञानरहितस्यानात्मत्वात्, घटादि जडवत् । यथा प्रतिव्यधिकरणज्ञानाभाववान् घटादिः सर्वथा जड एव नत्वात्मरूपस्तथैवात्मनोपिज्ञानराहित्योपगमे, स आत्मास्वस्वरूपमेवपरित्यजेत्, तस्मात्सर्वदाऽत्माज्ञानाश्रय एव, स च मोक्षकालो भवतु संसारकालो भवतु तत्र न कोपि दुराग्रहः । ज्ञानाश्रयस्तुसर्वदैवेति ततश्चात्मनोधर्मभूतं ज्ञानं नित्यमेव नतु पाकजरूपरसादिवदनित्यम् ।

ननु मोक्षकाले ज्ञानाभावेपिज्ञानशक्तिविशिष्टमात्मस्वरूपमेव मोक्षकालेस्यादितिशङ्कांनिराकर्तुमाह **न च चितिशक्त्याऽत्मत्वमिति** अयमाशयः कारणत्वंद्विविधम्, फलोपहितत्वरूपं योग्यतारूपं च । तत्र सामग्रीसद्भावेतदव्यवहितोत्तरकालं कार्यमुत्पाद्यते, यत्र स्थले प्रथमंफलोपहितत्वरूपंकारणत्वम्, यथा दण्डादिसकलकारणकूटसत्वेतदव्यवहितोत्तरकालेऽवश्यमेव घटादिः कार्यं जायते एव । द्वितीयंतु यत्र तत्कालेकार्यंनोत्पद्यते किन्तु कालान्तरेऽनेन कार्यंस्यादित्यालोच्यतस्यसङ्ग्रहः क्रियते यथावनस्थितदण्डेन तत्कालेघटो न भवति, तादृशदण्डे स्वरूपयोग्यतारूपं कारणत्वम्, कारणतावच्छेदकधर्मत्वरूपमेवयोग्यत्वमयोग्यत्वमिति । प्रकृते तत्काले ज्ञानं यद्यपिनास्ति तथापिज्ञानोत्पादकशक्तिमत्वमात्मनि विद्यमानमेव, अर्थादात्मनिज्ञानोत्पादकशक्तिमत्वरूपायोग्यताविद्यते एवेतितदादायनिर्वाहे सति, कथमुच्यते, आत्मनोज्ञानशून्यत्वेऽनात्मत्वम्, अनात्मत्वंतु तस्यैवयस्यतत्काले न ज्ञानोत्पादकत्वं नवा कालान्तरेपीतितत्रैवतत्वं घटादिवत् । परन्तु अयंतु कारणतायाविचारस्तदुपयोगश्चानित्ये वस्तुनि भवति, यथा दण्डोऽनित्य

र्थिका । वैशेषिकमतेबुद्ध्यादिनवगुणानामत्यन्तोच्छेद एव मोक्षः । तत्र सर्वथा विलुप्तकार्यंवस्तुतदुत्पादनसामर्थ्यमेतीत्यत्र न किमपि प्रमाणं विद्यते । शरीरादिसम्बन्धितया परिदृश्यमानसुखादिकार्यंविशिष्टवर्तिनीमेवात्मकार्योत्पादशक्तिंज्ञापयति, धूमवत् आर्द्रेन्धनसंयुक्तवन्हौधूमोत्पादनसामर्थ्यम्, शाल्यङ्कुरवत् सतुषधान्ये । अपि च ज्ञाने सत्येवात्मनोऽनात्मभेदसिद्धौतच्छक्तेः कल्पनंसर्वथैवनिरर्थकम् ।

इति स यदा स्वरूपतो भवति तदा तत्र फलोपहितत्वम्, यदातु स दण्डो न विद्यते यथावनीयदण्डस्तथापिकालान्तरेसोपि कार्यजनकोभविष्यत्येवेतिकृत्वातत्रकारणतावच्छेदकदण्डत्वस्य विद्यमानत्वेनतत्रस्वरूपयोग्यत्वं भवति । नित्यपदार्थे यदि स्वरूपयोग्यत्वंकारणत्वमिष्येत, तदानित्यस्यविनाशाभावेनस्वरूपयोग्यत्वरूपकारणत्वेफलमवश्यमेवस्यादिति नियमात् नित्यस्यात्मनः स्वरूपयोग्यत्वलक्षणकारणत्वेमुक्तात्मनोपिकदाचिज्ज्ञानोदयः स्यात् । परन्तु मुक्तात्मनस्तवमते कदापि ज्ञानोदयाभावात्, ज्ञानशक्तिरपिनष्टैवतदा, आत्मविनाश एव भवद्भिः प्रतिज्ञातः स्यात् । अर्थाद् ज्ञानशक्तिमत्वस्यैवात्मत्वस्वीकारेज्ञानशक्तिविनाशे आत्मरूपमपिनश्येदिति "वृद्धिमिच्छतोमूलमपिते नष्टमिति" लोकाभाणकोनातिक्रान्तः स्यात् । अर्थात् स्वरूपनिरूपकधर्मविनाशे तादृशधर्माश्रयीभूतस्वरूपमपिनश्येदिति भावः । ननु ज्ञानं वा ज्ञानंशक्तिर्वा आत्मनः स्वरूपकं न, किन्तु ज्ञानादिकं स्वकारणसमासादितरूपकमागन्तुकमनित्यमेव, तथा भूतमपिज्ञानादिकमात्मन एव धर्ममिति मन्ये, तन्न घटादेधर्मभूतमित्थमेवात्मानात्मव्यवस्थोपपादिता भवतीतिचेत्सत्यम् ज्ञानस्यात्मस्वरूपकधर्मत्वमेवेत्यस्यस्थापयिष्यमाणत्वात् अत्रैव प्रकरणे, ज्ञानस्यात्मस्वरूपनिरूपकधर्मत्वं यथा भवति, तादृशविचारस्याग्रेकरिष्यमाणत्वादिति । जडात्मवादस्य "प्रज्ञानंब्रह्म" "सत्यंज्ञानमानन्दं ब्रह्मेतिवेदान्तविरुद्धतयाऽनादरणीयत्वादितिभावः । चितिशक्त्याआत्मत्वस्वीकारेमोक्षकालिकात्मनि ज्ञानादेरभावात्, आत्मनोपिविनाशप्रसङ्गदर्शयितुंवैशेषिकमतंविविच्यदर्शयितुमाह **वैशेषिकमतेबुद्ध्यादिनवगुणानामित्यादि** । बुद्धिप्रमुखानामात्मविशेषगुणानामात्यन्तिकोच्छेद एव मोक्षस्वरूपंबुद्ध्यादीनामात्मनः संयोगजनितानामात्ममनः संयोगाभावान्न तत्रमोक्षकालेसंभव इति तन्मतम् । परन्तु यद्वस्तु आत्यन्तिकलुप्तकार्यकंजातम्, तद्वस्तुतत्कार्योत्पादकशक्तिविशिष्टमिति कथने किञ्चित् प्रमाणंनास्तीतिभावः । मोक्षकालेमुक्तस्यात्मन अचिद् घटादिभेदसिद्ध्येऽव्यावर्तकचिच्छक्तेराश्रयणंविरर्थकम्, बोधात्मकहेतुनाचिदचितोर्भेदसंभवादित्याशयेनाह **अपिच ज्ञानेसत्येव** इत्यादि । बोधात्मक [ज्ञानात्मक] हेतुनैवजडचेतनयोर्भेदसिद्धौतत्सिद्ध्ये, आत्मनिबोधजनकशक्तेः स्वीकारस्यनैरर्थक्यात्, आत्माजडभिन्नो बोधात्, एतावतैवतयोर्भेदःसिद्ध्यतीतिबोधशक्त्याश्रयणमात्मनिमन्दप्रयोजनकमेवेतिभावः । ननु यदि ज्ञानमपिनित्यम्, स्वर्गमोक्षव्यवस्था सिद्ध्ये आत्मनोऽपिनित्यत्वमेवैतदुभययोर्नित्यत्वकल्पनेगौरवमितिलाघवात्, नित्यज्ञानस्यैवात्मत्वं स्वीक्रियतामितिशङ्का-

न चैवं तदाबोधरूप एवात्माभवत्विितिवाच्यम्, बोधस्याश्रयप्रतियोगिसापेक्षत्वात्, आत्मनश्चतद्विपरीतस्वभावत्वात् । साक्षादेवाहमर्थस्यात्मनः स्फुरणदर्शनात् । श्रुतितर्कानुभवबलेनबोधवंत एवात्मत्वस्य व्यवस्थापितत्वात् । न च चैतन्यमात्रात्मवादेपि तस्यात्मन आगन्तुकविषयसम्बन्धेबोधत्वमारोप्यतस्यबोद्धृत्वसमर्थनं युक्तं प्रतिभाति, सम्बन्धस्य द्विष्ठतयाऽत्मवत्, अर्थस्यापिज्ञातृत्व [बोद्धृत्व]स्य प्रसङ्गात् ।

मनुद्यपरिहर्तुमाह **न चैवं तदाबोधरूपएवात्मेति** उभयोराश्रयाश्रितयोर्नित्यत्वापेक्षया नित्यज्ञानमेव भवतु, आत्माद्वैतमतवदिति शङ्कितुराशयः । परिहरति **बोधस्याश्रयप्रतियोगीसापेक्षत्वात्** अर्थात् ज्ञानस्य प्रतियोग्यनुयोगिसापेक्षत्वम्, तत्रात्माज्ञानाश्रय इति स आत्मायोगी भवति; तथा ज्ञानस्यप्रतियोगिघटादिविपयः, एतदुभयसापेक्षत्वं ज्ञानस्य । आत्मातु न प्रतियोग्यनुयोगिसाक्षेप इति प्रतियोग्यादिसापेक्षत्वनिरपेक्षत्वेन विरुद्धस्वभावतया, नित्यस्यापिज्ञानस्य न नित्यात्मरूपत्वम् । नहि विरुद्धस्वभावयोःप्रकाशतमसोरेकत्वंविरुद्धत्वादेव तथैव नित्यत्वेनज्ञानात्मनोः कथञ्चित्समत्वेपिस्वगतविरुद्धधर्माक्रान्ततयानैकत्वसंभावना । यथा द्रव्यत्वेनघटपटयोरेकत्वेपिघटत्वपटत्वादिविरुद्धतयाभेदएवंनतुतयोरेकत्वमपितुपरस्परभिन्ना एव तेन ज्ञानस्यनित्यत्वेपिनित्येनात्मना भेदो नवा एकेन तदपरस्यगतार्थतेति भावः । अपि च कल्पनायामेवलाघवगौरवयोर्विचारः संभावना भवति, नतुवस्तुस्वरूपेलाघवगौरवयोरवसरः । नतु स्फुटतया ज्ञायमानेबोधयति, आत्मनि तदवसरो जायते, एतदाशयेनाह **साक्षादेव** चेतयितुरहमर्थस्य स्फुरणात्, श्रुतितर्कानुभवबलेनचितिमत एवात्मस्यान्तरमेव प्रतिपादितत्वात् । घटमहंजानामीत्यादिप्रतीत्यासाक्षादेवात्मनः प्रतिभासनात् तदन्यस्यतुतद्बलेनैव स्फुरणदर्शनादिति । ननु "अहं जानामीति" प्रतीतिबाधवत्यात्मनिभ्रमरूपैव, शुक्तौ इदं रजतमितिप्रतीतिवत्तत्राह, **श्रुतितर्कानुभवबलेनेत्यादि** । श्रुतिस्तावत् "अत्रायं पुरुषः स्वयंज्योति र्भवति" अयमात्मा सर्वानुभूरित्यादियुक्तिरपि तत्रतत्रप्रतिपादितैव । अनुभवोपि अहं स्वात्मानमनुभवामिसुखीत्यादि । तथा च सत्तर्कसत्प्रमाणतर्कबलात् ज्ञात्रात्मप्रत्यक्षस्याहंजानामीत्यादिरूपस्य न भ्रान्तित्वमपितुयाथार्थ्यतत्वम् । तस्मान्नज्ञानात्मनोरेकत्वम् । ततश्च न चैतन्यमात्रस्वरूपएवात्मा किन्तु तयोर्भेद एवेति स्थितम् । ननु योयंज्ञानस्यविपयसम्बन्धस्तस्यैवबोधनाम भवति, अतआत्मनोबोद्धृत्वमुपपद्यते, इत्याशयेनशङ्कते **न च चैतन्यमात्रात्मवादेपितस्यागन्तुकविषयसम्बन्धे** इत्यादि । विषयचैतन्ययोर्यःसम्बन्धस्तस्यैवबोधत्वेनाभिमतस्यसंयोगादिरूपत्वे तादृशसंयोगादेःसंम्बन्धत्वेनद्विनिष्टत्वेनात्मवत्, विषयस्यापिबोद्धृत्वमापतेदित्याशयेनोत्तरयति **सम्बन्धस्यो**भयनिष्ठतयाऽत्मवत्, विषयस्यापिबोधद्धृत्वमनिवारितमेव भवेत् । यथा आत्मनस्तादृशसम्बन्धाश्रयतयाबोद्धृत्वं भवति तथैव विषयस्यघटादेरपिद्विष्टसंयोगाश्रयतयाघटादि विपयस्यापि बोद्धृत्वं कोनाम निवारयितुं शक्येत ।

न च यथा कार्यकारणसम्बन्धस्योभयनिष्ठत्वेपि कार्यकारणत्वव्यवस्थोपपद्यते तथैव प्रकृतेपि बोद्धृत्वादि व्यवस्थोपपन्नास्यादिति वाच्यम्, भावानवबोधात् । तत्र जन्यजनकयोः परस्परापेक्षानियमलक्षणसम्बन्धत्वात्, न दोषः कोपि भवति । अत्रापि

ननु यथा कार्यकारणभावस्य कार्यकारणोभयसापेक्षत्वेपि भवति तथात्रापि किं न स्यात् । तत्परिहारायोपक्रमते **न च यथा कार्यकारणसम्बन्धस्येत्यादि** अयमाशयो यथाकार्यकारणभावस्थले, कार्यकारणोभयनिरूप्यत्वेपि योग्यताबलात्, दण्डादिकं कारणंकार्यञ्चागन्तुकं घटादिकम्, दण्डादिर्घटस्यकारणंघटादिश्चदण्डादेकार्यमितिसर्वलोकप्रसिद्धोपपद्यते नतु तत्र कश्चिद्विवदति, तथैव प्रकृतेपिचिद्विषयसंवन्धस्यतदुभयविषयविषयिनिरूप्यत्वेपि, आत्माभवतिबोद्धा घटादिविषयश्चबोध्यः स्यादितिस्यादेववोद्धृव्यवस्थेति न तत्र कोपि विवादः पदमादधातीतिशङ्कितुः स्वरूपम् । तदिदमाक्षेपं परिहरति सिद्धान्ती **तत्र जन्यजनकयोः परस्परापेक्षात्** इति अयमाशयःकार्यकारणभाव इत्यत्र, कार्यत्वं स्वरूपसम्बन्धेनकार्यमात्रधर्मःकार्येएवकारणत्वञ्चस्वरूपेण कारणमात्र एव, तिष्ठतीति न तयोर्द्विष्ठत्वमिति नतौ परस्परासम्बद्धत्वात्, संवद्धत्वात् पार्थक्येन सम्बन्धः किन्तु कार्यनिरूपितकारणत्वंकारणनिरूपितकार्यत्वम्, परस्परनिरूप्यनिरूपकभावापन्नंसदेव सम्बन्धतांलभते । एवं विषयविषयिभावसम्बन्धस्थलेपि विषयत्वस्यविषयमात्रनिष्ठत्वात् । विषयित्वस्य ज्ञानमात्रगतत्वेन द्विनिष्ठत्वाभावात् न पार्थक्येनसम्बन्धता, किन्तु विषयनिरूपितविषयित्वंविषयिनिरूपितविषयत्वमेवसम्बन्धो भवति । तत्र चोभयोर्विषयविषयिणोःपरस्परापेक्षत्वात् तथा व्यवस्थाभवतुनाम, परन्तु प्रकृते परस्परापेक्षायाः कारणाभावात् वोद्धृत्वबोद्धव्यत्वव्यवस्थानोपपादिता स्यात् । अर्थात् यद्यपि कार्यस्यघटादेर्जनिमतः करणस्य च कपालादेर्जनयितुः सम्बन्ध एव कार्यकारणभावसम्बन्धेनव्यवहृतो भवति लोके । परन्तु तत्र कार्यत्वंकारणकपालादिनिरूपितं कार्यं घटादिमात्रगतम् नतुकार्यकारणोभयवर्ति, तच्चकार्यत्वंकार्यमात्रनिष्ठमनन्यथा सिद्धस्वनियमतः पूर्ववर्तिकारक्षापेक्षत्वलक्षणंस्वपूर्वव्यवहितकालावच्छेदेनकार्यव्यापककारणकत्वेपर्यवस्यति, कारणत्वं च कार्यनिरूपितं कारणनिष्ठंस्वोत्तरभाविकार्यापेक्षत्वलक्षणं कार्यनियतपूर्वकालवर्तित्वेपर्यवस्यतीति भिन्नभिन्नमेवकार्यकारणभावेप्रविष्टम् । अत्रतु एक एवोभयस्मिन् समवायसम्बन्धेन विद्यमानः संयोगइति कथमिवात्रव्यवस्थाव्यवतिष्ठेत, अर्थात् व्यवस्था नकथमपि घटते इति भावः ।

इदमत्र विचारणीयम्, यद्यपिं संयोगविभागानामनेकाश्रितगुणानामुभयनिष्ठत्वेपि, अनुयोगिता सम्बन्धेन तादृशसंयोगस्यचैतन्ये एव वर्तमानत्वेन चित एव वोद्धृत्वम्, विषयोघटादिस्तुप्रतियोगितासम्बन्धेनतस्यासम्बन्धस्यसम्बन्धीति विषयस्यैवबोद्धव्यत्वमितिबोद्धृबोध्यव्यवस्थायां न कापि क्षतिः, यथागमनक्रियायामेकस्यैवसंयोगस्यकर्तृकर्मोभयवृत्तित्वेपिकर्तरि प्रतियोगिता सम्बन्धेनसंयोगोग्रामेतु अनुयोगितासम्बन्धेनेति तत्र ग्रामस्याधिकरणत्वं पुरुषेतु प्रतियोगितया स

स एव सम्बन्ध इति चेन्न प्रकृतेऽपेक्षाहेतोरभावात् । किमर्थमर्थचैतन्यमपेक्षते अथवा चैतन्यमेवार्थमपेक्षते । सिद्ध्यर्थमितिचेत् ! कः सिद्ध्यर्थः ? नतावदुत्पत्तिः . तस्या ज्ञातनिमित्तान्तरत्वात् . यथा घटादिकार्यलोकप्रसिद्धकपालकुलालदण्डादिनिमित्तान्तरसापेक्षंभवन् न चितिमपिस्वोत्त्पत्त्यर्थमपेक्षते निराकृतश्च पूर्वमेवविज्ञानमात्रवादः । नित्य-

संयोग इति पुरुषस्याधेयत्वमितिवदत्रापि व्यवस्था संभवति, तथापि न चिन्मात्रस्वरूपत्वमात्मनः किन्तु चित्याश्रयत्वमपि श्रुतिप्रमाणसिद्धत्वात् स्वीकर्तव्यमेवेति ज्ञातव्यम् तदाहुर्जगद्गुरवः श्रीअनुभवानन्दाचार्याचार्यसुरेन्द्राः "चेतनोनामज्ञानाश्रयो जानामिति प्रतीतेर्बोद्धाकर्तेतिश्रुतेश्च 'एपद्रष्टा स्प्रष्टा श्रोताघ्रातारसयिता मन्ताबोद्धाकर्ता विज्ञानात्मापुरुषः (प्रश्न० ५।९) इतिश्रुतिमाण्याज्ज्ञानाश्रयोऽपिजीवःसिद्धान्ते ज्ञानरूपतयाऽङ्गीकृतोऽत एव स ईश्वरवत् प्रत्यक् पदवाच्यः"(श्रौतार्थसङ्ग्रहः) । ननुज्ञानात्मनोरपि परस्परापेक्षानियमलक्षण एव सम्बन्धः स्वीक्रियतामित्याशयेन पुनःशङ्कते **अत्रापि स एवेति** अत्रापिपूर्वोक्त एव सम्बन्धो भवतु इति । परिहरति **न प्रकृतेऽपेक्षाहेत्वभावादिति** अपेक्षायाःहेतुप्रयोजनरूपोऽर्थःप्रकृतोस्तीति । अपेक्षाहेतुत्वमेव प्रदर्शयति, **किमर्थमर्थश्चैतन्यमपेक्षतेचैतन्यंवाऽर्थमपेक्षते** इति, स्वसिद्ध्यर्थमेवार्थश्चैतन्यमपेक्षतेइतिचेत् ? तत्रसिद्धिशब्दार्थः कः ? इति । नचोत्पत्तिरूपैवसिद्धिःस्वसिद्ध्यर्थम् स्वोत्त्पत्यर्थमेवार्थश्चैतन्यमितिनयुक्तम्, तस्या उत्पत्तेरज्ञातनिमित्तान्तरत्वात् । यथाघटादयोभावाःस्वोत्त्पत्तयेस्वोत्त्पत्यर्थंप्रसिद्धकारणमपेक्षमाणाभवन्ति, यथा चैतन्यमपेक्षमाणादृश्यन्ते इति । अथघटादिभावानांवासनाख्यदोषाच्चैतन्ये एव शुक्तिरजतवत् कल्पितत्वेनाधिष्ठानरूपेणचैतन्यापेक्षास्यादेव । नहि अधिष्ठानमन्तरेणकल्पनासंभवति, शुक्त्यभावेरजतकल्पनावदित्याशङ्कांनिरसितुमाह **निराकृतश्चपूर्वमेव विज्ञानमात्रवाद** इति । विज्ञानमात्रमेवात्मा, तच्च विज्ञानमपि क्षणिकंभावत्वात् "यत् सत् तत्क्षणिकमितिनियमात् । तद्द्विविधंनिवृत्तिविज्ञानालयविज्ञानभेदात् । तत्र घटादिविपयकविज्ञानं क्षणिकंतत्प्रवृत्तिविज्ञानमहमित्याकारकं यद्विज्ञानंतदालयविज्ञानं तस्यैवात्मेतिनामभवति । तदुक्तम्—

तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् । तत्स्यादालयविज्ञानं यद्भवेदहमास्पदमिति ॥

अस्यैवालयविज्ञानस्य ज्ञानसुखादिकम्, विज्ञानस्यक्षणिकत्वात् प्रतिक्षणं विनाशेपि प्रथमादिविज्ञानजनितसंस्कारस्योत्तरोत्तरविज्ञानेसंक्रमणात् बाल्येविलोकितस्यवस्तुनोवृद्धावस्थायामपिभवतिस्मरणम्, योहंबाल्येपितरावन्वभूवं स एव वृद्धत्वेप्रणप्तृननुभवामीत्यादि मृगमदवासनावासितवसन इवोत्तरोत्तरे संक्रमणात् । यथावा, कपासवृक्षेलाक्षारसे प्रदानात्, पाकपरंपरयातत्पुष्पेपिरक्तिमायाः संक्रमणेन नदीयपुष्पंरक्तं भवति । तदुक्तम्

"यस्मिन्नेवहिसन्ताने आहिता कर्मवासना । फलं तत्रैव सन्धते कार्पासेरक्तता यथेति ।

सोयं विज्ञानमात्रात्मवादोबौद्धाभिमतोविचारितोनिरस्तश्च । निरासप्रकारस्तु इत्थम्—एतन्मते सर्वस्य

स्यात्मनः स्वोत्पत्त्यर्थमर्थापेक्षेति कथनंव्याहतत्वादेवोपेक्षणीयम् ।

ननुसिद्धिः प्रकाश एवेतिचेत्, स्वयंज्योतिः स्वभावोप्यात्माऽर्थाधीनप्रकाशोयेन तदर्थमर्थमपेक्षते, महदिदमाश्चर्यम् । प्रकाशश्चसंविदेवनतुतदतिरिक्तः कश्चिदर्थधर्मसंभवतीतिपूर्वमेवप्रतिपादितम् । संभवन्नप्यसौ न चितिस्वरूपमात्रनिमित्तकः, तथा सतिसर्वदासर्वार्थप्रसङ्गात् नहि कारणकूटसमवधाने कदाचित्कार्यं भवति कदाचिन्नेति । आगन्तुकातिशयस्याश्रयणे वा नामान्तरेण, ज्ञानमेवस्वीकृतमिति ज्ञानवानेवात्मापि स्वीकृतः ।

। इतिधर्मभूतज्ञानस्यनित्यत्वसाधनम् ।

वस्तुजातस्यनिरन्वयविनाशस्वीकारेणान्वयिनः कस्यचिदभावेन, बन्धमोक्षव्यवस्थास्वर्गनरकादि व्यवस्थापिच न भवति । एवमहंज्ञानवानितिप्रतीतिसिद्धज्ञानात्मनोराधाराधेयभावोपिनोपपादितो भवेत्, भेदघटिताधाराधेयभावस्याभेदे संभवाभावात् । न च "राहोशिरः" इत्यादिवदभेदेपि कदाचित्संभव इतिवाच्यम्, सर्वत्रषष्ठीविभक्तेर्भेदे एव दर्शनेन राहोः शिर इत्यत्रागतिकगति कल्पनात् । तदेवं महतारोपेनविज्ञानात्मवादोवृद्धैर्निराकृतः, तदेवेहापिस्मारितः **निराकृतश्चेति**

एवमुपर्युक्तप्रकारेणमृदादिकारणकघटाद्यर्थस्योत्पत्तौचिदपेक्षां निराकृत्यचितउत्पत्तौ, अर्थस्यापेक्षां निराकर्तुमुपक्रमते **नित्यस्यात्मन** उत्पत्तयेऽर्थस्यापेक्षाविद्यतइत्यनुपपन्नमेवेति । नित्यचैतन्यस्यार्थापेक्षितत्वमिति न युक्तम्, अनित्योहिपदार्थः स्वात्मलाभायकारणसत्ता समवायमपेक्षते, तत्रकारणापेक्षेतिवचनमुपपन्नं भवति परन्तु यः पदार्थोनित्योयद्बलेन सर्वोपिपदार्थः स्वसत्तां लभते तस्यार्थापेक्षास्वोत्पत्तये भवतीति कथनं व्याहतमेव । नित्यश्चस्वोत्पत्तयेऽर्थापेक्षश्चेति । चैतन्य प्रकाशस्याप्यर्थापेक्षांनिरस्यति **सिद्धिः प्रकाशश्चेत्यादि** । एतत्प्रकरणमुपालंभपूर्वकनिराकरणपरकम् । एतावताऽनात्मवेदित्वमेव वक्तुरायाति, यतः सर्वभासकस्यात्मनः "अत्रायंपुरुषः स्वयं ज्योतिर्भवतीत्यादिना स्वयंप्रकाशत्वप्रतिपादनेन तस्यान्यापेक्षत्ववचनंनिरर्थकमेवेति । ननु भवतु प्रकाशे घटाद्यर्थानांचिदपेक्षा, तत्राह, **प्रकाशश्चनसंविदतिरेकीकश्चिदर्थधर्मः संभवतीत्यादि** संविदेवप्रकाशो नतु तदतिरिक्तः कश्चिदर्थधर्मस्तश्चस्वस्मिन्नेव स्वस्यापेक्षणेआत्माश्रयदोषः स्यात्, घटोत्पत्तौ तस्यैव घटस्यापेक्षावदिति । यदि संविदतिरिक्तश्चेत्प्रकाशस्तदापि दोषमाह **संभवन्नप्यसौ न चिति** स्वरूपकारणकः सर्वदासर्वार्थप्रसङ्गादिति । चैतन्यमात्रापेक्षत्वेऽर्थप्रकाशस्यसर्वदैव नित्यत्वं प्रसज्येत । आगन्तुकधर्मवत् चिदपेक्षत्वे च तस्य ज्ञात्रात्मसिद्धिर्निर्गलैव, तत्राह **आगन्तुकातिशयस्याश्रयणे** इत्यादि आगन्तुकातियश्चस्वधर्मभूतज्ञानविकाशरूप एव । तद्विशिष्टं ज्ञानमेवबोधः । तदाश्रयश्चात्मेति न बोधमात्रमात्मेति युक्तम् ।

। इति धर्मभूतज्ञानस्य नित्यत्वसाधनप्रकरणे तत्त्वदीपः ।

ननु सत्येवं घटाद्यर्थव्यवस्थापकतया यदभ्युपगतं ज्ञानंतत्त्वागन्तुकं क्रियारूपं चेतितादृशज्ञानस्य कथं नित्यात्मस्वभावत्वं स्यादिति ? तथाहि अर्थान्तरग्रामादि गतत्वे सति स्वोत्पादकजनकद्रव्यान्तरं गन्तारं प्रतिकार्यत्वादिरूपेणासाधारणो ग्रामादिगन्तव्यदेशप्राप्तिकार्यप्रत्यसाधारणः, तत्कर्तृसमवेत [आगन्तुक] अनित्या सा साधारणगमनादिक्रियाजनिताभवतीतिदृश्यते । तादृगेवचार्थसिद्धिर्यपुरुषविशेषंप्रत्य साधारणीभवति तादृशपुरुषसमवेतक्रियाजन्याऽवश्यमेवेत्यनुमानेन ज्ञातुंशक्यमेवेति

स्यादेतत्, एवं यथाऽत्मनो वोधस्वरूपत्वं न भवति, आत्मनोद्रव्यत्वाद्वोधस्य च गुणत्वात्, द्रव्यगुणयोस्तादात्म्यासंभवात् । तथैवात्मनोर्वोधस्वभावकत्वमपि, उभयोर्विरुद्धधर्माक्रान्तत्वात् तमःप्रकाशयोरिवबोधस्यानित्यत्वं कारणजन्यत्वात् आत्मनश्चनित्यत्वात् । नहिविरुद्ध स्वभावयोर्बोधात्मनोरेकत्वसंभवोऽग्निजलवत् । तथाऽर्थप्रकाशकादाचित्कत्वंसंरक्षणार्थवोध्यस्य कदाचित्कत्वंमन्तव्यमेवेत्याशयेनाशङ्कते **ननुसत्यप्येवं घटाद्यर्थव्यवस्थापकतया** इत्यादि । ज्ञाने क्रियारूपत्वं तथाऽगन्तुकत्वमर्थवदनित्यत्वं च साधयितुंपूर्वपक्षवादी सामान्यतो मुखेन व्याप्तिमेव दर्शयति **तथाहि अर्थान्तरग्रामादिगतत्वे सतीत्यादि** तत्रार्थान्तरं ग्रमादिकम्, गमनक्रियामाश्रित्येदमुक्तम् । ग्रामादिकर्मनिष्ठत्वेसति जनकद्रव्यान्तरं प्रतिजनकद्रव्यं गमनकर्त्तादेवदत्तादिरेव । गन्तव्यदेशप्राप्तिःग्रामपुरुषसंयोगः, अत्र खलु देवदत्तःकर्त्तागमनक्रियायाग्रामादिश्चकर्मगमनगमनक्रिया फलंग्रामप्राप्तिरर्थात् ग्रामपुरुषयोः संयोगःसचसंयोगोद्विनिष्ठत्वात् कर्तृकर्मोभयगतोऽप्ययं संयोगः पुरुषप्रवृत्तिकारणतया पुरुषासाधारणः पुरुषनिष्ठाऽगन्तुकगमनक्रियाजन्य एव दृष्टोभवतीत्यर्थः । कर्तुरनधीनत्वादिना कर्त्रसाधारणार्थान्तरनिष्ठधर्मत्वयापकंकर्तृनिष्ठगंतुकगमनक्रियाजन्यत्वं ग्रामानुयोगिकपुरुषप्रतियोगिकसंयोगात्मकफलं फलितंभवतीति, एतावतोदाहरणप्रदर्शनं कृतम् । तदनन्तरमुपनयनं निगमनंचदर्शयति **तादृगेवचार्थसिद्धिर्यंपुरुषविशेषप्रत्यसाधारणी** इत्यादि । प्रतिज्ञालिङ्गञ्चार्थसिद्धिगतम् । घटाद्यर्थगतः प्रकाशस्तत्तत्पुरुषासाधारणः तत्तत्पुरुषीयागन्तुकज्ञानात्मकक्रियाजनित एवात्रसाध्यत्वेनाभिमतः । अत्रसमुदाहृतांव्याप्तिंदूषयितुमाह **मैवम्** . . . [अनैकान्त्याद्व्यभिचारा, दिति] **अक्रियाजन्येत्यादि** । यस्य गृहे यस्य जन्म भवति तद्गृहेपितृपितामहादिपरंपरया कुलागतंक्षेत्रादिचरमचरमधनंतस्य स्वत्वं स्वाम्यं कालपरंपरया तयैव वालकस्यभवति, अर्थात् जन्मनोऽनन्तरमेव कुलपरंपराप्राप्तं यत् क्षेत्रादिकं तस्यजन्मत एव अस्यवालकादेर्भवति, तत्रतदन्यस्य तदाऽभावात्, अन्यस्य तत्र विद्यमानत्वेपिदायतो यत् क्षेत्रादिकं यस्य, तत्रतदसाधारणेऽर्थान्तर क्षेत्रादिस्वत्वे, तन्निष्ठाक्रियादिजन्यत्वरूपसाध्यस्याभावेन स्पष्ट एव व्यभिचारोजायते.हेतोर्वर्तमानत्वेपि तदीयक्रियाजन्यत्वरूपसाध्यस्याभावात् । एकत्रव्यभिचारं प्रदर्श्यान्यत्रापिव्यभिचारं दर्शयति, **क्षेत्रिणः** इत्यादि, यत्रान्यस्यक्षेत्रस्वामिव्यतिरिक्तपुरुषान्तरस्यक्रियया, दैवतो

चेन्मैवम्, अक्रियाजन्येनस्वभावप्राप्तक्षेत्रस्वत्वेनकृषकंप्रत्यसाधारणेन क्षेत्रतज्जात धान्यादिस्वत्वेनव्यभिचारात्। न च तत्रव्यापाररहिततयाक्षेत्रिणःकृषकस्यजनकत्वमिति वाच्यम्,व्यपारकालादिनैवव्यभिचारात्। तद्भावभावित्वस्य च समानत्वात्[अविशेषात्] ननु क्षेत्रिणोजीवनमेवतत्रजनकव्यापारइतिचेत् ? तत्तुक्षेत्रगतव्रीह्यादिसस्यपालनादि साधारणमिति कथमसाधारणक्रियाजन्यत्वम् ? अपिचैवंसतितदेवबोद्धुजीवनमेवार्थ प्रकाशोपिजनकव्यापारोभवतुकिमक्लृप्तकल्पनया। सत्यापितस्मिन्नर्थोनप्रकाशत इति चेत् ! किं क्षेत्रादिसत्वमपिजीवने सति जायते एव ? व्रीह्याद्यन्नसत्ताप्यपेक्षिताभवतीति

वा स्वक्षेत्रेसमागतानांयवादिवीजानां कालेफलादिंक्रमेणपक्वानां स्वत्वे स्वकियासाधारणेस्वकियक्रियाजन्यत्वंनास्तीति तत्रापि व्यभिचारोभवत्येव। नच दैवाद्यागतवीजाज्जायमानव्रीह्याद्यन्नेनिर्व्यापारतयाक्षेत्रस्वामिनस्तत्रजनकत्वमेव नास्तीतिवाच्यम्, व्यापारकालादिना व्यभिचारात्। अर्थात् यथा दण्ड़जनितभ्रम्याद्यात्मकव्यापारेपुनर्व्यापारान्तरं न विद्यते किन्तु कार्याव्यवहितपूर्वकालवृत्तित्वंरूपंकारणत्वं व्यपारस्यभवति, नहि व्यापाररहितत्वेनकारणत्वंभवति, यथावा कालस्य व्यापारान्तरं न किञ्चिदपितथापिकालस्यसर्वंप्रतिकारणत्वंभवत्येव, तथा प्रकृतेपिक्षेत्रिणो व्यापारान्तराभावे जनकत्वंनापहतंभतींति।

तद्भावभावित्वस्य च समानत्वादिति यथा व्यापाररहितस्यापि व्यापारादेरनन्यथासिद्धान्वयव्यतिरेकाभ्यां कारणत्वमवधारितंभवति, तथैवक्षेत्रिणोऽपिसत्वे एव क्षत्रिनिरूपितंक्षेत्रादिस्वत्वंसिद्ध्यतीति तत्र तत एवव्यापाररहितस्यापिक्षेत्रिणो जनकत्वं निर्वहत्येवेति। ननु कथमुच्यते क्षेत्रिणोव्यपारराहित्यम्, यावताअन्नाभावेतदीयजीवननिर्वाहो नस्यादितिजीवनमेवतत्रव्यापारस्तदेवाह **क्षेत्रिणो जीवनमेव ततजनकव्यापारइति** चेदिति, जीवनस्यैव व्यापारतयास्वीकारादित्यर्थः। सस्यपालनादिनैवगतार्थंतेत्याशयेनपरिहरति **तदित्यादि**। क्षेत्रस्वामिनांहिजीवनं रक्षितसस्यान्नादे साधारणकारणंकिन्तुक्षेत्रेस्वत्वेनासाधारणं कारणं भवति। एवं चासाधारणागन्तुकानित्यक्रियादिजन्यत्वानुमानेव्यभिचरितमेव भवतीति। अथ तदीयव्यापारजनितत्वमेव साध्यते, नत्वसाधारणक्रियाजन्यत्वमनुमीयतेऽतोनास्ति व्यभिचारो दोष इति यदिं ब्रूषे तर्हिं अर्थान्तरदोषआपततीतितदेवदर्शयति **अपि चैवं सतीति** व्यापारजन्यत्वेऽनुमिते सति तदेव वोद्धुर्जीवनमेवात्रापिव्यापारो भवतु अर्थात् बोद्धुजीवनमेवात्रार्थे प्रकाशेपि जनकस्यव्यापारोभवतु परन्तु आगन्तुकाज्ञानस्य व्यापारत्वकल्पनंनिरर्थकमेव भवतीति। क्लृप्तं परित्यज्याक्लृप्तकल्पनायागुरुतरत्वात्। ननु सत्यपिजीवनेनार्थः प्रकाशितो न भवतीतिचेत् ? तर्हिं यथोक्तमिदंस्वत्वं सतिजीवनेभवत्येव किम् ? अर्थात् क्षेत्रस्वत्वेविद्यमानेपिजीवनाभावात्। न च जीवने व्रीहिप्रभृतीनां सत्तावश्यकीति चेत्, तदिहापि चक्षुरादीन्द्रियप्रत्त्यासत्तिः संयोगादि

चेत् ! तर्हीहापिचक्षुरादीन्द्रियसत्ता, अपेक्षते एवेतितुल्यमेव । तस्मात्यंप्रत्यसाधारणोयथोदितधर्मस्तदीयासाधारणधर्मनिमित्त एव भवतीति सचेष्यते एवात्मनः श्चैतन्यं सवितुस्तेजस्वित्वमितिवत् ।

ननु कारणविशेषस्यान्वयव्यतिरेकानुविधायितया "अहंजानामि-अज्ञासिषम्" इत्यादि क्रमेणज्ञानस्यकालावच्छिन्नत्वप्रतीतेस्तस्यागन्तुकत्वमनित्यत्वमेव, यथागच्छामिगमिष्यामीतिप्रतीत्याकालावच्छिन्नत्वप्रतीत्यागमनक्रियायाआगन्तुकत्ववदेवेति चेन्न सवितुःप्रकाशेनव्यभिचारात् । अत्राप्यमुंप्रदेशंसूर्यः प्रकाशयति प्रदेशान्तरं च विद्यते एवेति सर्वं तुल्यमेव । इहतु चक्षुरादीन्द्रियाणां घटादिरूपपदार्थस्य यः संनिकर्षःसंयोगसंयुक्तसमवायादिलक्षणः सम्वन्धस्तादृशसम्वन्धस्य सहकारेसतिवोद्धुजीवनादृष्टमेवार्थप्रकाशेहेतुर्भवत्विति, किमर्थंमध्येऽक्लृप्तस्यज्ञानस्यकल्पनाव्यसनेति भावः । ननु जीवनस्योत्तरोत्तरकालसत्ता स्वरूपस्य न क्रियारूपत्वंविद्यते इति न तदियव्यापारजन्यत्वमिहसांध्यतेऽपितुतद्साधारणधर्मजन्यत्वमेवसाध्यते इत्युपपद्यतेएवसर्वमित्युपसंहारव्याजेनाह **तस्मात् यं प्रत्यसारणो यथोदितधर्म** इत्यादि । यं प्रतियोऽसाधारणो धर्मः स तदीयासाधारणधर्ममूलएवभवतीति । ननु यदि एतादृशो नियमस्तदा एतावताकोलाभोजातः इत्याशङ्कायामाह, **सचेष्यते एवात्मनश्चैतन्यमिति** यथासूर्यस्यप्रकाशः सूर्यस्यासाधारणोगुणइति । अर्थात्सिद्धान्तिनोऽनभिमतंवस्तुसाधयितुंप्रवृत्तस्य पूर्वपक्षिणः अर्थान्तरदोषप्रदर्शनेन निग्रहोजात एतावानेवपरमोलाभः । अपिचकुलपरंपराप्राप्तक्षेत्रादिस्वत्वव्यभिचारप्रदर्दनेनाप्यागन्तुकधर्मजन्यत्वस्य साधनं न भवतींतिपूर्वोक्तमप्यत्रविज्ञेयमिंतिंदिक् ।

अर्थस्य योयंप्रकाशः स सर्वदा न भवति किन्तु कदाचिदेव भवतीत्यतोज्ञानमप्यागन्तुकमनित्यमेवेति यत्प्रसाधितं तद्गतप्रकरणेन साक्षेपंप्रदूषितम् । अतः परं प्रकारान्तरेण ज्ञानस्यानित्यत्वंनिराकर्तुमुपक्रमते **ननु कारण विशेषस्यान्वयव्यतिरेकेत्यादि** ययागमनादिकंकालावच्छिन्नत्वप्रतीत्या, गच्छति अगच्छदित्यादिक्रमेणविभिन्नकारणजन्यत्वेकालावच्छिन्नत्वात्, गमनादिषु आगन्तुकत्वं सिद्ध्यति । तथैव जानामि ज्ञातवान् विज्ञाष्यामीत्यादिक्रमेण ज्ञानेपि कालावच्छिन्नत्वप्रतीतिदर्शनेन ज्ञातस्याप्यागन्तुकत्वमनित्यमेवेति । ज्ञानमागन्तुकमेव, तत्रकालावच्छिन्नत्वप्रतीतिदर्शनात्, गमनपाचनादिक्रियावत् । तथा ज्ञानम्, इन्द्रियलिङ्गपदज्ञादिकारणजन्यम्, इन्द्रियाद्यन्वयव्यतिरेकानुविधायित्वात्, पाके काष्ठादिवत्, यथा पाकादिकार्यमिन्धनादिकारण समवधाने जायते, काष्ठादीनामसमधाने नजायते तथैवज्ञानस्यापीन्द्रियाद्यर्थादिकारणकलापेउत्पत्तिर्भवति तदभावे न भवतीतिज्ञानेपि तथैव ज्ञेयमित्येवंक्रमेणार्थप्रकाशकादाचित्कत्वेन ज्ञानस्यापि कादाचित्कत्वमनुमेयमितिपूर्वपक्षस्यमुकुलिताशयः ।

तमिममाक्षेपंसूर्यप्रकाशे व्यविचारप्रदर्शनेन दूषयितुमाह **सवितुः प्रकाशेनव्यभिरादिति** ।

प्रकाशयिष्यतीतिप्रतीतेःकालावच्छिन्नत्वमिति । न च सूर्यप्रकाशस्यस्वाभाविकत्वेपि प्रकाश्यदेशसम्बन्धस्य कदाचित्कत्वेन तत्र कालावच्छिन्नत्वप्रतीतिर्भवति नतु तावतातत्प्रकाशस्य कादाचित्कत्वमिति वाच्यम्.तर्हिप्रकृतेपि, इन्द्रियादिसम्बन्धप्राप्तयोग्यभावोऽनुभाव्यभेदः स्वाभाविकमात्मनश्चैतन्यगुणमवच्छिनत्ति,तदपेक्षयैवेन्द्रियान्वयव्यतिरेकानुविधानं भवति नतु स्वतस्तथा, एवमतीतानागतप्रयोगोव्यवहारश्चापिसमुपपद्यते नतु स्वरूपापेक्षया तथेति ।

सूर्योऽमुकप्रदेशंप्रकाशयति प्रकाशितवान् प्रकाशयिष्यतिचेत्येवंप्रकारेण सूर्यप्रकाशेपि कालावच्छिन्नस्य विद्यमानत्वेपि तत्र प्रकाशेकादाचित्कत्वंनास्ति, नवाऽगन्तुकत्वरूपंसाध्यंविद्यते, इति साध्याभाववर्तिहेतोर्वृत्तित्वेन व्यभिचारोदुर्निवारएवेति प्रदर्शितवान् **अत्रापि अमुंप्रदेशंसूर्यः** इत्यादि । ननु सूर्यस्यप्रकाशो न कादाचित्कोपितु सूर्यस्यस्वाभाविकोऽर्थात् शाश्वतिकः तत्तत् प्रकाशस्य पूर्वदक्षिणादिकस्यदेशस्तत्सम्बन्धस्यवर्तमानादिकालत्रयपरिच्छिन्नत्वेनेति कालत्रयपरिच्छिन्नविशिष्टकालत्रयपरिच्छिन्नमतिर्जायते, नसामतिः प्रकाशस्वरूपस्यकादाचित्कत्वसाधिका, इत्याशयेन शङ्कते **स्वाभाविकत्वेपि** सूर्यप्रकाशस्यप्रकाश्यदेशसम्बन्धकदाचित्कतया कालावछिन्नत्वप्रतीतिः स्यादिति । अत्र विशेषणांशे एव कालावच्छेदप्रतीत्याकादाचित्कत्वं नतु विशेष्यांशेतत्सम्बन्धात् । स्वाभाविकत्वंस्वारसिकत्वमित्यर्थः । अस्ति अत्रैको नियमः “विशिष्टे विधीयमानौविधिनिषेधौसतिविशेष्येवाधे विशेषणमुपसंक्रामतः” इति । यथा कश्चित्पुरुषः संसारासारतां स्वयमाकलय्यगुरूपदेशाद्वासञ्जातवैराग्य ऐहिकामुष्मिकविषयेभ्यः, कमपि श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्यब्राह्मणोभागवतीं दीक्षां प्राप्य परित्यक्तशिखोभवन् सन्यासं गृह्णाति । तत्र लोक एवं वदति यदिदानीं शिखी विनष्ठः इति । तत्र तादृशपुरुषस्य वस्तुतो मरणं न जातमपितु शिखां परित्यज्य परिव्राडभवत् । तत्र पुरुषस्य विनाशाभावेपि तदीयविशेषणीभूतशिखाया एव कर्त्तनं जातम्, एवञ्च शिखाविनष्टेनष्ट इति कथनेन शिखामात्रांगतमिति कृत्वानाशस्य सम्बन्धः शिखायासहैव नतु विशेष्यस्यपुरुषस्यनाशप्रतियोगित्वम् । एवञ्च शिखाविशिष्टेन नाशसम्बन्धो विशेषणे एव प्रतियोगितासम्बन्धेनान्वयो भवति । एवं चानेनन्यायेन विशिष्टेकालावच्छिन्नत्वप्रतीतिर्जायते, तत्र च विशेषणे, एव तत्प्रतीतिः पर्यवसिता भवति नतु विशेष्ये । अनित्यत्वानुमानं च विशिष्टविषकमेव नतु विशेष्यस्वरूपमात्रविषयकम् । तथा च यद्रूपावच्छिन्नस्यकालावच्छिन्नत्वप्रतीतिस्तदंशस्यार्थात् विशेषणांशस्यानित्यत्वमेव । इतिस्वरूपमात्रस्य कलावच्छिन्नत्वप्रतितेर्नव्यभिचार इतिभावः । कालावच्छिन्नत्वस्य प्रतीतिःपक्षेप्यप्रसिद्धैवेति कृत्वापरिहति **तर्हिं प्रकृतेपी**त्यादि । तत्रयोग्यस्यभावोयोग्यत्वम् । अवच्छिन्नत्ति=अर्थात् कालावच्छिन्नत्वंयथाभवेत्तथास्वसम्बन्धेनचैतन्यविशिनष्टीति । हेतुविशेसानुविधानस्याप्यन्यथासिद्धत्वं दर्शयति **तदपेक्षयैव** अर्थात् घटाद्यर्थसम्बन्धापेक्षयैवेति । तथा च प्रथमानुमानम् प्रयोजकमेवेतिभावः ।

अथकथमत्र निश्चीयते, यत् सूर्यादिप्रकाशवदत्रज्ञाने कालावच्छेदेनभेदऔपाधिको नतु गमनादिक्रियादिवत्स्वाभाविक इति चेत् ? ताद्रूप्येणैव प्रत्यक्षत्वात्। नहि कदाचिदप्ययमात्माऽचिद्रूपः पाषाणादिवत् । योहि यद्गुणवत्तयाप्रत्यक्षीभवति सोऽवश्यंतत्स्वभावको यथा वायुःस्पर्शगुणवत्तया प्रतीयमानःस्पर्शस्वभावक एव

ननु कालावच्छिन्नत्वादिकं क्वचिदौपाधिकं भवति क्वचित्स्वाभाविकं च भवतीति लोके दृष्टम्, यथा सूर्यमण्यादिप्रकाशेकालावच्छेद्यत्वमौपाधिकम्, गमनादिक्रियायान्तु, कालावच्छिन्नत्वंभेदश्चस्वाभाविक एव तदत्रज्ञाने, कालावच्छेद्यत्वस्यैकान्त औपाधिकत्वमेवेति कुतो, निर्णीयते, नतु गमनादिवत्स्वाभाविकोभेद इत्याद्याशयेन पुनः शङ्कते **अथ कथमत्र निश्चीयते** इत्यादि । ज्ञाने योयं भूतभविष्यादिभेदोज्ञानं ज्ञानं विद्यते ज्ञानमभवत्, ज्ञानं भविष्यतीत्याकारको भेदः स च विषयसम्बन्धप्रयुक्त औपाधिक एव भवति नतु गमनादौ प्रतिभासमानभेदवत् स्वाभाविक इति प्रष्टुराशयः निर्णायककारणाभावात् कथंनिश्चीयते यत् ज्ञानेयोयं कालप्रयुक्तो भेदः प्रतिभासते सविषयसम्बन्धप्रयुक्त औपाधिको नतु स्वाभाविक इति । अमुमाक्षेपं परिहरति **ताद्रूप्येणैवप्रत्यक्षत्वादिति** । आत्मनोनित्यत्वंसर्ववादिभिः श्रुतिस्मृतीतिहासप्रत्यक्षादि सकलप्रमाणैर्निर्धारितमनुमतं च, ज्ञानस्येत्थंभूतात्मस्वभावकत्वान्नित्यत्वमेवेति सर्वसंमतम् । एवञ्च जानाम्यज्ञासिषमित्यादिप्रतीत्यायज्ज्ञाने कालावच्छिन्नत्वप्रतीतिर्भवति, तदौपाधिकमेव नतु स्वाभाविकमितिनिश्चेतुं शक्यते । ज्ञानाधिकरणतयैव साक्षात् क्रियमाणत्वादात्माज्ञानस्वभावक इतिज्ञानमात्मःस्वाभाविकमितिभावः । साक्षात्कारोनामात्रवृत्तिविशेषरूप एव । सचात्मनोज्ञानवत्त्वेनैवेति। तेनात्मनःस्वरूपत एव प्रकाशमानस्यस्वापकाले, ज्ञानवत्त्वेनप्रकाशाभावेपि न कापिक्षतिरिति । नचैवमपि "अहंसुखी" "अहंदुःखी" "अहमिच्छामि द्वेष्मि" इत्यादिरूपेणात्मनःसाक्षात्कारेज्ञानवत्त्वेनात्मनः प्रकाशभावादसिद्धिहेत्वाभासत्वं हेतोरितिवाच्यम्, तत्राप्यहमिति, अनुकूल प्रतिकूलपदार्थविषयकज्ञानवत्वस्यैवविषयीकरणात् । सुखादीनामपिज्ञानस्यावस्थाविशेषरूपत्वादिति । इच्छादीनांप्रत्यक्षसमये ज्ञानस्य स्वप्रकाशत्वादिच्छाद्यनुभववत्त्वेनात्मनोभानसंभवात्, ज्ञानवत्त्वेनैवात्मनः प्रत्यक्षंसिद्धंभवितीतिज्ञेयम् ।

यद्यपि ज्ञानमात्मस्वभावकमित्यत्र श्रुतिरेवभगवतीप्रमाणंभवति, तथापिप्रकरणस्यास्ययुक्ति प्रधानत्वात् प्राधान्यम् युक्तेरेवात्रप्रदर्शनंकृतमितिभावः । "अत्रायंपुरुषः स्वयं ज्योतिर्भवति" "तस्यभासा सर्वमिदंविभाति" "सत्यं ज्ञानमनन्तंब्रह्म" इत्यादिशास्त्रमात्मनो ज्ञानरूयत्वेस्वयमेवाग्रे प्रदर्शयिष्यतीतिनात्रशास्त्रप्रदर्शनकृतमिति । आत्मनोऽचिद्रूपत्वंनिराकृत्यात्मनो ज्ञानरूपत्वमर्थात् स्वाभाविकज्ञानात्मकगुणवत्त्वमुदाहरणद्वारा दर्शयति **नहि कदाचिदप्ययमात्मा**पाषाणखण्डवत्, दृष्टः केनचिदपि । यस्तु यद्गुणवत्वेन साक्षात् क्रियमाणो भवति, सतत्स्वभाववत्त-

भवति नत्वन्यादृशगुणकः । योयत्स्वभावो न भवति सतदभावकालेपिस्वरूपत एव प्रतीयते,यथागमनादिरहिततया प्रतीयमानो देवदत्तःस्वरूपत एव समीक्ष्यते ।

शरीरवदपि न असिद्धत्वात् । अथयथाऽत्मनोऽस्वभावभूतेनापि कलेवरेणसहकृत एव चेतनःआत्माप्रकाशते, तथाऽतत्स्वभावेनापिज्ञानेनप्रकाशपदवीं प्राप्स्यते इतिकोदोष इतिचेत् तन्नैवमसिद्धत्वात् । नहि करणकलेवरवत्तयैवात्मा चकास्ति, योगिनामुपरतवहिरिन्द्रियाणां प्रणिहितमनसां शरीरादिप्रतिसंधानमन्तरेणापि. अहमित्याकारतया प्रतिभासनात् । जानामीति प्रत्ययस्तु शरीरबाह्यत्वादिप्रतिभासरहितताया शरीराद्ययैव साक्षात्कृतोभवति, यथास्पर्शात्मकविशेषगुणाधिकरणप्रत्यक्षीक्रियमाणः प्राणपानादिविशेषगुणस्वभावक एव । योयत्स्वभावो न भवति स तदभावसमयेपि स्वस्वरूपतः प्रत्यक्षोभवत्येव । यथास्थितिसमये गमनाभाववत्तयोपलभ्यमानोपि स्वस्वरूपेणोपलभ्यमानो भवन् न वायुवत् चलन स्वभावक इति ।

ननु यत्-यद्वत्तयोपलभ्यते तत् तत्स्वभावकमितियोयं नियमःस्वीक्रियते न तथा नियमः शरीरवत्तयोपलभ्यमानस्यापि चेतनस्यशरीरस्वभावकत्वस्यादर्शनादतः पूर्वोक्तो न नियमइत्याशयेन पुनःशङ्कते **शरीरवदिति** यदा खलु देवदत्तादिरुपलभ्यतेतदाशरीरादिमानेवोपलभ्यते इति । नैतत्सारम् **असिद्धत्वादिति** यदि शरीररूपत्वमात्मनोमन्येततदा, शरीरस्यानित्यत्वेनविनाशात् बन्धमोक्षव्यवस्था न स्यात् । तथा बन्धमोक्षयोर्वैयधिकरण्यमप्यापतेत् । अतः शरीररूपत्वाभावात् शरीरस्वभावकथनमात्मनोऽसिद्धमेवेति भावः । ननु यथा, देहोनात्मनःस्वभावभूतस्तथापि यथाऽनात्मनःस्वभावभूतेनापिशरीरेणसहकृत एव प्रकाशते, अहं मनुष्योऽहंदेवदत्तादिस्तथैवात्मनोऽस्वभावभूतेनापिसहकृतस्यात्मनः प्रकाशोजायतामिति शङ्काग्रन्थस्य विवरण**मथयथे**त्यादि । परिहति **तन्नैवमसिद्धत्वात्** शरीरसहकृतात्मन एवभानं जायते, एवंकथनं न युक्तम् , कुतः ? असिद्धत्वात् । असिद्धत्वमेवोपपादयति **नहिकरणकलेवरवत्तयैव** इत्यादि, अर्थात् यदाऽत्मनोभानं प्रकाशोजायतेतदातस्मिन् काले आत्माशरीरादिंविशिष्टतयैव प्रकाशते इतिं नियमः । तथा दर्शनादेव, एवं निश्चीयते इति न वक्तव्यम् । कुतः ? अर्थात् शरीरवत्तयैवात्मन उपलंभोऽसिद्धः । कुत एतत् तत्राह **योगिनामुपरतवहिरिन्द्रियाणामित्यादि** योगकालेयोगिनां निवृत्तवहिरिन्द्रियव्यापाराणांयोगजधर्मसहकृतचित्तानां शरीराभानेपिःआत्मनोभानदर्शनात् । यथोक्तम् “सोऽपश्यत् प्रणिधानेन सन्ततेः स्तंभकारणम्” इतितुयुञ्जानयोगिनांशरीररहितात्मनोभानं भवति । युक्त योगिनांतु सर्वदैवातीन्द्रियसेन्द्रियकसर्वपदार्थानांज्ञानं जायते । तत्रसर्वपदार्थान्तर्गतात्मनोपिभानं जायते एवेति भावः । योगिप्रत्यक्षे आत्मचिन्तने च शरीरादिकंविनापिं, आत्मनोभानंजायते इति प्रतिपाद्य लौकिकविषयतयासम्बन्धेन प्रत्यक्षेपिशरीरप्रतिभासं विनैवात्मनःप्रत्यक्षं जायते एवेतिदर्शयि-

तिरिक्तपदार्थान्तरविषयक एवेति पूर्वमेवनिवेदितत्वात् । शुभाशुभकर्मानुसारेण देवदेवदानवमनुजादिजातीयतयाभिद्यमानपरस्परं भिद्यमानेष्वपिशरीरेषु मनोवत्

तुमाह **जानामीति प्रत्ययस्तु** इत्यादि, अहं सुखी अहंजानामीत्यादिप्रतितेः शरीरविरहितस्यान्तरपदार्थग्राहकत्वमित्येवं शरीरविरहितस्यात्मनः स्फुटतयोपलंभात् । शरीरात्मस्वभावत्वाभावं द्रढयितुमाह **शुभाशुभकर्मानुसारेण** इत्यादि, अयंभावः संसारसागरे पोप्लुयमानो जीवस्तत्तत् शुभंवाऽशुभंकर्मप्राप्यकदाचिद्देवो भवति कदाचिन्मानवोवा तदन्योवा भवति । तत्र यदि जीवस्यशरीर स्वभावत्वंमन्येत तदा, एकदागृहीतगजदेहः कदापिशरीरान्तरं न गृह्णीयात् , ज्ञानवत् , अर्थात् यथाज्ञानस्वभावको जीवः कुत्रापि ज्ञानस्वभावतांनजहाति तथैव गजाद्यन्यतमदेहं न परित्यजेत् ; किन्तु प्रतिभवमुपात्तदेहं जहाति कर्मवलेन देहान्तरमुपादत्ते । तत्र देहस्य सर्वत्रभिन्नस्य न कथमपिं जीवस्वभावं संभवति । यथाजीवोयत्र कुत्रापिगच्छति तत्रतत्र सर्वथैवमनोनजहाति, नतथानियमो देहस्य , किन्तु शरीरंतुप्रतिभवमपरापरमेव भवति, तस्मान्नात्मनः स्वभावभूतंशरीरमिति । तस्माद्येषु व्यावर्तमानेष्वपि यदनुवर्तते तत्तेभ्यो विभिन्नमेव भवति नतु स्वभावकं तद्भवति । यथा कुसुमेभ्यः सूत्रम् , विलक्षणसंयोगविशिष्टकुसुमनिकरस्यैव मालेतिनामभवति, तत्र पुष्पाण्यननुगतानिभवन्ति सूत्रन्त्वेकमेवानुवर्तमानं भवति, एवञ्चकुसुमेषु परस्परं व्यावर्तमानेष्वपि सूत्रमालात्व प्रयोजकं न व्यावर्ततेऽपितु, अनुवर्तते इति कुसुमेभ्यः सूत्रस्य भेदो भवति । तथैव प्रकृते शरीरस्य परस्परं देवादिभेदेन, एकस्मिन्नपिभवे बालयौवनंवृद्धादिंभावेन व्यावर्तमानस्योपि सर्वत्राहं बुद्धिः सूत्रस्थानियाऽनुवर्तते एव नतु कदाचिदपिव्यभिचरति तस्मादात्मभिन्नान्येव शरीराणि, भिन्नत्वादेव च नात्मस्वभावकानीमानिशरीराणि ।

अपिचयोगव्याघ्रः प्रारब्धकर्मफलभोगायैकस्मिन्नन्तिमभवेयोगवलादनेकं भोगायतनं प्राप्य स्वल्पकालेनैवसकलप्रारब्धकर्मफलमनेकविधंभुनक्ति, सच तदैवानेकं शरीरं पश्यन्नपि, भोक्तारमात्मानमेकमेवाहमिति रूपेणपश्यति । तत्रयदिशरीरात्मनोः स्वभावकत्वंभवेत्तदानैवं संभवति तस्मादात्मा न शरीरस्वभावकोऽपितुभिन्न एवेति तस्मादेव मनुष्यादिभोगायतनवत्तयाऽत्मन उपलंभोऽसिद्ध एवेत्याशयः । मनोवदिति दृष्टान्नो न साधर्म्यदृष्टान्तोऽपितु वैधर्म्यदृष्टान्त एव, यथात्मानं मनोऽनुवर्तते न तथा शरीराण्यनुवर्तते आत्मानमित्यर्थः । मोक्षावस्थायामपिमनोऽनुवर्तत एवात्मानमितिमतेनेदं कथनम् । एतदुक्तं भवति, कश्चिद् दार्शनिको मोक्षकालेऽशेषात्मविशेषगुणानां बुद्ध्यादीनांविनाशो भवति, तादृशनवगुणविनाशावस्था एव मोक्ष इति संज्ञा भवति, यद्यपि मनोऽनित्यमिति मनसःस्वरूपतो विनाशो न भवति परन्तु आत्ममनसोर्नित्यत्वेपि तयोः सम्बन्धस्यैवविनाशो भवतीत्यतो मोक्षकालेनात्मानमनुवर्तते मन इत्येकंमतम् । अपरेतु, मोक्षकालेऽपिमनसोऽनुवर्तमानंभवत्येवेति मन्यन्ते, कथमन्यथा षाट्कौशिकशरीरेणसंसारकालेभोगमनुभूयसाकेतप्राप्तस्यजीवात्म-

स्वभावानुबन्धित्वेनाश्रयितुमशक्यत्वात् । इन्द्रियप्राणमनोबुद्धिसमुदायात्मकलिङ्गशरीरस्यानुवर्तनेपि तादृशसूक्ष्मशरीरस्य प्रत्यक्षाऽयोग्यतया न भवति व्यभिचारदोषः ।

। इतिज्ञानस्यात्मस्वभावत्वप्रतिष्ठापनम् ।

नोभगवत्स्वरूपं दृष्ट्वा विलक्षणसुखानुभवं कुर्यात्तदामनसोऽननुवर्तने । मुक्तस्यापिसुखाद्यनुभवो भवति "स यदापितृलोककामो भवति तदा पितरःसमुत्तिष्ठन्तीति" श्रुतिरेव प्रमाणम् । कथंवा विलक्षणसुखंपरित्यज्यपाषाणखण्डकल्पमात्मानं समीहेत । विचारोऽत्रत्यो जगद्गुरुश्रीरामानन्दाचार्यप्रसादितसभास्करप्रस्थानत्रयतन्त्रेऽन्वेषणीयोविशेषजिघृक्षुभिर्मदीयमुक्तिर्मीमांसायांवेतिशम् । ननु मोक्षकालेमातापितृजनितषाट्कौशिकस्थूलशरीरस्यागमापायिनस्तत्कालेऽनित्यत्वेननिवृत्तिर्भवतीतिंमन्ये , परन्तु सप्तदशलिङ्गात्मकसूक्ष्मशरीरंतु आकल्पमवतिष्ठते, इतिसूक्ष्मशरीरंसर्वदाऽनुवर्तते एव । एतादृशविलक्षणस्वभावस्यापि, आत्मस्वभावत्वंनास्तीति तत्रैव सूक्ष्मशरीरेऽव्यभिचारोविद्यते एवेतिं कस्यचिदाशंकामपनेतुमुपक्रमते, **लिङ्गशरीरस्ये**त्यादि पुनरनुवृत्तावपि, तस्य प्रत्यक्षविषयत्वासंभवान्नतत्रव्यभिचारत्वमितिं । लिङ्गशरीरस्यमोक्षकालेऽनुवर्तनं तथा प्रलयकालेपितदनुवर्तनं न भवतीतिव्यञ्जनावृत्त्याऽभिव्यञ्जितं भवति । तथा लिङ्गशरीरमतीन्द्रियत्वेन तत्रप्रत्यक्षत्वहेतोर्वृत्तित्वाभावेन तत्रव्यभिचारसंभावनैवनोदेति । अत्रायमाशयो ज्ञातव्यः, आत्मनोधर्मभूतंयज्ज्ञानस्वरूपंतत्तुतावन्नित्यमेव नानित्यम्, किन्तु संकोचविकाशशालिनोज्ञानस्यचक्षुरादीन्द्रियादिद्वारेणप्रसरणादर्थप्रकाशकत्वं भवतीतिं, अर्थप्रकाशकत्वविशिष्टस्यतुपुनरनित्यत्वमिष्टमेव । तस्मात् विशिष्टरूपेणज्ञानस्यानित्यत्वम्, स्वरूपतस्तु धर्मभूतज्ञानस्यनित्यत्वम् तदाहुः सिद्धान्तविजयिनोजगद्गुरवः श्रीश्रियानन्दाचार्यचरणाः श्रौतप्रमेयचन्द्रिकायाम्——

"अर्थप्रकाशकं ज्ञानं विभुद्रव्यगुणात्मकम् । नित्यंजीवेशयोर्धर्मोभिन्नं तत् प्रतिचेतनम् ।
अनुकूलतयावेद्यं मतं तस्मात् सुखात्मकम् । तद् न विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते' ।
इति श्रुतिंवलान्नित्यं मन्यतेहिविचक्षणैः । 'तथा हेयगुणाध्वंसादवबोधादयोगुणाः ।
प्रकाश्यन्ते न जयन्ते नित्या एवात्मनोहि ते" । इति । (३।३–६)

तथैव जगद्गुरवः श्रीपूर्णानन्दाचार्याःसिद्धान्तसार्वभौमाः श्रीबोधायनमतादर्शे——
सुखरूपं च नित्यं च कालभिन्नंप्राक् तथा । नित्यात्मनोगुणोज्ञानं स्वरूपस्य निरूपकः ॥" इति (८५२) तथा च वेदान्तचिन्तामणौ—

"नित्या तथा सविषया जडतोविहीना विभ्वी मतिर्मंददयाप्रभृतिस्वरूपा ।
प्रामाण्यमत्र सुमतं स्वत एव चास्या याथार्थ्यकं विषयसत्यतया तथा च ॥६॥"

इतिजगद्गुरुश्रीमङ्गलार्यमुनीन्द्राः । उक्तञ्च तथैवानन्ततत्वपीयूषे——

"विद्वद्भिः सम्मतं चात्र ज्ञानमर्थप्रकाशकम् । धर्मधर्मिस्वरूपं च ज्ञानंहि द्विविधंमतम् ॥४०॥

ननु ज्ञानस्य वोधस्वभावत्वेज्ञातुः स्वापेमूर्छादावपिप्रकाशप्रसङ्ग इतिचेन्न, विकल्पासहत्वात् । तथाहि अत्रहि प्रकाश इतिपदेन सर्वपदार्थसाधारणं वोधजनितं प्राकट्यादिपदपर्यायंकमपि धर्मंलक्षीकृत्यायंप्रसङ्गः ? अथवोधमेवाभिप्रेत्यप्रसङ्गः ? तदविप्रकर्षं या प्रथमपक्षेतदभावादेवनतत्प्रसङ्गः । अभावश्चप्रकटित एव संवित्स्वतः सिद्धिप्रस्तावप्रकरणे । भावेपि, अन्धकारप्रतिवन्धादप्यनुदयसंभवात् । एतदतिरिक्तपक्षद्वयेमदभिमतमेव प्रतिपादितमिति न कोपि दोषः । वोधस्वाभाव्येतु पुरुषस्य स्वापमूर्छादौ तथा भावोऽभिमत एवेति तदापादनं न दोषाय इष्टत्वात् ।

यदि स्वापमूर्छादावपि स्वकीयानुभवस्य सत्वंस्वीक्रियते तदाजागरणात् स्वापस्यतुल्यत्वं प्रसज्येत, जागरणवत् स्वापेपि व्यवहारस्येति चेन्न, व्यवहाराविषयत्वात् स्वापस्य । तदानीं कः खलु आत्मनिव्यवहारो हानोपादानोपेक्षाया अशक्यत्वात् ।

ज्ञानंधर्मिस्वरूपंहि जीवस्तथाऽखिलेश्वरः । ज्ञानंधर्मस्वरूपंहि नित्यं प्रज्ञाभिधंत्विभु ॥४१॥

इति जगद्गुरुश्रीनरहर्यानन्दाचार्यैः । इत्यादिकनिखिलपूर्वाचार्यदिव्यप्रबन्धमाकलय्यास्मिन् प्रकरणे श्रीयोगीन्द्रप्रवरेण श्रीरामानन्दसम्प्रदायाचार्यत्वपदमलङ्कुर्वता चत्वारिंशत्तमाचार्यवरेणजगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्यमहाभागेनव्यवस्थापितमिदमितिदिक् ।

। इति ज्ञानस्यात्मस्वभावत्वप्रतिष्ठापनप्रकरणेतत्त्वदीपः ।

ज्ञानस्य नित्यत्वस्वीकारेऽनेकधाऽक्षेपमुद्भाव्यतन्निरासायोपक्रमते **ननुज्ञानस्यबोधस्वभावत्वे** इत्यादि । ज्ञानस्वभावत्वेपुरुषस्य स्वापकाले मूर्छाकाले च स्वरूपप्रकाशो भवेदिति प्रथम आक्षेपः । अमुमाक्षेयं प्रकाशपदार्थविकल्पेन परिहर्त्तुमाह **विकल्पासहत्वादित्यादि** ज्ञानव्यतिरिक्तस्य ज्ञानजनितस्य विद्यमानत्वेपि आत्मनिबोधेन, तस्य प्रकाशयानुत्पादनं स्वापमूर्छादौ तमोगुणप्रतिबन्धादेवभवति, यथा गाढान्धकारप्रतिबन्धात्, चाक्षुषज्ञानं न जायते तथैवात्रापि तमोगुणात्मकप्रतिवन्धादेव प्रकाशोत्पादनं स्वापे न भवतीतिभावः । तथाभावोबोधवत्त्वमिति यावत् ।

यथा जागरणकालेबोधसत्त्वे आदानादिव्यवहारोभवति, तथैव स्वापादौज्ञानसद्भावे तत्रापि, आत्मनोव्यवहारप्रसङ्ग इति द्वितीयाक्षेपः । एनं द्वितीयमाक्षेपमुपपादयितुमुपक्रमते **यदिस्वापमूर्छादावपीत्यादि** यथा जागरणदशायां स्वानुभवस्य सद्भावे आदानहानगमनागमनादिसर्वोपि व्यवहारोऽविकलः संपादितोभवति, तथैव स्वापेज्ञानस्वीकारे तत्रापिव्यवहार आपद्यते इत्यर्थः । तमिममाक्षेपं परिहर्तुमाह **चेन्नव्यवहाराविषयत्वात्** इति । किंदृशो हि स्वापे आपाद्यते किं कायिकोवावाचिकोवा ? तत्र न प्रथमोव्यवहारः शक्य आपादयितुम्, तत्राह **कः खलुआत्मनिव्यवहारः** इति । अत्र किंशद्ब आक्षेपार्थकः । यथा प्रश्नाद्यर्थे किं शब्दः प्रसिद्धस्तथैवाक्षेपार्थेपि । आक्षेपस्वरूपमेवोपपादयति **हाने**त्यादि । व्यवहारो हि कायिकवाचिकादिभेदेनानेकविधः ।

व्यवहारः प्रसज्येत, किमत्र, निर्विकल्पकबालमूकप्रभृतिकज्ञानविषयौ व्यवह्रियमाणो लोके भवति, कारणपाटवादिसहकारिविरहाद् बालमूकादेर्व्यवहारो न भवतीति चेत् ! तर्हि स्वपादौ तुल्यमेतत् ।

स्मृतिप्रसङ्गोऽपि न तदामनसो वृत्तिराहित्यात् । यदि कथ्येत स्वापादिकाले आत्मनोऽनुभवस्वीकारे पदार्थान्तरविषयकानुभववदात्मनोपि "अहमन्वभूव" मित्याकारकानुभवः स्यात्, तदनन्रमात्मविषयकस्मरणंजागरेस्यादिति कथनं न युक्तम्, तदामनसोऽवृत्तित्वात् । नहि मूर्छावाप्रस्वापोवा बुद्धेर्वृत्तिविशेषो दर्शनस्पार्शनवत्, यतस्तादृशवृत्तिविशेषणस्मरणकारणीभूतसंस्कारस्योत्पादनं भवेत्, किन्तु तदा समुद्भूतेन तमोगुणेन विरमितव्यापारवता चक्षुरादिनाकरणेन, वृत्तिरहितस्वभाविक बोधस्वरूपेण केवलमात्मनोऽवस्थानमेवात्मनोभवतीति । न च बोधस्वभावत्वादेवा-

तत्रकायिको व्यवहार आदानहानोपेक्षा भेदात्त्रिविधः । तत्र स्वापकालिकात्मनिनोपादानादिव्यवहारः । आदानंनामाप्राप्तस्यवस्तुतो ग्रहणात्मकः । नचात्मोपादातुं योग्य, आत्मस्वरूपस्य नियमत एव प्राप्तत्वात्, यदप्राप्तंघटादितेषामुपादानायैव प्रयत्नोभवति, नतु नित्याप्तस्य प्राप्तुं, नहि गगनादिकमादातुं कश्चित्प्रयतते, कृतप्रयत्नोपि न प्राप्तुंशक्नोति । तत्कुतः ? नित्यप्राप्त्वात् । तथैवात्मापि नित्यप्राप्त इतितस्यकार्यकोपादानं न संभवमि । नवाहातुमपि । युक्तो नित्यप्राप्तत्वादेव, यद प्राप्तंसत् प्राप्तं भवति, तस्यैवद्वेषादिकारणेन हानं भवति, आत्मातुनित्यप्राप्तस्वरूपत्वान्नहातुं योग्यः । नवोपेक्षितुमपि युक्तोऽनुकूलवेदनीयतया नित्यप्राप्तत्वात् ।

द्वितींयवाचिकं व्यवहारमात्मनि निरसितुमाह **व्यवहारःप्रसज्येत** इति द्वितींयोवाचिक व्यवहार आपाद्यते इत्यर्थः । एतस्य प्रश्नस्यपरिहारमनुवदति **किमित्यादि** बालमूकादीनां यत् निर्विकल्पकं ज्ञानं तदीयविषयः पदार्थः किं वचसाव्यवह्रियमाणो भवतीति क्वचित् किं दृष्टचरम्, अर्थान्नैव दृश्यते इति । अर्थात्, यज्ज्ञानं वाचकशद्वादिविशेषणादिकं नोल्लिखति तादृश ज्ञानमेव निर्विकल्पकम्, बालस्यमूकादेश्च भवति, बालादीनां तादृशज्ञानसत्वेपि न तस्यव्यवहारः क्वापि भवति । तस्मादात्मनोन कायिकादानहानोपेक्षालक्षणः कुत्रचिद्भिवति । नवा, बालमूकादीनां निर्विकल्पकज्ञानसद्भावेपि तादृशज्ञानविषयीभूतपदार्थस्यवचसा व्यवहारोभवति । तथा च ज्ञानस्य स्वविषयव्याहारव्याप्तिर्नास्तीति । ततश्च स्वापेज्ञानसत्वेपि जागरणवदेव व्यवहारापादनं नैवयुक्तमसंभवात् । नच निर्विकल्पकज्ञानवतां बालादीनांकरणपटुत्वादिरूपसहकारिसंनिधानाभावेन व्यवहारो न भवतीति वाच्यम्, स्वापेपितुल्यत्वात् । यथा करणपाटवादिसहकारिणामभावोबालादि ज्ञानेषु तथै स्वापादिषु समानमेव भवतीति, तत्रनैकः पर्यनुयोज्यः । तदुक्तम् "यश्चोभयोः समोदोषः परिहारोपि तादृशः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इति ।

त्मनः संस्कारोत्पादकत्वम्, तथासति सततजायमानसंस्कारतयामोक्षाभावप्रसंगात्, अनुभवेतु स्वानुरूपसंस्कारोत्पादननिरोधेसदृशसम्बन्धिदर्शनादिसहकारिसमुद्बोधित स्वकीयकारणानुसारेण कालान्तरेस्मरणं प्रादुर्भवति । नचात्रात्मस्वरूपबोधस्यनिरोधोवाप्रादुर्भावोवासंभवति, नित्यात्मसत्ता प्रयुक्तत्वात् । तत्रकारणान्तराभावश्चानन्तरमेव प्रतिपादयिष्यते ।

यदि स्वापकालेमूर्छाया वा, आत्मनोऽनुभवो जायते, तदाऽनुभूतस्य तस्य, मूर्छाविरामेजागरणसमयेऽनुभूतस्यानुभवजनितस्मृतिकारणंसंस्कारवलादात्मनः स्मरणमापद्येतेति तृतीयाक्षेपः । तमेवाक्षेपं प्रदर्शयति, **स्मृति-प्रसङ्गः** इति । एतस्यपरिहारो **वृत्तिराहित्यादिति** । शङ्काग्रन्थस्यविवरणम् **यदि कथ्येत स्वापादादिकाले**इत्यादि । परिहारकग्रन्थस्यविवरणम् **न युक्तमित्यादि** । **नहि मूर्छा वा प्रस्वापोवाबुद्धेर्वृत्तिविशेष** इत्यादि । तत्र बुद्धिवृत्तिविशेषोऽर्थात्, धर्मभूतज्ञानस्यावस्थाविशेषः ।

स्वापमूर्छादिकालेयोयमात्मनोऽनुभवः स तु आत्मस्वभावलक्षणक एव न तु धर्मभूतज्ञान स्यावस्था विशेषलक्षण इति । **ततस्तादृश** इत्यादि, नहि वोधमात्रस्य स्मृतिकारणसंस्कारजनकत्वम्, अपितु ज्ञानस्य वृत्तयस्ता या वृत्तय एव स्मृतिवीजं संस्कारमुत्पादयन्ति, अतः संस्कारानुद्बोधे स्मरणादर्शनात् । स्वापादिकाले स्वाभाविकधर्मभूतज्ञानवत्वेनावस्थानमेवात्मनो न तु तदानीं ज्ञानस्यवृत्तयः प्रमाणविपर्ययादिका भवन्तीतिभावः । **न च बोधस्वभावत्वात्** इत्यादि । बोधस्वभावत्वादित्यस्य नित्यस्वविषयकबोधस्वभावकत्वादित्यर्थः । धर्मभूतं ज्ञानं तावत्, नित्यमात्मविषयकमेव, यदातु इन्द्रियार्थः संयोगाद्यन्यतमसंनिकर्षादिसहकारिसंवलितं भवति तदैव पुनर्विषयघटादिग्राहकं भवति । ततश्च चिद्रूपत्वादेवास्यात्मनः स्वविविषयकस्मृतिवीजसंस्कारोत्पादकत्वं कथंन स्यादिति शङ्का ग्रन्थस्याशयः । अस्यनित्यबोधस्यार्थात् नित्यवोधस्यात्मनः संस्कारजनकत्वं कथंनस्यादित्याशङ्कां परिहरति **तथा सति सततजायमाने**त्यादि अनवरतोपचीयमानसंस्कारतया मोक्षाभावप्रसंङ्ग एव भवेत् । अर्थात् एवं सति वाह्याभ्यन्तरसामग्रीवलेन प्रतिक्षणं स्मृतिजनक संस्कारोदयसंभवेन संस्कारधारायाः कुत्रापि विश्रामो न स्यात् । ततश्च क्लेशकर्मविपाकाशयानामात्यन्तिकोच्छेदलक्षणमोक्षस्य कस्यापिसंभवो न स्यात् । तथा च मोक्षप्रतिपादिकागमानां वैयर्थ्यं तथा मोक्षाय प्रवर्तमानानां महाधियाञ्च प्रवृत्तिर्विफलैव भवेदिति भावः । नित्यबोधस्वरूपस्य यदि संस्कारजनकत्वं तत्रदोषं प्रदर्श्य तत्रफलाभावरूपं निष्प्रयोजनत्वमपि दर्शयति, **अनुभवेतु** इत्यादि, स्वानुरूपसंस्कारौत्पादनं निरुद्धेदनुभवे, सादृश्यादिदर्शनसमुद्बोधितस्वकीयकारणसंस्कारानुकूल्येन स्मरणं जायते इतिक्रमः । अत्रात्मस्वरूपबोधस्यनित्यत्वेन न कदाचिदपिनिरोधः उत्पादोवा संभवति नित्यत्वादेव । अर्थादनुभवे विद्यमाने, संस्कारस्य कल्पनं हि अनुभूतस्याननुभूयमानस्य

तदेवं सततमनुवर्तमाने एवानुभावे कथं स्मृतेरुदयःसंभवेत् । "य एवाहं पूर्वदिने आसं स एवाहमद्यापिवर्त्ते" इत्याकारकस्मृतिमिलितज्ञानंतुकालावच्छिन्नस्वरूप विषयकं नतु स्वरूपमात्रविषयकम् । स्वापादिकाले जायमानःस्वानुभवो [मुकुलितः] ऽविशदो निर्विकल्पश्चाविस्पष्टसविकल्पकबोधेनस्मृतिकारणं संस्काराधानं भवतीति

प्रतिपत्त्यर्थमेव, यदातु नित्यानुभवः स्वयमेव विद्यते, तदा तत्रसंस्कारकल्पनं सर्वथैवनिःप्रयोजनकं भवतीतिभावः । स्वानुरूपत्वमर्थादनुभवसमानविषयकत्वमेवेति । स्वकारणमर्थात् स्मृतिकारणसंस्काररूपमेवेति । ननु आत्मविषयकमपिस्मरणं दृश्यते, तत्राह **य एवाहं पूर्वदिने आसमित्यादिं**, "स्मृतिसंमिलितज्ञानम्" पूर्वकालावच्छेदांशेस्मरंणरूपः, वर्तमानकालावछिन्नत्वांशेऽनुभव रूप आत्मविषयकःप्रत्ययोज्ञानम् । **कालावच्छिन्नेति**=यद्यनित्यतयाऽत्मस्वरूपमात्रस्यसर्वदैवप्रकाशो भवतिं, तथापि तत्तत्कालावच्छिन्नत्वांशस्यवुद्धिवृत्त्यैव ग्रहणात्, ततश्च तादृशवुद्धिवृत्तेरेवसंस्कारजनकत्वेन "य यवाहंपूर्वदिनेऽभवं स एवाहमिदानीमपी"त्याकारकः प्रत्ययउपपद्यते एव न तत्र कोपि दोष इति । नासौ पूर्वोक्तप्रत्ययआत्मस्वरूपमात्रविषयक इति । तदेवं नित्यवोधस्यसंस्कारोत्पादकत्वेवाधकं प्रयोजनाभावं च प्रदर्श्य, स्वापादिकाल्किनित्यवोधस्यसंस्कारोत्पादकत्वमपि न संभवतीति प्रदर्शयितुमाह, **अविशद** इत्यादि । स च बोधस्तमोगुणेनाभिभूतत्वान्न विशदोनात्यर्थं प्रकाशकः एवं बाह्याभ्यन्तरविशेषणानवगाहित्वान्निर्विकल्पकश्च, ततो वालमूकादिज्ञानवन्नार्थ प्रकाशको भवतीति । यदायंबोधःकेनापिप्रतिरुद्धो न भवति तदैवस्वकार्यकरो भवति, सति, अभिभावकेन तथा भवति । यथा सत्यपि चक्षुरादीनामर्थेन सहसन्निकर्षे गाढान्धकारावृत्तं चक्षुरादिकरणं न चाक्षुषज्ञानादिकर्मजनयति तमसावृतत्वात् । अपगते तमसि, आलोकसंयोगादिसहकृतमेवसत् प्रतिबन्धकाभावे स्वकार्योत्पादने समर्थंभवति तथैवात्रापिति । अत्रायमाशयः—यद्यपि जागरणकाले सुप्तोत्थितपुरुषस्य "सुखेन सुप्तोहम्" इत्याकारकं स्मरणं जायते इति सर्वलोकसिद्धम्, स्मरणं च स्वकारणानुभवतज्जनितसंस्कारोद्बोधमन्तरेण न संघवति, कारणमन्तरेण यदि स्यात्, तदा सर्वदैव स्यात्, कदाचिदपिनस्यात्, कार्यस्य नियामक कारणाभावेनाकस्मिकत्वं न स्यादिति । ततश्च "सुखमहमस्वाप्समिति सुप्तोत्थितस्यैतादृशप्रतिसन्धानवलात्स्वापकाल्किात्मस्वरूपानुभवस्यापि संस्कारजनकत्वमादर्तव्यमेव, तथापियदुक्तं पूर्वम्, यत्, आत्मस्वरूपानुभवस्य संस्कारजनकत्वं नास्तीति तदेकदेशिमतमाश्रित्यैव प्रतिपादितम्, स्वमतंत्वग्रे **अस्तुवा** इत्यादिसंदर्भेण पक्षान्तरं प्रदर्शयिष्यते । अनुभवस्यात्ममात्रविषयकस्य वर्तमानता समये, आत्म स्वरूपमात्र विषयकस्मरणोदयाभावेपि, प्रतिसंधानस्य ततोप्यधिकविषयकस्य संस्कारवलादुदयेऽपिनक्षतिः । यथा "सोयंदेवदत्तः" इत्यादौ, अनुभव समये देवदत्त एवानुभूतो वर्तमानकालश्चाप्यनुभूतः भूततातुनानुभूता तथापि स्मरणे भूततायाःसोयमिति तदंशस्यभूतताया

कुतः ? अनुभवकाले स्मरणस्य संभवः स्मरणकारणसंस्कारानुत्पादात् । लून पुनर्जातकेशादाविवानुनुभवेपि तदभिमानः । अथवा शरीरतद्धारणप्रयत्नाननुसंधानवत् ।

नचाविकृतसांसिद्धिकवोधरूपेणात्मनः स्वापेऽवस्थानाभ्युपगमे स्वापमोक्षयोर्विंशेषः कोपि न स्यात्. उभयत्रापि तेन रूपेणात्मनोऽवस्थानादिति वाच्यम् तयोर्विंशेषस्य

अपि संस्कारवलात् , इन्द्रियसंवद्धविशेषणतारूपं संनिकर्षवलात्स्मरणभानं भवति तथैवप्रकृतेपि संस्कार वलादभानं स्यात् "अधिकं प्रविष्टं न तद्धानिरिति न्ययात् । इदमीयविशेषविचारः करिष्यते । ननु सर्वकाले आत्मस्वरूपानुभवोजायते इति कथनं न युक्तं प्रतिभाति, "यतः विषयानुभवसमये एवसुखादिविशेषणपूर्वकाहमर्थस्यात्मनः प्रकाशस्य सर्वानुभवसिद्धत्वात् , एकाकारेणानुभूयमाने विशेषाकारस्यस्फितौ सत्यामननुभवभ्रमोजायते, यथा लूनपुनर्जातकेशादौ, एकाकारेणानुभूयमानत्वमर्थात् केशत्वरूपसामान्यधर्मेण केशानामनुभूयमानत्वमस्ति, तत्रैव च विशेषाकारेण तत्तद्व्यक्तित्वेन तत्स्फुरणं नजायते तत्रैव द्वितीयपुनर्जातकेशेषु, अननुभवाभिमानो भवति ।

अत्रार्थे स्वयमनुरूपं दृष्टान्तं दर्शयति **शरीरतद्धारणप्रयत्नानुसंधान**वदिति । यथा जागरणावस्थायां सर्वदाऽनुभूयमानस्यकरपादादिसमुदायरूपदेहस्यागन्तुकविशेषस्फुरणसमये एव विशेषतः प्रतिपत्त्याकालान्तरेऽननुभूयमानतावदेव, अथवाऽन्तरस्य जागरणदशायां शरीरधारक प्रयत्नस्य सर्वदाऽनुवर्तनस्यापि, वुद्धिपूर्वककरचरणाद्युत्क्षेपणकाले एवं स्फुटरूपेणावभासात् ; कालान्तरेऽननुभूयमानतेव, एवं प्रकृतेपिवोद्धव्यम् । यद्यपि "यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत् । शरीरे प्राणसञ्चारे कारणं परिकीर्तितम्" इति शरीरविधारकप्रयत्नस्य जीवनयोनिशब्दशब्दबोधस्यातीन्द्रियत्वंन्यायमते स्वीक्रियते । तत्रापि शुभाशुभादृष्टवलादेव जीवनस्योपपत्तिसंभवेनातीन्द्रिययत्नकल्पनंगौरवपराहतमेव । जागरणकालेतु प्रयत्नेनापि शरीरादिधारणमिष्टत्वात् । स च प्रयत्नः प्रत्यक्षविषय एवेति । निद्राकालेतु, अदृष्टवलादेव शरीरादिधारणमित्याशय आचार्यस्य लक्षितप्रायोभवति । परन्तु यावत्कालंदृष्टकारणवलेन व्यवस्था भवति, तत्रादृष्टचरेणादृष्टवलेन तत्समाधानमयोग्यम् । अन्यथाऽदृष्टसहकृतेनमनसारूपादिसर्वविषयकव्यवस्योपपादनसंभवेन चक्षुरादिवहिरिन्द्रियाणां कल्पनमपि गौरवाघ्रातमेव भवति, निद्रादिवत् जागरणेऽपि शरीरादिधारणकार्यस्योपपादयितुं शक्यमित्यस्यापिवक्तुंशक्यत्वादिति । नहि "अर्धजरतीयं कुत्रापि शोभनमित्यधिकमन्यत्र प्रयत्नमीमांसायां द्रष्टव्यम् । विस्तरभयादत्रैतत् संक्षिप्यते ।

ननु यदि स्वापकालेपि तदीयवोधस्यानुवर्तनं स्वीक्रियते, तदा समाधिमोक्षयोः स्वापकालेन सह को विशेषः ? बोधवत्वस्य तदुभयत्रापि समानत्वात् । इत्याक्षेपान्तरमनूद्यपरिहर्तुमुपक्रमते **नंचाविकृत** इत्यादि । उत्तरयति **तयोर्विंशेषस्य विद्यमानत्वा**दिति । सत्यम् , स्वापेमोक्षे च

विद्यमानत्वात् । स्वापकाले अविद्यादिकक्लेशवासनानां तमसाऽभिभवस्य विद्यमानत्व रूपविशेषस्य सत्वात् । मोक्षकालेतु क्लेशानां समूलंविनाशात् । असंप्रज्ञातसमाधौसंसारकालेपि विदुषः सर्ववृत्तेर्निरोधेन तत्कृतो विशेषस्य विद्यमानत्वात् ।

ननु निद्रायां यदिवृत्तिराहित्यं तदा निद्रोत्थितस्यकथं "सुखमहमस्वाप्समिति" स्मरणम्, नहि अननुभूतपदार्थविषयकं स्मरणमुत्थातुमुत्सहते । उद्भूतसत्वेनाभिभूत तमोगुणेसति "सुखमहमस्वाप्सम्, लघूनि अङ्गानि, प्रसन्नं मे मनः" इत्यादि । वोधवत्वम्, तथाहि स्वापकालिको बोधः अविद्यास्मितादिपञ्चक्लेशसहकृतो भवति, तेन तत्र तमो गुणेनाभिभवात्, अत्यन्तसंकुचितज्ञानत्वं च स्वापकाले भवति, नहि स्वापकाले ज्ञानद्वाराऽऽत्मनः प्रकाशोभवतीत्ययं विशेषःस्वापे । मोक्षसमये तु "अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः" इति योगसूत्रप्रतिपादितपञ्चक्लेशानां समूलमुन्मूलनं भवति, ततश्च क्लेशात्मकावरणनिवर्तने नावरणरहितनित्यसंकोचरहितसर्वविषयकज्ञानवत्वंचात्मनो भवतीत्येतावानेव विशेष उभयस्थले । अर्थात् संसारकालस्थितज्ञानमावरणप्रतिवद्धमत एव संकुचितं भवति तमो गुणाभिभावात्, मोक्षकालेतु आवरणस्य सर्वथाऽपगमात् तत्कालिकं गगनोपमं सर्वविकाशितं सर्वविषयकंभवति तेनमुक्तजीवोपि सर्वज्ञ इति कथ्यते । एतावानेव स्वापमोक्षयोर्विशेषोयदेकत्रावरणसद्भावात् संकुचितं भवत्यन्यत्रमोक्षेतु, अनावरणात् विकाशितं सर्वप्रतिद्वन्दिरहितं निरंकुशविकाशोपेतं सर्वविषयकंभवतीति, स्पष्ट एव स्वापमोक्षयोर्भेदः । तदाहुर्मोक्षजीवप्रस्तावेजगद्गुरु श्रीरामेश्वरानन्दाचार्यसारस्वतसार्वभौमाः श्रीरामप्राप्तिपद्धतौ—

"श्रीमद्रामस्यसङ्कल्पाद्दिव्यदेहोभवत्यसौ । कालकाल्येतरेदिव्येदेशे प्राप्तो भवत्यथ ॥२१॥
सर्वान् कामांनवाप्नोतिचायंरामेणसहततः गुणानांविग्रहादेश्चस्वरूपरूपयोस्तथा ।
प्रत्यक्षाज्जायते प्रीतेः प्रकर्षोंहिततःपरम् । अनेकविग्रहाणां च जायतेऽथपरिग्रहः ॥
कामचारे च लोकानांसमर्थोऽपिभवत्ययम् ॥ (४२—४४) इति । संसारकालेसर्वस्यापिमनःक्लेशयुतमेव, तेन सर्वथा क्लेशमोक्षकालाद्विशेषः प्रदर्शितः । सम्प्रतिसंसारावस्थस्यापि अभ्यासवैराग्याभ्यां निरुक्तमनस आत्मैवासम्प्रज्ञातसमधिस्थस्यमनोमोक्षार्जनेकारणं भवतीत्येतावानेव विशेष इति दर्शयितुमाह **असंप्रज्ञातसमाधावित्यादि** । अवतरणेनैव कृतव्यख्यानमिदम् ।

। इति ज्ञाननित्यत्वेप्रसक्ताक्षेपाणांपरिहरणप्रकरणे तत्त्वदीपः ।

अथ स्वापसमयेपि, अनित्याया बुद्धिवृत्तिस्तादृशानित्यबुद्धिवृत्त्यैवात्मनः प्रकाशः सिद्धः स्यादेवेति स्वप्रकाशकत्वस्वीकारोनिरर्थक एवेति हृदि निधाय स्वापसमयेपि बुद्धिवृत्तेः स्वीकारआवश्यक एवेति शङ्कते **ननु निद्रायां यदि वृत्तिराहित्यंतदानिद्रोत्थितस्य** इत्यादि । निद्रयां वृत्तिर्न भवति तदा सुप्तोत्थितस्य, सुखमहमस्वाप्समित्यादिस्मरणंकथमुपपन्नं स्यात्, अनुभूतविषयस्यैव

रजस्तमोगुणयोरुद्रेकेऽभिभूतसत्त्वे "दुःखमहमस्वाप्सम्, भ्रमति मनः" इत्यादिप्रत्ययो जायते । तमसा रजःसत्वयोरभिमवे नितान्तंतमस उद्भवे "गाढमूढोहमासम्, गुरुणि मे अङ्गानि, शरीरम् मनः स्थगितमिवेति, प्रत्ययो भवति एतेषांनिर्वाहःकथंस्यात्, निद्रायांवृत्तिराहित्ये । सत्यमेवैतत्, परन्तुनैतेप्रत्ययाः संस्कारप्रभवाः किन्तु समुत्थानकालिक शरीरेन्द्रियादीनामवस्थाविशेषपर्यालोचनकारणका अनुमानिका एवेति । तथाहि यतोमनोऽतीवप्रसन्नमिववर्तते तथा विशुद्धाहारपाचनात् लघूनिचाङ्गानि, अस्मादेवकारणात्सुखमहमस्वाप्सम् । तस्मान्निद्राया नवृत्त्यन्तरत्वम् । न वा "अभावप्रत्ययालंबनावृ-

स्मरणदर्शनात्, अनुभवाभावेतज्जनितसंस्कारस्याप्यभावेन स्मरणोदयकदापि न स्यात्, सत्त्वगुणसम्बन्धे, उद्भूततमोगुणजनितसंस्कारेण, सुखमहमित्यादिसुखवानहमासमदीयंमनः प्रसन्नशरीरंचलघु इत्यादिस्मरणंभवति, रजोगुणस्याधिक्येदुःखस्मरणम्, सत्त्वरजसोरभिमवे तमोगुणस्य च नितान्तमुद्भवेगाढमूढसुप्तोस्मीत्यादिस्मरणंभवति । तदेतत्सर्वंनिद्रायां वृत्त्यभावेनोपपद्येत, तस्मान्निद्राकालेपि वुद्धिवृत्तेरनित्यायाः स्वीकार आवश्यक एवेति । अत्रायंप्रश्नग्रन्थस्यमुकलिताशयः तथाहि स्वापोहि तमोगुणस्यानुभवकालविशेषः तत्रलेशतः सत्वगुणसंसर्गे तमोगुणाधिक्येसुखंभवति । तथा सत्वस्य लघुत्वप्रकाशादिकं च भवति, तथा लेशतो रजःसम्बन्धे दुःखचलनादिकं च भवति । तथा सत्वरजसोरत्यन्ताभिभवेतमस आधिक्ये गाढमूढत्वादिकम् यत्रोक्तम् "सत्त्वंलघुप्रकाशकमिष्टमुपष्टंभकं चलं च रजः । गुरुवरणकमेव तमः प्रदीपवच्चार्थतोवृत्तिरिति । (सां. का.) एवञ्चस्वापसमये उद्भूततमसोऽनुभवएवतादृशानुभवजनितसंस्कारेण जागरणे "सुखमहमस्वाप्समित्यादि, स्मरणस्योपपादनं स्यात् अन्यथा तदननुभवेतज्जनितसंस्काराभावेकारणाभावेन प्रबोधे तद्विषयकस्मरणं न स्यात्, तस्मान्निद्रायामपिबुद्धिवृत्तिर्भवत्येवेतिमन्तव्यम् ।

अमुमाक्षेपमर्धस्वीकारेण परिहरन्नाह **सत्यमेवेति** । स्वापकालस्यतमोविषयकवृत्तिरूपत्वे, स्मरणरूपत्वेवा स्वपादिकाले निरुक्तज्ञानस्यास्वीकारः, एवेत्याशयेन दत्तोत्तरमेवेति । यदि न तमोवृत्तिरूपास्तदैतेषां किं रूपत्वमित्तत आह **आनुमानिकाएव** इति । सुप्तोत्थितस्य तत्समये क्रियमाणे विचारे इमे पूर्वोक्ताःप्रत्यया अनुमानादिप्रभवाइति, एतेऽनुमित्यादिप्रमाणजातत्वादनुभवरूपा एवेति । अर्थात्, स्वापकालो हि वृत्तिसामान्याभावरूप एव न तु वृत्तिनिष्ठप्रतियोगिताकोवृत्तिविशेषाभावात्मकः । योग्यपदार्थविषयकस्मरणाभावात्मकलिङ्गेन च प्रकाशस्वभावात्मिकाया वृत्तेरभावस्य तत्कालिकस्यानुमानमेव । शरीरेन्द्रियादिगतलघुत्वादिलिङ्गेन च सुखदुःखमूढत्वादीनामपि तत्रानुभवपूर्वपूर्वतरदिवससंपादितकार्यस्यदिनान्तरे प्रत्यभिज्ञानवलेन स्वापकालिकात्मसत्तांशेप्यनुमानरूपैवप्रदर्शितप्रतीतिरितिभावः । **निद्रायानवृत्त्यन्तरत्वम्** तमोगुणविषयकबुद्धिवृत्तिरूपत्वं निद्रायाः नैवस्वीकर्त्तव्यं, स्वापानुमानेनैव प्रदर्शितवृत्तिनांनिर्वाहादिति । ननु निद्राया वृत्तिरूपत्वं

त्तिर्निद्रेति योगसूत्रविरोधःशङ्कनीयः प्रकृतप्रकरणस्य वृत्तिनिरोधपरकत्वात् , नतुतस्य न स्वीक्रियते तदा "अभावप्रत्ययालवनावृत्तिर्निद्रेतिपतञ्जलिसूत्रकथं सामञ्जस्यमियादित्याशयेन शङ्कते **नवेति** उत्तरयति **निरोधपरकत्वात्** तदीयप्रकरणस्येति । अर्थात्भावपदार्थमवलंवते यावृत्तिः सैवनिद्रेति । भावालंवनवृत्तिसामान्याभावस्यैव निद्रात्वम् , ननु षट् पदार्थातिरिंक्तवस्तु विषयकत्वंनिद्राया इति । अस्याश्च निद्रायाः "योगश्चित्तवृत्तिनिरोध" इत्यनुसारेण वृत्त्यन्तरवदेव निरोधत्वसामान्यात् कथंचिद्वृत्तित्वोपचारमात्रत्वमेवेति । कथमेवमित्याशयेनोपयुक्तं दृष्टान्तं दर्शयति **विपर्ययादिवदित्यादि** । अयमाशयः विपर्ययोऽतद्रूपप्रतिष्ठं मिथ्याज्ञानम् , अर्थात्तदभाववति तत्प्रकारकमिति । परन्त्वेतादृशंज्ञानमेवनास्ति, सर्वज्ञानानामर्थेन सह व्यभिचारादर्शनात् ; सर्वज्ञानानांयाथार्थत्वमेव, नतु भ्रमरूपत्वं भ्रमस्यैवाभावात् । सर्वज्ञानं यथार्थरूपमेवज्ञानत्वात् , घटवत्तिघटकभूतलमितिज्ञानवत् , यथा घटाधिकरणे घटवदितिज्ञानं घटार्थिनोघटार्थप्रवृत्तस्य घटप्राप्तिदर्शनेन तस्ययाथार्थ्यमेव, तथैव ज्ञानमात्रस्यार्थाव्यभिचारादर्शनेन प्रमात्वमेवेति । अन्यथाऽन्याकारस्य रजताकारज्ञानस्यालंवनत्वेऽर्थात् शुक्त्यादिविषयकत्वे "इदं रजतमित्यस्यशुक्ति विषयकत्वे, रजतानुभवस्य विरोध आपद्येत ।

अर्थाद्यस्मिन् ज्ञानेयोभासते स एव तज्ज्ञानस्य विषयो भवति, ननु सत्तया विषयत्वमन्यथाघटादि ज्ञानकालेकलादेरपि विद्यमानत्वेन तेषामपि घटादिज्ञानविषयत्वापातात् । नवा यद्ज्ञानस्य यत् कारणं तत्तद्विषयोनयनादृष्टादेरपि घटादिज्ञानविषयत्वापातात् । नच "शुक्तिरजतमिति रजतज्ञाने शुक्तिकाऽवभासते, तथाचचर्व्यमानशुक्तिकावलंवनत्वकल्पनायां रजतानुभवोऽवश्यमेव विरुद्ध्यति तदुक्तमभियुक्तैः "अत्रब्रुमो य एवार्थोयस्यांसंविदि भासते । ज्ञेयः स एवे" त्यादि प्रकरणेन विषयलक्षणं कथयित्वापुनस्तत्रैवोक्तम् "अल्पस्य चान्यथाभानं प्रतीत्यैवपराहतम् ।परस्मिन् भासमानेपि न परंभासते यतः" इति [अन्यस्य शुक्तिकादेरन्यथा रजतरूपेणभानं प्रतीति पराहतम् , यतः परकीयज्ञाने भासमानेपि यतः परं न भासते इति] अपिचान्यज्ञाने तदन्यस्यभासमानत्वे ज्ञानानां स्वकीयविषयव्यभिचारे ज्ञाने लोकानामविश्वासः स्यादित्यपिपरज्ञानविषयत्वे ज्ञानेऽविश्वासः प्रसङ्गः स्यादित्यपिवाधकम् । तदुक्तमभियुक्तैः "यदि स्वार्थं परीत्यज्यकाचिद्बुद्धिः प्रवर्तते । व्यभिचारवती स्वार्थेकथं विश्वास कारणम्" इति । अस्यार्थः सर्वेषां बुद्धिरेव विश्वासस्थानम् शतशःकथनेपि, यावत्स्वबुद्धिर्न निर्णयं करोति तावन्नकोपि तमर्थंविश्वसति, इति सर्वविश्वासकारणं ज्ञानमेव स्वकीयमर्थं व्यविचारेत्तदासर्वेषां ज्ञानेऽविश्वास एव स्यादिति । अपिचज्ञानस्यस्वार्थे व्यभिचारेऽपसिद्धान्तदोषोपिबाधकोभवति, तथाहि, अविद्यमानस्यापि संसर्गस्य भासमानत्वस्वीकारेऽसत्ख्यातिवादिनोबौद्धस्यापि प्राप्तावसरतया बौद्धमत स्वीकारादित्यपसिद्धान्तोवादिनाम् । अर्थात् असदेव रजतंवहिःप्रतियेत तदा विज्ञानस्य साकारतापि भवेत् । तदुक्तम् "अयथार्थत्वपक्षे च ज्ञानं साकारतामियात्" इति । तदेवमनुभवविरोधानाशात्

सत् ख्यातिप्रसङ्गादिदोषसंभवेन नज्ञानमन्यायकं भवतीतिभ्रमाभावएवेति। अपिचैवं भ्रमज्ञानस्योत्पत्तौ कारणमपिनास्ति, यथा कारणाभावात् कूर्मरोमशशविपाणादीनामुत्पादो न भवति तथैव कारणाभावाद्भ्रमज्ञानमपिनैवोदेति। तदुक्तम् " अयथार्थस्यवोधस्य नोत्पत्तावस्ति कारणमिति।

नचान्वयव्यतिरेकाभ्यां चक्षुरादेरेव भ्रमोजायते इति चक्षुरादीन्द्रियेणैव भ्रमोत्पत्तिरितिवाच्यम् "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिनेति नियमेनेन्द्रियाणां संयुक्तपदार्थमात्रग्राहकत्वनियमात् देशान्तरस्थरजतेन सह चक्षुषः संयोगाभावेन तेन तद्ग्रहणासंभवात्। न च स्वरूपतश्चक्षुरादेर्देशान्तरस्थासंयुक्तपदार्थग्रहणासंभवेपि दोषदूषितेन्द्रियेणमिथ्याप्रत्ययजनकत्वं कथं न स्यादितिवाच्यम्, दोषाणां स्वाभाविककार्योत्पादकशक्तिप्रतिवन्धमात्रे कारणत्वात्, यथा कृष्णामूपिकाघ्रातवीजे तथा दर्शनात्। अर्थात् दोषेण स्वाभाविकशक्तिरेव प्रतिवध्यते नत्वतिशयाधानकरणमपि दोषकार्यम् तथासति नष्टचक्षुषः पुरुषस्य सर्वदर्शित्वमेवापद्येत, तस्मान्न दोपवशादिन्द्रियेण भ्रमोत्पादः संभवति। ननु दावाग्निदग्धवेत्रवीजस्य, यथा वा हरिद्राजलावसिक्ततदङ्गारपाचितहारीतमांसस्य, तथादशरात्रिपर्यन्तकांशपात्रेऽवस्थापितघृतस्य स्वाभाविकशक्तिनिरोधतद्विपरीतं रंभाकाण्डजनकत्वंतादृशघृतमांसयोः सद्य एव मरणजनकत्वं दृष्टमेव तथैवप्रकृतेपि स्वाभाविककार्यप्रतिरोधकत्व विपरीतकार्योत्पादकत्वं च किं नस्यादितिवाच्यम्, अभिप्रायानववोधात्। दावाग्निदग्धवीजात् कदलीकाण्डोत्पाद इत्येवं नात्रवक्तव्यम्, दग्धस्य वेत्रवीजस्यावेत्रवीजत्वेनात्रोदाहरणरूपेण तदुद्भावनस्यानुचितत्वात्। तस्माद् दोषाणां विपरीतकार्यकारित्वं प्रतिकारणत्वंनैवेति। प्रत्युतनष्टचक्षुषः पुरुषस्य सर्वदर्शित्वमापद्येत। कारणवशात् विनष्टचक्षुषो गरुडवद्दीर्घदर्शित्ववत्वमपिस्यादिति न भ्रमज्ञानोत्पत्तौ किमपिकारणं नास्तीति कारणाभावान्न भ्रमज्ञानस्य संभव इति। ननु इदं रजतमित्येवं रूपेणपुरोवर्तिरजतयोः संसृष्टव्यवहारदर्शनेन सत्यस्थलवत् संसर्गज्ञानपूर्वकत्वं मन्तव्यमेवेति चेत्सत्यम्, सर्वत्रप्रतीयमानयोः संसर्गिणोःसंसर्गव्यवहारस्यासंसर्गाग्रहमूलकत्वात्, संसर्गग्रहस्यापि कारणत्वकल्पने गौरवग्रासात्। तस्मादसंसर्गकारणकत्वमेव नतु स्वातन्त्र्येण संसर्गज्ञानस्यापि कारणत्वमिति। नच यदि भ्रमज्ञानंनस्वीक्रियेत तदा "नेदं रजतमिति निश्चयेन कस्यवाधः स्यात, भवन्मते वाध्यस्य भ्रमस्यैवाभावादिति वाच्यम्, नह्यत्र भ्रमस्यवाधता भवति, किन्तु असंसर्गाग्रहप्रसञ्जितसंसर्गव्यवहारस्यैव वाधनात्। एतावतैव वाधकस्य बाधकताया उपपत्तेः। इदं रजतमिति ज्ञानंतु संसर्गग्रहपूर्वकं नैकमेवेदं ज्ञानमपितु ज्ञानद्वयमत्र, तत्रेदमिति ज्ञानं पुरोवर्तिना सहचक्षुः संयोगादिजनितमनुभवात्मकम्, अस्येदमात्मकज्ञानस्य स्वप्रकाशरूपस्यापि स्वस्य स्वविषयस्य च, इतरस्मात् विवेचयितुमशक्यत्वेन, तस्य दोपदूषितेन्द्रियजन्यत्वेनाकलितशुक्तिकत्वादिविशेषसामान्यपुरोवर्तित्वादिमात्रं ग्रहणरूपत्वम्। रजतमित्यस्यचासन्निहितविशेषरजतत्वादिविषयस्य, सम्प्रयोगलिङ्गादिभ्योऽजायमानतया परिशेषात् रजतसंस्कारमात्रजन्यतया स्मरण

प्रकरणस्य वृत्तिस्वरूपणे तात्पर्यविपर्ययादिवत् । नहि, अतद्रूपप्रतिष्ठंमिथ्याज्ञानंनाम किञ्चिदस्ति, सर्वज्ञानानामर्थाव्यभिचारतया सत्यताया एव प्रतिष्ठापनात् । सचाधिकरणसिद्धान्तसिद्धः एतत्तत्वमन्यत्रप्रदर्शयिष्यते । मोक्षभागियन्मनस्तत्प्रतिद्वन्दितया निद्रायानिरोध्यत्वेन शास्त्रे उपदेशः ।

। इति निद्रायावृत्तिरूपत्वनिषेधप्रकरणम् ।

भवतु वा पूर्वोक्तप्रमाणविपर्ययवृत्त्यभावकारणभूतसञ्चिततमोगुणविषयक वृत्तिरेव निद्रा, भवतु च सुप्तोत्थितपुरुषस्यज्ञानं स्मरणात्मकमेव, तथापि सततानुवृत्तज्ञानतयाऽत्मनोवोधस्वरूपत्वं सिद्धमेव भवति ।

रूपत्वमेव । यद्यपि "सामेमातादि" स्मरणस्थले तत्तांशगोचरत्वं स्मृतेगृहीतग्राहिस्वरूपत्वात् , प्रकृतेतु तदंशरहितमिदं ज्ञानंतत्तांऽशस्याग्रहणात् कथं स्मृत्यात्मकम् , तथापि तत्तामात्रांशस्य दोषकारणकतया तत्तांशविषयतया स्वविषयविवेचकत्वं नभवति । नच तथापि स्वरूपतो विषयतश्च परस्पर विभिन्नाभ्यामाभ्यां ग्रहणस्मरणाभ्यां संसृष्टप्रवृत्तिः कथमिवजायते इति वाच्यम् , तयोरेतादृश ज्ञानयोरन्योन्यसंसर्गसाकांक्षसामान्यविशेषालंवनयोः स्वरूपतोविषयतश्चागृहीताऽसंसर्गयोर्निरन्तरं जायमानयोः स्वरूपेण यथार्थयोरपि,अयथार्थव्यवहारप्रवर्तकयोर्विभ्रमत्वप्रसिद्धेरप्युपपपादनंसमुपपद्यते एव । एतत्सर्वं संगृह्योक्तं "नयविथि" नामकमीमांसकग्रन्थे—

"संनिहितरजतशकले रजतमतिर्भवति यादृशीसत्या । भेदानध्यवसायादियमपि तादृक् परिस्फुरति॥
साधारणं हि रूपं तस्याश्चास्याश्च विद्यते तेन । तन्मात्र प्रतिभानात् समानतामेव मन्यन्ते॥
तत्तुल्यव्यवहारप्रवृत्तिरपि युज्यते चातः । तद्विनिवारणकारणबाधकभावोयं बाधकस्यापि ॥इति॥

एतत्सर्वं मनसि संनिधाय सुष्ठूक्तमाचार्येण **नहिअतद्रूपप्रतिष्ठं मिथ्याज्ञानंनामकिञ्चिदस्ति, सर्वज्ञानानामर्थाव्यविचारादिति** । इत्थंस्वरूपतो ज्ञानस्य विवेचनम् । विशेषविचारो ज्ञानस्य लक्षणनिरूपणावसरे प्रदर्शयिष्यते इतिदिक् ।

। इति निद्राया वृत्तिरूपत्वनिषेधनप्रकरणे तत्वदीपः ।

"सुखमहमस्वाप्सं न किञ्चिदवेदिषमि"त्यादिप्रत्ययस्य [ज्ञानस्य] स्मरणरूपत्वं स्वीकृत्यापि, आत्मनोबोधस्वरूपत्वं स्थापयितुमुपक्रमते **भवतु वा पूर्वोक्तप्रमाणविपर्यये** त्यादि, अयमाशयः, यदाऽत्मन उपलब्धिर्भवति, जागरणस्वप्नसुषुप्तिरूपावस्थात्रयेपि, तत्र सर्वत्र ज्ञानाधिकरणतयैवात्मनः समुपलभ्यमानत्वेन तस्यबोधस्वभाववत्वं सिद्ध्यत्येव, "सुखमहमस्वाप्समित्यादि" क्रमेग, यदा स्वापेपि बोधानुवर्तनं प्रतिपादितम्, तदायदभिमतं तस्यैवत्वयापि प्रतिष्ठापनात् । अस्माकं तदिष्ठमेवस्थापितमिति संक्षेपः ।

अथ बोधकारणबाह्याभ्यन्तरसंयोगलिङ्गादीनामनुवर्तनेनापि बोधानुवृत्तिसंभवे कथंबोधस्वभावत्वमिति चेन्न, स्वतःसिद्धबोधस्वरूपत्वमन्तरेणस्वापकालिकं तमः सिद्धमेव न स्यात् साधकप्रमाणाभावात् । तथाहि यतः स्वापकालेमनःसहितानिसर्वाण्यपीन्द्रियाणिविरतानिजातानि स्मृत्यतिरिक्ते च संस्कारस्यापि सामर्थ्याभावात् । न च तमः स्वप्रकाशात्मकम् तमोवत् तदन्यस्यापिप्रकाशप्रसङ्गात् । सर्वार्थप्रकाशकत्वेन बोध एव निश्चित इति तेन बोधेनैवतमसः सुखादीनांगुणानांस्फुरणं भवतीति मन्तव्यम् ।

अयमात्माप्रमातृत्वात् नित्यप्रकाश एव यत्रयत्रानित्यप्रकाशत्वं तत्र न प्रमातृत्वं घटादिवत् । तदुक्तमभियुक्तैः—

नन्तु स्वापकालेऽन्तःकरणवृत्तेः स्वीकारेपितावताज्ञानस्यनित्यत्वं न सिद्ध्येत्, यतोऽन्तःकरणवृत्तेश्चक्षुरादिकरणान्यतमतयानित्यत्वं सर्वत्रैव दृश्यते । एतादृशींकस्यचित् शङ्कांसमाधातुं प्रथमतःशङ्कामेवानुवदन्नाह **अथ बोधकारण** इत्यादि । स्वापादौकारणानुवर्तनेनतत्कार्यबोधस्याप्यनुवर्तनसंभवेनबोधस्य नित्यत्वं कथमिति शङ्कितुराशयः । इमां शङ्कां परिहरति **इति चेन्न स्वतःसिद्धबोधस्वरूपत्वमन्तरेण** इत्यादि । ज्ञानस्वभावत्वनिर्णयोवक्ष्यमाणप्रकारेण करिष्यते इति । **स्वापकालिकं तमः** इत्यादि । उपरतव्यापारतया चक्षुरादिकारणानां न स्वापे ज्ञानवृत्ते संभवः । तस्मात् स्वतः सिद्धबोधेनैव तमो गुणस्य प्रकाशो भवतीतिस्वीकर्त्तव्यम्, यदि स्वापेतमसःप्रकाशोभवेदिष्टस्तदा, तत्सिद्धेबोधस्वभावत्वमिति । वस्तुतस्तु, स्वापकालेज्ञानस्य न तमः प्रकाशकत्वम्, अतिशयेन संकुचितवृत्तित्वात् । स्वापकालिकानुभवबलात् सुखवत्वे न स्वापेभासमानस्यात्मनःपरामर्शःस्मरणं प्रबोधकाले भवतीति वेदान्तसिद्धान्तः । अस्वाप्समिति स्वापकालांशयोस्तु अनुमितिरूपेवपूर्वोक्तप्रतीतिः नित्यानुभवस्यसंस्कारानुत्पादकत्वेतुसाक्षादेव स्वापकालिकात्मानुभवस्वरूपस्य यथोक्तानुसंधानकारणत्वं सुखत्वेनात्मावगाहनांशे ।

ननुं भवतु बोधस्वभावकआत्मा, तथापि तादृशात्मनोऽन्तःकरणवृत्तिसमये एव प्रकाशो जायतां न पुनः सर्वकालिकःप्रकाशइत्याशङ्कायां तादृशात्मनोनित्यप्रकाशत्वंसाधयितुमुपक्रमते **अयमात्माप्रमातृत्वान्नित्यप्रकाशएवेति** । तत्रात्मापक्षःनित्यप्रकाशवत्वं साध्यम्, प्रमातृत्वं हेतुः । यत्र यत्र नित्यप्रकाशत्वंनास्ति तत्र तत्र पराधीनप्रकाशत्वमेव, यथा पटादौ, तत्र दृष्टान्ते प्रमातृत्व व्यतिरिक्तोनित्यप्रकाशस्यापि व्यतिरेकः सुलभः, इहच । प्रमातृत्वव्यतिरेकात् तद्व्यापकपराधीनप्रकाशवत्वस्यार्थात् नित्यस्वप्रकाशवत्वस्यैव साधनं भवति । यथा धूमव्यापकवन्हेरभावात्, जलादौवन्हिव्याप्यधूमस्याप्यभावोबलादेवायाति, व्यापकाभावस्य व्याप्याभावसाधकत्वेननिर्णीतत्वात् । एतदेव **तदुक्त**मित्यनेन स्पष्टीकृतम् । ज्ञातृत्वस्वप्रकाशत्वमित्यादि । ननु यदात्मनि नित्यप्रकाशत्वम्, नित्य-

“ज्ञातृत्वात्स्वप्रकाशत्वं तथा श्रुत्यापि संस्थितम् ।
अप्रमातृतयायुक्ताजडरूपत्ववस्तुषु ॥ इति । तथैव
“ततो ज्ञानस्वरूपात्मा विभुज्ञानं च तद्गुणः । ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।’
एवं विष्णुपुराणे हि ज्ञानस्वरूपतात्मनः । मन्ताबोद्धेतिप्रामाण्याज्ज्ञाताजीवोबुधैर्मतः ।
ज्ञोत एवेति सूत्रं हि ततो व्यासेन सूत्रितम् । विज्ञानं यज्ञंतनुतेज्ञानोक्तिश्चेतियाऽऽत्मनः ।
विज्ञानगुणसारत्वात् सूते सा प्राज्ञवन्मता । (श्रीबोधायनमतादर्शे (८९६–८९९) इति च

। इत्यात्मनोज्ञानस्वभावस्यनित्यस्वप्रकाशत्वसमर्थनप्रकरणम् ।

वोधकृतमेव कथं न स्यात् । तत्राह **ज्ञातृत्वादिति** व्यापकाभावेनव्याप्याभावोभवति, अर्थात् व्यापकाभावोव्याप्य:व्याप्याभावस्तु व्यापक एव भवतीतिनियमः । तदिहव्यापकाभावेनव्याप्याभावः सिद्ध्यतीति । अर्थादस्यात्मनोज्ञातृस्वभावत्वादेवापराधीनप्रकाशत्वस्य सिद्धिर्भवतीति । अतएवेदमपि परास्तम्, धर्मभूतज्ञानस्यप्रकाशो यद्यपि, अनुव्यवसायादिज्ञानान्तराऽपेक्षो भवति, तथापि, आत्मसम्बन्धापेक्षस्तु भवत्येवेति, ज्ञानेऽनन्याधीनप्रकाशत्वलक्षणं सिषाधयिषितं साध्यं न विद्यते, तेन सपक्षे ज्ञाने सति पक्षमात्रवृत्तिज्ञातृत्वम्, सपक्षविपक्षव्यावृत्तित्वेनासाधारणानैकान्तिक दोषंनातिक्रामतीतिशङ्काया अपि प्रकृतेऽवसरो न भवतीति ।

यद्यपि केवलव्यतिरेक्यनुमानस्य प्रमाणत्वं न सिद्धान्तसिद्धम्, तथापि परप्रक्रिययैवपरान्, निराकर्तुमेतावान् प्रयासंकृतवान् । सिद्धान्तेचान्वयि, अनुमानेनैवात्मनः स्वप्रकाशत्वसाधनं भवति । न्यायमते, त्रिप्रकारकमनुमानम्, केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्, इदंवाच्यं प्रमेयत्वात्, पृथिवीस्वेतरेभ्योभिद्यते गन्धवत्वात्, अत्रजलादिर्दृष्टान्तः । पर्वतो वन्हिमान्, धूमादित्यत्रान्वयव्यतिरेकव्याप्तिबालादुभयव्याप्त्यापि समावेशसंभवात् । अत्र स्वसिद्धान्तेऽन्वयि अनुमानेनैवात्मनः स्वप्रकाशत्वमात्मनः साधितं भवति । नित्यत्वाग्राहकप्रमाणवलेनैवात्मनस्तदीय प्रकाशस्यापि नित्यत्वमर्थत एव सिद्धंभवतीति संगिरन्ति सैद्धान्तिकाः । वस्तुतस्तु “सत्यं ज्ञानमानन्दं ब्रह्म” “प्रज्ञानं ब्रह्म” इत्यादि श्रुतिभिरात्मनो ज्ञानरूपतामभिधाय, पुनस्तस्य “अत्रायंपुरुषः स्वयं ज्योतिर्भवति” “न तत्र चन्द्रंतारकंनेमाविद्युतोभान्ति, तमेवभान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभाति” इत्यादिश्रुतिभिः “न तद्भासयते सूर्योन शशांको न पावकः” इत्याद्यतेकस्मृतिभिश्च, तादृशज्ञानस्वरूपस्यात्मनः स्वतः सिद्धप्रकाशत्वं कथयित्वा प्रकरणस्योपसंहारमकरोत् । एवञ्च सर्वप्रमाणशेखरेणागमेनैवात्मनस्वतः सिद्धबोधरूपत्वं प्रकाशात्मकत्वं च प्रतिष्ठापितवान् । तत्र को नाम लौकिकप्रमाणस्य तर्कस्य युक्तेर्वाऽवसरः । तस्मात्स्वतबोधरूपत्वमेवात्मनः सिद्ध्यतीति संक्षेपः ।

॥ इत्यात्मनो ज्ञानस्वभावस्य नित्यस्वप्रकाशत्वसमर्थनप्रकरणे तत्त्वदिपः ॥

अथ कोयं प्रकाशशद्धार्थः, यश्चप्रकाश आत्मानो नित्यः स्वतः सिद्धश्चात्मनः स्वीक्रियेत । तथाऽस्यप्रकाशस्यात्मना सह सम्बन्धः ? यदि ज्ञानमेवप्रकाशःसम्बन्धश्चाश्रयाश्रयिभावात्मक एवेति ब्रूषे, तदा हेत्वभावसाध्याभावयोर्व्याप्तौ दृष्टान्ततयाघटादिरेव स्यात्, यदनित्यप्रकाशं न तत् प्रमातृ, यथा पटादिरिति ।

ननु "सप्रसङ्गउपोद्घातहेतुताऽवसरस्तथा । निर्वाहकैक्यकार्यैक्येपोढा संगतिरिष्यते" इतिसंगतिघटक "स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग" इति प्रसङ्गसङ्गतिमभिप्रेत्यप्रकाशशद्धार्थस्य निर्णयाय विचारमुपक्रमते **अथकोयंप्रकाशशब्दार्थ** इत्यादि । अथवा "चिन्तांप्रकृतसिद्ध्यर्थामुपोद्घात विदुर्बुधः" इत्युपोद्घात लक्षणम् , तत्रात्मनः स्वतः प्रकाशत्वसाधनं तदैव संभवति यदि तत्पूर्वं प्रकाशार्थस्य स्वरूपतो लक्षणतश्च निर्णये सत्येवेत्यात्मनः स्वतः सिद्ध्येतत्पूर्वमस्य विचारो निर्णीतो भवेदिति प्रकृतस्यात्मविचारस्यसिद्ध्यनुकूलत्वस्य प्रकाशत्वस्य विचारः पूर्वं कृत इत्यनेन प्रकारेणोपोद्घातसङ्गतिमाश्रित्यापि तद्विचारोपक्रमते **अथकोयं प्रकाशशब्दार्थः** अत्राथशद्धः प्रकाशप्रकरणस्यारंभार्थकः 'अथयोगानुशासनमिति योगशास्त्रमधिक्रियते, तथैव प्रकाशशद्धार्थोप्यारभ्यते । अथवा "ओंकारश्चाथ शद्धश्चद्वावेतौ ब्रह्मणः पुरा । कण्ठंभित्वाविनिर्यातौ तस्मान्माङ्गलिकावुभावितिमङ्गलार्थक एव सः ।

यद्यपि अथ शब्दस्य वाच्यो वा लक्षो वा मङ्गलम् ,तथापि, अन्यार्थमानीयमानोदककुम्भवत् , मृदङ्गशंखकोकिलादिवत् मङ्गलप्रयोजकंतु भवत्येव । किं शब्दश्च आक्षेपार्थकः । अथस्वप्रकाशशद्धार्थविचारे कृते न कोपि घटते इत्यर्थः । अथवा किमः सर्वनामतया, तदादिशब्दवत् , प्रसिद्धार्थक एव । यथा"द्वयं गतं सम्प्रति सोचनीयतां समागमप्रार्थनया कपालिनः । कला च सा कान्तिमतीकलावतस्त्वमस्यलोकस्य च नेत्रकौमुदी" अस्मिन् कुमारसंभवीयकालिदासवाक्यस्य घटक वत् , सात्वमित्यत्र तत् पदं सर्वप्रसिद्धमर्थं बोधयति, अर्थात् , सर्वलोकप्रसिद्धाचन्द्रकलावत् त्वं च पार्वती शोचनीयता गतेति । पार्वतीचन्द्रकलयोः सर्वलोकप्रसिद्धवदिहापि प्रकाशस्य सर्वलोके प्रसिद्धिरेव, प्रकाशमन्तरेण चक्षुषादिव्यवहारस्योपपादयितुमशक्यत्वादितिसंक्षेपः । विशेषः शब्दशक्तिवादे ।

कश्चायं प्रकाशः, योहि आत्मनोनित्यः सांसिद्धिकश्च स्वीक्रियते, तथाऽस्यात्मना सह सम्बन्दश्च किं स्वरूपः ? नित्यमपीदमीयं ज्ञानं प्रतिकर्मादिव्यवस्थोपपादने समर्थमित्यत एतदीयविचारस्य प्रकृतोपयोगित्वमिति । यदितु ज्ञानमेव प्रकाशः सम्बन्धस्तु आधाराधेय रूपः । यथा "प्रकाशते" इत्यत्र सोपसर्गस्य काशधातोरर्थः प्रकाशो ज्ञानमेव तथा प्रकाशते इत्यत्र, आख्यातस्यार्थः आश्रयत्वम् , इतियदुच्यते, इति प्रश्नार्थः । तदेतद्दूषयति, **तदाहेत्वभावइ**

तत्र घटादौ, विशेषनिषेधस्यसामान्येपर्यवसानेनजन्यंज्ञानमेव घटादौ स्वीकृतं भवेत् । अथैतद्दोषपरिहाराययदिविषयविषयिभावःसम्बन्धोऽभ्युपगच्छेत, तदा नित्यज्ञानविषयत्वमात्मनःप्रसज्येत, ज्ञानविषयत्वं च साधनाधीनमिति न तस्य स्वाभाविकत्वमर्थान्नित्यत्वं स्यात् ।

न चाचेतनविषये एव साधनाधीनत्वनियम इति वाच्यम् चेतनान्तरविषयत्वेपि तथादर्शनात् । नचानात्मविषयक एव साधनसापेक्षत्वनियम इतिवाच्यम्, आत्मनोपियोगजलिङ्गशब्दादिप्रमाणविषयत्वेकरणसापेक्षत्वस्यसर्वानुमतत्वात् । **अपिचैक**त्यादि एवं हेत्वभावनिरूपितसाध्याभावनिष्ठव्याप्तौ, उदाहरणरूपेणाचेतनघटादेरेवोपादानमितिवक्तव्यम्, अर्थात् यदनित्यप्रकाशवत्, पराधीनप्रकाशंवा, न तत् प्रमातृ भवति, यथा घटः । दोषमेवोपपादयति **तत्रघटादौविशेषनिषेधस्येत्यादि** विशेषनिषेधस्य सामान्यस्वीकारपर्यवसायितायादर्शनात्, यथा घटवति नीलघटनिषेधः सामान्यतो घटं स्थिरयत्येव, तथैव प्रकृते नित्यप्रकाशरूपविशेषनिषेधसामान्यतो ज्ञानवत्वे पर्यवसानात्, घटादिदृष्टान्ते सामान्यतो ज्ञानवत्वमापतितंभवेत् तच्च न युक्तं प्रतियोगिव्यधिकरणज्ञानाभाववत्वस्यैव जडत्वात्, तत्र केनापिरूपेण कदाचिदपि ज्ञानसद्भावस्वीकारे घटादयोजडतांविमुञ्चेरन्निति महत्कष्टमापतितं देवानां प्रियस्येति, नच तर्हि घटादिंहेत्वभावोज्ञातृत्वंनस्यादितिस्वरूपासिद्धदोषः प्रकृतानुमानेभवेदिति वाच्यम् । अनात्मत्वस्यैवात्राज्ञातृत्वपदेन विवक्षितत्वात् । प्रकाशाश्रयत्वमात्रस्य तु साधनायोगः सिद्धत्वादित्यपिध्येयम् ।

पूर्वोक्तदोषनिराकरणाय प्रकारान्तरं पूर्वपक्षीसमुपस्थापयति । **अथैताद्**त्यादि । नन्तु न भवतु ज्ञानात्मनोराश्रयाश्रयिभावः सम्बन्धः किन्तु तत्र घटज्ञानवत् विषयविषयिभाव एव सम्वन्धो भवतु, अर्थात् ज्ञानविषयत्वमेव प्रकाशमानत्वमित्यपिं वक्तुं न युज़्यते, कथम् ? तत्राह **तदानित्यज्ञानविषत्वमित्यादि** तथा च नित्यप्रकाशमानत्वसाधनेनात्मनः सार्वकालिक ज्ञानविपयत्वप्रसङ्गःस्यात् । तथाज्ञानविषयत्वस्य कारणविशेषाधीनतया न स्वाभाविकत्वंस्यात् । इष्टत्वे दोपमाह **ज्ञानविषयत्वंचेत्यादि** ज्ञानस्यविषयप्रकाशनव्यापार इन्द्रियादिद्वारेणैव भवतिं, ततइतरानपेक्षो नित्यश्च ज्ञानविषयत्वमात्मनि साधितं भवेदिति । नचाचेतनविषयक एव पूर्वोक्तनियमः, अर्थात्, इन्द्रियादिकरणाधीनत्वमेव विषयीकरणमितिनियमोऽचेतनविषये एव भवति नतु चेतनविषये तथा नियम इति वाच्यम् , चेतनान्तरविषयत्वेपि तथाभावदर्शनात् । नचानात्मकविषयकोयं कारणसाक्षेपत्व नियमः, अर्थात् स्वात्मव्यतिरिक्तविषये एवं विषयीकारस्य चक्षुरादिकारणसापेक्षत्वमिति वाच्यम्, आत्मनोपि लिङ्गशब्दादिज्ञानविषयत्वें, लिङ्गादिकरणजन्यत्वनियमदर्शनेन यथोक्तनियमे संकोचस्यानुचितत्वात् । ननु आत्मनःस्वरूपमात्र विपयकज्ञानमेव साध्यत्वेनाभिमतम्, एतादृशनित्यज्ञानस्यात्मविपयीकरणे नं करणसापेक्षत्वमित्या-

स्यैवैकक्रियायां कर्तृत्वकर्मत्वेऽपि विरोधस्यजागरूकत्वात् । नित्यत्वसूक्ष्मत्वादिरूपेण जीवस्यैवानुमानादिविषयत्वं नतु स्वरूपतः । स्वरूपापेक्षया स्वतः सिद्धिस्वीकारे न भवेत्तदा विरोधसमाधानमिति । रूपभेदेन विरोधसमाधानेतु शब्दादिवदेव न स्वतः सिद्धमात्मनः ।

इतिज्ञानाश्रयत्वविषयत्वयोः प्रकाशमानरूपत्वाक्षेपोद्भावनप्रकरणम् ।

यद्युच्येत न ज्ञानरूपः प्रकाशः किन्तु ज्ञाननिमित्तश्चेतनतदितरसर्वपदार्थानुगतोधर्मविशेष एव प्रकाशः, एतद्बलादेवसमानरूपेण सर्वपदार्थेपु प्रकाशते व्यवहारः प्रत्ययश्चापि भवति । तेन सह सर्वपदार्थस्याश्रयाश्रयिलक्षणःसम्बन्धो भवति । स च पूर्वोदीरितकारणवलात्स्वाभाविको नित्यश्चात्मनः ।

शयेनाह **अपिचैकस्यैकस्यांक्रियायामि**त्यादि आत्मनः स्वरूपमात्रस्य एकक्रियायां कर्तृत्वंकर्मत्वमतीवविरुद्धम् । नहि भवति देवदत्तो देवदत्तं गच्छति । कुतः ? परसमवेतक्रियाजन्यफलाश्रयत्वस्यैव कर्मत्वात् स्वस्मिन् क्रियाजन्यफलस्यपरसमवेतत्वाभावात् । ननु स्वरूपमात्रज्ञाने आकार भेदेन कर्तृत्वंकर्मत्वमुभयमप्यविरुद्धं स्यात् तत्राह **नित्यत्वसूक्ष्मत्वे**त्यादि आत्मनो यदनुमानशब्दादिविषयत्वं न स्वरूपतः किन्तु धर्मविशेषवत्वेनैव तत्रस्वरूपापेक्षयैवात्मनः स्वतः सिद्धत्वस्वीकारे विरोधस्योद्धारः कथमपि न स्यात् । ननु स्वरूपस्यैव गम्यत्वं तस्यैव च गमकत्वमपि सामान्यविशेषधर्मभेदात् कथंचित्संभवेदिति चेत् एतदपि न समीचीनम् एवं सत्येकक्रियां प्रतिएकस्यैव रूपान्तरेण कर्तृत्वंरूपान्तरेण च कर्मत्वं फलितम् ततश्च सर्वत्रगमनादिक्रियायामपि गमनादिविशिष्टाकारेण देवदत्तस्य कर्मत्वं स्वगतधर्मवत्वेन कर्तृत्वस्योपपादयितुं शक्यतया एकत्र कर्तृकर्माभावभावस्यदत्ततिलाञ्जलितैवापतेत् अथवा अयं शब्द इत्याकारकशब्दवोधकशब्दस्यशब्दशब्दवाच्यत्वेपि वाच्यता श्रोत्रेन्द्रियग्राह्यगुणत्वाकारेण वाचकता तु तादृशानुपूर्वीविशेषेणेति न स्वयं प्रकाशत्वमपक्षरूपस्य शब्दस्य तथैव ग्राह्यग्राहकतावच्छेदकधर्मभेदे पक्षीभूतस्यात्मनो न स्वयं प्रकाशत्वं सिद्ध्येदिति ।

।। इति ज्ञानाश्रयत्वविषयत्वयोः प्रकाशमानरूपत्वेदोपोद्भावकपूर्वपक्षप्रकरणे तत्त्वदीपः ।।

ग्राहग्राहकतावच्छेदकधर्मभेदेशद्बशद्बवत्, आत्मनोपिस्वप्रकाशत्वं न सिद्ध्यतीतिप्रश्नस्यभट्टप्रक्रियामाश्रित्यनिरसितुमुपक्रमते **यद्युच्येत** इत्यादि । **न ज्ञानरूपः प्रकाशः** इत्यादि । अयमाशयोऽत्रशङ्ककस्यप्रकाशोनामप्राकट्यम्. आश्रयत्वं च सम्बन्धः, घटादिः प्रकाशते, इत्यादि प्रतीतिर्व्यवहारश्चप्राकट्याश्रयत्वार्थक एव प्रायशो भवति । स च प्राकट्यार्थकप्रकाशो ज्ञानेन जायते, सं च प्रकाशश्चेतनतदितरसर्वपदार्थेषुसमानरूपेण भवति, घटः प्रकाशते तथैवात्मापि प्रकाशते इति प्रतीतिदर्शनात् । स एव प्रकाशो नित्यःस्वभावसिद्धश्चात्मनः इत्येव ज्ञातृत्वलिङ्गेना-

पूर्वमेवनिराकृतोऽयंपक्षः । न ज्ञानभिन्नःकश्चित् प्रकाशाख्यः पदार्थो यदीय व्यवहारेऽनूकूलं प्रकाशते इत्युच्येत । ज्ञेयस्य विषयस्यज्ञातुःस्वात्मनश्चव्यबहारानुकूलं ज्ञानमुत्पद्यते । अतोयुक्तोज्ञेयादित्रिष्वपि समानरूप एव यः प्रकाशते इति व्यवहारः। अतिरिक्तप्रकाशस्वीकृतेतत्स्वभावतयापुनश्चैतन्याभ्युवगमेन किम् ? प्रकाश एव ज्ञानमितिनैववाच्यम्, तदाघटादेर्ज्ञेयस्यापिप्रकाशाश्रयतयाचेतनत्वप्रसङ्गात् ।

यद्युच्येत, सतिचेतनावत्वे एव पुरुषस्यप्रकाशमानत्वमित्यपिनवक्तव्यम् संविदि तदानीं किं स्यात् ? सासंवित् चेतनारूपैव, न चेतयते, अथ संविदो ज्ञानस्यतत्सम्बन्धाधीनःसप्रकाशरूपोधर्म इति चेत् ? कस्तयासंविदा सम्बन्धोः यतस्तन्निबन्धनम् ? आश्रयाश्रयिभावत्वंतु न घटादेरपितदभावप्रसङ्गात् । नवा विषयविषयिभावःसम्बन्धः

नुमातव्यमिति शङ्काग्रन्थस्यसंक्षेपेण विवरणं भवति । इदंभाट्टमतं प्रभाकरमतेननिराकर्तुमाह **पूर्वमेव निराकृत** इत्यादि, "घटो ज्ञातः" इत्याकारकज्ञाततान्यहारस्यस्वप्रकाशज्ञानादेव ज्ञाततोपपादनसंभवेन ज्ञानजन्यज्ञाततानामकधर्मान्तरस्वीकारे न किमपि प्रमाणं विद्यते इति भट्टमतनिराकरण प्रकारो ज्ञातव्यः । ज्ञानभिन्नःप्रकाशनामकोनास्ति कश्चित्, यस्य व्यवहारोपपादकानुकूलं ज्ञानम्, तत्प्रकाशते इत्युच्येत। ज्ञेयस्यविषयस्यज्ञातुरात्मनश्चव्यवहाराऽनुकूलंज्ञानमुदयस्तस्मात् "त्रिष्वप्येकरूपःप्रकाशते व्यवहारः" अर्थात् प्रकाशोज्ञानम्, ज्ञानाधीनव्यवहारकारणसम्बन्धःप्रकाशते, इत्यत्राख्यातार्थ इतिपक्ष एव विषयस्तज्ज्ञानतज्ज्ञातृषु, एकार्थत्वं प्रकाशते इति व्यवहारस्योपपद्यतेऽयमेवार्थः । अर्थात् ज्ञानज्ञेयज्ञातृणांव्यवहारानुगुण्यापादनं घटादिसर्वविज्ञानानांस्वभाव इति भावः। यदि कदाचित् ज्ञानव्यतिरिक्तप्रकाशस्य नित्यस्य. आत्मनिस्वीकारे तु, तत्रात्मनि ज्ञानसमवायस्वीकारोनिरर्थक एव इत्याशयेनाह **अतिरिक्तप्रकाशे**त्यादि । तत्वान्तरस्यज्ञानातिरिक्तप्रकाशनामकपदार्थस्यात्मनिस्वीकारेतु तत्रज्ञानस्वीकारोऽनर्थक एवेति ।

ननु स्वविषयकज्ञाने विद्यमाने एवात्मनः प्रकाशमानतेति योगक्षेमसाधारणप्रयोजकत्वस्यस्वीकारात्, नात्मनि चैतन्यमर्थात् ज्ञानस्यवैयर्थ्यमित्याशयेन शङ्कते **यद्युच्येत** इति । सत्येवपुरुषस्यचेतनावत्वे तदैवात्मनः प्रकाशवत्तेति न ज्ञानस्यवैयर्थ्यमितिभावः पुनराक्षिपति **संविदिति** तत्र संवित् पदवाच्यंज्ञानमेव भवति, परन्तु ज्ञानं तु न ज्ञानस्याश्रयीभूतम्, तथा च चैतन्यसमवायित्वप्रकाशमानताप्रयोजकत्वस्वीकारे चैतन्येचैतन्यभावेन प्रकाशमानत्वं न कथमपि घटेतेतिभावः । अथ चैतन्यसम्बन्ध एव प्रकाशस्यकारणंस्वीक्रियते चेत् तादृशाशङ्कायामाह **कस्तया संविदासम्बन्धः** इति । तयाचेतनया सह कः सम्बन्ध इत्यर्थः । अत्र सम्बन्ध विकल्पनेनदोषमुद्गिरति । तत्र चैतन्यवदात्मसमवेतत्वस्य यदि चैतन्यसम्बन्धत्वमिष्यतेतदाघटादेर्बाह्यपदार्थस्य प्रकाशोन स्यात्, यतोघटादौवाह्ये उपयुक्तसम्बन्धाभावात् । इत्याशयेनैव कथितं **घटादेस्तदभावप्रसङ्गात्**, अर्थात् घटादेः प्रकाशाभावप्रसङ्गादित्यर्थः ।

विषयविषयिभावस्याद्याप्यनिरूपणात् । आत्मनस्तस्य चाप्रकाशप्रसङ्गात् । ज्ञानाधीन प्रकाशाश्रयतयैवतत्सिद्धिस्तथा च तदनुमानमित्ययमपि पक्षः पूर्वमेवापसारितः ।

स्वप्रकाशज्ञानानुवादिनां गुरुणामपिव्यहारानुकूल्ये एकरूपत्वमशक्यमेव-ज्ञानाश्रयेआत्मनिज्ञानंसमवेतंसम्बन्धरहितार्थेकथंप्रकाशं व्यवहारं वा जनयेदिति विचार-

अथ यदिं चैतन्यविषयत्वस्यचैतन्यसम्बन्धत्वं स्वीक्रियात् तदाचैतन्यस्यतदाश्रयभूतस्यात्मनश्चप्रकाशो न स्यात् तत्राह **न वा विषयविषयिभावः** तस्यैवानिरूपणत्वादिति । अत्र विषय विषयिभावो न घटते, तत्स्वरूपस्यैवाद्यापिनिरूपणाभावात् , निरूपणे वा, नभवेत्तदावादिविवादात्मककोलाहलस्यावकाशः । आत्मनश्चैतन्यस्य च विषयत्वाभावेन तयोः प्रकाशो न स्यात् । आत्मनः=संविदस्तस्यपुरुषस्य च प्रकाशप्रयोजकस्यचैतन्यविषयत्वस्य, अङ्गुल्यग्रेणस्वात्मस्पर्शवत् चैतन्ये, कर्तृकर्मभावविरोधेनात्मनि वा संभव एवेति ज्ञेयमिति । ननु भवतु कर्मकर्तृभावविरोधस्तदापिज्ञानस्याश्रयतयैवात्मनिप्रकाशते इति व्यवहारः । यद्यपि स्वभावतोज्ञानस्यातीन्द्रियत्वमर्थादिन्द्रियाविषयत्वं तथापि तस्य ज्ञानस्यज्ञाततालिङ्गकानुमानादेव [घटत्ववतिघटत्वप्रकारकज्ञातता घटत्ववतिघटत्वप्रकारकज्ञानजन्या, तादृशज्ञातत्वात्, पटादिज्ञानतादिवदित्याद्यनुमानादेव] प्राकट्यं संभवति, तदेव प्रकाशते इति, व्यवहारस्यकारणंस्यादित्याशङ्कायामाह **ज्ञानाधीनप्रकाशाश्रयतयैवतत्सिद्धिरिति** ज्ञानानुमानस्यप्रभाकरेणनिराकरणात्, ज्ञानस्यज्ञानरूपतयैव "प्रकाशते" इत्याकारकव्यवहारोवक्तव्यः । तथा च ज्ञानधर्मेणप्राकट्येनघटपटादिविषयेषु तथा ज्ञानरूपतयाज्ञाने, ज्ञानाश्रयतयाचात्मनिप्रकाशते इति व्यवहारहः स्यात् । एवञ्च ज्ञातृज्ञानज्ञेयेषुत्रिष्वपितस्यज्ञानस्यैकरूपत्वं न संभवत्येतन्मते ।

एवं यथोक्तप्रकारेण 'ज्ञानज्ञेयज्ञातृषु' इत्याकारकव्यवहारस्यैकरूपत्वं न संभवति, किन्तु विषयत्वज्ञानत्वप्रमातृत्वादिविभिन्नरूपेणैवप्रकाशते इत्याकारकव्यवहारविषयत्वं भवतींति गुरुमतेनप्रतिपाद्य, गुरुमतेपिज्ञानज्ञेयप्रमातृषु समानरूपेणप्रकाशते इत्याकारकव्यवहारविषयत्वं न संभवतीतिविचारकआभ्यां विभिन्नकश्चिद्विचारयतीति, तदेवदर्शयितुमुपक्रमते **स्वप्रकाशज्ञानानुवादिनाम्** इत्यादि । अर्थेघटपटादौज्ञानातिरिक्तेप्रकाशतेइत्याकारकोयोव्यवहारो भवति सतु विषयत्वेनरूपेणज्ञाने योव्यवहारः प्रकाशते इत्यकारको भवति, स तु व्यवहारोज्ञानरूपतयाऽर्थात् ज्ञानत्वात्मकासाधारणधर्मं पुरस्कृत्य भवति, तथात्मनिप्रकाशते इत्याकारकोयोव्यवहारोभवति स व्यवहारोज्ञानाश्रयतया, आत्मनोज्ञानाश्रयत्वात् , ज्ञानाधिकरणत्वादित्यर्थः । तथा च गुरुममेपि समानरूपेणव्यवहारोपपादकत्वं नास्ति किन्तु विभिन्नरूपेणैवव्यवहारोपपादनं भवति । एतादृशस्थितौसमानरूपेणभट्टमतेव्यवहारोपपादनाशक्यत्वं दूषणं यद्गुरुमतानुयायिनाप्रतिपादितं तदस्थाने एवेतिविमर्शकस्याभिप्रायः । "यश्चोभयोःसमोदोषः परिहारोपितादृशः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इतिन्यायविषयतांनातिक्रामतिप्रभाकरीय

णीयमेवापतति । इन्द्रियादिज्ञानकारणसम्बन्धबलादिति न वक्तव्यम् । लब्धात्मकं कार्यं स्वकीयनिमित्तकारणबलेन न स्वकार्यंकरोतीति दृष्टम्, नहि घटादिकं जलाहरणादिकार्यं इति । सत्यप्युपर्युक्तदोषे, मतद्वयेपिदूषणान्तरंप्रदर्शयतिविमर्शकस्तत्राह, **आत्मनि** इत्यादि । ज्ञानं प्रकाशरूपम्, आत्मनिसमवायसम्बन्धेनेति, समवायश्चसम्बन्धोऽयुतसिद्धयोरेव भवति नतु युतसिद्धयोर्घटपटवत् । एवञ्चात्मसमवेतंज्ञानम्, विषयेणासम्बद्धंसत्कथमर्थंघटादिकंप्रकाशयिष्यतीति विचारणीयमेव । अर्थात् असम्बद्धंविषयं न ज्ञानं प्रकाशयेदितिंभावः । एतद्दोषपरिहारायात्रशङ्कते **इन्द्रिय** इत्यादि । यद्यप्यात्मसमवेतज्ञानस्यसाक्षादिंन्द्रियार्थेंन सहसम्बन्धोनास्तितथापि, आत्मसमवेत ज्ञानस्याजनकमिन्द्रियादिकम् 'इन्द्रियार्थंसंनिकर्षजन्यंज्ञानंप्रत्यक्षं, लिङ्गादिजन्यं च ज्ञानमनुमि"त्यादिकम् । एवञ्चज्ञानस्यनिमित्तकारणमर्थेन्द्रियसंनिकर्षः, समवायिकारणमात्मा, असमवायिकारणमात्मनःसंयोग एव, अदृष्टेश्वरेच्छादिकंसाधारणकारणंभवतिनिमित्तकारणान्तर्गतमेव । एतान् कारण कूटानासाद्यज्ञानमुत्पन्नं भवति, तथा च निमित्तकारणान्तर्गतस्वनिमित्तकारणसम्बन्धाज्जायमानज्ञानस्य विषयेणघटादिनासम्बन्धसत्वेनार्थं प्रकाशयत्येवज्ञानम् । येनार्थेन सम्बद्धंयदिन्द्रियंलिङ्गंवायद्विषयकंज्ञानमर्जयति, तज्ज्ञानंतस्मिन्नेवार्थेघटादिविषये प्राकट्यंव्यवहारानुकूलत्वं वा निष्पादयतिनान्यंनान्यत्रेति शङ्काग्रन्थस्यमुकुलितो भावः । अमुं प्रश्नं परिहर्त्तुमाह **लब्धात्मकं कार्यमि**त्यादि ।

अयमाशयः, द्रव्यात्मकं यत्कार्यंतत्स्वोत्पत्तौदण्डकुलालादिनिमित्तकारणमपेक्षते, नतु स्वजन्यकार्येपिस्वनिमित्तमपेक्षते, अन्यथाघटमुत्पाद्य, तदनन्तरंदण्डस्यकुलालस्य वा विनाशेजाते, तत्र कुलालाभावात् घटेनजलाहरणंपटेनप्रावरणरूपं वा कार्यं न स्यात्, दृश्यते च घटोत्पादानन्तरंदण्डादीनां विगमेपिजलाहरणादिकमिति । द्रव्यात्मककार्येसमवायि, असमवायिनिमित्तकारणं च जनकं भवति, तत्रसमानजातीयंद्रव्यद्वयंकपालात्मकंसमवायिकारणमेतदुभयसंयोगोऽसमवायिकारणंनिमित्तं च कुलालादिकम्, यथोक्तकारणसमवायेघटउत्पद्यते, तदा कारणविनाशेसतिकार्यमपिविनश्यति । तत्र कारणद्रव्यस्यानित्यस्थलेसमवायिकारणस्य, तथाऽसमवायिकारणकपालद्वयसंयोगनाशेघटादेःकार्यस्य विनाशो भवति, द्व्यणुकस्यकारणं तु परमाणुरेव स च नित्यस्तत्रसमवायिकारणस्यनित्यत्वेन, समवायिकारणस्यविनाशासंभवेन, तत्र परमाणुद्वयसंयोगात्मकासमवायिकारणविनाशस्यैवद्व्यणुकादिकार्य नाशकत्वम् । घटविनाशेतुतयोरेकस्यापिविनाशे घटविनाशस्यानुभवसिद्धतयासमवायिकारणासमवायिकारणयोरन्यतरनाशस्यैवघटविनाशकत्वम्, परन्तु द्रव्यकार्यविनाशेऽदृष्टेतरनिमित्तकारणनाशस्य कार्यविनाशकत्वं न भवतीति, नहि कुलालनाशेघटेनजलाहरणं भवति ? किन्तु भवत्येव । संसारजनकादृष्टाभावेसंसारस्यनिवृत्तिदर्शनेन क्वचित् निमित्तकारणविनाशो भवतीत्यद्वैतवेदान्तिनः कथयन्ति । एवञ्च द्रव्यात्मककार्यनाशेनिमित्तकारणविनाशस्यप्रयोजकत्वं न भवति, गुणात्मककार्यनाशेतु गुणात्मकनिमित्तकारणविनाशस्यक्वचिद्विनाशकत्वं भवतीति । अतएवाचार्येणकथितं "लब्धात्मकं स्वनिमित्त-

कुलालादिकारणबलेन करोतीति । न च निमित्तकारणविनाशेकार्यनाशो भवति, इन्द्रिय संयोगादिनाशेरूपादिविज्ञाननाशात् । अत इन्द्रियेणसाकं चैतन्यमपिबहिर्निःसृत्यार्थेन सहसंनिकृष्टं भवति । तथा सतिहितदुपाधिकत्वात् तज्ज्ञानस्य युक्त एव तदनुविधानम् । उत्पन्नंज्ञानंस्वकारणमिन्द्रियार्थसंयोगनाशे कथं निवर्तते । अन्यथासमुत्पन्नमिन्द्रियविषयसम्बन्धाभावे कथमिव निवृत्तं भवति । अयंचदोपोज्ञानजन्यार्थधर्मप्रकाश-

मुखमपेक्षमाणो न कार्यं जनयितुमलमिति संक्षेपः । ज्ञानस्यैवस्वकार्योत्पादनेस्वनिमित्तकारणमपेक्षेतिस्वीकारेचेदमपिवैषम्यंप्रसज्येतेतिभावः । अन्यदपिवैषम्यंदर्शयितुमाह **नच निमित्तकारणविनाशेकार्यविनाशः** अन्यत्र द्रव्यात्मकघटादिकार्यस्थलेनित्तकारणदण्डकुलालादिकारणस्यविनाशेपि घटात्मक कार्यं विनाशस्याननुभवात् । किन्तु ज्ञानागुणात्मककार्यस्यैवस्वकीयनिमित्तकारणनाशेन विनाशकारेपिवैषम्यं प्राप्तं भवति तदुभयपक्षेपीत्यर्थः । कथं तर्हि प्रकाशस्यव्यवहारस्य वा समुपपादनं स्यादितिचेत्तत्राह **अतइन्द्रियेणसाकं चैतन्यमपीत्यादि** । यथाचक्षुरादीनांरश्मिरर्थसंनिकर्षेनिःसरति, तथैव, विपयार्थसंयोगेसतिधृतादिवत्तरलंमनोपिवहिर्निगच्छति, मनसोपिसावयवत्वरूपः "अन्नमयंसोम्यमनः" इत्यादौ तथा साधितत्वादिति, ज्ञानस्यापिनिसरणे, तत्तदर्थसंनिकृष्टस्यज्ञानस्यार्थप्रकाशकस्यार्थप्रकाशव्यवहारोपपादकत्वमवश्यंस्वीकार्यमितिसिद्धान्तिमतम् । यथावा तड़ागादिजलंनालिकाद्वारेणतड़ागान्निः सृत्यतड़ागादिवदेव चतुष्कोणाद्याकारेणपरिणमते' तथैव तैजसोऽन्तःकरणमपि इन्द्रियादिद्वारेणवहिर्निःसृत्यसन्निकृष्टमर्थं व्याप्नोति, सोऽस्यपरिणामोवृत्तिज्ञानमितिज्ञानस्यार्थप्रकाशकत्वं तथा प्रकाशते घटादिरितिव्यवहारप्रयोजकत्वं च निर्वहतीतिमनसः सावयवत्वपक्षः । एतन्मते न कोपि दोषः । मनसोनिरंशत्वेकदाचित् दोष उन्मीमिषति । तत्रापि परंपरयामनसःसम्बन्धोघटादिकमवतीतिविचारणीयमिति संक्षेपः । एवं सति किं फलितंतत्राह **तथा सतिहितदुपाधिकत्वादि**त्यादिं एवं सतिं, इन्द्रियोपाधिकत्वात् विषयज्ञानस्येन्द्रियेणसहान्वयव्यतिरेकानुविधानंतत्सत्वेतत्सत्वंतदभावे तदभाव इत्यादिरूपमपिघटते एव । अर्थात् यदाहि, चक्षुरादीन्द्रियेणप्रवृत्त्यादिमत्वंज्ञानस्यतत्तदर्थसन्निकर्षयुक्तस्यपदर्थप्रकाशकस्येन्द्रियार्थसंनिकर्षान्वयव्यतिरेकानुविधायि, तदन्वयव्यतिरेकयोरप्युपपत्तिर्भवत्येवेत्यर्थः ।

यदि चक्षुरादीन्द्रियद्वारेणज्ञानार्थयोः संयोगसमवायसंयुक्तसमवायाद्यन्यतमसंनिकर्षो न मन्येत तदानैवनिर्वाहःस्यादित्याशयेन दोषंदातुमुपक्रमते, **अन्यथा समुत्पन्न**मित्यादि, अयंभावः यदि चक्षुरादीन्द्रियद्वारेणज्ञानस्य तद्विषयीभूतार्थस्य घटादेःसंनिकर्षः संयोगादारभ्यविशेषणविशेष्यतालक्षणान्यतमरूपो न मन्येत तदासमुत्पन्नंज्ञानंघटादिकम्, इन्द्रियार्थसंनिकर्षस्यविगमे तज्ज्ञानस्य निवृत्तिःकथंस्यात्, दृश्यते च यावदेवेन्द्रियार्थयोः संनिकर्षस्तावदेवतज्ज्ञानावस्थानम् । एवंचैतादृश संनिकर्षस्याऽस्वीकारे तथा निमित्तकारणनाशस्यकार्यनाशे कारणतया अभावात्, इन्द्रियार्थसंनि-

वादिनामपितुल्यमेवयतःअर्थधर्मप्रकाशेज्ञानंनिमित्तकारणमेवेति कथं निमित्तकारणनाशे सतिकथमर्थप्रकाशात्मककार्यस्यनिवृत्तिर्भविष्यति, यावत्पर्यन्तंज्ञानंतावत्कालपर्यन्तं प्रकाशावस्थानंस्यादन्यत्र तथाऽदर्शनात् ।

कर्षस्यविनाशे कथं कार्यस्यविनाशः स्यादिति । कार्यँ द्रव्यं गुणकर्म च एतत्त्रितयं स्वस्वकारणबलादुत्पद्यतेविनश्यति च । तत्र द्रव्यात्मककार्यस्यसमवायिकारणंसमानजातीयंद्रव्यान्तरं यथाघटस्यकपालद्वयम् । तत्रासमवायिकारणकपालद्वयसंयोगः, समवायिकारणेआसन्नमनन्यथासिद्धं सत् कार्यँ जनकंयद्भवतितदसमवायिकारणमितितत्लक्षणात्, निमित्तकारणंदण्डचक्रचीवरसलिलकुलालादिकम्, समवाय्यसमवायिकारणभिन्नत्वेसतिंकार्यजनकंयत्तदेवतथेति । तत्र द्रव्यात्मककार्यँनाशेसमवायिकारणासमवायिकारणयोरन्यतरविनाश एव कार्यँ विंनाशयति । द्व्यणुकविनाशेतदीयसमवायिकारणपरमाणोर्नित्यत्वेनविनाशासंभवेन, तत्र परमाणुद्वयसंयोगलक्षणासमवायिकारणविनाश एव कार्यविनाशकः । गुणात्मककार्यनाशःसमवायिकारणद्रव्यविनाशात् क्वचित् समवायिकारणविनाशात् , कर्मण्यपिं तथैव । विविच्यस्वयमूहनीयम् ।

इहतुइन्द्रियार्थँसंनिकर्षस्यज्ञानंप्रतिनिमित्तकारणत्वात्तद्विनाशएवज्ञानस्यनाशकः । अन्यथा तदन्यस्यकस्यचिदपिविनाशकस्याभावात् ,जनितमपिचाक्षुषादिज्ञानं न निवर्तेत, अर्थतो ज्ञानं नित्यंस्यात् । नत्वेवंसंभवति, जन्यस्यावश्यं विनाश इतिनियमात् । निमित्तकारणविनाशो न कार्यँविनाशयतीतिनियमस्तु द्रव्यकार्यविनाशाभिप्रायकः । अर्थात् घटादिकंयद्जन्यंद्रव्यंतत् समवायिकारणासमवायिकारणान्यतरकारणविनाशादेवनश्यति नतु निमित्तकारणविनाशात्, समवायिकारणासमवायिकारणे एव यावत् कार्यमवतिष्ठेते, नतु निमित्तकारणमपियावत्कार्यमवतिष्ठते । तद्विगमेपिकार्यस्यावस्थानदर्शनात् । अतःकारणविनाशएवकार्यविनाशक इति प्रायःसाधारणोनियमः । एवञ्चप्रकृतेज्ञानात्मककार्यस्य निमित्तकारणविनाश एव विनाशक इति संक्षेपः ।

यद्यपि घटादिद्रव्यात्मककार्यस्यदण्डकुलालादिनाशेन नाशो न भवति । तथापि कुत्रापि निमित्तकारणनाशेकार्यँ न नश्यतीति न सार्वत्रिंकोनियमः किन्तु क्वाचित्क एव । “अयमेकोयमेक” इति द्वौ, इत्याकारकापेक्षाबुद्ध्याद्वित्वादिकासंख्यासमुत्पद्यते, तादृशसंख्यायाम्, यत्रद्वित्वमुत्पद्यते तद् द्रव्यम् समवायिकारणंनिमिंत्तकारणं चापेक्षाबुद्धिरेव भवति । पुनश्चापेक्षाबुद्धिःक्षण चतुष्टयंयावत् तिष्ठतितावदेवद्वित्वादेःप्रत्यक्षंजायतेऽपेक्षाबुद्धेर्विंनाशेऽनेकाश्रयपर्याप्तद्वित्वादिसंख्यानां विनाशो भवति सत्यपिसमवायिकारणद्रव्यस्यविद्यमानत्वे । एवञ्च स्थलविशेषेनिमित्तकारणविनाशेंनापिकार्यविनाशो भवतीति । अर्थात् समवायिकारणासमवायिकारणविनाशेन यथाकार्यँविनश्यतिं, तथा स्थलविशेषेनिमित्तकारणविनाशस्यापिकार्यविनाशकत्वमङ्गीकर्त्तव्यमेव । अन्यथाऽपेक्षाबुद्धिनाशेन द्वित्वादिसंख्यानांविनाशानुपपत्तेः । तथैवप्रकृतेऽपिनिमित्तकारणज्ञानस्यनाशेनार्थप्रकाशादेर्विंनाशः

ननु निमित्तकारणनाशादपिकार्यनाशो दृश्यते, यथाऽपेक्षाबुद्धिनाशेन द्वित्वादिसंख्यायानाशदर्शनादितिचेन्न. असिद्धेः । अत एतादृशपूर्वपक्षो न युक्तः ।

स्यादित्याशङ्कामपनेतुं प्रथमं पूर्वपक्षमुपदर्शयति, **ननुनिमित्तकारण** इत्यादि । भवतुनामद्रव्यात्मककार्यनाशेद्रव्यात्मककारणविनाशो न कारणम्, किन्तु, यथा द्वित्वादिसामान्यगुणात्मककार्यनाशं प्रतिज्ञानात्मकापेक्षाबुद्धिरूपनिमित्तकारणविनाशस्यप्रयोजकत्वेकाक्षतिः । एवमेव प्रकृते ज्ञानात्मकनिमित्तकारणविनाशस्यापिप्रयोजकत्वं भवतु, इति प्रश्नाशयः । तमिमं दोपं परिहर्त्तुमाह, **असिद्धेरिति** । निमित्तकारणनाशेनकार्यभूतायाद्वित्वादिसंख्याविनाशो भवतीत्यसिद्धत्वात्, अस्वीकारात् । यद्यपेक्षाबुद्धिरूपनिमित्तकारणविनाशेन द्वित्वादेर्विनाश इति सिद्ध्येत, तदाद्वित्वादिकमुदाहृत्य तद्दृष्टान्तेनप्रकृतेपितत्साधनं कदाचित्संभवेदपि, परन्तु प्रकृतोदाहरणमेवनाद्यावधिसिद्धम्, तत्रैववादिनां विवादात्, वादिप्रतिवादिनिर्णीतमेव स्थलमुदाहरणं भवति । यथा धूमेनपर्वतेवह्निसाधनावसरेमहानसादिकम् । हेतुसाध्ययोर्निर्णयो यत्र तदेवोदाहरणं महानसेधूमसाध्ययोःसहचरोदृश्यते, ततस्तत्रैकस्य धूमादिहेतोःपर्वतेदर्शनेनवह्नेःस्थितिरवगम्यते । इहतु तथा न विद्यते । अपेक्षाबुद्धिनाशेनद्वित्वादि विनाशस्यासिद्धत्वेन न निमित्तकारणनाशेनकार्यनाशोद्वित्वादिसंख्यायानाशस्यदृष्टान्तत्वंसंभवतीतिभावः

एकत्वसंख्यावत्, तदन्यापिद्वित्वादिकासंख्या, यावद्द्रव्यभाविनीसंख्यात्वात् । सर्वाघटपटादिगतासंख्याताःसर्वापिसंख्याद्रव्ये एव वर्तन्ते, तथा यावद्द्रव्यमवतिष्ठते, एकत्वसंख्यानित्येप्यनित्येपि च वर्तते, तथा यावत्कालंद्रव्यंभवतितावत्पर्यन्तंसासंख्यापिभवत्येवेतिसर्ववादिसिद्धमेवनात्रकस्यापिविवादः । यापि द्वित्वादिकासंख्याद्वित्वाद्यारभ्यपरार्द्धपर्यन्तेवर्तमानाऽनेकवर्तिनीसापिसंख्यात्वसामान्यात्, एकत्ववदेवभवतीति, यथा एकत्वसंख्या, यावदाश्रयभावित्वात्, अपेक्षाबुद्धिनाशान्ननश्यति, तथैव द्वित्वाद्यारभ्यपरार्धपर्यन्तेवर्तमानाऽनेकाश्रिता, सांख्या, ता अपि, अपेक्षाबुद्धिनाशान्ननश्यन्ति, संख्यात्वधर्मस्यसर्वसंख्यासु समानत्वात्, यथैकत्वसंख्या, अपेक्षाबुद्धिनाशेन नश्यति, तथैवद्वित्वाद्यारभ्यपरार्धपर्यन्तेवर्तमानासंख्यापि, अपेक्षाबुद्धिनाशान्न नश्यतीति । "द्वित्वाद्यनेकाश्रयपर्याप्तासंख्या, यावद्द्रव्यभाविनी, संख्यात्वादेकत्वसंख्यावत्" तथा च तथैकत्वमपेक्षाबुद्धिविनाशविनाश्यं न भवति, तथैवद्वित्वादयोपियावदाश्रयंवर्तमानानापेक्षाबुद्धिनाशनाश्या भवन्ति । किन्तु यथैकत्वस्याश्रयद्रव्यविनाशादेवविनाशस्तथैवद्वित्वादीनापिआश्रयविनाशोदेवविनाशइतिसिद्धान्तपन्थाः ।

इतः पूर्वम्, द्वित्वादिपरार्धपर्यन्तसंख्यायामनेकपर्याप्तायांयावदाश्रयभावित्वमनुमानप्रमाणद्वाराव्यवस्थापितम्, तथाचानुमानाकारः, द्वित्वादिपरार्धपर्यन्तासर्वाऽपिसंख्यायावदाश्रयवर्ती, अर्थाद् यावत् कालंतदाश्रयद्रव्येतिष्ठतितावत्कालंद्वित्वादिसंख्यापितिष्ठत्येव, नतु मध्येनिमित्तकारणापेक्षाबुद्धिविनाशेनविनश्यति । कुतः संख्यात्वात्, या या संख्यासाआश्रयनाशादेवनश्यति, एकत्वसंख्यावत्, यथा

नन्वेकत्वस्यसंख्यात्वमेव नास्ति द्रव्यस्वरूपे एवान्तर्भावात् ततः साधनरहितो दृष्टान्तः इतिचेन्न संख्यान्तरवदेकत्वस्यापितथात्वात् द्रव्यान्तरेपि तदनुवर्तनात्। यदि घटादिरूपमेवैकत्वस्यापि तथात्वात् द्रव्यान्तरेपि तदनुवर्तनात्। यदि घटादिरूपमेवैकत्वम्, तदाघट एकः पटादिरेक इत्येवं सर्वद्रव्यसाधारणत्वमेकत्वस्य न स्यात्। नहि घटरूपं पटस्य रूपं भवति। नहि घटादिविभिन्नद्रव्ययोः सामानाधिकरण्यम् घटः पट इति।

एकत्वंसंख्यास्वाश्रयविनाशी नभवति, तावन्नविनश्यति, आश्रयद्रव्यविनाशादेवविनश्यति नहि यावत्पर्यन्तं घटादिस्तिष्ठतितावत्पर्यन्तं तद्गतसंख्या ततोयाति, अपगतेतुघटेऽर्थात् घटविनाशेजातेतदाश्रयाभावात् कालान्तरेघटीयैकत्वसंख्याया अपिघटाद्याश्रयवदेवादर्शनात्। इत्यादियुक्त्याद्वित्वादिसंख्याया यावदाश्रयभावित्वंव्यवस्थापितमाचार्येण। तत्र दृष्टान्ते एकत्वसंख्यायांहेतुःसंख्यात्वमेवनास्तीतिकृत्वा हेतोरसिद्धमनुवदतिपूर्वपक्षी, तत्राह **ननु एकत्वस्य संख्यात्वमेव नास्तित्यादि**। एकत्वंकुतो न संख्यारूपं ? तत्राह, **द्रव्यस्वरूपे एवान्तर्भावात्** अर्थाद् यत्राधिकरणेद्रव्येएकत्वंतिष्ठतितादृशाधिकरणातिरिक्तत्वमेव नास्ति, एकोघट इत्यादिप्रतीत्या एकत्वघटत्वयोःसामानाधिकरण्यस्य, नीलघटवद्दर्शनादिति। स्वरूपातिरिक्तत्वेतु घटवद् भूतलमितिवत् तस्याधाराधेयभाव एव स्यात्, नतु सामानाधिकरण्यंतयोःस्यादितिपूर्वपक्षस्याशयः।

तर्कमूलमाश्रित्यपरिहरति **इतिचेन्न** इत्यादि, एकत्वंसंख्यारूपमेव, यथातदेकत्वंघटेतथैव पटादिद्रव्यान्तरेपिसमुपलभ्यते, ततो यदि संख्यायामेवैकत्वस्यस्वीक्रियेत, दैकत्वस्यसर्वसाधारणत्वं न स्यात्, यथा घटीयरूपरसादिकंघटंविहायनान्यत्रसमवेतंभवति, अन्यगुणस्यात्रसमवायादर्शनात्, अतएववायुसमवेतोविलक्षणस्पर्शोनपृथिव्यादिसमवेततयाप्रतीतो भवति। एवञ्च घटगतमेकत्वंघटादिव्यक्तिस्वरूपंतद्गत्वंतु, तादात्म्येनतद्व्यक्तिरूपमेवेतितद्व्यक्तित्वस्यानुगतत्वात्, व्यक्त्यन्तरेतद्गमनाभावेन, एकोघटएकःपटइत्येवंरूपेणसर्वद्रव्यसाधारणत्वं न स्यात्, नहि भवति घटरूपस्यपटस्वरूपेणसहसामानाधिकरण्यम्, घटपटइत्येवंरूपेण, तस्मात् नैकत्वंघटादेःस्वरूपमितिं। एवं चैकत्वे दृष्टान्तेसंख्यात्वस्यहेतोरसिद्धिर्नभवतीत्यनुसारे एव प्रकृतानुमानेहेत्वसिद्धोपन्यासः। अर्थात् यदि तत्तद्व्यक्तिस्वरूपस्यैव 'अयमेक इत्येवंरूपेणैकव्यवहारनियामकत्वंस्वीक्रियेत, तदा घटएकःपटश्चैक इत्याद्यनुगतव्यवहारोपपादनंनोपपद्येत, यतस्तत्तद्व्यक्तित्वस्याननुगतत्वात्, तद्व्यक्तित्वंतादात्म्येन सैवव्यक्तिरितिजगदीशतर्कालङ्कारस्योद्गारात्। एकत्वस्यसंख्यारूपत्वेतुनाननुगमः, एकत्वत्वेनैकत्वस्यानुगमसंभवात्, घटत्वेनघटानुगमवत्। एवं चैकत्वस्यैकत्वत्वेनानुगमात्, सर्वद्रव्येएकइत्यनुगतप्रतीतेरुपपादयितुं शक्यत्वात्। ततश्चैकत्वंसंखयायारूपमेवेति प्रकृतानुमाने न भवत्यसिद्धिदोषस्यसंभावनेतितर्ककुशलानामवाधितः पन्था इति।

किञ्च एकत्वमपि संख्यारूपमेव संख्यान्तरेण द्वित्वादिना विरुद्धत्वात् द्वित्वत्रित्व संख्यावत् यथा द्वित्वादिपरार्धपर्यन्तसंख्यानामेकेन सह तदपरस्यविरोधस्तथैवैकत्वस्य तदन्यसंख्यया विरोधात्संङ्ख्यारूपत्वं तथैवैकत्वस्यापीति तत एकत्वमपि संख्यारूपमेवेति यत एकोद्वावीति सामानाधिकरण्यं न भवति भवति चैकोद्वित्ववानिति । ततश्च साधकबलादेवैकत्वस्य संख्यारूपत्वम् ।

अतीतप्रकरणेनैकत्वस्याश्रयद्रव्यादिस्वरूपत्वेवाधकमुपन्यस्यतस्यसंखयारूपत्वं व्यवस्थापितमाचार्येण । तदनन्तरमेकत्वस्यसंखयात्मकगुणरूपत्वे साधकमुपन्यसितुमुपक्रमते **किञ्चैकत्वमपि संख्यारूपमेवे**त्यादि । अनेन ग्रन्थेनानुमानस्वरूपं प्रदर्शितम् तथाहिविवादास्पदमेकत्वम् संखयारूपमेव द्वित्वादिसंखयान्तरविरुद्धत्वात् त्रित्वादिवदिति । अत्रयथोक्तमेकत्वपक्षः संखयात्वम्साध्यम्संखयान्तरविरुद्धत्वादितिहेतुवाक्यम त्रित्वादिवदित्युदाहरणम् । अत्रन्यायप्रयोगे प्रकारत्रयमेतिकेचनतत्रोदाहरणान्तमेव प्रतिज्ञाहेतूदाहरणान्तमेववाक्यं प्रयुञ्जन्ति । अन्येकेचनउदाहरणोपनयनिगमान्तमेव कथयन्ति·एतावतैवव्याप्तिप्रदर्शनसंभवेनानुमानकृत्यस्य सम्पादनात् । अन्येकेचनस्पष्टरूपेणव्याप्तिपक्षधर्मताविशिष्ट हेतुनापक्षेसाध्यसंस्थापनायपञ्चावयववाक्यं प्रयुञ्चन्ति । तत्र वौद्धमीमांसकयोरवयवत्रयमेव नैयायिकस्यतु पञ्चावयवप्रकाशः स्पष्टप्रतिपत्तयेमूलोक्तानुमानप्रकारोवौद्धमीमांसकपद्धतिमाश्रित्यकृतः । नैयायिकानुरोधाश्रयणेतु. उपनयनिगमनयोरपिसंग्रहः स्वंयमेवोहनियः । एवञ्च "विवादास्पदमेकत्व संखयारूपमेव द्वित्वादिसंखयान्तरविरुद्धत्वात् त्रित्वादिवदित्यनुमानमेकत्वस्यसंखयात्वसाधकंभवतीति ।

संख्यान्तरेण द्वित्वादिनाविरुद्धत्वादितिहेतुर्नपक्षेस्वरूपासिद्धमपितुपक्षेविद्यते इति दर्शयितुमाह **यतएकोद्वावितिसामानाधिकरण्यं न भवतीति** । अयमाशयःएकस्मिन्द्रव्येएकमेवेतिप्रतीति व्यवहारौ न भवतः । कुतः ? एकस्मिन् द्वित्वस्यद्वित्वपर्याप्तेरभावात् "उभयत्वमुभयत्रैवपर्याप्तंनत्वेकत्रेनियमादेकंद्वित्ववदितिप्रयोगस्तु समवायसम्बन्धपुरस्कारेणभवति. यदित्वेकस्मिन् तन्नभवेत्तदाउभयत्रापिंद्वित्वस्याकस्मिकत्वात् । तस्मादेकंद्वित्ववदितिप्रयोगादर्शनात् . तथैकंद्वित्ववदितिप्रयोगस्य प्रामाणिकत्वदर्शनाच्च. एकंद्वित्ववदित्यत्र समवायसम्धेनद्वित्वंवर्तते इति निश्चयो भवति "एकोनद्वौ" इत्यत्रद्वित्वस्यपर्याप्तिसम्बन्धेनासत्वात् नैतादृशः उभयत्वमुभयस्मिन्नेवपर्याप्तंनत्वेकत्रेति नियमस्तुपर्याप्तिपुरस्कारेणेति । तथास्वपर्याप्त्याखयसम्बन्धाभिप्रायेण एकोनद्वौकेवलसमवायाभिप्रायेण, एकंद्वित्ववदिति । अथवा"इमौघटपटौ"इत्यत्रोद्देश्यतावच्छेदकावच्छिन्नपर्याप्तिसम्बन्धस्यैवद्वित्वादिसम्बन्धतया भानेनैकत्वत्त्वावच्छिन्नपर्याप्तित्वन्नपर्याप्तिसम्बन्धस्यद्वित्वादिसम्बन्धरूपत्वाभावादेव "एकंनद्वावितिति प्रयोगो भवति. एकंद्वित्ववदित्यत्रतु द्वित्वप्रतियोगिकसमवायस्यैव स्वरूपसम्बन्धेन भानात्. तादृश समवायस्यैकस्मिन्नपिभाने वाधकाभावेनसंभवात् ।

संखयान्तरविरुद्धत्वादिहेतौ संखयान्तरविरुद्धत्वं च. संखयान्तरपर्याप्त्यवच्छेदकावच्छिन्न

यत्तु "द्वित्वादिसंख्या न यावद्द्रव्यभाविनी अनेकद्रव्यवृत्तित्वे सति सामान्यगुणत्वात्संयोगविभागादिवत्" इतिसाध्यविपर्ययसाधकप्रतिहेतुना सत्प्रतिपक्षितत्वं स्थापना हेतोरिति । तन्न नानात्वे प्रतिहेतोर्व्यभिचारात् । विद्यमानयोरपि घटपटयोस्तन्नानात्वस्य [बहुत्वस्य] विनाशादर्शनात् । न च तन्नानात्वद्वित्वसंख्यैव त्रयाणां तदपर्याप्तिकवृत्तिकत्वाभावस्वरूपकमेवेति । एतावता द्वित्वादिसंखयाया यावदाश्रयभावित्वानुमानेद्वित्वादित्रित्वादिलक्षणदृष्टान्ते संखयान्तरविरुद्धत्वहेतोर्वैकल्यंन भवतीति सूचितं विशेषस्त्वन्यत्रोतिदिक् ।

अथ "द्वित्वादिसंखयायावदाश्रयवती । [यावद्द्रव्यभाविनी] संखयात्वात्, एकत्वसंखयावदिति यावद्द्रव्यभावित्वलक्षणस्थापनानुमाने सत्प्रतिपक्षदोषमाशंक्यति **यत्तुद्वित्वादिसंख्या नयावद्द्रव्यभाविनी** इत्यादि । अयमाशयः "समानवलबोधितसाध्यविपर्ययकत्वमेव सत्प्रतिपक्षलक्षणम्, अथवा "साध्याभावसाधकहेत्वन्तरं यस्य स सत्प्रतिपक्षः" यथाशब्दोऽनित्यःकार्यत्वात्, शद्बोनित्यः श्रावणत्वात्, शद्बत्ववत्, अत्र नित्यत्वसाधकहेतोः श्रावणत्वस्य यत् साध्यं नित्यत्वंतदभावोऽनित्यत्वम्, तस्यसाधको हेतुः कार्यत्वम्, तथानित्यत्वस्याभावोनित्यत्वं तादृशनित्यत्वस्य यत्साधकं श्रावणत्वम्, अर्थात्, श्रावणत्वंशद्बत्वं दृष्टान्तीकृत्यशद्बात्मकपक्षे नित्यत्वं साधयति, कार्यत्वंच हेतुनित्यत्वविरोधिनं नित्यत्वाभावमेवसाधयति, ततश्चैकस्य हेतोर्यत्साध्यं तद्विरुणद्धि प्रतिहेतुस्तदन्यस्यसाध्यस्याभावं साधयति, अपरो हेतुरिति परस्परप्रतिरोधान्नकाप्यनुमितीति नवीनमतम् । रत्नकोशकारस्तु, परस्परविरोधिहेतु सद्भावस्थले संशयाकारैवानुमितिर्भवतीति । तदन्येतु अनुमितिशाब्दादीनां निश्चयरूपत्वमेव नतु संशयरूपत्वमिति मन्यमानाः उभयानुमित्योः प्रतिरोधमेवमन्यन्ते । अन्येतु गंगेशोपाध्यायाः साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्षः यदा ह्रदो वह्निमान् जलादित्यत्र वन्ह्याभावव्याप्यजलवानिति परामर्शेन ह्रदेवन्ह्यनुमितिः प्रतिरोधः, यथा वन्हिमत्वज्ञानं वन्ह्यभाववत्ता निश्चयो विरुणद्धि तथैव वन्ह्यभावव्याप्यजलवत्वादिनिश्चयोपि विरुणद्ध्येव अत्रत्यो विशेषविचारो गुरूपासनेनैवज्ञातव्यः ।

अत्र प्रथमद्वितीयसत्पक्षलक्षणे प्रतिहेतुरावश्यक एव, तृतीयलक्षणेतु एकस्मिन्नपि हेतौ सत्प्रतिपक्ष संभवात् । ततश्चात्रद्वित्वादेर्यावदाश्रयभावित्वाद् प्रतिहेतुमुत्थापयति द्वित्वादिसंखयायावदाश्रये न भवति अनेकद्रव्यवृत्तित्वे सति सामान्यगुणत्वात्, अनेन प्रतिहेतुना स्थापनानुमानहेतुर्बोधितो भवति । अर्थात्, यावदाश्रयभावित्वं न सिद्ध्यति किन्तु तद्विरुद्धमयावद्द्रव्यभावित्वमेव भवतीति । परिहरतिपूर्वपक्षम्, **तन्ननानात्वेप्रतिहेतोर्व्यभिचारात्** । व्यविचारादिदोषमेवोपपादयति **विद्यमानयोरपिघटयोरित्यादि** अत्रनानात्वमर्थात् बहुत्वरूपमेव तादृशबहुत्वस्यापि, अनेकद्रव्यवृत्तित्वेन, यथा द्वित्वादिकं व्यासज्यवृत्तित्वात् गुणरूपमेवभवति नतु पदार्थान्तरत्वम्, तथा बहुत्वस्यापिव्यासज्यवृत्तितया गुणरूपत्वमेव, नत्वत्र नानात्वं भेदरूपं, भेदस्य प्रतियोग्यनुसापेक्ष-

भावप्रसङ्गात् । न च घटादीना नानात्वम् तथैकत्वाभावरूपम् तुच्छस्य वन्ध्यापुत्रादेरपि नानात्वप्रसङ्गात् । अपि च संवन्ध्यन्तरज्ञानसापेक्षत्वात् द्वित्वादिसंख्यायाः प्रतियोगिनोऽज्ञानेन ग्रहणमेव न भवति अपेक्षाबुद्ध्यादिसहकारिणा भावकालेग्रहणमेव द्वित्वादेर्नभवतीति संक्षेपः ।

अपिच, भवन्मतेऽर्थप्रकाशकमेवज्ञानम् , यत्प्रकाशकं तदर्थसंयुक्तं सदेव प्रकाशयति, यथा प्रकाशकः सूर्यप्रदीपादिः, तस्माज्ज्ञानमपि विषयसंनिकृष्टमेव प्रकाशयिष्यति नासिद्धमिति । न च ज्ञानं न क्रियावत्, अमूर्तत्वात् गगनवदिति वाच्यम् , त्वेपिव्यासज्यवृत्तित्वाभावात् । न च वहुत्वस्य व्यासज्यवृत्तिधर्मत्वेगुणरूपत्वे च तादृशवहुत्वस्य त्रित्वे एवान्तर्भावो भवत्विति वाच्यम् , मतविशेषेत्रित्वादिसंखयायामेव तत्समावेशस्य स्वीकारात् । अन्येतु "इतोबहुतरेयंसेने" त्यादिप्रतीत्या त्रित्वादिभ्यो भिन्नस्यैव स्वीकारात् । अतिरोहितत्वान्मूलाक्षरो न विवृत्तः ।

। इतिभाट्टप्राभाकराभिमतप्रकाशपदार्थेऽप्यनुपपत्तिप्रकरणेतत्त्वदीपः ।

ननु यदि ज्ञानस्य विषयेण संनिकर्षोनानुमतो भवेत्तदार्थप्रकाश एव न भवेदित्यादिवाधिकायुक्तिगतप्रकरणे दर्शयित्वा, ज्ञानस्यार्थेन संनिकर्षोपगमे साधिकां युक्तिं दर्शयितुमुपक्रमते **अपिचेत्यादि** नकेवलंबाधकाभावप्रदर्शनमात्रेण कार्यंसिद्ध्यति, किन्तुवाधकापसारणानन्तरं यदि साधकसद्भावोभवति, सामग्रयाः कार्योत्पत्तित्वनियमात् । नाहचाक्षुषे प्रतिबन्धकतमसोऽपसारणादेव चाक्षुषंभवति किन्तु विषयेन्द्रियादीनां सद्भावेन तत्कार्यंभवति । तथैव प्रकृते ज्ञानस्यार्थसंनिकर्षे साधकं दर्शयितुमयमुपक्रमः । भवन्मतेघटादिविषयस्यप्रकाशकं ज्ञानमेव, यच्च प्रकाशकं भवति तत् प्रकाश्यवस्तुनासह सम्बद्धं भवति नान्यथा, यथाघटादिप्रकाशकंमणिप्रदीपादिकं घटादि सम्बद्धं भवति तदैव प्रकाशयति, नावर्तमानं नवाऽसम्बद्धंसत् । नहिरजन्यां प्राङ्गणेवर्तमानः प्रदीपोगृहकोणेस्थितं घटादिकं प्रकाशयतीति दृष्टमुपपद्यतेवा । तथैव ज्ञानस्यापि प्रकाशकत्व सामान्यात् तथैवभवितुंयुक्तमिति ।

ननु प्रतिपादिकंमूर्तमिति भवतु तस्य विषयसम्बद्धं तथा भवतु ज्ञानंतु न मूर्तंद्रव्यमपित्वमूर्तंद्रव्यम् , तथा च यथाऽमूर्तस्य गगनक्रियायोगोन भवति तथैवामूर्तस्य ज्ञानस्यापि न स्यात् । क्षितिर्जलं तथा तेजः पवनोमन एव च । परोपरत्वमूर्तत्वक्रिया वेगाश्रयाअमी" इति नियमात् । क्रियावत्वमेव मूर्तत्वमपकृष्टपरिमाणवत्वं वा, एतादृशमूर्तत्वं द्रव्याणामुपयुक्तानां पृथिव्यादीनामेव, तत्त्वद्रव्यस्य गुणादे र्मूर्तत्वं कथमपि संभवति । अद्रव्यत्वादेव च ज्ञानस्यवहिर्निः सरणरूपक्रियायोगः संभवतीत्याशङ्कते **न च ज्ञानंनक्रियावदमूर्तत्वात् गगनवदित्यादि** यथा मूर्तभिन्नस्य व्यापकगगनद्रव्यस्यामूर्तत्वात् क्रिया सम्बन्धो न भवति तथाऽमूर्तस्य ज्ञानस्य क्रिययायोगो नवक्तुं शक्यमिति पूर्वपक्षाशयः ।

विकल्पासहत्वात्, तथा हि केयंमूर्तिंयदभावज्ञाने क्रियावत्वं न भवति न च पारिभाषिकमेव मूर्तत्वं द्रव्यत्वे सति क्वाचित्कत्वंमिष्येत तदा एतादृशंमूर्तत्वं ज्ञाने इष्टमेव नहि ज्ञानंसर्वगतंद्रव्यम् , तथा सति एककाले एव सर्वार्थसिद्धिप्रसङ्गात् । क्वाचित्कत्वेतु तज्ज्ञानंयदा, एकैकेन्द्रियेण संयुनक्तितदज्ञानं तदर्थाभिमुखं भवति, तदा तज्ज्ञानं नेन्द्रियान्तरमधितिष्ठति । अत एवयुगपज्ज्ञानानुत्पत्तिरपि संगच्छते । निरतिशय वेगवत् तत्, युगपदतिशयिनवेगवदनेकेन्द्रियाधिष्ठानदर्शनेनतथोक्तंमूर्तत्वं न सिद्ध्यति । न च स्पर्शवत्वमिति स्पर्शाभावेन क्रियावत्वं तत्र नास्तीतिवाच्यम् , शब्देन

तदेतन्मतं विकल्पपराहतत्वान्न युक्तमित्युत्तरयति **विकल्पासहत्वादिति** विकल्पप्रकारमेवोपपादयति **तथाहिकेयंमूर्तिरित्यादि**, अत्र किमिदं मूर्तत्वं भवदभिमतम् यस्याभावेन ज्ञानेक्रिया सम्बन्धः प्रतिपाद्यते ? नच तन्मूर्तत्वम् पारिभाषिकम्, द्रव्यत्वे सतिक्वाचित्कत्वरूपम्, अर्थाद् यद्द्रव्यं रूपं सत् कदाचिद् भवति कदाचिन्नभवति, यथाऽनित्यपृथिव्यादिकम् । अर्थात् अव्यापकं द्रव्यमेव मूर्तत्वाच्यं भवतीति । एतन्न शोभनम्, नहि ज्ञानस्य व्यापकत्वमस्माकमभिमतम्, बन्धकालेऽर्थात् संसारदशायांज्ञानस्याविभुत्वस्यैव स्वीकारेणेष्टत्वात् । अर्थात् अव्याप्य, द्रव्यरूपत्वं मूर्तरूपत्वंतु ज्ञानस्य स्वीकृतमेवेतिज्ञानस्यापि मूर्तत्वात् , तादृशज्ञाने क्रियाया अयोगोन वक्तव्यः । अन्यथा ज्ञानस्यव्यापकत्वे स्वीकृतेतु, तादृशज्ञानस्यव्यापकतया सर्वेणार्थेन सर्वदा सम्बद्धत्वात् युगपदेव सर्वस्याप्यर्थस्यसिद्धिप्रसङ्गापोतात् । ज्ञानस्य क्वाचित्कत्वेतु, तद्ज्ञानं यदैकदा चक्षुराद्येकेनेन्द्रियेण संयुक्तं भवति, तदा तदर्थाभिमुखमेव प्रवर्तयति, तस्मिन् समयेनेन्द्रियान्तरेण सम्बद्धं भवति । अर्थादेकेन्द्रियाधिष्ठानसमये, तदन्येन्द्रियसंयुक्तं भवन्नेन्द्रियान्तरं प्रवर्तयतिं तदर्थं सम्बन्धायेति । एवञ्चाव्यापकद्रव्यत्वद्रव्यत्वरूपमूर्तत्वस्यज्ञानेपि सद्भावान्नामूर्तत्वं यथोक्तलक्षणं ज्ञानेऽसिद्धमपितुसिद्धमेवति । यत एकदा एकेन्द्रियेण सम्बन्धोनेन्द्रियान्तरेण, अतयुगपद्ज्ञानोत्पत्तिर्नभवतीति । अथवा निरतिशयवेगवदेव तत् अतो युगपदिवत्वराऽनेकेन्द्रियाधिष्ठान वदेव भवतीति दृश्यते । तस्मादेतादृशममूर्तत्वमसिद्धमेवेविभावः ।

यदपि स्पर्शवत्वमेव मूर्तत्वम् । एवं चैतन्मतेपृथवाजलतेजोवायुद्रव्याणामेव स्पर्शवत्वेन तेषामेव मूर्तत्वम् । तथा च ज्ञानस्य गुणत्वेनस्पर्शवत्वाभावेन निष्क्रियत्वमिति । तदपि न समीचीनम्, शब्देव्यविचारात् , अर्थात् यस्यास्पर्शवत्वं तस्य क्रियारहितत्वमिति नियमोप्यसिद्धएवा मूर्तस्यापि शद्वस्य क्रियावत्वदर्शणात् । शंखभेर्यादिप्रदेशे विद्यमानोपि शब्दोवीचितरङ्गन्यायेन कदंवगोलकन्यायेन दूरतरमपि कर्णप्रदेशे आगत्य कर्णशष्कुल्यवच्छिन्ननभः प्रदेशे समवैति तदा तस्यश्रावणप्रत्यक्षं भवतीति शब्दस्यामूर्तस्यापिक्रियावत्वं दृश्यते एवेति मूर्तत्वाभावेपि तत्र शब्दे क्रियावत्वदर्शनेन व्यभिचारो भवत्येव । तदुक्तम् "शब्दोध्वनिश्च वर्णश्च मृदंगादि भवोध्वनिः ।

व्यभिचारात् । शब्दोहिशंखमुखादेर्दूरदेशादपिनोदनसंयोगविशेषेण प्रस्तरखण्डवत् , स्पर्शरहितोपि यावद्वेगं तिष्ठति । स्पर्शरहितस्यापि मनसः क्रियावत्वंन्यायविदामनुमतमेव । स्पर्शरहितस्यापि जलीयत्रसरेणोः क्रियावत्वाभ्युपगमात् ।

ननु कथमविद्यमनयोरतीतानागतपदार्थयोर्ज्ञानेन सम्बन्धोऽतीतत्वादेवेति चेदत्राहुर्यथातीतानागतयोर्विषयविषयिभावः प्रकाशमानत्वं द्वयादिसंख्यासम्बन्धो वा भवति

कण्ठताल्वादिजन्या च वर्णास्ते कादयो मताः । सर्वः शद्बो नभोवृत्तिः श्रोत्रोत्पन्नस्तुगृह्यते । वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता । कदंवगोलकन्यायादुत्पत्तिःकस्यचिन्मते'' एवञ्च स्पर्शवत्वाभावेन भवदभिमता मूर्तस्य शब्दस्यक्रियावत्वस्य दर्शनात् । अन्यथा तस्यातिदूरस्थितशंखादिप्रदेशे समुत्पन्नस्य कर्णप्रदेशे प्रत्यक्षता न स्यात् । तथा च तद्वदेव स्पर्शरहितस्यापि ज्ञानस्य प्रसरणादिक्रियावत्वं नानुपपन्नं भवतींति शब्देऽव्यभिचारदर्शनम् । यस्य वैयाकरणादेर्मते शब्दस्य द्रव्यत्वमिति सिद्धान्तस्तन्मतमाश्रित्यैवेति । अन्यथा निर्गुणनिष्क्रियस्य शब्दस्य क्रियावत्वप्रतिपादनंनोचितं भवेदिति । यस्य नैयायिकादेर्मतेशद्बो न द्रव्यरूपः किन्तु गुणात्मकस्तन्मते शब्दे व्यभिचारप्रदर्शनमयुक्तमित्याशयेनमनसि व्यभिचारं दर्शयितुमाह **स्पर्शरहितस्यापिमनसः** इत्यादि । यत् स्पर्शरहितं तन्नक्रियावदितिनियमे मनसिव्यभिचारात्, यतोन्यायमिमांसकादीनां मते स्पर्शवत्वं मनसि नास्ति तथापि तत्र मनसि क्रियावत्वस्वीकारात् । कथमन्यथा प्राणमनः प्रभृतीनां प्रयाणकाले देहाद्देहान्तरे गमनं स्यादितिं संक्षेपो विस्तरस्त्वन्यत्र द्रष्टव्यः ।

ननु घटाद्यर्थेन सह संनिकर्षसत्वे एव ज्ञानस्यार्थप्रकाशकत्वमिति मन्यते तदाऽर्थस्य वर्तमानतादशायां यथाकथंचिन्निर्वाहसंभवेऽपि, अतीतेनागतेनवाऽर्थेन घठादिना सह संन्निकर्षस्य न संभवोऽर्थाभावात्, तादृशस्थले कथं ज्ञानेन तत्तदर्थस्य प्रकाशो वा व्यवहारश्च कथंस्यादित्याशयेनशङ्कते **ननु कथमविद्यमानयो**रित्यादि । अर्थात्, यत्रविषयो वर्तते तत्रतु ज्ञानार्थयोः सम्बन्धस्य विद्यमानत्वेन ज्ञानमर्थसंनिकृष्टं भवत् सम्बन्धवलात् प्रकाशयिष्यति, परन्तुध्वंसप्रतियोगित्वलक्षणातीते, प्रागभावप्रतियोगित्वलक्षणानागते, अर्थस्य विनष्टत्वेनानुत्पन्नत्वेन तादृशार्थस्य ज्ञानेन सम्बन्धस्याभावात्कारणाभावेन तादृशार्थानां प्रकाशोवा व्यवहारोवा न स्यादितिशङ्काशयः ।

अत्र यद्यपिवास्तवमुत्तरमग्रे कथयिष्यति सम्प्रति शङ्कस्यमुखं सार्गलीकर्तुं प्रतिवन्दीमेवाह **अत्राहुर्यथाऽतीतानागतयो**रित्यादि, ननु भोःभवन्मते कथं तयोर्विषयविषयिभावः भानत्वं वा संभवति ? तव मते यथा निर्वाहस्तथैवमन्मतेपि बोद्धव्यः । अर्थात्, वैशेषिकमते, अतितानागत पदार्थयोर्वार्तमानिकज्ञानविषयत्वम्, भट्टमतेतु वर्तमानज्ञानाधीनप्रकाशात्मकधर्मसमवायित्वम्, तदुभयमते द्वित्वादिपरार्द्धान्ता संख्या वर्तमानकालिकापेक्षाबुद्धिजन्यैव भवतीत्येतेषां कथं निर्वाहो भवतीति विचार्यताम् । ततश्चैतेषां यो हि निर्वाह प्रकारः स एव प्रकारोममतेकिम् दण्डवारितः ? ।

तथैवप्रकृतेपि समाधातुं शक्यत्वात् । अपिचातीतानागतौ न सर्वथाऽविद्यमानावपितुतौ, अतीतत्वानागतत्वादिना विद्येते एवेति तेनैव रूपेणतयोर्ज्ञानसम्बन्ध इति नानुपपत्तिः । किञ्च यथावाऽतिविप्रकृष्टदेशस्थितध्रुवादिना सहज्ञानस्य सम्बन्धस्तथैव विप्रकृष्टेपिकालेदूरादिकालवर्तिज्ञानस्य सम्बन्धोभवत्येव नायनतेजोवत् ।

ज्ञानविषयतायां ज्ञानाधीनधर्मवत्वे ज्ञानाधीने एव तत्रार्थस्यवर्तमानकालिकत्वं नापेक्षितं भवति, तत्रार्थस्यापेक्षणेऽतीतादिविषयस्यज्ञानेन कथमपि प्रकाशनं न स्यादित्यकामेनापि स्वीकर्त्तव्यमेव । एतादृशस्थले सर्वोपियदित्थमेव मन्यते तदाममापि, इत्थमेवनिर्वाहो भवेदिति कस्तत्र प्रद्वेषो भवताम् ।

अयंभाव: लौकिकविषयतासम्बन्धेन प्रत्यक्षस्थले एव तादात्म्यसम्बन्धेन विषयस्य कारणत्वमिति नियमः । "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिनेति" प्राचीनोक्तेः । प्रत्यक्षेऽर्थेन सहेन्द्रिय संयोगः आलोकसहकारस्यपेक्षणात् । अन्यथा निविडेपितमसि घटादीनां चक्षुषादिप्रसङ्गात् । परोक्षानुमित्यादिस्थलेतु, नार्थस्य कारणता, यतः—पर्वतस्थवन्हेः परोक्षात्, तत्रतुव्याप्त्यादिवलेनैवार्थज्ञानंजायते । अनुमित्यनन्तरं वन्हेर्ज्ञानेजातेपिं कीदृशोवन्हिः पर्वते इति जिज्ञासायादर्शनात् । प्रत्यक्षज्ञानम्, विशेषणादि सहितविशेष्य विषयकं विशेषरूपेण भवति, तत्रार्थेवर्तमानादिकालस्यार्थं संनिकर्षादीनां सर्वेषां समवलनम् । परोक्षस्थलेतु समान्यज्ञानमेवजायते । एवम् प्रत्यक्षेपि सर्वत्रनार्थस्य वर्तमानत्वनियमः योगिनां सर्वदा सर्वविषयकं त्रिमालस्थितपदार्थविषयकं ज्ञानं भवति । युंजानयोगिनां तु योगजधर्मपुरस्कारेण मनसा सर्वविषयकज्ञानं प्रत्यक्षमेव भवतीति शास्त्रमर्यादा । तत्रयथानार्थस्य वर्तमावत्वमपेक्षितं तथैवातीतानागतपदार्थज्ञानेपि, अर्थगतवर्तमानत्वं नैवापेक्षितं भवतीति । अन्यथा चिरातीतस्यसर्वेस्वरश्रीरामचन्द्रस्यकथाश्रवणे लोकानां प्रवृत्तिर्नैवस्यात् । तत्रार्थस्य चिराततित्वात्, तथा भविष्यत्कालिककल्पादिगतभगवत्स्वरूपस्य चिन्तनादिकमपिनं स्यादिति कृतं विवेचनेन ।

वस्तुतस्तुश्रीरामानन्दवेदान्तसिद्धान्ते ध्वंसप्रागभावात्मकावस्थाविशेषेणातीतानागतपदार्थयोरपि ज्ञानकाले सत्वंविद्यते एवेतितयोरपिं ज्ञानेन सम्बंन्धो विद्यते एवेत्याशयेनाह, **अपिच** इत्यादि । अतितानागतावपि, अतीतत्व रूपेणागतत्व रूपेण चाद्यापि विद्यते एवेतितत्तद्रूपेणार्थात्, अनागतत्वरूपेण ज्ञानसंनिकर्षे न भवति काप्यनुपपत्तिः । सर्वस्यापि पदार्थस्योत्पत्तिस्थितिविनाशाभवन्ति । तत्रोत्पत्तेः पूर्वकालिकीकारणसमवधानरूपावस्थाप्रागभावरूपैव, इह घटो भविस्यति । उत्पत्तेरनन्तरं जायमानाऽवस्थास्थितिः तत्रजातो घटादिरितिः प्रतीतिर्भवति । दण्डादिप्रहारानन्तरंयाऽवस्थासां विनाशावस्थाः यत्र विनष्टोघट इतिप्रतीतिर्जायते । एवञ्च सर्वोपि पदार्थोऽवस्थात्रययोगयुक्त एव भवतीति कदाचित् स्वस्थितिकाले वर्तमानत्वं तदीयंरूपम्, उत्पत्तेः पूर्वमनागतत्वं रूपम् विनाशानन्तरमतीतत्वंचतदीयं रूपमिति, सर्वदैव पदार्थस्य सत्वात् तत्तद्रूपेण तस्यज्ञानसम्बन्धोऽव्याहत

किञ्चातीतानागतपदार्थौ न बुद्धेर्विदूरौ ज्ञानेन प्रकाशमानत्वात्, ज्ञप्तिज्ञातृस्वरूपवत् । यथाज्ञानं ज्ञानविप्रकृष्टं न भवति ज्ञानेन प्रकाशनात् । यथावा बोद्धा ज्ञाता ज्ञानेन दूरो न भवति ज्ञानप्रकाश्यत्वात् । यो येन प्रकाशितो भवति स तेन दूरो न भवति प्रकाश्यत्वादेवेति । तथैव प्रकृतेऽतीतानागतकालयोस्तत् स्थितपदार्थयोर्बुद्ध्याप्रकाशमानत्वात् ततो विप्रकृष्टत्वमतीतानागतयोर्न भवति ।

एवञ्चज्ञानस्य सर्वातिशायिवेगवत्तया मध्यवर्तिदेशकालयोरग्रहणीयमानो भवति, अलातचक्रभ्रमणे देशविशेषसंयोगविभागस्याग्रहणाभिमानवत् ।

एवेति न काप्यनुपपत्तिर्भवतीति भावः । अथैवमपि तत्तदतीतादिकालस्याद्यतनीयज्ञानेन ग्रहणं न स्यात्, यतस्तत्कालस्य सम्प्रतिवर्तमानतायामभावादित्याशङ्कायामाह, **किञ्च** इति । यथा दूरे देशे विद्यमानंध्रुवादिवस्तुना सहनायनतेजसः संयोगादिः संनिकर्षो भवति ततश्च तद्विषयकं ज्ञानमत्र संस्थितस्यापिजायते इति सर्वानुभवसिद्धम्, तथैवातिदूरेऽनागतेऽतीते वा काले विद्यमानस्य पदार्थस्य ज्ञानमध्यस्थितस्यापि स्यादेव । अर्थाद् ज्ञानस्यातिवेगवत्वात्, तेन तेन कालेन संनिकर्षसंभवात्, तत्तत्पदार्थग्रहणेन किञ्चिदपगतं भवति । ज्ञानस्य व्यवहितकालेन सह संनिकर्षो भवतीत्यत्रातिदूरदेशस्योदाहरणं प्रदर्शितम् । यथा नयनकिरणस्यातिवेगवत्तयाऽतिविप्रकृष्टपदार्थेन सह क्षणेन संनिकर्षस्तद्विषयकंज्ञानं तथैव विप्रकृष्टकालेपीति भावः ।

परिमाणतोऽतिदूरोपि पदार्थस्तस्य ज्ञानेन सह संनिकर्षो भवतीतिगतफक्किकया प्रतिपादितम्, इदानींतु ज्ञानापेक्षया कस्यचिदपि दूरत्वंन भवतीतिप्रतिपादनायानुक्रमते **किञ्चातीतानागतपदार्थौ** इत्यादि । अयमर्थः अयमस्मात् संनिकृष्टोऽयमस्माद्विप्रकृष्ट इति व्यवहारस्तु जडपदार्थमाश्रित्य, तत्रापि देशकालौ वाऽपेक्ष्य भवति, प्रायोमूर्तेवस्तुनि, नत्वमूर्ते प्रकाशशीले वेति प्रायोनियमः । यथा घटः पटात् देशतः कालतोवा संन्निकृष्टोवा दूरोवेति व्यवहारदर्शनात् । ज्ञानंतु प्रकाशात्मकमतीव वेगवच्च भवति, इतिज्ञानापेक्षया न कोपिविप्रकृष्टोऽपितु सर्वोपि सन्निकृष्ट एव । तेन सर्वस्यापि ज्ञानेन संनिकर्षो विद्यते, इति दूरत्वं समीपत्वं चानपेक्ष्यैव सर्वस्यवस्तुनः सर्वदा प्रकाशनंतदीयव्यवहारोपि भवत्येव । एतादृशस्थितौ अतीतादिज्ञानस्य कथं सन्निकर्ष इति प्रश्न एव नो युक्तः । कथमन्यथा चीरातीतवस्तुनः शब्दादिप्रमाणेन ज्ञापनं सार्थकं भवेदिति । तस्मात्सुष्ठूक्तं श्रीरामानन्दसम्प्रदायाचार्यप्रवरेण "अतीतानागतपदार्थौं न बुद्धेर्विदूरावित्यादि" ।

विप्रकृष्टदेशकालयोर्ज्ञानेन संनिकर्षोभवतीतिकथितं तत्र व्यवहितदेशकालयोः सन्निकर्षस्तदन्तरालस्थदेशकालयोःसंसर्गनियत इति दूरस्थदेशकालग्रहणवदन्तरालस्थदेशकालयोरपिग्रहणंस्यादित्याशङ्कामिष्टापत्त्या समाधातुमुपक्रमते **एवञ्च ज्ञानस्यसर्वातिशायिवेगवत्तये**त्यादि । अयमर्थः यथा सूर्यस्य-

किञ्चेन्द्रियलिङ्गाशद्बसंकारादिनां यदर्थनियतस्वरूपम् , तेनैवोपश्लिष्यवहिर्वि निर्गमञ् ज्ञानमपि तद्विषयेणैव सङ्गतमिवभवति, नतु विषयान्तरेण ज्ञानं संसृष्टंभवति ।

यथा घटपटादिपदानां शक्तिः सामानन्यविशेषात्मके वस्तुन्येकबुद्धिसिद्धेपि घटत्वादिसामान्यांशेनैव सम्बन्धोभवति । यथा वा विधिशास्त्रं "स्वर्ग कामो यजेत "

चन्द्रमसो वा प्रकाशस्तैजसद्रव्यत्वात् , अतिशयितवेगवानिति नेत्रादिना वहिर्निःसृतोझटिति दूरदेशं गत्वाप्रकाश्यं प्रकायति अन्तरालस्थितमपि न प्रकाशयति, अलातचक्रादौमध्यस्थितयोगादिवत् , तथैव तैजसत्वात् चक्षुरादीन्द्रियद्वारेणनिःसृत्यदूरस्थमपिग्राह्यंगृह्णाति,तदन्तरालस्थस्याग्रहणाभिमानमात्रंजायते, इति समाधानग्रन्थस्यमुकुलिताशयोभवतीति वेददिनांप्रक्रिया । अथैवमपि, यथा तड़ागोदकं जलंनालिका द्वारेणकेदारंप्राप्यसर्वानेव प्लापयति तथैव चक्षुरादिद्वारेणवहिर्निःसृतज्ञानस्ययथा रूपादिनां सम्वन्धो जायते, तथैवतत्रस्थिररसादिनां सन्निकर्पेविद्यमानेपि, तत्रज्ञानेनरूपस्यैवप्रकाशनं भवति नतुतत्ररसादीनांचक्षुरयोग्यानां ग्रहणंभवतीतिलोकस्थितिरिति सेयंव्यवस्था कथमुपपादितास्यादित्याशयेनाह **किञ्चेन्द्रियलिङ्ग** इत्यादि । व्यवस्थामेवोपपादयति, चक्षुरादीन्द्रियलिङ्गानां यदर्थनियतरूपम् , तमेवार्थविशेषं समासाद्य निःसरतिज्ञानमिनि तादृशं ज्ञानतादृशमेवार्थविशेपंविपयीकृत्यप्रकाशयति, नतु स्वायोग्यविपयेण सम्वन्धोनवाज्ञातेनान्यस्य प्रकाशो वा भवति । तदुक्तम् "उद्भूतरूपंनयनस्य गोचरोद्रव्याणितद्वन्ति पृथक्त्वसंख्ये । विभागसंयोगपरापरत्वे स्नेहद्रवत्वंपरिमाणयुक्तम् " क्रियाजातिर्योग्यवृत्तिसमवायोपि तादृशः । गृह्णातिचक्षुःसंयोगादालोकाद्भूतरूपयोरितिनियमात्, यत् इन्द्रियादिकं तत्सर्वंस्वयोग्य विपयेणसम्वद्धंभवत्तद्विपयकमेव ज्ञानमर्जयति तेन च तादृशार्थस्यैवप्रकाशोजायते । यथारूपरसादि विशेपणयुक्तघटे संयुक्तंचक्षुरूपंरूपत्वं तद्द्रव्यमेवगृह्णाति तद्विपयकज्ञानमेव च जनयति, नतुघटस्थित रसमिन्द्रियायोग्यार्थविपयकंज्ञानंजनयतीन्द्रियलिङ्गादीनां स्वभावात् । अतएव"यदाकारान्तःकरण वृत्तिर्जायते यदातदातद्विपयकमेवज्ञानंभवतीति केवलाद्वैतानुयायिधर्मराजाध्वशरीन्द्रवचनं सार्थकमिव भवति । यदर्थनियतंरूपम् यादृशार्थे एवस्थितं वोधजनकतारूपंसामर्थ्यम् , तेन तदर्थप्रतिनियत रूपेणेन्द्रियलिङ्गादीना संप्रतिनियतार्थविपयकज्ञानमेव भवतिनान्यायोग्यार्थेनसहेन्द्रियादेः सम्वन्धो न वातदन्यार्थविपयकंज्ञानं वा भवतीति । एवञ्च चाक्षुपज्ञानस्य नरसादिविषयेण सम्बन्धोनवा तदीय ज्ञानजननमपिभवति । अस्मिन्नर्थेऽर्थाद् योग्यांशेनैवेन्द्रियलिङ्गादीनांसम्वन्धेऽनुरूपं लौकिकं वैदिकंच दृष्टान्तं घटादिदर्शयितुमाह, **यथाघटपटादिपदानांशक्ति** यथावाविधिशास्त्रमित्यादि । घटादिपदानां यदिव्यक्तिमात्रेशक्तिग्रहोभवेत्तदा व्यक्तीनामानन्त्यात् , शक्तेरपि तथात्वमर्थादानन्त्यंस्यादित्यतीव गौरवंस्यात् तस्माद्गवादिपदानां गोत्वविशिष्टेशक्तिस्ततश्चनशक्तेरानन्त्यम् । नचैवंयदिशक्तेरनुगमाय जातौशक्तिस्तदा जातेर्गवादिपदशक्यतास्यान्नतुव्यक्तेस्तथात्वं स्यादिति वाच्यम्, ज्ञातायांशक्तेर्जातौ स्वीकारात् । व्यक्तौतु स्वरूपसती एव शक्तिः । अथवाव्यक्तेर्वोधोलक्षणयैवेतिकेचना । अर्थात् गवा-

इत्यादिकं प्राप्तांशं परितज्याप्राप्तांशमेव भावनायाविपयीकरोति । तस्मात् चक्षुरादीन्द्रियद्वारेणचैतन्यं वहिर्निःसृत्येन्द्रियसंयुक्तमर्थं विपयीकरोतीति वक्तुमेव युक्तम् ।

अतएवगीतायां श्रीकृष्णोप्याह "तदस्य हरतिप्रज्ञांवायुर्नावमिवांभसि" । "इन्द्रिदिपदशक्तेस्तत्तद्व्यक्तिलक्षणविशेषेणसम्वन्धेनाभ्युपगमे घटादिपदात् व्यक्त्यन्तरस्यवोधो न स्यात् सामान्यांशेनजात्यासम्वन्धे सति सर्वस्यापिव्यक्तेर्वोधोनिर्वहतीतिघटपदयोग्यत्वं जात्यात्मकसामान्यस्यैवाभिमतंमीमांसकादीनामिति । यथावा विधिशास्त्रमित्यादि "अप्राप्तप्रापकोवेदभागोविधिर्यथा "स्वर्गकामोजयेत" अत्र स्वर्गकामिनः स्वर्गोद्देशेनयागस्यविधानंभवतिस्वर्गात्मकफलस्य प्रमाणान्तरेणाप्राप्तत्वात्, अप्राप्तांशपरिकरणफलकएवविधिः । प्राप्तप्रापकत्वे विधेर्वैयर्थ्यमेव । तदुक्तं—'

"प्राप्तेकर्मणि नानेकोविधातुं शक्यते गुणः । अप्राप्तेतु विधीयन्ते वहवोऽप्येक यत्नतः ॥ " इति ।

विधिवाक्यस्य प्राप्तार्थेऽन्वये स्वीक्रियमाणे स चान्वयोनिरर्थकएवकृतस्य करणायोगादित्यप्राप्तेनैवसम्बन्धोवक्तव्य इतितेनतेनतत्तदन्वय एवेष्टःस्यात्, अप्राप्तप्रापकवेदभागस्यैवविधित्वात् तथासत्येवयस्यविधेः सार्थक्यमन्यथातुनैरर्थक्यमेवापतेत् । एवंप्रकृतेपि, तत्तदिन्द्रियजनितरूपादिज्ञानस्यतत्तदिन्द्रियग्राह्ययोग्यार्थेनसहैव सम्बन्धोवक्तव्यः । अन्यथा एकेन्द्रियजनितज्ञानेनैवसर्वार्थग्रहणसंभवेन, अन्धकाणवधिरादिव्यवस्था सर्वथैवनिरालंवनास्यात् । व्यवस्थाविलोपापतेदिति । न चेष्टापत्तिः ? एवंसतिश्रुतौचक्षुरादीन्द्रियाणां परस्परं स्वकीयमहिमाप्रख्यापनाय यःकलहःश्रुतःसचकलहोऽप्रासङ्गिक एवापतेदितिसंक्षेपः । **भावनायाविपयीकरोतीति,** यथाभावनाद्विविधा, शाव्दीभावनाऽर्थीभावनेति भेदात्' साचसाध्यसाधनेतिकर्त्तव्यतासापेक्षाभवति । तत्रसामान्यतःसाध्यसाधनाद्यन्वयित्वेऽपि भावनान्वयिन्यप्राप्तेसाधनांशे एव विधिवाक्यस्यतात्पर्यमिति मिमांसका अभ्युपगच्छन्ति । अतइन्द्रिय द्वारेणचैतन्यलक्षणंज्ञानं तत्तदर्थाभिमुखमेवेन्द्रियद्वारेणभवति, अर्थात् ज्ञानंस्वयोग्यार्थविपयकमेवानिःसरतीति स्वीकरणमेवयुक्तंन्याय्यंचेति ।

ततश्चसम्वन्धविशेप एवज्ञानार्थयोः सन्निकर्षोनतुसम्वन्धमात्रम् । सचसम्वन्धविशेपस्तत्तदिन्द्रिययोग्यार्थेन सहैवतत्तदिन्द्रियजनितज्ञानस्येति न चाक्षुपज्ञानविपयोरसादिर्भवतीत्यभिप्रायः । वस्तुतस्तुचक्षुरिन्द्रियजनितज्ञानस्यरसादिनासम्बन्धएवनास्ति चक्षुराद्ययोग्यत्वात् रसादेः । यथा घटस्यचाक्षुषे, घटसंयुक्तगटेचक्षुपःसंयोगःसन्निकर्षः घटसमवेतरूतंतद्गतजातौ च समवेतसमवायःसन्निकर्षस्तथापिचक्षुपाघटवटरूपस्यरूपगतरूपत्वस्यैवज्ञानंजायते परन्तुतेनैवसमवेतस्यरसस्य तथागन्धादेर्ज्ञानं न जायते, कुतः ! चक्षुरयोग्यत्वाद्रसादेस्तस्मात् सन्निकर्पस्यज्ञानजनकत्वं भवत्येवेतिनियमः, परन्तु योग्यतायाअधिकरणत्वमिति नान्येन्द्रिययोग्यस्यान्येनेन्द्रियेण प्रत्यक्षम्, नवाऽन्येन्द्रियजनितज्ञान विषयत्वमन्येन्द्रिययोग्यविपयस्येति । इन्द्रियार्थाभिमुखतयैवज्ञानस्यवहिर्निःसरणंभवति गीतावचनमपि प्रमाणयति **'इन्द्रियाणांहि चरतांयन्मनोऽनुविधीयते । तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि**

याणां हि सर्वेषां यद्येकंक्षरतीन्द्रियम् । तेनास्यहरतिप्रज्ञादृतेः पादादिवोदकम् ” इतिमनुनाप्युक्तम् ।

यत्तुकश्चित् , चैतन्यंगुणःसचगुणिनमात्मानं परित्यज्यकथंविषयपर्यन्तंयास्यति ज्ञानात्मनोरपृथक्सिद्धत्वात् । तन्नयुक्तम् , परित्यागस्यास्वीकारात् । आत्मानमपरित्यजदेव ज्ञानंयतस्तत इन्द्रियादिद्वारेणप्रयातिसवितुःप्रकाशवत् , यथासौरश्चान्द्रमसोवा प्रकाशः स्वाधारमपरित्यजन्नेव चतुर्दिक्षुप्रशरति तथैवात्रापि । विच्छिन्नायाश्चेतनायाः प्रतिसन्धानासंभवात् ।

शब्दगन्धसूर्यप्रकाशादयो गुणा अपिगुणिनंविहायगतिमन्तोधर्मिणः सकाशादति दूरवर्त्तिनोभवन्तीतिदृश्यन्ते । अतिसूक्ष्मोहिशब्दोदूरगमनधर्माभौतिकः । तथा च यथाशब्दादयःस्वधर्मिणंविहायान्यत्र गच्छन्ति तथा ज्ञानमपीति ।

इति तदयमर्थः, उपर्युक्तवाक्यस्य, ज्ञानंहि, आत्मग्रहणायात्मोन्मुखंभवति, मनस्तु, इन्द्रियार्थप्रवणम्, इतीन्द्रियद्वारेणविषयाभिमुखं बहिर्मनोनयतिप्रापयतीति । इन्द्रियद्वारेणवहिर्ज्ञानस्यप्रसरणे मनोर्वचनमपिप्रमाणयितुमाह—

इन्द्रियाणांहिसर्वेषांयद्येकंक्षरतीन्द्रियम् । तेनास्यहरतिप्रज्ञांदृतेः पदादिवोदकमिति ॥

सर्वेषांचक्षुरादीन्द्रियाणांमध्यात् यद्येकमपीन्द्रियं क्षरतिवाह्यविषयंप्रतिनिःसरति, तदा, तमेवेन्द्रियंद्वारीकृत्यतदीयं चैतन्यमपिनिःसरत्येव अत्रदृष्टान्तमाह, **दृतेःपादादिवोदकमिति** यथासच्छिद्रचर्मभस्त्रिकातउदकंजलंनिस्सरतितथैव प्रकृतेपीतिभावः ।

॥ इतिज्ञानस्यार्थेनसह संनिकर्षोपपादनप्रकरणेतत्त्वदीपः ॥

ननु ज्ञानंजीवात्मधर्मःसचस्वाश्रयंपरित्यज्यकथं विषयपर्यन्तंगच्छतीतिशङ्कांपरिहर्तुं गन्धादिवदेवाश्रयव्यतिरेकेण गमनादिकंभवतीति दर्शयितुमुपक्रमते **यत्तुकश्चित्** इत्यादि । द्रव्यगुणयोरयुतसिद्धत्वमपृथक्सिद्धत्वम्, गुणोहिस्वाश्रयंगुणिनं परित्यज्य न गच्छति । गुणत्वेननिष्क्रियत्वात् । नहिघटीयंरूपं वा रसोवा यावदवस्थानमाश्रयस्य तत्कालेघटादिकं विहायान्यत्रगच्छति, नहिघटीय रूपादिमान्पटादिर्भवति । नच हरिद्रागतपीतिमायाःहरिद्रासंयुक्तवस्त्रादौप्रतीतिर्भवतीतिवाच्यम् , अन्यदीयगुणस्यतदन्यत्रसमवायाभावात् , नहिहरिद्रायागुणोवस्त्रेसमवेतोभवति किन्तु स्वसमवेतसंयुक्ततयावस्त्रेसमुपलभ्यते, तत्रनगुणमात्रस्यगमनं वस्त्रेकिन्तुहरिद्रायाःसंयोगो वस्त्रे । तथैवप्रकृते, आत्मगुणस्यज्ञानस्यविषयेगमनंकथंस्यादिति शङ्कितुराशयः । तमिमंपूर्वपक्षंपरिहर्तुमाह **परित्यागस्यास्वीकारात्** प्रहाणानभ्युपगमादित्यर्थः । तदेवप्रहाणाभावमुपपादयति **आत्मानमपरित्यजदेवज्ञानमित्यादि** यथातृणजलायुकासंकोचविकाशशालिनी, यथवाप्रदीपप्रभा, गृहकोणेसमवस्थितासंकुचिताभवति, सैवप्रभाऽनावृत्तप्रदेशेविद्यमाना स्वप्रकाशेन दूरंदूरतरं वा प्रदेशंविभासयन्तीविकशितेव

भवति । तथैवज्ञानमपिसंकोचविकाशशीलम् , तच्चज्ञानमात्मनोधर्मः सचधर्मः स्वाश्रयमात्मसम्बन्धमपरित्यज्यैव यदाविकाशावस्थामाप्नोति तदावाह्यघटादिविषयेणसह ज्ञानस्यसम्बन्धो घटत एवेतिनकाप्यनुपपत्तिर्भवति ।

ननु गुणोपिक्वचित्स्वाश्रयं विहायाश्रयादन्यत्रगच्छतीति तत्रदृष्टान्तंदर्शयति, **दृश्यन्ते** इति यथादूरदेशेविद्यमानोपि स्वाश्रयंशंखभेर्यादिकंपरित्यज्यश्रोतुः कर्णकुहरंप्रविशति अतोदूरतोमयाशंखशद्ब इहस्थ एवश्रूयते इतिप्रतीतिर्जायते । एवम्, केतकीगन्धस्याघ्राणमतिदूरस्थस्यापि सर्वानुभवोभवति । अतएवकेनचित्कविनाकथितम्—

आदायवकुलगन्धानन्धीकुर्वन्पदेपदेभ्रमरान् । अयमेतिमन्दमन्दःकावेरीवारिपावनः पवनः ।। इति ।।

द्वीपान्तरानीतलवङ्गपुष्पैराकृतस्वेदलवमरुद्भिरित्यादिकं सर्वं तदैवोपपद्येतयदि गन्धात्मकगुणस्य गमनंस्वीकुर्यात् । नच गन्धस्यसाश्रयस्यगमने, यस्मात्गन्धाश्रयस्य सूक्ष्मोभागोनिर्गतस्तत्पुष्पीयपरिमाणस्याल्पताभवेत्तथापुष्पे सच्छिद्रतास्यादिति वाच्यम् , भोक्तुरदृष्टवशाद् गन्धत्रसरेण्वन्तरस्यतत्रागमनेन सच्छिद्रत्वदोषस्यानवसरात् । यत्र कर्पुरादौभोक्तुरदृष्टाभावतत्रकर्पुरादेविनाशस्यदर्शनंभवत्येवेति । तस्माद्गुणस्यापि स्वाश्रयाद्दूरगमनंभवत्येव ।

गुणस्यधर्म्यतिवर्तित्वंतुधर्मिदेशादधिकदेशसम्बन्धित्वरूपमेव । गुणत्वं गन्धादेरयुतसिद्धत्वरूपमेव, तच्चद्रव्याद्रव्यसाधारणमेवात्रज्ञातव्यम् । शद्बोगन्धश्च न द्रव्यरूपःस्तयोस्तथाऽलोकप्रभयोद्रव्यरूपयोरपिगुणत्वेनोपादानात् । द्रव्याणांपृथिवीजलतेजोवायुमनसोतुमूर्त्तद्रव्यत्वादेवस्वाभाविकमेव नित्यत्वादिकम्, गुणानांगतिमत्वादिकं तु न स्वभावतः किन्तु स्वाश्रयांशद्वारेणैव भवतीत्यभिप्रायः । न च यदि स्वाश्रयांशद्वारेणगुणस्यगतिमत्वं तदाधर्मिदेशादधिकदेशसम्बन्धित्वंगुणस्यप्रोच्यमानमसिद्धमेवस्यादितिवाच्यम् , तत्र प्रसिद्धाश्रयशंखभेरीपुष्पाद्याश्रयसम्बन्धिदेशाधिकदेशसम्बन्धित्वे एव तात्पर्यात्, नतु रूपादिगुणानांधर्मिदेशाधिकदेशसम्बन्धित्वेतात्पर्यम्, घटीयादिरूपाणांनीलपीतानां घटाद्यधिकदेशसंवन्धित्वेप्रत्यक्षवाधात् । न केवलगन्धादिगुणानांस्वाश्रयातिरिक्तदेशादौ गमनंभवतीति युक्त्यनुभवादिकमेवप्रमा किन्तु श्रुतिरपितस्यगन्धादेस्तथात्वंसाधयतीतिदर्शयितुं श्रुतिप्रमाणमपिप्रभवति, तथाहि, “दूराद्गन्धोवाति” इति श्रुतिर्गन्धस्यगमनं दर्शयति । शद्बस्यगमन तु “शंखशद्बोयंमयाऽधुना श्रूयते” इति प्रतीतेःकर्णशष्कुल्यवच्छिन्ननभःप्रदेशस्यैव श्रोत्रत्वेनतस्यपरिच्छिन्नत्वाद् शद्बदेशे गमनम् । अथवावीचितरंगन्यायेननिमित्तपवनवशादिहैवकर्णदेशेशद्बस्यागमनात् तथा प्रतीतिर्भवति । ननु गन्धादिगुणाश्रयाणांपृथिव्यादिद्रव्याणांगतिमत्वदर्शनेन तत्राश्रयद्वारागन्धादेर्गतिमत्वं कथंचित् साधनंयुक्तमपि, परन्तु शद्बस्तुनभसोगुणो नभस्तु व्यापकद्रव्यंव्यापकेगतिर्नकस्यापिसंमतमितिकथं शव्दस्याश्रयद्वारेणापिगतिमत्वंप्रसाधयितुं युक्तमितिचेत्, शव्दस्यातिसूक्ष्मस्यदूरगमनधर्मिणोभौतिकस्य स्वीकारात् । तत्र शव्दोभौतिकःपृथिव्यादिभूतोत्पन्नः, अर्थात् भेरीदण्डाभिघातेन, वंशदलेपाटव-

ननु नभो यथा व्यापकं तथैव शब्दोपि विभुरेव, परन्तुव्यञ्जकवायुवलेनप्रादेशिक इव गतिमानिवोपलभ्यते । तथाहि शब्दःसर्वव्यापक एकद्रव्यवृत्तित्वेसतिनभसोमानेविभागेन, उद्भूतेवायौजलादौ च शव्दो जायते । तत्राश्रयवाय्वंशस्यगमनवलादनेकदिशासुविदिशादिसुशव्दस्यापिसम्वन्धो भवत्येव । तदुक्तं—

"वीचितरंगन्यायेन तदुत्पत्तिस्तुवर्णिता । कदंवगोलकन्यायादुत्पत्तिः कस्यचिन्मते ।।" इति ।।

तत्र शव्दाश्रयस्यवायोरनिसूक्ष्मत्वादतिदूरगमनं न व्याहतमिति । तत्राश्रयवायुधर्मस्याश्रयिण्युपचारो भवति 'मञ्चाक्रोशन्तीतिवत् ।

अथशव्दस्याकागुणस्यस्वाश्रयवदेवव्यापकत्वमितिशव्दस्यव्यापकत्वान्नगमनापेक्षत्वं, यदर्थं तस्य शव्दस्यवायुगुणत्वंकल्प्येत । न च शव्दस्यव्यापकत्वोपगमेदिवसेकोलाहलावसरेशव्दोपलंभवत्, रवविवर्जितरजन्यामपि शब्दोपलंभः कुतो न भवति । किञ्चव्यापकआकाशःसर्वदासमुपलभ्यते तथा शब्दस्यापिसदासर्वत्रोपलंभोऽनिवार्यःस्यादितिवाच्यम्, अभिव्यङ्ग्यदेशैरेवोपलभ्यमानत्वेनतस्यशव्दस्यव्यापकत्वेपिसर्वत्रोपलंभप्रशङ्काभावात् । अभिव्यञ्जकनियतत्वात् । यथातिलेषुसर्वदाविद्यमानमपिपीडनादिव्यञ्जकनियतं सत् सर्वदानाभिव्यक्तंभवतीतीमांशङ्कामपनेतुमुपक्रमते **ननुनभोयथाव्यापकमित्यादि,** आकाशस्यव्यापकत्वंसर्वदर्शनानुमतमितितद्वदेवतदीयगुणस्यशव्दस्यापितथात्वमेवेतिशाब्दिकाः सङ्गिरन्तीतितन्मतावलंवेनायं पूर्वपक्षः । अभिव्यञ्जकदेशनियतत्वात् व्यापकस्यापितस्य न सर्वत्रोपलंभप्रसङ्गस्तस्मात् शव्दोव्यापकएवेतिशङ्काशयः । ननु न प्रतिज्ञातमात्रेणसाध्यस्यसिद्धिर्भवति, तथात्वे प्रतिज्ञामात्रादेवसर्वप्रसिद्धिर्भवेदपितुप्रतिज्ञानन्तरंहेतुर्वक्तव्यः । तदुक्तं

"संभावितःप्रतिज्ञायांपक्षःसाध्येतहेतुभिः । न तस्य हेतुभिःत्राणमुत्पतन्नेवयोहतः" । इति ।

ततश्चशव्दस्यव्यापकत्वसाधनायाह **तथाहि**=शव्दःसर्वव्यापकः एकद्रव्यवृत्तित्वेसति नभसो गुणत्वात्, तदीयपरिमाणवत्" इति । अत्रशब्दोवर्णात्मकध्वन्यात्मकश्च पक्षउद्देश्यम्, तत्रसर्वव्यापित्वम् साध्यम्, एकद्रव्यवृत्तित्वेसति, आकाशगुणत्वादितिविशिष्टं हेतुः । तत्र हेतौ विशेषणानुपादानेऽनेकवृत्तिसंयोगविभागद्वयादिसंख्यादिषुव्यभिचारःस्यात्, संयोगादिसामान्यगुणानांद्रव्यमात्रवृत्तीनामप्याकाशगुणत्वविद्यमानत्वेपिसाध्यस्यविभुत्वस्याभावात्, इमे च संयोगादयःप्रादेशिकाः । विशेषणोपादानेतु न भवति व्यभिचारोयतःसंयोगादीनांद्वित्वेनैकद्रव्यवृत्तित्वाभावात् । आकाशगुणत्वादितिहेतुघटकविशेष्यानुपादानेघटपटाद्येकवृत्त्येकत्वेगुणत्वस्यविद्यमानत्वेन न पुनर्व्यभिचाररूपोदुरात्मासमापतेत्, इतितद्वारणाय, आकाशवृत्तिगुणत्वस्यकथनम्, घटाद्येकत्वस्याकाशगुणत्वाभावात् । गुणत्वे आकाशीयत्वानुपादाने, घटीयरूपेव्यभिचारस्तस्यापि एकद्रव्यवृत्तित्वेसतिगुणत्वात् । आकाशीयत्वस्यगुणत्वकथने न भवति व्यभिचारोघटादिव्यक्तिमात्रस्याकाशीयत्वाभावादिति । यथागगनपरिमाणंयथोक्तहेतुवदितियथोक्तसाध्यवदपिभवति, तथैव, शव्दात्मकपक्षेपि, एकद्रव्यवृत्तित्वेसति, आकाशगुणत्वंहेतुर्विद्यते

गुणत्वादाकाशपरिमाणवदिति चेन्मैवम्, अतद्गुणत्वादाकाशगुणत्वाभावात् । शब्दोवायवीयोवायुनानियतसहोत्पत्तिकत्वात्, वायवीयस्पर्शवत् । यश्चयेनद्रव्येणसहोत्पत्तिकः सतस्यैवगुणः,यथातथाविधारूपरसादिकाः । नियतसहोत्पत्तिकश्चवायुनाशब्दः । उभयोरपिभेरीदण्डवंशविदलादिसंयोगविभागजनितत्वनियमदर्शनात् । शब्दोगुणोद्रव्याश्रितत्वात् संयोगविभागादिवत् । इत्यनुमानेन शब्देगुणत्वंप्रसाध्यतत उत्पद्यते शब्दोवहिरिन्द्रियग्राह्यइतितत्रशब्दात्मकपक्षेपिसर्वव्यापकत्वंसाध्यमपिसिद्ध्यतीतिपूर्वपक्षः । अनेन प्रकारेणशब्दस्यव्यापकत्वे समर्थितेसिद्धान्तवादीतादृशहेतौ स्वरूपासिद्धिंदर्शयति, **अतद्गुणत्वादिति**, अयमाशयःसंभवेदनेनानुमानेनशब्दस्यव्यापकत्वंयदिशब्दात्मकपक्षे "एकद्रव्यवृत्तित्वेसत्याकाशगुणत्वंहेतुस्तिष्ठेत्, परन्तुशब्दे आकाशगुणत्वमेवनास्तिशब्दस्यवायुगुणत्वात् । तथा च यथाह्रदोवन्हिमान् धूमादित्यत्रह्रदेधूमाभाववत्त्वस्यदर्शनेनहेत्वभाववान् पक्षःस्वरूपासिद्धिरितिस्वरूपासिद्धलक्षणाक्रान्तत्वात्, तादृशधूमस्य, न साधकत्वम्, धूमाभाववान् ह्रद इति ज्ञानकालेवन्हिव्याप्यधूमवान् ह्रद इत्याकारकपरामर्शस्यवाधितत्वेनसाधकत्वं तथैव प्रकृतेःशब्देआकाशगुणत्वाभावज्ञानकालेविभुत्वव्याप्ययथोक्ताकाशगुणत्ववान् पक्ष इतिपरामर्शाभावात् प्रकृतहेतोर्नशब्देसर्वव्यापकत्वसाधनेसामर्थ्यमितिभावः ।

ननुयुक्त्या शब्दस्याकाशगुणत्वंनभवतु "आकाशाद्वायुः" इत्याद्यनेकागमेनतुशब्दस्याकाशगुणत्वमेवसिद्ध्यतितत्कथमत्रतस्यशब्दस्याकाशगुणत्वं प्रतिक्षिप्यतेमहदाडंबरेणेतिचेत्सत्यम्, यदिआगमानुसारेणगगनगुणत्वंव्यापकत्वं च साधयामीत्युच्येत, तदातत्रवच्मि, आगमस्तु "यतोवाइमानि भूतानिजायन्तेयेनजातानिजीवन्तियत्प्रयन्त्यभिसंविशन्तीत्यादि" पृथिव्यादिवदेवाकाशस्यापिजनिस्थितिप्रलयंचप्रतिपादयति, एवञ्चजनिप्रलयादिमतांपृथिव्यादिपवनान्तानांव्यापकत्वंतथैवजन्यादिमतो गगनस्यापिनव्यापकत्वमपितुव्याप्यत्वमेव नहिउत्पत्यादिमतांक्वचिदपिव्यापकत्वंदृष्टंश्रुतमुपपद्यतेवा । आकाशोनव्यापकउत्पत्त्यादिमत्वात् जायमानघटादिवदेवेत्यनुमानमपि श्रुतिसमनुगृहीतंगगनस्यव्यापकत्वंनिराकरोत्येवेति । एवञ्चागमानुसरणेतुगगनस्यैवाव्यापकत्वंसिद्ध्यतितदाकाकथाआकाशपदोपजीविनांवराकानांशब्दानांव्यापकत्वे ततश्चकेवलयुक्तिवलेन तथात्वंसाधनीयमितियुक्त्याश्रयणेतुशब्दस्यवायवीयत्वमेवायाति, रूपरसादेःपार्थवीयत्ववदेवेतिनशब्दस्याकाशगुणत्वमितिभावः । तत्रशब्दस्यवायवीयत्वप्रतिपादनेयुक्तिमेवानुसरन्तामेवाह ।

शब्दोवायवीयोवायुनासहोत्पत्तिकत्वाद्वायवीयस्पर्शवदिति । योयंविलक्षणःशब्दोऽनुभूयते स चवायोरेवनतुगगनस्य कुतः! वायुनासहैवोत्पत्तेः, यदावायोरुत्पत्तिर्भवति, तदैवतदनन्तरंशब्दस्याप्युत्पत्तिदर्शनात्, यथाऽपाकजोऽनुष्णाशीतःस्पर्शःवायुनानियतसहोत्पत्तिक इतितादृशस्पर्शोवायोरेवार्थात् पवनसमवेतएवनान्यस्यतथैवशब्दोपीतियुक्तिवलात्, शब्दस्यवायुसमेतत्वमेवनतुगगनेसमवेतः । शब्दोहिभेरीदण्डसंयोगेनवंशेपाटयमानेवंशदलनविभागेनजायते नियमतस्तस्मात्वायोरेवविशेषगुणः ।

त्वेसतिगुणत्वात् गन्धरसादिवत् । जलोऽयंशब्दःक्रियोत्तरकालेसमुपलभ्यमानत्वात्संयोगवत् घटादिवद्वा । न च न शब्दस्योत्पत्तिरपितु, अभिव्यक्तिमात्रं भवतिप्रयत्नादिबलादितिवाच्यम् । गौरवात् । शब्दप्रतीतिकारणत्वकल्पनामपेक्ष्यशब्दोत्पादककारणस्य-

किञ्चभावद्रव्यभावित्वात् , यावत्कालंवायुरवतिष्ठतेतावत्कालपर्यन्तंशब्दस्यापिप्रत्यक्षंजायते । आकाशगुणत्वेनयावद्द्रव्यभावित्वंशब्दस्यसंभवति, अभिव्यञ्जकसद्भावेएवाकाशेशब्दस्यसंभवादितिव्यञ्जकवायोरेवगुणोनान्यस्येति । कश्चित् शब्दोनित्य एव, अभिव्यञ्चकसद्भावे तस्याविर्भावमेवमन्यते, तत्राभिव्यञ्जकोवायुरेव, अत एववायुर्भवतितदैवशब्दस्यग्रहणंनान्यदातस्यग्रहणमितिवदति । तथा च पूर्वोक्तमशब्दस्यव्यापकत्वंनिराकृतम् ; तदनन्तरंतस्यनित्यत्वनिराकरणायाह **शब्दउत्पद्यते** इत्यादि , शब्दउत्पद्यते, बाह्येन्द्रियग्राह्यत्वेसतिगुणत्वात् , गन्धवत् , यत्रगन्धादौघ्राणेन्द्रियग्राह्यत्वे सति गुणत्वंगुणत्वव्याप्यत्वंविद्यतेतत्रगन्धेउत्पत्तिमत्त्वंदृश्यते एव । एवञ्च, एतादृशहेतोः शब्देपिसद्भावदर्शनेनोपर्युक्तहेतुबलात् शब्देपिउत्पत्तिमत्त्वंभवत्येव । एवञ्चशब्दोनित्यःश्रावणत्वात् शब्दत्ववदितिशब्दनित्यत्वानुमानमुपर्युक्तानुमानेनसत्प्रतिपक्षितंभवत् न नित्यत्वसाधकंभवतीत्यतःशब्दोननित्य इति ।

तत्र शब्देऽनित्यत्वमर्थात्कृतकत्वरूपमेव । कृतकत्वं च शब्दस्यक्रियोत्तरकाले एव नियमतउपलभ्यमानत्वात् संयोगविभागादिवत् "अप्राप्तयोस्तुयाप्राप्तिः सैवसंयोगईरितः । कीर्तितस्त्रिविधस्त्वेषआद्योऽन्यतर कर्मजः । तथोभयक्रियाजन्योभवेत्संयोगजोऽपरः । आदिमःश्येनशैलादिसंयोगः परिकीर्तितः । मेषयोः संनिपातोयःसद्वितीयउदाहृतः । कपालतरुसंयोगात् संयोगस्तरुकुंभयोः" इतिनियमेनसंयोगादीनां यदोपलंभभवति तदाकर्मोत्तरकालेएवेतितस्यकर्मजनितत्वात्कृतकत्वमनित्यत्वं च सिद्ध्यतीति ननित्यः शब्दोऽपितुक्रियोत्तरमुपलभ्यमानत्वात्संयोगवदनित्य एवेति ।

ननुक्रियोत्तरकाले उपलभ्यमानत्वंकृतकत्वादेवेतिननियमः क्रियोत्तरमुपलभ्यमानत्वं तु नित्यत्वेपि संभवति, पवनाद्यभिव्यञ्जकेनाभिव्यंग्यत्वादपिसंभवति, पीड़नादिनाऽभिव्यंग्यत्वात् तिलेषु तैलवदितिक्रियोत्तरमुपलभ्यमानो हेतुरप्रयोजकइत्याशंकांनिराकर्तुमाह **नच नशब्दस्योत्पत्ति⋯ गौरवादित्यादि**, अयमर्थःनहिशब्दोऽनित्यः क्रियोत्तरकमुपलभ्यमानत्वात् , किन्तुनित्यापितुप्रयत्नादिरूपाभिव्यक्तेनाभिव्यक्तःसन्नुपलब्धोभवति, तावतानानित्यत्वंतस्यशब्दस्यभवतीतिप्रश्नार्थः । उत्तरयति **गौरवादिति** प्रयत्नादीनांशब्दोत्पत्तौकारणत्वकल्पनापेक्षया, शब्दस्याभिव्यक्तौ प्रयत्नादीनांकारणत्वकल्पनायांगौरवात् , अर्थात् , शब्दोत्पत्तावेवकारणत्वंकल्पनीयम् तस्यशब्दस्य प्रथमोपस्थितत्वात् , तदपेक्षयाद्वितीयाविभक्तौ तथात्वकल्पनेप्रथमोपस्थितस्यत्यागोद्वितीयोपस्थितस्यदूरत्वमित्येवकारकत्वकल्पनेगौरवंस्पष्टमेव । न च भवन्मतेपिगौरवमितिवाच्यम् , मन्मतेऽनुकूलतर्कस्यविद्यमानत्वेनगौरवस्यादोषत्वात् , प्रतितौकारणत्वकल्पनापेक्षया प्रतीतिविषये कारणत्वकल्पनमेवोचितंलघुभूतंचेति सर्वसंमतत्वादितिभावः ।

कल्पनायामेवलाघवात् । अभिव्यञ्जकाश्चैकदेशावस्थितानेकेन्द्रियग्राह्यान् पदार्थान् सहसैककालेएवाभिव्यञ्जयन्ति । यथा प्रदीपोरूपसंख्यापरिमाणंकरकादींश्चैकदेशवर्तियुगपदेवाभिव्यञ्जयन्तीति दृश्यते । न चैवंकण्ठताल्वाद्यभिघातविभागादिजनितवायुरितिनासौवायुर्व्यञ्जकः ॥

शब्दनित्यत्वादिनांमते,शब्दनिर्विभागगनवर्तिनःश्रावणप्रत्यक्षाश्चभवन्ति । नित्यः

ननुशब्दस्य कारणवलेनाभिव्यक्तिरेवभवति नतूत्पत्तिरितिपक्षेनकेवलंगौरवंभवतिकिन्तुतत्रानुपपत्तिरपिभवतीति दर्शयितुमाह **अभिव्यञ्जकाश्चैकदेशावस्थितानेकेन्द्रियग्राह्यान्** इत्यादि । अर्थात्येऽभिव्यञ्जकाभवन्तितेषामयंस्वभावोयत्ते, एकदेशस्थितान्पदार्थान् , अनेकेन्द्रियग्राह्यान्सर्वानपियुगपदेवाभिव्यञ्जयन्तिप्रकाशयन्ति । यथाऽभिव्यञ्जकःप्रदिपालोकादिः रूपंतत्सहचरितसंख्यापरिमाणादिकंसर्वमेवप्रकाशयति, नत्वेकमेवप्रकाशयतीति ! अर्थात्कण्ठताल्वाद्यभिघातात्मकोच्चारणस्ययदि वर्णादिकादीनामभिव्यञ्जकत्वं ते इष्टम् तदायुगपदेककालमेवानेकवर्णानांविभिन्नस्थानप्रयन्तवतामभिव्यक्तिःस्यात् , अभिव्यञ्जकस्यसर्वत्रसमानत्वात् , यतोऽभिव्यञ्जकस्यसमानदेशस्थितस्यैकेन्द्रियग्राह्यसर्वस्याभिव्यञ्जकत्वमितिस्वभावात् नत्वेवंभवतिं नच वर्णानांव्यञ्जकोवायुरेव,सचविलक्षणो वायुरेवककारंमभिव्यञ्जयतितद्विलक्षणश्चवर्णान्तरमभिव्यञ्जयतीत्येवं क्रमेणवर्णाभिव्यञ्जकपवनेवैजात्यकल्पनेऽतीवगौरवमेवस्यादिति । व्यक्तौकारणत्वकल्पनम् ,तथावर्णव्यक्तेर्व्यवस्थार्थव्यञ्जकपवनेवैजात्यकल्पनंचेत्यपि, प्रकृतेदोषोज्ञातव्यः कारणंद्विविधम् , जनकंज्ञापकंचयथाघटादिकंप्रतिंदण्डचक्रादिकंजनकमुत्पादकंभवति, दण्डादिकंविनाघटोत्पत्तेरशक्यत्वात् । अपरंचकारज्ञानकमर्थांज्ज्ञानजनकंयथाघटादिविषयकज्ञानोत्पादनेप्रदीपादिकम् , तत्रज्ञापकंज्ञानमात्रमेवोत्पादयति नतुज्ञानविषयीभूतघटादिकंप्रतिकिमपिकरोति, अभिव्यञ्जकोपिनोत्पादकः किन्तुप्रतिबन्धकनिराकरणेन प्रज्ञापक एव । एवञ्चयदाजनकःस्वकार्यंकृत्वानिवृत्तव्यापारोभवति, तत्रैवप्रज्ञापकस्यावसरोभवतीति न जनकप्रज्ञापकयोर्विकल्पोभवति, समानविषयत्वाभावात् . समानविषये एवविकल्पोनतुविषयभेदे । यथा “व्रीहिभिर्यजेत” “यवेनवायजेत” अत्रयत्कार्यंयागनिष्पादनरूपंव्रीहिभिः संपादितंभवतितदेवयागनिष्पादनं यवैश्चापिभवति,तदुभययोःफलभेदाभावात् । अत्रतुजनकज्ञापकयोःकार्यभेदात् , प्रज्ञापकाभिव्यञ्जकत्वविचारस्यविकल्पस्यवाऽनवकाशात् ।

वर्णनित्यत्ववादिनोवर्णस्योत्पत्तिंनेच्छन्ति किन्तु अभिव्यञ्जकपवनवलादभिव्यक्तिमेवमन्यन्ते इति पवनस्यशब्दाभिव्यञ्जकत्वेदोषमुद्भावयितुमाह **शब्दनित्यत्ववादिनांमते** इत्यादि । अर्थात् शब्दाआकाशमभिव्याप्यैववर्तन्ते तथा, गगनीयश्रवणेन्द्रियेणग्राह्या भवन्ति । तत्राभिव्यक्तिनियमेकारणं नास्तीति । अन्यथा यथा प्रदीपोयत्रतिष्ठति तत्रस्थान् सर्वान् विशेषेणप्रकाशयति तथैव पवन-

शब्दोनोत्पद्यतेकिन्तुव्यञ्जकेनाभिव्यक्तोभवतीति, नियमेनास्तिकारणम् । यत्रदेशग्राहकयोरैक्यंतत्रैवव्यञ्जकत्वंभवतीतिप्रदर्शितम् । प्रकृतेतदभावात्, नवायोरभिव्यञ्जकत्वम्, किन्तुध्वनेःकारणंपवनएव अतएवजन्यत्वात् शब्दस्यनानात्वमेवप्रत्युच्चारणम् । कृतस्य करणायोगात्कारणभेदाच्च । अपिचउदात्तत्वादिकाधर्माः ककारादिवर्णगता युगपद् स्याभिव्यञ्जकत्वेसर्ववर्णानामेककालमेवाभिव्यक्तिःस्यादितिदर्शयति **यत्रदेश** इत्यादि । अभिव्यञ्जकस्यखल्वयंनियमोयत्, एकदेशावस्थितैकेन्द्रियग्राह्यसर्वानिककालेएवअभिव्यञ्जयति, परन्तु अत्र तदभावात् न तदभिव्यक्तिर्नवावायुरभिव्यञ्जकः, अपितु स एव वायुर्वर्णानुत्पादयतीत्येवकारणरूपत्वात् । अतएवप्रत्युच्चारणंकादिवर्णानांभेद एव मन्तव्यः, अन्यथा शुकशब्दःसारसशब्दोवेतिप्रतिभासनोवर्णगतोभेदोनिरालंवन एव स्यात्, तस्मात् कादिर्वर्णःप्रत्युच्चारणं भिन्न-भिन्न एवाभातीति । नच यदि वर्णोभिन्नस्तदा, स एव ककारोयोऽयोध्यायं श्रुतः स एवेहापिश्रुतिगोचरो भवतीति कथमुपपद्यतेतिवाच्यम्, अतिसादृश्यात् जातिविषयत्वाद्वाप्रत्यभिज्ञाया इतिं गृहाण, तदेवौषधमित्यादिवत् । तदुक्तम् "शब्दोध्वनिश्चवर्णश्चमृदंगादिभवोध्वनिः । कण्ठसंयोगादिजन्यावर्णास्तेकादयोमताः । सर्वशब्दोनभोवृत्तिःश्रोत्रोत्पन्नस्तुगृह्यते । वीचितरंगन्यायेनतदुत्पत्तिस्तुवर्णिता । कदंवगोलकन्यायादुत्पत्तिःकस्यचिन्मते । उत्पन्नःकोविनष्टःकइतिबुद्धेरनित्यता । सोयं क इति बुद्धिस्तुसाजात्यमवलंवते । तदैवोषधमित्यादौसजातीयेपिदर्शनात् । तस्मादनित्याएवेतिवर्णाःसर्वेमतं हिनः ।" इत्यादिकमन्यत्रप्रदर्शितम् ।

तस्मात् ककारादिःसर्वोपिवर्णोऽनित्य एव । तत्रोत्पादकःशब्दस्यवायुरेवेतितदुत्पन्नत्वात्तदाश्रयत्वात् सवायवीय एव नतुनभोगुणः । अर्थादेकव्यञ्जकाभिव्यंग्यत्वाभावात्, ध्वनेर्वर्णात्मकशब्दस्य, तदुच्चारणार्थक्रियमाणप्रयत्नेनसञ्जायमानःकोष्ठान्तर्गतोवायुस्तालुजिह्वामूलदन्तादिस्थानेशब्दकारणीभूताभिघातंप्राप्यस्थितोवर्णस्यककारगकारादेरुत्पादक एव भवति नतु व्यञ्जकोऽर्थात् जनकः कारक एव भवति तदुक्तम् "आत्माबुद्ध्यासमेत्यर्थान् मनोयुंक्तेविवक्षया । मनःकायाग्निमाहन्ति स प्रेरयतिमारुतम् । मारुतस्त्वुरसिचरन्मन्दंजनयतिस्वरमितिपाणिनीयशिक्षायाम् । तत्र "जनयति" इत्युक्तं नतुप्रादुर्भवतिशब्द इतिकथितम् । जनधातुश्चासतिवाधकेउत्पत्यर्थक एव, शरीरंजातंघटो जातः इत्यादावुत्पत्यर्थस्यैवप्रत्यभिज्ञानात्, आत्माभिप्रायेण "देवदत्तोजात" इत्यादिप्रयोगदर्शनात् "असतिवाधके" इतिकथितम् । "न जायते म्रियतेवाविपश्चित् . . . . अजो नित्यः शाश्वतोऽयंपुराणः" इत्यादिश्रुत्याविशुद्धस्यात्मनोनित्यत्वादिश्रवणेनतदुत्पादस्यवाधितत्वमेवशरीराभिप्रायेणतुवास्तविकत्वम्, अतः शरीरविशिष्टस्योत्पादमालक्ष्यविशेषणांशेआविर्भावोविशेष्यंतुजनेरुत्पत्यर्थ एव । ततश्च पाणिनीयशिक्षायामुत्पत्त्यर्थकजनधातोः प्रयोगात्, वायुनाककारादिवर्णस्योत्पत्तिरेव भवतिनत्वभिव्यक्तिः । न केवलमुत्पत्यैववर्णानां भेदः किन्तु उदात्तत्वादिधर्मभेदादपिवर्णानांभेदइत्यपिदर्शयति **अपिच** इत्यादि । "उच्चैरुदात्त" । "नीचैरनुदात्तः" "समाहारःस्वरित" इति पाणि-

भान्तीतितेउदात्तत्वादयोवर्णान् स्वाश्रयभूतान्भिन्दन्त्येवेतिस्थितिः । सोयंककारइति प्रत्यभिज्ञापिनवर्णाभेद्यात् किन्तु "तेइमेकेशाःसैवेयंगुर्जरी" इत्यादिवदतिसादृश्यात्जाति विषयिणीत्यतःसानवर्णस्यैकत्वसाधनायालम् ।

अथैवमपिचैतन्यसंयोगोऽथवा संयोगनिमित्तको वा कश्चिदयंप्रकाश इति ते मतम् । परन्तु–एतदुभयमपिचैतन्ये नसंभवति, सम्बन्धस्यद्विष्ठतयाभेदापेक्षत्वात् कुण्डवदरवत् । नवाऽत्मनोपिचैतन्ये नसंयोगात्मकः संम्बन्धःसंभवति, चैतन्यस्यात्मधर्मिकत्वात् । नहि भवति धर्मधर्मवतोःसंयोगःसंनिकर्षोऽपितयोर्मर्धर्मिणोः

नीयानुशासनवलेनवर्णापरस्परंविरुद्धाधर्माविभिन्ना एव दृश्यन्ते च स्वाश्रयवर्णानपिविभेद्यन्त्येव, यथाशीतत्वोष्णत्वादिकाःस्वाश्रयद्रव्याणिभिन्दन्ति ।

एवं तीव्रः शब्दोमन्दशब्द इत्यादिप्रतीत्यापरस्परविरुद्धधर्मध्यासदर्शनाद् शब्दस्यभेदोजन्यत्वमेव च सिद्ध्यति नतु नित्यत्वंव्यापकत्वादिकं वा एकस्यापि कथंचित्कालभेदेनप्रतिभासो भवतीति, यथाचिररोगिणांवृद्धस्य वा अन्यस्यकृतेमन्दोपितदार्थमधिकप्रायमेवभवन्तो दृश्यन्ते, तस्मात भासमाना इति कथितम्, अर्थात् तीव्रमन्दादितयाप्रतीयमाना भवन्तीति । व्यञ्जकत्वस्यासंभवादेवव्यञ्जकगताधर्माव्यङ्ग्येसमारोपितानभवन्ति । अयमाशयः, यथोक्तप्रकारेणशब्देनित्यत्वव्यापकत्वयोर्निराकरणेनशब्दस्यवायुगुणत्वंव्यवस्थापितं भवति, तथा युक्तिवलेनशब्दस्यगतिमत्वमपिप्रतिपादितम् । आत्मगुणस्यचैतन्यज्ञानस्यान्यत्रसम्बन्धमात्रे, उदाहरणंशब्दोगन्धश्चेत्यपि कथितम् । आश्रयं विनापि ज्ञानस्यतदन्यत्रगमनेदृष्टान्तःसूर्यस्यप्रकाशोमण्यादीनांप्रभा च । अर्थात् यथासूर्यस्यालोकःसूर्यंविनापि तदन्यत्रघटादौगच्छतिमणिप्रभा च गच्छति, अन्यथासुदूरस्थितवस्तुनः प्रकाशो न भवेत्, सूर्यलोकमणिप्रभादीनांद्रव्यरूपत्वेनतदन्यत्रगमनंसंभवति । सूर्यालोकादेःसूर्यरूपाश्रयेणसहसम्बन्धस्य विच्छेदात् सूर्यधर्मत्वमपिव्यवस्थितमेवेतिसम्पूर्णप्रकरणनिर्गलितार्थःसंक्षेपेणसञ्चितः ।

॥इतियथोक्तक्रमेणात्मधर्मरूपज्ञानस्यान्यत्रसम्बन्धोपपादनं तथा वायवीयत्वसमर्थनंचेतिप्रकरणेतत्त्वदीपः॥

पूर्वप्रकरणकथितप्रकारेणचैतन्यस्यघटादिविषयजातेनसहसम्बन्धप्रकारःसमुपपादितः । "घटादि प्रकाशते" इत्यादिव्यवहारोपिचैतन्यसम्बन्धमूलक एव भवतीत्यपिप्रपंचित एव । अतः परमेतस्मिन् विषयेप्रभाकरःपुनःप्रश्नयतीतिदर्शयितुमुपक्रमते **अथैवमपिचैतन्य** इत्यादि । एतावतासमतीतप्रकरणेनचैतन्यस्यविषयादिना यःसंयोगसम्बन्धः स एव प्रकाशः ? अथवा चैतन्यविषयसंगात् जायमानएवकश्चित्प्रकाशरूप इति प्रसाधितः । परन्तु एतदुभयमपि न घटते, यतश्चैतन्येतस्यसंयोगस्यासंभवात् । यतःसम्बन्धोहिभेदघटितएवभवतीतिनियमः ततश्चस्वस्मिन् स्वभेदस्याभावात्, तथाऽत्मनोपिचैतन्येनसम्बन्धो न संभवतिधर्मधर्मिणोसंयोगाभावात् किन्तु तयोः सम्बन्धोऽयुतसिद्धसमवाय एव भवतीतितान्त्रिकैनिर्णीतत्वात् । संयोगसम्बन्धस्तु युतसिद्धद्रव्ययो-

समवायएवसम्बन्धोभवति, अयुतसिद्धत्वात् । संयोगस्तुसंनिकर्षोऽयुतसिद्धयोः [पृथक्सिद्धयोः] द्वयोर्द्रव्ययोरेवभवति, सचसंयोगः क्रियाजनितोऽप्राप्तप्राप्तिरूपकार्यद्रव्ययोरेवभवति । नित्ययोर्द्वयोर्द्रव्ययोरकार्यकरणयोनिरन्तरस्थितिरूपएव, यथाकालाकाशयोः । चैतन्यसंयोगसमवायोरन्यतरस्य वा सम्बन्धमात्रस्य वा प्रकाशरूपत्वाभ्युपगमे, ज्ञातृज्ञानज्ञेयेषुशरीरेन्द्रियादिषुयथायथमव्याप्तिर्वातिव्याप्तिर्वास्यात् । प्रकाशस्यतत्वान्तरत्वस्वीकारस्तु अनुपलब्धिपराहत इति न दूषणान्तरस्यप्रयोजिकः अतोयद्व्यवहारकारणंभवति ज्ञानम् तदेवप्रकाशते इत्येवंस्वीकार एवयुक्तः । ज्ञातृज्ञेयज्ञाने तत् त्रितयव्यवहारहेतुत्वंसंविदःस्वभावः सच निमित्तस्यानेकरूपत्वेपि न पर्यनुयोगमर्हति । स्वभावस्यपर्यनुयोगात् एवंचेत्संयोगसमवायरहितस्यापि पदार्थजातस्य निमित्तकारणभेदानुसारेण व्यवहारकारणं चैतन्यमितिस्वीकार एवयुक्तआभाति ।

र्जन्ययोरेव भवति कर्मजः । नित्यद्रव्ययोः कालाकाशयोस्तुनैरन्तर्येणसमवस्थानमेव । कालाकाशयोरित्थंसंयोगस्वीकारेतुल्ययुक्त्यातयोर्नित्यंविभागोपिसिद्ध्येत्, न चैतत्कस्यचिदपिसंमतम् । चैतन्यसंयोगतदीयसमवायान्यतरयोस्तथात्वेऽव्याप्तिर्वाऽतिव्याप्तिर्वानिमित्तकारणेशरीरादौस्यादिति। प्रकाशस्यतत्वान्तरत्वंतु अनुपलब्धिप्रमाणपराहतमेव । तस्मात्, 'प्रकाशते' इत्याकारकव्यवहारेयत्कारणंतदेवकारणम् । ज्ञातृज्ञानादीनांव्यवहारकारणत्वमितिज्ञानस्यस्वभावःसचस्वभावो न पर्यनुयोगार्हः । एवञ्चसंयोगादिरहितस्यापिपदार्थस्यनिमित्तकारणभेदबलेनव्यवहारहेतुर्ज्ञानमित्येवपक्षोयुक्तइवाभातीति । अथवा पूर्वपक्षग्रन्थस्येत्थंमभिप्रायवर्णनं भवति, चैतन्यसंयोगसम्बन्धस्यप्रकाशमानतायां प्रयोजकत्वंमन्येततदाचैतन्येज्ञाने तथा ज्ञानाश्रये च प्रकाशमानत्वव्यवहारो न स्यात् । चैतन्य समवायस्य तादृशव्यवहारनियामकत्वेविषयविषयिणोस्तथाव्यवहारो न स्यात्, तयोः समवायाभावात् । यथा कथंचित् चैतन्यसम्बन्धमात्रस्यप्रकाशते इति व्यवहारनियामकत्वेज्ञाननिमित्तकारणशरीरेन्द्रियादेरपि प्रकाशप्रसङ्गः स्यात् । तस्मान्निमित्तबलादेवतत्तद्घटादिज्ञानस्यतादृशार्थव्यवहारकारणत्वं भवति, तथा स्वस्वाश्रयव्यवहारकारणत्वंचेत्येवमन्तव्यम् । तावतैवसर्वव्यवहारोपपादनसंभवेनिरर्थकमेवार्थचैतन्ययोः सम्बन्धकल्पनमितिप्रकरणस्यनिर्गलितोर्थः । मूलाक्षरसंयोजनंतु-इत्थम् विभुद्वयस्याकाशकालादेःसंयोगो भवतीति पक्षे विभौक्रियाया अभावादेव न भवतीत्युक्त्वातत्रनित्येप्रकारान्तरेणसंयोगप्रकारंनिर्वक्ति **अकार्य** इत्यादि, अवयवावयविभिन्नयोर्द्रव्ययोःकालाकाशयोरन्तरालावस्थानमेवसंयोगःसचसंयोगोऽव्यापकद्रव्येक्रियया भवति, व्यापकयोस्तुद्रव्ययोः' स्वतएव । **तत्वान्तरत्व** इति । प्रकाशस्यतत्वान्तरस्वीकारोऽनुपलब्धिबाधित एव । ज्ञानव्यवहारेस्वस्यैवव्यवहारजनकत्वम् । स्वाश्रयस्यतुस्वसमवाय्यर्थस्यस्वनिमित्तानुसारेणेति प्रयोजकनानात्वं न दोषायेत्यलम् ।

॥ इति पुनः प्रभाकरमतविवरणे तत्त्वदीपः ॥

अत्रोच्यते यत् कार्यं तत् स्वकीयनिमित्तकारणमनुरुद्ध्यस्वकार्यंजनयतीति न नियम इत्यस्यपूर्वमेवोक्तत्वाद् । प्रकाशपदार्थेव्यवहारानुकूलसंवेदनत्वेपि प्रवृत्तिनिमित्तभेदस्यदुष्परिहरत्वात् बहुव्रीहिसमासपक्षेतुज्ञानान्तरस्याभावेनतस्यांसंविदितदभावप्रसङ्गात् । कर्मधारयसमासाङ्गीकारपक्षेतुज्ञातुर्विषयस्य च संविदभिन्नत्वेनाप्रकाश प्रसङ्गात् । व्यवहारोत्पादनानुकूलत्वंव्यवहारोत्पादानन्तरमेवावगतंस्यादितितत्पूर्वंविदित्वाप्रतीतिव्यवहारयोः सिद्धत्वात् ।

यद्येवंकथ्यते तदा 'प्रकाशते" इत्यत्रप्रकाशशद्धस्यकोर्थो भवति ? यतो ज्ञानज्ञातृज्ञेयेषुनिर्दुष्टमनुगतमेवरूपंनोपलभ्यतेप्रकाशपदस्येति । तत्रोच्यते "अर्थप्रकाशकं ज्ञानम्" (श्रौतप्रमेयचन्द्रिका ३।३। इतिजगद्गुरुश्रीश्रियानन्दाचार्योक्तेः "विद्वद्भिः

एवं यथोक्तप्रकारेण गुरुमतानुसरद्भिः प्रतिपादितेविमर्शकः कश्चिद्दोषंवक्ति, **अत्रोच्यते** इति । दोषमेवोपपादयितुं विवृणोति **यत् कार्यं तत् स्वकीय** इत्यादि । यथा घटादिकार्यं स्वोत्पत्तौ निमित्तकारणदण्डाद्यधीनं भवत्यपि किन्तु सदण्डजोघटः स्वकीयजलाद्याहरणकार्येदण्डादिकंनापेक्षते दण्ढादिनिमित्तकारणानामभावेपि घटकार्यस्यजननात् । यथावापटः तंतुवायादीनामभावेपि प्रावरणादिकार्यं करोत्येवेत्यस्योक्तत्वात् । अर्थात् स्वकीयनिमित्तकारणवद्देशे एव स्वकार्यजनकत्वमितिनकुत्रचिदपि दृश्यते घटनिमित्तकारणानां देशः कुलालादिगृहं तत्रैवघटः स्वकार्यं जलाहरणादिकं करोति तथा सति तदन्यत्रघटस्य जलाहरणकारणत्वंनस्यात् परन्तु नैवं भवति तदन्यत्रापि तथा दर्शनात् । इतीन्द्रियसंनिकर्षवत्येवार्थे घटादिज्ञानेनव्यवहारः समुत्पाद्यते इतिनसमीचीनमिति भावः ।

दूषणान्तरमपि दर्शयति **प्रकाशपदार्थेव्यवहारानुकूल** इत्यादि ज्ञातरिज्ञेयेच स्वस्वव्यवहारानु गुणज्ञानकत्वलक्षण एव प्रकाशपदार्थः । ज्ञानस्यतुज्ञानव्यवहानुकूलज्ञानत्वलक्षण एव प्रकाशपदार्थ इति ज्ञातृज्ञेयज्ञानेषुत्रिष्वप्यनुगतः प्रकाशपदार्थोनास्ति सर्वत्रानुगतव्यवहारनियामको भवेदिति भावः । ज्ञानंप्रकाशोयस्येति व्युत्पत्तिपक्षे ज्ञानस्य ज्ञानान्तराभावेनज्ञानेतदभावप्रसङ्गात् । ज्ञानमेव प्रकाश इति व्युत्पत्तौ ज्ञानप्रकाशयोस्तादात्म्यं लभ्येत तत्र च ज्ञातृज्ञेययोः प्रकाशेनतादात्म्याभावेनतयोर्ज्ञातृज्ञेययोः प्रकाशाभावप्रसङ्गात् । अथज्ञानाधीनव्यवहारानुकूलत्वमेव प्रकाशपदार्थो भवत्वितिशङ्कायामाह **व्यवहारोत्पादनानुकूलत्व**मित्यादि । व्यवहारयोग्यता रूपप्रकाशस्यव्यवहारद्वारेणैवानुमेयतया व्यवहारात् प्राक्कालेजायमानौ विदितत्वप्रतीतिव्यवहारावनुपपन्नौ स्यातामित्यर्थः ।

॥ इति प्रभाकरमते पुनरपिदोषोद्भावनप्रकरणे तत्त्वदीपः ॥

प्रभाकरमते पुनरपि दोषोद्भावनप्रकरणेन विमर्शकेनकेनचित्प्रकाशशब्दार्थस्य **प्रकाशते** इतिपद घटकस्याक्षेपे कृते तटस्थः कश्चित् शङ्कयति **यद्येवम्** इत्यादि **निर्दुष्टमनुगतमेवरूप**मित्यादि

संमतंचात्रज्ञानमर्थप्रकाशकम्" (अनन्ततत्वपीयूषः ४०) इतिजगद्गुरुश्रीनरहर्यानन्दाचार्योक्तेश्च अनुभवादूरत्वकस्मृतिनिमित्तकप्रकाशः स्वरूप एव सः। अर्थात् संविद्दूरत्वमेवप्रकाशपदार्थस्यलक्षणमितिभावः।

पुनराहकश्चित्–किमिदमदूरत्वम्? दूरादन्योऽदूरोदूरविरुद्धोवातदभावो वा? एवं विशेषणमुपलक्षणं वा अदूरत्वम्? विशेषणत्वे त्रिष्वपिपक्षेषु संवेदनदूरत्वज्ञानपूर्वकं

अर्थात् ज्ञानसम्बन्धस्य संयोगसमवाद्यन्यतमस्य प्रकाशशब्दार्थत्वकथने एतादृशज्ञानसम्बन्धमात्रस्य अप्रकाशमानघटाद्यर्थसाधारण्यं भवति तथा समवायादपि नानुगतमित्यन्यूनानतिरिक्तः "प्रकाशते" इत्यादौप्रकाशपदार्थो दुर्निरूप एव भवतीति शंककस्याभिप्रायः। अत्रसिद्धान्ती समधातुमाह **तत्रोच्यते** अयमाशयः नहि एतादृशसंदिश्यमानार्थस्य स्वकीयाल्पबुद्धिमात्रेण कश्चिदपि निर्णेतुं प्रभवति। ततोगुरोरूपासनैवश्रेयस्करीप्राचीनाचार्यग्रन्थानामध्ययनमावश्यकम्। तत्र च "अर्थप्रकाशकम्" इत्यादिप्रपञ्चितम्। यदा विषयो घटादिरनुभवस्या दूरे समीपेविद्यमानःस्वविषयकस्मृतिंजनयतिं, तथैवानुभवस्याप्यनुभवाददूरत्वंसंस्कारद्वारेणास्त्येवेतितस्यापिस्मृतिरुपपद्यते एवेति। एतावताप्रकाशपदार्थनिरूपणेकिंसमाहितम्, तत्राह **संविददूरत्वमेव** इति। यथा संविदोज्ञानस्यदूरत्वंसमीपवृत्तित्वम् विषयत्वज्ञातुश्चभवति, तथैव संविददूरत्वंसंविदोपिभवत्येव, ततश्चसंविददूरवर्तित्वमेवप्रकाशः, तथा च ज्ञानापरपर्याय एव प्रकाशः। एवञ्चप्रकाशपदार्थः क इति जिज्ञासायाज्ञानरूप एव प्रकाशपदार्थ इत्युत्तरम्। अयमर्थःसम्पूर्णप्रकरणस्य पर्यालोचनयाप्राप्तो भवतिं, दधिमन्थनेननवनीतप्राप्तिवदितिसंक्षेपोविस्तरस्तुसम्प्रदायसेत्रयैवज्ञातव्यः।

अथसंविददूरत्वमेवप्रकाशतेपदघटकपदार्थ इति पूर्वसिद्धान्तिनासिद्धान्तरूपेणप्रतिपादितम्। अर्थात्संविददूरत्वं ज्ञानेज्ञातरिज्ञेयादित्रिष्वपिविद्यते, तद्रूपएवप्रकाशपदार्थस्तत्रशङ्कते **पुनराहकश्चित्** इत्यादि। अदूरमित्यत्र, नदूरमित्यदूरमितिनञ्समासः। समासान्तर्गतनञःषडर्थाभवन्ति। तथोक्तम्–तत्सादृश्यमभावत्वंतदन्यत्वंतदल्पता। अप्राशस्त्यंविरोधश्चनञर्थाःषट्प्रकीर्तिताः" यथा, "अनिक्षुःसरः" इत्यत्र न इक्षुरनिक्षुः अर्थात्, इक्षुवत्लंबायमानमिक्षुवदतिमिष्टरसोपपन्नंसरः। अत्र न इक्षुरनिक्षुरित्यत्रनञःसादृश्यमेवार्थःपरिगृह्यतेयोग्यत्वात्, इक्षुवत् अतिमिष्टरसवत्वमतिदीर्घत्वंनञासरसिबोध्यते। क्वचिदभावाऽत्यन्ताभावोपिनञोऽर्थो भवति, यथाऽघटंभूतलमित्यत्रघटविरहवतिघटाभाववद्भूतलमित्येवार्थःप्रतीतोभवति। क्वचिदन्योन्याभावोप्यर्थो भवति, यथाऽघटःपटः" अत्रघटभिन्नःपटोऽर्थात् घटान्योन्याभाववान् पटः नञाघटतादात्म्यस्यपटेप्रतिषेधात्, ईदृशोऽर्थएव। एवं समासान्तर्गतनञपदस्याल्पत्वमप्यर्थो भवति, अर्थादीषदर्थकत्वंनञः। यथा "अलवणकंशाकम्," प्रमाणतोन्यूनेलवणेसति, अयं प्रयोगः। तथाचेपल्लवणकत्वंशाकेप्रतीयते, नतु लवणस्यात्यन्ताभावोऽन्योन्याभावो वा प्रतीतो भवति। यथावा, "अनुदराकन्या" अल्पोदरवती

“प्रकाशते” इतिज्ञानंस्यात् । नचैवं भवति । उपलक्षणत्वपक्षेःउपलक्ष्यस्वरूपान्तरंवक्तव्यं भवेत्, नतु तदुपलभ्यते । अभिप्रायानवबोधात् भवतु दूरान्योदूरविरुद्धोदूराभावोवाऽदूरत्वम् , सर्वोंपिसमीचीन एव । तद्भावप्रकाशपदार्थ इति ।

नतूदरस्यात्यन्ताभावोलोकबाधात् । तथैवप्रकृते, अदूरत्वम्, ईषद्दूरत्वमिति । क्वचित् अप्राशस्त्यमपितदर्थः । यथाखडियापल्टन-मात्रवेषधारिणंदृष्ट्वावदतिलोकः “असाधुरयम्” अत्र न साधुरसाधुरितिसमासानन्तरंसाधुत्वस्य न निषेधः किन्तु अप्रशस्तोऽयंसाधुरित्येवार्थःप्रतीयते । एवं विरोधोऽप्यर्थः- कुत्रचिद् भवति नञ् पदस्य यथा नसुरोऽसुरः । अत्रनात्यन्ताभावोऽन्योन्याभवो वा, अन्योन्याभावार्थकत्वेसुरभेदस्यसुरेतरत्वस्यमनुष्यादिष्वपिविद्यमानत्वेनसर्वेपिमनुष्यादयोऽसुरा एव भवेयुरतोऽत्रनञोर्थोविरोध एव परिगृह्यते । सर्वंचेन्द्रादिसुरपदवाच्यस्यविरोधःकर्मराक्षसरावणादिदितिपुत्रादेरेवस्वभाव विरोधसद्भावेनरावणादयएवासुरपदबोध्या भवन्ति ।

एवञ्चनञोनानार्थकत्वस्यदर्शनात् प्रकृतेऽदूरमित्यत्रतस्यनञःकीदृशोऽर्थःपरिगृह्यते इतिजिज्ञासुः प्रश्नयति **किमिदमदूरत्वमिति** । तत्रदूरादन्योऽदूरःइतिवा, दूरविरुद्धोवाऽदूरःइति दूराभावोवाऽदूरः इति । योग्यत्वादर्थत्रयंविगृह्यप्रश्नः । यद्वाभवतुनञोयो वा कोवाप्यर्थःतत्रान्यतमार्थपरिगृह्यशङ्कान्तरं करोति **एवविशेषणमुपलक्षणंवा** इति । अर्थात्, इदमदूरत्वंसंविदोविशेषणमुपलक्षणंवेतिप्रश्नः । तत्रयदि संविदोविशेषणत्वमदूरेइत्यस्यमन्येत, तदात्रिष्वपिभेदविरोधाभावपक्षेषु, दूरप्रतियोगिकान्योन्याभाव विरोधात्यान्ताभावानांप्रकाशपदार्थत्वस्यस्वीकारे, दूरज्ञानपूर्वकमेवभेदादिज्ञानंस्यात् , प्रतियोगीज्ञानपूर्वकस्याभावज्ञानस्यदर्शनात् , “प्रतियोगिविशेषिताभावज्ञाने विशिष्टवैशिष्ट्यबोधमर्यादानातिशेते” इतिनियमात् । यत्प्रतियोगिकोयदनुयोगिकस्याभावोभवति, तादृशाभावज्ञानेप्रतियोगिज्ञानस्यानुयोगिज्ञानस्यपूर्वमवश्यमेवापेक्षणात् । अन्यथाकारणाभावेनाभावज्ञानस्यैवासंभवात् । नहिघटंप्रतियोगिनं जलादिकमधिकरणमजानतांघटाभाववज्जलमितिरुदेति ।

अतएवसुमेरुर्वन्ध्यापुत्राभाववानित्यभावप्रतीतिर्जायते, तत्रप्रतियोग्यनुयोगिनोरुभयोरप्यसंविदितत्वात् । परन्तु नैवं कुत्रचिदप्युपलब्धमितिविशेषपक्षो न युक्तोऽनुपलंभादेवेति संक्षेपः । नवा उपलक्षणत्वमितिपक्षोपियुक्तः ? उपलक्ष्याकारान्तरस्यादर्शनात् । ‘काकवन्तोदेवदत्तगृहाः’ इत्यत्रोत्तृणत्वादिवत् । एवञ्चविशेषोपलक्षणपक्षद्वयेपि, अनुपपत्तिज्ञानमेवप्रश्नबीजमित्यवधेयम् । अथवा प्रकृते किंशब्दआक्षेपार्थकएवविकल्पासहत्वात् संविददूरत्वंनप्रकाशपदार्थइति । उत्तरयति**अभिप्रायानवबोधादिति** । अत्रादूरत्वंदूरान्यत्वंदूरविरोधित्वंवा, तत्सर्वमनुमतमेव, अर्थाद्दूरविरोधित्वंदूरभिन्नत्वंचादूरत्वं तदभावएवप्रकाशपदार्थः । द्वितीयविकल्पकल्पस्योत्तरम् , **तद्भवःप्रकाशपदार्थः** । अर्थात् अनुभवदूरभिन्नत्वमनुभवदूरविरोधित्वरूपमेवप्रकाशत्वंप्रकाशमानत्वंप्रकाशार्थाइति । अनुभवपदं न प्रत्यक्षादिज्ञान विशेषस्यबोधकमपितुज्ञानत्वेनज्ञानसामान्यबोधकम् । तेनप्रत्यक्षानुमित्युपमितिशाब्दसंस्कारजसर्वज्ञानानां

'प्रकाशते'इत्येवंप्रकारेणजायमानप्रतिभासोपिज्ञानविप्रकर्षविरोधिवोधतत्संसक्तपदार्थस्वरूपविमर्श एव बाह्यप्रदीपप्रकाशवत् । प्रदीपादावप्यालोकेआलोकव्याप्तपृथिव्यादिभागे च प्रकटोयमितिप्रख्योपाख्येआलोकादूरत्वनिमित्तकेभवत एव । प्रदीपालोकस्थलेयथाऽलोकनिमित्तकोगाढान्धकारविनाशः । तथैव प्रकृतेज्ञानादूरत्वमूलकाज्ञाननिसहः । अतएवप्रत्यक्षज्ञानानन्तरंयथाऽर्थप्रकाशतेइतिव्यवहारस्तथैवाऽनुमित्यन्तरंवह्निरूपोऽर्थः प्रकाशते इत्येवंरूपेणसर्वज्ञानानन्तरंप्रकाशते इतिसमानएवप्रकाशतेइतिव्यवहारोभवत्येवेति । एतत्तदुच्यते "शाखाचन्द्रन्यायेनशाखायांचन्द्रइतिवत्, उपलक्ष्योपलक्षणयो:सामानाधिकरण्येननिर्देशः । एवञ्च संविददूरत्वोपलक्षितोधर्मविशेषप्रकाशोभवतीतिभावः ।

संविदविदूरत्वंतद्विरोधित्वमेवप्रकाशत्वंयत्कथितंतत्स्वयमेवाचार्योविस्पष्टयति **प्रकाशते**इत्यादि, संविद्दूरभेदाद्युपलक्ष्याकारस्तुज्ञानज्ञातृज्ञानसंबद्धार्थान्यतमभावः । प्रकाशपदस्यज्ञानादूरत्वोपलक्षितधर्मवाचकत्वात् । अथवासंविद्दूरप्रतियोगिकभेदवत्वंतादृशदूरविरोधित्वंप्रकाशइत्यर्थः । अथैवं प्रकाशज्ञानेसंविद्दूरविरुद्धस्यावश्यंभावित्वस्यापेक्षायामाह, **प्रकाशते** इत्यादि, "भावान्तरमभावो हिकयाचित्तुव्यपेक्षया" इत्यादिनियमेन, अभावस्यभावादूररूपत्वात्; संविद्दूरभेदस्यतद्विरोधस्य च संवित्तत्संसृष्टपदार्थतादृशप्रदार्थाश्रयरूपत्वेनदूरादिपदार्थज्ञानंविनापिप्रकाशप्रतीतिर्भवत्येव । अभावस्याधिकरणात्मकत्वमितिमते घटाद्यभावोऽधिकरणपटादिरूपएवयथात्रादोषाभावोगुणात्मकइतिं घटाद्यभावज्ञानेऽधिकरणात्मकपटादिज्ञानंनापेक्षितंभवति, अनुभवविरोधादेवेतितत्रपटादिज्ञानमन्तरेणापिघटाभावादिर्ज्ञायते एव, तथैव संविद्दूरादिंभेदज्ञानमन्तरेणापिप्रकाशज्ञानमपिसंभवत्येवेति प्रकाशपदस्यसंविददूरत्वावच्छिन्नमेवार्थ इतिभावः ।

बाह्यप्रदिपप्रकाशवदिति दृष्टान्ततयोपात्तम्, यथाबाह्यप्रदिपालोकस्थलेतथातादृशालोक प्रकाशितपदान्तरेचालोकः प्रकटित इति, घटादिश्चप्रकाशितइतिप्रतितिव्यवहारौ च संभवत:स च व्यवहारादि:प्रदिपालोकनिमित्तकएव, एवंयथा प्रदीपालोकेनान्धकारस्यद्रव्यात्मकस्याभावरूपस्यवा, निवृत्तिरपिजायतेएवतथैवालोकात्मकज्ञानप्रकाशेनान्तरतमोगुणात्मकाज्ञानस्यनिवृत्तौसत्यांप्रकाशते इत्यपि व्यवहारोभवत्येवेतिं । **अज्ञाननिवृत्तिरिति** नात्राज्ञानपदेनमतविशेषेभावात्मकस्याभावरूपस्याज्ञानस्यनिवृत्तिरित्यर्थः, अपितुअप्रकाशकारणभूतस्यतमोगुणस्यसांख्यतन्त्रप्रसिद्धस्यैवनिवृत्तिरित्यर्थः तमोगुणस्यनिवृत्तिरेवार्थः । अप्रकायोऽप्रवृत्तिश्चप्रमादोलोभएवच । तमस्येतानिजायन्तेप्रवृद्धेभरतर्षभ" इति भगवदुक्तेः ।

अप्रकाशकारणत्वंतमोगुणेप्रतिष्ठितम् । स्वकारणतमोगुणस्यनिवृत्तौसत्वकारणकसत्वगुणविवृद्धया, प्रकाशाविर्भावात् । तदप्युक्तम् "सत्वात्सञ्जायतेज्ञानमिति । प्रकाशाप्रकाशयोर्विरोधस्यसर्वानुमतत्वादित्यलम् । ननुभवतुसंविद्विषयत्वमेवप्रकाशत्वम्, यथाज्ञानविषयत्वात् घटादौप्रकाशते इति

वृत्तिर्जायते एवेति । अतएवानुभूतेऽनुभवेचोत्तरकालेसमानमेवस्मरणम् ।

प्रतीतिर्व्यवहारश्चभवति, तथैवप्रकाशेपिसंभवात् । नच यथाघटादौज्ञानविषयत्वं न तथाज्ञानस्यज्ञान विषयत्वंस्वप्रकाशतयाज्ञानविषयत्वस्यज्ञानेऽभावात् , इति नज्ञानस्यज्ञानविषयत्वेपिज्ञानान्तरविषयत्व संभवात् , यथाऽयंघटइतिप्रात्यक्षिकज्ञानविषत्वंघटंपश्यतीत्यत्र, तथैवघटविषयकज्ञानवानहमित्यनु व्यवसायात्मकज्ञानकर्मत्वेनप्रथमज्ञानान्तरकर्मत्वं तथा च द्वितीयज्ञानवलात्तस्यापिप्रकाशप्रतीतिव्यवहारौ घटेत एवेतिकिम् दूरत्वपर्यन्तानुधावनेनेत्याशंकांनिवर्तयितुमाह **अतएवानुभूतेऽनुभवेचेत्यादि** अयमाशयः, यदिघटाद्यनुभवानन्तरंदैवात्, अनवस्थादिप्रसक्त्या वा ज्ञानविषयकज्ञानान्तरं न जातम् , तत्रयुगपत् घटतद्विषयकानुभवयोः स्मरणमेवभवति, अप्रकाशितस्य च स्मरणासमएवसंविद दूरत्वप्रकाशस्योपपादकंभवति । यदिकश्चित् विषयकज्ञानानन्तरंसंशयविपर्ययादिवारणायव्यवसायात्मकज्ञानानुव्यवसोयात्मकज्ञानान्तरमवश्यमेवेतिमतिः तस्यवादिनोऽनवस्थादोषादनिर्मोक्षएवापतेत् । यथाविषयविषयकज्ञाननिष्ठसंशयादिवारणायद्वितीयंज्ञानमनुव्यवसायात्मकमवश्यमेवमन्तव्यम् , अन्यथा प्रथमज्ञानगतसंशयादीनांनिराकरणासंभवात् । एवंद्वितीयज्ञानगतसंशयविपर्ययादेर्निराकरणायतृतीयं ज्ञानान्तरंस्वीकर्त्तव्यम् , एवंतृतीयज्ञानगतसंशयादिकेजातेतद्वारणायचतुर्थज्ञानान्तरम् । एवमेवपञ्चमषष्ठादिज्ञानान्तरानुसरणेज्ञानप्रवाहोनकुत्रचिन्निवर्तेत । तथा च विषयान्तरसञ्चारसुषुप्त्यभावमोक्षोच्छेदभयाच्चक्वचिद्ज्ञानधारायाःविश्रामे, यदनन्तरं न ज्ञानान्तरंजातंतस्यज्ञानस्याप्रमाणिकत्वमेवभवेत्, तस्यान्तिमस्यतथात्वेउपान्त्यस्याप्रमाणिकत्वंस्यादितिक्रमेणप्रथमज्ञानपर्यन्तसर्वज्ञानस्याप्रामाणिकत्वे नकापिव्यवस्थाव्यवस्थिताभवेत् ।

नचानवस्थास्वीकारोपिक्षेमाय, अनवस्थायास्त्रिदोषग्रस्तत्वात् । तथोक्तम् "प्राग्लोपा विनिगम्यत्वप्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्यात्रिदोषता । अग्रिमाग्रिमज्ञान स्वीकारे प्रथमप्रथमस्यविलोपःप्रथमज्ञानकार्यस्यद्वितीयादिज्ञानेनैवसंपादनादितिपूर्वपूर्वतरस्यादर्शनमेव भवेत् । एवंप्रथमस्यद्वितीयादेः प्रामाणिकत्वमितिविनिगमनायांप्रमाणाभावादविनिगम्यत्वमपिदोषः । तथापिप्रवाहस्वीकारेप्रमाणाभावो नहिभवतिकस्यचिदपिघटादिज्ञानान्तरमनन्तज्ञानानामनुभवः । तथा च यथोक्तानवस्थादिदोषदर्शिनांघटानुभवानन्तरंघटानुभवविषयकज्ञानान्तरेचासतियुगपत् घटघटानुभवयोर्यत्स्मरणंजायते, तत्स्मरणंप्रकाशमन्तरेण नसंभवति, अप्रकाशितार्थस्यस्मरणानुपपत्तिरेवसंविददूरत्व लक्षणप्रकाशस्योपपादकंभवतीति । यथादिवाऽभुञ्जानस्यपिनत्वं रात्रिभोजनस्योपपादकंभवति । यया वा घटादीनांप्रमितिश्चक्षुरादिप्रमाणस्योपपादकंभवति । प्रमाणमन्तरेणप्रमितेरुत्थानासंभवादिति संक्षेपः ।

एवञ्चसंविददूरत्वस्यैवप्रकाशरूपत्वव्यवस्थित्याचैतन्यसम्बन्धविषयकविकल्पोनिरस्तः । नैरन्तर्यपदवोध्यसत्यन्तसामीप्यमेवसंयोगः । स एव संयोगोन्यायमतेसमवायेतिकथ्यते इतिसंयोगादर्थान्तरत्वंसमवायस्यनास्तीत्यग्रेप्रदर्शयिष्यते ज्ञानादूरत्वनिमित्तकोव्यवहारोपपादकतालक्षणो वा परः प्रकाशः ।

इतःपूर्वंचैतन्यस्यसंयोगःप्रकाशःस्तत्समवायो वा प्रकाशःसम्वन्धमात्रं वा प्रकाशः ? तत्र न प्रथमश्चैतन्यस्यगुणत्वेनसंयोगाभावात् "द्रव्ययोरेवसंयोगः" इतिनियमात् । नवाद्वितीयः, आत्मेतरस्यप्रकाशाभावापातात् । नवातृतीयः, चक्षुरादिकरणस्यापितथात्वापातादेवंप्रकारकविकल्पेन प्रकाशार्थंप्रतिरोधितवान् । ततःसंविददूरत्वस्यैवप्रकाशपदार्थत्वंनिर्णीतोवा निर्णीतवान् । एवञ्चप्रकाश विषयकोयोवादिनोविकल्पः चैतन्यसंयोगोवातत्समवायो वा, तत्सम्बन्धमात्रंवातत्सर्वंसिकताकूपवदेव विदीर्णमितिदर्शयितुमुपक्रमते **एवंचसंविददूरत्वस्यैवप्रकाशरूपत्व** इत्यादि । अर्थात् यदासंविद दूरत्वमेवप्रकाशपदार्थंनिर्णीतवान् तदानकस्यापिविकल्पस्यावसरोभवतीतिभावः ।

ननुयदिदंनैरन्तर्यं तस्यैवसंयोगसमवायवायुरूपत्वेनतद्भेदोपजीविकल्पोनतरांघटते, इत्येतद्दर्शयितुमाह **नैरन्तर्यपदबोध्यम्** इत्यादि । अत्रेदंवोध्यम्, संविददूरत्वंनामसंविन्नैरन्तर्यंमेव । तच्च संविन्नैरन्तर्यंसंविदिसंवित्विपयार्थेसंविदाश्रयत्वादिषु तुल्यरूपेणैववर्तते । तत्रायुतसिद्धयोरपृथक्सिद्धयोर्यन्नैरन्तर्यं तदेवसंयोगसम्बन्धवाच्यंभवति, तथाऽयुतसिद्धयोर्गुणगुणिनोः क्रियातद्वतोर्यन्नैरन्तर्यंतदेवसमवायपदवाच्यंभवति । अस्यैवनैरन्तर्यस्य न्यायविदः समवायनामेतिवदन्ति । तथास्वस्यैवस्वापेक्षायाऽभेदपदवाच्यतापिभवतिं । एवञ्च "प्रकाशते" इत्यात्रांशद्वयम् काशधातुः 'ते' इतिप्रत्ययश्च, तत्रकाशेतिप्रकृत्यर्थोज्ञानम्संविद्वा, नैरन्तर्यं चाख्यातार्थः ततश्चसंविदोनैरन्तर्यं "प्रकाशते"इतिसमुदितस्यार्थोनिष्पद्यते । अत्रप्रकाशपदेनकस्यकथं वा स्वरूपमितिविपर्येसिद्धान्तपक्षेवक्ति **ज्ञानादूरत्वनिमित्तक** इत्यादि । यथास्फीतालोकवर्त्तिचक्षुःसंनिकर्षेजातेघटःप्रकाशते, इतिव्यवहारःसार्वलौकिकोभवति, तथैवशास्त्रजनितज्ञानेनप्रकाशतेश्रीरामइति व्यवहारदर्शनंजायतेइतिस्वभावः सचज्ञानादूरत्वनिमित्तोव्यवहारोदयानुगुणलक्षण एव ज्ञानज्ञेयज्ञातृषु समानएवेतिभावः ।

अथैवमपि व्यवहारबलादेवव्यवहारक्षमत्वस्य ज्ञातुंशक्यत्वेनव्यवहारोत्तरकाले एव प्रकाश प्रतीतिस्यान्नतुव्यवहारात् पूर्वप्रकाशप्रवृत्तिः स्यादितिचेत्सत्यम्, घटादिप्रमेयेषुज्ञानसम्बन्धस्यनैरन्तर्य रूपस्यज्ञानेनैवप्रतीतिसंभवेन ज्ञानस्य च व्यवहारयोग्यतालक्षणकारणत्वव्याप्यत्वानुसंधानात्, तत्कालेव्यवहारमन्तरेणापि व्यवहारयोग्यतायाज्ञातुंशक्यत्वात् तत्कालेतत्रफलोपहितत्वरूपकारणत्वस्यघटादौ वर्तमानदण्डादिवदभावेपि, वनीयदण्डेतत्कालेकारणत्वाभावेपि, यथाकारणतावच्छेदकदण्डत्ववत्वस्य तदानिमपिविद्यमानत्वेनयोग्यताकारणत्वस्याक्षतत्ववदिहापितथैवनिर्वाहोवक्तव्य एवेतिभावः ।

सचविद्यमानेपिस्वकीयनिमित्तकारणसाकल्येप्रतिबन्धाद् योग्यत्वाभावाद्वाव्यापकत्वासङ्गित्वाद्यात्मकधर्मान्तरेषु तथा करणकलेवरादौ च न जायते, चक्षुरादिसम्बद्धेपिकालिन्दीजलेरूपरसादिवत् ॥

"सत्यम्ज्ञानम्" इत्यादिश्रुत्यापूर्वोक्तयुक्त्या च स्वतश्चैतन्यशरीरेज्ञानस्वभावकएवात्मा ।

"ततोज्ञानस्वरूपात्मा विभुज्ञानं च तद्गुणः । 'ज्ञानस्वरूपमत्यन्तंनिर्मलंपरमार्थतः ॥
एवंविष्णुपुराणेहि ज्ञानस्वरूतात्मनः । 'मन्ताबोद्धे'तिप्रामाण्याज्ज्ञाताजीवोबुधैर्मतः ।

अथज्ञानसम्बन्धादेव घटाद्यर्थस्यप्रकाशोभवतीति यदिस्वीक्रियते,तदाचक्षुरिन्द्रियजनितसम्बन्धस्ययोग्यरसस्पर्शादिगुणेऽपिसंभवेन, तथामनोजनितज्ञानसन्निकर्षस्यात्मवत् तदीयपरिमाणेपिसत्वात् , तेनतेन च तस्यतस्यप्रकाशःस्यादित्याशङ्कायामाह **सचविद्यमानेपि** इत्यादि । स्वनिमित्ताविक्येन प्रतिबन्धात् तत्रप्रतिबन्धःप्रबलगुणान्तरेणाभिभावः । यथाहनिसूर्यतीक्ष्णप्रभाभिरभिभूतेनक्षत्रमण्डलं सत्यपिस्वपुष्कलकारणेनैवदृश्यते, अभिभावकस्यागमेतुनदेवग्रहादिमण्डलं दृष्टंभवति । अभिभवेनाग्रहे, उदाहरणंदर्शितंयमुनाजलम् , तद्गतंरूपादिकंचस्वभावतोजलस्याभास्वरशुक्लमेवपरन्तुतदीयशौक्लस्यजलान्तर्गततलमलेनाभिभवादग्रहोजायते । अयोग्यतयाऽग्रहेयमुनाजलसमवेतरसस्य चक्षुषाग्रहणंनभवति, रसस्यचक्षुरयोग्यत्वात् । यथा वा वन्ध्यापुत्रादेश्चक्षुषाग्रहेऽयोग्यत्वमेवकारणंभवति । सामग्रीसद्भवेपिकस्यचिदिन्द्रियादिनाऽग्रहोऽभिभवादेवभवति । एवमतिदूरातिसामिप्यादिकमपिस्वकारणेविद्यमानेपिंतदीयग्रहाभावेप्रयोजकंभवतीतिं तदन्यत्रद्रष्टव्यम् । अयोग्यवस्तुनोऽग्रहणेपुष्कलकारणाभावएवप्रयोजकोभवति तत्कारणस्यैवाभवादिति । प्रचुरदुःखादिनाप्रचुरतमोयोगेन वा स्वल्पसुखादेःस्वापे, विद्यमानेपिज्ञानस्याभिभवादेवाग्रहोभवति, अयोग्यत्वादेवात्मपरिमाणादेर्ग्रहोमनसा नभवतीतिदिक् ।

॥ इतिसंविदद्दूरप्रयुक्तव्यहारानुगुणस्य प्रकाशपदार्थत्वोपसंहारप्रकरणेतत्त्वदीपः ॥

समतीतप्रकरणेनप्रसङ्गागतप्रकाशपदार्थस्यविचारःकृतः । सम्प्रतिविषयघटानांज्ञानकालेएवात्मनोज्ञानाधीनप्रकाशइतिमीमांसकवादस्यनिराकरणाय पूर्वंयत्समर्थितमात्मनोज्ञानस्वभावत्वं स्वेतरानधीनप्रकाशत्वं च तदुपसंहर्तुमाह **सत्यंज्ञानमित्यादि** यस्मात् कारणात् ज्ञानज्ञेयज्ञातृसाधारणस्य प्रकाशस्यश्रुतियुक्त्यादिकारणेननिर्वचनंसंभवति, तस्मात् कारणात् , आत्मास्वाधीनप्रकाशःसिद्धः । सचात्माज्ञानस्वभावकएव, नत्वात्मनआगन्तुकंकरणादिजनितंज्ञानम् । चक्षुरादिबाह्याभ्यन्तरकरणद्वाराबहिर्निर्गतधर्मभूतज्ञानादेवार्थान्तरस्य घटादेरभ्यन्तरस्यसुखादेश्च प्रकाशकोभवति । स्वयंतुस्वप्रकाशरूपत्वात् स्वतःसिद्धोनतुपराधीनप्रकाशोभवति ।

'ज्ञोऽतएवे'ति सूत्रं हि ततोव्यासेनसूत्रितम् । 'विज्ञानंयज्ञंतनुते'ज्ञानोक्तिश्चेतियाऽऽत्मनः ।
विज्ञानगुणसारत्वात्सूत्रे सा प्राज्ञवन् मता ।'' (श्रीबोधायनमतादर्शे८९६–८९९)

इत्याचार्योक्तेः । स च स्वभिन्नपदार्थंचक्षुरादिकरणेननिर्गतज्ञानेनावभासयति ।

यत्तुज्ञानमागन्तुकमात्मधर्मत्वात्सुखदुःखादिवदित्यनुमानेनात्मधर्मभूतं ज्ञानमनि-

अयमाशयःनहिघटादिकः कश्चिदपिपदार्थःस्वकीयप्रकाशायसाधारणासाधारणसजातीयपदार्थान्तरसापेक्षोभवति, नहिघटःस्वप्रकाशायघटान्तरमपेक्षतेकिन्तु स्वविजातीयंप्रदीपादिकमेवापेक्षते । एवंप्रदीपादीनामालोकोपिस्वप्रकाशाय नसूर्याद्यालोकान्तरमपेक्षमाणोभवति, नवाप्रदीपालोकप्रकाशं घटादिकमपेक्षते, अर्थात् स्वप्रकाश्यंघटादिकं स्वसजातीयमालोकान्तरमपेक्षते, किन्तुप्रदीपादीनामालोकः स्वविजातीयंचक्षुरादिकरणमेवापेक्षते । एवमेव चक्षुरादिकरणं न स्वसजातियमिन्द्रियान्तरंस्वापेक्ष प्रकाशमालोकंघटंवाऽपेक्षतेकिन्तु स्वविजातीयंज्ञानमेवापेक्षते । एवंज्ञानमपिज्ञानान्तरंस्वाधीनसिद्धिकमिन्द्रियादिकंवानापेक्षतेस्वसिद्धये, किंन्तुज्ञानंस्वसिद्धयेस्वविजातीयं स्वाश्रयभूतंकर्तृत्वात् स्वतन्त्रमात्मानमेवकेवलमपेक्षते । एवमात्माप्यात्मत्वेनसजातीयमात्मान्तरंस्वाधीनसिद्धिकंज्ञानमिन्द्रियादिकं वा स्वसिद्धयेनापेक्षते । इत्येवंरूपेणानन्यापेक्षत्वादात्मस्वरूपस्यसिद्धिर्भवति । तदुक्तमभियुक्तैः सर्वतीर्थदृशांसिद्धिःस्वाभिप्रेतस्यवस्तुनः । यदभ्युपगमबलात्तत्सिद्धिःकेनवार्यते ॥ इति ।

एवंप्रकारेण ज्ञानवेद्यत्वमात्मनोनिरस्यतस्यस्वयंप्रकाशत्वं

"स्वस्मैस्वयंप्रकाशः स ज्ञानवत्ता च तत्राह । 'एतद्योवेत्ति' गीतायां 'जानाम्येव' श्रुतौतथा ॥
'ज्ञोऽतएवेतिसूत्रेऽपिज्ञातृताचात्मनोमता । 'विज्ञानात्मेतिवेदोक्तेरात्मनोज्ञानरूपता ॥"

(श्रौतप्रमेयचन्द्रिका ५/१४–१५) इत्यादि श्रुतियुक्त्यादिभिः समर्थितम् ।

अथैवंस्वरूपस्यात्मनो न साक्षादेवविषयप्रकाशकत्वमपितु स्वात्म धर्मभूतज्ञानद्वारेणैवविषयादिप्रकाशकत्वंभवति । तच्चधर्मभूतज्ञानमात्मनः स्वाभाविकमेवनतु परोपाधिकत्वेनागन्तुकमित्यर्थः । ततश्चचित् चैतन्यस्वभावस्यात्मनः स्वयंप्रकाशरूपस्यधर्मभूतंज्ञानम् तद्रूपमेव । न चैवमात्मभावानुबन्धित्वात् ज्ञानस्ययावदात्मभावित्वेमध्येघटज्ञानंजातंतत्पूर्ववर्तिपटादिज्ञानं च विनष्टमित्यादिज्ञानगतोत्पादविनाशप्रतीतिर्व्यवहारश्चकथंसमर्थनीय इतिवाच्यम्, इन्द्रियादिद्वारेण तत्तदर्थसंपृक्तज्ञानमेवघटादिज्ञानम् , तत्रसंसर्गस्यानित्यत्वेनतद्विशिष्टज्ञानेपि तथाप्रतीतिव्यवहारोपपादन संभवेनादोषात् ।

अथात्मबोधस्य स्वभाविकत्वंनतुजन्यत्वमितिगतप्रकरणेस्थापितवान् आत्मनोहिबोधो न स्वाभाविकोऽपितु ज्ञानस्यात्ममनःसंयोगजनिततयाऽगन्तुकत्वमनित्यत्वमेवेतिसुखादिवत् इतिसिद्धान्तं प्रतिपक्षतयाकेनचिद् व्यवस्थापितम्, तन्मतमिहानुद्यप्रतिक्षेप्तुंदर्शयति **यत्तुज्ञानमागन्तुकमित्यादि** । इदमीयमूलानुमाने, ज्ञानंबोधापरपर्यायंपक्षःआगन्तुकत्वं कारणजन्यत्वंसाध्यम्, आत्मधर्मत्वात् , इति

त्यमेवेतिकथितम् । तन्न युक्तम्, ज्ञानस्वरूपापरिज्ञानात् । यतःस्वरूपोपाधिकोधर्मो यावदाश्रयभावी एव भवतीतिनियमःसुखादिकंनात्मनः स्वरूपोपाधिकःबोधस्त्वात्मनः स्वरूपोपाधिक एव अतोयावदाश्रयभावित्वंतत्स्वभावः । वोधोपाधिरात्मस्वभावो यथा हेतुः सुखवदित्युदाहरणम् , यथासुखदुःखादौ, आत्मधर्मत्वमस्तीतितत्रागन्तुकत्वमपिविद्यतेएवेति यथोक्त साध्यहेत्वोःसहचारात् व्याप्तिसिद्धौतद्बलेनवोधेआगन्तुकमयत्नसिद्धमेवभवति । वन्हिव्याप्तधूमात्पर्वते-वन्हिसाधनवदिति प्रश्नकर्तुराशयोन्यायमतानुसारेणेति । स्वसिद्धान्तमनुसृत्यतन्मतेगजनिमीलिकामादधान सिद्धान्तीप्रतिक्षिपति **ज्ञानस्वरूपापरिज्ञानादिति** । गुणस्वभावस्यापरिज्ञानादिति, तत्रकीदृशोगुण स्वभावइत्याकाक्षायामाह, **स्वरूपोपाधिकोधर्मोयावदाश्रयभावीत्यादि** । तत्रस्वरूपोपाधित्वं नामस्वरूपनिरूपकत्वमेव, तथाच स्वरूपनिरूपकधर्माणां यावदाश्रयभावित्वंस्वभावः । यथावायोरनुष्णाशीतस्पर्शवत्वम् । एवञ्चस्वरूपनिरूपकधर्माणामेव यावदाश्रयभावित्वंस्वभावः । येचनस्वरूपक धर्मास्तेनयावदाश्रयभाविस्वभावकाः यथाजलेऔष्ण्यःकिन्तुतेतुपरोपाधिका आगन्तुकाएवकथ्यन्ते ।

अत्रवोधस्यैवैतादृशःस्वभावो नतुसुखादीनामिति तेसुखादयआगन्तुकाएवेति । **वोधोपाधिरात्मस्वभावोयथाभवतीत्यादि,** वोधउपाधिर्यस्यसवोधोपाधिरिति वहुव्रीहिसमासः । अर्थात्, ज्ञानाभिन्नस्वरूपनिरूपधर्मवानात्मपदार्थः । ज्ञानवत्वेनैवसर्वदोपलभ्यमानत्वं युक्त्यावोधोपाधित्वमात्मनः समर्थितम् । रूपरसादिविषयसंन्निकर्षस्य कदाचित्कत्वेनतादृशप्रमेयोपरक्तवोधस्यकादाचित्कत्वप्रतितेर्जायमानत्वेपिस्वतज्ञानस्वरूपंतु नित्यमेव । अर्थात् विषयसवन्धोऽनित्यो भवन्नपिज्ञानंतु स्वरूपतोनित्यमेवनागन्तुकंकदाचिदपि भवतीतिभावः ।

ननु यद्यपिज्ञानमात्मस्वभावकमित्यत्रश्रुत्यादिप्रमाणमेवदर्शयिष्यते, तेनैवज्ञानस्यात्मस्वभावत्वमायास्यत्येवेतितत्रवृथाकण्ठशोषणेनानेकप्रकारकयुक्तितर्कादिप्रदर्शनेन, तथापि प्रकृतप्रकरणस्ययुक्तितर्कप्रधानतयायुक्तिरेवविशेषतःप्रदर्शितेतिभावः । अनेनज्ञानस्यागन्तुकत्वानुमाने ‘स्वरूपनिरूपकधर्मभिन्नत्वमुपाधिरित्यपिकथितं भवति । साध्यव्यापकत्वेसतिसाधनाव्यापकत्वमुपाधेर्लक्षणम् । यथाऽयोगोलकपक्षेवन्हिनाधूमानुमाने, आर्द्रेन्धनसंयोगउपाधिर्भवति, तत्रयत्रयत्रमहानसादौधूमस्तत्रसर्वत्रार्द्रेन्धनसंयोगोभवत्येवेतिधूमव्यापकत्वमार्द्रेन्धनसंयोगस्य, यत्रालोकेहेतुर्वन्हिस्तिष्ठतितत्रनार्द्रेन्धनसंयोगो विद्यते, इतिसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वात्, तत्रार्द्रेन्धनसंयोगउपाधिर्भवति । उपाधिव्यभिचारात् हेतौसाध्यव्यभिचारानुमानं भवति “वन्हिधूमव्यभिचारी, धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् । पक्षेउपाध्यभावात्साध्याभावानुमानमेवोपाधेः फलमिति । प्रकृते **ज्ञानम् आगन्तुकम्, आत्मधर्मत्वादि**त्यनुमानेस्वरूपनिरूपकधर्मभिन्नत्वमुपाधिर्भवति, यत्रयत्रागन्तुकत्वरूपसाध्यंविद्यते, घटादौ, तत्रसर्वत्रस्वरूपनिरूपकधर्मभिन्नत्वमपिविद्यते इति, उपाधेः साध्यव्यापकत्वं यत्र च बोधे, आमधर्मत्वंविद्यतेहेतुस्तत्रस्वरूपकधर्मभिन्नत्वंनास्ति, ज्ञानस्यात्मस्वरूपनिरूपकधर्मत्वादिति

भवति तयोपपादितम् । सुखादिकंतुनात्मधर्मः इन्द्रियजनितानुकूलप्रतिकूलज्ञानयोरेवसुखदुःखस्वरूपतयादृष्टान्तस्य हेतुरहितत्वात् । रागद्वेषादयोऽपिमनसएवावस्थाविशेषरूपानत्वात्मधर्माः ।

साध्याव्यापकत्वात् , साधनाव्यापकत्वाच्चस्वरूपनिरूपकधर्मभिन्नत्वमुपाधिर्भवतीतिसोपाधिकत्वादागन्तुकत्वानुमानंव्याप्यत्वासिद्धमितिनानेनानुमानेनज्ञानेआगन्तुकत्वंसिद्ध्यतीतिभावः ।

अथात्रसुखादिदृष्टान्तेस्वरूपासिद्धरूपहेत्वाभासत्वंदर्शयति, यत्रपक्षेहेतुर्नभवत्यपितुहेतोरभावो भवति, तत्रस्वरूपासिद्धिदोषस्यावसरः, यथाह्रदोवन्हिमान्धूमादित्यत्रपक्षेह्रदेधूमो न भवत्यपितुधूमाभाव एव, तत्रधूमाभाववान् ह्रद इति निश्चयकाले, वह्निव्याप्यधूमवान् ह्रद इत्याकारकपरामर्शाभावेनानुमितिर्नभवतिपरामर्शरूपकारणाभावादिति । परामर्शप्रतिबन्धोऽस्यदूषकताबीजम् । इत्थं च ज्ञानमागन्तुकमात्मधर्मत्वात्सुखवदितिप्रयोगेसुखदुःखादिदृष्टान्तेआत्मधर्मत्वहेतुरेवनास्ति, यतः सुखादेरात्मवृत्तित्वाभावादितिदर्शयितुमाह **सुखादिकम्** इत्यादि । यदनुकूलत्वप्रकारकंप्रतिकूलत्वप्रकारकं च ज्ञानं तदेवक्रमशःसुखरूपं दुःखरूपं चैतत् श्रीरामानन्दाचार्यदर्शने, एवं च सुखादीनांज्ञानाभिन्नानां पक्षे एवान्तर्भावान्नदृष्टान्तत्वंसंभवति, पक्षभिन्नस्यसाध्यसाधनसहचारप्रापकस्यैवदृष्टान्तत्वामितिनियमात् । ज्ञानविशेषातिरिक्ते च सुखदुःखेकरणपटुत्वापटुत्वरूपेएव । एवञ्चकरणपटुत्वापटुत्वेचनात्मधर्मरूपेइतिहेत्वसिद्धिर्दृष्टान्तेभवत्येवेतिभावः । एवमत्रानुमानेनिदर्शनस्यसाधनवैकल्पदोषोपिंभवतीतिप्रदर्शयिष्यते । ननु भवतुसुखादिकंप्रकृतानुमाननिदर्शनंतथापिरागद्वेषादयस्तु आत्मधर्मरूपेणैवप्रसिद्धा इतितेषामेवदृष्टान्ततास्यात् । यतोरागादयआत्मविशेषगुणास्ते चागन्तुकाअपीत्याशङ्कायामाह **रागद्वेषादयइत्यादि** । नैतेरागादयआत्मनोधर्माकिन्तुमनसएवविकाररूपा, अतोनरागादीनां दृष्टान्तत्वं संभवतीति ।

ननु यदि रागादयोनात्मधर्माः किन्तुमनोविकारत्वात्मनसएवतेरागादयोधर्मास्तदाऽन्यधर्मत्वाद्रागादीनामात्मनि कथं प्रतीतिः स्यात् , नहि अन्यधर्मास्तदन्यत्रप्रतीताभवन्ति, नहिं जलधर्माणां वन्हौवन्हिधर्माणां वावायोगगनेवाप्रतीतिर्भवति । इहतुरागवानहमस्मीतिप्रतीत्याऽत्मन्येवरागादेःप्रतीतिदर्शनादितिचेत्सत्यम् यथाऽयसिस्वभावतोदाहकत्वाभावेपि, बाह्यवन्हिधर्मदाहत्वादेःवन्हिसम्बद्धस्थाल्यादावपिप्रतीतिर्भवति, अयोदहतिस्थाल्यादिर्वादहतीतिप्रतीतिस्तथैवरागविशिष्टमनसोविलक्षणसम्बन्धादात्मन्यपिरागादेःप्रतीतिमात्रंजायते । यथावा रज्जौसर्पत्वभ्रमवनोभयकंपादिर्भवतीति दृश्यते तथा प्रकृतेपिमनोधर्मस्यकथञ्चिदात्मनिसंक्रमणात् , रागवानहमस्मीतिप्रतीतिमात्रं भवति, नतु सत्येयं प्रतीतिः । अन्यधर्मस्यान्यत्रसंक्रमणेन तत्कार्यंतदन्यत्रापिप्रतीयते, यथोक्तम्—

“रविरपितादृग् न दहति यादृग्दहति वालुकानिकः । अन्यस्माल्लब्धधनोनीचःप्रायेणदुःसहोभवतीति ॥

तस्माद्रागादीनांनात्मधर्मत्वमपितुप्रकृतिधर्मत्वमेवेति । तथाचोक्तं पुराणादौ—

"कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति" श्रुतेः । "इच्छाद्वेषःसुखंदुःखमिति" गीतास्मृतिं । एवं चेतनांधृतिरित्यादिनाक्षेत्रलक्षणमेतेषांप्रतिपादितम् । चेतनयाधारितःसंघातोदेहः स्ववृत्त्यनुगुणचैतन्यमात्रेणैवप्रवर्तमानं

"निर्वाणमयएवायमात्माज्ञानमयोऽमलः । दुःखाज्ञानमलाधर्माःप्रकृतेस्तेनचात्मनः ।।" इति ।

[अस्यार्थःअयमात्माऽहमस्मीतिप्रतीतिप्रतीतः, आचमनुष्यलोकादारम्यःआचदेवर्षिपर्यन्तःसर्वोपि जीवराशिःशरीरकरणादिभिन्नतयावगतः "निर्वाणमय एव"तत्र निर्वाणोमोक्षस्तन्मय एव, अर्थात् सर्वदामुक्त एव, संसारसम्बन्धःप्रतीतिमात्रमेव, तथा ज्ञानमयोज्ञानप्रचुरोज्ञानरूपो वा, अमलः संसारप्रापकधर्माधर्मादिलक्षणमलविवर्जित एव, वन्हिधर्मस्यौष्ण्यस्यजलेप्रतीतिमात्रवत्, इहाप्यन्यधर्माणां तत्र प्रतिभासमात्रत्वात् । न च तर्हिदुःखदीनांकुत्रावस्थानं तत्राह "दुःखज्ञानमलाः" इत्यादि, यदिदंसर्वकारणमज्ञानम्, मलोधर्माधर्मादिःतत्सर्वप्रकृतेसत्वादिगुणस्यैवधर्मोनत्वात्मनःआत्मनःस्फटिकवत्सर्वदानिर्मलत्वात् ।] रागादयोहिनात्मनोधर्माअपितुमनसएवतेधर्मा, अस्मिन्नर्थेश्रुतिमुदारहति **कामः सङ्कल्पः** इति । तत्र कमुकान्तौकान्तिरत्रेच्छारूपैव, तथा च कमुधातुनिष्पन्नकामपदस्येच्छैवार्थःसचकामोमनसएवधर्मःकार्यम् । तथा "संकल्पइदमित्थंकरिष्येइत्येवंरूपःसोपिमनोधर्म एव । "विचिकित्सा संशयएकस्मिन् धर्मिणिविरुद्धभावाभावप्रकारकज्ञानरूपःसोपिमनोधर्म एव । "श्रद्धा" गुरूपदिष्टवेदान्तादिषुविश्वासस्वरूपातदभावोऽश्रद्धा, 'धृतिर्धैर्यम्, तदभावोऽधृतिरधैर्यरूपा । ह्रीर्लज्जाधीधर्मभूतंज्ञानमन्तःकरणवृत्तिरूपंवा । भीर्भयम्, बिभेमीतिग्राह्यम् । एतदुपयुक्तंसर्वंमन एव, मनःस्वरूपमेवकार्यकारणयोरभेदोपचारात्, अथवा एतेकामान्ताःसर्वेपिमनसएवविकाराः । एवमत्रार्थेभगवद्वचनमपिप्रमाणंदर्शयति **इच्छाद्वेषः सुखं दुःखंसङ्घातश्चेतनाधृतिः । एतत्क्षेत्रंसमासेन सविकारमुदाहृतम्**इतिक्षेत्रलक्षणं कथितम् । क्षेत्राश्रितत्वादन्तःकरणस्येति अन्तःकरणधर्मारागादयःक्षेत्र धर्मतयाकथिताः । ननु प्रकृतेचेतनाधृतिरित्यपि कथितमितिचेतनादिक्षेत्रधर्मएवनात्मधर्मइतिचेन्न, चेतनाधृतिरितिपदद्वयाभावादपित्वेकमेव पदम्, चेतनेनचेतनया आसमन्तात् धृतिर्यस्येतिचेतनाधार्यंनियमतः कलेवरमितिशरीरलक्षणमुक्तमत्र, अर्थात् स्ववृत्त्यनुगुणचैतन्यमात्रेणैव प्रवर्तमानं क्षेत्रम् । तत्रवृत्तिःसत्ताप्रवृत्तिर्वा, प्रवर्तमानमर्थात्, प्रकर्षेणवर्तमानंप्रवृत्तिमद्वा । एवञ्च, आत्मचैतन्यप्रयोज्यस्वसत्ताप्रवृत्तिकंयद्भवति तदेवषाट्कौशिकशरीरस्यनिर्दुष्टंलक्षणंफलितंभवतीति । अथवाचेष्टाश्रयत्वम्शरीरत्वम्, तत्रहिताहितप्राप्तिपरिहारातुलाक्रियैवचेष्टेति । आध्यात्मिकवायुसम्बन्धित्वमेवतत् । नतुकरचणादिमत्वंशरीरत्वम्, करचरणादिरहितजीवविशेषशरीरेवनस्पत्यादिशरीरे च तदभावेनाव्याप्ति प्रसंगात्, विषयेन्द्रियभिन्नत्वेसत्युपभोगसाधनत्वंशरीरत्वम् अत्राचार्यपादस्तु "यस्यप्राणःशरीरम्" इतिश्रुत्याप्राणस्यशरीरत्वनिर्देशादाधेयत्वविधेयत्वाङ्गत्वादयस्तस्मिन्फलन्ति । लोकेऽपिशरीर पदेनाधेयत्वादयएवगृह्यन्तेइतितान्येवशरीरपदबोध्यानि" (आनन्दभाष्यम् १/२/२) इति । एतादृश

शरीरादिकंक्षेत्रमिति । अतएवबृहदारण्यकेऽन्तर्यामिब्राह्मणे "यस्यपृथिवीशरीरम्" "यस्यापःशरीरम्" "यस्यात्माशरीरम्" इत्यादिकथितम् । "जगत्सर्वंशरीरंते" इति

शरीरलक्षणमभिप्रेत्यैवपृथिव्यादीनांपरमात्मशरीरपरकत्वमित्याशयेनवचनमपिपठति,**अतएवबृहदारण्यकस्यान्तर्यामिब्राह्मणे "यस्यपृथिवीशरीरम्" यस्यापःशरीरम् " यस्यात्माशरीरमिति** । अस्यार्थः पृथिवी=प्राणिमात्रस्याधारभूताः यस्यपरमात्मनःसर्वेश्वरश्रीरामस्यसर्वनियामकस्यशरीरंवपुःशरीरंप्रकारः प्रकारि च परमात्मेत्यर्थः । एवंजलंजीवात्मा च यस्यसर्वनियामकस्यशरीरंभवति । उपलक्षणमेतत् , सूक्ष्मस्थूलजडचेतनमात्रस्य,यदुक्तंभगवतः शरीरतयायच्चनोक्तंतत्सर्वमेवभगवतःशरीरम् यथासूत्रेविलक्षण संयोगेनानेकप्रकारकवन्यावन्यपुष्पाणि ओतानिप्रोतानि च भवन्ति यदभावेतानिनान्यत्रभवन्तिमालाकारेण प्रतिष्ठितानि तथैवपरमेश्वरलतायांपृथिव्यादिसूक्ष्मस्थूलसाधारणजडजीववस्तूनिओतानिप्रोतानि चापृथग्भावेनव्यवस्थितानि, तमन्तरेण न स्वसत्तावन्तिभवन्ति । तदुक्तंभगवता "मयिसर्वमिदंप्रोतं सूत्रेमणिगणाइवेति ।

तदत्रार्थचन्द्रिकायामस्मत्परमगुरुचरणाजगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्यवेदान्तकेसरिणः— "सर्वंस्थावरजङ्गमात्मकंब्रह्मादिस्तम्बपर्यन्तमिदंकार्यकारणोभयवस्थंमच्छरीरतयानिर्देश्यंजगत्सूत्रेमणिगणाइवान्तर्यामिरूपेणसर्वदाऽवस्थितेमयिप्रोतंमामन्तर्यामिणंव्याप्याऽवस्थितम् । इयमात्मशरीरतयाऽवस्थितिश्च "यस्मपृथिवीशरीरम्" "यस्यात्माशरीरम्" "जगत्सर्वंशरीरं ते स्थैर्यंते वसुधातलम्" (श्रीरा.यु) इत्यादिश्रुतिस्मृतिषुस्पष्टमेवोपवर्णिता ।

न चैवं भगवतःसर्वोपादानत्वेविकारित्वदोषापत्तौनिर्विकारत्वाभिधायिनीनां श्रुतीनांव्यापकोप इति व्याच्यम् , विलक्षणाश्रयाश्रयिभावोपगमेप्रोक्तदोषानवकाशात् । यथा शरीरन्तरवस्थितंजीवंशरीरेन्द्रियगतखर्वदीर्घान्धवधिरत्वादयोदोषा न स्पृशन्ति नैवैवमन्तर्बहिर्विलक्षणाधारतथावस्थितंपरमात्मानमपितदाश्रमिणोश्चिदचितोर्दोषा इति सर्वशक्तिसमन्वितोमहापुरुषोनित्यनिरवद्यादोषगन्धोदिव्यकल्याणगुणगणार्णवएवावतिष्ठते । प्रतिपादयतश्चेममर्थंपरमार्षेसूत्रे "न स्थानतोऽपिपरस्योभयलिङ्गंसर्वत्रहि" (ब्र. सू. ३।२।११) "आत्मनिचैवंविचित्राश्चहि" (ब्र. सू. ३।१।२९) इत्याभ्यांसूत्राभ्यामुमयलिङ्गत्ववैशिष्टयं स्पष्टमुपपाद्यते ।

एवं सर्वशक्तियोगाऽप्यस्य "परस्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच" (श्वे.) यथाभगवतोदिव्यमङ्गलविग्रहोऽनादिरनन्तोदेशतःकालतोवस्तुतश्चापरिच्छिन्नस्तद्वदेवस्वेच्छयासर्वारम्भसामर्थ्यमपिशाश्वतिकमेवविद्यतेऽतः श्रुतौस्वाभाविकीत्युच्यते नहिकस्यचित्स्वभावःकादाचित्कोदृष्टचरस्तदाहुः सूत्रकृतः "सर्वोपेता च तद्दर्शनात् " (२।१।३१) इति । एतेनकृत्स्नप्रसक्त्यादयो दोषा अपिपरिहृताभवन्ति । परिमितशक्तिमतोजीवस्यैव तथाऽऽशङ्कासम्भवेन्नत्वपरिमितशक्तिमति

परमार्षयचनम् तथैव पुराणेपि "तानि सर्वाणितद्वपुरिति" ।

अथ "कामःसंकल्पः" इत्यादिश्रुतौयत् धीरितिपठितंतत् किमिदम् ? तस्योत्प्रेक्षामात्राभिप्रायकत्वात् , नतुज्ञप्तिविषयकंधीरितिपदम् , बुद्धेःस्वाभाविकत्वस्यनित्यत्वस्य श्रुतावेव श्रुतत्वात् । "न विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते" "नहिद्रष्टुर्दृष्टेर्विपरि-
महापुरुषेइत्येतत्सर्वमत्रसूत्रदृष्टान्तेन'मयिप्रोत'मितिसहेतुकवदोपन्यासेन च संगृहीतंभवतीतिसम्प्रदायरहस्यवेदिनः" इति ।

तथाऽस्मिन्नर्थेपुराणवचनमपिप्रमाणयति**तानिसर्वाणितद्वपुः**इति । अयमर्थःयानि जड़चेतनानिदृश्यन्तेशास्त्रेणचावगम्यन्तेतानिसर्वाण्यपि सर्वजगदुपादानभूतसत्यसंङ्कल्पस्यसर्वज्ञस्यपरमात्मनःसीताजानेर्वपुः शरीरमेवनतुततोऽन्यतिरिक्तंवस्तुवन्ध्यादिवदेवोपलभ्यते एवञ्चभगवत्सङ्कल्पात्मकज्ञानेनैवलब्धस्वरूपस्थितिप्रवृत्तिकत्वात्सर्वपदार्थजातस्यभगवतःशरीरत्वमेवानौपचारिकरूपेणेतिसंक्षेपः ।

ननुयथामनसोऽवस्थाविशेषरूपत्वात् रागादयोनात्मगुणाः, यथावा कामसंकल्पादीनांमनोधर्मत्वान्नात्मविशेषगुणाः किन्तु मनोधर्माभवन्तोपि, यथाऽग्नेरौष्ण्यंवह्निसंसक्तस्थाल्यादावपिप्रतीयन्ते, तत्तस्यतत्रप्रतीतिमात्रं नतु स्थाल्यादिधर्मत्वमेवमत्र "कामःसंकल्प" इत्यादिश्रुतौधीपदवाच्यवोधोपिपठितइतिवोधोपिमनसःएव स्वाभाविकइति न वोधोपि आत्मधर्मोऽपितुमनसएवेत्याशयेनशङ्कते **अथकामःसंकल्प इत्यादिश्रुतौयत्धीरितिपठितम्** इत्यादि । तत्रवोधस्यापिमनोधर्मतयाकथनात् मनोधर्मत्वमेवबुद्धेस्ततोबोधस्यकथमात्मधर्मत्वमितिप्रश्नकर्तुराशयः । उत्तरयति **तस्योत्प्रेक्षामात्राभिप्रायकत्वादिति** । कामःसंकल्पइतिश्रतिघटकधीतिपदम् नज्ञप्तिपरकमपितु, उत्पेक्षामात्रपरकम्, तत्रचित्तान्तःकारणवृत्तिविशयेपूत्प्रेक्षैव धीरितिकथ्यते, नतुधीपदेनवोधस्यग्रहणम् । यद्यपिकामादीनामप्यात्मधर्मत्वंमतम्, तथापिनैताकामादय आत्मा नःस्वाभाविकानित्याधर्माभवन्ति किन्तुशुभाशुभकर्माद्युपाधिकाएव । कामादितत्तद्बुद्धिवृत्तिहेतुव्यापारवत्तया च मनसस्तैःसहाभेदनिर्देशःसचौपचारिकः श्रुतौकृतइतिसिद्धांन्तः । ननुतथान्यवस्थातिविशेषविशिष्टस्यज्ञानस्यैवरागादिस्वरूपतयाज्ञानस्य कादाचित्कत्वानुमानेऽर्थाज्ज्ञानस्यानित्यत्वानुमाने, रागादेर्दृष्टान्तत्वं न संभवति । न च विशिष्टदृष्टोन्तद्वारेणज्ञानमात्रस्यैवागन्तुकत्वंसाध्यमितिवाच्यं । अवस्थाविशेषविशिष्टस्यैवोपलभ्यमानत्वेन, अविशिष्टेज्ञानमात्रे आगन्तुकत्वस्यनित्यत्वस्यसाधनायोगात् तस्यज्ञानस्यश्रुतिसिद्धत्वे च तद्गतंनित्यत्वमपिश्रुतिवचनसिद्धमेवेतिधर्मिग्राहकमानवाधोभवति । असतोऽवस्थायोगस्य चाभावादेवज्ञाननित्यत्वस्वीकारएवश्रेयानिति,अभिप्रायः ततो यथाश्रुतंतुप्रौढिवादमात्रेणकथितमितिभावः ।

आत्मधर्मज्ञानस्यनित्यत्वंतुश्रुत्यैवावेदयति, तामेवदर्शयति "**श्रुतावेव** इति । श्रुत्यक्षरंपठति **नहिविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते** अत्रविज्ञातृत्वदृष्टित्वावस्थावतोज्ञानस्वरूपस्यनित्यत्वंकथितम् ,

लोपोविद्यते अविनाशित्वादिति च । आत्मनोज्ञातुर्विनाशाभावादेवतदीयज्ञानस्याविनाशाभावंकथयन्ती श्रुतिर्ज्ञातुःस्वरूपप्रयुक्तंज्ञानमितिवत् । न च दृष्टिविशेषणत्वेन द्रष्टुरुपादानमितिवाच्यम्, तथा सतिपुलिङ्गप्रयोगविरोधात् । हेतोःसाध्यसमत्वापत्तेः । द्रष्टुःस्वरूपनिर्देशपरत्वेपिदृष्टिपदस्यासमाधेयमहेतुत्वम्, स्वपक्षहानिरपिवादिनः । आत्मनस्तुज्ञातुर्नित्यत्वंनैवास्वीकरणीयमनेकन्यायागमसिद्धत्वादितितस्यहेतुतयाकथनंयुक्तमेव ।

अर्थात् ज्ञातुरात्मनोविज्ञातेर्धर्मभूतज्ञानस्यविपरिलोपोविनाशो न विद्यतेऽपितुधर्मिवत्तद्धर्मस्याप्यविनाशित्वंनित्यत्वमेवेति । नचात्र, "विपरिलोपोनविद्यते" इत्यत्रविनाशाभावएवकथितोनतुअनाद्यनन्तत्वं ज्ञानस्यकथितमितिवाच्यम्, भावानवबोधात्=धर्मिणोज्ञातुरात्मनोऽविनाशित्वकथनादेवज्ञानस्याविनाशं दर्शयन्तीयंश्रुतिःज्ञातुरात्मनःस्वरूपप्रयुक्तंज्ञानमित्येवंप्रदर्शयतीति । ज्ञानस्यस्वरूपनिरूपकधर्मत्वेन नित्यात्मस्वरूपंप्रयुक्तज्ञानस्यध्वंसप्रतियोगित्वनिराकरणवत् प्रागभावस्याप्रतियोगित्वस्यापिनिराकरणे नानाद्यनन्तरूपपुरातनत्वस्यापि, अर्थवशादेवोपपादनान्नकोपिदोष इति । एतस्मिन्नर्थेश्रुत्यन्तरमपि दर्शयति **नहि द्रष्टुर्दृष्टेर्विपरिलोपोऽविद्यंतेअविनाशित्वादेवेति** । तत्र द्रष्टुरात्मनोधर्मभूत दृष्टेर्ज्ञानस्यविनाशोध्वंसप्रतियोगित्वं न भवति । ज्ञानस्यविनाशो न भवतीति तत्रकोहेतुस्तत्राह श्रुतावेव "अविनाशित्वात्" एवञ्चज्ञानस्यस्वरूपनिरूपकधर्मत्वेननित्यात्मस्वरूनप्रयुक्तस्यतस्यज्ञानस्यानाद्यनन्तत्वमर्थत एव फलितं भवति । जन्मनालब्धसत्ताकस्यैवभावस्यविनाशदर्शनेन, आत्मनस्तदीय ज्ञानस्यजन्माद्यभावेनार्थत एव नित्यत्वमर्थादुत्पादविनाशराहित्यमायातीति । तदुक्तम् "अजो नित्यं, शाश्वतोयमिति, स्मृतेः । ननु श्रुतौ द्रष्टुर्दृष्टेरित्यत्रद्रष्टुदृष्ट्योःषष्ठीनिर्देशो दृश्यते, षष्ठी च "राहोः शिर" इतिवत् समानाधिकरण्येपि भवतीति न द्रष्टृदृष्टयोर्भेदः किन्तु दृष्टिविशेषणत्वमेवेतिशङ्कांनिराकर्तुमाह **न च दृष्टिविशेषणत्वेनद्रष्टुरिति** ।

कथं न तयोरभेदस्तत्रदोषं वक्ति **पुलिङ्गप्रयोगविरोधादिति** । अर्थात् यदि अभेदसम्बन्धेन दृष्टिविशेषणत्वं द्रष्टृपदस्याभिमतंभवेत्, तदा द्रष्टुरितिपुल्लिङ्गनिर्देशो न स्यादपितु द्रष्ट्र्या, इत्येवं रूपेणस्त्रीलिङ्गस्यैवनिर्देशःकृतोभवेत्, नतु तथानिर्देशोदृश्यते तस्मान्न तथा । किन्तु देवदत्तस्य कंबल इतिवदिहापिद्रष्ट्रद्रष्ट्र्योर्भेद एव षष्ठीनत्वभेदे । अपिच व्याकरणमतेनशाब्दविरोधंदर्शयित्वा, अर्थविरोधमपिदर्शयितुमाह **हेतोः साध्यसमत्वापत्तेः** । पर्वतोवन्हिमान् वन्हेरित्यत्रहेतोर्वन्हेःसाध्यसमत्वम्, अर्थात्, गृहीतव्याप्तिकहेतुनाऽनुमानादनन्तरमेवसाध्यसिद्ध्यति, नतु ततःसाध्यंसिद्धम् । तथा च साधनावस्थायांसाध्याभिन्नत्वंतदासाध्यवद्हेतुरप्यसिद्धएवेतिकथमसिद्धेन हेतुनासाध्यंसिद्ध्येत । निश्चितहेतुरूपत्वेसाध्यस्यतदापक्षधर्मतासमयेएवहेत्वभिन्नसाध्यस्यसिद्ध्याहेतु द्वारापक्षेसाध्यसाधनप्रयासोनिरर्थकएवस्यादिति । साध्यसमत्वंहेतोरसिद्धत्वमेव । सर्वकालवर्तमानत्व स्वरूपनित्यत्वात्मकसाध्यवदेवाविनाशित्वलक्षणहेतोरनुमानात्पूर्वकालेऽसिद्धिरेवेत्यर्थः । अथवा अविना-

नहि पदार्थेविद्यमानेतदीयस्वरूपोपाधिर्नभवतीति । सुवर्णपीतिमावत्, प्रदीपप्रभावद्वाततश्चआत्मनः स्वरूपभूतचैतन्यस्यबाह्याभ्यन्तरविषयविशेषसम्बन्धप्रकारप्राप्तदृष्टिघ्रातिरसयतिवक्तिश्रुतिमतिस्पृष्टिविज्ञातिव्यवहारभेदभिन्नस्वप्रकाशस्यसंसारेमोक्षे च न कदाचिदपिविपरिलोपोविनाशो न विद्यते नैव भवतीति ।

शित्वस्यैवसाध्यरूपतयातस्यैववन्हिमान् वन्हेरितिवत् हेतुत्वं न संभवेदिति । द्रष्टुःस्वरूपनिर्देशपरत्वे तुदृष्टिपदस्यासमाधेयमहेतुत्वम्, अत्राक्षरयोजनासमयेदृष्टपदंभावप्रधाननिर्देशपरकंदृष्टित्वंदर्शनमिति यावत्, ज्ञानत्वेनसहायोगव्यवच्छेदोद्रष्टुरात्मनःसाध्यः । अत्रचाप्रयोजकत्वादेवहेतोरहेतुत्वमर्थात्, असाधकत्वस्यसमाधानं न भवतीति । प्रश्नकर्तुःस्वपक्षहानिरपिदोषोभवति । आत्मनोज्ञानरूपत्वस्वीकारेआगन्तुकज्ञानवादिनामपसिद्धान्तापातात् । ततश्च—

“हन्यतांहन्यतांबालोनानेनार्थोऽस्तिजीवता । स्वपक्षहानिकर्तृत्वाद्यःकुलाङ्गारतांगतः ॥ इतिन्यायविषयतांनातिक्रामतीतिकेवलाद्वैतिमते “नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते” इतिश्रुत्यर्थेदूषणंभवतीतिव्यञ्जितम् । यथाहि, ज्ञातुरात्मनोज्ञानोभिन्नत्वेसाध्येव्यधिकरणासिद्धत्वेनात्मगतनित्यत्वस्यनहेतुःसाध्यहेत्वोर्भिन्नाधिकरणकत्वात् । ज्ञातुरहमर्थस्यात्मत्वाविनाशित्वोपगमेतुस्वसिद्धान्तबाधः । यतस्तन्मतेशुक्तिरजतवत् मायिकत्वस्यस्वीकारेणशुक्तिरजतवदेवबाधितत्वेनानित्यत्वात् ।

आत्मनस्तुज्ञातुरनेकागमसिद्धमित्याह **नहिपदार्थे** इत्यादि । आत्मनोज्ञातुर्नित्यत्वं न केवलंयुक्तिसिद्धम्, अपितुआगमप्रमाणेनापितत्सिद्ध्यत्येवेति । यावत् कालं पदार्थो भवति विद्यते तावत्कालंतदीयधर्मोऽप्यनुभूयमानोभवत्येव, यथाऽग्नेरौष्ण्यंप्रदीपादीनांप्रभा च, तथैव यावदात्मातावत्कालंतत्स्वरूपोपाधिधर्मोज्ञानंभवत्येवेति । तत्रात्मनोनित्यत्वमविनाशित्वादेवेतिकथितम् । द्रष्टुरित्येवंरूपेणधर्मिणआत्मनोधर्मिणोनिर्देशेनात्मस्वरूपनिरूपकधर्मत्वंज्ञानस्यसिद्धंभवति । एवञ्चफलितहेतुस्वरूपंदर्शयति **आत्मनःस्वरूपभूतचैतन्यस्येत्यादि**, एतावतानित्यात्मस्वभावत्वंहेतुरिति । तत्र विषयविशेषःसम्बन्धप्रकार=चक्षुरादिबाह्याभ्यन्तरेन्द्रियादिद्वारकप्रसारणभेदाधीनंज्ञानार्थसम्बन्धः, तेन सम्बन्धेनप्राप्तोदर्शनादिव्यवहारोयेनेतिसमासः । तत्र दृष्टिर्दर्शनंचक्षुरिन्द्रियजनितंचाक्षुषंप्रत्यक्षात्मकज्ञानम् । घ्रातिर्घ्राणेन्द्रियजनितंगन्धादिविषयकंज्ञानंप्रात्यक्षिकमेवरसयतिनेन्द्रियजनितंषड्भेदभिन्नमधुरादिविषयकंरासनंज्ञानम् । वक्तिःशाब्दंज्ञानम्, पदज्ञानकरणपदार्थस्मरणद्वारकंजायमानंशाब्दबोधात्मकंज्ञानंपरोक्षम् । श्रुतिरितिश्रोत्रेन्द्रियजनितंशब्दविषयकंश्रावणंप्रत्यक्षम् मतिरितिव्याप्तिज्ञानकरणकपरामर्शद्वारकंपरोक्षमनुमित्यात्मकंज्ञानम् । स्पृष्टिःत्वगिन्द्रियजनितम् शीतोष्णाऽदिभेदभिन्नस्पर्शविषयकंत्वाचप्रत्यक्षम् । विज्ञाति “आत्मनमुपासीत”इत्यादिश्रुतिसिद्धमुपासनात्मकंध्यानापरपर्यायंज्ञानम् । अथवा योगाभ्यासजनितोयोगजधर्मसहकृतोऽलौकिकसंनिकर्षजनितः साक्षात्कारः । तत्र योगीयुक्तयुञ्जानभेदेनद्विप्रकारको भवति । तत्र युक्तस्यसर्वदायोगजधर्मसहकृत-

“सयथासैन्वघनोऽनन्तरोऽवाह्यःकृत्स्नोरसघन एव, एवं वा अरे अयमात्माअनन्तरोऽबाह्यःकृत्स्नःप्रज्ञानघनः” तथा स्वेनभासास्वेनज्योतिषा” आत्मज्योतिः सम्राड़िति होवाचयाज्ञवल्क्यः” इति । तथा मोक्षकाले एव छन्दोगाः “न परमाण्वादिविषयकंज्ञानमध्यक्षरूपमेव भवति । युञ्जानस्यतुचिन्तासहकृतमनसासर्वविषयकंज्ञानंजायते । यत्रेदमुक्तम् “सोऽपश्यत् प्रणिधानेनसन्ततेःस्तंभकारणमिति । स्वमात्मावभासकस्यार्थात् स्वप्रकाशरूपस्य । यथाधर्मभूतमात्मनोज्ञानम् परानवभासयति तथैवस्वरूपमपिभासयतिस्वयंप्रकाशत्वात्, प्रदीपालोकवदिति । यथोक्तविशेषणविशिष्टात्मधर्मभूतज्ञानस्यसंसारावस्थायांमोक्षावस्थायां वा, कदाचिदपिविपरिलोपोन भवति, अर्थादेशादशज्ञानस्यविनाशो न भवति उत्पादविनाशराहित्येनैकान्तनित्यत्वात् ।

“तथाहेयगुणध्वंसादवबोधादयोगुणाः । प्रकाश्यन्ते न जायन्तेनित्याएवात्मनोहिते”
सुषुप्त्यादिकसंसिद्धिस्तमोविशेषसन्निधेः । उत्पन्नंचाथनष्टं च व्यवहारेमतेःखलु ॥
संकोचाख्याविकासाख्यावस्थाभ्यांसंभवेदिह । संकोचश्चविकासश्चसर्पकुण्डलवन्मतः ॥
संकोचोऽस्येन्द्रियद्वारावद्धएवाहकर्मणा । विकाशश्चेन्द्रियेणाथज्ञानस्यप्रसृतौमतः ॥

(श्रौतप्रमेयचन्द्रिका ३/६–७–८ -९) इत्याद्याचार्यप्रवरकारिकास्वारस्यात् घटज्ञानंजातंपटज्ञानंविनष्टमित्यादिप्रतीतिस्तुविषयतत्सम्वन्धयोरुत्पादविनाशविषयकत्वेनैवतथाप्रतीतिमात्रंभवति, स्वभावतस्तुज्ञानेसर्वथानित्यत्वमेवेतिसंक्षेपः ।

नकेवलमात्मनोधर्मभूतज्ञानस्यनित्यत्वे “न विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते” इत्यादिश्रुतिरेव प्रमाणम्, किन्तुधर्मभूतज्ञानस्यनित्यत्वेन्या अपिश्रुतयःप्रमाणमितितामेवोदाहरति **सयथासैन्धवघनः** इत्यादि । अनन्तरइत्यस्यबाह्यइत्यर्थः । अवाह्यइति, आन्तरश्च, प्रदेशःसामस्त्येनविवक्षितः । आत्मनःकृत्स्नत्वं च स्वरूपतोधर्मादपिभवति एवञ्चज्ञानस्वरूपत्वंज्ञानेस्वभावत्वंचात्मनः सार्वदिकमेवेतिलब्धंभवति, एतस्मिन्नर्थे श्रुत्यन्तरमपिप्रमाणंभवति तदपिदर्शयति **स्वेनभासास्वेनज्योतिषा** इति । अत्र ‘स्वेनभासा” इत्यनेनविशेषणेनात्मनःस्वरूपततः “स्वेनज्योतिषा” इत्यनेनतुधर्मत आत्मनःप्रकाशरूपत्वंकथितंभवति “आत्मज्योतिःसम्राडितियाज्ञवल्क्यः प्रोवाचेत्यस्यापि, स्वरूतोधर्मतश्चात्माप्रकाशात्मकएवेत्यर्थः । यथासूर्यादयोहियथाप्रकाशरूपाश्च तथैवात्मापिप्रकाशरूपःप्रकाशधर्माचयथासूर्यादिज्योतिषःप्रकाशः स्वाभाविकोनतुतदन्योपाधिकस्फटिकमणेनैल्यादिवत्, तथैवात्मनोज्योतिःस्वरूपंज्ञानंस्वाभाविकमेव, नतुन्यायमतवन्मनः संयोगकारणमित्येवार्थोविवक्षित आसांश्रुतीनाम् ।

न्यायमते आत्मविशेषगुणानांनवानामत्यन्तोच्छेदएवमोक्षइति नियमेनतन्मतेमोक्षेनज्ञानस्यतदासत्वंनवाज्ञानरूपत्वमात्मनः' स्वरूपविनाशस्यासंभवादिति परोपाधिकमेवज्ञानंयावत्संसारमेवानुवर्तते इतिमतंनिरसितुमात्मवदात्मधर्मभूतज्ञानमपिनित्यमेवेत्यतोमोक्षकालेपि ज्ञानानुवर्तनंभवत्येवेतिदर्शयितु-

पश्योमृत्युंपश्यति न रोगंनोतदुःखताम् । सर्वं हपश्यःपश्यतिनोपजनं स्मरन्" इति । "सवा एष एतेनदैवेन चक्षुषामनसैतान् कामान् पश्यन् रमते" इति च ।

एतदतिरिक्ताअपि "जानात्येवायंपुरुषः, ज्ञातव्यंतुनवेद" इत्यादिकावाह्याभ्यन्तरकरणानांविरामकालेपिआत्मनोज्ञानंकथयन्त्यः श्रुतयःज्ञानस्वभावतामात्मनोनिर्णयन्ति । पुराणेपि "निर्वाणमय एवायमात्माज्ञानमयोऽमलः" इत्यादि । महाभारतेपि "ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते" इति । शौनकोप्याह—

माह **मोक्षकाले** इत्यादि । अर्थात् मोक्षेपिज्ञानस्यानुवर्तनंभवतीत्यत्र न केवलंतर्कएवशरणमपितु श्रुतिरपि प्रतिपादयतीतितांश्रुतिंदर्शयति **नपश्योमृत्युंपश्यति** अयमर्थः पश्यति=चक्षुरादिकरणेन विजानातीति पश्योजीवः सचमृत्युंविनाशंनपश्यति, नवारोगमृत्युप्रतियोजकं वातपित्तादिजनितंव्याधिंपश्यति । सर्वं वा सजीवःपश्यतीत्याद्यर्थः । एतावतास्वस्वरूपाकाराविर्भावलक्षणमोक्षेज्ञानस्यानुवर्तमानत्वेन ज्ञानस्यात्म स्वभावानुवन्धित्वंप्रसिद्ध्यत्येवेत्याशयः । यथामोक्षकालेज्ञानानुवर्तनंतथैव सुषुप्तावपिज्ञानानुवर्तनंभवतीति तदर्थिकांश्रुतिमाहतदन्याअपिश्रुतयः **सवाएषएतेनदैवेनचक्षुषामनसैतान्कामान्पश्यन् रमते** एवं **जानात्येवायंपुरुषःज्ञातव्यंतुनवेद** इत्यादि, यद्यपिज्ञानस्वभावत्वादात्मासर्वं सर्वदाविजानात्येव इति । तथापिसुषुप्तौविद्यमानस्यापिज्ञानस्य सकलकरणस्योपरमात् , अर्थसन्निकर्षाभावात् स्वापकालेऽर्थ प्रकाशो न भवति । अत्रज्ञानाभावादर्थप्रकाशो न भवतीति न किन्तुज्ञानप्रयोजकेन्द्रियार्थसन्निकर्षाणामभावेनप्रकाशोनभवतीतिश्रुतीनामभिप्रायः ।

पुराणेपीत्थमेवप्रतिपादयति **निर्वाणमयएवायमात्माज्ञानमयोऽमलः** इतिज्ञानस्यनित्यत्वे आत्मस्वभावत्वेवैष्णवपुराणवचनम् । यद्यपिमृन्मयोघटइत्यादिप्रयोगानुसारेण विकारार्थकोपिमयट् प्रत्ययः "तत्प्रकृतिवचनेमयडितिव्याकरणानुसारात् , तथापियवमयोयज्ञइत्यादिवचनेनप्राचुर्यार्थेपि मयटोविधानदर्शनात् , अत्रप्राचुर्यार्थकोमयट्अतएवपुराणवचने "अमल" इतिविशेषणमपिसार्थकम् । अन्यथामयटोविकारार्थकत्वे, आत्मनोज्ञानविकाररूपत्वेऽमलत्वस्यसर्वथैवनैरर्थक्यमापतेत् । न चेष्टापत्तिः ? वैष्णवकल्पेवैष्णवपुराणस्यैव प्रमाणिकत्वस्यव्यवस्थापनेनतस्याप्रामाणिकत्वंनैववक्तुंशक्नोति कश्चिदपि, मयडर्थकविशेषचर्चाश्रीआनन्दभाष्यानन्दमयाधिकरणीयश्रीयोगिराजीयेमदीयेविवरणेचानुसन्धेयेतिदिक् । **ज्योतिषामपितज्ज्योति**रित्यादि, वचनंमहाभारतान्तर्गतभगवद्गीतावाक्यमेव । "अस्तमितेआदित्येऽस्तमितेचद्रेऽस्तमिते ग्रहनक्षत्रेकिंज्योतिरयंपुरुष" इयादिप्रश्नप्रतिवचनप्रवाहेसर्वान्ते आत्मनएवज्योतिः स्वभावकत्वस्यनिर्णीतत्वेनतदीयप्रकरणस्यैवेतिहासेनस्मारितत्वादिति ।

आत्मनोधर्मभूतज्ञानस्यनित्यत्वे श्रीविष्णुधर्मवचनमपिप्रमाणतयोपदेष्टुमाह **शौनकोप्याह, यथानक्रियतेज्योत्स्ना** इत्यादि । यथामणेर्मलप्रक्षालनेनमलापनयनेनमणेर्ज्योत्स्नाप्रकाशःकृतोन भवति, प्रत्युतमणिगतस्वभाविकप्रकासस्यदोषवशात्तिरोहितस्य दोषापनयनेनप्रकाशआविर्भवति, नतु-

“यथा न क्रियतेज्योत्स्नामलप्रक्षालनान्मणेः । दोषप्रहाणान्नज्ञानमात्मनः क्रियते तथा।।
यथोद्पानकरणात् क्रियतेनजलांवरम् । सदेवक्रियतेव्यक्तिमसतःसंभवःकुतः ।।
तथाहेयगुणध्वंसादवबोधादयोगुणाः । प्रकाश्यन्ते न जन्यन्तेनित्याएवात्मनोहिते ।।इति।
तथा च भगवान् सूत्रकारोवादरयणो “ज्ञोऽत एव” इति ।

तदित्थमात्मनःस्वभावरूपस्यचैतन्यस्य [ज्ञानस्यात्मधर्मभूतस्य] विषयसम्बन्ध विशेषनित्तचयसंययादिव्यवहारभेदोभवति । अथवा तत्तद्विषयवर्तिचैतन्येवानिश्चयादि व्यवहारभेदोभवतीति । तत्र चैतन्यस्यज्ञानविषयेणदृढसंयोग एव निश्चयः । चैतन्यत्पादितोभवति, तथैवात्मनोज्ञानमात्मनिस्थितमपि दोषेणावृत्तंभवदपिदोषापनयनादाविर्भूतंभवतीतिप्रथमवाक्यस्यार्थः । **यथोदपानकरणादित्यादि** यथोदपानस्यजलाशयस्यकरणेनजलगताकाशस्यकरणंन भवति, यतोयत् सत् तस्यैवाविर्भावोभवति, नत्वसतआविर्भावोभवतीति नहिकारणशतेनापिवन्ध्यापुत्राविर्भवति । एवमेवआत्मनोयेवोधादिकागुणास्ते आत्मनिष्ठ,हेयगुणानांविनाशादेव संसारेमोक्षे च प्रकाशिताभवन्ति, ते वोधादयआत्मनोनित्याः स्वाभाविकाएव, नतुतेऽवबोधादयकारणशतेनापिउत्पादिता भवन्तीतिसमुदितवचनस्यार्थः ।

अस्मिन्नर्थेसूत्रकारस्यवचनमपिप्रमाणयति **ज्ञोऽतएवेति** । अतःश्रुतिप्रमाणादेवात्माज्ञःअर्थात् ज्ञाताज्ञानाधिकरणएवसूत्रार्थः । ज्ञएवेत्यनेननित्यत्वमात्मस्वभावत्वं ज्ञानस्यास्तीतिसूत्रकाराभिप्रायः आत्मधर्मभूतज्ञानस्यनित्यत्वे, स्वापादिदशायामपिज्ञानस्यप्रत्यक्षंकुतोनभवतीत्याशङ्कायाम् “पुंस्त्वादिवत्” इतिसूत्रान्तरेणतत्परिहारंकृतवान्सूत्रकारः । तथा सूत्रकाराभिप्रायंजानद्भिर्जगद्गुरुश्रीरामानन्दचार्यैर्विस्तरेणाशङ्क्यसर्वञ्चनिराकृतं तत् सर्वं तद्भाष्यादेवागन्तव्यमस्मच्छ्रीगुरुचरणप्रसादितभाष्यदीपतो मदीयविवरणतोवेतिंदिक् ।

।। इति धर्मभूतज्ञाननित्यत्वस्यश्रुत्यादिभिः प्रतिष्ठापनप्रकरणेतत्त्वदीपः ।।

अवैथं चैतन्यज्ञानस्यात्मनोधर्मभूतस्यनित्यत्वेएकरूपत्वेच, इयंप्रमाऽप्रमा च अयं, संशयो विपर्ययोनिश्चयश्चेत्यवान्तरव्यवहारस्तन्त्रान्तरप्रसिद्धोभवन्मतेकथमुपपादितो भवेदित्याशङ्कांसमाधातुमुपक्रमते **तदित्थमात्मनःस्वभावरूपस्येत्यादि** अयमाशयोयथातोयदविमुक्तंजलं स्वभावतएकविधमपितत्तद्भूभागमासाद्यमधुरादिभेदभिन्नमिवभवति,उपाधेराधारस्यभेदात् ,तथैवआत्मधर्मभूतंचैतन्यमेकंनित्यंभवदपि, अर्थसम्बन्धात्मकपरोपाधिभेदात् , अनुभवरूपंस्मृत्यात्मकंप्रमाऽप्रमानिश्चयसंशयविपर्ययादिपदंलभते, तावतातस्यस्वाभाविकत्वेकिमपिवैलक्षण्यंनायातीति । तदेवंसंशयादिभेद प्रकारमुपपादयति, **आत्मन**ःस्वभावरूपचैतन्यस्येत्यादि, तत्रात्मधर्मभूतचैतन्यस्यविषयसम्बन्धविशेषेजाते तत्रैवानिश्चयादिव्यवहारभेदोजायते, अथवाऽर्थविशेषसंभवति चैतन्येनिश्चयादिव्यवहारभेदो भवतीति । तत्रज्ञानस्यघटादिप्रमेयेण सह यः खलुदृढतरसंयोगस्तस्यनिश्चयइतिपरिभाषाभवति ।

स्यैवानेकैःसहयुगपदद्दढसंयोगःसंशयपदवाच्यो भवति । अनुभववासनानुसारंणविषय सम्बन्धस्तस्यैवस्मरणमितिनामभवति तथा चात्मधर्मसंयोगोज्ञानमिति न चैवंद्विष्ठत्वेनो भयाश्रितत्वात्, घटादिप्रमेयस्यस्वभावजडस्यापिज्ञातृत्वमापद्येतेतिवाच्यम्, विषयेणसंयोगा भावात् । चैतन्येनसहैवतस्यसंयोगोबाह्यप्रकाशवत् । यथाऽलोकसंयोगेपिप्रकाशेसवितुरेव प्रकाशकत्वं नतु घटादेर्विषयस्यतथात्वम् । अथसूर्याद्यधीनत्वादालोकस्य स एव तद्धर्मातत्सम्बन्धेनार्थान्तरस्यप्रकाशकइत्युच्यते एवमिहापितर्हिचैतन्यस्य=ज्ञानस्यात्मधर्मत्वेन

तस्यैवचैतन्यस्यानेकैर्विषयैः सहयुगपत् झटितिनैरन्तर्येणवा, जायमानोयोऽद्दढसंयोगःसचसंयोगः स संशयः । ज्ञानवासनानुसारेण यः सम्बन्धविशेषस्तस्यस्मरणमितिनाम । अथवाऽनुभवजनितसंस्कार जंज्ञानंस्मरणम् । चैतन्यार्थसम्बन्धविशेषः । अथवाप्रमेयसम्बन्धविशेषविशिष्टं चैतन्यमेवनिश्चयादि व्यवहारभाग्भवतीति ।

तत्रप्रथमपक्षेआत्मवत् घटादिप्रमेयस्यापिआत्मत्वंज्ञातृत्वंस्यादितिशङ्कते, **नचैवमिति** । संयोगोहिद्विष्ठत्वादनेकाश्रितत्वमितिचित्यर्थसंयोगोयथाचित्यात्मनितथैव विषयाश्रितोपीत्यात्मनोयथासंयोगवत्वाद्ज्ञातृत्वंभवतीतितथेष्टंतथैवतादृक् संयोगस्यविषयैः सहापिसंभवाद्विपयस्याज्ञातृत्वंस्यात् । चैतन्यस्यज्ञातृत्वप्रसङ्गेकदाचित् कश्चिदिष्टापत्तिंकुर्यात् धर्मधर्मिणोस्तादात्म्यस्वीकारात्, अतोविषये ज्ञातृत्वापत्तिमवोचत् । विषयस्य=विषयाश्रयस्य । यथाश्रुतेआत्मनोपितत्तद्ज्ञानाश्रयत्वं न स्यात्, अस्मिन्पक्षे। अतःस्वाश्रयाश्रयत्वसम्बन्धेन ज्ञानवत्वमेवज्ञातृत्वमत्रपक्षेवक्तव्यमिति विषयेघटादौनज्ञातृत्व प्रसङ्गोभवतीति ।

अमुंदोषंपरिहर्तुमाह **विषयेणसंयोगाभावादित्यादि** विषयेण इत्यत्रतृतीया हेत्वर्थिकादण्डेनघटइतिवत्, विषयशब्दश्चनविषयबोधकोऽपितु विषयव्यापारबोधकः । अयमाशयःघटादि प्रमेयग्रहणार्थंव्याप्रियमाणंचैतन्यमेवभवति, अर्थादात्मधर्मभूतेनज्ञानेनसंयोगादिव्यापारयुक्तेनप्रमेयोहि प्रकाशितोभवतीति । एवञ्चविपयचैतन्यसंयोगस्यघटादितत्तदर्थज्ञानरूपत्वेपि तस्यसंयोगस्यस्वानुकूल व्याप्तिमच्चैतन्याश्रयत्वसम्बन्धेनात्मरूपज्ञातर्येवसत्वात्तस्यैव ज्ञातृत्वमात्मत्वंभवतिनतुघटादिरूपार्थान्तस्योपलंभबलाद्व्यवस्थापितंभवति । अत्रार्थेदृष्टान्तंदर्शयति **यथेत्यादि** यथाघटाद्यर्थसंयोगस्यैव प्रकाशस्यसत्यपि प्रकाशरूपत्वेप्रकाशकत्वंतुसूर्यादेरेवस्वधर्मभूतालोकप्रसरणबलात् नतुसंयोगस्यार्थ निष्ठत्वेपिप्रमेयस्यप्रकाशकत्वमित्यनुभवात्, तथैवप्रकृतेसंयोगात्मकचैतन्यस्यार्थनिष्ठत्वेपि चैतन्यस्यैव प्रकाशकत्वंनत्वर्थस्यप्रकाशकत्वम् ।

यद्वा "विषयेणसंयोगाभावादि" त्यस्यविषयानुयोगिकसंयोगाभावादित्यर्थः । तस्यसंयोगोऽर्थात् विषयप्रतियोगिकःसंयोगः । संयोगस्यद्विष्ठत्वात्, एकप्रतियोगिकोऽपरानुयोगिकःयस्यसंयोगः सतत्प्रतियोगिकोयस्मिंश्चसंयोगःसतदनुयोगिकः, यथावृक्षेपतत्रीविशतीत्यत्रपक्षिणःसंयोग, इतितत्र

तेनपदार्थान्तरेणसंयोगवद् भवन् स एव जानातीतिव्यवह्रियते । तत्सिद्धंज्ञानस्वभावक एवायमात्मा आत्मानंजानान एव भवति, इतरत्तुनिमित्तकारणभेदानुगुण्येनजानाति-नवेति ।

पक्षिणिसंयोगप्रतियोगित्वमितिपक्षिणिसंयोगःप्रतियोगितासम्बन्धेन भवति । पक्षिणोऽधिकरणंवृक्षइति संयोगोऽनुयोगितासम्बन्धेनवृक्षेतिष्ठतीतिपतत्रिणःप्रतियोगिमनुयोगित्वं च वृक्षस्य । एवञ्चससंयोगःप्रति-योगितयापक्षिणि, अनुयोगितयावृक्षे । तथैवप्रकृतेआलोकःप्रतियोगितयाविषयेअनुयोगितयाऽलोकाधि-करणेसूर्ये ततश्चाऽनुयोगिसएवसूर्यःप्रकाशकइत्युच्यते, यत्रार्थेप्रतियोगितयविषयेइतिविषयःप्रकाश्यःप्रमे-यइतिकथ्येत इत्येवंप्रकाशकप्रकाश्यस्य च भेदो भवतीतिभावः । एवं ज्ञानस्यानुयोगीआत्मेतिसज्ञाते-तिगीयतविषयश्चप्रतियोगिइतिसज्ञेयोऽर्थोभवति । नतुसंयोगाश्रयत्वेसत्यपिज्ञातासइति । चैतन्यस्यविषय सम्बन्धविशेषएवज्ञानमिति, व्यवहारस्तदानिश्चयादिभेदःकथमितिजिज्ञासायाम् "चैतन्यस्यविषयेण सहदृढतरसंयोगोयत्रसनिश्चयादिरितिप्रथमंपक्षमुपपाद्य "तत्तदर्थसम्बद्धंचैतन्यमेवतत्तदर्थविषयकंज्ञान-मित्याकारकद्वितीयपक्षशङ्कांसमाधानद्वारेणव्यवस्थापयितुमुपक्रमते **अथ सूर्याद्यधीनत्वादालोक-स्येत्यादि** यथाऽलोकस्यसूर्याद्यधीनत्वमर्थात् सूर्याद्यधीनस्वरूपस्थितिप्रवृत्तिनिमित्तकत्वंसूर्याद्यपृथक् सिद्धविशेषणत्वं च रूपादेर्घटाद्यपृथक्सिद्धविशेषणत्वम्, इतिं सूर्यादिरेवालोकधर्मो भवति । इति तत्तदर्थसम्बद्धालोकाश्रयसूर्यस्यैवप्रकाशकत्वं न त्वर्थस्यप्रकाशकत्वम् तेनैवप्रकारेणप्रकृतेतत्तद्घटाद्यर्थ सम्बद्धचैतन्याश्रयस्यात्मनएवज्ञातृत्वंभवति, नतु पूर्वकल्पवत्, अर्थस्यज्ञातृत्वमिति । तस्माद् द्वितीय पक्ष एव मुख्यःपक्षःयतोऽत्रपक्षेज्ञातृत्वंसाक्षादात्मन्येवसुसंगतंभवतीतिभावः ।

इतः पूर्वमुक्तंयदनन्यसाधनआत्माप्रकाशयतीति । तत्रानन्याधीनसिद्धित्वंचैतन्यस्वभावत्वं चात्मनउपसंहरति **तत्सिद्धंज्ञानस्वभावकएवायमात्माऽत्मानंजानानएवभवतीति** । तदेतत् सिद्धंयदयमात्माचैतन्यंधर्मभूतज्ञानम्, तत्स्वभावकोऽर्थात् ज्ञातृत्वस्वभावक एव, स्वकीयंस्वरूपंजान-न्नेव, नतु परापेक्षःस्वरूपंविजानातीति । एतावताज्ञानस्यागन्तुकत्वमर्थात् कारणाधीनतयाघटादि वदनित्यत्वनिराकरणं भवति । सर्वोपिस्वर्गमोक्षव्यवस्थाऽर्थमात्मानंनित्यमेवमन्यते, सचायमात्मा द्रव्यरूपोगुणरूपो वा भवतीत्यन्यत् । तत्रचैतन्यस्यानित्यत्वेनित्यस्यात्मनस्तेनचैतन्येनतादात्म्यं न स्यात्, तस्मात् चैतन्यस्वभावत्वेऽर्थात् ज्ञातृत्वरूपत्वेऽर्थतश्चैतन्यस्यापिनित्यत्वमेवायातिनत्वनित्य-त्वम् । अन्यथा नित्यानित्ययोस्तादात्म्यस्यासंभवभवदुक्तिकत्वमेवभवेदिति । **आत्माऽत्मानं जानान एव भवतीति** आत्मानंजानन्नेव=नित्यस्येतरानधीनप्रकाशत्वा नेवतिष्ठतीत्यर्थः एतावता आत्मनो यः प्रकाशस्तादृशप्रकाशस्यागन्तुकत्वमनित्यम् निराकृतम्, तथा स प्रकाशआत्मनोज्ञान प्रयुक्तोऽर्थात् ज्ञानेनप्रकाशोजनितोभवतीत्यपिनिराकृतमेवभवति । अन्यथा, नित्यानन्याधीनप्रकाशत्व-मितितदीयस्वरूपमेव न स्यादितिभाव । **इतरत्तुनिमित्तकारणभेदानुगुण्येन** इति तत्र

तदित्थंस्वयंप्रकाशतयास्वतःस्फूर्यमाणोप्ययमात्माकावेरीजलनिमग्नमकरादिवत्,जल सम्पृक्तगोक्षीरवत् स्वेतरेभ्योविविच्यज्ञानविषयो न भवतीति । तादृशात्मन उपपादनार्थंन्यायानुगतानुमानभेदाःशास्त्राणिचादृतानिभवन्तीतिनिवेदितम् । अन्येतुअनुमानादिभ्यो न प्रत्यक्षोभवतिपदार्थइतिप्रत्यक्षेणैवात्मानंज्ञातुंयमनियमप्राणायामादियोगाङ्गानामनुष्ठानेनविशुद्धान्तःकरणाःपरिपक्वध्यानेनयोगजधर्मसहकारितयाहस्तामलकवत् स्वेतर सकलविलक्षणतयाऽत्मानंसाक्षात्कर्तुंप्रयतमानाभवन्तोदृश्यन्ते । ततो भावनाप्रकर्षेणान्तेऽपरोक्षज्ञानंतेषांभवतीतिसर्ववादिसंमतमेव । एतदन्यत्सर्वंयोगादिलक्षणंयोगशास्त्रादेवावगन्तव्यमितिकृतंपल्लवितेन । इत्यात्मनिरूपणप्रमाणप्रकरणम् ।

निमित्तभेदानुसारेणनिमित्तंकारणंतद्भेदेनजायमानम् तत्सतिनिमित्तेजायतेतदभावे, न जायते, यथा चाक्षुषंप्रत्यक्षज्ञानम् चक्षुरिन्द्रियंघटादिकंचार्थःतयोःसंनिकर्षे संयोगसंयुक्तसमवायतत्समवायादिरूपेसति, तथालोकसंयोगेमहत्त्वोद्भूतरूपादिके च विद्यमाने घटज्ञानं तदाश्रयरूपतद्गतरूपत्वतदभावादीनांचाक्षुषं भवति । एतेष्वन्यतमस्याप्यभावेतादृशतत्तद्विषयकंज्ञानं न जायते, इति तत्सत्वेतत्सत्वं तदभावेतदभावइत्याकारान्वयव्यतिरेकेविद्यमानेसतिज्ञानंकदाचिद् भवति, एतेषामभावे च तत्तज्ज्ञानं न भवति । ततश्च **निमित्तकारणभेदानुगुण्येनेत्यस्य** इन्द्रियलिङ्गसादृश्यपदज्ञानार्थसंनिकर्षोपाध्यन्वयव्यतिरेकानुविधानेनेत्यर्थः । अन्यत्सर्वमतिरोहितार्थकमितिदिक् ।

॥ इतिधर्मभूतज्ञानस्यसंशयाद्यवान्तरभेदोपपादकप्रकरणेतत्त्वदीपः ॥

यद्यपिपूर्वप्रतिपादित आत्मास्वयंप्रकाशत्वात स्वतःसिद्धएव । “सर्वतीर्थदृशांसिद्धिःस्वाभिप्रेतस्य समवस्तुवः । यदभ्युपगमादेवतत्सिद्धिः केनवार्यते” इत्यभियुक्तोक्तदिशास्वयंप्रकाशतयातत्सिद्धिःसमर्थितै वेतितत्रप्रमाणान्तरस्यानवकाशस्तथापि “अधिकंप्रविष्टं न तद्धानिरितिन्यायमनुस्मरन् स्थूणानिखननन्यायेनसिद्धमपिप्रमाणान्तरेण तमेवसाधितमनुमानशब्दादिप्रमाणविषयतयेतिसाधयितुमुपक्रमते **तदित्यंस्वयंप्रकाशतयेत्यादि** । अयमाशयःवर्तमानोपिपदार्थः पार्थक्येनदृष्टिगोचरोनभवति, यथाजलाशयान्तर्गतोमत्स्यःजलमिलितंदुग्धं च । तत्रास्फुटप्रकाशेमत्स्यनिदर्शनम्, अविवेकग्रहणे दुग्धम् । यथाकालिन्दीजलस्यान्तस्तलेचलन्नपिमत्स्यः स्फुटतयानोपलभ्यते । अविवेकोविवेकाभावः यथाजलदुग्धयोःसंमिलितयोस्तदेकतरस्यतत्रभेदेनग्रहणंनभवति ।

पदार्थस्यविद्यमानत्वेपितद्ग्रहणं न भवतीति, अकारणवलादित्यन्यत्रापिप्रतिपादितम्—

“अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । सौक्ष्म्यादभिभवात्समानाभिहाराच्च ॥” इति सांख्यकारिका तत्रविद्यमानोपि पदार्थोनोपलब्धोभवति । यथाऽकाशेउड्डीयमानोपिपक्षी, अतिदूरगतोनोपलभ्यतेचक्षुरादिनेतितत्रातिदूरत्वंकारणम् । यथावाऽतिसमीपेविद्यमानंस्वचक्षुःसम्बद्धमंजनंस्वचक्षुषानो-

गतप्रकरणेनात्मनिप्रमाणपरीक्षाकृतातदनन्तरमात्मनःकालपरीक्षाप्रस्तूयते । तत्रबौ-

पलभ्यतेऽतिसमीपत्वात् । इन्द्रियघातेपि न पश्यति, यथान्धोरूपंनविजानाति । एवमनसोऽनवस्थानादपि न पश्यति, यथाकामाद्यपहतमनाःसमींपस्थमिन्द्रियसंनिकृष्टमप्यर्थं न पश्यति । एवमभिभवादपि, यथाऽहनिसूर्यप्रभाभिरभिभूतंग्रहनक्षत्रमण्डलं नपश्यति । समानाभिहारात्=सजातीयसंवलनादपिनपश्यतिविविच्यपदार्थम् , यथानदिंजलेप्रक्षिप्तंकमण्डलुजलं न पार्थक्येनगृहीतंभवति सजातीय संवलनदोषात् । अत्रशरीरकरणाद्यभिभवात् तत्संमृष्टत्वाद्वाऽत्मानस्तेभ्यःपार्थक्येनस्फुटतयोपलभ्यते स्वयंप्रकाशोभवन्नपीतिभावः । इत्येतादृशस्यात्मन, उपपादनन्यायानुगताः=आत्मानात्मविवेकोपपादकावयवपञ्चात्मकप्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकन्यायप्रयोज्या अनुमानभेदाः=अनुमानविशेषाः-केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिरूपाः शास्त्राणिःशास्त्रानुगतप्रमाणवाक्यानि च समादृतानि भवन्ति । अर्थात् अनुमानादिप्रमाणादिभ्यआत्मनः करणकलेवरादिभ्योभेदेनात्मानंनिर्णेतुमिच्छन्तिवहवइति अत्रपरितोषमप्राप्तवन्तःकेचन,अर्थात् तनुमानादीनांपरोक्षज्ञानजनकतयाऽत्मनः प्रस्फुटज्ञानसम्पादकतया, प्रदर्शितानुमानादिप्रमाणेषु संभवत्येवस्वभावतोऽपरितोषःयोहिआत्मनःस्फुटावभासमिच्छति । एतादृशपुरुषस्यापरितोषे, सप्रकारान्तरमात्मनःप्रत्यक्षज्ञानकरणं यमनियमादिसहकृतयोगानुष्ठानमेवेच्छन्ति ।

तत्रयोगश्चित्तवृत्तिनिरोधलक्षणः । तदङ्गानियमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाधिरूपाणि । एतेषांलक्षणानियोगतन्त्रेभ्यएवज्ञातव्यानि । वृत्तिरन्तःकरणस्यसात्त्विकराजसतामसरूपात्रिधाभवति । पुनस्ताद्विप्रकाराक्लिष्टाअक्लिष्टाश्च । तत्राविद्यास्मितारागद्वेषाभिनिवेशाःक्लिष्टाः । त एतेदोषाऽन्तःकरणंमलिनयन्ति, अक्लिष्टास्त्वन्तःकरणंविशोध्यनिर्मलंकुर्वन्ति । समाधिर्द्विविधः सम्प्रज्ञातोऽसंप्रज्ञातश्च । तत्रप्रथमेध्याताध्येयोपासनाभेदोभासते । द्वितीयेनतथा । एवञ्चसाङ्ग योगानुष्ठानेननिर्मलचित्तस्यसाधकस्यध्यानपरिपाके योगजधर्मसहकृतमनसाऽत्मनःसाक्षात्कारःप्रत्यक्षात्मकज्ञानंप्रादुर्भवति, तेनसाक्षात्करेणात्माविषयीकृतोभवति, आत्मनःस्फुटरूपेणप्रत्यक्षं भवतीतिप्रत्यक्ष प्रमाणविषयआत्मेतियोगमतम् । अत्रविशेषतोयद्द्रष्टव्यंतत्सर्वंयोगशास्त्रादेव ज्ञातव्यमितिनात्रतद्विचारः प्रपञ्चितः । एवंयथोक्तप्रकारेण “अत्रायंपुरुषःस्वयंज्योतिर्भवति” इत्यादिश्रुतिप्रत्यक्षादिप्रमाणेनस्वयंप्रकाशस्वरूपस्यात्मनोधर्मभूतंज्ञानम् , घटपटादिसकलपदार्थग्रहणेतथाऽत्मनःकरणकलेवरादिभ्योवैलक्षण्येन च ग्रहणायसमुपयुज्यते इत्येतत्प्रबन्धेनसाधितम् । अर्थात् अनुमानागमादिप्रमाणेन, तथा लौकिकालौकिकयोगजनितप्रमाणेन च विस्पष्टतयाप्रत्यक्षीक्रियते इति ।

॥ इत्यात्मनिरूपणपरकप्रमाणप्रकरणेतत्त्वदीपः ॥

अथ आत्माशरीरादिव्यतिरिक्तोऽस्तिनवेतिसंशयेपूर्वप्रकरणेअनुमानादिप्रमाणेनात्मनःस्वेतरसकल पदार्थविलक्षणतयातदस्तित्वमुपपादितम् । तदनन्तरमस्यात्मनःकालावच्छेदपरीक्षा कालसम्बन्धविषयकविचारमवतारयति **गतप्रकरणेनेत्यादि** **तत्रबौद्धमतानुयायिन** इत्यादि । तत्रात्मनः

द्धमतानुयायिनोयत् सत् तत्क्षणिकमेवयथामेघमालेतिब्रुवाणानित्यात्मदर्शनमेवानर्थमूलमिति च मन्वानाःकथयन्तियत्सत्तत् क्षणिकमेवआत्मापिसन्नेवतस्मात् सोपिक्षणिकः ।

कालावच्छेदविचारेप्रवृत्तेसति । अत्रायमाशयःचार्वाकोहिप्रत्यक्षमात्रसिद्धःपदार्थःप्रामाणिकइतितदभावात् स्वर्गादिलोकोऽप्रामाणिक एवेति । न चानुमानादिनातत्सिद्धिस्तदभावात्, अर्थादनुमानं न प्रमाणम् अनवस्थादुःस्थतर्कानिवर्त्त्यव्यभिचारशङ्कावरुद्धव्याप्तिकत्वादिनाऽनुमानस्यनिरासेनाविनाभावस्यव्याप्तेर्दुर्ग्रहत्वादनुमानस्यैवाभावादिति । तत्रवौद्धोवदतिनेदंयुक्तम्, तादात्म्यतदुत्पत्तिभ्यामविनाभावस्यज्ञातुंशक्यत्वात् तदुक्तम् “कार्यकारणभावाद्वास्वभावाद्वानियामकात् । अभिनाभावनियमोदर्शनान्तरदर्शना”दिति ।। अन्वयव्यतिरेकावविनाभावनिर्णायकावितिपक्षेसाध्यसाधनयोरव्यभिचारोदुःखधारणोभवेद् भूतेभविष्यति वर्तमानेऽनुपलभ्यमाने च व्यभिचारशङ्कायानिराकर्तुमशक्यत्वात् । न च तादृशस्थलेभवन्मतेव्यभिचारशङ्काभवत्येवेतिवाच्यम्, विनापिकारणंभवतुकार्यमेतादृश्याःशङ्कायाव्याघातावधिकतयानिवृत्तिसंभवात् । तदुक्तं “तदेवाशङ्क्येतयस्मिन्नाशङ्क्यमानेव्याघातादिदोषानावतरेयुरिति । तदुक्तमुदयनाचार्येणः—

“शंङ्काचेदनुमास्त्येवनचेत्शङ्कातत स्तराम् । व्याघावधिराऽशंङ्कातर्कःशंङ्कावधिर्मतः” ।।इति।। तस्मात्तदुत्पत्तिनिश्चयेनाविनाभावोव्याप्तिर्निर्णीयते तदुत्पत्तिनिश्चयश्चकार्यत्वहेतोःप्रत्यक्षोपलंभानुपलंभपञ्चकनिबन्धनः। उत्पत्तेःपूर्वंकार्यस्यघटादेरनुपलंभःकारणोपलंभेसत्येवकार्योपलंभः,उपलब्धस्यपश्चात् कारणानुपलंभात् ,अनुपलंभ इति पञ्चकारण्यावन्हिधूमयोःकार्यकारणभावोनिर्णीतोभवत्येवेति । यदि शिंशपा वृक्षविशेषोवृक्षत्वमतिपतेत्तदास्वरूपमेवपरित्यजेदितिविपक्षेवाधकस्यसद्भावात् । वाधकानुदये च भूयोभूयःसहभावोपलंभेपिव्यभिचारशङ्कायानिवारणासंभवात् । शिंशपावृक्षयोश्चतादात्म्यनिश्चयो वृक्षोऽयंशिंशपेतिसमानाधिकरण्यबलादेवास्थीयते । नहि अत्यन्ताभेदेसामानाधिकरण्यंसंभवति, पर्यायतया युगपत्प्रयोगायोगात् । नवाऽत्यन्तभेदेवासामानाधिकरण्यंसंभवति, स्वभावभिन्नयोर्गवाश्वयोःसामानाधिकरण्यानुपलंभात् । तस्मात् कार्यात्मानौकारणमात्मानंगमयत इति सिद्धमेवेति । यदि कदाचित् चार्वाकोऽनुमानस्यप्रामाण्यंनाङ्गीकुर्यात्तंप्रतिब्रूयात् अनुमानंप्रमाणं न भवतीत्येतावन्मात्रमुच्यते, तत्र किंचित्साधनंविद्यतेनवाद्वितीयपक्षेप्रतिज्ञा मात्रेण वस्तु सिद्धेरसंभवात् एकाकिनींप्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात् ।

“संभावितःप्रतिज्ञायांपक्षःसाध्येतहेतुना । नतस्यहेतिभिःत्राणमुत्पतन्नेवयोहतः ।। इति च ।।

न प्रथमःपक्षः,अनुमानंप्रमाणं न भवतीतिब्रुवताअशिरस्कवचनोपन्यासे “मममातावंध्येतिवद् व्याघातात् । अपि च प्रमाणप्रमाणाभासव्यवस्थापनंतत्समानजातीयत्वादितिवदता, स्वीकृतमेवस्वभावानुमानम् । तथापरपुरुषगताविप्रतिपत्तिर्वचनादिलिङ्गेन भवतीति ब्रुवताकार्यलिङ्गकानुमानमपिस्वीकृतमेवेति । ते च बुद्धानुयायिनोमाध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाश्चत्वारोभवन्ति । ते च यथा-

अर्थक्रियाकारित्वमेवसत्वम् , तच्चास्थिरेनोपपद्यते, क्रमाक्रमाभ्यामर्थक्रियाकारित्वस्यव्याप्तत्वात् । क्रमाक्रमयोःक्षणिकेएवसंभवात् । इतिव्यापकयोर्व्यापकयोःस्थिरेनिवृसंख्यम् ,सर्वशून्यत्वबाह्यशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादान् मन्यन्ते । यद्यपिउपदेष्टांभगवानेक एव तथापिविनेयभेदाद् बुद्धिभेदादुपदेशोभिन्नभिन्नइवाभाति । तदुक्तं "देशनालोकनाथानांसत्वाशयवशानुगाः । भिद्यन्तेबहुधालोकेउपायैर्बहुभिःपुनः । गंभीरोत्तानभेदेनक्वचिच्चोभयलक्षा । भिन्नापि देशनाऽभिन्नाशून्यताद्वयलक्षणेति । गतोऽस्तमर्कइत्यादिलौकिकोपदेशवदितिजानन्ति । तत्रसर्वंक्षणिकं क्षणिकंदुःखंदुःखंस्वलक्षणंस्वलक्षणंशून्यंशून्यमित्येवंभावनाचटुष्टयमुपदिशदितिवेदितव्यम् । तत्र क्षणिकत्वंनीलादिलक्षणानांसत्वेनानुमातव्यम् । यत् सत्तक्षणिकंयथामेघमालेति । इमे नीलादिभावाः सत्तात्तस्मात्तेपिक्षणिकाएवेति । न च सत्वंहेतुर्नीलादावसिद्धम् , अर्थक्रियाकारित्वलक्षणसत्वस्यनीलादिपदार्थेषुप्रत्यक्षसिद्धत्वात् । व्यापकनिवृत्त्यानिवृत्तियायेन, स्थिरपदार्थेव्यापकक्रमाक्रमयोर्निवृत्तौव्याप्यसत्वस्य निवृत्तिरपिस्थिरान्निवर्ततेत्यतार्थतोभावानांक्षणिकत्वंसिद्ध्यत्येव । एतादृशंचार्थक्रियाकारित्वंक्रमाक्रमाभ्यांव्याप्तमर्थात् यदापदार्थःकार्यंकरोति, तदाक्रमशोयुगपद्वेतिनियमः । नचात्र प्रकारान्तरः संभवति, परस्परविरोधात् । यदुक्तं—

"परस्परविरोधेहि न प्रकारान्तरस्थितिः । नैकतापिविरुद्धानामुक्तिमात्रविरोधतः ॥इति॥

इमौ च क्रमाक्रमस्थिरपदार्थाव्यावर्तमानौ, स्वव्याप्यभूतमर्थक्रियाकारित्वमपिव्यावर्तयन्त्यौक्षणिकत्वपक्षे एवार्थक्रियांव्यवस्थापयतइतिसिद्धं भवतीति । ननु स्थिरपदार्थस्यार्थक्रियाकारित्वं कथं न भविष्यतीतिचेत् विकल्पासहत्वेनस्थिरेऽर्थक्रियाकारित्वस्यासंभवात् , तथाहिंवर्तमानार्थक्रियोत्पादनसमयेऽतीतानागतयोरर्थक्रिययोःकरणेस्थिरपदार्थस्यसामर्थ्यमस्तिनवा ? तत्रास्तीतिप्रथमपक्षस्वीकारे, यदैकक्रियांकरोतितत्कालेएवातीतागतार्थक्रियामपिकुर्यात् , समर्थस्यकालक्षेपाऽयोगात् । यद्वस्तुयत्कालेयत् करणसामर्थ्यवत् तत् तदा करोत्येवयकारणकूटात्मकसामग्रीस्वकार्यंकरोत्येव, उत्पत्तिव्याप्यत्वात् सामग्र्या । तथाऽयंकार्यंकुर्वन् पदार्थोऽवश्यमेवकरिष्यत्यतीतानागतार्थकार्यमपि, नत्वेवंदृश्यते उपपद्यतेवा । तस्मान्न प्रथमपक्षःसमीचीनइवाभाति । नवा द्वितीयपक्षोपियुक्तः । यद्येवं न समर्थस्तदासपदार्थःकदापि कार्यं न करिष्यति, सामर्थ्यमूलत्वादर्थक्रियाकारित्वस्य । यत् यदा यावन्न करोति तत् तदा तत्रा समर्थमेव, यथाशिलाखण्ड़ोयवाङ्कुरेऽसमर्थइतिसर्वदाऽसमर्थ एव । न चैवंवर्तमानार्थक्रियाकरणकालेभूतभविष्यार्थक्रियां करोतीति न द्वितीयपक्षः । अथस्थिरोपिपदार्थःक्रमवत्सहकारिलाभात्क्रमेणकार्यंकरिष्यति, यदायादृशसहकारिणःसमवधानंतदनुतमेवंक्रमशःकार्यंकरिष्यतीति न कोपिदोषइतिचेत्सत्यम । विकल्पासहत्वात्, ये ते सहकारिणस्ते किं पदार्थस्यबीजादेरुपकारंकुर्वन्ति नवा ? यदिनोपकुर्वन्तिसहकारिणस्तदाऽनुपकुर्वतस्तेषांसहकारस्यानुपयोगात् । यद्युपकुर्वन्ति सहकारिणोभावानितिपक्षस्तदातैःक्रियमाणउपकारोभावाद्भिद्यते नवा ? यदि स उपकारोभावाद्भिद्यते,

त्त्यातद्व्याप्तंस्थिरत्वमपिनिवर्तते एव वह्निनिवृत्तौधूमनिवृत्तेर्जलादौदर्शनात् । इतिसत्वादात्मापिक्षणिकमेवेतिबौद्धमतम् । तन्नयुक्तम्, स्थिरपदार्थेपिक्रमयौगपद्याभ्यामर्थतदाऽगन्तुकस्यैवतस्यकारणत्वंस्यात्, नत्वक्षणिकस्यभावस्य, यत् आगत्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्यस्य, उपकारेणभिन्नस्यभावस्यव्यवहितत्वादन्यथासिद्धत्वंचस्यात्, पुत्रव्यवहितवृद्ध कुलालवत् घटादिकार्ये । तदुक्तं

"वर्षातयाभ्यां किं व्योम्नश्चर्मण्यस्तितयोःफलम् । चर्मोपमश्चेत् सोऽनित्यःखतुल्यश्चेदसत् फलः॥" इति अथबीजादिकःपदार्थःसहकारिभिःसहैवकार्यंकार्यङ्कुरादिकंकरोतीतितेषांस्वभावएवेति चेत् ? एवं तर्हि बीजादिकोभावःकदाचिदपिसहकारिणमिलाजलादिकंतत्पक्ष्यतिपरन्तुसर्वदैवतैःसहित एव स्वकार्यंकरिष्यतिस्वभावस्यानपायात् । अपि च सहकारिणायोतिशयःसम्पाद्यते, सोऽतिशयोऽतिशयान्तरमारभते नवा ? द्वितीयपक्षेऽतिशयकल्पनंनिरर्थकमेव । प्रथमपक्षस्वीकारेबहुमुखानवस्थैवापतेत्, अतिशयेउत्पादयितव्येसहकार्य्यन्तरापेक्षापेक्षायांतदीयपरंपरायाःप्रसङ्गइत्येकानवस्था । तथाहि, सहकारिभिःसलिलपवनादिभिः पदार्थसमूहैराधीयमानेबीजस्यातिशयेबीजमुत्पादकमितिस्वीकर्तव्यम् । अन्यथा तदभावेऽप्यतिशयःप्रादुर्भवेत् । बीजस्यातिशयमादधानसहकारिसापेक्षमेवाधत्ते, अन्यथैवोपकारापत्तावङ्कुरात्मककार्यस्यापिसर्वप्रादुर्भावआपद्येत । तस्मादतिशयार्थमपेक्षमाणैःसहकारिभिरतिशयान्तरं कुर्यात् बीजादिभावे । तस्मिन्नप्युपकारेपूर्ववत्सहकारिसापेक्षस्यबीजस्यजकनत्वे, सहकारिसम्पाद्यविजगतानवस्थाप्रथमाऽव्यवस्थितेति ।

अथोपकारः कार्यार्थसापेक्षमाणोपिबीजादिनिरपेक्षंकार्यंजनयतितत्सापेक्षो वा ? तत्र न प्रथमःपक्षः बीजादीनामकारणत्वप्रसङ्गात् । द्वितीयपक्षेऽपेक्ष्यमाणेनबीजादिंना, उपकारे, अतिशयःआधेय एव, एवंतत्रतत्रापीतिबीजादिजन्यातिशयनिष्ठातिशयपरंपरापातइति द्वितीयानवस्थाशिरसिस्थिराभवेत् । एवमपेक्षमाणेनोपकारेणबीजादौधर्मिणि, उपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयपरंपरापात इति तृतीयानवस्थापतेत् । अथभावभिन्नोऽतिशयः सहकारिभिराधीयते इतिस्वीकारे तु तदा, प्राचीनोभावोऽनतिशयात्मानिवृत्तः अन्यश्चातिशयात्मकुर्वद्रूपपदवाच्योजायते,तदाममश्रमोपिंसफलतांयाति । तस्मात् अक्षणिकस्याथांत् स्थिरस्यार्थक्रियानसंभवतीति । नापिस्थिरपदर्थस्याक्रमेणयुगपदर्थक्रियासंभवति, विकल्पासहत्वात् । तथाहि, युगपत्सकृत्कार्यकरणसमर्थः सभावस्तदुत्तरकालमनुवर्तते, नवा ? तत्र प्रथमपक्षे, तत्कालवत्कालान्तरेपिकार्यकरणमापतेत् । द्वितीयेस्थापित्ववृत्त्याशाकृष्णमूपिकाघ्रातवीजादावङ्कुरादिजननप्रार्थनामनुहरेत् । यद्विरुद्धधर्माध्यस्तंभवति तन्नैकंकिन्तुपरस्परविभिन्नमेवभवति, यथाजलंवह्निश्चाविरुद्धधर्माध्यस्तश्चायमितिमेघमालादौ व्याप्तिप्रसिद्ध्यतीति । नचायंहेतुःस्वरूपासिद्धो यथाऽर्थात् पक्षेस्वाभाववान् भवति । स्थापिनिपदार्थेकालभेदेनसामर्थ्यार्थ्ययोंःप्रसङ्गतद्विपर्थयासिद्धत्वात्तत्राऽर्थात् पक्षेस्वाभाववान् भवति । स्थापिनिपदार्थेकालभेदेनसामर्थ्यासामर्थ्यसाधकौप्रसङ्गविपर्ययौपूर्वमेवप्रदर्शितौसामर्थ्यासामर्थ्यसाधकाविति । यद्यदायज्जननेऽसमर्थंतत्त-

क्रियाकारित्वस्यसहकारिवैचित्र्येणोपपादयितुंशक्यतयानीलादिवद्घटादिवद्वासंभवेननात्मनोघटादिवत् कालपरिच्छिन्नत्वमितिकालानवच्छेदात् सर्वथानित्यएवसिद्ध्यतीतिदिक् ।

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्य प्रधानपीठाचार्य श्रीरामानन्दसम्प्रदायस्यचत्वारिंशत्तमाचार्यपदमलङ्कृज्जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्र प्रणीततत्त्वत्रयसिद्धावात्मसिद्धिः ।

श्रीसीतारामार्पणमस्तु

दातन्नकरोति यथाशिलाखण्डंकमलाङ्कुरम् । असमर्थश्चायंवर्तमानार्थक्रियाकरणकालेअतीतानागतयोर्थक्रिययोरितिप्रसङ्गोऽन्वयः ।

यद्वस्तुयदायत्करोतितत्तदातत्करणेसमर्थं यथासामग्रीस्वकीयघटादिकार्ये, करोतिचायमतीतानागतकालेतत्कालवर्तिन्यर्थक्रियेवीजादिभाव इतिप्रसङ्गव्यत्यययोर्विषयः । तस्माद्विपक्षेक्रमयौगपद्यनिवृत्त्या व्यापकानुपलंभेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्ययवलेनगृहीतान्वयव्याप्तिसत्वंक्षणिकत्वसाध्यं पक्षेस्थापयतीतिसिद्ध्यति । तदेवंसर्वपदार्थानांक्षणिकंसत्ववलादेवायातीति । अत्रार्थक्रियाकारित्वमेव सत्वंनतदन्यत् । न च सत्तावत्वंसत्तासमवायो वा सत्वंनैयायिकाभिमतंभवत्वितिवाच्यम्, एवंसति द्रव्यगुणकर्मसुसत्तावलेन सत् सदितिव्यवहारसंभवेऽपिसामान्यविशेषसमवायेषुसत्तायाअभावेनसदिति व्यवहाराभावप्रसङ्गः । न च द्रव्यादित्रिषुसत्तावलेनसदितिव्यवहारस्तथैव सत्तासतीविशेषःसन्समवायःसन्नितिव्यवहारदर्शनात्, तेष्वपिसामानाधिकरण्यसम्बन्धेनसत्तायाःसंभवेनसद्व्यवहारसंभवादिति वाच्यम्, एवंसतितादृशव्यवहारप्रयोजकस्यसत्तासमवायस्यसामानाधिकरण्यसम्बन्धस्यस्वीकारप्रयोजकद्वैविध्यप्रसङ्गापातात् । एवमतिरिक्तसत्तास्वीकारे सा अनुगताऽननुगतावेतिविकल्पपराघातोपि भवति, एवंसर्षपादारभ्यपर्वतादिषुपरस्परंविलक्षणेषुअनगतेषु, अनुगतस्यकस्यचिदाकारस्य, मणिषु सुत्रवदुद्भूतगुणेषुरूपादिगुणवच्चाप्रतिभासमानत्वात् । तदुक्तं केनापि "स्वतोनिवृत्तिव्यतिवृत्तिभाजो भावानभावान्तरनेयरूपाः" इति । तस्मादर्थक्रियाकारित्वव्यतिरिक्ताधेयापन्नसत्तायाः स्वीकारेप्रमाणाभावादर्थक्रियाकारित्वातिरिक्तसत्तानास्त्येवेति ।

किञ्चभवदभिमतंसामान्यंसर्वगतंस्वाश्रयसर्वगतंवेतिविकल्पपराघातोपिभवतिविकल्पासहत्वात् । तत्रयदिघटत्वादिसामान्यस्यसर्वमतत्वमास्थीयेतेति प्रथमपक्षस्तदासर्ववस्तूनांसाङ्कर्यप्रसङ्गात्, घटत्वस्यपटादावपिसद्भावेघटवत्पटादिरपिघटरूपएवापतेत्, सिद्धान्तव्याकोपश्चभवेत् । यतःप्रशस्तपादाचार्येणस्वभाष्येप्रदर्शितम् "स्वविषयसर्वगत"मिति । किञ्चविद्यमानेघटेविद्यमानंघटत्वादिसामान्यं तदन्यत्रजायमानेनव्यक्तिविशेषेण, तस्माद्गच्छत्सम्बद्ध्यते, अथवाऽनागच्छदेवसम्बन्ध्यते । प्रथमपक्षेसामान्यस्यद्रव्यत्वंस्यात् । क्रियावत्वात् । द्वितियपक्षेगमनंविनाव्यक्त्यन्तरेणसहसम्बन्ध एव न स्यात् । अपिचघटविनाशेतत्स्थंसामान्यमवतिष्ठते विनश्यति वा,स्थानान्तरंवागच्छति ? प्रथमे सामान्यस्य निराधारत्वंस्यात्पूर्वाधारस्यविनाशात् । द्वितीयपक्षेसामान्यस्यनित्यत्वंभज्येत "नित्यत्वेसत्यनेकसमवे-

तत्वलक्षणकस्यैवसामान्यस्यस्त्रीकारात् । तृतीयपक्षेचद्रव्यत्वापत्तिरेवेत्यादिदूषणमतिरिक्तसामान्येभवतीत्यतोऽर्थक्रियाकारित्वमेवतत्, नत्वतिरिक्तमिति । तदुक्तम्=

अन्यत्रवर्तमानस्यततोऽन्यस्थानजन्मनि । तस्मादचलतःस्थानाद्वृत्तिरित्यतियुक्तता ॥ ”
यत्रासौवर्ततेभावस्तेनसम्बद्ध्यतेनतु । तद्देशिनं च व्याप्नोतिकिमित्येतन्महाद्भूतम् ॥
नयाति नच तत्रासीदस्तिपश्चान्नचांशवत् । जहातिपूर्वंनाधारमहोव्यसनसन्ततिरिति ॥

ननुभावव्यतिरिक्तसामान्यं न स्वीक्रियेत तदा, अनुवृत्तप्रत्ययःकिमालंवतेइतिचेत् सप्रत्ययोऽन्यायोहालंवकएव । अगोव्यावृत्तमेवगोत्वम्, नतुनदतिरिक्तंकिञ्चिदिति, व्यावृत्तिश्चाभावात्मिकैव नतुभावरूपायेनानुवृत्तप्रत्ययोभावंकमप्यालंवेदिति । आदितएवारभ्यन्तिमक्षणपर्यन्तःसंसारो दुःखात्मक एव,सुखलेशस्यापितत्रादर्शनादितिसर्वतीर्थकरसंमतम्। अन्यथासंसारात्निवृत्तिमिच्छतां संसारनिवृत्तयेतदुपायेश्रवणमननादौ प्रवृत्त्यनुपपत्तेः । तस्मात् “सर्वंदुःखंसर्वंदुःखमित्येवसर्वदाभावनीयमिति बुद्धोपदेशः । ननु सर्वंक्षणिकंकिंवदिति दृष्टान्तापेक्षायांदृष्टान्तःप्रदर्शनीयइतिचेत्सत्यम्—स्वलक्षणक्षणानां क्षणिकतयासालक्षण्याभावात्, नैतेनसदृशंतदपरंवस्तुविद्यतेयस्यसादृश्यतयोपादानं कृत्वातंदृष्टान्ततयोपस्थापयेदितिततःस्वलक्षणं स्वलक्षणमित्येवभावनीयमिति, एवंशून्यमित्यधिभावनीयम्, यतःस्वप्नकाले जागरणकाले च “नमयादृष्टमिदंरजतंगजरथादिकंवेति विशिष्टविषयकज्ञानस्यनिषेधान्नर्थात् प्रातिभासिकस्थले ज्ञानवदेवतद्विषयीभूतविषयस्यापिवाधानुभवात् । यदिज्ञानविषयीभूतंसद्भवेत्तदाताद्दशविषयविशिष्टज्ञानस्येदन्तारूपेणाधिष्ठानशुक्तिकादेस्तत्राध्यस्तस्यरजतादेर्धर्मिणस्तदीयरजतत्वादिधर्मस्यतदीयसम्बन्धसमवायादेर्जाग्रतकालिकपदार्थवदेव तद्गतंसत्वस्यावश्यंभावताभवेत् । नचैतत्केनापिस्त्रीक्रियते । नचार्धजरतीयंयुक्तम् । तस्मादध्यस्ताधिष्ठानधर्मसम्बन्धदर्शनद्रष्टृणांमध्ये एकस्यानेकस्य वा, असत्वे निषेधविषयत्वेनसर्वस्यासत्वंवलादापततीति । नचाधिष्ठानस्याध्यस्तत्वेनिरधिष्ठानकभ्रमःकथंस्यादिति वाच्यम्, केशोण्डकवदेवसर्वत्रनिरधिष्ठानकस्यापिसंभवात् । इत्येवंबुद्धोपदिष्टेमाध्यमिकास्तावत्सर्वोत्तमा इति ते कथयन्ति । तदेवसर्वशून्यत्वंक्षणभङ्गादिकथनमुखेन, स्थिरत्वानुकूलवेदनीयत्वानुगतसर्वं सत्यत्वभ्रमत्वव्यावर्तनेन सर्वशून्यतायामेववौद्धसिद्धान्तस्यपर्यवसानंभवतीतिं । अतोवास्तविकंनसत्, नासत्, नोभयात्मकंनवाऽनुभयात्मकमितिकोटिचतुष्कविनिमुक्तमेव । अर्थात्नसत्वाधात्, नासत्, सत्वेनप्रतीयमानत्वात्, नवोभयात्मकंपरस्परविरोधात् परस्परविरोधेहिनप्रकारान्तरस्थितिरिति । नवाऽनुभयात्मकंविरोधादेव । अतश्चतुष्ककोटिविनिमुक्तंशून्यत्वमेव । तदुक्तं “देशनालोकनाथानांसत्वाशयवशानुगाः । भिद्यतेबहुधालोकेउपायैर्बहुभिःपुनः । गंभीरोत्तानभेदेनक्वचिच्चोभयलक्षणा । भिन्नापि देशनाऽभिन्नाशून्यताऽद्वयलक्षणा,तथाहियदिभावानांघटादीनांसत्वंस्वभावस्तदा तदुत्पादनायकुलालकपालादिकारकस्वीकारोनिरर्थकएवस्यात्, अविद्यमानस्योत्पादनायकारकव्यापारोऽपेक्षितोभवति, तत्र यदिसत्वस्वभावक एव भावस्तदाकारकव्यापारेण किंकरणीयंस्यादितितस्यनैरर्थक्यमेवापतति ।

अथयदिघटादिभावानामसत्वमेव स्वभावस्तदामुद्गरादिपातनेनतद्विनाशप्रयासोपि विफलतामेवेयात्, असत्वस्वभावत्वादेवभावानाम् । यथोक्तम्—

"नसतःकारणापेक्षाव्योमादेरिवयुज्यते । कार्यस्यासंभवोहेतुःखपुष्पादेरिवासतः ॥" इति ।

एवंतृतीयचतुर्थपक्षौतुविरोधादेवनोपपन्नौभवतः तदुक्तंभगवतैवऽलंकारावतारे—"वुद्ध्याविविच्यमानानांस्वभावोनावधार्यते । यतोनिरभिलप्यास्तेनिः स्वभावाश्चदेशिताः ॥" अपिच—

"इदंवस्तुवलायातंयद्वदन्तिविपश्चितः । यथायथार्थाश्चिन्त्यन्तेविशीर्यन्तेतथातथा ॥

यथासिकताप्रासादःस्थिरतापरीक्षणायशिल्पिनामस्त्रादिव्यापारःप्रवर्तते तथातथाविशीर्यमाणोभूमावेवशेते, तथैवार्थानांस्थितिः । न हीत्थं केनापिकारितः किन्तु एतदेवतेभ्योरोचते "यथायथा चिन्त्यन्तेविशीर्यन्ते तथा तथा । यदेतत्स्वयमर्थेऽभ्योरोचतेतवकेवयमिति । न च तर्हिसर्वशून्यत्वेप्रतिनियतकर्मादिव्यवस्था,कायार्थकारणान्वेशणादिव्यहारःसर्वलोकप्रसिद्धःकथमुपपादितंस्यादितिचेत् स्वाप्निकव्यवहारवत् ,अविद्यावलादेवसर्वस्योपपादनमविद्यादशायांभवतीतिजानीहि,तदुक्तम् "परिव्राट्कामुकशूनामेकस्यांप्रमदातनौ । कुणपःकामिनीभक्ष्यइतितिस्रोविकल्प्यते"तदेवंभावनाचतुष्टयवलात् सकलवासना निवृत्तौजातायांसर्वशून्यतालक्षणं परनिर्वाणमनायासेनैवसिद्ध्यतीतिवयंकृतार्थाः । ततःपरंवयंकृतार्थाःततः परंनकिंचिदुपदेश्यंभवेत्प्राप्तव्यं वाऽवशिष्यते इति । शिष्यैस्तावद्योगश्चाचारश्चेतिद्वयमपिकरणीयमेव । अप्राप्तस्यार्थस्यप्राप्तयेपर्यनुयोगोयोगः, गुरुणोपदिष्टस्यार्थस्यस्वीकरणंश्रद्धापूर्वकमाचारः । तत्रगुरूपदिष्टार्थस्यस्वीकरणादुत्तमास्तेशिष्याः, पर्यनुयोगस्याकरणादधमाश्चतेशिष्याः । अतस्तेषां माध्यमिकाइतिलोकेप्रसिद्धिः । गुरुक्तभावनाचतुष्टयंवाह्यार्थस्यशून्यत्वंचाङ्गीकृत्यान्तरस्यशून्यत्वमङ्गीकृतं कथमितिपर्यनुयोगस्यकरणात् केषाञ्चित् , योगाचारेतिसंज्ञाभवति । एषाहितेषांपरिभाषास्वयंवेदनं हि तावदवश्यमङ्गीकरणीयम् , वाह्यानांस्वयंपरस्परंचजड़त्वेनप्रकाशनासंभवाद् यदिप्रकाशात्मकंज्ञानमपिनाङ्गीकृतंभवेत्तदाजगदान्ध्यमापतेदित्यंतआन्तरपदार्थस्वीकारआवश्यक इति । तदुक्तंधर्मकीर्तिना "अप्रत्यक्षस्योपलंभस्यनार्थदृष्टिःप्रसिद्ध्यतीति ।" आन्तरज्ञानेनतदतिरिक्तोनीलादिपदार्थोग्राह्योभवतीति, तस्माद्बुद्धिव्यतिरिक्तपदार्थस्यापिस्वातन्त्र्येणसत्वंविद्यतेएवेति न ज्ञानमात्रमेवव स्त्वितिनैववक्तव्यम् विकल्पानुपपत्तेः । तथाहि, भावात्समुत्पन्नोनीलादिपदार्थोज्ञानग्राह्यो भवति, अथवाभावादनुत्पन्नएवज्ञानग्राह्यो भवतीति । तत्र न प्रथमःपक्षःसमुत्पन्नस्यस्थितेरभावात् । नवा द्वितीयपक्षःअनुत्पन्नस्यासत्वात्, अर्थक्रियाकारित्वस्यैवसत्वनियमात् । ननु, समतीतएववाह्योनीलादिपदार्थोज्ञानग्राह्योभवति, ज्ञानस्यजनकत्वादितिचेत्सत्यम्, अतीतस्यैवजनकतयाज्ञानग्राह्यत्वेघटो ज्ञातइतिप्रतीतिःस्यात्, परन्तु इहतुघटंजानामीत्येवंरूपेणवर्तमानतावभासो भवतीति तादृशवर्तमानतावभासविरोधोजायेत तथा यथा ज्ञानोत्पादकत्वाद्वाह्यार्थस्यग्राह्यत्वं तथा ज्ञानजनकचक्षुरादिज्ञानकरणस्यापिघटादिज्ञानग्राह्यत्वमापतेत, घटाद्यर्थवदिन्द्रियादेरपिजनकत्वस्यविद्यमानत्वात् । अपि च

ज्ञानग्राह्यःपरमाणुरूपोऽर्थो भवति, अथवा परमाणुसमुदायात्मकावयविरूपोऽर्थोग्राह्योभवतीति वक्तव्यम् । तत्र न चरमपक्षःकृत्स्नैकदेशविकल्पादिना, अवयवसमुदायैकदेशविकल्पेनावयवसमुदायात्मकबाह्यपदार्थस्यनिराकरणात् । नवापरमाणुरूपोबाह्योर्थोभवतीतिप्रथमपक्षोपि समीचीनःपरमाणूनामतीन्द्रियतयातद्रूपबाह्यार्थस्यग्रहणासंभवात् संभवेवा, अयंपरमाणुरितिप्रत्यक्षंस्यात्, नतुघटएको वाह्यःस्थूलश्चेतिप्रतीतिस्यात् । अपि च परमाणोरतीन्द्रियत्वेननिरवयवतयाप्राच्यादिषट्कदिग्भागैर्युगपत् संयोगोपि न स्यात् । तत्स्वीकारेतु, एकस्यापिपरमाणोःषडंशत्वमापद्येतेतितस्यनिरवयवत्वकथनंव्याकुप्येत । तदुक्तम्—

"षट्केनयुगपत् योगात् परमाणोःषडंशता । तेषामप्यैकदेशत्वेपिण्डःस्यादणुमात्रकः । इति ।

तस्मादान्तरज्ञानातिरिक्तग्राह्यबाह्यार्थस्याप्रमाणिकतयानीलाद्यर्थात्मिकंज्ञानंस्वयमेवस्वात्मरूपप्रकाशकंभवतिसूर्यादिप्रकाशवदित्येवसिद्ध्यति । तदुक्तम्—"नान्योऽनुभाव्योबुद्धयास्तितस्यानानुभवोऽपरः"

ग्राह्यग्राहकवैधुर्यात्स्वयंसैवग्राह्यग्राहकयोरभेदोऽनुमानेनैवसिद्धयति । तथाहि—प्रकाशते " इतियेनज्ञानेन, यद्वस्तुवेदितंभवति, तद्वस्तुतेनज्ञानेनभिन्नं न भवति किन्त्वभिन्नमेवभवति, यथा ज्ञानेनज्ञायमानआत्माज्ञानभिन्नो न भवति, तदभिन्न एव, इहापि, नीलादिकाःपदार्थाज्ञानेनवेदिता भवन्तोज्ञानेनाभिन्नाएवेति । तयोज्ञानज्ञेययोर्भेदे, अधुनाअनेनार्थस्यासम्बन्धो न स्यात् । तादात्म्यस्यव्याप्तिहेतोरभावात् । तदुत्पत्तेरपिनियमहेतोरनियामकत्वादेव, वृक्षशिंशपयोरिवतादात्मस्यादर्शनात् । वन्हिधूमयोरिवजन्यजनकभावस्यापिनियामकतयाऽदर्शनादेव ।

ग्राह्यग्राहकसंवित्तीनांयोयंपार्थक्येनावभासोदृश्यते सत्वेकस्मिन् चन्द्रमसिद्विचन्द्रावभासवदेव भ्रमात्मकएव, तत्रादिरविच्छिन्नप्रवाहभेदवासनैवकारणंभवति । वासनाभेदादेवग्राह्यग्राहकाद्यवभासो भवन् भ्रमरूपएवशुक्तौरजतवदिति । यथोक्तम्-—

"सहोपलंभनियमादभेदोनीलतद्धियोः । भेदश्चभ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥" इति ।
"अविभागोपिबुद्ध्यात्माविपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिवलक्ष्यते ॥" इति ।

नच सर्वस्यापिभ्रमरूपत्वेआशामोदकोपार्जितमोदकोरसवीर्यविपाकादिभेदो न स्यात् ,तदुभययोर्भ्रमरूपत्वस्य समानत्वात् । तथा च मोदकोपार्जनक्लेशस्यानर्थक्यमेवस्यादिति न भ्रमितव्यम्, वस्तुतोवेद्यवेदकाकाररहितायाअपिबुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेनविभिन्नग्राह्यग्राहकाकाररूपवत्तयातिभिराद्युपहतनयनानांकेशेन्द्रनाडीज्ञानभेदवदनाद्युपप्लववासनासामर्थ्यवद्व्यवस्थोपपत्तेः संभवात् । तथोक्तम्—

"अवेद्यवेदकाकारायथाभ्रान्तैर्निरीक्ष्यते । विभक्तलक्षणाग्राह्यग्राह्यकाकारविप्लवा ॥"
"तथाकृतव्यवस्थेयंकेशादिज्ञानभेदवत् । यदातदानसञ्चोद्याग्राह्यग्राहकलक्षणा ॥ इति ।"

ततश्चक्षणिकबुद्धिरेवानिर्वचनीयानादिवासनावलानेकाकारेणावभासते इति, एवञ्चपूर्वोक्तभावना प्रचयबलात्सकलवासनानांसमुच्छेदविगलितानेकविषयाकारोपप्लवविशुद्धविज्ञानधारोदयएवमोक्षोदय इत्येवमुपासकः कृतकृत्योभवति । अन्येतु कथयन्ति, यदुक्तंवाह्यंनीलादिकंवस्तुनास्त्येवज्ञानातिरिक्तमिति, तन्नप्रमाणाभावात् । नच द्विचन्द्रवत्सहोपलंभनियमएवतन्नास्तितायाप्रमाणमितिवाच्यम् , ज्ञानज्ञेययोरभेदासाधकत्वेनाभिमतस्यसहोपलंभस्याप्रयोजकत्वेनसंदिग्धविपक्षव्यावृत्तिकत्वात् । अर्थाद्वेद्यवेदकयोर्यंसहोपलंभःसचोपायोपेयमूलको नत्वभेदमूलकइति । ननुभेदेसहोपलंभनियमात्मकंसाधनंनसंभवतीति चेन्नज्ञानस्यान्तरतयाभेदेन प्रतिभासमानतया, एकदेशत्वैककालत्वलक्षणसहत्वात् नियमासंभवात् । किञ्चनीलाद्यर्थानांज्ञानाकारत्वेऽहमित्येवंरूपेणप्रतिभासोभवेत् ननु नीलंपीतादिकमितिप्रतिभासःस्यात् , प्रतिपन्नप्रत्ययादभिन्नत्वात् नतुवस्तुतोज्ञानस्वरूपोनीलादिपदार्थःशुक्तिरजतवत् , भ्रमाद् बहिर्वद् भेदेन प्रतिभासते, तस्मात्तत्राहमुल्लेखो न भवति, इदंरजतमित्यत्रशुक्तिकोल्लेखवदिति । तदुक्तम्——"परिच्छेदान्तराद्योयंभागोवहिरिवस्थितः । ज्ञानस्याभेदिनोभेदप्रतिभासोऽप्युपप्लवः ॥" इति ।

यदन्तर्ज्ञेयतत्त्वंतद्बहिर्वदवभासते ॥ इति च । तदपि न युक्तम् , यदि वस्तुतोबाह्यार्थोव्यतरिक्ति न भवेत्, तदातदुत्पत्तिरहिततयाबाहर्वदित्येवंरूपेणोपमानोपमेयभावोनैव संभवेत् । नहि देवदत्तोवन्ध्यापुत्रवदवभासते इति कश्चित् प्रयुनक्ति प्रत्येतिवा तथा कश्चित् अपिच भेदप्रतिभासस्यभ्रमत्वेसिद्धेऽभेदप्रतिभासस्यप्रामाण्यंसिद्ध्येत् , अभेदप्रतिभासस्यप्रामाण्ये च भेद प्रतिभासस्यभ्रमत्वमितिपरस्पराश्रयप्रसङ्गआपतति ' अविसंभवान्नीलादिकबाह्यमेवजानानोवाह्यमेवोबादत्तेजगतिउपेक्षतेवाऽवान्तरमितिव्यवस्थादर्शनात् । एवञ्चज्ञानज्ञेययोर्योऽयमभेदसाधकोहेतुःप्रदर्शितःससाध्यसाधनायाक्षम एवेति । ततश्चबहिर्वदितिवदता, वाणं ग्राह्यंमेवेतिभावनीयमितित्वदीयोबाणोभवन्तमेवप्रहरेत् । अथैवमपिज्ञानाभिन्नकालस्यार्थस्यवाह्यत्वंकथमिवोपपन्नमितिचेन्न, इद्रियसंनिकृष्टविषयस्योत्पाद्येज्ञानेस्वाकारसमर्थकतयासमर्पितेनचाकारेणतस्यार्थस्यानुमेयतोपपत्तेः । अतएवदोषतत्परिहारश्चतुल्यावेव भवतः ।

"भिन्नकालंकथंग्राह्यमितिचेदग्राह्यतांविदुः । हेतुत्वमेवचव्यक्तेर्ज्ञानाकारार्पणक्षममिति ।

तथा च पुष्टयाभोजनानुमानं तथैवज्ञानाकारेणविषयोप्यनुमेयः । तदुक्तम्——

"अर्थेन घटयत्येनांनहिभुक्त्वार्द्ररूपताम् । तस्मात्प्रमेयाधिगतेःप्रमाणंमेयरूपते ॥" इति ॥

नहि वित्तिसत्तैवतद्वेदनायुक्ता, तस्याः सर्वत्रसमानत्वात् । तासुवित्तिषुसारूप्यमाविशत्सरूपयितुंघटयेदिति । ततश्चवाह्यार्थसद्भावेऽयंप्रयोगः, ये यस्मिन् सत्यपिकादाचित्काभवन्तिते तदतिरिक्तहेतुसापेक्षाभवन्त्येव । यथाअविवक्षितमपिवचनगमनादिप्रतिभासाविवक्षुप्रभृतिषुपुरुषान्तरसापेक्षाभवन्ति । तथा च विवादाध्यासिताःप्रवृत्तिप्रत्ययाःविद्यमानेप्यालयविज्ञानेकदाचिदेवनीलपीताद्युल्ले-

खना भवति । तत्राहमित्याकारकंविज्ञानमालयविज्ञानम् , एतदेवपुण्यसंस्कारादिविशिष्टंतदेवान्यत्रदर्शने आत्मपदवाच्यं भवति घटादिविषयकं च विज्ञानंप्रवृत्तिविज्ञानपदवाच्यम् । तदुक्तं–

“तत्स्यादालयविज्ञानंयद्भवेदहमास्पदम् । तत्स्यात्प्रवृतिविज्ञानंयन्नीलादिकमुल्लिखेदिति ।

ततश्चालयविज्ञानसन्तानभिन्नःकादाचित्कप्रवृत्तिविज्ञानकारणीभूतोवाह्योघटपटाद्यर्थोग्राह्य एव, नतु वासनापरिपाकप्रत्ययःकादाचित्कत्वात् कदाचिदुत्पद्यते इति । विज्ञानवादिनामतेतुवासनानामेकसन्तानस्थितानामालयविज्ञानानांतत्तत् प्रवृत्तिजननशक्तिःतस्याश्चस्वकार्योत्प्रत्याभिमुख्येपरिपाकःस्तस्य च प्रत्ययःकारणंस्व, ज्ञानपूर्ववर्तिक्षणःस्वीक्रियते [अर्थादेतन्मते, कार्यमात्रेचतुर्विधंकारणम् , अधिपति प्रत्ययःसहकारिप्रत्ययआलंवनप्रत्ययःसमनन्तरप्रत्ययश्च । तत्रप्रदीपाद्यालोकःसहकारिकारणम् , चक्षुरादिकमधिपतिकारणम् , घटादिर्विषयआलंवनप्रत्ययःस्वसन्तानवर्तिपूर्वक्षणःसमनन्तरप्रत्ययः । एभिश्चतुभिःप्रत्ययैःपदार्थाववोधो भवति, उत्पत्तिश्च, एवमेवसर्वत्रैवोहनीयः । तत्र यत्रैकेन कारणेन कार्यंजायतेतत्रहेतूपनिवन्वः यथावीजात्काण्डंकाण्डात् पत्रपलाशादि । यत्रैकंकारणंप्रतिकारणान्तरमेत्य कार्यंकरोतितत्रप्रत्ययोपनिबन्धः, इत्यादिकंसर्वंतदीयशास्त्रादेवज्ञातव्यम्] सन्तानान्तरनिवन्धनत्वाऽनङ्गीकारात् । ततश्चप्रवृत्तिविज्ञानजनकालयविज्ञानवर्तिवासनापरिपाकंप्रतिसर्वेप्यालयविज्ञानवर्तिनःक्षणा समर्था एवेतिमन्तव्यम् , नोचेदेकोपिक्षणःसमर्थो न स्यात् , आलयविज्ञानविज्ञानसन्तानवर्तित्वाविशेषात् । तत्रसर्वेप्यालयवर्तिक्षणाःसमर्थाभवन्तीतिपक्षेकार्यक्षेपोनैव भवेत् । ततश्चकार्यस्यकादाचित्कत्वनिर्वाहायशद्वस्पर्शरूपरसगंधविषयावाह्याआन्तराःसुखादिविषयाश्चषड़पिप्रत्ययाश्चतुरःप्रत्ययान् प्रतीत्य, एकंकारणंकारणान्तरेणमिलित्वैवोत्पद्यन्ते इति वुद्धिमतात्वयाऽनिच्छतापिस्वानुभवमनाच्छाद्य, परिच्छेत्तव्यंज्ञातव्यम् । तेच चत्वारःप्रत्ययाःशास्त्रेप्रसिद्धाःआलंवनप्रत्ययसमनन्तरप्रत्ययसहकारिप्रत्ययाधिपतिप्रत्ययरूपाः । तत्रज्ञानपदवाच्यनीलाद्यवभासस्यचित्तस्यनीलाद्यालंवनप्रत्ययात् । नीलाकारता भवति, समनन्तरप्रत्ययादर्थात्स्वसंतानवर्तिपूर्वक्षणाद्वोधरूपता भवति,सहकारिप्रत्ययादालोकात् , चक्षुषोऽधिपतिप्रत्ययाद् विषयग्रहणप्रतिनियमोभवति, विदितस्यज्ञानस्यरसादिसाधारण्यप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति, लोकेनियामकस्यैवाधिपतित्वदर्शनात् । एवमान्तराणांचित्तात्मकानांसुखदुःखरागद्वेषादीनांचत्वारिकारणानि भवन्तीतिद्रष्टव्यम् । एवञ्चचित्तचैत्तात्मकस्कन्धःपञ्चप्रकारकःरूपविज्ञानवेदनासंज्ञासंस्कारस्कन्धभेदात् । तत्ररूप्यन्ते एभिर्विषयाःशब्दस्पर्शादिकाःरूप्यन्ते इति चेतिव्युत्पत्त्याविषयसहितानिचक्षुरादीनिषडपीन्द्रियाणिरूपस्कन्धः । आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहोविज्ञानस्कन्धः । पूर्वकथितस्कन्धद्वयसम्बन्धजनितःसुखदुःखादिप्रत्ययप्रवाहोवेदनास्कन्धपदवाच्यः । घटादिकोऽयमित्याकारकशद्वोल्लेखसंविद्ज्ञानप्रवाहःसंज्ञास्कन्धपदेनव्यवहृतो भवति,वेदनासम्बन्धनिवन्धनारागद्वेषादयःक्लेशाउपक्लेशाश्चमदमानादयोधर्माधर्मौ च संस्कारस्कन्ध इति । तदेतत्सर्वंदुःखाय-

तनं दुःखकारणंचेतिभावयित्वातन्निरोधोनायंतत्त्वज्ञानमर्जयेत् । अत एवकथितम् “दुःखसमुदयतिनिरोधमार्गाश्चत्वारआर्यस्यबुद्धाभिमतानितत्वानि । तद् द्विविधम् , प्रत्ययोपनिबन्धनहेतूपनिंबन्धनभेदात् ।

तत्रप्रत्ययोपनिबन्धनस्यसंग्राहकंतदीयंसूत्रम् ‘‘इदंकार्यंयेअन्येहेतवःप्रत्ययन्ति” गच्छन्तितेषामयमानानांहेतूनांभावःप्रत्ययत्वंकारणसमवायस्तन्मात्रस्यफलम् , न तदतिरिक्तचेतनस्यैतत्कार्यंफलमितिसूत्रार्थः । यथावीजहेतुरङ्कुरःषण्णांधातूनांसमवायाज्जायते । तत्रपृथवीधातुरंकुरस्यकाठिन्यंगन्धंजनयति । जलधातुस्तु, अंकुरस्यरसंस्निग्धतांचजनयति । तेजोधातुरंकुरस्यरूपमौष्ण्यं च जनयतिं, वायुधातुरंकुरस्यस्पर्शंचलनं च जनयति, आकाशधातुरंकुरस्यावकाशंशब्दं च जनयति, ऋतुधातुर्यथायोगंपृथिवीप्रभृतिकमुत्पादयन्नुपकरोति । हेतूपनिवन्धनस्यसंग्राहकंसूत्रम् “उत्पादाद्वातथागतानामनुत्पादाद्वास्थितैवैषांधर्माणांधर्मताधर्मस्थितिताधर्मनियामकता च, प्रतीत्यसमुत्पादानुलोमतेति । (अस्य सूत्रस्यायमर्थः तथागतानांबुद्धानांमते, धर्माणां=कार्यकारणरूपाणांयाधर्मताकार्यकारणभावरूपा, सैषा, उत्पादानुत्पादाद्वास्थिता, यस्मिन् सतियदुत्पद्यतेतत्तस्यकारणस्यकार्यमिति] [यथाकपालेसति घटःकार्यमुत्पद्यते इति घटःकपालस्यकार्यंकारणता चकपालस्य, कपालसत्वे एवघटोत्पादात् , कपालाऽभावेघटानुत्पादात्] इदं सूत्रस्थधर्मता, इत्यस्यविवरणम् , धर्मस्यकार्यस्यकारणानतिक्रमेणैवसंस्थितिः । धर्मतेत्यत्रस्वार्थिकस्तसिल्प्रत्ययः । धर्म एव धर्मतेति । धर्मस्यकारणस्य कपालादेःकार्यंघटादिकंप्रतिनियामकता, कारणसत्वेएवकार्यंकारणाभावेकार्याभाव इति ।

ननुयत्रयत्रकार्यकारणभावस्तत्रावश्यंचेतनावस्थानंघटेकुलालादिवदितिअवश्यंकश्चिदित्याशंकायामाह, “कारणेसतीति” कारणेसतितत्प्रतीत्य=प्राप्यसमुत्पादेअनुलोमताऽन्वयोऽनुसारिताया, सैवधर्मताउत्पादादनुत्पादाद्वाधर्माणांस्थिता,अर्थादन्वयव्यतिरेकाभ्यांकार्यकारणभावो भवति, न चात्रकश्चिच्चेतनोऽधिष्ठाता भवतीति यथा प्रतीत्यसमुत्पादस्यहेतूपनिन्बधःवीजादंकुरोंऽकुरात् काण्डंकाण्डान्नालोनालात् , गर्भोगर्भात् शूकंततःपुष्पम् , पुष्पात्फलमिति । नचात्रबाह्ये समुदायेकारणंबीजादिकम् कार्यमंकुरादि वा चेतयते । नहिभवतिकारणस्येत्थं ज्ञानंयदहमंकुरमुत्पादयामिनवांऽकुरस्य “अहंवीजेननिर्वर्तितः” इतिज्ञानंभवति, जडत्वादुभयोःकिन्तु तत्समवधानेकार्यंभवतीत्यनादिरेवप्रवाहः । एवमेवाध्यात्मिककार्यस्थलेपिकारणद्वयंहेतुपनिबन्धनरूपं प्रत्ययोयंकारणद्वयमवगन्तव्यम् । विस्तृतविचारस्तुतद्ग्रन्थादेवज्ञातव्यः । तदुभयनिरोधोवातदनन्तरं विमलज्ञानोदय वा मोक्षः । तादृशनिरोधस्योपायोमार्गशब्देनज्ञातव्यः । सचतत्वज्ञानंतच्चपूर्वकालिकभावनावलाद्भवतीति । सूत्रस्यान्तेपृच्छतांशिष्याणांसौत्रान्तिकेतिसंज्ञाजातेति । केचनान्येबुद्धशिष्याः, बाह्येषुशब्दस्पर्शगन्धादिषु, आन्तरेषुरूपादिस्कन्धेषुविद्यमानेष्वपितत्रानास्थामुत्पादयितुं “सर्वशून्यम् ” इति, प्राथमिकशिष्यानकथयत् भगवान्बुद्धस्तथागतः । द्वितीयांस्तुविज्ञानमात्रेआग्रहवतांविज्ञानमात्रमेवसत् तदन्यत्सर्वंमिथ्यैवेतिप्रावोचत् , विज्ञानरूपेऽधिष्ठानेशुक्तौरजतवदेवसर्वमध्यस्तमिति । तृतियंतुयंविज्ञानंविज्ञेयं च सत्यमि-

त्यास्थितं, विज्ञेयंप्रमेयमनुमित्यैवऽवगम्यतेनपुनःप्रत्यक्षेण, क्षणिकत्वेनतावत्कालमनवस्थानात्। सेयंपरस्परंविरुद्धाभाषेति वर्णयन्तोवैभाषिकाख्याताः । एषा हि तेषांपरिभाषाभवति, ज्ञेयपदार्थोऽनुमानेनानुमीयतेइतिमते, प्रत्यक्षसिद्धस्यकस्याप्यर्थस्याभावाद्व्याप्तिग्रहणस्थानाभावेनानुमानप्रवृत्तेरनुपपत्तेः सकललोकानुभवविरोधोपिभवतीत्यतः पदार्थोद्विप्रकारकोग्राह्यश्चाध्यवसेयश्च । तत्रग्रहणंनिर्विकल्पकरूपंयत् तदेवप्रमाणंकल्पनापोढत्वादर्थात्कल्पनारहितत्वात् । अध्यवसायस्तुसविकल्पकरूपोऽप्रमाणं कल्पनारूपत्वात् । तदुक्तम्—

कल्पनापोढमभ्रान्तंप्रत्यक्षंनिर्विकल्पकम् । विकल्पोवस्तुनिर्भासादसंवादादुपप्लवः ॥” इति ।

“ग्राह्यंवस्तुप्रमाणंहिग्रहणंयदीतोऽन्यथा । नतद्वस्तुनतन्मानंशब्दलिङ्गेन्द्रियादिजमिति ॥”

ननुयदि निर्विकल्पकज्ञानमात्रंसविकल्पकंज्ञानं न प्रमाणंतदासविककल्पकप्रत्यक्षानन्तरंघटादिकमुद्दिश्यप्रवृत्तपुरुषस्यकथमर्थप्राप्तिर्भवेत् संवादश्चकथंस्यात् । नहिशुक्तौरजतज्ञानानान्तरं प्रवृत्तस्यपुरुषस्यरजतरूपार्थपाप्तिर्भवति, नवाशुक्तिरजतज्ञानंप्रमाणांतरेणसंवादितंभवतीतिचेन्न, मणिप्रभाविषयमणिविकल्पन्यायेनपरंपरयातत्तदर्थप्राप्तिसंभवेनार्थप्राप्तिसंभवात् । अधिकमन्यत्रद्रष्टव्यम् । नच शिष्याशयानुरोधेनजायमान उपदेशभेदोन सम्प्रदायसिद्धइतिवाच्यम्—वोधिचित्तविवरणेतथाप्रतिपादनात् । “देशनालोकनाथानांसत्वाशयवशानुगाः । भिद्यन्ते वहुधालोकेउपायैर्वहुभिःपुनः । गंभीरोत्तानभेदेनक्वचिच्चोभयलक्षणा । भिन्नापिदेशनाऽभिन्नाशून्यताऽद्वयलक्षणेति । एतन्मतेद्वादशायतनपूजनंमहत्फलमित्यपिप्रतिपादितम् । तत्रद्वादशायतनमित्थम्, पञ्चज्ञानेन्द्रियाणिःतथैवपञ्चकर्मेन्द्रियाणिवाक्पादादिरूपाणि, मनोबुद्धिश्चेतिद्वादशायतनम् । तथा विवेकविलासविवरणेवौद्धमतमित्थं प्रदर्शितम् । अत्रभगवान्वुद्धएवदेवः बाह्यमान्तरंसर्वंजगत् क्षणिकम् । दुःखंतदायतनम्, समुदयोमार्गश्चेतिआर्यसत्ववाच्यंभवति । विज्ञानवेदनासंज्ञासंस्काररूपसंज्ञकाः पञ्चस्कन्धास्तेसंसारिणांदुःखदा इति । ज्ञानेन्द्रियाणि चक्षुरादिकानि, शब्दादिकाःपञ्चतदीयविषयाः । पञ्चमानसंधर्मायतनम् । रागद्वेषादीनांगणआत्मात्मीयस्वभावकः स एव समुदयः । सर्वोपि पदार्थःक्षणिकइत्येवं या स्थिरवासनासमार्गः विमलज्ञानोदयएवमोक्षः । प्रत्यक्षमनुमानमेतद्द्विकमेवप्रमाणम् । अत्रचत्वारोऽवान्तरवैभाषिकादिकाःसन्ति । सकलविप्लवरहितज्ञानमात्रेणावस्थानमेवमोक्षइतिसर्वसंमतम् । तदित्थंक्रमेणआत्मनःकालपरीक्षाप्रकरणे क्षणिकत्वमात्मनोपिकथितम् । सत्वहेतोःक्षणिकत्वस्यव्यवस्थापनंकृतवान्, स्थिरेवस्तुनिक्रमेणयुगपद्वाऽर्थकारित्वस्यासंभवात्, अर्थतःसर्वस्यक्षणिकत्वमेवेतिसर्वान्तर्गतस्यात्मनोपि क्षणिकत्वमेवेत्येवंवौद्धसंमतात्मविचारः संवृत्तःपरन्तुनायंपक्षःसमीचीन इति केचनतत्रेत्थंप्रतिपादयन्ति तथाहि

यदि कदाचिदात्मनामकःस्थिरः कश्चिन्नस्वीक्रियेततदातृप्त्यर्थंभोजनादिसाधनंपारलौकिकफलादिसाधनाययागाद्यनुष्ठानंसर्वथैवानर्थकंस्यात् न चान्येन कर्मकृतंफलंत्वन्योभोक्ष्यतीतिसंभवति,साध्यसाधनयोःसमानाधिकरण्यस्यैवदर्शनात् । तस्माद् “योहंपूर्वमतीतकालेयागपाकादिलौकिकपारलौकिक-

कर्मकृतवान्, सएवाहंसम्प्रतितत्फलंसुखंदु:खंवाऽनुभवन्विद्ये"इत्येवंप्रकारेणपूर्वापरकालान्युस्यूतस्यस्थिरस्यात्मनः सुस्पष्टप्रमाणावगततया, पूर्वापरभागरहितकालकलाऽवस्थितिलक्षणक्षणिकतानैवाभ्युयेतव्या । अथ "प्रमाणवत्वादायात:प्रवाह:केनवार्यते" इतिन्यायेन"यत् सत् तत्क्षणिकंयथामेघमाला"इत्याद्यनुमान प्रमाणेनक्षणिकत्वस्यासिद्धतयातदनुसारेणसजातियसंन्ताननिष्ठानामेवपूर्वप्रत्यय:कार्यस्यपाकयागादे: कर्त्ताभवति, तत्रैवचोत्तरप्रत्ययस्तज्जनितफलस्यभोक्ताभवतीतिकोदोष: । न चातिप्रसङ्ग:कार्यकारणभावस्यैवनियामकत्वात् । यथामधुररसभावितानामाम्रादिवीजानांकर्षितपृथिव्यांप्ररोपितानामङ्कुरकाण्ङस्कन्धशाखाफलादिषुतद्द्वारापरंपरया तदीयफलेपिंमाधुर्यमनुगच्छति, यथावालाक्षाररसावसिक्तायां कार्पासवीजानामङ्कुरादिपरंपरयाकार्पासेपिरक्तिमनियम: । यथोक्तम्--

"यस्मिन्नेवहिसंतानेआहिताकर्मवासना । फलंतत्रैवसंधत्तेकार्पासेरक्ततायथा ॥" इति ।

"कुसुमेवीजपुरादेर्यल्लाक्षादय:सिच्यते । शक्तिराधीयतेकाचित्तांकथंनहिपश्यति ॥" इतिच ।

तदपिनयुक्तम्, विकल्पासहत्वात्, तथाहि,यदिदंमालादिदृष्टान्तेक्षणिकत्वंतदनेनैवानुमानेन साधितम्,अथवाप्रमाणान्तरेणप्रसाध्यते ? तत्र न प्रथम:पक्ष:समीचीन:दृष्टान्तासिद्धे:यतस्तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपक्षणिकत्वस्यान्यत्रप्रसिद्धावपि, भवदभिमतक्षणिकत्वस्यक्वचिदप्यदृष्टचरत्वेन, दृष्टान्तस्यैवासिद्धे: । दृष्टान्तंविनाऽनुमानावतारस्यैवासंभवात्, दृष्टान्ताभावे, साध्यसाधनयो:सहचारस्यादर्शनेनव्याप्तिग्रहाभावेनहेतोरंगविकलतयासाधकत्वशक्तेरेवास्तमितत्वात् । नवाद्वितीयपक्ष:, तथा सतिप्रमाणान्तरेणदृष्टान्तेसाध्यसाधनवत् तेनैवप्रमाणान्तरेणपक्षेपिसाधनसंभवेन सत्व साधकानुमानस्य सर्वथैवनैरर्थक्यमापतेत् । नवार्थकारित्वंभवदभिमतंयुक्तम्, मिथ्यासर्पदंशनेनापिमरणादिदर्शनंतत्र सत्वलक्षणस्यातिव्याप्तेर्थक्रियाकारित्वं यदि सत्वंलक्षणं स्वीक्रियेत तदाकदाचित् रज्जौसर्पज्ञानंमिथ्या रूपंजातंतत्रापितादृशसर्पसंदष्टोम्रियते, तावतातादृशसर्पस्यतदीयसंदसनस्यसत्वं न कश्चिदपिमनुते, सम्प्रतितेनापि, अर्थक्रियादर्शनेनतादृशसर्पस्यतदीयदंसस्यसत्वमापतेत् । तच्चनेष्टमनुभवविरोधात्, लोकविरुद्धत्वाच्चेतिअतोनेदंसत्वलक्षणंकिन्तु उपास्वातिनोक्तम् "उत्पादव्ययुक्तंसदि" त्येवनिर्दुष्टंसत्वम्, अतएवप्रथमत:पदार्थउत्पद्यते तत:स्थीयतेततो विनश्यतीतिलोकानुभवस्तत्रैव, सदिदमिति प्रत्ययव्यवहारौभवत: । ननु यदेववीजंकुशूलनिहितंतन्नोत्पादयत्यङ्कुरम्, तदेवक्षेत्रपतितंजलादिसमवहितमङ्कुरोत्पादने समर्थंसदङ्कुरमुत्पादयतीतिसामर्थ्यासामर्थ्यस्वरूपविरुद्धधर्मवसात् बलादेवक्षणिकत्वसिद्धिर्भवति, अर्थात् कुशुलस्थंवीजमन्यत् तद्भिन्नं च क्षेत्रगतंसहकारिमध्यस्थंततोभिन्नमेवेत्येवंक्रमेणप्रतिक्षणंतद्विनाशेन पदार्थमात्रस्यक्षणिकत्वमायातीतिंचेत्सत्यम्, दृष्टत्वात्, अनेकान्तवादेतदिष्टत्वात् । तथाचोक्तं हेमचन्द्रसूरिणा

"आदीपमाव्योमसमस्वभावंस्याद्वादमुद्रानतिभेदिवस्तु ।
तन्नित्यमेवैकमनित्यमन्यदितित्वदाज्ञांद्विपताप्रलापा: ॥

एतन्मतेनैकान्ततःकश्चिदपिनित्यःनवैकान्ततोऽनित्यः किन्तु द्रव्यरूपेणसर्वोपिपदार्थोनित्यपर्यायरूपेणानित्य एव । अत्रसप्तभङ्गीनःप्रयोगःस्यादस्तिस्वरूपाः—स्यान्नास्तिपररूपेण, स्यादस्ति च नास्ति च स्यादवक्तव्यः । स्यादस्ति च अवक्तव्यश्च । स्यान्नास्ति चाव्यक्तव्यश्च । स्यादस्ति च स्यान्नास्ति चावक्तव्यश्चेति एवं क्षणिकत्वसाधनाययदुक्तंकार्यासादिदृष्टान्तादिकम्,तदपिन युक्तं तत्र युक्तेरनुक्तेः । तत्रापिनिरन्वयविनाशस्यानंगीकारात् । नवासंतानिसंतानिव्यतिरिक्तःकश्चित्संतानः प्रमाणसिद्धः । तदुक्तम्—

“सजातीयाःक्रमोत्पन्नाः प्रत्यासन्नाःपरस्पररम् । वक्तयस्तासुसंतानःसचैकइतिगीयते ॥”इति ।

नवामृगमदवासनावासितवसनेव, पूर्वक्षणावस्थितसंस्कारस्योत्तरसजातीयक्षणान्तरेषुसंक्रमणेनपूर्वक्षणानुभूतस्योत्तरकालिकक्षणेनस्मरणादिकंस्यादिति, ऐहिकपारलौकिकयात्रायानिर्वाहःस्यादितिसंभवति, संस्कारादेरपिभावतयाक्षणिकत्वेनतत्संक्रमासंभवात् । नचोत्तरस्मिन्नुत्पत्तिरेवसंक्रमस्तदुत्पादकाभावात् । तथा मात्रानुभूतस्यपुत्रेणापिस्मरणप्रसङ्गात् । नवाकार्यकारणाभावोऽतिप्रसङ्गनिवारकःसंभवति, गुरुणानुभूतस्यशिष्येणापिस्मरणप्रसङ्गात् । ततश्चकृतप्रणाशाकृताभ्यागमप्रसङ्गात् । साध्यसाधनयोर्वैयधिकरण्येऽयंदोषःप्रभवति । तदुक्तम्— कृतप्रणाशाकृतकर्मभोगभवप्रमोक्षःस्मृतिभङ्गदोषान् । उपेक्ष्यसाक्षात् क्षणभङ्गमिच्छन्नहोमहासाहसिकःपरोऽयमिति । तस्मान्नक्षणभङ्गवादो युक्तियुक्त इति ॥

अपिच क्षणभङ्गवादेज्ञानकालेऽर्थस्यज्ञेयस्यासत्वेन, ज्ञेयकालेज्ञापकज्ञानस्याविद्यमानत्वेन च तयोरर्थज्ञानयोग्राह्यग्राहकभावानुपपत्तौसकललोकयात्रोऽस्तमियात् । नच ज्ञानज्ञेययोःसमानकालिकत्वमेवेतिवाच्यम् ,तथात्वेसव्येतरविषाणवत्कार्यकारणभावएवनस्यात् :कार्यत्वपरकालभावित्रिभवतिकारणंतुपूर्वकालिकंभवति, कार्यनियतपूर्ववृत्तिकारणम्, कार्याव्यवहितानन्यथासिद्धपूर्वकालिकमेवकारणम्, एवञ्च समानकालिकेपूर्वापरकालवृत्तित्वस्याभावेनसंव्येतरविषाणवत्, यथाकार्यकारणभावोज्ञानज्ञेययोर्नस्यादित्यतःक्षणभङ्गवादोनयुक्त इति । अथ भिन्नकालिकस्यापिविषयस्यज्ञानाकारसमर्थकतयाग्राह्यत्वं स्यात् आकारसमर्थकत्वस्यैवग्राह्यत्वंप्रतिप्रयोजत्वनियमान्नतुभिन्नकालिकत्वसमानकालिकत्वयोःप्रयोजकत्वमित्यपि न युक्तियुक्तम्, क्षणिकविज्ञानस्यविज्ञानस्याकारार्थकताश्रयतायादुर्वचत्वेनसाकारज्ञानवादेप्रत्यादेशेननिराकारज्ञानवादेपियोग्यतावलादेवप्रतिकर्मव्यवस्थायाःस्थितत्वात् ।

तथाहिप्रत्यक्षेणविषयाकाररहितमेवज्ञानंप्रतिपुरुषंघटपटादिविषयतयानुभूतं भवति । नतु आदर्शादिवत् प्रतिविम्बाक्रान्तंज्ञानमनुभूयते । तथात्वेविषयाकारधारितत्वेन च ज्ञानस्यार्थेदूरसमीपादिव्यवहारविलोपप्रसङ्गात् । न चेदमिष्टम् दवीयान् महीधरोनेदीयान् दीर्घोबाहुरितिव्यवहारस्यनिर्वाधजागरुकत्वात् । नचाकाराधायकस्यविषयस्यदवीयस्त्वादिशालितया तथा व्यवहारः स्यादित्यपिकथनंसमीचीनम् दर्पणादौतादृशव्यवहारस्यानुपलंभात् । अपिच विषयादुत्पद्यमानंविज्ञानं यथा विषयस्यनीलाद्याकारमनुकरोति तथा यदि विषयनिष्ठजडतामपिधारयेत् तदाऽर्थवदेवज्ञानमपि-

जडंविज्ञानमपिजडात्मकमेवभवेदिति । वृद्धिमिच्छतोमूलमपिनष्टमितिन्यायापातात् । ननुज्ञानमर्थगतजडतानांनानुकरोतीतियदुच्यतेतदातादृशजडताया अग्रहणं न स्यात्, इति एक दोषपरिहारायक्रियमाणउपायोदोषान्तरमावहतीतिन्यायापातः स्यात्। ननु मा भवतु जडताया, ग्रहणंतावत्ताकोदोषः ? तदग्रहणेपिग्रहणेऽपिनलाकारग्रहणेतयोर्भेदो नैकान्तोवाभवेत्, नीलाकारग्रहणेचागृहीताजडताकथंतस्यानुरूपं स्यात् । अन्यथागृहीतस्यस्तंभस्यागृहीतंत्रैलोक्यमपिरूपंभवेदिति । बौद्धमतं न समीचीनमपितुजैनमतंसमीचीनंतदेवाश्रयणीयम् । एतन्मतेजीवाजीवास्रवबन्धमोक्षादिकाःपदार्थाअनेकेसन्ति । नास्तिकश्चिदेकोजगतःकर्ताइत्यादिकमपिबहुप्रपञ्चितमित्येवंजैनीयग्रन्थादेवविभज्यसर्वंज्ञातव्यम् ।

एवञ्च“कण्टकेनकण्टकमुद्धरेदिति” न्यायेनाचार्योबोधमतस्यजैनमास्थायनिराकरणंकृतवान् । तदेतदपिमतंवेदविरोधात्, एकस्मिन्धर्मिणीविरुद्धसत्वासत्वयोर्युगपदभ्युपगमात्, नैव समीचीनम् । तथाहिकथमेतन्मतंप्रमाणिकतांग्रहीतुमर्हति, एकस्मिन् वस्तुनिपरमार्थेसतिपारमार्थिकानांसत्वासत्वादि धर्माणांयुगवत्समावेशासंभवात् । नच परस्परविरुद्धयोःसत्वासत्वयोःसमुच्चयासंभवेविकल्पःस्यादिति वक्तव्यम्, क्रियैवविकल्प्येतनतुवस्तुनिर्विकल्पइतिन्यायात् । नच नरसिंहदृष्टान्तेनसर्वंजगदनेकान्तात्मकमेवेतियुक्तम् एकस्मिन् देशेसिंहत्वमपरस्मिन् नरत्वमितिदेशभेदमास्थायविरोधाभावेनतस्यैकस्मिन् देशे एवसत्वासत्वादिनाऽनेकोन्तत्वकथनेदृष्टान्तत्वाउनुपपत्तेः । अथद्रव्यत्वेनरूपेण सत्वंपर्यायात्मनातदभावइत्येवमुभयमपिसमुपपद्यतेएव, यथाएकस्मिन्नेववृक्षेवृक्षत्वेनकपिसंयोगो मूलाद्यवच्छेदकभेदेनतदभावस्योपपत्तिवदितिमैवम्, कालभेदेनकस्यचित्सत्वं च स्वभाव इति स्वीकारेऽदोषात् । न चैकस्यहृस्वत्वदीर्घत्ववत्सर्वत्रानेकान्तत्वं न दोषायेतिवाच्यम्, तत्रप्रतियोगिभेदेन विरोधाभावात् गुरुत्वशिष्यत्ववत् तस्मात् प्रमाणाभावात् युगपत्सत्वासत्वेपरस्परविरुद्धेएकस्मिन् पदार्थेविद्येतेइतिवक्तुंन कोपि प्रभवति । अपि च सर्वस्यवस्तुनःकारणरूपःसप्तभङ्गिनय एव, स च स्वयमेकान्तोऽनेकान्तो वा ? प्रथमपक्षे“सर्वमनेकान्तमितिप्रतिज्ञाव्याघातात्, यतएकान्तस्यानेकान्तत्वाभावात् । न द्वितीयपक्षोपिसमीचीनः तथा च विवक्षितसर्वानेकान्तस्यासिद्धेः, अनेकान्तत्वेनसाधकत्वासंभवात् । अपि च नवत्वसप्तत्वादिनिर्धारणस्यनिर्द्धारणफलस्यतन्निर्द्धारणकर्तुःप्रमातुप्रमाकरणस्यप्रमाणस्यतत्फलस्य नवत्वसप्तत्वादेर्नियमोनस्यादिति, तीर्थङ्करोपदेशस्यनैरर्थक्यमेवापपति ।

एवंयदिजीवस्यशरीरपरिमाणत्वस्वीकारेयोगप्रभावबलेनयोगिनामनेकपरिग्राहकमनुष्यकीटपतङ्गादिजीवेषुप्रतिशरीरेजीवविच्छेदःप्राप्नुयात्, यतोमनुष्यपरिमाणोजीवोगजादिदीर्घदेहंकृत्स्नंप्रवेष्टुं न प्रभवेत् । अपिचयदागजशरीरारंभकायुः कर्मणोऽवसानेतच्छरीरंपरित्यज्यपिपीलिकायोनिप्रापककर्मवशात्प्राप्तपिपीलिकाशरीरस्तंपिलिकायशरीरंप्रविशतस्तस्य पूर्वगजीयशरीरसन्निवेसविनाशोपिप्राप्नुयात् । नच प्रदीपप्रभाविशेषःकुटीरसादाद्युदरवर्तिसंकोचविकाशवान्भवति,अर्थात्पूर्वशरीरापेक्षयागन्तव्यशरीरस्याल्पपरिमाणत्वं आत्मनःप्रवेशस्तत्रसंकुचति,गन्तव्यशरीरस्यमहत्वेतत्रात्मप्रदेशोविकाशतांप्राप्नोति, तत-

श्चगन्तव्यशरीरंकृत्स्नतयाप्रविशति,तेन नकोपिदोषःस्यादितिवाच्यम् । एवंसतिसंकोचविकाशशालितयाऽत्माविकारवान्स्यात् विकारित्वेचानित्यःस्यादात्माप्रदीपादिवदेव। एवञ्चमनुष्यशरीरपरिमाणेनयत् शुभा शुभंकर्मोपार्जितंतादृशकर्मणआश्रयविनाशेनविनाशोजातस्तथायत् कर्म न कृतवान् , तादृशकर्मणएवफलं शरीरान्तरेणोपभोक्ष्यतीतिकृतप्रणाशाकृताभ्यागमदोषयोर्निवारणं कथंकरिष्यतीतिचिन्तनीयं भवति नचायं दोषोजैनस्यापीष्टापादकः, यतःक्षणभङ्गमतनिरासप्रकरणेतेनकथितम् तथाहि— "कृतप्रणाशाकृतकर्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् । उपेक्ष्यसाक्षात्क्षणभङ्गमिच्छनहोमहासाहसिकःपरस्ते ।" इति । एवञ्चजीवाजीवयोस्तत्रप्रधानभूतपदार्थयोर्निराकरणात् तन्मतंनिरस्तमेव । तस्मात् नित्यनिर्दोषश्रुति विरुद्धत्वात्तन्मतंनोपादेयंश्रेयस्कामैः। अतएवभगवतावेदव्यासेनापिकथितंपरमतनिराकरणप्रवाहे, "नैकस्मिन्नसंभवात् "इतिसूत्रेण । (एकस्मिन्वस्तुनिनित्यानित्यत्वद्रव्यत्वपर्यायत्वभावत्वादीनांसमावेशो न संभवति, विरुद्धधर्माणांयुगपदेकत्रसमावेशासंभवादिति । तत्सूत्रंजैनमतनिराकरणपरत्वेन व्याख्यातं तन्मतानुयायिभिःश्रीबोधायनादिविशिष्टाद्वै-तमतप्रवर्तकाचार्यैं जगद्गुरुश्रीरामानन्दाचार्जयैरपिस्वसिद्धान्तानुकूल्येनजैनमतनिराकरणपरत्वेन "नयुक्तोऽनेकान्तवादोजैनानामिति । कुतः ? एकस्मिन्वस्तुनिनित्यत्वानित्यत्वसत्वासत्ववक्तव्यत्वावक्तव्यत्वादीनांपरस्परविरुद्धानो धर्माणामसंभवात् । नहिसमेषांपदार्थानांविरुद्धधर्माक्रान्तत्वंसम्भवति । तद्धियौगपद्येनदेशकालावस्थाभेदेन वा ? आद्येऽसम्भवात् ॥ द्वितीयेसिद्धसाधनात् । नित्यपदार्थानाञ्चप्रकारद्वयेनापिनानैकान्त्यम् । तस्मादसङ्गतमयुक्तञ्चजैनदर्शनम् " (आनन्दभाष्यम्२/२/३३) इत्यादिरूपेणव्याख्यातम् । तदेवं श्रीरामानन्दाचार्यदर्शननिदर्शनम्—

"प्रधानक्षेत्रज्ञपतिर्गुणेश इति च श्रुतौ । प्रधनजीवब्रह्मेतितत्त्वत्रयंसमीरितम् ॥३॥
अचेतनंप्रधानंहितत्रचत्रिगुणंजडम् । ब्रह्मणाधिष्ठितंतच्चजगतःकारणंमतम् ॥४॥
अजडश्चेतनोजीवोजगद्व्यापारवर्जितः । अजडंचेतनंब्रह्मजगज्जन्मादिकारणम् ॥५॥
जीवश्चप्रकृतिर्ब्रह्मदेहत्वाद्धिविशेषणे । शरीरीचोभयोर्ब्रह्मविशिष्टंतद्द्वयेन च ॥६॥
ननुरामेशरीरित्वाद्भोक्तृता सुखदुःखयोः । न ह वै सशरीरस्य, प्रमाणंचात्रवर्त्तते ॥७॥
मैं वं दुःखादिभोक्तृत्वेशरीरित्वं न कारणम् । किन्तुपापादिवैशिष्ट्यंभूपालश्चौरयोरिव ॥८॥
सूक्ष्माचिच्चिद्विशिष्टःश्रीरामोब्रह्माहकारणम् ॥ स्थूलचिच्चिद्विशिष्टस्तुकार्यंब्रह्मसभापितः ॥९॥
द्वयोर्विशिष्टयोश्चाथकार्यकारणरामयोः । सदेवसौम्येदमग्रआसीदितिश्रुतौयतः ॥१०॥
ऐक्यमापदितंतस्माच्छ्रीमद्बोधायनोमुनिः । येन च सुमतं श्रौतं विशिष्टाद्वैतसंज्ञकम् ॥११॥
अखिलःश्रुतयोद्वैतेचाद्वैतेसङ्गतानहि । विशिष्टाद्वैतवादेतुसर्वास्तासङ्गिगताः ॥१२॥
अद्वैतबोधिकाः काश्चित्काश्चिद्द्वैतावबोधिकाः । घटकश्रुतयःकाश्चिदन्तर्यामिप्रबोधिका ॥१३॥
अप्रामाण्यंभवेत् तासांविरोधेऽभिमतेमिथः । विशिष्टाद्वैतिभिस्तासांक्रियतेऽतःसमन्वयः ॥१४॥

अद्वैतश्रुतयोबोध्याविशिष्टब्रह्मबोदिका: । नान्यश्रुतिमतानांहितत्त्वानांप्रतिषेधिका: ॥१५॥
परंब्रह्मचतद्वाच्यंत्वद्वाच्यंत्वच्छरीरकम् । तत्त्वमसीतिवाक्येनतूक्तोऽभेदस्तयोर्द्वयो: ॥१६॥
द्वैतश्रुतिसमूहस्तुविद्वद्भि:संमत:खलु । चिदचिदीशतत्त्वानांपार्थक्येनावबोधक: ॥१७॥
आत्मत्वमीश्वरस्याथचिदचितोश्चदेहता । सर्वाभिर्विनिवेद्येतेघदकश्रुतिभि:किल ॥१८॥
वेदान्ततत्त्वविद्भिश्चकार्यकारणभेदत: । चिदचिद्भ्यांविशिष्टंतुब्रह्म च द्विविधंमतम् ॥१९॥
स्थूलाचिच्चिद्विशिष्टंहिब्रह्मकार्यंप्रकीर्तिमम् । सूक्ष्मचिच्चिद्विशिष्टंतुब्रह्मकारणमुच्यते ॥२०॥
अद्वैतंमन्यतेप्राज्ञैर्ब्रह्मणोश्चविशिष्टयो: । विशिष्टाद्वैतसिद्धान्तस्तस्माच्छ्रुत्यनुमोदित: ॥२१॥
अतएवास्मदाचार्यवोधायनादिसंमत: । विशिष्टाद्वैतसिद्धान्तोलोकेविजयतेतराम् ॥२२॥
(श्रीबोधायनमतादर्श:) इत्यादिकम् ।

अपरेशंकरानुयायिनस्तु,सकलविशेषप्रत्यनीकंचैतन्यमात्रंब्रह्मैवपरमार्थिक:पदार्थ: । तत्तुब्रह्मनित्य शुद्धबुद्धसर्वदामुक्तस्वभाववदपि "तत्त्वमस्यादिमहावाक्यसामानाधिकरण्यगतजीवभिन्नं बद्ध्यते मुच्यते च,नतुयथोक्तब्रह्मभिन्नोनामकश्चित्पारमर्थिक:पदार्थ: । एतदतिरिक्तानेकप्रकारकभोक्तृभोग्यादिप्रपञ्च समुदायस्तादृशब्रह्मणि, माययैवपरिकल्पित इतिसर्वेपिकाल्पनिका एव "सदेवसोम्येदमग्रेआसीदेकमेवाद्वितीयम्" इतिवचनप्रामाण्यात् । "तरतिशोकमात्मवित्" इत्यादिश्रुतिवचनेननिर्विशेषब्रह्मात्मैकत्व विद्यया, अनाद्यविद्यानिवृत्तिंमन्यन्ते, तथा "मृत्यो:समृत्युमाप्नोति" इत्यादिनिन्दाश्रवणेनपारमार्थिकं भेदं-नानुमन्यन्तेइत्थंभूतावादिन:"ईश्वरचिदचिद्विभागमेवश्रौतमिति न स्वीकुर्वन्तिभवेदेवंतदीयकथनंयुक्तंयदि, अविद्यायांकिंचित् प्रमाणंभवेत् । नच "अनादिभावरूपंयद्विज्ञानेनविलीयते । तदज्ञानमितिप्राज्ञालक्षणं सम्प्रचक्षते" । इतिवचनादनादिंभावरूपंज्ञाननिवर्त्यम्, अहमज्ञोमामहंनजानामीतिप्रत्यक्षसिद्धमेवाज्ञानमितिवाच्यत्, भावातिरिक्ताभावानंगीकरान्मीमासकै: । यदुक्तमभियुक्तै:"स्वरूपपररूपाभ्यां नित्यं सदसदात्मके । वरतुनिज्ञायतेकिञ्चित् कैश्चिद्रूपंकदाचन । भावान्तरमभावोन्योनकश्चिदनिरूपणादिति । अभावस्यानुपलब्धिप्रमाणमात्रवेद्यत्वेनज्ञानस्य च नित्यानुमेयतयाप्रत्यक्षप्रमाणविषयत्वासंभवात् । यस्तु, अभावस्यप्रत्यक्षविषयतांमन्तव्य: स एवं प्रष्टव्य: "अहंमित्याकारकानुभवे, अहंपदवाच्यस्यात्मनोऽभावाधिकरणतया, ज्ञानस्यचप्रतियोगितयाभानंभवति नवा ? प्रथमपक्षस्वीकारेज्ञानतदभावयो: परस्परं विरुद्धतयायदाज्ञानाधिकरणमात्मातत्समयेज्ञानाभाववान् न स्यात्, एवं प्रतिविद्ययाज्ञानस्यतत्रसत्वेतदभावज्ञानंचकथंस्यात् । यदिपूर्वधर्मिज्ञानंनास्ति, नवाप्रतियोगिभूतंज्ञानंमस्ति इतिद्वितीयपक्षस्तदाप्यभावज्ञानंस्यात्, यतोऽभावज्ञानस्यधर्मिप्रतियोगिवोधपराधीनत्वात्, नहिभवत्यज्ञातेधर्मिणिप्रतियोगिज्ञानाभावे च भूतलाद्यधिकरणेघटाभावस्यप्रत्ययत्वम् । तत्कस्यहेतो: ? अभावज्ञानस्यधर्मिप्रतियोगिवोधपराधीनत्वादेव । अत एवसुषुप्तौघटाभावादयोन प्रत्यक्षाभवन्तीत्युक्तिरपिसंगतेति । तस्मादज्ञानस्यभावरूपत्वे स्वीकारेतुपूर्वोक्तदूषणाभावादयमभावोभावरूपाज्ञानविपयकएवनत्वभावरूपाज्ञानविषय: ।

तदेतदद्वैतमतंनोयुक्तम् , भावरूपत्वेस्वीक्रियमाणेपिज्ञानाभावसमानयोगक्षेमत्वात् , तथाहि विषयविधयाऽश्रयतया च ज्ञानस्यव्यावर्तकतयाप्रत्यगर्थआत्माप्रतिपन्नो नवा ? प्रतिपन्नइतिप्रथमपक्षे स्वरूपज्ञाननिवर्त्यंतदज्ञानमितितस्मिन्नात्मनि प्रतिपन्नेसति तदज्ञानंकथमिवावस्थितंस्यात् सूर्योदे शार्वरंतमोवदिति न प्रथमःपक्षःसाधीयान् । प्रत्यगर्थआश्रयविषयतया न प्रतिपन्नइतिद्वितीयपक्षस्वीकारेतु, व्यावर्तकाऽश्रयविषयरहिताज्ञानस्यानुभव एव न स्यात् । ननुविशदात्मस्वरूपाभासएवज्ञानविरोधिना ज्ञानोनाभासितइति, आश्रयविषयज्ञानस्यविद्यमानत्वेपिनाज्ञानानुभवविरोधइतिचेत्सत्यम् , एवं ताहअज्ञानस्यज्ञानाभावपक्षेप्येतत्समानमेवान्यत्रस्वपक्षपातात् । तस्मादुभयवादिसंमतज्ञानाभावएव "अहमज्ञोमामन्यं च न जनामीत्याकारकानुभवविषयइतिस्वीकर्त्तव्यम् , ततश्चज्ञानाभावरूपमज्ञानंतुभावरूपंतत् । एवमज्ञानस्यभावत्वप्रमापकप्रमाणाभावादपिभावरूपत्वं नकथमपिसंभवतीतिसंक्षेपः ।

ननुयदिभावरूपाज्ञानेप्रत्यक्षंप्रमाणंनास्ति, भवदपिनतत्साधकंतदाऽनुमानेनैव तत्सिद्धिरेष्यताम् , विवादास्पदंप्रमाणज्ञानंस्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् , अप्रकाशितार्थप्रकाशकत्वात् , अन्धकारेप्रथमोत्पन्नप्रदीपप्रभावदित्यनुमानमेवतत्साधकमिति—तन्न युक्तम् अज्ञानेप्यनभिमताज्ञानान्तरसाधनेऽपसिद्धान्तप्रसङ्गादनवस्थानाच्च । अज्ञानान्तरासाधने, व्यभिचारात् साधनविकलत्वाच्चदृष्टान्तप्रदीपप्रभायाः । नहिप्रदीपप्रभायाअप्रकाशितार्थप्रकाशकत्वं संभवति, जडतयाप्रकाशकत्वाभावादपितुज्ञानस्यचेतनतयातस्यैवप्रकाशकत्वात् , यतः प्रदीपस्यविद्यमानत्वेपिज्ञानेनविषयप्रकाशसंभवात् , प्रदीपप्रभायास्तुचक्षुरिन्द्रियस्यज्ञानंसमुत्पाद्यतो विरोधिनिविडान्धकार नरसनद्वारेणोपकारकत्वमात्रमेवभवति, नतुकिमपितत्रविशेषान्तरमुत्पादयति । अपिचअज्ञानसाधकानुमानेसत्प्रतिपक्षोपिभवति, "विवादाध्यासितमज्ञानम् , न ज्ञानमात्रब्रह्माश्रितम् , अज्ञानत्वात् शुक्तिकाद्यधिष्ठानाद्यज्ञानवत् " इति । अथशुक्तिगताज्ञानस्याश्रयस्यप्रत्यगर्थस्य ज्ञानमात्रस्वभावत्वमितिचेत्सत्यम् , अनुभूतिर्हिस्वसद्भावेनैवकस्यचित्पदार्थस्यव्यवहारानुगुणत्वापादकस्वभावा, ज्ञानावगतिसंविद्विद्याऽपरनामासकर्मकानुभवितुरात्मत्वंज्ञानत्वमित्याश्रयणात् । ननु ज्ञानस्वरूपस्यात्मनःकथंज्ञानगुणवत्त्वमितिचेत्तदप्यल्पमेव, यदाहिमणिदिनमणिप्रभृतितेजोद्रव्यंप्रभावद्रूपेणावतिष्ठानंप्रमारूपगुणाश्रयोभवति, स्वाश्रयादन्यत्रापिवर्तमानतयारूपत्वेन च प्रमाद्रव्यस्यापितच्छेषत्वंनिवन्धनगुणव्यवहारा:' एवमयमात्मा स्वप्रकाशचिद्रूप एव चैतन्यगुणकस्तथाचश्रुतिः "यथासैन्धवघनोऽनन्तरोबाह्यःकृत्स्नोरसघनएव, एवं वाऽरेआत्माऽनन्तरोबाह्यःकृत्स्नःप्रज्ञानघनएव, अत्रायंपुरुषःस्वयंज्योतिर्भवति, नविज्ञातुर्विज्ञातेर्विज्ञातेर्विपरिलोपो विद्यते, नद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वात् । अथयोवेदेदंजिघ्राणीतिसआत्मायोऽयंविज्ञानमयः प्राणेषुहृदयन्तर्ज्योतिःपुरुषः एषहिद्रष्टाश्रोतारसयिताघ्रातामन्ताबोद्धाकर्ताविज्ञानात्मापुरुषः" इत्यादिश्रुतिरपिविशिष्टाद्वैतमेवपोषयति ।

नच "अनृतेनप्रत्यूढा" इतिश्रुतिरविद्यायांप्रमाणमितिवाच्यम् , अभिप्रायानवबोधात् , अत्र

ऋतेतरविषयोह्अनृतशब्दः ऋतशब्दस्तुकृतशुभाशुभकर्मबोधकः "ऋतंपिबन्तौसुकृतस्यलोकेगुहांप्रविष्टौ परमेपरार्द्धे" इतिवचनात् । ऋतंकर्मफलाभिसंधिरहितंसांसारिकाल्पफलकं परमपुरुषाऽराधनतयैवपरमेश्वरप्रापकंभवतीति । अत्र तु तदतिरिक्तंसांसारिकाल्पफलकंशुभाशुभंकर्म, अनृतम् ब्रह्मप्राप्तिविरोधि "य एतंब्रह्मलोकंनविन्दन्तिअनृतेनप्रत्यूढा" इतिवचनात् एवं"मायातुंप्रकृतिंविद्यादित्यादौमायाशब्दो विचित्रार्थसर्गकर्तृत्रिगुणात्मकप्रकृत्यभिप्रायकएव नतु अनाद्यनिर्वचनीयभावात्मकब्रह्मदर्शनविरोध्यज्ञानपरकः किन्तु यथावर्णितप्रकारकएवेति ।

"तेनामायासहस्त्रंतच्छम्बरस्याशुगामिना । बालस्यरक्षतादेहमेकैकञ्चाविशोधितम् ॥"

इत्यादिपुराणादौ विचित्रार्थसर्गसमर्थस्यपरमार्थिकस्यैवासुराद्यस्त्रविशेषस्यैव मायाशब्दवाच्यतायाःसमुपलंभात् । तस्मात्कदाचिदपिपूर्वोक्ताःश्रुतयोऽनिर्यचनीयं भावात्मकमज्ञानं नप्रतिपादयन्ति । अपितुमदुक्तार्थवोधिकाएवेति ॥

नवा "तत्वमसीति"श्रुतिप्रतिपादितजीवेशयो रैक्योपदेशानुपपत्त्या, उक्तवाक्यघटकतत्पदत्वंपदयोः सविशेषब्रह्मवाचकत्वेनविरुद्धयोस्तयोर्जीवेशयोः स्वरूपैकत्वस्यगृहीतुमशक्यतयाऽर्थापत्तिप्रमाणस्यानुदयदोषदूषितत्वात्—तथाहितत्पदंजगदुत्पत्तिस्थितिलयस्वभावकंब्रह्मप्रतिपादयति, यतः "तदैक्षतबहुस्यां प्रजायेय"इत्यादिश्रुतिषुतादृशब्रह्मण एव प्रक्रान्तत्वात् । समानाधिकरणत्वंपदंवाचिद्विशिष्टंजीवशरीरक ब्रह्माभिधीयतेप्रकारद्वयविशिष्टैकवस्तुपरत्वात्सामानाधिकरण्यस्य । "नच यथासोयंदेवदत्त" इत्यत्र, पूर्वदेशकालविशिष्टदेवदत्तवाचकतत्पदस्य, एतद्देशकालविशिष्टदेवदत्तोपस्थापकेदंपदस्यविरुद्धत्वादैक्यं न संभवतीति तत्रविरुद्धांशयोःपरित्यागेनलक्षणतदुभययोरविरुद्धदेवदत्तयोः सामानाधिकरण्यंयथाभवति तथा तत्वमसीत्यत्रापिविरुद्धजीवत्वेशत्वंपरित्यज्याविरुद्धचैतन्ययोरेकत्वंभागलक्षणयाकुतोनस्यादितिंवाच्यम् ,—दृष्टान्तस्यविषमत्वात् , सोयंदेवदत्तइतिदृष्टान्तेपि विरोधाभावेन भागत्यागलक्षणायाःसमावेशासंभवात् , एकस्यमूर्तादेःपदार्थस्यतावत् , भूतवर्तमानकालद्वयसम्बन्धोनविरुद्धः । यतोदेशान्तरस्थितिरेवभूनता, संनिहितदेशस्थितिश्चवर्तमानता, इतिदेशभेदसम्बन्धविरोधःकालभेदेन परिहृतोभवति । लक्षणास्त्रीकारपक्षेपि एकस्यैवपदस्यलक्षकत्वमाश्रित्यविरोधपरिहारसंभवे, तत्त्वमोरुभयोःपदयोर्भागत्यागलक्षणा स्वीकारोयुक्तिसंगतोनभवतिं । अन्यथा, एकस्यैवपदार्थस्यतत्तेदन्ताविशिष्टत्वावगाहनेनप्रत्यभिज्ञा प्रमाणस्य प्रामाण्यास्वीकारेजगतःस्थायित्वासिद्धौ क्षणभङ्गस्यैवसाम्राज्यमवस्थितंस्यादिति साधुक्तवानद्वैत वादीजीवेशयोर्नित्यतांमन्वानोपिं ।

सोयंदेवदत्तइतिवदेव, प्रकृतेपिजीवेशयोःशरीरात्मभावेनतादात्म्यं किं न स्यात् , अर्थात्तयोस्तादात्म्यंघटते एव । जीवात्माहिपरमात्मनोब्रह्मणःश्रीरामस्यशरीरतयाप्रकारत्वाद् ब्रह्मात्मक एव तदुक्तम् "य आत्मनितिष्ठन् आत्मनोऽन्तरोयआत्मा नवेदयस्यात्माशरीरम्" इति श्रुत्यन्तरात् । न केवलं जीवब्रह्मणःशरीरम् , किन्तु सर्वोपिजीवाजीवपदार्थोब्रह्मणःशरीरमेवेतिघटादिशब्दा अपि ब्रह्मणोवाचका

एव । देवमनुष्यादिस्थलेदेहादिवाचकशब्देनमनुष्यवाचकः । इहापि तथैवज्ञातव्यमिति । न चं तर्हिंसर्वशब्दानांपर्यायत्वंस्यान्नतुभिन्नार्थकत्वमितिवाच्यम् द्वारभेदसंभवात् । तथाहि-मनुष्यादिजीवस्य शरीरतयाप्रकारभूतानिदेवमनुष्यादिदेहसंस्थानानीवसर्वंवस्तूनीतिसर्वाण्यपिब्रह्मात्मकान्येवभवन्ति ।तस्मात् “देवोमनुष्योयक्षोवापिशाचोरगराक्षसाः । पक्षीवृक्षशिलाशैलंघटादिःपट एव च” । इतिदेवादिकाः सर्वेशब्दाःप्रकृतियोगेनवाचकतयालोकेप्रसिद्धास्तद्वाच्यतयाप्रतीयमानतत्तत्संस्थानवद्वस्तुद्वारेणतदभिमानि जीवतदन्तर्यामिपरमात्मपर्यन्तसंस्थानस्यवाचकाः । तदेतत्

“जगत्सर्वंशरीरंतेस्थैर्यंतेवसुधातलम् ” “विश्वरूपस्य ते राम? विश्वशब्दाहिवाचकाः”

इत्यादिमहर्षिवाल्मीक्युक्तेस्तथा—

“शुद्धाविशुद्धभिदयाद्विविधश्चसत्वं कालोमतिर्गतमतेरचितःप्रभेदाः ।
साकेतनित्यपरधामपदाभिधेयं सत्वंविशुद्धमजडंप्रकृतेर्विभिन्नम् ॥४॥
नित्याऽकृतिर्गुणवतीप्रकृतिःपरार्था तथ्या च मूलमहदादिकभेदभिन्ना ।
भूतादिकव्यवहृतेर्जनकोहिंकालो नित्या विभुर्भुवननाथवपुर्जडश्च ॥५॥
नित्या तथा सविषयाजडताविहीना विभ्वीमतिर्मदयाप्रभृतिस्वरूपा ।
प्रामाण्यमत्रसुमतंस्वतएवचास्या याथार्थ्यकंविषयसत्यतयातथा च ॥६॥

इत्यादिप्रकारकजगद्गुरुश्रीमङ्गलाचार्योक्तेश्चव्यज्यते ।

अयमेवार्थःसमर्थितोवेदार्थचन्द्रिकाप्रकरणे,नामरूपश्रुत्यर्थप्रकाशनप्रकरणेआचार्यवरेणजगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्येणतदर्थस्तुततएवावगन्तव्यइतिदिक् अपिचप्रमाणमात्रस्यसविषयविषय कत्वस्वभावेन निर्विशेषवस्तुनिब्रह्मणि न किमपि प्रमाणं विद्यते निर्विकल्पकप्रत्यक्षे सविशेषमेववस्तुप्रतीतं भवति। अन्यथासविकल्पकप्रत्यक्षे“सोयमिति”पूर्वप्रतिपन्नप्रकारविशिष्टप्रतीतेरनुपपत्तिरेवस्यात् । किञ्च“तत्त्वमसि, अहंब्रह्मास्मि”इत्यादिमहावाक्यमपि न भवतिकथमप्याकाशादिप्रपञ्चस्यवाधकंभ्रममूलकत्वात् । भ्रमप्रयुक्तशुक्तिरजतवाक्यवत् , अर्थात् यन्मते चेतनाचेतनंसर्यमपिवस्तुब्रह्माज्ञानमूलकत्वात् भ्रमात्मकमेव, किञ्चपरमेश्वरस्वर्गमोक्षादिकंसर्वमपिभ्रममूलकएवतदासर्वस्यभ्रमत्वेसर्वान्तर्गतवेदवाक्यादेरपिभ्रमत्वेनेदंरजतमितिवाक्यमपिरजतादेर्वाधकं न, तथाऽभेदोभ्रमत्वादेवभेदभ्रमवाधकोनस्यादितिसुष्ठुव्याख्यातंतैः । अमुंभेदमाश्रित्यकथितमभियुक्तैः—

“भेदापह्नवलोभेनभेदंविधिनिषेधयोः । स्वयंसमर्थयन्मूर्खःस्ववाग्वज्रेणताड़ितः ॥” इति ।

नचब्रह्मात्म्यैकज्ञानंप्रपञ्चस्यवाधकंसंभवतिः, प्रमाणाभावात् , प्रमाणत्वस्यापिअज्ञानमूलकत्वेनैवासाधकत्वात् नहि भवति, शशशृङ्गधनुषावन्ध्यापुत्रस्यविनाशोयत् उभयोरप्यसत्त्वदिहापिवाध्यवाधकयोः समानतयाकःकंहन्यादितिभावः । नचाकाशादिप्रपञ्चसत्यत्वेकस्मिन् विज्ञातेसर्वमिदंविज्ञातंस्यादितिप्रश्नप्रतिवचनप्रवाहेएकस्मिन्ब्रह्मणिविज्ञातेसर्वमिदंविज्ञातंभवतीत्येकविज्ञानप्रतिज्ञासावाधितास्यादिति

वक्तव्यम्, यतःप्रकृति पुरुषमहत्तत्वाहंकाराकाशादितन्मात्रभूतेन्द्रियचतुर्दशभुवनात्मकब्रह्माण्डतदन्तर्गतदेवदैत्यदानवमनुष्यकीटपतङ्गस्थावरादिसर्वप्रकारसंस्थानसंस्थितंनिखिलंकार्यजातमपिब्रह्मरूपमेवेतिसर्वकारणभूतपरब्रह्मज्ञानादेव, अर्थात् सर्वकारणब्रह्मणिज्ञातेध्यानेनसाक्षात्कृतेसाक्षात्कृतेसति, तादृशपरमेश्वरस्यज्ञानादेवसर्वविज्ञानं भवतीत्येवंप्रकारेणैकविज्ञानेनसर्वविज्ञानप्रतिज्ञापिंसमुपपादिताभवत्येव जगत्सत्यतामतेपितदामुधैवबौद्धनयानुसरणेनानिर्वचनीयत्वमज्ञानजन्यत्वस्वीकारेणेति । अत एवैनंप्रच्छन्नबौद्धोऽयमितिलोकाः सङ्गिरन्ति ।।

किञ्च ब्रह्मभिन्नस्याकाशादिप्रपञ्चस्यस्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरूपज्ञानवाध्यत्वरूप मिथ्यात्वस्वीकृतेःसर्वस्यप्रपञ्चस्यासत्वादेकविज्ञानेनसर्वविज्ञानप्रतिज्ञासुतरामेववाध्येत, यतोनामरूप विभागानार्हसूक्ष्मदशावत् प्रकृतिंपुरूपादिसरीरकंपरब्रह्मैव कारणावस्थंसदवशिष्यते,जगतस्तादृशदशापत्तिरेवप्रलयः तथा नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरकंब्रह्मकार्यावस्थम्, ब्रह्मकार्यावस्थंब्रह्मणस्तथाविधस्थूलभावापत्तिरेवसर्गशब्देनाभिंधीयमानंसृष्टिरिति, नातोऽन्यतिरिक्तंकश्चिदन्यःप्रलयःसर्गोवा । एवञ्चकार्यकारणयोरनन्यत्वं “तदनन्यत्वमारंभणशब्दादिभ्यः” इत्यत्रारंभाधिकरणेयदुपपादितंतदप्युपपन्नतरंभवति । तत्रहि—आनन्दभाष्यकाराउपसंहारे “यथावायुरितित्रिवृत्कृतोवायुरेकएवस्थानविशेषमास्थायप्राणापानादिसंज्ञांलभमानः कार्यान्तराणिविधत्तेतथैवसूक्ष्मचिदचिच्छरीरंब्रह्मापीहस्थूलचिदचिच्छरीरंभवज्जगदित्याख्यांलभतइतिजगतोब्रह्मानन्यत्वंसिद्धम्” इति । “निष्कलंनिष्क्रियंशान्तंनिरवद्यंनिरञ्जनम्:’ इत्यादिकाब्रह्मणिनिर्गुणत्वप्रतिपादिकाश्रुतयस्तु न गुणसामान्याभावंब्रह्मणिप्रतिपदयन्ति, किंन्तुप्राकृतिकाविवेकिभिर्हातुंयोग्याहेयगुणास्तानेवगुणाभासान् विवेकिसमाहतान् निषेधन्ति । ये चभगवतःस्वाभाविकाःकल्याणागुणास्तेषांनिषेधं न कुर्वन्ति “योसौनिर्गुणःप्रोक्तःशास्त्रेषुजगदीश्वरः । प्राकृतैर्हेयसत्वाद्यैर्गुणैर्हेयत्वमुच्येत” इतिपुराणरत्नोक्तेः । तदादुराचार्याःश्रीआनन्दभाष्ये “तस्मात्प्राकृतगुणाकारयोरसत्वेननिर्गुणत्वंनिराकारत्वंदिव्यस्वासाधारणगुणाकारवत्वेन च सगुणत्वंसाकारत्वंचैकस्यैवब्रह्मणउपपन्नतरमिति न कश्चिद्विरोधः”(१।१।२)

“मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीत्यादिश्रुतिबोधितनानात्वनिषेधस्तु, एकस्यैवपरब्रह्मणःश्रीसीतानाथस्य, शरीररूपत्वात् प्रकारभूतंनिखिलंजडचेतनात्मकंवस्त्वितिसर्वस्यैवपदार्थजातस्यात्मतयासर्वप्रकारकंब्रह्मैवावस्थितमितिसर्वात्मकब्रह्मपृथग्भूतवस्तुसद्भावनिषेधपरत्वेनताःश्रुतयःसमर्थिताः श्रीआनन्दभाष्यकारप्रभृतिप्राचीनाचार्यैरिति न कुत्रापिदोषलेशोपि भवति । अथकिमत्रवस्तुत्वंभेदोवाऽभेदोवा, अथवाभेदात्मकंसर्वंवातत्वमिति, तत्रसर्वंशरीरकतयासर्वप्रकारकं ब्रह्मैवावस्थितमितिदृष्ट्या सर्वस्याभेद एवस्वीक्रियते । एवमेव तथाविधंब्रह्मनानाभूतचिदचित् प्रकारकंनानात्वेनावस्थितमित्येवंभेदाभेदौ, चिदचिदीश्वराणांस्वरूपस्वभाववैलक्षण्यादसंकराच्चसर्वत्रभेद एव प्रतिभाति । तत्रचेतनस्वभावकानांजीवात्मनामसंकुचितापरिच्छन्ननिर्मलज्ञानरूपाणामनादिकालिकशुभाशुभात्मककर्मरूपाविद्यापरिगृहीतानांतत्तत्कर्मानुकूलज्ञानसंकोचविकाशौभवतः ।

भोग्यभूताचित्भोक्तासंसर्गस्तदनुगुणसुखदुःखोभयभोगवताकृतापरमेश्वरप्रतिपत्तिःपरमेश्वरप्राप्तिप्रभृतिकाःस्वभावाः । अचिद्वस्तूनांतुभोग्यभूतायामचेतनत्वंस्वतोऽपुरुषार्थत्वंविकारशालित्वादिकाः स्वभावाः । परमेश्वरस्य तु भोक्तृभोग्ययोर्द्वयोरन्तर्यामितयाऽवस्थानमपरिच्छेद्यज्ञानैश्वर्यवीर्यशक्तितेजःप्रभृत्यनवस्थितिकासंख्येयकण्याणगुणाकरत्वसत्यसंकल्पप्रवृत्तस्वेतरसमस्तचिदचिद्वस्तुजातास्वाभिमत—स्वानुरूपैकरूपदिव्यरूपनिरतिशयविविधानन्तभूषणेत्यादिस्वभावः । तदाहुःश्रीआचार्यचरणाःस्ववेदान्तसारे-

“पृष्टानामेकमाद्यंत्रिकमपिशृणुतद्भेदतोनामभेदैर्नित्याऽज्ञाऽचेतनासाप्रकृतिरविकृतिर्विश्वयोनिश्शुभैका ।
नानावर्णात्मिकाजात्रिगुणसुनिलयाऽव्यक्तशब्दाभिधेया निर्व्यापारापरार्थामहदहमितिसूरुच्यतेतत्त्वविद्भिः
नित्योज्ञश्चेतनोऽजःसततपरवशःसूक्ष्मतोऽत्यन्तसूक्ष्मो भिन्नोवद्धादिभेदैःप्रतिकुणपमसौनैकधासूरिवर्य्यैः ।
श्रीशाक्रान्तालयस्थोनिजकृतिफलभुक्तत्सहायोऽभिमानीजीवःसंप्रोच्यतेश्रीरघुपतिसुमते ? तत्त्वजिज्ञासुवेद्यः
विश्वंजातंयतोऽद्धायदवितमखिलंलीयतेयत्रचान्ते सूर्योयत्तेजसेन्दुःसकलमविरतंभासयत्येतदेषः ।
यद्भीत्यावातिवातोऽवनिरपि सुतलंयातिनैवेश्वरोज्ञः साक्षीकूटस्थएकोवहुशुभगुणवानव्ययोविश्वभर्ता ॥
श्रीमानर्च्यःशरण्योवहुविधविबुधैर्योगिगम्याङ्घ्रिपद्मोऽस्पृश्यःक्लेशादिभिःसत्समुदितसुयशाःसूरिमान्योवदात्यः
शश्वच्छ्रीरामचन्द्रः सुमहितमहिमासाधुवेदैरशेषैर्निर्मृत्युः सर्वशक्तिर्विकलुषविजरोगीर्मनोभ्यामगम्यः ॥
(श्रीवैष्णवमताब्जभास्करे १। ६–७–८–९) इत्यादि । प्रकृतश्लोकस्याक्षरविशिष्टतत्त्वंतुमदीयप्रभाकिरणव्याख्यातोऽनुसन्धेयम् ।

तत्र, ये कर्मविशिष्टाः कर्मोपलक्षिताश्चित् पदवाच्याः सभेदाजीवात्मानस्ते परमात्मभिन्नास्तथा परस्परमपि भिन्ना नित्याश्च । तथा च श्रुतिः “द्वासुपर्णा सयुजासखायाः समानं वृक्षं परिषस्वजाते। तयोरन्यःपिप्पलंस्वाद्वत्तिअनश्नन्नन्योऽभिचाकशीति ” । तथा “ऋतंपिवन्तौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे । छायातपौब्रह्मविदोवदन्तिपञ्चाग्नयोयेचत्रिणाचिकेताः ” इत्यादि । अत एवोक्तम्— “नानात्मानोव्यवस्थातः” इति ये इमेकर्मफलभोक्तारोजीवात्मानस्तेसर्वेविभिन्नाएवनत्वेकात्मवादः । अन्यथाज्ञानित्वाज्ञानित्ववद्धमुक्तादिव्यवस्था न स्यात्, तदनेकत्वेश्रुतिप्रमाणितसर्वापिव्यवस्थाव्यवस्थिताभवतीति । जीवात्मानां नित्यत्वमपिश्रुत्यादिप्रसिद्धमेव । तथा च श्रुति

“नजायतेम्रियतेवाविपश्चिन्नायंभूत्वाभविताव्नभूयः।अजोनित्यःशाश्वतोऽयंपुराणोनहन्यतेहन्यमानेशरीरे
वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि ।
तथा शरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही ।” एवं
“वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथंसपुरुषव्याप्रकंघातयतिहन्तिकमिति ॥”

यदि कदाचित् कश्चित् देहात्ममोहवशादनित्यंमन्येत, तदातच्छिरसिकृतनाशाऽकृताभ्यागमप्रसङ्गदोषआपतितोभवेत् तस्मादयंजीवोभगवच्छरीरभूतो नित्य एवेति ॥

अत एवगोतमेनापिकथितम् "वीतरागजन्मादर्शनात्" निर्मुक्तसकलाविद्यादिक्लेशस्य जन्ममरणादिकंनैवभवतीतिसूत्रार्थः। तथाऽयंजीवोनव्यापकोनवामध्यमपरिमाणोऽपितु अणुपरिमाणकएवव्यापकत्वेउत्क्रान्तिगत्यागतीनामनुपपत्तेः । द्वितीयेदेहविनाशेतत्परिमाणकजीवस्यापिविनाशेकृतनाशाकृताभ्यागमप्रसङ्गात् । नाहउपाधिभेदेनसमाधानम्, उपाधिभेदस्योपधेयभेदाप्रयोजकत्वात्, नहिपाणौ वृक्णेमहत्यवयवेवास्तनादौजातेयुवतिर्मृताजातावेतिव्यवहारोभवतीति । नचाणुपरिमाणे, शरीरैकदेशेऽवस्थितस्यसर्वाङ्गीणसुखाद्युपलब्धिर्नस्यादितिवाच्यम्, हरिचन्दनविन्दुवत् तत्समाधानसंभवात् यथा शरीरैकदेशेसंलग्नोपिचन्दनविन्दुः सकलशरीरगतमाल्हादंजनयतितथैवशरीरैकदेशेसमवस्थितोपिजीवो धर्मभूतज्ञानप्रभयाऽनुभावयति, मणिप्रदीपप्रभावदेवेति । श्रुत्यापिजीवस्याणुत्वंसमर्थितम्—तथाहि "बालाग्रसतभागस्यशतधाकल्पितस्य च । भागोजीवःसविज्ञेयःसचानन्त्यायकल्पते" तथा "आराग्रमात्रःपुरुषोऽणुरात्माचेतसावेदितव्यः" इतिच ।

अत्रचाचित् पदवाच्यंदृश्यमर्थात् ज्ञानविषयीभूतंजड़ात्मकंजगत् तत्सर्वंत्रिविधम्, भोग्यभोगोपकरणभोगायतनभेदात्, तदेवान्यत्रशरीरेन्द्रियविषयभेदात् त्रिविधमितिकथितम्।एतस्यजगतोऽभिन्ननिमित्तोपादानकारणंतु ईश्वरपदार्थःक्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषश्रीरामसीतानाथादिपुरुषोत्तमादिपदवाच्यः।

"रामएवपरंब्रह्मरामएवपरंतपः । रामएवपरंतत्वंश्रीरामोब्रह्मतारकम् ॥"
"रामदेवःपरंब्रह्मकल्याणगुणसंयुतः । भुवनानामुपादानंकर्त्ताजीवनियामकः ॥" इत्याद्युक्तेः ।

स एवसर्वेश्वरश्रीरामचन्द्रोदयासागरः समाभ्यधिकविवर्जितोभक्तवत्सलोभक्तपराधीनोमर्यादापुरुषोत्तमःस्वोपासकेभ्यउपासनानुकूलतत्तत्फलप्रदानायलीलयैवार्चाविभवव्यूहसूक्ष्मान्तर्यामिभेदेनपञ्च प्रकारेणावतिष्ठते । तत्रार्चानामप्रतिमादयः । नारायणाद्यवतारोविभवः । व्यूहश्चतुर्विधो, वासुदेव संकर्षणप्रद्युम्नानिरुद्धभेदात् सूक्ष्मंसम्पूर्णषड्गुणकंश्रीरामाख्यंपरंब्रह्मशब्दितम् । गुणा अपहतसत्यसंकल्पत्वादिकाःश्रुतिप्रसिद्धाः "सोऽपहतपाप्माविरजोविमृत्युर्विशेकोऽविजिघित्सः सत्यकामःसत्यसंकल्पः" इति श्रुतेः।अन्तर्यामी सकलजीवनियामकः"यआत्मनितिष्ठन्"पृथिव्यांतिष्ठन्इत्यत्रसम्पूर्णोप्यन्तर्यामिब्राह्मणोद्रष्टव्यः। तत्रप्रतिमादिपूर्वपूर्वेमूर्तेरुपासनेक्रियमाणेधर्मकामादिपुरुषार्थप्रापकदुरितकर्मणोविनाशेसति,तदुत्तरोत्तरमत्युपासनादौभवत्यधिकारउपासकस्य । एतत्प्रकृतस्वरूपंमहताप्रबन्धेनसहस्रश्लोकात्मकश्रीबोधायनमतादर्शाख्यमहाप्रबन्धेजगद्गुरुश्रीपूर्णानन्दाचार्येणप्रपञ्चितमत्रनप्रतन्यतेप्रबन्धगौरवभयादतस्ततएवानुसन्धेयं विशेषार्थिभिः । तथैवान्यत्राप्यभियुक्तैः—

"रामचन्द्रः स्वभक्तेषुवात्सल्यात्तत्तदीहितम् । अधिकार्य्यानुकूल्येन प्रयच्छति फलं बहु ॥"
"तदर्थंलीलयास्वीयाःपञ्चमूर्तीःकरोतिवै । प्रतिमादिकमर्चास्यादवतारास्तुवैभवाः ॥"
"संकर्षणोवासुदेवःप्रद्युम्नश्चानिरुद्धकः । व्यूहश्चतुर्विधोज्ञेयः सूक्ष्मंसम्पूर्णषड्गुणम् ॥"
"तदेवरामचन्द्राख्यंपरंब्रह्मनिगद्यते । अन्तर्यामीजीवसंस्थोजीवप्रेरकउच्यते ॥" इति ।

"सचात्मनीतिंवेदान्तवाक्यजातैर्निरूपितः । अर्चोपासनयाक्षिप्तेकल्मपेऽधिकृतोभवेत् ॥"
विभवोमासनेपश्चाद्व्यूहोपास्तौततःपरम् । सूक्ष्मेतदनुशक्तःस्यादन्तर्यामिणमीक्षितुम् ॥" इत्यादि

भगवतोरामचन्द्रस्योपासनं च पञ्चप्रकारकंभवति। तदुक्तंनारदीयपाञ्चरात्रे—"अभिगमनमुपादानभिज्यास्वाध्यायोयोगः"इति। तत्राभिगमनंदेवस्थानमार्गस्य च संमार्जनोपादानादिनापरिष्करणम् । उपादानंचन्दनपुष्पादिपूजोपकरणसम्पादनम् । इज्यानामदेवपूजनंतदर्थंहोमादिकम् । स्वाध्यायोनाम, अर्थानुसन्धानपूर्वकतन्मन्त्रजपोवेदोक्तसूक्तादिपाठोनामसंकीर्तनादिकम्, तत्वप्रतिपादकवेद शास्त्राभ्यासश्च । योगश्चित्तवृत्तिनिरोधरूपः । सच "यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाधिभेदादष्टविधः । समाधिद्विविधःसंप्रज्ञातोऽसंप्रज्ञातश्च । तत्रयमनियमादिसमाधीनांस्वरूपं लक्षणमवांन्तरभेदाश्चयथाक्रमंयोगशास्त्रादेवज्ञातव्याः । सम्पूर्णमपियोगशास्त्रमत्रैवार्थेउपक्षीणम् । एवमुपासनकर्मसमुचितेन विज्ञानेनद्रष्ट्दर्शनेविनष्टेसतिभगवद्भक्तस्य ब्रह्मनिष्ठस्यभक्तवत्सलोरामचन्द्रःपरमकारुणिको मर्यादापुरुषोत्तमः स्वयथार्थानुभवानुगुणनिरवधिकनित्यनिरतिशयानवधिकानन्तरूपंपुनरावृत्तिरहितं स्वपदं ददाति । "न स पुनरावर्तते"इतिश्रुतेः स्मृतिरपि——

"आब्रह्मभुवनाल्लोकाःपुनरावर्तिनोऽर्जुन । मामुपेत्यतुकौन्तेयपुनर्जन्मनविद्यते ॥
मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतम् । नाप्नुवन्तिमहात्मानःसंसिद्धिपरमांगताः ॥"
"स्वभक्तंरामचन्द्रोयसम्प्राप्यानन्दमक्षयम् । पुनरावृत्तिरहितंस्वीयंधामप्रयच्छति ॥"इति ।
"सकृदेवप्रपन्नायतवास्मीतिचयाचते । अभयं दसर्वभूतेभ्योददाम्येतद्व्रतंमम ॥'
"सत्यसन्धःप्रतिश्रुत्यप्रपन्नायाभयंस्वयम् । निवर्त्तयेद्भयेनैनंश्रीरामःश्रितवत्सलः ।" इतिच ।

तदेतत् सर्वंपूर्वापरानुसंधानेनाकल्य्यश्रीरामतापिनीयमहोपनिषदानुसारेणच, श्रीबोधायनाचार्यापरपर्यायश्रीपुरुषोत्तमाचार्यकृतब्रह्मसूत्रवृत्तिमतिविस्तीर्णांसंक्षिप्य लोकोपकारायजगद्गुरुश्रीरामानन्दाचार्यःशारीरकमीमांसाशास्त्रीयभाष्यंप्रणिनायानन्दभाष्यनामकम् । तत्रन्यासप्रथमसूत्रस्य **अथातोब्रह्मजिज्ञासा** इत्यस्यायमर्थःसंक्षिप्यप्रदर्शित आचार्येण । तत्राथशब्दःपूर्वप्रवृत्तकर्माधिगमस्यानन्तर्य्यंदर्शयति— तदुक्तंबोधायनेन "वृत्तात्कर्माधिगमादनन्तरंपश्चात् ब्रह्मविविदिषतीति । अतःशब्दःसूत्रघटकः अधीतसांगसरहस्यवेदस्याधिगतवेदार्थस्यागमापायिस्वर्गादिफलाद्विरक्तस्यनिवृत्तैषणत्रयस्येतिकारणात् । स्थिरमोक्षस्यज्ञानानन्दलक्षणस्येच्छांकुर्वतः तादृशमोक्षोपायभूतब्रह्मजिज्ञासाभवति । ब्रह्मपदार्थस्तुस्वभावतोनिर्गलितनिखिलप्राकृतहेयगुणकोऽनवधिकातिशयानन्तकल्याणगुणोमर्यादापुरुपोत्तमोरामएवेति । तदुक्तमाचार्येण "ब्रह्मशब्दश्चमहापुरुपादिपदवेदनीयनिरस्ताखिलदोपमनवधिकातिशयसंख्येयकल्याणगुणगणंभगवन्तंश्रीराममेवाह । सामान्यवाचकानांपदानांविशेपार्थेपर्यवसानात् । तदाहवृत्तिकारः "विशेषार्थेनसमान्यार्थोऽवसीयत इति (वो.वृ.)"

ततश्च "अग्निष्टोमादिनिष्कामज्ञानस्य,तादृशकर्मानुष्ठानस्य चैहिकपारलौकिककलत्रस्वर्गादिविषयेषु वशीकारसंज्ञकवैराग्यपर्यन्तवैराग्यजननद्वारेणतथाज्ञानोत्पत्तिप्रतिवन्धकदुरितकर्मनिरासनद्वाराब्रह्मज्ञानं कारणतया "ज्ञानमुत्पद्यतेपुसांक्षयात्पापस्यकर्मण:" इतिवचनेनब्रह्मज्ञानंप्रतिकारणत्वात्, इतितयो:कर्मज्ञानयोकार्यकरणत्वेनतादृशकर्मज्ञानवोधकशास्त्रयो: कार्यकारणत्वेनैकशास्त्रत्वमेवायातिनतुतयो:पार्थक्येनशास्त्रद्वयत्वम् । अत एवबोधायनेनवृत्तिकृताकथितम् "एकमेवेदंशास्त्रंजैमिनीयेनषोडशलक्षणेनेति । यत्कर्मणांसकामानांफलमैहिकं पारलौकिकंब्रह्मलोकान्तंतद्विनाशिफलकम्।ब्रह्मज्ञानफलंतुनित्यंनिरतिशयञ्च भवति । तदपिश्रुत्यैवविज्ञापितं भवति "परीक्ष्यकर्मचितान्लोकान् ब्राह्मणोनिर्वेदमायान्नास्त्यकृत:कृतेन तद्विज्ञानार्थंगुरुमेवाभिगच्छेत्समित्पाणिश्रोत्रियं ब्रह्मनिष्ठम् " इति । अत्र ब्राह्मणग्रहणात्ब्राह्मणानामेवप्रव्रज्यायामधिकारोनेतरेपामितिफलति।अन्येतु "ब्राह्मणग्रहणंचात्रद्विजानामुपलक्षणम् " इतिवचनात् त्रैवर्णिकानामधिकार इतिवदन्ति । अद्यतनीया:केचनसर्ववर्णानामधिकार इतिवदन्त:शिष्यबुद्ध्यासमागतान् द्रव्यादिलोभंदत्वासर्वानिवदीक्षयन्ति, शास्त्रमर्यादापरिणामाद्यविमर्शका: । केवलस्यकर्मण:केवलस्यज्ञानस्य च निन्दाश्रवणात्, कर्मसमुचित ज्ञानस्यैवमोक्षसाधनत्वंश्रुतिर्दर्शयति ।। अन्धंतम:प्रविशन्तियेऽविद्यामुपासते । ततोभूयइवतेतमोयेऽविद्यायामेवरता: । विद्याञ्चाविद्याञ्चयस्तद्वेदोभयंसह । अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुते"इत्यादि । यद्यप्यत्रविद्यापदेनोपास्तिज्ञानंविवक्षितं "विद्यांब्रह्मोपासनात्मिकाम्" (आनन्दभाष्यम्) इत्याचार्योक्तेर्नतुपरमात्मज्ञानम्, यतस्तयो: प्रकाशतमोवद्विरोधेनसमुच्चयासंभवात् । तथापिप्रौढिवादेनवक्ष्यमाणप्रकारेण कथितं पुन:कुत्रचित् विचारसिष्यामि ।

तदुक्तंनारदपांचरात्ररहस्ये—

सएवकरुणासिन्धुर्भगवान्भक्तवत्सल: । उपासकानुरोधेनभजतेमूर्तिपञ्चकम् ।।
तदर्चाविभवव्यूहसूक्ष्मान्तर्यामिसंज्ञकम् । यदाश्रित्यैवचिद्वर्गस्तत्तज्ज्ञेयंप्रपद्यते ।।
पूर्वपूर्वोदितोपास्तिविशेषक्षीणकल्मष: । उत्तरोत्तरमूर्तीनामुपास्त्यधिकृतोभवेत् ।।
"एवंह्यहरह:श्रौतस्मार्तधर्मानुसारत: । उक्तोपासनयापुंसांरामचन्द्र:प्रसीदति ।।
प्रसन्नात्माहरिर्भक्त्यानिदिध्यासनरूपया । अविद्याकर्मसंघातरूपांसद्योनिवर्तयेत् ।।
तत:स्वाभाविका:पुंसांतेसंसारतिरोहिता: । आविर्भवन्तिकल्याणा:सर्वज्ञत्वादयोगुणा: ।।
एवंगुणा:समाना:स्युर्मुक्तानामीश्वरस्यच । सर्वकर्तृत्वमेवैकंरामेदेवेविशिष्यते ।।
"मुक्तास्तुशेपिणिब्रह्मण्यशेपेशेपरूपिण: । सर्वानश्नुवतेसहतेनविपश्चितेति ।।"

एतस्मात्कारणात्, प्रज्वलत्संसारदावानलदग्धाशिरस्कैर्विवेकिभिरमृतत्वप्राप्तयेमर्यादापुरुपोत्तमादिवाच्यंसर्वेश्वरश्रीरामाख्यंपरब्रह्मजिज्ञासितव्यमित्युक्तं भवति प्रथमसूत्रेणेति । तत्र प्रकृप्रिप्रत्ययौ प्रत्ययार्थंप्रधान्येनसहब्रूतइत:सनोऽन्यत्रेतिवचनबलादिच्छायाइष्यमाणप्रधानत्वात्, इष्यमाणंज्ञानमेवेहविधेयम् , तज्ज्ञानंध्यानोपासनादिपदवाच्यंवेदनमेव, नतुतत्त्वमस्यादिवाक्यजन्यमापातज्ञानम् , तादृश-

ज्ञानस्यपदसंदर्भश्राविणोव्युत्पन्नस्यविधानंविनापिप्राप्तत्वात् । “आत्मावारेद्रष्टव्यःश्रोतव्योमनन्तव्यो निदिध्यासितव्यः” “आत्मेत्येवोपासीत” “विज्ञायप्रज्ञांकुर्वीत” “अनुविद्यविजानातीत्यादिश्रुतिभ्यः । अत्र “श्रोतव्य” इत्यत्रनविधायकस्तव्यत्प्रत्ययोऽपित्वनुवादक एव । “स्वाध्यायोऽध्येतव्य” इत्यध्ययनप्रापकेनसाङ्गस्यस्वाध्यायपदवाच्यवेदशमुदायस्यग्रहणेसमधीतवेदस्यपुरुषस्य प्रयोजनवदर्थदर्शनात्तन्निर्णयार्थंस्वभावत एव श्रवणेप्रवर्तमानतयाश्रवणस्यप्राप्तत्वात् । मन्तव्य इति अनुवादएवश्रवण प्रतिष्ठापकमनस्यापिप्राप्तत्वादेव । “अप्राप्तेशास्त्रमर्थवदितिन्यायात् । ध्यानंतुतैलधारावदविच्छिन्नस्मरणसन्तानरूपाध्रुवास्मृतिः“स्मृतिप्रतिलंभेसर्वग्रन्थीनांविमोक्षः” इतिध्रुवायाःस्मृतेरेवमोक्षकारणतयाश्रवणात् । सेयंस्मृतिर्दर्शनसमानाकारैव । “भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वशंशया”इत्यादिश्रुत्यैकत्वात् । एवञ्च ‘‘आत्मावारेद्रष्टव्यः” इत्यनेनास्यदर्शनरूपताविधीयते । यद्यपिदर्शनस्मरणयोविभिन्नत्वात् समानाकारता न संभवति तथापिभावनाप्रकर्षात् स्मृतेर्दर्शनरूपत्वसंभवात् । तदेतत् श्रीवोधायनवृत्तिकारेणप्रपञ्चितम् “वेदनमुपासनंस्यादित्यादि”ग्रन्थेन । एतदेवध्यानंविशेषयतिश्रुतिः “नायमात्मा प्रवचनेनलभ्यो न मेधयानवहुनाश्रुतेन यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनुंस्वामिति”मुण्डकोपनिषत् । अतिशयेनप्रियइतिप्रियतमस्तादृशएवपदार्थोवरणीयो भवति । ततश्चयथाऽयंजीवोऽतिशयेनप्रियतमंपरमात्मानंप्राप्नोति, तथा स्वयमेवभगवान् श्रीरामएवप्रियतमइतिभगवतावासुदेवेनकथितं गीतायाम्—“तेषां सततयुक्तनांभजतांप्रीतिपूर्वकम् । ददामिबुद्धियोगं तं येनमामुपयान्ति ते ।।इति।। “पुरुषः स परःपार्थ ! भक्त्यालभ्यस्त्वनन्यया” इति।।

इत्यादिनाप्रवचनकेवलज्ञानादीनामसाधनतांभगवत्प्राप्तौनिषेध्यपराभक्तेरेवभगवत्प्राप्तौसाधनतामुदाजहार साचभक्तिर्द्विविधापरापरभेदात्, तत्रपरैवभक्तिःसाधनम् । तदतिरिक्ताध्ययनप्रवचनादीन् “नाहंवैदेर्नतपसा नदानेन न चेज्यया । शक्य एवं विधं द्रष्टुं दृष्टवानसिमां यथा” इत्यादिनाप्रतिषिध्यतदनन्यभक्तेरेवपरमात्मप्राप्तावुपायत्वंनिर्धारितवान् । तत्र “भज् सेवायामितिधातोःक्तिन् प्रत्यये भक्तिपदंनिष्पन्नं भवति । सातुभक्तिर्निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरविषयकतृष्णारहितज्ञान विशेषरूपैव । “सा च भक्तिःपरमप्रेयोभगवदितरवैतृष्ण्यपूर्वकपरमपुरुषानुरागरूपोज्ञानविशेषएव”इतिभाष्यकारोक्तेः । एतादृशभक्तेसिद्धिश्चविवेकादिभ्योभवतीतिवाक्यकारेणश्रीवोधायनाचार्येणकथितम् । “तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यःसंभवान्निर्वचनाच्चेति ।।”तत्रविवेकोनामा सत्व दुष्टादन्नात् सत्वस्यान्तःकरणशद्धितस्यशुद्धिर्निर्मलत्वमिति । अत्रनिर्वचनम्“आहारशुद्धौसत्वशुद्धिः सत्व शुद्धौध्रुवास्मृतिः” [अन्नमयं हि सोम्यमनः” इत्यादिश्रुत्याऽन्तःकरणस्यपार्थिवत्वमवगतमितियादृशंशुद्धमविशुद्धंवाऽन्नमुपभुज्यतेतादृगेवान्तःकरणं भवति । नदुक्तं “दीपोभक्षयतेध्वान्तंकज्जलं च प्रसूयते । यदन्नंभक्ष्यतेनित्यंतादृशीजायतेप्रजाः । इत्यशुद्धाहारग्रहणेमनसोनिर्मलत्वंनयाति, अपितु समलमेवतद्भवतीत्यशुद्धेमनसि नो भवतिध्यानंतस्मात् शुद्धाहारस्यैवध्यानप्रयोजकत्वंकथितंयोगतन्त्रे] विमोकस्तु “कामानभिष्वङ्गः” इति । एतन्निर्वचनं “शान्तउपासीततज्जलानिति । अभ्यासस्तु,

उपात्तस्यवस्तुनः पुनःपुनःसंशीलनम्" एतस्यनिर्वचनंतु "ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यते" इत्यादि श्रुतिः "यं यं वापिस्मरन् भावं त्यजत्यन्तेकलेवरम् । तं तमेवैतिकौन्तेय सदा तद्भावमावित इति । स्मृतिः । क्रियानाम, श्रौतस्मार्तकर्मणाम्, अग्निहोत्रवाजपेयादीनांकामनारहितानांमनुष्ठानंयथाशक्तिरत्र निर्वचनम् "क्रियावानेषब्रह्मविदांवरिष्ठ" इति । कल्याणानिसत्यार्जवदयादानादीनि, एतस्य निर्वचनम् "सत्येनलभ्यतेआत्मेति । "दीनतायाविपर्ययोऽनवसादः" एतस्यनिर्वचनम् "नायमात्माबलहीनेनलभ्य" इति । तथा दैन्यविपर्ययजनितातुष्टिरेवानुद्धर्षः । अत्र "शान्तोदान्तउपासीत" इति निर्यचनम् । तदेवं प्रकारकनियमविशेषसम्प्राप्तपुरुषोत्तमश्रीरामप्राप्तप्रसादनिर्मृष्टतमःस्वान्तस्य अनन्यंप्रयोजनानवरतनिरतिशयप्रियवदात्मप्रत्ययावभासतापन्नध्यानलक्षणयाऽनन्यभक्त्यापुरुषोत्तमसर्वेश्वरश्रीरामपदंसाकेतंलब्धंभवतीतिसिद्धम् । तदादुराचार्याः श्रीसदानन्दाचार्यचरणाः—

"रामोब्रह्मपरात्परंश्रुतिमतंभक्त्यैवनिःश्रेयसं शेपा येन च शेषिणोरघुपतेर्जीवाइतिस्वीकृतम् ।
श्रौतंयुक्तियुतंमतंखलुविशिष्टाद्वैतकंयस्य स श्रीबोधायनवृत्तिकृद्विजयतांबोधायनःशाश्वतम् ॥"

तथैवजगद्गुश्रीपूर्णानन्दाचार्ययादाः—

"कारुण्याम्वुनिधिश्चयस्तनुभृतांप्राप्यस्तथाप्रापकः सायुज्यंचददातियोहिनिजयाभक्त्याप्रपत्त्याऽथवा ।
सर्वेशः सः परात्परश्चरांहतोवैषम्यनैर्घृण्यतः श्रीरामोजगदाश्रयोभवतु मे त्राताजगद्व्यापकः ॥
जायन्तेमृतिमाप्नुवन्ति च पुनर्लब्ध्वानयंप्राणिनो यञ्चोपेत्यभवेन्नवैतनुमतांलोकेपुनर्जन्मसः ।
ब्रह्मेशानसुरेन्द्रवन्दितपदोभक्त्येकलभ्यःप्रभुः श्रीरामोजगदाश्रयोभवतु मे त्राताजगद्व्यापकः ।

अथद्वैपायनीयप्रथमसूत्रेणब्रह्मजिज्ञासासमारब्धा, तत्र कीदृशं किं लक्षणं किं ब्रह्म, जिज्ञास्यमितिंजिज्ञासायांद्वितीयसूत्रमाह **जन्माद्यस्ययत**ः इति । अत्रलक्षणप्रमाणाभ्यां वस्तुसिद्धिरितिपश्यन् ब्रह्मलक्षणंदर्शयतिद्वितीयसूत्रेणसूत्रकारः "जन्माद्यस्यतः" इति । अस्यार्थः तत्रजन्मादीत्यनेन, उत्पत्तिस्थितिप्रलयानांतद्गुणसंविज्ञानबहुव्रीहिसमासाश्रयणेलाभो भवति, लंवकर्णपुरुषमानयेत्यत्र तथा लंवौकर्णौयस्येतितद्गुणसमासेविशेषणविशेष्यस्यानयनम् , नतु दृष्टसागरपुरुषवत्सत्यपिसमानेबहुव्रीहौविशेषणस्यानयनं भवति, अतद्गुणत्वात् बहुव्रीहेः । तथेहसूत्रे, नातद्गुणसंविज्ञानोबहुव्रीहिरपितुतद्गुणसंविज्ञानबहुव्रीहिरितिजन्मसहितयोस्थितिप्रलययोर्ग्रहणं भवति । अस्येतिपष्ठ्यन्तेदंपदेनपरमात्मभिन्नेन महामहिंमवतापिलोकपालग्रहादिनामनसाप्यचिन्त्यविविधरचनायुक्तस्य प्रतिनियतदेशकालभोगब्रह्मादिस्तंवपर्यन्तक्षेत्रक्षेत्रज्ञसंवलितस्यास्यजगतोजायमानस्य, यतःसर्वज्ञसर्वशक्तिसत्यसंकल्पसत्यत्वादिगुणविशिष्टसविशेपपरमेश्वराज्जानकीनाथादिपदवेदनीयात्सर्वेश्वरात् हेय प्रत्यनीकस्वरूपात्पुरुषविशेषात् , जगतःसर्गस्थितिप्रलयाभवन्तीतिप्रकृतसूत्रार्थसम्पद्यते । नन्वेतादृशब्रह्मणिकिमपिप्रमाणमस्ति नवा ? अस्ति चेत् तदा तत् किं प्रत्यक्षाद्यन्यतमरूपंतदन्यद्वा ? तत्र न प्रत्यक्षं वाह्यंसंभवति, रूपस्यस्पर्शादिविहीनेपरमपुरुषेनेत्रस्पर्शनयोरसंभवात्, रूपस्पर्शवातामेवचाक्षुपादिप्रत्यक्षत्वदर्शनात् । न वा घ्राणादिकंसम्भवति परमपुपस्यद्रव्यरूपत्वात् ।

गुणादीनामेवघ्राणादिग्राह्यत्वनियमस्यान्यत्रदर्शनात् । नवामानसंप्रत्यक्षंजीवतद्गुणादिभिन्नत्वात् । नवाऽनुमानादिकम्, अव्यभिचरितहेत्वभावात् । नवाशब्दस्तत्रपरमेश्वरेप्रमाणम्, अन्योन्याश्रयात्, परमेश्वरसिद्धौतदुच्चरितत्वात्, शब्दस्यप्रामाण्यसिद्धिस्तत्सिद्धौ च परमेश्वर सिद्धिरित्यन्योन्याश्रयस्य दुरुत्तरत्वादिति न परिगणितप्रमाणेन ब्रह्मणः सिद्धिः । यदितादृशपरमेश्वरेप्रमाणंनास्ति, इतिद्वितीयपक्षस्तदाप्रमाणाभावादेव नतादृशपरमेश्वरविचारःशोभेत, यथा प्रमाणाभावात् गगनकुसुमादि न सत्तां लभते तथाऽयमपि नप्रामाणिकःस्यात् । कारणरहितः पदार्थोद्विविधो भवति, नियमतः सन् वा असन्, यथाऽकाशोवन्ध्यापुत्रोवेत्यतो न तादृशब्रह्मणःसिद्धिरित्येवंपरस्यालोचनंसमवधार्य्यभगवान् सूत्रकारोब्रह्मणिप्रमाणमाह **शास्त्रयोनित्वात्** तत्रशास्त्रंयोनि कारणंमस्यतच्छास्त्रयोनि स्तस्यभावस्तत्वात्, अत्रयोनिपदबोध्यंकारणं न कारकं किन्तु, प्रदीपेनघटइतिवत् ज्ञापकरूपमेव नतुदण्डेनघटइतिवत् जनकम् । तथा च सास्त्रमृग्वेदादिकंयोनिःकारणंप्रमाणंयस्य, अर्थात् यदवगतौशास्त्रमेव "यतो वा इमानि भूतानि जायन्ते" "भृगुर्वैवारुणिःपितरंवरुणमुपसार, अधीहि भगवोब्रह्म "इत्युपश्रुत्यःवरुणःप्राह "आनन्दाद्ध्येवखल्विमानिभूतानिजायन्ते' आनन्देन जातानिजीवन्ति, आनन्दंप्रयन्त्यभिसंविशन्ति, तद्ब्रह्मतदेवविजिज्ञासितव्यः" इत्यादि ततश्चशास्त्रमेवब्रह्मावगतौप्रमाणम् ।

"ब्रह्मसत्वेप्रमाणं च शास्त्रमेव सुनिश्चितम् । तन्त्वौपनिषदञ्चैतच्छ्रुतिवाक्यप्रमाणतः ॥१३१॥"

इत्यादिरूपेणजगद्गुरुश्रीपूर्णानन्दाचार्येणश्रीवोधायनमतादर्शेप्रतिपादनाच्च । ननु, घटादि प्रमेयसाधकानेकप्रमाणेषुतदन्यतमेनैवब्रह्मणःसिद्धिसंभवेकिमर्थंशास्त्रशिरसिएतावान् भार आरोप्यते इति चेदत्राहुः, सत्यम् "यतोवाचोनिवर्तन्तेऽप्राप्यमनसासह" अवचनेनैवप्रोवाच'' इत्यादिश्रुतिभिर्वाङ्मनसाऽगोचरतायाःप्रतिपादनेनब्रह्मणोऽतीन्द्रियत्वावगमेनशास्त्रेतरप्रमाणानांतत्रपदाधानासंभवेनशास्त्रस्यैव तत्रप्रमाणत्वंदर्शयामाससूत्रकारः । रूपस्पर्शादिरहितत्वात् यद्यपि ब्रह्मप्रत्यक्षादिविषयतांनासादयति, शास्त्रस्यापिप्रवृत्तिनिवृत्तिपरकत्वात्, सिद्धब्रह्मस्वरूपबोधकत्वमपि न संभवति । प्रवृत्तिनिवृत्तिरूप प्रयोजनपरकाणामेवशास्त्रत्वादित्याशङ्कायामाहसूत्रकारश्चतुर्थमिदम् **तत्तुसमन्वयादिति** सूत्रम् । एतत्सूत्रघटक"तु"शब्द:पूर्वपक्षनिराकरणपरकइतिंबोद्धव्यम् प्रायोब्रह्मसूत्रेषु यत्र "तु" शब्दोभवति तत्र सर्वत्रपूर्वपक्षव्यावर्तक एवेति पूर्वपरानुसन्धानेनावगतं भवति । तत् जिज्ञास्यं ब्रह्मलक्षणप्रमाणेनावधारितं, शास्त्रप्रमाणकमेवसंभवति ? कुतः ? समन्वयात्, परमपुरुषार्थभूतस्यब्रह्मणोऽभिधेयतयान्वयात्, सर्वेवेदान्ताःपरमप्रयोजनभूतब्रह्मणःप्रतिपादनपरतयैवसमन्विताभवन्तीति । ननु घटंकुरुघटं पश्यति, इत्यादिलौकिकप्रयोगेण, "अग्निहोत्रंजुहुयात् स्वर्गकाम" इत्यादिवैदिकप्रयोगेणकार्यान्वित स्वार्थबोधकत्वमेवप्रवृत्तिनिवृत्तिपरकाणामेवशास्त्राणाम् "आम्नायस्यक्रियार्थत्वादानर्थक्यमनर्थानामित्यादिनाऽक्रियाप्रतिपादकानामानर्थक्यमाशङ्क्य "विधिनात्वेकवाक्यात्स्तुत्यर्थेन" इत्यादिनाक्रियाप्रतिपादन विधुराणामर्थवादीनामपिसार्थकत्वंसमर्थितम् । एवं "आत्माइत्येवोपासीत" उपासनपरकवेदान्तादीना कथंचित्सार्थकत्वंनतुस्वातन्त्र्येणतेषामर्थबोधकत्वमितिनशङ्कनीयम्, "चैत्रपुत्रस्तेजातः' 'नायंसर्पोऽपितु

रज्जुरित्यादि" स्थलेऽकार्यबोधकानामपिहर्षभयादिनिवृत्तिरूपप्रयोजनवत्त्वंदष्टमेवेति, क्रियाप्रतिपादकानामेवसार्थकत्वमितिरिक्तमेववचःशङ्ककस्येति विस्तरस्थलान्तरेद्रष्टव्यो भाष्यविवरणप्रस्तावादावितिदिक् । इत्येवंपरदर्शनखण्डनमुखेनस्वशास्त्रप्रतिपाद्यविषयप्रतिपादनेजीवस्वरूपस्यक्षणिकत्वमनित्यत्वं प्रतिक्षिप्य स्वसिद्धान्तेनजीवस्वरूपस्यनित्यत्वादिकंप्रतिपाद्यात्मसिद्धिर्निवेदितेति संक्षेपः ।

संगृह्यशास्त्रसारं च जीवरूपंस्थिरीकृतम् । तदनेन रमानाथःप्रीतःस्तात् भक्तिवर्धकः ॥१॥

इत्यानन्दभाष्कर जगदगुरुश्रीरामानन्दाचार्यप्रधानपीठाचार्यजगदगुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रपट्टशिष्यपश्चिमाम्नायश्री विश्रमद्वारिकास्थश्रीरामान्दाचार्यपीठाधीशस्वामीरामेश्वरानन्दाचार्यकृतआत्मसिद्धौतत्त्वदीपः ।

॥ श्रीसीतारामार्पणमस्तु ॥

* विशिष्टाद्वैत शब्द मीमांसा *

केनचित्तत्वसमीक्षणप्रतिभाप्रभावप्रभासितस्वान्तेन स्वाश्रितामलवैदुष्यशुष्यदनवबोधेन विपश्चिदपश्चिमेन सीकरजनपदावयवलक्ष्मणगढनिवासरसिकेन रामनारायणाख्यमहोदयेनमारवाडी ब्राह्मणनाम्नि (२१।९।३५) ईसवीयदिवसे स्वप्रसरावसरजुषिपत्रे "विशिष्टाद्वैतमित्यत्रकः समासः ?" इत्याकारक उपरिष्टान्निर्दिष्टस्तस्योत्तरसतृष्णःप्रश्नःप्रकाशि। अदसीयप्रश्नस्येदमधस्तनीयं समुल्लसति समाधानम्।

विशिष्टाद्वैतमित्यत्र विशिष्टञ्चविशिष्टञ्च विशिष्टे (एकशेषः) द्वयोर्भावोद्वितद्वितैव द्वैतम् (स्वार्थिकोऽण्) भेद इति यावत् । नद्वैतमद्वैतम् । 'नञ्' इति पाणिनीयेन समासः । ततश्चविशिष्टयोरद्वैतं विशिष्टाद्वैतमिति षष्ठीतत्पुरुषः । अत्र च विशिष्टपदाभ्यां सूक्ष्मचिदचिद्विशिष्टं स्थूलचिदचिद्विशिष्टञ्च ब्रह्मैवाभिधीयते । तयोश्चब्रह्मणोरद्वैतमभेद एवेत्यर्थोपलभ्यते । सूक्ष्मावस्थाहि कारणावस्था स्थूलावस्था च कार्यावस्था तयोरुभयोरवस्थितिमेकमेव ब्रह्मेति तु तत्त्वम् ।

नचात्राचित्पदार्थनिष्ठे स्थौल्ये सत्यपि पारिमाण्डल्यजुषो जीवस्य कथं तत्त्वम् कथन्तराञ्चाणोरणीयान्—इत्याम्नायाभिहितस्येश्वरस्येतिवाच्यम् । अनेकाम्नायसमधिगतयोर्नामरूपविभागार्हत्वतदनर्हत्वयोरेवस्थौल्यसौक्ष्म्यचिदचिद्विशिष्टं स्थूलचिदचिविशिष्टं ब्रह्मेत्यस्य शाब्दबोधस्तु—अपृथक् सिद्धिसम्बन्धावच्छिन्न प्रकारतानिरूपितसूक्ष्मचित्त्वावच्छिन्नविशेष्यत्वावच्छिन्नापृथक्सिद्धिसम्बन्धावच्छिन्नसूक्ष्मचित्त्वावच्छिन्नप्रकारतानिरूपितनिरवच्छिन्नविशेष्यताकस्यापृथक्सिद्धिसम्बन्धावच्छिन्नस्थूलचित्त्वावच्छिन्नप्रकारतानिरूपितस्थूलचित्त्वावच्छिन्नविशेष्यत्त्वावच्छिन्नपृथक्सिद्धिसम्बन्धावच्छिन्नस्थूलचित्त्वावच्छिन्नप्रकारतनिरूपितानिरवच्छिन्नविशेष्यताकस्य ब्रह्मणश्चतादात्म्यमितिदिशावसेयः ।

अनेन च सूक्ष्मचिदचिद्विशिष्टस्थूलचिदचिद्विशिष्टपदयोः समानाधिकरण्यमुपपादितं भवति । एतादृशपदसामानाधिकरण्यञ्च 'तत्पुरुषः समानाधिकरण इत्यादिशास्त्रेशाब्दिकशिरोमणिर्भगवान् पतञ्जलिः स्पष्टमाचष्टे । भिन्नप्रवृत्तिनिमित्तशब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति । एतदनुरोधेन तत्पदविशिष्टत्वमेव तत्पदस्य तेन सार्द्धम् सामानाधिकरण्यमितिनिश्चीयते । अत्रवैशिष्ट्यञ्च स्वजन्योपस्थितिविषयतानवच्छेदकधर्मावच्छिन्नोपस्थापकत्वस्वप्रयोज्यविषयतानिरूपिततादात्म्यनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धाभ्याम् । एतच्च सामानाधिकरण्यं प्रकृतेऽपि सङ्गगच्छत इतिदिक् । (जगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्याः)

卐 सर्वेश्वरश्रीसीतारामाभ्यां नमः 卐

श्रीहनुमते नमः

प्रस्थानत्रयानन्दभाष्यकाराय नमोनमः

जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रप्रणीततत्त्वत्रयसिद्धौ

अथेश्वरसिद्धिः

श्रीरामचरणौवन्देभोगमोक्षफलप्रदौ । आनन्दान्तञ्चरामञ्चनुमोरघुवरं तथा ॥
राम एव परंब्रह्म राम एव परंतपः । राम एव परंतत्त्वंश्रीरामोब्रह्मतारकम् ॥
सीताकान्तसमारम्भां रामानन्दार्यमध्यमाम् । रघुवरार्यगुर्वन्तां वन्दे गुरुपरम्पराम् ॥

तदत्रतत्त्वत्रयेतृतीयंतत्त्वम्—"विश्वंजातंयतोऽद्धायदवितमखिलंलीयतेयत्रचान्ते
सूर्योयत्तेजसेन्दुःसकलमविरतंभासयत्येतदेषः ।
यद्भीत्यावातिवातोऽवनिरपिसुतलंयातिनैवेश्वरो ज्ञः
साक्षीकूटस्थएकोवहुशुभगुणवानव्ययोऽखिभर्ता ॥१।८॥
श्रीमानर्च्यःशरण्योवहुविधविबुधैर्योगिगम्याङ्घ्रिपद्मोऽ-
स्पृश्यः क्लेशादिभिःसत्समुदितसुयशाःसूरिमान्योवदान्यः ॥
शश्वच्छ्रीरामचन्द्रःसुमहितमहिमासाधुवेदैरशेषै
र्निर्मृत्युःसर्वशक्तिर्विकलुषविजरोगीर्मनोभ्यामगम्यः ॥१।९॥" इति ।

अस्तिकश्चिदेकःक्लेशकर्मादिभिरपरामृष्टःपुरुषविशेषोयस्याधिकारेसर्वंविश्वंप्रवर्त्तत इतिसमाधानाय तत्रपूर्वंपूर्वपक्षंप्रदर्श्यते—

पश्चिमाम्नायश्रीरामनन्दाचार्यपीठाधीश्वर

स्वामीरामेश्वरानन्दाचार्य

प्रणीतः

卐 तत्त्वदीपः 卐

सीताकान्तसमारम्भां रानानन्दार्यमध्यमाम् ।
रामप्रपन्नगुर्वन्तां वन्दे गुरुपरम्पराम् ॥

अथाचार्यप्रवरआत्मसिद्धिप्रकारंप्रदर्श्यतत्सिद्धौपरमात्मचिन्तनं कुर्वन् परमेश्वरसाधकप्रमाणं दर्शयितुमुपक्रमते **अस्ति कश्चिदेक** इत्यादि । **कश्चिदेक** इति-स्वेतरसकलविलक्षणः । एकः-सजातीयविजातीयलक्षणोऽद्वितीयः। "न तस्य कार्यकरणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते । परास्यशक्तिर्विविधैवश्रूयतेतमाहुरग्र्यूंपुरुषंमहान्तम्" इत्यादिश्रुतेः । **क्लेश कर्मादिभिरित्यादि** । तत्र, अविद्याऽस्मितारागद्वेषाभिनिवेशाःपञ्चकेशा इतियोमसूत्रोदिताअविद्यादय एव । कर्मशुभाशुभं विहितकर्मजनितंनिषिद्धकर्मजनितंपुण्यापुण्यशब्दितम् । विपाकःफलोदयः । आशयःसंस्कारः ।

तत्रेश्वरप्रद्वेषिणोमीमांसकाःप्राहुर्नसर्वार्थदर्शनशक्तिसम्पन्नोयथोक्तपुरुषःसेद्धुमर्हति। तत्साधकप्रमाणाभावात् प्रत्युतबाधकबहुतरप्रमाणदर्शनाच्च । तथा हि परमेश्वरसाधकं प्रत्यक्षप्रमाणंतदन्यद्वा तत्साधकम् ? तत्र द्वितीयं न संभवति, अग्रेतन्निराकरिष्यमाणत्वात् । नापिप्रत्यक्षंप्रमाणं ? विकल्पासहत्वात् । प्रत्यक्षमपि किं लौकिकम्, यौगिकं वा ? तत्र न लौकिकप्रत्यक्षमीश्वरसाधकंसंभवति, लौकिकप्रत्यक्षप्रमाणस्यचक्षुरादेर्व्य-

क्लेशाः पुनर्द्विविधाःक्लिष्टाअक्लिष्टाश्च । एवञ्चक्लेशादिभिरपरामृष्टोऽसम्बद्धःपुरुषःपुरुषसदृशःसविशेषइत्यर्थः । **यस्याधिकारे**=यस्यपुरुषोत्तमस्याधिकारे=शासते “एतस्यैवशासनेगार्गिद्यावापृथिव्यौविधृतेतिष्ठतः” इतिश्रुतेः । तथासम्पूर्णोंपि, अन्तर्यामिब्राह्मणप्रकरणमत्रप्रमाणंतदप्यनुसंधेयम् । विश्वं=समस्तंजड़चेतनात्मकंस्थूलसूक्ष्मसाधारणंजगत् प्रवर्तते,एकस्यतस्यसर्वेश्वरस्यवशेसङ्कल्पस्वरूपेच्छायां **प्रवर्तते**=प्रकर्षेणवर्तते—असंकीर्णस्वरूपस्वभावंसद्विद्यते । प्रवर्तते च तत्सर्वंस्वीयकर्मणियथायथमितिसमस्तस्यजगतःसर्वेश्वरसंकल्पाधीनस्वरूपस्थितिप्रवृत्तिकत्वंद्योतयितुंप्रमाणद्वाराव्यवस्थापयितुमयमुपक्रमः क्रियते, तत्रोत्तरस्यपूर्वपक्षाधीनत्वेनपूर्वंपूर्वपक्षमेवस्थापयामीति । यद्यपीश्वरेकस्यापिविप्रतिपत्तिनास्ति, यतः

यं ब्रह्मेतिगदन्तिवेदनिपुणावेदान्तिनःसर्वदासांख्यज्ञैःपुरुषस्तथाक्षचरणैःकर्तेतियोगीयते ।
भाट्टैःकर्मचकाव्यकोविदचयैर्मुख्योरसःकीर्तितोविश्वस्मिन्सुजनान् स एवभगवान्पायाद्रघूणांपतिः ।।”

इत्यादिरूपेणमहामहोपध्यायपदविकजगदगुरुश्रीरामानन्दाचार्यरघुवराचार्यवेदान्तकेसरिणाप्रपञ्चितदिशास्वार्थमहिमानस्तंस्वीकुर्वन्त्येव । तत्रशुद्धबुद्धमुक्तस्वभावइत्यद्वैतवेदान्तिनः, तदेवसविषयमितिविशिष्टाद्वैतिनः । आदिविद्वान्कपिलइतिकापिलाः । क्लेशकर्मविपाकाशयैरपरामृष्टइतियोगाः । बुद्धइतिबौद्धाः । अर्हन्नितिजैनाः । कर्तेतिनैयायिकाः । कर्मैवेतिमीमांसकाः । लोकसिद्धराजैवेतिचार्वाकाः । किंबहुना, यंकारवोपिविश्वकर्मेतिस्वीकुर्वन्ति । तदेवंजातिगोत्रप्रवरहीनेभगवतिसंशयएवनास्तीति किं निरूपणीयंयदर्थमयमारंभः । तथापितथाविधेभगवतिप्रमाणंनास्तीतिविवदन्तं वादिनमभिप्रेत्यायमारंभः । “प्रमेयसिद्धिप्रमाणाद्धीतिन्यायात् । प्रमाणेनैवप्रमेयसिद्धिर्भवतिनान्यथा, अत एवशशश्रृङ्गकुर्मरोमादयो नविषयाःभवन्ति । अन्यथा तेषामपिसद्भावोबलादापतेदिति ।

अध्वरमीमांसकेनहिसर्वार्थसाक्षात्कारिसर्वपदार्थोत्पादकशक्तिपरिवृतश्चेतनविशेषरूपःपुरुषोनस्वीकृतःस्वतन्त्रे, यत एतादृशस्यसाधकप्रमाणाभावादित्याशयेनाह—**नसर्वार्थदर्शनशक्तिसम्पन्न** इत्यादि । अर्थात्साधकप्रमाणाभावान्नास्तिपुरुषइत्यर्थः।नकेवलंसाधकाभावादेवतदभावःप्रत्युततादृशपुरुषास्तित्वेबाधकप्रमाणमपिजागर्ति, तत्राह, **बाधकबहुतरप्रमाणदर्शनाच्चेति** । उपरिष्टाद्बाधकप्रमाणंनिदर्शयिष्यते। साधकप्रमाणाभावंदर्शयितुमाह **तथाहीत्यादिना** । तत्रचक्षुरादीन्द्रियार्थसंनिकर्षजनितस्यचक्षुःस्पर्शरसनगन्धग्राहकश्रवणाद्यन्यतमस्यप्रत्यक्षस्येश्वरसाधकत्वं न संभवतीत्यावेदयितुमाह **व्यवस्थितविष-**

वस्थितविषयत्वात् परिमितविषयत्वाच्च तद्ग्राह्यपरमेश्वरस्य तेन साधयितुमशक्यत्वात् ।

**नवायोगिप्रत्यक्षमीश्वरसाक्षात्कारेसाधनम् । यतो योगिविज्ञानमपिकिम्, इन्द्रि-
यजनितं नवा ? इन्द्रियजनितमपि किं चक्षुरादिवहिरिन्द्रियजनितमान्तरकरणजन्यं वा ?
तत्र न तावत् प्रथमपक्षः यतोवहिरिन्द्रयाणांस्वविषयसंनिकर्षवतामेवस्वविषयज्ञानोत्पाद-
कत्वस्यैवदर्शनात् । अतोरसनादिभिर्नभवति व्यवहितासंनिकृष्टज्ञानोत्पादः । नचाविद्यमा-
यत्वात्परिमितविषयत्वाच्चेति ।** यतोऽत्रलौकिकप्रत्यक्षस्यचक्षुरादेर्येग्राह्यविषयास्तेपरिमिताः यथा
चक्षुषाग्राह्यंरूपंरूपत्वंरूपाभावोरूपवद्द्रव्यंतद्गतांजातिस्तदभावादयः । रसनायारसोरसत्वंतदभावश्च,
घ्राणस्यगन्धोगन्धत्वंतदभावश्च त्वचः स्पर्शत्वादिकंतद्वद्द्रव्यंतदभावश्च । तत्रापि वहिरिन्द्रियजनित
प्रत्यक्षेतादात्म्येनविषयस्यकारणत्वंवर्तमानत्वादिकं यथायथमालोकादिसंनिकर्षश्चेति ।

अर्थात् चाक्षुषप्रत्यक्षस्यतावत् रूपरूपवद्द्रव्यरूपैकार्थसमवेतसंख्यापरिमाणपृथक्त्वसंयोग
विभागादिप्रमुखाविषयाग्राह्याभवन्ति । तदुक्तम्“उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वन्तिपृथक्त्वसंख्ये ।
विभागसंयोगपराऽपरत्वस्नेहद्रवत्वंपरिमाणयुक्तम् । क्रियाजातिर्योग्यवृत्तिःसमवायश्चतादृशः । गृह्णाति
चक्षुःसंयोगादालोकाद्भूतरूपयोरित्यादि । एतावन्तोविषयाश्चक्षुषोयोग्याभवन्ति,नतुचक्षुषारसादिगन्धा
दिकागृहीताभवन्ति, तेषांतेषुसर्वथाऽयोग्यत्वात् । एवमुद्भूतानभिभूतरूपादिकंमहत्वसामानाधिकरणं
सत् चक्षुषादिग्राह्यंभवति, नतुपरमाणुद्व्यणुकगतंरूपादिकंचक्षुः संयुक्तमपिगृहीतंभवति । इत्येवंप्रका-
रेणरसनाघ्राणंत्वक् श्रवणेन्द्रियादिष्वपियथायथंबोद्धव्यम् । एतादृशस्यचेन्द्रियजनितप्रत्यक्षस्यसर्वार्थादेः
प्रकाशनस्यासंभवात्कथमीश्वरे प्रमाणाभावमासादयेत् । यदातु एकमपरविषयस्यग्रहणेसमर्थंनभवति तदा
“अशब्दमस्पर्शमरूपमव्ययमि”त्यादिश्रुतिंसमर्थितमीश्वरेसर्वथारूपादिरहिते ईश्वरेकथंप्रमाणंस्यादिति ।

गतप्रकरणेबाह्यप्रत्यक्षंव्यवस्थितपरिमितस्वार्थग्राहकत्वात् सर्वार्थग्रहणसमर्थईश्वरेप्रमाणं न भवती
त्यावेद्य,योगिप्रत्यक्षस्यापिपरमेश्वरसाधकत्वं न संभवतीत्यावेदयितुंप्रकरणान्तरमुपक्रमते **नवायोगिप्रत्यक्ष**
मित्यादि । वर्तमानसंनिकृष्टार्थग्राहकत्वस्यप्रत्यक्षव्यापकत्वात्, यदियोगिज्ञानमपिप्रत्यक्षमेवभवेत्तदा
वर्तमानार्थग्राहकंभवेदिति तादृशयोगिप्रत्यक्षस्यनसर्वार्थग्राहकत्वम्, अतीतानागतादिविषयत्वेवा नतत्प्र-
त्यक्षंभवेदितिसंशयादि वा । तत्प्रत्यक्षस्यशुक्तिरजतप्रत्यक्षवत् प्रामाण्यंनैवकथमपिसंभवेदिति । एतदेव
विवृणोति **यतोवहिरिन्द्रियाणांस्वविषय** इत्यादि । यैःखलुस्वयोग्यार्थसन्निकर्षालोकमहत्वादीलक्षणं
सहकारिणंप्राप्तम्, एवंभूतान्येवचक्षुरादिकरणानिस्वविषयकप्रत्यक्षज्ञानमर्जकानिभवन्तीतिलोकेऽन्वय-
व्यतिरेकाभ्यांभवति, अर्थसन्निकर्षादिसहकारिसत्वेचक्षुरादिनाज्ञानानिभवन्तितदभावे न भवन्तीति ।
यस्मादर्थादिसहकारस्यज्ञानजनकत्वंप्रसिद्धम् । **अतोरसनादिभिर्नभवतीति** । अतश्चक्षुद्वाराऽती-
तानागतव्यवहितार्थविषयकज्ञानजननं न भवतीत्यर्थः । इन्द्रियेणाग्रहणेसंनिकर्षाभावात्मकंप्रयोजक-
मुपपादयति **नचाऽविद्यमानविषयैर्भवति संनिकर्षः** इति ।

नविषयैर्भवति संनिकर्षोयतःसन्निकर्षस्यसंयोगादेर्द्विष्ठत्वेनविषयात्मकाश्रयाभावेतदसंभवात्, तस्मादिन्द्रियाणामार्थसंनिकर्षोऽपेक्षित एव । सहकारिविरहेऽतीतानागतविषयज्ञानोत्पादनायबाह्यकरणंकथमिवसमर्थं भवेत् ।

यत्, यं सहकारिविशेषमासाद्ययत्कार्यंजनयति, तत् तादृशसहकारिविरहे तत् कार्यं नोजनयति, यथाबीजादिकंपृथिवीजलादिकंसहकारिणमासाद्यैवाङ्कुररूपंकार्यंजनयतीति तदभावेजलाद्यभावेनैवोत्पादयतिबीजाङ्कुरम् । एवमिहापिबहिरिन्द्रियाणि, अर्थसन्निकर्षादिसहकारिणमादायैवज्ञानमुत्पादयिष्यन्तीतिनातीतानागतार्थज्ञानोत्पादनियमंत्यक्ष्यन्तीतितदीयप्रत्यक्षमपियथोक्तविषयनियमं नातिक्रमेदिति न योगिप्रत्यक्षंसर्वार्थग्राहकम् ।

नवा मनःकरणजनितं प्रमाणम्, आन्तरिकसुखदुःखादिग्रहणे एव मनसःस्वतन्त्र-

कथं नतद्भवति, तत्राह **संनिकर्षस्यसंयोगादेर्द्विष्ठत्वेने**त्यादि । संयोगादिलक्षण सनिकर्षाणांद्विष्ठत्वात्=उभयसमवायिकत्वात् इत्यर्थः । तत्रान्यतरस्याश्रयस्याधिकरणस्याभावेआधेयभूतसंनिकर्षस्योत्पत्तेरभावात्, नहिभवतिभूतलाधिष्ठानकस्यघटादेर्भूतलाद्याधाराभावेसमुत्पादइति । एतदेवन्यायप्रयोगेणोपपादयति, **यद्यंसहकारिविशेषमासाद्येत्यादि** यदाखलु चक्षुषादिज्ञानोत्पादेऽर्थसंन्निकर्षस्यसहकारिकारणत्वंयुक्तिसिद्धंलोकप्रसिद्धं च तदा तादृशार्थकारणभावेकथमिवज्ञानात्मककार्यंस्यात्, नैवकथमपिसंभवति । कारणाभावस्यकार्याभावनियतत्वादिति । एवञ्चयोगिप्रत्यक्षस्यापिबहिरिन्द्रियजन्यत्वस्वीकारेतस्यापिबाह्यकरणवदेवनसर्वार्थावभासित्वंसिद्ध्यति, तस्मात् योगिप्रत्यक्षस्यपरमेश्वरेसाधकत्वं नकथमपिसंभवतीति अथलौकिकविषयतासम्बन्धेनप्रत्यक्षोत्पत्तौतादात्म्येनविषयस्यकारणत्वंतथाऽर्थसन्निकर्षस्यापितथात्वम्, नतुयोगिप्रत्यक्षेऽर्थादेः कारणत्वम्, अन्यथातादृशप्रत्यक्षेप्यर्थादेः कारणत्वे, योगिनां यंयत्सर्वार्थावभासकत्वंप्रसिद्धंलोकेशास्त्रे च तदुपरोधः प्राप्नुयादितिचेत् सत्यम्, भावानवबोधात्, नहिं अस्माभिश्चक्षुषारूपंप्रत्यक्षीक्रियते तथासोपि चक्षुसैवरूपंपश्यतिनतुयोगीकर्णाभ्यांरूपंविजानातिकिन्तुचक्षुसैवसोपितद्विजानाति । न च तर्हि उभयोः समत्वमेवतदाजातंनतुवैलक्षण्यम्, श्रुतंचशास्त्रादौ, उभयोर्वैलक्षण्यमिति । उभयोर्विशेषस्याक्षतत्वात् । उभयोरेतावान्विशेषः यदेकस्यचक्षुरादिनासूक्ष्मस्यव्यवहितस्यग्रहणं न भवति तस्य तुतथाभवतीति । तदुक्तं "यत्राप्यतिशयोदृष्टःसस्वार्थानतिलङ्घनात् । दूरसूक्ष्मादिदृष्टौस्यात् न रूपेश्रोत्रवृत्तितेति । विशेषोऽन्यत्रेतिदिक् ।

अथतस्यान्तरकरणजनितप्रत्यक्षस्यमनोमात्रजन्यत्वेपि तस्य प्रमाणत्वंनसंभवति:तस्यबाह्येन्द्रियजनितज्ञानवदेवसर्वेन्द्रियग्राहकत्वादेवेत्याशयेनोपक्रमते **नवामनःकरणजनितमिति** । कुतोनप्रमाणत्वं तत्राह, **आन्तरिकसुखदुःखादिग्रहणे** इत्यादि । सत्यंमनसाप्रत्यक्षंभवति, तदपिप्रतिनियतमेव । अर्थात् मनसायद्ज्ञानंभवतितत्सुखाद्यन्तरवस्तुविषयकमेव, तत्रैवमनस्वातन्त्र्यात् बाह्यविषयकज्ञानंतु बाह्येन्द्रियसापेक्षतयैवभवतिनतुतन्निरपेक्षतया "अस्वतन्त्रंबहिर्मनः" इतिन्यायात् । तदुक्तं—

त्वात् । बाह्यविषयग्रहणेपिमनसोस्वातन्त्र्येचक्षुरादिवाह्यकरणानांवैयर्थ्यप्रसङ्गात्, ततश्चान्धोवापङ्गुर्वानभवेत् कोपि । न्यायप्रयोगश्चेत्थम्—विवादास्पदंमनःवाह्येन्द्रियसहकारविवर्जितं, नबाह्यविषयेरूपादौप्रवर्तते, वाह्येन्द्रियाधीनत्वात् । यत् यत्र यदधीनकं भवति न तत् तत्रतन्निरपेक्षंकार्यंकरोति, गाढ़ान्धकारेचक्षुर्वत् ।

नच मन्त्रौषधिसमाधिप्राप्तातिशयविशिष्टमिन्द्रियंपरित्यजतिविषयनियमःस्वाभाविकसामर्थ्याविर्भावफलकत्वान्मन्त्रादीनाम्, सामर्थ्यस्य च प्रतिनियतत्वात् ।

नहि भवति सुप्रयुक्तभेषजशतसंस्कृतमपिश्रोत्रंरूपंरसंवाऽवगमय । एवञ्चविवादा-

"मनोदशेन्द्रियाध्यक्षंहृत्पद्मगोलकेस्थितम् । तच्चान्तःकरणंवाह्येऽस्वतन्त्रंविनेन्द्रियैरिति ॥"

अर्थादान्तरविषये परिगणितसुखादावेवमनसोवहिरिन्द्रियमनादृत्यप्रत्यक्षजनकत्वात् । ननु स इन्द्रियान्तरंनिरपेक्षतयासाक्षादेवसुखादिवदेवबाह्यार्थग्राहकत्वेकोदोपस्तत्राह, **बाह्यविपयग्रहणेपिमनसः स्वातन्त्र्ये** इत्यादि, अयमाशयोयथामनोवाह्येन्द्रियनिरपेक्षंसदेवसुखादिकंविषयीकरोति, तथाबाह्य विषयेमनसःस्वातन्त्र्ये, बाह्येन्द्रियस्वीकारोनिरर्थकएव, सुखादिवत् रूपादिवाह्यविपयाणामपिग्रहणसंभवात् किमिन्द्रियान्तरकल्पनाव्यसनेन । ततश्चसर्वलोकप्रसिद्धवधिरान्धत्वादिभेदोविलुप्यत एव । एवञ्चभवत्यनुमानम्, विवादास्पदंमनोबहिरिन्द्रियनिरपेक्षं न बाह्यविपयग्रहणे, बाह्यविपयेचक्षुराद्यधीनत्वात्, यत् यदधीनंनतत्रतन्निरपेक्षंप्रवर्तते । आलोकाद्यपेक्षचक्षुरादिकंनान्धकारेरूपादिग्रहणायप्रवर्तते इति ।

पुनः शङ्कते **नचमन्त्रौपधिसमाधीत्यादि** । यस्यकस्यापीन्द्रियस्यचक्षुपादेः पटुत्वातिशयोयश्च सूक्ष्मविप्रकृष्टार्थग्रहणसामर्थ्यारूपोमन्त्रौपधादिप्रभावजनितः तथापिसस्वभाविकवर्तमानयोग्यसन्निकृष्टार्थमात्रग्राहकत्वरूपंत्यक्तुं न शक्ष्यति । यतोमन्त्रादीनां स्वाभाविकसामर्थ्याविर्भावैकफलत्वात्, सामर्थ्यस्य च प्रतिनियमात् । अर्थात्दुरदृष्टप्रयुक्तप्रतिवद्धसंकुचितप्रवृत्तिसांसिद्धिकशक्तिविकाशकत्वमेवमंत्रमहौषधतपःप्रभृतिनांभवति, नतुविलक्षणशक्त्याधायकत्वं भवति । शक्तिंश्चकार्यैकार्थकसमधिगम्या, अर्थात् कार्यदर्शनात् तत्कारणीभूतशक्तिविशेपस्यानुमानं भवति । अस्मदादीनांचक्षुर्भवतु, योगिनां वा तद्भवतु, नहिचक्षुरादीनांसर्वार्थग्रहणेशक्तिः किन्तुचक्षुषो जन्मसिद्धस्वाभाविकसामर्थ्यंरूपरूपवद्द्रव्यतद्गतजातिप्रतिनियतगुणादिग्रहणे एवेति योगिचक्षुरादीनामपि रूपादिग्रहणे एवसामर्थ्यंनतुतस्यरसादिग्रहणेसामर्थ्यंसंभवति । मन्त्रौपधादिभ्यः पटुत्वाद्यतिशयात् दूरस्थमपिसूक्ष्मतमंरूपंयोगिचक्षुषाविषयीभूतंभवतु वा, एतावताअतीतादेरसादेर्वातद्ग्राहकंनैवभवतीति ।

"यत्राप्यतिशयोदृष्टःसस्वार्थानतिलंघनात् । दूरसूक्ष्मादिदृष्टौस्यान्नरूपेश्रोत्रवृत्तितेति

पुनरपिन्यायान्तरप्रयोगंदर्शयति, **एवं च विवादास्पदबाह्याभ्यन्तरकरणपटुत्वातिशय इत्यादि** । बाह्याभ्यान्तरसाधरणकरणानांयःपाटवातिशयः सनोलंघितमर्यादः नातिक्रान्ता न परित्यक्तास्वस्कीयमर्यादासीमायेनतादृशोऽनुल्लंघितमर्यादःसर्वमयकरणजातंस्वस्वमर्यादायामेववर्तते इत्यर्थः । चक्षु-

स्पदबाह्याभ्यन्तरकरणपटुत्वातिशयोनोल्लङ्घितमर्यादरैन्द्रियकविप्रकर्षत्वात्, परिदृश्यमानतत्प्रकर्षवदिति, इन्द्रियजनितंप्रत्यक्षंनातीतादिविषयंविषयीकरोतीति ।

भावनाधिक्येनसंजायमानतज्ज्ञानस्याधिकविषयत्वेसत्यपि,तत्पूर्वकालिकानुभवविषयादल्पविषयत्वेस्मृतित्वंस्यादधिकविषयत्वेभ्रमत्वमेवेतिनतस्यप्रामाण्यंतदभावे न प्रत्यक्षत्वं,

षोमर्यादा च रूपरसगन्धस्पर्शेषुचतुर्षुरूपमात्रस्यग्राहकत्वे एव एवं त्वचोमर्यादा, रूपादिषुमध्येस्पर्शादिग्राहकत्वे एव। रसनायाःरसमात्रो एव,घ्राणस्यचतुर्षुगन्धग्राहकत्वे एव । चक्षुस्तैजसंरूपादिषुमध्येरूपस्यैवग्राहकत्वात् । घ्राणंपार्थिकंपृथिवीकुंकुमगन्धाभिव्यञ्जकघटवदित्यादिप्रयोगोद्रष्टव्य ऊहनीयश्चेति । **परिदृश्यमानतत्प्रकर्षवदिति** ।अयमाशयःयोगिभिन्नेस्वपिमध्ये यःकश्चित् पटुनेत्रःसवृक्षाग्रेसमुपविष्टपक्षिणंपश्यतिसाधारणतया, यश्चपटुतरनयनःसःपूर्वापेक्षयास्पष्टतयापश्यति, यश्चपटुतमनयनःसततोप्यधिकंपश्यति, यश्चातिशयेनहीननेत्रःस नपश्यति, अन्धस्तुकदापिनपश्यति । एवंश्रोत्रादिकरणेष्वपि यथायोग्यमूहनीयम् । ततश्चयोगिनामपिकरणतेजोमान्द्यप्रकर्षतरतमैःरूपादिग्रहणेतारतम्यंसमधिगतम्, इत्थमेवयोगिनामपिचक्षुरादिकरणतेजःप्रकर्षोपिततोऽप्यधिकोऽनतिक्रान्तस्वमर्यादापिभवतीतिसिद्धं नतु योगिनइन्द्रियान्तरेणजानन्तीतिभावः ।

गतप्रकरणेनयोगिज्ञानस्येन्द्रियप्रभवत्वेस्वीकृतेसर्वार्थग्राहकत्वं न संभवतिलौकिकप्रत्यक्षज्ञानवदितिसमुपपादितम् । अथयोगिज्ञानस्येन्द्रियप्रभवत्वंस्वीक्रियते तथापियोगिज्ञानस्य न सर्वार्थग्राहकत्वं तथात्वे च परमेश्वरेप्रमाणत्वमपियोगिज्ञानस्यनसंभवतीत्युपपादयितुमुपक्रमते **भावनाऽधिक्येन** इत्यादि । तत्र भावनाया, आधिक्यंतस्यपर्यन्तोऽवसानं तत्रजन्मयस्यसमुत्पन्नज्ञानस्य, अधिकविषयत्वेसत्यपि=विशदनिर्भासत्वविस्पष्टप्रकाशकत्वं=लौकिकविषयतानिरूपकत्वेसत्यपीत्यर्थः । तत्पूर्वकालिकेतिपूर्वकालिकानुभवगोचरात् पूर्वानुभवविषयादित्यर्थः । प्रकृतज्ञानस्याधिकोयोविषयस्तंविषयंप्रकाशयतः । भ्रमत्वमेवस्यात् , यथा कामिनींभावयितुःकामुकस्यपुरोवर्तितया अन्या एव कामिन्याःप्रतिभासवदित्यर्थः । अनधिकविषयत्वेतुस्मरणत्वम्, पूर्वानुभूतसंस्कारजनितस्यस्मृतित्वात् । तदुक्तं—
“प्रमाणमनुभूतिःस्यात्स्मृतेरन्यास्मृतिपुनः । पूर्वविज्ञानसंस्कारमात्रजंज्ञानमुच्यते ।।” इति ।

अयमाशय आचार्यस्य । यादृशपदार्थविषयकोऽनुभवस्तेन तावन्मात्रविषयकंस्मरणंजायते, अनुभूतस्यपुनःपुनःस्मृत्यभ्यासेनसंस्कारबाहुल्यंसंपद्यते‘तत्पर्यन्तेस्मरणाभ्यासेसतिजायमानंस्मरणमेवप्रत्यक्षवत्, विशदविषयाभासोभवतीति । तत्र यदि प्रत्यक्षसमानाकारकंस्मरणात्मकंज्ञानभवमिन्द्रयजनितं स्वीक्रियते, तदातादृशयोगिज्ञानस्यप्रत्यक्षसमानाकारकस्यपूर्वानुभूतमात्रविषयकत्वात् , न परमेश्वर ‘विषयकंयतस्तत्पूर्वमीश्वरानुभवाभावेनतदुदयासंभवात् । तादृशज्ञानस्यस्मृतिरूपत्वेनप्रमाणत्वाभावात् “प्रमाणमनुभूतिःस्यात् स्मृतेरन्या” इतिवचनात् । अनुभवत्वेसतितद्वतितत्प्रकारकज्ञानस्यैवगौतमादिभिः प्रमाणत्वस्वाकारात्—

तथापि तथात्वस्वीकारेकथंविदितविषयनियमातिक्रमणम्, अतिक्रमेकुतस्तस्यप्रत्यक्षत्वम् ? इति न तादृशयोगिज्ञानंसर्वानुभवैश्वर्यवन्तमीश्वरंगमयेदिति ।

“मितिःसम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता । तदयोगव्यवच्छेदःप्रामाण्यंगौतमेमते॥”इत्युदयनोक्तेः ।

प्रमाणं च प्रत्यक्षादिकंपञ्चैव । न चान्यतमजनितंज्ञानंस्मरणंतस्यसंस्कारमात्रजन्यत्वात् । संस्कारस्यापिप्रमाणत्वेस्वीकृतेप्रमाणपञ्चकत्वव्याघातात् । इदमुक्तंभवति “अनधिगतावाधितार्थविषयमेवप्रमाणमितिस्वाकृत्येदंकथितम् । अवाधितार्थमात्रविषयकत्वस्यप्रमाणत्वेतुकोदोषइतिविचारकैरेव विवेचनीयम् । ग्रन्थबाहुल्याद्विरतोहम् । यदियोगिज्ञानस्यस्मृतिरूपत्वेतु “यथार्थानुभवत्वलक्षणम्, अज्ञातार्थज्ञापकत्वलक्षणं वा प्रमाण्यंनास्तीतिकथम् प्रमाणंस्यादीश्वरप्रत्यक्षे इति । यदिअतिन्द्रियजमपि भावनाप्रकर्षपर्यन्तंयोगिज्ञानम्, तदाप्रत्यक्षसामान्यस्यलोकप्रसिद्धोयोनियमः संवद्धार्थग्राहकलक्षणस्तादृशनियमंकथमतिक्रामिष्यतियोगिज्ञानम् । यदिकदाचित् लोकप्रसिद्धतादृशनियमस्यातिक्रमणंकरिष्यति, तदाप्रत्ययत्वव्यापकतादृशनियमस्याभावे, व्यापकाभावात्, तद्वाध्यप्रत्यक्षत्वस्यापिततोऽवश्यमेवनिवृत्तिप्रसज्येत, गुणोऽव्यापकद्रव्यत्वस्यनिवृत्तौतद्व्याप्यपृथिवीत्वस्यनिवृत्तिवदेव । यथावाऽव्यापकवृक्षत्वनिवृत्तौशिंशपात्वनिवृत्तिवदितिसंक्षेपः ।

सूक्ष्मस्थूलसाधारणचेतनजडात्मकसर्वजगत् साक्षात्कर्तरिसर्वज्ञोसर्वनियन्तरिहेयप्रत्यनीकसर्वकल्याणगुणवतिपरमेश्वरेश्रीसीतानाथेऽस्मदादीनामल्पप्रज्ञानांयोगिनां वा, इन्द्रियरूपंचक्षुरादिकंप्रत्यक्षंप्रमाणंतद्विषयकप्रमोत्पादकंनभवतीति। स्यादेतत्बहिरिन्द्रियनिरपेक्षकेवलमनस वाह्यार्थग्रहणेसामर्थ्याभावेपियोगजप्रकृष्टशुभाशुभादृष्टसहकृतस्यान्तःकरणस्य, वाह्यविषयेष्वतीन्द्रियेषुभूतभविष्यवार्तमानिकेषुचार्थसमुदायेषु कथंचित् प्रवृत्तिर्भवेदपि । ततप्रकृष्टादृष्टसहकृतमनोजनितमेवप्रत्यक्षम्, इतियोगिनांतदीश्वरेप्रमाणं स्यादेव । प्रत्यक्षस्यसंवद्धावर्तमानार्थग्राहकत्वमितिनियमस्तु, योगिव्यतिरिक्तास्मदादिप्रत्यक्षविषयक एव । लौकिकविषयतासम्बन्धेनप्रत्यक्षंप्रतितादात्म्येनयथायथंविषयादेःकारणत्वावगमात् ।

अत्रब्रूमः प्रकृष्टादृष्टविशेषसहकारेणापिप्रमाणिकसर्वार्थग्रहणमेवभवतुनामसर्वेश्वरेचैकस्मिन् न किञ्चिदपिप्रमाणंपश्यामि । अतोनक्लेशकर्मविपाकाशयैरपरामृष्टपुरुषविशेषस्यसिद्धिर्योगिप्रत्यक्षेणापिसंभवतीत्याक्षेपकाभिप्रायः ।

परमेश्वरध्यानजनितं परमेश्वरविषयकज्ञानमेवपरमात्मविशेषमानसप्रत्यक्षंप्रमाणंपरमेश्वरे, इत्यपिनिरस्तमेवभवतीतिज्ञेयम् । तथाहिपरमेश्वरस्यध्यानंपरंज्ञानमन्तरा न संभवति—तत्रपरमात्मज्ञानंप्रत्यक्षेणभवतीत्यधुनैवनिराकृतम् नाप्यनुमानम्, गमकम् । अव्यभिचरितलिङ्गाभावात् । नच कार्यत्वादिनातत्सिद्धिः,कार्यत्वहेतोर्मेघमालादौव्यभिचारात् । नोपमानंतत्रप्रमाणम्“नतस्यकार्यंकरणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते” इत्यादिश्रुत्यैवतत्सदृशस्यनिराकरणात् । अतएव “गगनंगगनाकारंसागरः सागरोपमः । रामरावणयोर्युद्धंरामरावणयोरिव” इत्यादावन्वयाकारएवस्वीकृतोपमा, उपमानस्याभावात् ।

नापि प्रत्यक्षातिरिक्तंतत्रेश्वरंप्रमाणम् । तत्किमनुमानमागमो वा ? तत्रागम प्रमाणंपश्चाद्विचारयिष्यते । प्रथममनुमानंनिराकर्तुंविकल्पयामि, अनुमानमपिविशेषतो

तस्मादन्ततोगत्वाशास्त्रस्यैवेश्वरेप्रमाणत्वंवक्तव्यम् । शास्त्रंचप्रवृत्तिनिवृत्तिपरकत्वात्कार्यार्थेएवप्रमाणम्,नतु सिद्धार्थेप्रमाणम्—“आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामितिंजैमिनिनयात्। तथाचकार्यपरक शास्त्राशयेनेश्वरेतात्पर्यम् । किञ्चश्रुतिपौरुषेयत्वमते—शब्द:ककारादिरनित्य:कार्यत्वादित्यनुमानेन तस्यानित्यत्वम् । नचकण्ठताल्वाद्यभिघातेनाभिव्यज्यते एवशब्द:निष्पीडनेनतिंलेभ्यस्तैलवत् इति वाच्यम् तथासत्युच्चारणभेदेनवर्णेषुभेदप्रतिपत्तिर्नस्यात् तथाचवर्णसमुदायात्मकपदस्यानित्यत्वं, ततश्चपदसमुदायस्यवाक्यस्यतथात्वम् एवमेववाक्यंसमुदायात्मकवेदस्यानित्यत्वमीश्वर रूपपुरुषविशेषाज्जायमानत्वेन, सजातीयोच्चारणानपेक्षोच्चारणकर्तृतयाश्रुते:पौरुषेयत्वमेव“यस्य नि: श्वसितंवेदा” इत्यादि स्मरणात् । एतादृशपौरुषेयत्ववादिमतेपुनरत्रपरस्पराश्रयदोषोपि भवति, तथाहिपरमेश्वरसिद्धौतदुच्चरितत्वात् वेदस्यप्रामाण्यंसेत्स्यति, अर्थात्, क्लेशकर्मविपाकादिराहित्येनेश्वरस्यनभ्रमप्रमादौ, तदभावान्नानृतवादित्वम्, तस्मात्पुरुषविशेषादुच्चरितोनानृतारूपोपितुसत्यएवेतिवेदस्यप्रमाण्यंसिद्ध्यति, ततश्चप्रमाणभूतवेदज्ञापनात्, ईश्वर:सेत्स्यति । एवञ्चप्रमाणभूतवेदसिद्धौपरमेश्वरसिद्धि: परमेश्वरसिद्धौचवेदस्यप्रमाण्यमित्येवंरूपेणपरस्पराश्रयग्रस्तत्वात्, इति नशब्दज्ञाप्योहरिरिति । अनुमानप्रमाणकत्वंतुतस्याचार्येणस्वयमग्रेदर्शयिष्यते । एवञ्चसाधकाभावेनेश्वरासिद्धौतज्ज्ञानासिद्धिरितीश्वरज्ञानामूलश्वरप्रणिधानाद्यसिद्धिरिति न तद्व्यापियोगिज्ञानगम्यत्वमिति । एवंलौकिकयौगिकभेदेनद्विप्रकारकस्यापिप्रत्यक्षस्यनेश्वरेप्रमाणत्वम् ।

॥ इतीश्वरेप्रत्यक्षप्रमाणनिरसनप्रकरणेतत्त्वदीप: ॥

अथयथाप्रत्यक्षप्रमाणमीश्वरेपदंनादधातितथाप्रमान्तरस्यापीश्वरेनप्रमाण्यमितिकथयितुमुपक्रमते **नापिप्रत्यक्षातिरिक्तमित्यादि** । मतविंशेषेतावत् त्रिविधंकेवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तथान्यत्र विशेषतोदृष्टं सामान्यतोदृष्टमित्येवंद्वैविध्यमेव प्रतिपादयामास; यत्रखलुसिषाधयितंसाध्यम्, प्रत्यज्ञम् तस्यप्रत्यक्षेणान्येनसहभूय: सहचारदर्शनंभवति ततस्तादृशसहचारवलात्साध्यसामानाधिकरण्यरूपव्याप्तेर्निश्चयो भवति, तत: हेतुवान् पक्ष इतिपक्षधर्मता ज्ञानमुदेति तदनन्तरंसाध्यनिरूपितव्याप्तिविशिष्टहेतुमान् पक्ष इति ज्ञानंसाध्यव्याप्योहेतु: पक्षे इति वा विशिष्टवैशिष्ट्यावगाहिज्ञानंपरामर्शोजायते, तदनुसाध्यवान् पक्ष इत्यनुमितिर्जायते, यथा प्रत्यक्षमहानसीयवन्हिनिरूपित व्याप्तिमता धूमेन वन्ह्यनुमानं तत् विशेषतोदृष्टोऽनुमानम् । अर्थात् यत्रसाध्यरूपस्वलक्षणोवन्ह्यादि: प्रत्यक्ष: पूर्वंदृष्टश्च, तत्रक्रमपरंपरयाजायमानमनुमानमेतत् यथा महानसे प्रत्यक्षदृष्टवन्हे: पर्वतेधूमेनग्रहस्तत्रेदमनुमानम् । यत्रतुसाध्यात्मकस्वलक्षणोनप्रत्यक्षयोग्यातीन्द्रियादिंकारणेन, तत्र सामान्यधर्मदर्शनेनजायमानमनुमानंसामान्यतोदृष्टानुमानम्, यथेन्द्रियविषयकानुमानम्, अत्रेन्द्रिय-

दृष्टंसामान्यतो दृष्टं वा ? तत्रनाद्यःसर्वथाऽप्रत्यक्षेपरमेश्वरेसाध्यप्रत्यक्षपूर्वकगृहीतव्याप्तिकधूमादिभ्योजायमानस्यैवविशेषतोदृष्टानुमानत्वेनसाध्याप्रत्यक्षेतदनुमानस्यैवोदेतुमशक्यत्वात् । नहि अज्ञातवह्निकाःपुरुषाव्याप्तिग्रहणाभावात् तादृशधूमेवह्निपर्वतेनिश्चिन्वन्ति । नवासर्वार्थसाक्षात्कारमर्थेभगवतिसामान्यतोदृष्टानुमानमपि, तादृशहेतोर्दर्शनानुपपत्तेः ।

त्वसामान्यविशेषो न दृष्टमर्वागृदृशा, किन्तुकरणत्वसामान्यस्यकरणविशेषोदृष्टोवास्य इति करणत्वसामान्येन, रूपादिविज्ञानंसकरणकंक्रियात्वादित्यत्रपरिशेषतयाकरणत्वसामान्यविशेषइन्द्रियत्वमनुमितं भवतीति तत्रद्विविधेऽनुमानेविशेषतोदृष्टस्येश्वरेप्रमाणत्वं न संभवतीतिदर्शयितुमाह **तत्रनाद्यःइति**। तत्रानुमानद्वयेविशेषतोदृष्टानुमानमीश्वरेनपदमादधाति, कुतः ? तत्राह **सर्वथाऽप्रत्यक्षेपरमेश्वरे** इत्यादि । सर्वथेति,इदंविशेषतोदृष्टानुमानम् , सकलकरणातिक्रान्ते, न समर्थम् , कथंनसमर्थम् तत्राह, **अप्रत्यक्षेति** =तदसाधारणाकारग्रहणपूर्वकविशिष्टतत्सहचारदर्शनाधीनतद्व्याप्तिज्ञानविषयलिङ्गरूपस्य विशेषतोदृष्टानुमानस्यासाधारणाकारेणसर्वज्ञत्वादिनाऽप्रत्यक्षत्वादीश्वरस्यतत्सहचारदर्शनमूलकव्याप्तिग्रहस्यहेतुविशेषेऽसंभव ईश्वरे इति ।

विशेषतोदृष्टानुमानस्यानुमानात् पूर्वंव्याप्तिग्रहणसमयेविशिष्टासाध्याग्रहणंविनाऽसंभवंदर्शयितुमुपक्रमते **नहिअज्ञातवन्हिकाः** इत्यादि । अर्थादनुमानात्पूर्वमसाक्षात्कृतवन्हिविशेषाअनुमातारोवन्हित्वावच्छिन्नवन्हिनिरूपितहेतुव्यापकसाध्यसामानाधिकरण्यलक्षणव्याप्तिंधूमविशेषेगृहीतुंसमर्था नप्रभवन्ति । सिषाधयितवन्हिसामान्यस्यानुमानपूर्वमेवार्थात् व्याप्तिग्रहणकालेएवमहानसादौदृष्टत्वात्, तत्रधूमानुमानस्यविशेषतोदृष्टत्वमितिनाम भवति । वन्हित्वावच्छिन्नेनसामान्यतोव्याप्तिग्रहणादेव, यत्रवन्हित्वातिरिक्ताकारविशेषस्यपर्वतीयपक्षत्वादेरपिपक्षधर्मताबलात् सिद्धिमिच्छन्ति, यत्र वा महानसीयवन्हीतरवन्ह्यभाववान् पर्यतइत्याकारकेतरबाधसहकारकालेसामान्यपरामर्शादेवमहानसीयवन्हिमान् पर्वतइत्याकारकानुमितिमिच्छन्तितत्रपुनर्धूमहेतुनाऽनुमानंजायतेतदनुमानमेव सामान्यतोदृष्टानुमानमिति । अथवा यद्व्यक्तेः कालदेशविशेषनियन्त्रितरूपेणपूर्वंज्ञानंजातम् , तद्व्यक्तेस्तथाविधस्यानुमापकमनुमानमेवविशेषतो दृष्टमिति । यथामहानसीयवन्हेःपूर्वंज्ञानंजातंकालान्तरेतत्रैवतदनुमापकंधूमादिकंविशेषतोदृष्टम् । अथवा तद्रूपवान्तद्रसादिकमेवविशेषतोदृष्टानुमानमिति । धूमत्वधर्मपुरस्कृत्यधूमेनजायमानंवन्हित्वावच्छिन्नविषयकमनुमानंतुसामन्यतोदृष्टमेव नतुविशेषतोदृष्टमिति । सर्वथापिविशेषतोदृष्टमनुमानमीश्वरंगमयितुं न समर्थम् , तत्रपुरुषविशेषरूपेश्वरस्यातीन्द्रियतयातत्प्रत्यक्षस्यासंभवादितिसंक्षेपः ।

सामान्यतोदृष्टानुमानमपि परमेश्वरेऽनुमापकतयाप्रमाणं न भवतीति दर्शयितुमुपक्रमते **नवा सर्वार्थसाक्षात्कारसमर्थे** इत्यादि । साधनेच्छाविषयीभूतविशेषाकारव्यतिरिक्तसामान्यधर्मावच्छिन्नगृहीतव्याप्तिकत्वमेवहेतोः सामान्यतोदृष्टानुमानत्वम्, यथाचाक्षुषादिज्ञानं सकरणकं क्रिया-

विवादास्पदं जगत्, एकचेतनजनितम्, अचेतनाजन्यत्वात् स्वस्थस्वशरीरवत्। एवं विवादास्पदंजगत् बुद्धिमत् कर्तृकंकार्यत्वाद्घटादिवदिति। आभ्यामनुमानाभ्यां जगत्कर्तृतयापरमेश्वरसिद्धिरितिन्यायानुसारिणोवदन्ति।

त्वात् छिदादिक्रियावत् अत्रेन्द्रियत्वजातीयकं करणंसिषाधयिषितम्, न तत्प्रत्यक्षम्, अपितुकरणत्वजातीयकंवास्यादिकंतथा, तत्रसिषाधयिषितविशेषाकारातिरिक्तकरणत्वसामान्यधर्मानच्छिन्नेनसहपूर्वंक्रियात्वहेतोर्व्याप्तिग्रहणात् तेनेन्द्रियजातीयककरणस्यानुमानंभवतीतितत्सामान्यतोदृष्टमितिकथ्यते। एतादृशं सामान्यतोदृष्टानुमानंप्रभवति परमेश्वरे परमेश्वरस्यस्वरूपतोऽदृश्यतयातद्गताविशेषधर्मस्य सामान्यधर्मस्यादृष्टत्वेनतत्रव्याप्तिग्रहणासंभवात्। ईश्वरे सर्वधर्मंसामान्यरूपंविशेषरूपं वा निषेधतिश्रुतिः "अशब्दमस्पर्शमरूपमव्ययंतथाऽरसंनित्यमगन्धवच्चेति, "नतस्यकार्यंकरणं च विद्यते" इत्यादि, ततश्चेश्वरवत्तदीयधर्मस्याप्यप्रत्यक्षतयातेनसहव्याप्तेरग्रहादिति।

॥ इतीश्वरेऽनुमानस्यप्रामाण्यासंभवोपक्षेपप्रकरणेतत्त्वदीपः ॥

विशेषतोदृष्टानुमानंसामान्यतोदृष्टानुमानमीश्वरसाधनाय न प्रभवतीतिकस्यचित्पूर्वपक्षमुपश्रुत्यतर्करसिकास्तर्ककेवलेनैवतत्वसाधनेकुशलाः प्रत्यवतिष्ठन्ते। भवतुनामश्रुत्यादिविरोधादृश्यत्वाच्चपरमेश्वरः प्रत्यक्षाग्राह्यःकिन्तुद्वितीयप्रमाणेनतत्साधयामितत्राह **विवादास्पदंजगदित्यादि**। तत्र जायते इति जगदितिव्युत्पत्यासर्वंकार्यद्रव्यजातमितिगृह्यते। तच्चजगत्, एककर्तृकंनवेतिप्रतिपत्त्यासंशयविशयीभूतंपक्षः एकचेतनकर्तृकमितिसाध्यम्, अचेतनेनाजन्यत्वादितिं हेतुः। अन्नाभावादिरोगग्रस्त शरीरस्य स्थितो नानाचेतनधीनत्वेन न दृष्टान्तसंभवति तत्राह **स्वस्थशरीरवत्** नीरोगस्वशरीरवदित्यर्थः। तस्यस्वात्मैकांधीनत्वदर्शनात्।

अचेतनारब्धत्वम्, अचेतनसमवायिकारणकद्रव्यत्वरूपमेव। समवेतद्रव्यत्वरूपमितिवेति केचन, तदेवहेतुतयाविवक्षितम्। तेनारब्धत्वस्यैवलिङ्गत्वसंभवे, अचेनारब्धत्वस्यव्यर्थविशेषणत्वशंकापि न भवति, एकस्यहेत्वन्तरादूषकत्वनियमेन, हेत्वन्तरेणाभिमतसाध्यसिद्धौहेत्वन्तरस्यसंभवेपि न तत्र कोपिदोषःप्रथमेनयत्कर्तव्यंहेत्वन्तरेणापिसम्पादनादिति। एवं क्रमेणैकस्यविधातुः साधकमनुमानंकथितम्। परमेश्वरस्यसर्वज्ञत्वादिविशषयकमनुमान्तरमपिदर्शयति **विवादास्पदंजगत् बुद्धिमत् कर्तृकमि**त्यादि। एतदनुमानं "क्षित्यङ्कुरादिकंसकर्तृकंकार्यत्वात् घटादिवदित्यस्मिन्ननुमाने एवपर्यवसितं भवति। तत्रकर्तृत्वमुपादानगोचरापरोक्षज्ञानचिकीर्षावत्वरूपमेव, तेनघटादिकार्येचेतनकुलालात्मकबुद्धिमत्कर्तृकत्ववदिहापितथात्वंसिद्ध्यति। इत्थंचजगदात्मकपक्षवृत्तिना कार्यत्वलिङ्गेनतत्रकश्चित् कर्त्ता कुलालादिवदेवानुमितोभवति। तस्यकार्यत्वहेतोर्जगदात्मकपक्षसम्बन्धवलेनपरमेश्वरस्यसर्वज्ञत्वादिकमनुमानवलात्सिद्धमेवभवति।

अर्थात् कार्यंसकर्तृकंकार्यत्वाद् घटवदित्यनुमानंफलितंतदेव च विवक्षितम्। न चैवं पक्षतावच्छेदकहेत्वोरेकत्वेऽनुमानंनोदेष्यतातिंवाच्यम्, अत्रपक्षतावच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वात्, तत्रपक्षता-

अयमाशयः । यदेतत्परिदृश्यमानंकार्यजातंतत्सर्वंस्वकीयोपादानोपकरणसम्प्रदानप्रयोजनादिज्ञातृत्वेनविरचितमेवात्रगम्यते, यथाघटगृहादिकम् ।

विवादास्पदीभूतंपृथिवीमहार्णवादिकंसर्वकार्यमितितदपिचेतनपूर्वकमेवेतिज्ञायते ।

वच्छेदकसामानाधिकरण्येनसाध्यसिद्धिघटितव्यापकसामानाधिकरण्यलक्षणव्याप्तिनिश्चयस्यविरोधेमानाभावात् । अर्थात् , यस्मिन्पक्षेसाध्यंसिषाधयिषितं तत्रैवप्रत्यक्षादिनासाध्यसिद्धौ, तन्निश्चयस्तत्रैवपक्षेऽनुमितिंविरुणद्धि, व्यक्त्यन्तरेसाध्यसिद्धिर्नविरुणद्धितामनुमितिम् । तथाचपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धिःपक्षतावच्छेदेनजायमानानुमितिंप्रतिवध्नाति । पक्षतावच्छेदकावच्छेदेनसाध्यसिद्धिः पक्षतावच्छेदकावच्छेदेनजायमानानुमितिंपक्षता न समानाधिकरण्येनजायमानानुमितिं च प्रतिवध्नात्येवेति निश्चयः । विशेषतएतत्तत्त्वंजगदीशकृतपक्षताग्रन्थेविलोकनीयंजिधृक्षुभिः ।

नच पक्षतावच्छेदकहेत्वोरेकत्वेउपनयादिवाक्यं न समञ्जसंस्यात् , उद्देश्यतावच्छेदकविधेययोरेकत्वेशब्दासंभवःघटवान्घटवानितिवदितिवाच्यम् , एवं सतिस्वरूपसम्बन्धविशेषंकार्यत्वंपक्षतावच्छेदकम् , प्रागभावप्रतियोगित्वात्मकोत्पत्तिरूपकार्यत्वस्यहेतुकरणेनतयोः परस्परविभिन्नत्वेनपक्षतावच्छेदकहेत्वोरेकत्वमायातीतिदोषस्यनिरवकाशीकृतत्वादितिसंक्षेपः । एवम्—

"कार्यायोजनधृत्यादेःपदात्प्रत्ययतःश्रुतेः । वाक्यात्संख्याविशेषाच्चसाध्योविश्वविदव्ययः ॥"

इत्युदयनोक्तप्रकारेणकार्यत्वहेतुवत् हेत्वन्तरेणापिपरमेश्वरानुमानंसंभवतीतिवोध्यम् ।

यद्यपीश्वरसाधकंसामान्यतोदृष्टानुमानंप्रदर्शितमितितस्यातिसंक्षिप्तत्वादल्पधियां न सुखेनवोधजननेसमर्थमितिमत्वातमेवविशदयितुमुपक्रमने **यदेतत्परिदृष्यमानंकार्यजातमित्यादि** कार्यवर्गस्यद्रव्यरूपस्यतदेवोपादानंतत्समवायिकारणंयदन्तोगत्वापरमाणवःस्वसजातियाः यथावायवीयद्व्यणुकादिकार्याणामुपादानकारणंवायवीयाः परमाणवःतेषु अदृष्टवदात्मसंयोगेनाद्यक्रियाजायते,तेनकर्मणापूर्वदेशाद्विभागःप्रदेशान्तरेणतेषांसंयोगः । ततश्चपरमाणुसंयोगोऽसमवायिकारणम् , अदृष्टमीश्वरेच्छादिकं यथायथंनिमित्तकारणम् , तदेवंपरमाणुभ्योद्व्यणुकोत्पत्तिस्ततस्ताभ्यांद्व्याणुकाभ्यां त्र्यणुकादिकंजायते, एवं क्रमेणमहावयविघटादिकार्याणांसमुत्पत्तिर्भवति । तेनकार्यवर्गेणयथादृष्टंजीवानांफलोपभोगोभवति । तत्र यद्यपिधर्माधर्मंजीवजनिर्मितंसर्वदाजीवसमवेतमपीति । तथाप्यज्ञत्वाज्जीवो नो तानिनियमयतिंनियामने समर्थोभवति, किन्तुतददृष्टानांनियामकःसर्वशक्तिःसर्वज्ञएकःपुरुषःसिद्ध्यतीति मूलप्रदर्शितानुमानस्य संक्षिप्ताशयः । अक्षरार्थस्त्वित्थम्तथाहि **उपादानोपकरणमित्यादि,** तत्रोपादानंसमवायिकारणम् , समवायिकारणासमवायिकारणनिमित्तकारणैःकार्यस्योत्पत्तिर्भवतीतिनियमः । तत्रन्यायपरिभाषायांयत्समावायिकारणंतस्यैवदर्शनान्तरे परिणामवादउपादानकारणमितिनामभवति । उपकरणं—सहकारिकारणम् , अत्रैवोपकरणकारणेऽसमवायिकारणनिमित्तकारणानांकुलालचक्रचीवरजीवादृष्टेश्वरेच्छाप्रयत्नादीनांसमावेशोभवति । सम्प्रदानमुपभोक्तायस्यसुखदुःखोपभोगायसर्गोभवतिसजीवविशेषः ।

नचैतेषुमहार्णवादिषुहेतुःस्वरूपासिद्धिः, एतेषामवयवित्वेनतत्सिद्धेः । इहचान्त्यावयविघटादितआरभ्यद्व्यणुकपर्यन्तंसोपादानकमेव । तदुपादानमन्त्यावयवरूपाश्चतुर्विधाः परमाणवएवसकलजगतः । तेचवायवीयास्तैजसाआप्याःपार्थिवाश्च । तेषुप्राथमिकपरिस्पन्दस्तदनुकूलादृष्टवदात्मसंयोगासमवायिकारणकोभवति, तत्रोपकरणंभोक्तृनिष्ठधर्माधर्मलक्षणमदृष्टमेव । प्रयोजनंतुसृष्टेरनेकप्रकारकार्थक्रियाविशेषात्मकः । फलभोप्रयोजनंक्रियमाणकार्यजनितंफलम् । उपादानादीनां=समवायिकारणएतेषामुपादानादीनांयः संवेदितासाक्षात्करणशीलः कर्ताकुलालस्थानीयो यश्चेतनविशेषस्तेननिमित्तकारणेनरचितंसम्पाद्यमानंकार्यजातंघटादिकंदृष्टमिति । एतावताऽशयप्रकाशनपरकवाक्यजातेनकार्यत्वहेतोः सकर्तृकत्वव्याप्यमिति । अनुमानाङ्गभूतमुपनयनिगमनं "कार्यं च पृथिव्यादिकमित्यनेनप्रदर्शितम् । अत्रकर्तृत्वमुपादानादिगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वरूपमेवविवक्षितम् । कार्यं च पृथिव्यादीति, विवादास्पदमितिवाक्यम् , सकर्तृत्वाकर्तृकत्वविप्रतिपत्तिविषयीभूतम् । संदिग्धसाध्यधर्माथर्मिपक्ष" इतिसंदिग्धसाध्यकत्वरूपपक्षत्वंसमुपपद्यतेइत्यपिसूचितम् । अथवा सिषाधयिषाविरहविशिष्टसिद्ध्यभावएवपक्षतेति ।

हेत्वभाववान्पक्षःस्वरूपासिद्धिः, अर्थात् अस्मीन्पक्षे,हेतुत्वेनाभिमतस्याभावोभवति, तादृश हेतौस्वरूपासिद्धिर्भवति, यथाहृदोवन्हिमान्धूमादित्यत्रहृदात्मकपक्षप्रत्यक्षेणधूमाभावोगृह्यते, तदाधूमवान्हृदइतिज्ञानंनजायते, धूमवत्ताबुद्धिंप्रतिधूमाभाववत्तानिश्चयस्यप्रतिबन्धकत्वात् , ततश्चपक्षतानिवृत्यातद्द्वारासाध्यव्याप्यवान् पक्ष इतिपरामर्शाभावान्नानुमितिरुदेति । अयंदोषःसाक्षादनुमितिकरणंपरामर्शंनिरुन्धानफलतोऽनुकितिप्रतिबन्धात्येव । एवमेवातिविस्तृतपृथिवीसमुद्रादौविरहदर्शनेनकार्यत्वंहेतुः स्वरूपासिद्धमितितदपनोदनायोपक्रमते **नचैतेषु** इत्यादि ।

परिहरति **एतेषामवयवित्वेनेत्यादि** । यथाघटादौ, अवयवित्वेविद्यतेइतिकार्यत्वंविद्यते एवेतिनतत्रघटादौकार्यत्वाभावः प्रत्युतकार्यत्वंतथैवपृथिवीमहार्णवादावपि, अवयवित्वंसमस्तीतितत्रापिकार्यत्वस्यानुमानसिद्धतयानासिद्धत्वंमहार्णवादिपक्षे इति । इहचान्त्यावयविघटादितआरभ्यकपालिकात्रसरेणु, द्व्यणुकपर्यन्तमवयवि, सर्वंकार्यजातंद्रव्यात्मकचरमावयवपरमाणुसंयोगात्मकसमवायिकारणजन्यम् , अर्थात् परमाणवःसमवायिकारणंतदीयसंयोगोऽसमवायिकारणमितिताभ्यांजनितमितिक्रमः । तत्रोत्तरोत्तरकार्यापेक्षयापूर्वपूर्वकार्यद्रव्येऽवयवानामल्पत्वमाधिक्यंचेति । अवयवसंयोगविशेषजन्यत्वंकपालिकादौप्रत्यक्षसिद्धंत्रसरेणुप्रभृतिषुअनुमानसिद्धमेव, त्रसरेण्वादिसमवायिकारणस्यादृश्यत्वात् , कपालिकादिसमवायिकारणस्यप्रत्यक्षसिद्धत्वाच्चेति।अन्योपादानत्वंनामअवयवित्वासमानाधिकरणावयवत्वरूपमेवेति । तेचपरमाणवश्चतुःप्रकारकाःपृथिवीजलतेजोवायवीयाः गन्धशीतोष्णेरणस्वभावकाः । ते इमेचतुर्विधस्यकार्यद्रव्यस्यसमवाविकरणरूपाः । तत्रपरमाणूनांसर्गाद्यकालिकारंभकसंयोगोत्पादकक्रियारूप आदिस्पन्दोऽदृष्टवदात्मसंयोगलक्षणासमवायिकारणजन्यः । एतावतैवश्रीरामानन्दवेदान्तसिद्धान्तेऽदृष्टानामुपकरणत्वंकथितम् ।

क्तारोजीवाएवसम्प्रदानम् । नचेमेजीवाःस्वसमवेतमपिधर्माधर्ममदृश्यत्वाद्द्रष्टुंप्रभवन्तीति जीवव्यतिरिक्तःकश्चित्सकलभुवननिर्माणनिपुणःसर्वज्ञःसकलैश्वर्यसम्पन्नः सर्वशक्तियुतः पुरुषःसामान्यतोदृष्टानुमानेनसिध्यतीति ।

सोयंनैयायिकविचारःपलालपुञ्जवदसारोविकल्पासहत्वात्, तथाहिपृथिव्यादेरुत्पत्तौस्थितौ वा,एकचेतनाधीनत्वंसाध्यते, तत्प्रवृत्तौ वा,एकचेतनाधीनत्वंसाध्यते । तत्र न प्रथम द्वितीयकल्पौसंभवतः, अन्वयदृष्टान्तस्यनीरोगदेहस्यसाध्यविकलत्वात् । न

आद्यपरिस्पन्दस्वादृष्टमेवासमवायिकारणंनतुकार्यद्रव्यस्यसमवायिकारणगतसंयोगासमवायिकाणत्वमित्यत्रतर्कवलेनसाधककणादमुनिप्रदर्शितसूत्रमेवप्रमाणम् "अग्नेरुर्ध्वज्वलनंवायोस्तिर्यक्पवनमणूनांमनशश्चाद्यंकर्मादृष्टकारितमिति,अस्यार्थस्तद्भाष्यादेवविशेषतयाऽवधातव्यः। **प्रयोजनमिति** महदायासेनसम्पाद्यमानसर्गप्रयोजनमनवधिर्जीवोपकारप्रकारभेदः सृज्यमानपदार्थवाह्यानेकप्रकारकार्थक्रियारूपएवनानाविधभोगनिष्पादरूपोऽनन्तएवेतिभावः। सम्प्रदानं च साक्षादेवपरंरयातदुभयाभ्यां वा कार्यप्रयोज्यभोगमनुभवन्तोजीवनिकायाः।ते एव यथायथंसर्वपदार्थभोक्तारोभवन्ति।एतादृशसर्वप्रकारकपरमाणुसर्वजीवादृष्टशुभाशुभलक्षणकर्मसर्वजीलोपकाररूपसकलप्रपञ्चोपादानोपकरणप्रयोजनसाक्षात्कर्तृत्वादिजीवराशिषु नसंभवति, अल्पज्ञत्वादितिदर्शयितुंस्वसंपादितस्वकीयादृष्टसाक्षात्कर्तृत्वंयदाजीवस्यनसंभवतितदा, उपर्युक्तपदार्थेषुकाकथेत्याशयेनाह **नचेमेजीवाःस्वसमवेतमपिधर्माधर्मे**त्यादि,यस्मात् स्वसंपादितंस्वस्मिन् सदावर्तमानमप्यदृष्टजातंप्रभवति,तस्मात् तदतिरिक्तःसर्वज्ञःसर्वशक्तिसम्पन्नःपुरुषविशेषोऽधिकरणसिद्धान्तसिद्धःसिद्ध्यति।'यत्सिद्धावन्यप्रकरणसिद्धिःसोऽधिकरणसिद्धान्तः"इतिगौतमीयन्यायसूत्रम् । अस्यार्थः, यस्यसिद्धिंविनाप्रकृतार्थोनसिद्ध्यति, तथाभूतःप्रकृतार्थसिद्धेर्नान्तरीयकतयासिद्धयन्नथोऽधिकरणसिद्धान्तइतिभावः । एवञ्चसकलार्थसाक्षात्कारित्वमन्तरेणक्षित्यादेः कर्तुःपुरुषविशेषरूपस्यसकर्तृकत्वलक्षणःप्रकृतार्थो न सिद्ध्यतीतिविशिष्टकर्तृत्वलाभोऽधिकरणसिद्धान्तमतेनभवतीति फलति ।

॥ इतीश्वरेसामान्यतोदृष्टानुमानस्यप्रमाणताप्रतिपादकप्रकरणेतत्त्वदीपः ॥

नैयायिकाभिमतेश्वरसाधकमानंनिरसितुंमीमांसकाःप्रत्यवतिष्ठन्ते—**सोयंनैयायिकविचारःपलालपुञ्जवदसारः** इति । यथापलालसमुदायोऽसारोऽतीवनिर्वलस्तथैवतदभिमतेश्वरसाधकैकचेतनाधीनत्वादि हेतुप्रयोगोपिनिष्फलोभवन्नसारएवेति । असारतामेवतदीयहेत्वादावुपपादयितुमाह, **विकल्पासहत्वादि** त्यादि अस्यक्षित्यादेरेकचेतनायतत्वंनिरस्यति । महार्णवमह्यादेर्जन्मनिएकचेतनहेतुकत्वंसाध्यते ? अथवा पृथिव्यादिस्थितेरेकचेतनहेतुकत्वंप्रसाध्यते,अथवा भुवनादिप्रवृत्तेस्तथात्वंसाध्यते ? तत्रप्रथमद्वितीय विकल्पयोर्योऽन्वयदृष्टान्तोनिरोगदेहःप्रदर्शितःसच साध्यविकलस्तथा च व्याप्यत्वासिद्धिर्व्यभिचारश्च दूषणमापतति । तत्र नीरोगदृष्टान्तेसाध्यरहितमेवोपपादयितुमाह—**नखलु** इत्यादि । मानवीयशरीरोत्पत्तिस्थित्योःस्वसमवेतशुभाशुभादृष्टद्वारेणापिकारणमवश्यमेववक्तव्यम् , कार्यजातस्यादृष्टत्वनियमात् । तच्छरीराधीनोपभोगोपकारभाजामन्येषां तु तत्रादृष्टद्वाराकारणत्वंतदेहिनइवास्तीति, एकचेत-

खलु एकचेतनाधीनोत्पत्तिस्थितिकंशरीरं भवति, ये जीवायत्तशरीराधीनसुखादीनांभोक्तारो भवन्ति, तेषां तदुचितकर्मशालिनांसमेषामेवतद्देहिनइवतदुत्पत्तिस्थितिनिमित्तत्वं भवति । अपिच शरीरावयविनस्वावयवसमवायस्वरूपास्थितिरवयवसम्बन्धंविनापरंचेतयितारंनापेक्षते । या पुनःप्राणनलक्षणास्थितिश्चेतयितारमपेक्षते, न सा पृथिव्यादिपक्षे संभवतीतिस्थितिनैंकरूपापक्षसपक्षयोर्विद्यते । एकचेतनाधीनप्रवृत्तित्वेतु प्रबलानेकजनप्रयत्नचालितरूपाषाणशिलादौव्यभिचारात् जन्यत्वमात्रहेतुतएवैतत्साध्यसिद्धौनीलघूमादिवद् व्यर्थविशेषणतापि ।

नाधीनोत्पत्तिस्थितिकत्वंनीरोगदेहरूपदृष्टान्तेनास्त्येवेति । द्वितियविलल्पेस्थितिशब्दार्थविकल्पद्वारेण दूषणान्तरमपिंदर्शयितुमाह **अपिच** इति । शरीरं च अवयविचेतिशरीरावयवि, तस्येतिकर्मधारयः । अवयवसमवेतोत्पादकसमवेतेऽतिदृढेसतिस्वावयवसमवेतत्वलक्षणास्थितिः शरीरस्यनिरावाधाघटपटादिवदतिप्रसिद्धैवेति, नैतादृशस्थितेश्चेतनसापेक्षत्वमस्ति । प्राणवृत्त्यधीनाशैथिल्यावस्थानरूपाशरीरस्थितिस्तुजीवनयोनियत्नकारणकत्वाद्भवतुनामचेतनशापेक्षा, तत्र न कोपिविवादः—

“यत्नोजीवनयोनिस्तुसर्वथाऽतीन्द्रियोभवेत् । शरीरेप्राणसंचारेकारणंपरिकीर्तितमिति ॥”

दृष्टान्तेसाधनस्यव्यापकतयागृहीतैवंप्रकारस्थितिस्तुपक्षाभिमतेपृथिवीप्रभृतिकेनैवविद्यते । ततश्चकार्यत्वावच्छेदेन, एवंप्रकारकैकचेतनाधीनस्थितिकत्वसाधनेआंशिकोवाधोभवतीति वाधापहृतविषयमानंनसाध्यसादनायप्रभवतीति । तृतीयविकल्पेदोषंदर्शयितुमुपक्रमते **एकचेतनाधीनप्रवृत्तित्वे** इति । अनेकप्रवलजनचलनप्रवृत्तिमतिमहारथादौमहापाषाणखण्डादौचसाध्याभाववतिहेतोरनेकान्तत्व दोषोपिजायते, तथाचायोगोलकंधूमवत् द्रव्यत्वादित्यत्रधूमाभावरूपसाध्याभाववत्ययोगोलकेहेतोर्विद्यमानतयातादृशद्रव्यत्वहेतोर्व्यभिचरिततयानसाधकत्वमपित्वसाधकत्वंतथैवप्रकृतेप्रकृतहेतोरपिव्यभिचरिततयानसाधकत्वमिति । ननु व्यभिचारादिदोषदुष्टत्वेहेतोःकोदोषः ? इतिचेत् सत्यम् , अयमाशयःलक्षणं हिलक्ष्यस्येतरभेदसाधनायभवतीतिनियमः । तत्राव्याप्त्यतिव्याप्त्यसंभवदोषरहितंयल्लक्षणंतदेवलक्ष्यस्य स्वेतरभेदप्रकारकानुमितौगमकंस्यात् , तत्रयद्यतिव्याप्तिदोषाघ्रातंलक्षणंभवेत् , तदागौस्वेतरेभ्योभिद्यते, शृङ्गित्वादित्यनुमानप्रयोगेहेतोः शृङ्गित्वस्यगवेतरभेदीयावतिमहिषेसत्वेनव्यभिचारितयासाध्यसाधकत्वं न स्यात् । एवंलक्षणस्याव्याप्तिदोषग्रस्तत्वेतादृशलक्षणेन, इतरभेदानुमानेभागासिद्धिपक्षतावच्छेदक सामानाधिकरण्येनहेतोरभावेभागाशिद्धदोषस्यप्रसरात् । असंभवदोषग्रस्तत्वेलक्षणस्य तेनहेतुना स्वेतर भेदानुमानेहेतौअसंभवदोषवत्वेस्वरूपासिद्धिरेवदोषः पक्षतावच्छेदकावच्छेदेनपक्षेहेतोरभावेसत्येवस्वरूपा सिद्धेः प्रसरादित्येवंप्रतिसन्धाययत्रतत्रव्याप्त्यादिदोषादेरुद्भावनंकुर्वन्तिग्रन्थकर्तारस्तदनुमोदयन्ति च टीकाकृतस्तदन्येवेतिदिक् ।

अपिचप्रकृतहेतौव्यर्थविशेषणत्वरूपदोषोपिभवतीतिदर्शयति **जन्यत्वमात्रहेतुतएवेत्यादि,** एतदुक्तंभवति, यथापर्वतोवन्हिमान् नीलधूमादित्यत्रवन्हिव्याप्तधूममात्रेणैवसाध्यसिद्धौ, नीलत्वेतिविशेगणं

ननु भवतु, एकचेतनाधीनत्वमात्रंसाधनंतावतैवनिर्वाहादितिचेन्न, यतः सिद्धसाधनस्यतथाप्यपरिहारात् । यावन्तोभोग्यास्तेसर्वेपिजीवेनैवस्वादृष्टद्वारासमुत्पादनादितिसर्वसंमतम् । नचोपादानाद्यनभिज्ञत्वंदोषायजीवानामपिउपादानादिसाक्षात्कारस्यसंभवादितिनजीवस्यकर्तृत्वप्रतिक्षेपःकर्तुंशक्यः ।

व्यर्थंभवति, स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वस्यैवतथात्वात् । तथास्वसमानाधिकरणधर्मान्तराघटितत्वस्यैवहेतुत्वादितिधूमेनयथापर्वतादौवन्ह्यनुमानम् तथैवधूमप्रागभावादपितथाभवति, तत्र प्रागभावस्यसंग्रहायस्वसमानाधिकरणेतिविशेषंप्रक्षिप्तमुक्तललणे । एवञ्चप्रकृतानुमानेपिजन्यत्वमात्रस्यैवहेतुकरणेव्यभिचारादिदोषासंभवेनसाध्यसिद्धौभवन्त्याम् , अचेतनोपादाननिरूपितत्वस्यजन्यत्वेविशेषणे तादृशविशेषणस्यवैयर्थ्यंदुर्निवारमेव । ततश्चव्याप्यत्वासिद्धिर्दूषणंनातिक्रामति । यद्यपिसमवेतसमवेतद्रव्यत्वरूपफलितहेतौवैयर्थ्यादिदोषोनभवतितथापिफलितहेतावपिदोपान्तरमग्रेदर्शयिष्यते । तत्रसमवेतद्रव्याणि, पृथिव्यादिचतुर्णांप्रथमावयवितआरभ्यचरमावयविपर्यन्तजन्यद्रव्याण्येवेति ।

॥ इत्येकचेतनाधीनत्वानुमानदूषणप्रकरणेतत्त्वदीपः ॥

ननु यदि पूर्वानुमानेऽनैकान्त्यदोषादेकत्वविशेषणंत्यक्तुमिच्छसितर्हितत् त्यजताम् चेतनाधीनत्वमेवसाध्यते, इत्याशयेनाह**ननुभवतुएकचेतनाधीनत्वमात्र**मित्यादि । तत्रापिदोषमाह **सिद्धसाने**दित्यादि । यद्यप्यत्रप्रतिज्ञातिर्नामदोषोभवतितथापितस्यवचनदोषत्वादर्थदोपंवदतीति । सर्वेषामपिकार्यसामान्यस्यजैवीयादृष्टप्रयोज्यतयाचेतनाधीनत्वस्यस्वीकारात् ततश्चजीवाधीनत्वसाधने, जीवैरेवसिद्धसाधनंततश्चार्थान्तरदोषोऽपरिहार्य एव । अथादृष्टद्वाराचेतनप्रयोज्यत्वमात्रं न साध्यते किन्तुचेतनकर्तृत्वम् । कर्तृत्वंचाल्पजीवानां न संभवतीतिद्वितीयानुमाने एव, तत्रापिसिद्धसाधनमेव । एवञ्चलाघवपक्षपातित्वादनुमानस्येतिसकर्तृकत्वानुमानस्यापिसम्प्रतिपन्नजीवमात्रे एवविश्रामादिति ।

अथाल्पज्ञजीवस्यजगत्कर्तृकत्वंनोपपद्यतेतदुपादानादिसाक्षादसंभवादित्याशयेनाह **नचोपादानाद्यनभिज्ञत्वमिति**–जीवोजगदुपादानकारणपरमाणुं न प्रत्यक्षीकरोति, घटादौतथाविधकुलालस्यैवकर्तृत्वदर्शनादितिनशङ्कनीयंजीवस्याप्युपादानसाक्षात् कारसंभवात्, यतोयागदानाद्युपादानकारणपृथिवीप्रभृतीनांसर्वेजीवाः साक्षात्कुर्वन्त्येवेति । अयंभावःअग्निष्टोमादितत्तद्वैदिककर्मणोऽतिशयिततत्तत् पशुपुत्रस्वर्गादिफलसाधनभावमन्यथाऽनुपपत्तिप्रमाणतोज्ञात्वावेदद्वारावैदिकादिऋत्विजांवचनादपिसहकारकाणामनुकंपयैवानुष्ठाय, तादृशयागदानादिकर्मविध्यनतिक्रमेणसमधिगतपुण्याख्यसामार्थ्यविशेषाएवजीवराशयः पृथिव्यादिभूतचतुष्टयंभौतिककार्यवर्गाणामुपादानभूतंसहकारिणंप्रत्यक्षकृत्यतदुपादाय चजगत्सृजेयुरिति न जीवातिरिक्तकर्तृःकल्पनायाःपदाधानमिति । तस्माज्जीवाअपिउपादानंज्ञातुंक्षमन्तेतस्माज्जीवानांपृथिव्यादिकार्येषुकर्तृत्वस्यप्रतिक्षेपोनशंकनीय इति । अथजन्यद्रव्यानधिकरणलक्षणप्रलयसमयेआद्याणुकंपृथिव्यादिभूतानांविनाशात् , अवशिष्टस्यजीवजातीयकस्यदेहेन्द्रियाद्यभावेनज्ञानोपादानसामर्थ्यस्याभावात् , न जीवानांसर्गाद्यकालिकसर्गकर्तृत्वंस्यादितिचेन्मैवम् । तदापिपृथिव्यादीनां

ननु यागादिकर्मणःशक्तिरूपापूर्वंतस्यातीन्द्रियत्वात् प्रत्यक्षत्वाभावेपि, शक्त्याख्यापूर्वंवास्तुप्रत्यक्षविषयोऽतो न कोपिदोषः ।

नहि तन्तुवायादयः पटादिकार्यमारभमाणाः पटोपादानोपकरणभूततुरीवेमादिकार्योत्पादनशक्तिपूर्वमाकल्प्यैवपटादिकार्यमारभन्ते । यदितुशक्तिमजानतामभिलषित साधनेतदुपादानादिव्यवहारोनोपपद्यते तदाभवतुतत्रतथा ।

अत्र तु विलक्षणाः कर्मशक्तयः शास्त्रादवगम्यन्ते, इति तेन कर्मभिः कर्मानुगुणंसर्जने समर्थाभवन्त्येव विभागेनसृजन्तुनामेति ।

अपि च तदेवकार्यंचेतनकर्तृकंभवति, यतः शक्यक्रियंशक्त्योपादानादिकं च भवति

सर्वांशेनोत्पादविनाशस्यानभ्युपगमात् । किन्तुवर्तमानकालवदेवभागभेदेनैवोत्पादविनाशावितितौक्रमश आगन्तुकैकदेशवृद्धिह्रासलक्षणौभवतः । ततश्चजीवेष्वेवकेषाञ्चित्साधनविशेषप्राप्तज्ञानशक्त्यतिशयानां हीनांशप्रपूरणात्मकसर्जनंपृथिव्याद्याद्युपादानसाक्षात्कारादिभ्यः संभवेदेवविश्वामित्रादीनामित्यर्थः । जन्यभावानधिकरणलक्षणमहाप्रलयेतु न पुनस्तदनन्तरंपुनःसर्गःस्यात् । सावशेपप्रलयेऽर्थात्खण्डप्रलयेतु जीवविशेषाणांभगवद्भक्तानांतत्तद्भागभेदकर्तृत्वंसंभविष्यतीति न तदर्थमीश्वरकल्पनावसरःपदमादधातीति ।

अथशुभाशुभकर्मरूपमपिकार्यमात्रोत्पादनेसहकारिकारणंभवति, तादृशपुण्यपापाख्यादृष्टस्य प्रत्यक्षंजीवानां न भवतीतितदनुगुणकार्योत्पादकत्वंजीवानांनैवसंभवतीत्याशङ्क्यतन्निरसनायोपक्रमते **कर्मणः शक्तिरूपापूर्वमि**त्यादि । व्यक्त्यन्तरकर्तृकयागादिधर्मणोहिसाद्यधर्माणां च प्रत्यक्षकरणे साक्षीभूता अन्येजीवविशेषाः समर्थाभवन्त्येवेतिसर्वप्रत्यक्षमेतत् । शास्त्रादपितत्तद्यागादिकर्मणांफलंविशेषोत्पादनसामर्थ्यंजानन्त्येव । तथाचतत्तदनुगुणंसर्गसक्षत्येवशक्तिमतः साक्षात्कारःशक्तेर्ज्ञानमात्रं च कर्तृत्वोपयोगि, नतुशक्तेःसाक्षात्कारोपिकर्तृत्वोपयोगिभवति । स्वस्य च पुनःकरणसामर्थ्यंचापेक्षितम् । तथा च पुण्यपापशब्दवाच्यकर्मशक्तेः जीवानांप्रत्यक्षाभावेपिजीवगतंजगत्कारित्वंनानुपपद्यते, पुण्यपापाभ्यांतत्संभवादिति ।

यत्पूर्वंकथितंदृष्टान्तद्वारातदेवोपपादयितुमुपक्रमते **नहितन्तुवायादय** इत्यादि । अक्षरार्थो न तिरोहितः । **यदितुशक्तिमजानता** इत्यादि । **अत्रतु** इत्यादि, शास्त्रात्विचित्राःकर्मशक्तयो ज्ञायन्ते, तेनकर्मनिष्ठशक्तीनामागमादवगमेनकर्मभिरनेकजीवहेतुतकर्मानुगुणंसर्जनम् शक्तिमन्तोजीवाः विभागेनतत्तदेकदेशभेदेनसर्वं जगत्—अर्थात् कार्यद्रव्यगुणादिजातम् सृजन्तु इति ।।

।। इतिपृथिव्यादिसकर्तृकत्वानुमानस्यसिद्धसाधनत्वापादनप्रकरणेतत्त्वदीपः ।।

इतः पूर्वंकार्यत्वहेतौसिद्धसाधनतामुद्भाव्यतदनुतद्धेतौ स्वरूपासिद्ध्याद्यसिद्धिंदर्शयितुमुपक्रमते **अपिचतदेवकार्यमित्यादि** तत्रप्रथमतः स्वरूपासिद्धिमुपाधिद्वाराव्याप्यत्वासिद्धिं च प्रदर्शयति **यतः शक्यक्रियम्** इत्यादि ।

तत्रशक्यासंपादयितुंयोग्याक्रियाकरणंयस्यतत् शक्यक्रियम् । संपादयितुंयोग्यमित्यर्थः । **शक्यं-**

यथा घटादिकम् , यदशक्यक्रियमशक्योपादानादिच नतथातद् भवितुं संभवति, तथा च कथं पृथिव्यादिकं कार्यंस्यात् , कथं वा तदुपादानोपकरणादेः प्रत्यक्षविषयता । घटादिकमेवोपादानोपकरणज्ञानपूर्वकमितितत्रैवोपादानादिसाक्षात्कर्तुस्तज्जनकत्वंनान्यत्रेति ।

अपिचेश्वरभिन्नेनशरीरेन्द्रियवताऽनवाप्तसकलकामेनसंपादितंयद् घटादिकार्यंतत्सर्वम् कुलालादिवदल्पज्ञमेवसाधयतीति, भवदभिमतहेतुः सर्वज्ञमीश्वरोपस्थापनेविरुद्धात्तादृशहेतुनेश्वरसाधने विरोधदोष आपततीति ।

ज्ञानंसाक्षात् कारिरूपंयस्यतत् तथा, शक्यज्ञानमुपादानादिर्यस्यतत् शक्यज्ञानोपादानोपकरणादि । एतादृशंकार्यमेवसकर्तृकंभवतिनेतरत् । कार्यंचचेतनरहितंनास्त्येवेति । नचाशक्यक्रियादेर्महार्णवादेः पृथिव्यादेर्वाऽशक्यक्रियादेः कार्यत्वंसंभवति; तेनपक्षस्यकार्यत्वहेतुरहितत्वेनस्वरूपासिद्धिरापततीति । उपादानोपकरणपरमाण्वदृष्टादेः साक्षात्कर्तुमशक्यतयोपादानादिप्रत्यक्षचिकीर्षाकृतिमत् पुरुषकर्तृत्वं क्षित्यंकुरादेः कथमपिं न संभवेत् । तदापिस्वाग्रहानुरोधेनपृथिव्यादेः कार्यत्वमिष्यते तत्स्वीक्रियतांपरन्तुसकर्तृकत्वंतुनोपपद्यतेकथमपीति । घटादिकंकार्यमिति, अर्थात् यादृशंकार्यंकृतिसाध्यत्वार्हंज्ञेयत्वोपादानादिकं च भवति । एतावताशक्यक्रियत्वं शक्यज्ञानोपादानादिकंचोपाधिरित्युक्तंभवति । उपाधेः फलन्तुव्यभिचारोत्थापकत्वंसत्प्रतिपक्षोत्थापकत्वंवेतिज्ञातव्यम् । अयंभावः साध्यव्यापकत्वेसति साधनाऽव्यापकोधर्मः सचोपाधिस्तद्विपरीताव्याप्तिः । यथाधूमवान्वन्हिरित्यत्रार्द्रेन्धनसंयोगस्तथा, सचसाध्यस्यधूमस्यव्यापको यत्रधूमस्तत्रतत्रार्द्रेन्धनसंयोगस्यावश्यंभवात् , तदभावेतददर्शनादित्येवं धूमव्यापकत्वंतस्येतिव्यापकत्वनिर्वाहः । हेतुश्चवन्हिः सचायोगोलकेविद्यते इतितत्रार्द्रेन्धनसंयोगोनास्तितत्रनिर्धूमवन्हेर्विद्यमानत्वेनसाधनाव्यापकत्वमार्द्रेन्धनसंयोगस्येत्युपाधिलक्षणंसंघटेत । अयमुपाधिर्मूलहेतोवन्हेः पक्षेस्वभावेनसाध्याभावमनुभावयति, तथाहि अयोगोलकंधूमाभाववत् , धूमव्यापकार्द्रेन्वनसंयोगाभावात् , योयद्व्यापकव्यभिचारीसोऽवश्यंतद्व्याप्यव्यभिचारी, यथागन्धव्यापकपृथिवित्वव्यभिचारिस्नेहोऽवश्यंगन्धंव्यभिचरत्येव । अथवाऽयमुपाधिः स्वव्यभिचारेणसाध्यव्यभिचारमुत्थापयतिं, यथावन्हिर्धूमव्यभिचारी, धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् , अयोगोलकेधूमतद्व्यापकेन्धनसंगयोरुभयोरभावदर्शनादिति । एतदेवफलमुपाधेरितिनिश्चिन्वन्तितर्करसिकाः ।

॥ इतिकार्यत्वहेतोरसिद्धिदोषोद्भावनप्रकरणेतत्त्वदीपः ॥

कार्यत्वहेतौसिद्धिसाधनासिद्धिदोषं प्रदर्श्यतस्मिन्हेतौविरुद्धदोषमपिदर्शयितुमुपक्रमते **अपिचेश्वरभिन्नेन** इत्यादिं । निश्चितसकर्तृकत्वरूपसाध्यवतिघटादौशरीरेन्द्रियादिमत्त्वस्वार्थापेक्षत्वानीश्वरत्व परिमितज्ञानवत्त्वादिविशिष्टकर्तृत्वेनसहैवकार्यत्वहेतोर्व्याप्तिग्रहोजातइति विशिष्टसाध्येनगृहीतव्याप्तिकं च विग्रहविशिष्टकर्तारमेवोपस्थापयिष्यतिक्षित्यङ्कुरादिपक्षे, नतुक्लेशकर्मविपाशयादिरहितंकर्तारमुपस्थापयिष्यति । तेच विग्रहवत्त्वाशरीरादिविशिष्टाआकाराअभिमतविपरीता एवेतिविरुद्धव्याप्यत्वात्कार्यत्वहेतोर्विरुद्धत्वमेव, गोत्वसाध्येऽश्वत्वादिवत् , साध्याभावव्याप्तहेतुत्वं साध्याभावसमानाधिकरणत्वम् ।

नचैवंसतिसर्वानुमानोच्छेदः स्यादितिवाच्यम् , प्रमाणान्तरोपस्थापितेसाध्येलिङ्गिनिहेतुबलात् सिध्यतोविशेषानेवतत्प्रमाणेनप्रतिबध्नाति । अत्रतुपुनरतिपतितसकलप्रमाणान्तरकर्मभावेसर्वनिर्माणसमर्थेसाधनेच्छाविषयीभूतेयेऽन्वयव्यतिरेकनिर्णीताविनाभाववन्तोधर्मास्तानप्यविशेषेणोपस्थापयति ।

किञ्चप्रेक्षावतांप्रवृत्तिः स्वार्थकरुणाभ्यांव्याप्तेतिनियमः । ईश्वरे तदुभयाभावान्नेश्वरप्रवृत्तिः सर्जनेभविष्यति, व्यापकाभावेनव्याप्याभावात् । अर्थादीश्वरः संसारंस्वार्थमासाद्यसृजति, करुणया वा ? नाद्यः, अवाप्तसकलकामत्वात् । नद्वितीयोऽन्योन्याश्रयादितिनेश्वरसिद्धिः संभवेदिति ।

एतावताप्रतिवादिनोऽशक्तिविशेषः समुपस्थापितोभवति, सत्प्रतिपक्षे हेतौसाध्याभावसादकः प्रतिहेतुर्भवतिविरोधेतुयएवहेतुः सध्याभावस्यसाधकोवस्तुतः स एवसाध्यसाधनायोपात्तइतिदिक् । नन्वेवंनिंश्चितसाध्यवतिमहानसेखदिरप्रभववन्हिनागृहितव्याप्तिकेनधूमेनपक्षेपर्वतादौखादिरवन्हेरेवसाधनं स्यात् तेनसहैवतस्यव्याप्तिग्रहात्परन्तुपर्वतेखादिरएववन्हिरिति न निश्चयस्तार्णादेरपिसंभवादितितादृशानुमानस्याप्रामाण्यमापतेदित्याशयेनाह **नचैवंसतिसर्वानुमान** इत्यादि । **प्रमाणान्तरे** त्यादि, सिषाधयितसाध्यस्यप्रमाणान्तरसिद्धत्वेलिङ्गबलादापतितानांविरुद्धविशेषाणांप्रत्यक्षादिनाऽपवदनात् , निर्विशेषणवन्हिमात्रेऽनुमानस्यप्रामाण्यव्यवस्थापनसंभवात् । साध्यस्यप्रमाणान्तराऽसिद्धत्वेतु लिङ्गबलादागतानांविपरीतविशेषाणामपवादकाभावात् , तत्रतथैवावस्थानमितिभावः ।

अन्वयव्यतिमेकसहचारग्रहाद् यद्यद्धर्मावच्छिन्नकर्तृपूर्वकत्वेनकार्यत्वहेतोर्व्याप्तिग्रहोजातः, ते कुलालतन्तुवायाद्यनुगता अनीश्वराः संसारासक्तजीवा एव भवन्ति व्यापकतावच्छेदकतयागृहीताः । व्यापकतावच्छेदकधर्मप्रकारेणैवसाध्यानुमापकत्वस्वभावाच्चलिङ्गस्येतिसंसारिजीवकर्तृमात्र पर्यवसायित्वं कार्यत्वहेतुकसकर्तृकत्वानुमानस्येति ।

॥ इतिकार्यत्वहेतोर्विरोधप्रतिपाकप्रकरणेतत्त्वदीपः ॥

परमेश्वरस्यजगत्कर्तृत्वासंभवादपिकार्यत्वमनीश्वरमेवसाधयतीतितत्राह, **किञ्चप्रेक्षावतांप्रवृत्तिरि** त्यादि, अयमाशयश्चेतनानांयाप्रवृत्तिर्भवति, सास्वार्थवशात् , करुणातो वा, यथामादृशानांजायमान पठनपाठनादौप्रवृत्तिःसातुस्वार्थमूला, “प्रयोजनमनुद्दिश्यमन्दोपिनप्रवर्तते” स्वार्थहीनेजलताडनादौ प्रवृत्तेरदर्शनात् , इदानींतनानांप्राचीनमहर्षिणांचयाप्रवृत्तिः साकरुणया, तेषु गन्धतोपिस्वार्थाभावात् , ततश्च याचेतनप्रवृत्तिः सास्वार्थकरुणाधीनैवभवतीतिस्थितिः । तदिहजगत् सृजतः परमेश्वरस्यप्रथमा प्रवृत्तिर्नैववक्तुंशक्नोति, तथात्वे ईश्वरत्वव्याघातात् । नवा चरमा, परस्पराश्रयदोषात् , करुणानामपरदुःखप्रहाणेच्छारूपैव,सातु जगत्सर्जनान्तरंदुखिनमवलोक्यभवेत् , ततश्च करुणयासर्गः सर्गेचसतिपमेश्वरस्य कारुण्यमित्येवान्योन्याश्रयंकोनिवारयेत् । व्यापकाभावाद्व्याप्याभावोभवतीतिनियमः । ततश्चस्वार्थकारुण्ययोर्निवृत्त्या ईश्वरस्यसर्गेप्रवृत्त्यभाव एवावस्थित इतिविशेषोऽन्यत्रद्रष्टव्यः । अपि च यदीश्वरः

पूर्वप्रदर्शितासिद्धत्वविरुद्धत्वानैकान्तिकत्वव्याप्यत्वसिद्धत्वादिहेत्वाभासदोषदुष्टत्वेनकार्यत्वहेतुतोजगत्कर्तृकत्वंसाधयितुंनैवयुक्तम् ।

अत्रायंप्रतियोगःपृथिवीपर्वतादिकंकार्यं न भवति, प्रसिद्धकार्यविलक्षणत्वादाकाशकालादिवत् । अशक्यदर्शनोपादानोपकरणत्वात्, यन्नैवं तन्नैवं यथा घटादिकम्, पृथिव्यादिपरमाणवःप्रत्यक्षाविषयाः, अतीन्द्रियत्वात्, व्यतिरेकेणघटादिवत्, विमतः कालोनसर्गशून्यःकालत्वाद्वर्तमानकालवत् । महीमहीधरादिकं नेश्वरकर्तृकंकार्यत्वाद् घटादिवत् । ईश्वरो न कर्ता भवति शरीररहितत्वान्मुक्तात्मवदिति ।

इतीश्वसिद्धौ पूर्वपक्षः

करुणयाजगत्सृजेत्, तदासर्वंसुखिनमेवसृजेत्, नतुहीनमध्यमोत्तमान्, अदृष्टविशेषमाकल्य्य तथात्वेतु ईश्वरस्यस्वातंत्र्यमतिपतेत्, तत्स्वीकारोपिव्यर्थोयतोभाग्येनैवविचित्रसंभवादितिसंक्षेपः । किञ्चकर्तुरुपादानोपकरणादिज्ञानमपिनावश्यकम्, यतोऽजानतोपिजीवस्यस्वकीयज्ञानसुखादौकर्तृत्वस्यसर्वसंमतत्वादिति । ॥ इतीश्वरस्यजगत्कर्तृत्वानुपपत्तिप्रकरणेतत्त्वदीपः ॥

न्यायमतसिद्धेश्वरसाधककार्यत्वानुमानेमीमांसकमतेनयेदोषाः प्रदर्शितास्तान्संगृह्यदर्शयितुमुपक्रमते **पूर्वप्रदर्शितासिद्धत्वेत्यादि** । कार्यत्वस्यहेतोःक्षित्यादावसिद्धिःकुतः ? पृथिव्यादेरशक्यक्रियात्वादिहेतुनाऽकार्यत्वानुमानात् । अनीश्वरत्वानवाप्तकामत्वशरीरित्वादिविपरीताकाराक्षेपकत्वेनक्षित्यर्णवादौसिषाधयितकार्यत्वस्यविरुद्धमेतत् । अभिमतविपरीताकाराक्षेपकत्वंहेतोर्विरुद्धत्वमितिप्राञ्चः । अन्येतु साध्याभावसाधकः साध्यव्यधिकरणोवाहेतुर्विरुद्धः । गौरश्वत्वादित्यादिवदिति । अनैश्वर्याद्यापादकत्वं चानैश्वर्यादिविशिष्टकर्तृकत्वेनव्याप्तेर्घटपटादौकार्यत्वहेतोर्गृहीतत्वादेव । किञ्च चेतनजन्यत्वमात्रेसाध्ये शुभाशुभकर्मद्वाराजीवजन्यत्वस्यकार्यमात्रेसंमतत्वेनसिद्धसाधनंभवति, वन्हिमान् वन्हेरितिवत् । तदुपादानादिप्रत्यक्षकर्तृपूर्वकत्वंसाध्यमेवस्वीकर्तव्यम् तत्र च ज्ञानाद्यन्तर्भावेनानैकान्त्यस्यसुस्थितत्वात् । इत्थमसिद्ध्यादिदोषदुष्टत्वात् कार्यत्वस्यहेतोरपितादृशहेत्वाभासायितेनपृथिव्यादावुपादानोपकरणादिसाक्षात्कर्तृकर्तृपूर्वकत्वंसाधयितुंनैवालमितिभावः । प्रतिप्रयोगंदर्शयति **अत्रायंप्रतिप्रयोगःपृथिवीपर्वतादिकंकार्यंनभवती**त्यादि । अशक्यदर्शनोपादानत्वमुपपादयति **परमाणवोनप्रत्यक्षाः** । घटादिव्यतिरेकदृष्टान्तः । कार्यत्वस्यक्षित्यादौ, असिद्धिसाधनायप्रयोगःकथितः । अथजीवेनसिद्धसाधनसाधनाय प्रलयनिराकरणायप्रयोगः कथ्यते **विमतःकाल** इति, सतिप्रलयेतदवसानेसर्गारंभेस्रष्टृत्वंजीवानांशरीरादिरहितत्वान्नघटते इतिकर्त्रन्तरंस्वीकर्त्तव्यंभवेत् । तत्सर्वकार्यद्रव्यविलक्षणः प्रलयोनास्त्येवेतिसाध्यतेऽत्र प्रकृते । विरुद्धत्वप्रदर्शनायप्रयोगः **महीमहीधरादिकम्** इत्यादि । ईश्वरकर्तृकेनभवतीतिकथनेनार्थतोऽनीश्वरकर्तृकत्वेपर्यवस्यतीति । एवंविपरीतपर्यवसायित्वंकार्यत्वानुमानस्यकथितम् । अभिमत पर्यवसायित्वाभावंस्फुटयति **ईश्वरःकर्त्तानभवतीति** । तत्रेश्वरः ईश्वरत्वेनाभिमतः । इदमनुमानं सत्प्रतिपक्षात्मकम्, शब्दोनप्रत्यक्षःश्रावणत्वादित्यत्रशब्दः प्रत्यक्षःकार्यत्वादित्यत्रवदिति ।

॥ इति सकर्तृकत्वानुमानेदूषणोद्भावनप्रकरणे तत्वदीपः ॥

॥ श्रीरामचन्द्राय नमः ॥

जगतोजनकंरामं सीतयासहितं नुमः । यत्कृपालवमात्रेण चिदादेःप्रभवाप्ययौ ॥१॥

अत्रब्रूमः । क्षित्यङ्कुरादौकार्यत्वस्यहेतोर्निराकरणासंभवात्, सभागत्वात्, क्रियावत्वात्, बाह्यप्रत्यक्षसामान्यविशेषत्वात् घटादिवत् । एभिरनुमानैःसिद्धकार्यत्वहेतुना पृथिव्यादौप्रसिद्धकार्यत्वहेतुना तत् सिद्धेर्घटादौकुलालादिवत् । नचैतादृश एव संनिवेशविशेषःकार्योनेतरइत्यवयवसंनिवेषप्रतिनियतरूपंविशेषंपश्यामि । यदपिशक्यक्रियं शक्यज्ञानोपादानोपकरणंचेतिकथितं तत्तुस्थलविशेषेभवतुनामकथंचित् । किन्तु ते क्रिया ज्ञानशक्तीक्रियाज्ञानाभ्यांकार्याभ्यामभिज्ञातेभवतः । ते च पृथिव्यादिकार्येषु यथोक्तसाधन

एवंपूर्वपक्षप्रकरणेयन्नैयायिकाभिमतमीश्वरसाधकंकार्यत्वाद्यनुमानंमीमांसकैरसिद्ध्यादिदोषैर्दूषितमत्रतमेवानुमानंदोषनिरसनद्वारेणप्रतिष्ठापयितुमुपक्रमते **जगतोजनकम्** इत्यादि । एतदतिरिक्तमपिनिर्दुष्टमानान्तरंविशेषतोव्याख्यानेप्रदर्शयिष्यतेविवेचकेन । अत्रकार्यत्वमुत्पत्तिमत्वरूपमेव, प्रागभावप्रतियोगित्वमितियावत्, अथवाप्रागभावप्रतियोगित्वेसतिध्वंसप्रतियोगित्वलक्षणम् । तत्रक्षित्यंकुरादेःकार्यत्वसाधनेसभागत्वादयोहेतवःप्रदर्श्यन्ते। तत्रसभागत्वम् सावयवत्वरूपम्, भागोनामावयवपर्यायः तेनावयवेनसहितः सभागः सावयव इत्यर्थः तस्यभाव,सभागत्वंकार्यत्वम्। इदंचलक्षणंकार्यद्रव्यमात्रमुद्दिश्य,द्रव्यस्यैव-कार्यत्वप्रतिपादनावसरात्, नेदंगुणाद्यनुगतंतेषांनिरवयवत्वात्।मूर्तत्वंक्रियावत्वंपरिच्छिन्नपरिमाणवत्वरूपम् एतत्पृथिवीजलतेजोवायुमनसामेव गगनादिचतुर्णांतुव्य[illegible]क्ततयानिष्क्रियत्वात् परिच्छिन्नपरिमाणाभावाच्च । समान्यविशेषः द्रव्यत्वंपृथिवीत्वादिकं च, एतत्केवलंनित्यपरमाण्वादिसाधारणमितिबाह्यप्रत्यक्षविषयत्वेनविशेषितंसदेवहेतुः । “मनोमात्रस्यगोचर” इतिनियमेनजीवस्यमानसप्रत्यक्षविषयत्वात् सामान्यविशेषवत्वाच्चात्मनिव्यभिचारवारणायप्रत्यक्षेविशेषणंप्रक्षिप्तंबाह्यत्वेसतीति, तथाचात्मनआन्तरत्वान्नदोषइति । अथैवमपिसावयवत्वादिसाधनैः कार्यत्वस्यहेतोःक्षित्यादौसकर्तृकत्वेकिमायातम् ? कार्यत्वावच्छिन्नंकर्तुर्निमित्तकारणत्वेप्रमाणाभावात्, अन्तरेणापिकर्तारंमेघमालावत्, कारणान्तरतएवमहीमहीधरादेरुत्पत्तिसंभवादित्याशंकामपनेतुमाह **नचैतादृश** इत्यादिं । नचामुक एवसंनिवेशविशेषःकार्योभवतीतिनान्य इत्यादिराजाज्ञायाअदर्शनात् ।

सावयवत्वं चावयवसंनिवेशविशेषलक्षणाकृतिमत्वरूपमेव,तत्सर्वंपुरुषप्रयत्नजन्यमेवदृष्टंयथाघटादिस्तथैवमहीधरादिरपीतिघटादिवत्तेषामपिसकर्तृकत्वंनानपोदितंभवति । यदिकार्यविशेषत्वमेवकर्तृत्वव्याप्यमित्याग्रहस्तदापिसोपिविशेषःक्षित्यादौविद्यते एवेतिक्षित्यादीनामप्ययत्नसिद्धमेवसकर्तृकत्वमित्येवं तत्रापिसकर्तृत्वनिःप्रत्यूहैवेतिभावः । किञ्च“यद्विशेषयोःकार्यकारणभावस्तत्सामान्ययोरपितथैवकार्यकारणभाव” इतिन्यायेन, कार्यविशेषेपटादौतन्तुवायादेःकर्तृत्वदर्शनात् पटत्वावच्छिन्नसामान्यतस्तन्तुवायत्वावच्छिन्नस्यकर्तृत्वंसिद्ध्यतीति कार्यत्वमेवसकर्तृकत्वव्याप्यमितिक्षित्यादिकार्येपिकमपिपुरुषविशेषं कर्तारं समर्थयतीतिदिक् । अथवाक्षित्यादिकं न भवति, प्रसिद्धघटादिकार्यविलक्षत्वादितीश्वराभावसाधकप्रत्यनुमानेऽप्रयोजकत्वमप्यनेनप्रकरणेनदर्शयति **नचेयानेव** इत्यादि । तत्रकार्यकृतिंप्रयोज्यः

बलादेवोपस्थापिते इति नकोपिविशेषःप्रासादप्राकारादिकार्येभ्यःशरीरपृथिव्यादीनाम् ।

नचेयानेवक्रियाविषयइतिविषयनियमोदृष्टःकश्चित् क्रियायाःयेन तनुभुवनादेरशक्यक्रियत्वंनिर्णीयेत । एवञ्चक्षित्यादौसिद्धेकार्यत्वेतदुपादानादिसाक्षात्करणतदधिष्ठानतत्प्रेरणक्षम ईश्वरः सिद्ध्यत्येवेति ॥

परमाण्वाद्यधिष्ठानंचेश्वरतत्प्रवृत्त्यनुकूलसंकल्पविशिष्टपरमेश्वरसंनिकर्षरूपएवजीव उत्पत्तिमान् वा कृतिप्रयोज्यत्वे उत्पत्ति वा प्रयोजकं पृथिव्याद्याकारमात्रवृत्तिधर्मविशेषो न दृष्टिपथमवतरतीति ।

एतादृशविशेषेसत्ये एव प्रसिद्धकार्यवैलक्षण्यहेतोःकर्तृत्वाभावेनसहव्याप्तिः प्रसिद्धाभवेत् । अन्यथात्वप्रयोजकत्वमेव "अदृष्टकर्तृकोराजादिसौधोनकार्यो, दृष्टकर्तृकघटादिकार्यविलणत्वादिवत् समानयोगक्षेमत्वात् । स्यादेतत् शक्यक्रियत्वादिरेवतादृशोविशेषोऽस्ति, यश्चक्षित्यादियावन्तस्तत्राह, **शक्यक्रियंशक्यज्ञानोपादानोपकरणकंच** अक्षरार्थों न तिरोहितः । उत्तरयति **भवतुनामेति** पृथिव्यादिपक्षेषुतादृशविशेषाभावोनाद्यापिसिद्धोऽपितु, सर्वथाऽप्रसिद्ध एवेतिसमाधातुरभिप्रायः **किन्तु ते क्रियाज्ञानशक्तीक्रियाज्ञानाभ्याम्**इत्यादि । ते क्रियाज्ञाने ! यथोक्तेति । कार्यत्वहेतुसकर्तृकत्वानुमानलक्षणेत्यर्थः । अयमाशयउपादानोपादानोकरणादिविषयकापरोक्षताचिकीर्षाकृतिमज्जन्यत्वमेवमहीमहार्णवादिषु, साध्यते । तत्र च तद्विधेयकवृत्तिःपरमाणुलक्षणोपादानादिविषयपरोक्षज्ञानंच घटकमस्त्येव,"जानातीच्छतितत:प्रवर्तते"इति नियमात् । ज्ञानमन्तरेण न चिकीर्षा,तदन्तरेणन प्रयत्नइत्यनुगमात् । ज्ञानक्रिययोरेवंप्रमाणिकत्वेतदनुगुणसामर्थ्यमपिकर्तुःकल्पनीयमेव "परास्यशक्तिर्विविधैवश्रूयते, स्वाभाविकीज्ञानबलक्रियाचेतिश्रुतेः । जगत्कर्तुरित्यशक्यक्रियात्वादेर्जगत् कर्तुर्नैवसिद्ध्यतीति ।

प्रकरणमुपसंहरन्नाह **सिद्धे कार्यत्वे** इत्यादिं, सावयवत्वादिनाक्षित्यादौसिद्धेसति, अर्थात् प्रामाणिके च कार्यत्वेसति, कार्यत्वस्यविशिष्टकर्तृपूर्वकत्वव्याप्तिवलेनपृथिव्यादिपक्षेकर्तृविशेषस्यक्लेशकर्मविपाकाशयैरपरामृष्टस्यसिद्धिर्निरावाधैव भवतीति । तदधिष्ठानमन्तरेणेत्यत्रकर्मधारय एव । अथवा परप्रवृत्त्यनुगुणव्यापारः प्रेरणम् । तादृशव्यापारवतः प्रेर्येणसम्बन्धोऽधिष्ठानमितिभेदः । एवं पूर्वोक्तक्रमेणसभागत्वसावयवत्वादिहेतुभिः पृथिवीमहार्णवादिषुकार्यत्वंव्यवस्थापितम् । यद्यपिदिगन्तविश्रान्तमहापृथिवीमहार्णवेषुजन्यत्वरूपंकार्यत्वंनोपलभ्यतेऽर्वागदृशःकस्यापि तथापि यत्सावयवंतत्सर्वं कार्यमेवेतिघटादिषुव्याप्तिमनुसन्धायव्याप्तिमताकार्यत्वहेतुना, तदनुसकर्तृकत्वव्यवस्थापनायमहानायासः स्वीकृतः । ततश्चकार्यत्वसकर्तृकत्वयोर्व्याप्तिंप्रतिसन्धाय, साधारणलोकापरिदृष्टमहार्णवादिष्वपिसकर्तृकत्वमनुमानवलादेवस्थापितवान् अप्रत्यक्षवन्हेःसामान्यतोधूमेननगनिकुञ्जेसिद्धिवदिति ।

। इतिक्षित्यादौसकर्तृकत्वसाधककार्यत्वसाधनेऽसिद्धिदोषपरिहारप्रकरणेतत्त्वदीपः ।

कार्यत्वहेतोरसिद्धिदोषतांपरिहृत्यसकर्तृकत्वानुमानस्यक्षेत्रज्ञैःसिद्धसाधनदोषंपरिहर्तुंकर्तृत्वस्वरूपघटकमधिष्ठानादिस्वरूपमाविःकर्तुमुपक्रमते **परमाण्वाद्यधिष्ठानंचेश्वर** इत्यादि । येनप्रकारेण-

वत्स्वदेहादौ । सोयंसम्बन्धोद्रव्यैःसहसंगात्मकःस्तद्गतगुणक्रियादिभिस्तुसंयुक्तसमवाय तत्समवेतसमवायादिरूपः । प्रवृत्तिस्तुपरमाणोःक्रियारूपाधर्माधर्मयोस्तुफलोत्पादनानुकूलतादृशदेशकालादिसहकारादिसाहित्यरूपा । धर्माधर्माभ्यामेवफलोत्पादता । चेतन सम्बन्धरहितानामचेतनानांनैरर्थक्यात् , नहिकुलालादिसंम्बन्धरहितोदण्डादिर्घटंजनयति,

देहावयवाद्यधिष्ठानंशरीरावयवादिप्रवृत्तिप्रयोजकसंकल्पद्वारेण भवति, तथैवद्व्यणुकादिसमवायिकारणपरमाण्वाद्यधिष्ठानंजगदुत्पादनकर्तृरीश्वरस्यपरमाणुप्रवृत्त्यनुकूलस्वसंकल्पद्वारेणैव भवति, इत्येवंस्वीकर्त्तव्यंप्रकारान्तराभावादिति । सच सम्बन्धःद्रव्येण सहसंयोगरूपःसंनिकर्ष इति परमाण्वादौसंयोगरूपः । गुणक्रियादौसंयुक्तसमवायादिलक्षणः । अदृष्टे शुभाशुभरूपे तु विभुद्वयसंयोगाभ्युपगमेसंयुक्तसमवायरूप एव पूर्वोक्तः । संयोगस्यान्यत्रक्रियाजन्यत्वनियमदर्शनेव्यापकद्रव्येसंयोगकारणक्रियायाअनभ्युपगमेननित्यसंयोगस्यनित्यविभागवदस्वीकारेतु, संयुक्तसंयोगिसमवायरूपएवन्यायप्रक्रियामन्तव्यः **प्रवृत्तिस्तुपरमाणोरि**त्यादि । अर्थात् परमाणोरचेतनतयाप्रयत्नात्मकप्रवृत्तेस्तत्रासंभवेन, आरंभकसंयोगानुकूलक्रियालक्षणैवप्रवृत्तिर्नतुगुणात्मिका, तादृशप्रवृत्तेर्जीवमात्रनिष्ठत्वात् । **धर्माधर्मयोरि**त्यादि, इदंपुण्यंपापंवाऽस्मिन् देशेकाले एव फलंसुखंदुःखं वा जनयत्वितीश्वरसंकल्पमूलाप्रवृत्तिरदृष्टस्यफलोदयानुकूलतादृशदेशकालादिसहकारिसमासादनलक्षणैव भवतीतिभावः । **धर्माधर्माभ्यामेवफलमिति** । अत्रैवकारोभिन्नक्रमः अर्थात् ताभ्यां केनचित्चेतनेनाधिष्ठिताभ्यामाभ्यामेवशुभाशुभाभ्यांफलं सुखदुःखात्मकं भवति नान्यथा, चेतनाधिष्ठितरथादिवदेवेतिभावः । अथान्तरेणापिकर्तारंकारणान्तरसमवायिकारणान्तरवलादेव पृथिवीमहार्णवादेरुत्पत्तिर्भवतु किमितिं कर्तुः स्वीकारेणपयोऽम्बुवदिति शंकां मनसिनिधायतत्परिहारार्थमाह **चेतने**त्यादि । चेतनसहकाररहितानामचेतनरथादीनांस्वातन्त्र्येणफलंप्रत्यकिञ्चित्करत्वादिति । कथमकिञ्चित्करत्वमचेतनानामित्यतआह **नहि कुलालादि** इति । नहिंचेतनमन्तरेणानधिष्ठितवासीकुद्दालादिकं स्वकार्यंजनयतीति न दृष्टचरमित्यर्थः।एवं चाधिष्ठातुःस्वेतरकर्मादिसकलकारकप्रयोक्तुकुलालादेश्चेतनस्यापेक्षाकार्यमात्रंप्रतिविद्यते एवेति कार्यविशेषेपृथिव्यादौसकर्तृकत्वस्यानादरोनकथमपियुक्तः। अचेतनस्य कारणसमुदायस्यचेतनाधिष्ठानमन्तरेणप्रवृत्तेरेवानुपपत्तेः। उपादानगोचरापरोक्षज्ञानमन्तरेणतदधिष्ठानलक्षणकर्तृत्वस्यासंभवात् पृथिवीमहार्णवादिकर्तृःपरमाण्वाद्युपादानकारणसाक्षात्कारोप्यावश्यक एव । एवं चिकीर्षापूर्वस्वेतरसकलकारकप्रवृत्तिहेतुकृति= प्रयत्ननिरुप्यंप्रेरणमितिकारकचक्रप्रवर्तकत्वरूपाधिष्ठातृत्वस्वरूपस्योपादानादिविषयकापरोक्षज्ञानचिकीर्षाकृतिमत्वरूपलक्षणस्य च कर्तृत्वस्यनात्यन्तिकोभेदः । ततश्चपूर्वत्रोपादानोपकरणादिगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वंकर्तृत्वमेवोक्तं भवति । तदेवचात्राधिष्ठातृत्वंरूपं तदिहसमर्थ्यते इति प्रकृतासांगत्यमित्याकारकशंकायानावसरो भवतीतिध्येयम् ।

एवं भूतस्यक्षितिमहार्णवादिकर्तृत्वस्यसदसर्वद्रष्टारं सर्वसामर्थ्ययुक्तंचेश्वरमन्तरेणजीवादिकतिपयसामर्थ्यवत्यसंभवात्, नजीवद्वारापरमेश्वरसाधकानुमानेसिद्धसाधनमित्यपिचात्रविवक्षितमिति । अग्रेचैतद्वक्ष्यते, रथाद्यचेतनकरणानांकर्माधिष्ठाननैयत्यनिरूपणसमयेदृष्टकर्तृकेषुमहाग्रहप्रांगणप्रासदादिध्वंशकुर्णादिपुव्यभिचारंदोषःस्मृतः। तस्यचोपानर्हत्वात्प्रतिक्षेपःकरणीय इति प्रसङ्गतिमादायमध्येव्यभिचारदोषं-

नवाकारुणाविरहितावास्ययूपादिकंसम्पादयति । वीजाङ्कुरादयस्तुपक्षमध्यनिक्षिप्ताःपक्ष संमैवेति तेनव्यभिचारोद्भावनंतर्कानभिज्ञत्वमेवमीमांसकानांसूचयतीति । एतेन सुखादिना व्यभिचारोपिनिराकृतः ।

नच वादिप्रतिवादिसिद्धतामात्रेणजीवानामेवाधिष्ठातृत्वं नतुतदतिरिक्तस्येतिवक्तव्यम् तेषांजीवानांसूक्ष्मव्यवहितादिदर्शनाशक्तेर्निर्णयात् । दृष्टानुरोधिनीकल्पनैवग्राह्या नसादृष्टविरोधिनी । नच परमेश्वरस्यशक्तिनिश्चिता, श्रुत्यादिप्रमाणवलतएवेश्वरसिद्धेः । यथोक्तप्रमाणवलतः सिद्ध्यत्स्वाभाविकसर्वार्थदर्शनतत्प्रेरणशक्तिसम्पन्नएवपुरुषविशेषस्सिद्ध्यति, कार्यत्वहेतोःसमर्थकर्तृपूर्वकत्वेएवव्याप्तेर्निश्चयात् ।

निराकर्तुमाह **वीजाङ्कुरादयस्तु** इत्यादि ! यत्रयत्रमेघमालादिकार्येषुदृश्यःकर्ता न दृश्यते, तत्सर्व-
मपिकार्यमत्रक्षित्याद्यनुमानेपक्षीकृतम् , तेषामपिपक्षकोटिनिक्षिप्तपदेन, पक्षेपक्षसमेचव्यविचारोदोषाय न
भवति, तत्रप्रतिज्ञाविषयत्वंपक्षत्वसाध्यसन्हेहवत्वं च प्रकृते च प्रतिज्ञाविषयत्वं च क्षित्यंङ्कुरस्यैवेति
सर्वोंपितावन्मात्रस्यैवेतिमनुते, परन्तुसाध्यसंशयवत्वं च सर्वस्यैवेति, यदामेघमालादेःप्रतिज्ञाविषयता-
स्यान्तदातेषामपिपक्षत्वंस्यादेव । अन्यथाऽनुमानात् पूर्वंपर्वतेवन्हेरदर्शनात् धूमस्यप्रत्यक्षतोदर्शनाद्
धूमानुमानव्यभिचारदोषंनातिक्रामेदित्यनुमानमात्रस्यैवप्रामाण्यंदत्तजलाञ्जलितामावहेदितिपक्षेतत्समेवा
व्यभिचारो न दोषायेति । **एतेनसुखादिनाव्यभिचारोपिनिराकृतः इति** । अत्रसुखपदं-
मनोमात्रग्राह्यज्ञानेच्छाकृत्यादीनांसंग्राहकंभवतीति । नहि स्वकीयसुखज्ञानाद्यर्थप्रवृत्तिमानजीव-
स्तदोपकरणतदुपादानाद्यदृष्टस्वात्मसाक्षात्कर्ता भवति, सर्वथाऽयोग्यदृष्टादीनांसाक्षात्कारस्यासंभवात् ।
तदुपादानादिसाक्षात्कर्तृत्वरूपसाध्याभाववतिसुखज्ञानादौ कार्यत्वस्यहेतोर्विद्यमानत्वेन व्यभिचारोदुर्वार
इति तदर्थंसुखादेरपिपक्षत्वंपक्षसमत्वंकथितमिति, ततश्चव्यभिचारपरीहारादेवसदोषोनिरस्त एवम्
सुखादावपितदुपादानादिसाक्षात्कर्तृपूर्वकत्वंपरमेश्वरेणैवनिष्पादितंसिद्धान्तिनेति । तेन न कोपि
दोष इति । अथैवमपिजीवात्मनःस्वसुखादौकर्तृत्वंनस्यादितिवाच्यम् सुखाद्युत्पादनार्थंतत्साधनदर्शनो-
पादानप्रवृत्तिमत्वादेवजीवस्यकर्तृत्वोपपत्तेःघटादिकार्येकुलालादिवत् दृष्टोपकरणादिदर्शनकपालादिनाघ-
टादिकार्यवदिति । अदृष्टकारणस्याधिष्ठानंसर्वत्रकार्येपरमेश्वरस्यैवेतिस्वीकर्तव्यम् । अथैवमपिस्वज्ञानाद्यर्थ-
प्रवृत्त्यवहितपूर्वकालेनियमतःस्वस्यसाक्षात्काराभावात् , स्वज्ञानाद्युपादानभूतस्वात्मसाक्षात्कर्तृत्वंतदाजीव-
स्यनास्तीतिचेत्सत्यम् , "अत्रायंपुरुषःस्वयंज्योतिर्भवतीति श्रुत्या जीवात्मनःस्वप्रकाशनयेनतदास्वात्म-
साक्षात्कारस्यापिसंमानयितव्यत्वात् । स्वज्ञानादौस्वस्यकर्तृत्वस्यस्वकीयस्मरणमात्रेणैवस्वीकर्तव्यत्वाद्वेति
न कोपि दोषः । उपादानादिसाक्षात् कर्तृकपूर्वकत्वमितिनियमस्तुपरमेश्वरेणैवतत्रतत्रनिर्वाह्य इति । तदर्थ-
मेवसुखदुःखज्ञानेच्छाप्रवृत्त्यादिकःसर्वोंप्यान्तरपदार्थःपक्षीकृत इति ज्ञेयम् तदनेनेश्वरसाधककार्यत्वानु-
मानेव्यभिचारदोषंनिराकृत्यतदनुसिद्धसाधनदोषमपाकर्तुमुपक्रमते **नच वादिप्रतिवादिसिद्धतामात्रेणे**
त्यादि । स्वस्यपरस्यवा, सिद्धत्वमात्रेण, जीवस्याधिष्ठातृकल्पनम् , परमाण्वदृष्टादिप्रवृत्त्यनुकूलाधि-
ष्ठातृत्वकल्पनंनैवयुक्तमित्यर्थः । कुतोनयुक्तंसतिसंभवेतत्राह **तेषांजीवानां** सूक्ष्मव्यवहितादिपदार्थ-
दर्शनस्यैवाशक्तत्वेनतदधिष्ठातृत्वस्यदूरापेतत्वादित्याशयः ।

यत्तुपूर्वंपरिमितशक्तिज्ञानैश्वर्याद्यपनाद् धर्मविशेषविरुद्धसाधनत्वं कथितम्, तदकिञ्चित् करम्, तेषामप्रयोजकत्वात् । किञ्चित् क्रियमाणत्वंकर्तुरर्थान्तरविषयमसामर्थ्यज्ञानंवा नापेक्षतेस्वोत्पत्तौ, स्वसिद्धौसमर्थकर्तृमात्रस्याक्षेपात् केवलव्यतिरेकासिद्धेः । एतावतैवकार्योत्पत्तिसंभवेसम्बन्धिनोऽकिञ्चित्करस्यार्थान्तरविषयकस्याभावस्यकारणत्वकल्पनानुपपत्तेः । अपि च तदितरसमस्तविषयकज्ञानंकार्यत्वस्यव्यापकम्,

नन्वेवं परमेश्वरस्यापि, अधिष्ठानसामर्थ्यंतुनैवदृष्टमितितत्कल्प्यते । दृष्टानुसारिणीकल्पनायाः सर्वत्रदृष्टविरोधित्वस्यास्वीकारात् । न चैवमीश्वरस्याशक्तेर्निश्चयः ? प्रमाणान्तरतईश्वरस्यसर्वसामर्थ्यवत्वसिद्धेःप्रत्यक्षादिप्रमाणेनपरमेश्वरस्यासिद्ध्याअसामर्थ्यस्यासिद्धेः । नतुप्रकृतानुमानेनैवतस्यासामर्थ्यस्यासिद्धेः । यथोदितप्रमाणवलात् योऽर्थःसिद्ध्यति सच स्वाभाविकसर्वार्थदर्शनतत्प्रेरणशक्त्यादिसंपन्न एव सिद्ध्यतिकार्यत्वहेतोःसमर्थकर्तृपूर्वकत्वेनैवव्याप्तेर्निश्चथात् ।

॥ इति सकर्तृकत्वानुमानेव्यभिचारसिद्धसाधनदूषणपरिहारप्रकरणेतत्त्वदीपः ॥

यत्रयत्रकार्यत्वं तत्रसर्वत्रकुलालादिःकर्त्ता, किञ्चिद्विषयकाशक्तिमान्, किञ्चिद्विषयकाज्ञानवानेवोपलभ्यते, नहिंघटादिकारणेनसर्वशक्तिमान् सर्वज्ञो वा भवति दृश्यते समुपपद्यतेश्रूयते वा, किन्तु तदल्पज्ञानाल्पशक्तिमानेवेति, तादृशकर्त्ता कुलालादिनैवभूयोभूयःसहचारदर्शनात् कार्यत्वस्य हेतोर्व्याप्तिरितितदभिमतविपरीतापादकत्वात् कार्यत्वंहेतुर्विरुद्ध एव । सच हेतुः कार्यत्वरूपोऽल्पज्ञमेवकर्त्तारमुपस्थापयेत्, नतुसर्वज्ञंसर्वशक्तिमन्तं वा कर्त्तारं साधयिष्यति । यथा अश्वत्वंहेतुःकदापि गोत्वंसाध्यं न साधयति । तत्कस्य हेतो ? विरुद्धत्वात्साध्यविपरीतेनसहव्याप्तिमत्वात् । तथैव प्रकृतेऽल्पज्ञकर्त्रासहैवकार्यत्वस्यहेतोर्व्याप्तिदर्शनेन न तत् कार्यत्वं सर्वशक्तिमन्तंसर्वज्ञंकर्तारंसाधयिष्यति, तं प्रतितस्यविरुद्धत्वात्, इत्याशङ्का **यत्तु** इत्यादिग्रन्थेनानुद्यदर्शयितुमुपक्रमते । अक्षरार्थोन तिरोहितःपूर्वमेवशङ्काग्रन्थेप्रदर्शितः । इमामाशङ्कांपरिहर्तुमाह **अप्रयोजकत्वादिति** । अनुकूलरहितत्वात् व्याप्त्यसाधकत्वाद्वा, अप्रयोजकत्वात्=कार्यकरणोपयुक्तत्वाभावात् । किञ्चिद्विषयकाज्ञानाशक्त्यादेः । एतदुक्तं भवति—येनाकारप्रकारेणकर्तुःकारणत्वंगृह्यतेतद्रूपावच्छिन्नकर्तृपूर्वकत्वेनैवकार्यत्वस्यहेतोर्घटादिकार्येव्याप्तिर्गृहीता । नतु क्रिचिद्विषयकाज्ञानादिमत्वेनघटादौकारणत्वंकुलालतन्तुवायादेर्व्याप्तिर्गृहीता । किन्तुघटाद्युपानादिसाक्षात्काराधिष्ठानसामर्थ्यविशिष्टत्वेनैव । अर्थान्तरविषयेज्ञानमज्ञानं वा शक्तिरशक्तिर्वानप्रकृतकार्योत्पादेप्रयोजकतयापरिगृहीतं भवति । तस्मात् कार्यत्वस्यव्याप्तिःसमर्थकर्तृकत्वेनैवेष्यते । यथाधूमस्यार्द्रेन्धनसंयोगविशिष्टवन्हित्वावच्छिन्नैववन्हिनाव्याप्तिरावश्यकीसम्बन्धनियमः, नतुवन्हिगततार्णत्वातार्णत्वरक्तत्वपीतत्वाद्यनुपयुक्तधर्मावछिन्नेनसम्बन्धनियमस्तथैवप्रकृतेपीति ।

कथं विरुद्धहेतोरप्रयोजकत्वमितितादृशप्रयोजकत्वमेवोपपादयति नहि क्रियमाणंकर्त्तुरथान्तर विषयकमसामर्थ्यंवाकार्योत्पत्तयेऽपेक्षितं किन्तु स्वसंपादनसमर्थकर्तृमात्राक्षेपात् केवलव्यतिरेकासिद्धेः । तत्रअज्ञानम् विषयान्तरोपकरणादिविषयकंतद्विषयकमसामर्थ्यञ्च । **स्वेति**=स्वकारणतयाऽनुमीयमान-

अथवा कतिपयकमज्ञानंकार्यत्वस्यव्यापकम् । तत्र न प्रथमपक्षोयुक्तःअनुपलंभात् । नैवं दृश्यते यत् तन्तुवायःपटातिरिक्तं न किञ्चिदपिविजानातीति । न द्वितीयपक्षः अनियतविषयतयातस्यतस्यव्यभिचारोपलब्धेः । न चास्तिकिञ्चिद् व्यवस्थितम्, यद्विपयकाज्ञानवानेवकर्तृत्वमनुभवेदिति ।

स्यकर्तुःस्वनिष्पत्युपयोगिसामर्थ्यादिकमेवाक्षिप्यमाणं भवति, कार्यत्वस्यसमर्थकर्तृकत्वेन सहैवव्याप्तेरतः केवलव्यतिरेकस्य=अर्थात् केवलस्यनियतपूर्वमात्रवृत्तित्वस्यानुपयोगिनोव्यतिरेयस्य = अर्थान्तरविषय शक्त्याद्यभावस्यप्रकृतकार्येंप्रयोजकतयाऽसिद्धेरिति । अथवा अर्थान्तरविषयशक्त्यभावस्यव्यतिरेकेतमन्तरेणेत्यर्थःप्रकृतकार्यस्यव्यतिरेक एतादृशव्यतिरेकसहचारस्यासिद्धेः दण्डव्यतिरेकेघटव्यतिरेकवत् । **एतावतैव** स्वनिष्पादनोपयोगिज्ञानशक्तित एव । अत्रार्थान्तरोविषयेतिंवहुव्रींहसमासः । तत्र प्रधानोऽन्यपदार्थोज्ञानादिरेव, सचार्थसिद्धएव । सम्बन्धिनःनियमतःकार्याव्यवहितपूर्ववर्तिनः । **अकिञ्चित्करस्य** प्रकृतकार्यानुपयोगिनोऽन्यथासिद्धस्यदण्डत्वदण्डरूपादिवदित्यर्थः । एवं प्रकारेणार्थान्तरविषयकाज्ञानाशक्त्यादेर्नियतपूर्ववृत्तित्वंनिर्विकल्पद्वारेणापितयोरर्थान्तरविषयकाज्ञानाशक्त्योर्नियत पूर्ववृत्तित्वंनिराकर्त्तुमुपक्रमते **अपिच** किं तदितरसमस्तवस्तुविषयमज्ञानादिव्यापकम् ? किंचिद्विषय कंवेत्यादि । तत्र व्यापकंकार्याव्यवहितनियतपूर्ववृत्तिंनिराकरोति **तत्र न प्रथमःपक्षः** अनुपलब्धेः, अर्थात् प्रकृतकार्यातिरिक्तसकलकार्योपयोगिज्ञानसामर्थ्याभावःकर्तरिकुत्रापिनप्रसिद्ध इति भावः । तदेव कथितम् न खलु तन्तुवायःपटातिरिक्तं न किमपि जानातिअपितुप्रकृतकार्यातिरिक्तंस्वदेह गेहादिकंविजानात्येवान्यथा कार्याद्विरतःकुलालःस्वगेहं न गच्छेत् तद्विज्ञानाभावात्, प्रवृत्तौज्ञानस्यकारणत्वेनतदभावेगमनादिकार्यस्याभावप्रसङ्गात् ।

ननु प्रकृतघटादिकार्यव्यतिरिक्तकतिपयवस्तुविषयकाज्ञानासामर्थ्यंकर्तुरिष्टमित्याकारको यो द्वितीयविकल्पस्तदपि न युक्तः ? कुतः ? यतः कतिपयविषयाज्ञानस्यानियतविषयतयाव्यभिचारात् । अयमर्थःअर्थान्तरयत् किञ्चिद्विषयकाज्ञानासामर्थ्यादिकंव्यवस्थितंकथमपि न संभवति, यथा, कश्चिद्रथकारोरथमुत्पादयितुंविजानाति किन्तु तदतिरिक्तंघटादिकं न विजानातिकश्चित्तुघटमपि कर्तुंविजाति, कश्चित्तुतदन्योनविजानाति, अन्यस्तुतद्विजानातिसमीचीनतयेतिप्रकृतघटकार्यकर्तुःकुलालादेर्घटकर्तृरन्यान्यविषयंज्ञानंवाऽज्ञानं वा सामर्थ्यमसामर्थ्यंवाऽव्यवस्थितमेव दृश्यते । पटादिविषयकमज्ञानंघटाद्यज्ञानं वा कर्तृर्दुर्वर्चम्, तत्तदज्ञानस्यतत्रतत्रव्यभिचारात्कारणत्वं न भवतीतिभावः । सर्वस्यापिकर्तुः किञ्चिद्वस्तुनियमेन न ज्ञायते तत्राह **न चास्ति किंचिद्व्यवस्थितम्** यद्विद्यादिमानेवकर्तृत्वमनुभवेदिति । नतुस्वविशिष्टभाववत्वेनैव । ज्ञानस्यहेतुत्वंस्वीक्रियते । ननु स्वविशिष्टज्ञानाभाववत्वेनाज्ञानस्यहेतुत्वमर्थात् कारणत्वंस्वीक्रियते अत्रस्वपदंप्रकृतघटादिकार्यपरकमेव । तत्र ज्ञानेवैशिष्टयं च स्वनिष्ठविषयत्वनिरूपकत्व, स्वान्यनिष्टविषयतानिरूपकत्व, एतदुभय सम्बन्धेन । एवञ्चतत्तज्ज्ञानस्यतत्रतत्रव्यभिचारेपिनिरूक्तरूपावच्छिन्नज्ञानाभावस्यनियतपूर्ववृत्तित्वंसंभवान्नकोपिदोष इति चेदेवमपिपूर्वोक्तमन्ततोगत्वापञ्चममन्यथासिद्धत्वंदुर्वारमेवेतिज्ञातव्यम् ।

न चास्तिनियमःशरीरादिमानेवकर्ताभवतीति, शरीरग्रहणेनैवव्यभिचारात् । नहि शरीरविशिष्टएवात्माशरीरान्तरंस्वीकरोति, अयोगिनोयुगपदनेकदेहग्रहणासंभवात् । पूर्वोपात्तदेहपरित्यागेनशरीरान्तरप्रापकशुभाशुभकर्मप्रेरितप्राणेन्द्रियसहकृत एव देहान्तरंस्वीकरोतीत्यात्मसिद्धौकथितमेव । अपिचजीवस्यशरीरमधितिष्ठतोऽधिष्ठानकर्मभूतशरीरस्याधिष्ठानशरीरप्रवेशोनोपपद्यते, एक क्रियायामेकस्ययुगपत्कर्तृकर्मभावविरोधात्।

कार्यत्वस्याज्ञत्वादिविरुद्धाकाराक्षेपकत्वंक्षितिमहार्णवादिंकर्तरिपरमेश्वरेपरिहृतमेवेतिदिक् ।

ननु कार्यत्वंघटादौतत्रकर्तृपूर्वकत्वम्, कर्ता च कुलादिःसदेहएवघटादीनामुत्पादकोनतुशरीरविरहितोदृश्यते । अन्यथा परलोकप्रस्थितपूर्वरहितोपितत्रस्वाभिलषितंकार्यमुत्पादयेत्, नत्वेवंसंभवति, असंभवादनुपपत्तेरश्रुतत्वाच्च । इह च "न तस्यकार्यं करणं च विद्यते" इन्यादिश्रुत्येश्वरस्यशरीररहितत्वेनाशरीरःकथंक्षित्यादिकार्यंप्रतिकर्त्तास्यात्, शरीरवतैवकर्त्राभाव्यम्, इतिशरीरित्वलक्षणविपरीताकाराक्षेपकत्वंपरिहर्त्तुमुपक्रमते **न चास्तिनियमःशरीरादिमानेवेत्यादि** । एतद्दोषंपरिहरति **शरीरग्रहणेनैवव्यभिचारादिति** यश्चकर्त्ता भवेत् सशरीवानेवभवेत्, इति तु न नियमः । कुतः ? कर्मवलादुपात्तमेकंमातापितृजनितंषाट्कौषिकंशरीरंपरित्यज्यकर्मबलेनैवनवंनवंशरीरान्तरग्रहणंकुर्वतोजीवस्यान्तराकालेशरीराभावेनशरीररहिततयैवशरीरान्तरग्रहणदर्शनेपूर्वनियमेव्यभिचारस्यस्पष्टत्वात् । न च कुलालादीनां तथैव दृश्यते इति वक्तव्यम्, अयोगिनोयुगपदनेकशरीरग्रहणासंभवात् । अत्र योगवलात्, योगिनांजीवतामेवानेकव्याघ्रादिशरीरान्तरग्रहणंपूर्वशरीरमत्यजतामेवदृश्यते, अतोऽयोगिनामितिकथितम् । अर्थात् ये मादृशजीवास्तेयुगपदनेकशरीरग्रहणंकर्तुं न शक्नुन्ति, ततश्चपूर्वं शरीरंत्यजन् शरीरान्तरमुपादत्ते इतिनवशरीरोपादानात् पूर्वंशरीररहित एवेतिशरीरवानेवकर्ताभवतीति व्यभिचारस्यसुस्थिरत्वादितिभावः । ननु "ततःसत्यवतःकायात् पाशवद्धंवशंगतम् । अंगुष्ठमात्रंपुरुषं निश्चकर्षयमोवलात्" इतिं शास्त्रबलात्, अयोगिनस्सत्यवतस्तथातदन्यस्याप्ययोगिनःसूक्ष्मशरीरवतएव शरीरान्तरग्रहणंभवतीतिकथमुच्यतेव्यभिचारोदोषोभवतीति तत्राह **पूर्वोपात्तेत्यादि** । पूर्वदेहपरित्यागेनदेहान्तरप्रापककर्मप्रेरितप्राणसहायअर्थात् प्राणमात्रसहकृत एव शरीरान्तरग्रहणंकरोतीतिव्यभिचारस्यतदवस्थत्वात् । ननु "रंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यामितिसूत्रस्तथा श्रुतिवलात् सूक्ष्मभूतैःसम्बद्धस्यैवजीवस्यशरीरान्तरग्रहणंस्वीकरणीयम्, तान्येवज्ञानकर्मेन्द्रियप्राणमनोबुद्धिसंसृष्टानिसूक्ष्मशरीरमितिकथ्यते । ततश्चकर्तुःशरीरवत्वनियमेव्यभिचारदोषोनास्तीतिचेत् ? तत्रवच्मि, तथापि, कर्तुः षाट्कौशिकस्थूलशरीरवत्वनियमेव्यभिचारो न व्यभिचरति, अपिचलोकव्यवहारशास्त्रप्रमाणाच्चस्थूलशरीरमेवमुख्यतयाशरीरपदाभिधेयम् लिङ्गशरीरस्य न मुख्यशरीरत्वम्। गौणशरीरंतुपरमाणव ईश्वरस्यापिविद्यते एवेति । तदुक्तमुदयनाचार्यैरिति । तदनेन "न च शरीरवतैवकर्त्राभाव्यमितिगतप्रकरणेन, शरीरोपादानेजीवस्यकर्तृत्वंस्थूलशरीररहितस्यैवभवतीतिसमर्थ्यशरीरादिप्रेरणादिंकार्येऽपि जीवस्यशरीररहितस्यैवकर्तृत्वंभवतीतिदर्शयितुमुपक्रमते **अपि च जीवस्य शरीरमधितिष्ठतोऽधिष्ठानकर्मभूतशरीरस्याधिष्ठानशरीरप्रवेशोनोपपद्यते इत्यादि** ।

अधितिष्ठासितशरीरसंयोगवत एव तत्प्रवृत्त्यनुगुणप्रयत्नयोगलक्षणमधिष्ठानंदृश्यते इतिचेत् ? अस्त्वेकतस्त्वसंबद्धस्याधिष्ठानानुपपत्तेःप्रेर्यपदार्थसम्बन्धिनाप्रेरकेणभाव्यम्, न पुनःशरीरसम्बन्धिनाभवितव्यमिति , कथमयंनिश्चयः ? इत एवायंनिर्णयः, यतोऽन्यदप्यधिष्ठीयमानंदण्डचक्रादिस्वसंबन्धिनैवाधिष्ठीयते । तस्मादधिष्ठानाक्रियापेक्षिताधिष्ठेयवस्तुसम्बन्धमात्रातिरेकेणशरीरसम्बन्धोनान्यादृशःस्वीकर्त्तव्यः । ईश्वरस्यापि जगदुपादानोपकरणैःसम्बन्धोऽस्त्येवेत्याचार्योदयनस्योद्गारः ।

अथ स्वसरीरातिरिक्तपदार्थेप्रवृत्तिविशेषकरत्वंस्वदेहद्वारेणैवभवति । दृश्यते च

तत्र शरीरमधितिष्ठतोऽर्थात् शरीरस्यप्रेरणंकुर्वतः । अधिष्ठातृदेहेऽनुप्रवेशंकुर्वतस्तत्राधिष्ठातृ देहेऽनुप्रवेशोनाम, अधिष्ठातृतावच्छेदकघटकत्वम्, तत्र शरीरमधितिष्ठतो जीवस्याधिष्ठातृवच्छेदकोधर्मोजीवसंकल्पादिःप्रयत्नादिश्च, नतु तदीयंशरीमप्यधिष्ठातृतावच्छेदकम्, कार्यकोटावनुप्रविष्टस्यकारणकोटिप्रवेशासंभवात्, तथात्वे आत्माश्रयात् । यदाखलुअधिष्ठानक्रियाभूतंजीवशरीरंतस्मिन्नेव कालेतदधिष्ठानकर्तृतावच्छेदकत्वं न संभवति, कार्यस्यकारणकोटौप्रवेशासंभवस्योक्तत्वात् । एकदा तदुभयत्वंकुतो न संभवतीति न शंकनीयम् ? अदर्शनादनुपपत्तेश्च । यथा “काष्ठंछिनत्तिकुठारेणकारुकः” इत्यत्रद्वैधीभावात्मकच्छेदनक्रियाकर्मभूतकाष्ठस्यतच्छेदककर्तृतावच्छेदकत्वं न संभवति, तथैवाधिष्ठानक्रियाकर्मभूतशरीरस्यकर्तृतावच्छेदकघटकत्वंनैवसंभवेत्, अदर्शनादनुपपत्तेश्चेतिभावः । ननुजीवाधिष्ठातृसम्बद्धदेहस्यकथंनाधिष्ठातृतावच्छेदकत्वम् ! यथादेहावच्छिन्नजीवस्यसुखादौकारणत्वे तदवच्छेदकीभूतशरीरस्यापि, अवच्छेदकतासम्बन्धेनकारणत्वंतथैवप्रकृतेशरीरस्यकथंनाधिष्ठातृतावच्छेदकत्वमितिशङ्कते **अधितिष्ठासितशरीरसंयोगवत** इत्यादि । देहसम्बन्धएवतत्प्रवृत्त्यनुकूलप्रयत्नयोगस्वरूपमधिष्ठानंदृश्यते इति प्रश्नाशयः । उत्तरयति **अस्त्वेकतस्त्वसम्बद्धस्याधिष्ठानानुपपत्तेरिति** प्रेर्यवस्तुनासहप्रेरकस्यावश्यकोनतुशरीरसम्बन्ध आवश्यकः । अर्थादत्यन्तोऽसम्बद्धस्याधिष्ठेयवस्तुनातदधिष्ठातृत्वस्य, काष्ठाद्यसंवद्धकुठारस्यछेदकत्वासभववदेव, अधिष्ठेयसम्बन्धिनाऽधिष्ठात्रा भवितव्यमित्येवनियमोनतुशरीरसम्भन्धवतैवभवितव्यमित्याशयः ।

ननु प्रेरणादिक्रियांप्रतिप्रेरकस्यकर्तुः प्रेर्यवस्तुनासम्बन्धमात्रमपेक्षितं, ननु प्रेरकस्यशरीरसम्बन्धोपेक्षित इत्याकारकनियमे किं नियमकमितिपृच्छन्नाह **कथमयंनिश्चयः ?** उत्तरयति, **इतएवेति** । तदेवोपपादयति **यतोऽन्यदप्यधिष्ठीयमानंदण्डादि** इत्यादि । तत्राधिष्ठीयमानं–प्रवर्त्यमानम्, स्वसम्बन्धिना–प्रेर्यानुयोगिकसंयोगवता, हस्तादिकमित्येवविशेष्यम् । अयंभावः–स्वावच्छिन्नभोगवत्त्व सम्बन्धेनशरीरवतएवजीवस्यप्रवर्तकत्वमिति न नियमः हस्तादेरपिमानदण्डप्रवर्तकत्वात् । प्रेर्यसम्बन्धवत एव प्रवर्तकत्वमिति तु संभवति हस्तादेरगिरामेणवाणेनहतोवालीत्यादिस्थलेप्रेर्यसम्बन्धात् । अथवा, मतविशेषेपरमेश्वरस्यापिपरमाणुशरीरश्रवणात् । “सहस्रशीर्षापुरुषः” इत्यादिश्रुत्यापितस्यशरीरवत्वश्रवणादितिसंक्षेपः ।

पुनः शंककःशङ्कत **अथस्वशरीरातिरिक्तपदार्थे** इत्यादि । योयंजीवःप्रवर्तकोभवतितत्र स्वकीयशरीरभिन्नेवस्तुनिप्रवृत्तिविशेपकरत्वंजीवस्यस्वकीयशरीरद्वारेणैवभवति, यथाघटादिकार्यायकुलालो

लौकिकदण्डादिषुकुलालस्यहस्तसम्बन्धेनैवप्रवर्तयित्वमित्यपि न युक्तम् , संकल्पाभिध्यानमात्रेणैवसर्पदष्टदेहगतविषनिरसनादेर्दर्शनात् । शरीराभावेपरप्रेरणात्मकः संकल्पःकथं स्यादितिचेत् ।

किं देहमेवसंकल्पयति येन तदभावेसंकल्पएवनोत्पद्येत । करणत्वमिति न मनस एव दण्डादिकरणप्रेरयति तत् स्वहस्तेनैवदण्डादिकंप्रवर्तयति । तत्र प्रवर्तनंनामपरव्यापारप्रयोजकप्रयत्नवत्वरूपमेव तच्चप्रयत्नत्त्वंपुरुषस्यकर्तुरेव । स च पुरुषःस्वहस्तुव्यापारेणैवमानदण्डादिकंघटोत्पादनार्थंप्रवर्तयति । एवञ्चशरीरशरीरावयवपदार्थप्रवर्तनेशरीरतदवयवहस्तादिव्यापारापेक्षाविद्यते एवेति न परमेश्वरस्यसर्वथा विग्रहरहितस्यपरमाण्वाद्यचेतनपदार्थस्याधिष्ठातृत्वंसंभवति, अधिष्ठानस्यशरीरनियन्तृत्वात् , तदभावे तदभावादितिप्रश्नकर्तुराशय इत्थंप्रकाशितोभवतीतिसंक्षेपः । एतन्नियममपिव्यभिचारदोषेणैवदूषयितुमुत्तरयति **संकल्पाभिध्यानमात्रेणैवेत्यादि,** संकल्पध्यानादिमानसव्यापारमात्रेणदेहदेहावयवहस्तादिव्यापारमन्तरेणापिपरकीयशरीरस्थितविषनिवर्तनावतारणादिदर्शनस्यलोकसिद्धतायाः शरीरतदवयवव्यतिरिक्ताधिष्ठानेदेहादिव्यापारसापेक्षत्वनियमस्यव्यभिचारोपलंभादित्यर्थः । प्रेर्यपदार्थेनसहयोयं प्रेरकस्यसंबन्धः सोपिज्ञानद्वारेणैवनान्यादृशःसम्बन्ध इतिविभावनीयम् , तदन्यस्यासंभवादिति ।

पुनः शङ्कते **शरीराभावेपरप्रेरणात्मकः** इति । अर्थात् “जानातीच्छतिप्रयतते” इति नियमःसंचदेहसद्भावेएवसंभवतिकुलालादौतथैवदृष्टत्वात् , सर्वंचैतद्देहमूलकम्, असतिदेहेतदसंभवात् । जन्यज्ञानादौदेहस्येवनियामकत्वादितिभावः । उत्तरघटितमेवाक्षिपति **किंदेहमेवसंकल्पयति** इत्यादि । किमत्रशरीरस्यसंकल्पात्मककार्यैककर्तृत्वं, येन तदभावेसंकल्पात्मककार्यस्य निष्पादनमेवकुलालाभावेघटाभाववदित्यर्थः । पुनरपिशङ्कते **करणमिति** इति । न देहस्यसंकल्पेकर्तृत्वंयेनायमुपर्युक्तदोषोभवेत् , किन्तु संकल्पंप्रतिदेहकरणमित्यर्थः । पुनरुत्तरयति **मनसएवकरणत्वादिति** । संकल्पंप्रतिदेहस्यकरणत्वमिति नान्यत्रोपलब्धम् , तस्मादेतत्कल्पनीयम् , तदपेक्षयाऽन्तरेच्छादिकंप्रतितुसर्वसिद्धंमनसएवकरणत्वमितिमनसःकरणतयैवेहापिनिर्वाहसंभवेनाकल्प्यस्यतत्कल्पने गौरवमात्रमेवहस्तगतंभवति, तस्मात् संकल्पं प्रतिदेहस्यकरणत्वमितिरिक्तमेववच इत्यर्थः ।

एवञ्चशरीराभावेस्वनियतकरणादेवसंकल्पःस्यादेव न कोपिदोषइति । ननुभवतुसंकल्पादौमनसः करणत्वंतथापिजन्यज्ञानादौशरीरस्याप्यवच्छेदकतासम्बन्धेनापेक्षास्यादेव, यथादेहावच्छिन्ने आत्मनि यदासुखादिकमुत्पद्यतेतादृशसुखादिकार्येसमवायिकारणमात्मा, असमवायिकारणमात्ममनःसंयोगोनिमित्तकारणमदृष्टादिकम् , अतःअवच्छेदकतासम्बन्धेनसुखोत्पत्तिंप्रतितादात्म्यसम्भन्धेनावच्छेदकशरीरस्यकारणत्वम् । तत्रशरीरेऽवच्छेदकतासम्बन्धेनसुखंकार्यंतिष्ठतितत्रैवशरीरेतादात्म्यसम्बन्धेनकारणंदेहोपितिष्ठतीति सुखदेहयोःकार्यकारणयोः सामानाधिकरण्यनिर्वाहोऽपिभवति । यथा “हिमालयेवनौषधयउत्पद्यन्ते” अत्रवनौषधीनामुपादानकारणंतदवयवावाः परमाणवः असमवायिनिमित्तकारणंतुयथायथमवयवसंयोगोऽदृष्टादिकम् , हिमालयस्त्ववच्छेदकतयैवकारणम् , इहाप्यवच्छेदकतासम्बन्धेनवनौषधीनामुत्पादेऽवच्छेदकस्यहिमालयस्यतादात्म्यसम्बन्धेनविद्यमानतयानिर्वर्तितस्तयोः कार्यकारणभावइति ।

एवञ्चदेहस्याप्यवच्छेदकतासम्बन्दघटकतयाऽपेक्षाविद्यते एवेतिचेत् , अत्रोच्यते—ज्ञानोत्पत्तावच्छेदकतासम्बन्धेनशरीरापेक्षेतिमन्ये, परन्तुतत्रैतावान् विशेषःयत् बद्धजीवस्यज्ञानाद्युत्पादेएवशरीरापेक्षा, नतुज्ञानव्यापारेदेहापेक्षा । तदुक्तंश्रुतौ “मनसैवैतान्कामान्पश्यन्रमते यएतेब्रह्मलोके” “तन्म-

करणत्वात् । नतुतर्हीश्वरस्यजीववन्मनोपिविद्यते, सत्यंतथात्वेकाक्षति, नन्वेवंतर्हीश्वरस्यदेहधर्मधर्माधर्मादयोपिप्रसज्येरनितिचेन्मैवम् , कार्यत्वाक्षिप्तसमर्थकर्तृमत्तयैवास्यदोषस्यापास्तत्वात् । मनसः शरीरित्वव्याप्यत्वमपि न संभवति, आन्तरेन्द्रियस्यमनसोनित्यतयाशरीराभावेपिप्रायेणसमयेसम्बन्धसत्वेनव्यभिचारात् । यावद्भिर्दृष्टानुगुणंव्याप्तावुपयोगिभवति तावन्मात्रंव्याप्तयेस्वीक्रियते । अस्मादृशैर्लोकपालादिभिर्मनसाप्यचिन्त्यरचनस्यभूतमहाभूतादिप्रपञ्चकलापस्यसर्वज्ञभिन्नेनाल्पशरीरकोऽल्पज्ञश्चपुण्यपाप—

नोऽकुरुत” “एकोहंबहुस्याम” “मनसैवजगत्सृष्टिम् ” इत्यादिनामुक्तस्वनित्यमुक्तस्यपरमेश्वरसर्वसमर्थस्यचमनोवत्वंप्रदर्श्यते, एतावतैवैषाज्ञानसंकल्पादिकंदेहाभावेपिप्रतीयते । यद्यपिमनःप्रभृतेरधिष्ठानं शरीरमितिमातापितृजतदभावेमनोवत्वमसंभवितमिवाभाति, तथापितत्कालेतादृशशरीरस्याभावेपि, मनसोनित्येन्द्रियतयत्वोपगमादेव शरीरेन्द्रियापेक्षाविरहेपिज्ञानसंकल्पादीनामान्तरात्मधर्मणामुत्पत्तौ न काप्यनुपपत्तिर्भवति । यस्य तु तार्किकस्यमते, परमेश्वरज्ञानचिकीर्षाप्रयत्नादीनांनित्यत्वम् , तन्मते तु ज्ञान संकल्पादिकंप्रतिशरीरापेक्षानह्येवभवतीति । अत्रमनोवत्वागन्तुकसंकल्पादीनांयत्समर्थनंकृतवान् , तदेकदेशिमतमाश्रित्यसिद्धान्ताभिप्रायेण वा कृतवान् । यतःपरमेश्वरस्यकार्यंकरणंचविद्यतइत्यादिनाशरीरेन्द्रियाद्यभावंप्रतिज्ञाय “अपाणिपादोजवनोगृहीतापश्यत्यचक्षुःसशृणोत्यकर्णः । न तस्यवेद्यंनहितस्यवेत्तातमाहुरग्र्यंपुरुषंमहान्तम् ।” “एषसर्वज्ञः” “ज्ञानघनः” “परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानवलक्रिया च ।” “यतो वा इमानिभूतानिजायन्ते” इत्यादिश्रुतिवलेन च तस्यदेहाभावेपिज्ञानसंकल्पादिमत्वं च समर्थितवान् । सर्वस्वतन्त्रस्यसर्वंसर्वदाशोभते एवेतिसंक्षेपः । ननु यदिपरेशस्यमनोवत्वमिष्यते तदानिष्टापादनंभवतीत्याशयेनशङ्कते—**नन्वेवमिति** । विग्रहधर्माधर्मानैश्वर्यादयोपि न स्यात् , यतोमनोवत्वस्यशरीरित्वादिव्याप्यतयाशरीरादिधर्मवत्वमपीश्वरस्यापद्येत, इत्यर्थः । उत्तरयति **मैवमित्यादि** । समर्थकर्तृपूर्वकत्वेनसहैवकार्यत्वस्यहेनोर्व्याप्तिर्गृह्यते । तत एवमहीमहीधरादिपक्षेसंसिद्ध्यतः कर्तुःपरमेश्वरस्याशरीरित्वैश्वर्यवत्वाद्येवसिद्ध्येत, “यक्षानुरूपोवलिः” इत्यादिन्यायात् , नहिराज्ञआगमनंरथाश्वादिविरहितस्यभवति, आगच्छतिराजेतिश्रवणेरथाद्यागमनमर्थतएवसिद्ध्यतीति । परमेश्वरस्य शरीरित्वस्वीकारेतुअसामर्थ्यप्रसङ्गःप्राप्नुयात् , एतत्तत्वमग्रेप्रतिपादयिष्यते । एवञ्चपरमेश्वरेशरीरवत्वानैश्वर्यादीनामापादनंधर्मिग्राहकप्रमाणवाधितम् । परमाणुःस्थूलःपरंपरयास्थूलारंभकत्वादित्यनुमानेपक्ष साधकप्रमाणेनवाधस्तथैवप्रकृतेपीति । एवंमनसःशरीरित्वव्याप्यत्वमपिनसंभवतीतिदर्शयितुमाह **मनस** इत्यादि । शरीरविगमेपिप्राये गात्रान्तरप्रलये च नित्येन्द्रियतयामनसोविद्यमानतयाकालावच्छेदेनशरीर व्याप्यत्वंमनसोनास्तीति ।

अथैवमपिशरीरसहितस्यैवकर्तृत्वतत्रतत्रकुलालतन्तुवायादौदृष्टमितिशरीरिकर्तृकत्वेनैवकार्यत्वस्यव्याप्तिग्रहःकथंनस्यादपितुतथैवव्याप्तिः स्यादित्याशंकायामाह **यावद्भिर्दृष्टानुगुणमि**त्यादि । तत्र दृष्टानुगुणंकार्यानुकूलतयादृष्टमतएव व्याप्तावुपयोगियद्रूपंतदवच्छिन्नहेतुनासहैवसाध्यस्यव्याप्तिरेष्टव्या, धूमत्वावच्छिन्नेनसहवन्हित्वावच्छिन्नसाध्यवत् । अत्र च ज्ञानस्यशक्तेरेव च कार्यानुकूलता, ते उभे यद्यपिशुभाशुभकर्मपराधीनेकुलालादौशरीराधीने एव, एतावतानशरीरादेर्व्यापकतावच्छेदककोटौसमावेशस्तार्णत्वातार्णत्ववदिति । एवमनभिमतापादकत्वस्यनिराकरणंकृतवान् । अथचाभिमतविशेषसिद्धिप्रकारं

पराधीनो न तन्निर्माणंकर्तुंशक्नोतीति परिशेषात् सकलैश्वर्यशक्तिः सर्वज्ञोविग्रहानपेक्षः स्वसंकल्पमात्रेणैवसर्वमुत्पादयतीतिसएवजगतः कर्तासिद्धोभवतीति संक्षेपः ।

एतादृशमहामहिमगुणवताकर्त्रासहकार्यत्वस्यहेतोर्घटादिकार्येषु व्याप्तिरदृष्टचरेति चेत् ? अतिनिविडपर्वतप्रान्ताधिष्ठितसर्वथाऽपरिदृश्यमानेन्धनादिसम्बन्धवतावन्हिधूमस्यव्याप्तिर्दृष्टान्येनतत्रपर्वतेधूमविशेषदर्शनात्पर्वते तादृशोवन्हिरनुमितोभवति । ननु यत्र यादृशोधूमोज्ञातस्तत्रतादृश एव तत्संपादनसमर्थउदाहरणेऽज्ञातोपिसामान्यलक्षणयासामान्यव्याप्तिवलेन पक्षधर्मतावलात्तादृशसाध्यस्य सिद्धिर्भवतीति चेत् ! तदिदमुभयपक्षेपि समानमेव, अन्यत्रस्वपक्षपातात् । एवमत्रापि घटादिषु कार्यत्वं समर्थकर्तृकत्वेनैवज्ञातव्याप्तिकं सत्, पृथिव्यादिकार्येषु परिदृश्यमानंस्वोत्पादनशक्तिकमदृष्टपूर्वं ज्ञानादिमत्कर्तारं साधयति । देशकालादिविशेषमनादृत्यैवधूमस्यस्वजनसमर्थवह्निमात्रेणैव सहव्याप्तिर्गृह्यतेइतिनियमस्तथैवाल्पज्ञत्वशरीरवत्वादिविशेषान् पापपुण्यपराधीनत्वादीविशेषपरित्यागेन कार्यस्यस्वोत्पादनसमर्थज्ञानादिमत् कर्तृमात्रेणव्याप्तिग्रहोभवतीति न कोपिविशेषः ।

विविच्यदर्शयति—**अस्मादृशै**रित्यादि । अपर्यन्तविस्तारस्य, नास्तिपर्यन्तोविरामोयस्यतादृशस्य, अनवधिकविस्तारवतोऽपरिच्छिन्नस्येत्यर्थः । महाभूतभौतिकप्रपञ्चस्य, तत्रभूतमपञ्चीकृततन्मात्रादिकम्, महाभूतंस्थूलाकाशादिकम्, भौतिकःप्रपञ्चःश्रोत्रादिघ्राणान्तइन्द्रियगणः एतादृशप्रपञ्चस्यलोकस्य, लोकपालादिकैर्महामविमशालिभिरपि, मनसापि, अचिन्त्यरचनावतश्चतुर्दशभुवनस्यप्रादेशिकशरीरकः =परिच्छिन्नमूर्तिमान्, किञ्चिद्ज्ञोऽल्पज्ञ इत्यर्थः, तथापुण्यपापपराधीनगत्यागतिमान्, कथंनिर्माणायसमर्थःस्यात् न कथमपिसमर्थःसर्वथाकर्तुमसमर्थएवेति । तस्मात् **परिशेषात्**=योहिपुरुषविशेषोऽनन्तशक्तिश्चविभोर्विधिज्ञा इत्यादिशास्त्रसमर्थितापरिमितज्ञानैश्वर्यशक्तिसम्पन्नोमातापितृजषाट्कौशिक शरीरसाहाय्यानपेक्षः स्वकीयामोघसंकल्पमात्रादेव "सर्वाल्लोकान् सुसंहृत्यसभूतान्सचराचरान् । पुनरेतथास्रष्टुंशक्तोरामोमहामशाः ।" इत्यादिरूपेणमहर्षिश्रीवाल्मीकिप्रतिपादितदिशा सकलभुवननिर्माणक्षमःकर्त्तासिद्धोभवतीतिसंक्षेपः । तदाहुर्जगद्गुरवः श्रीरामानन्दाचार्याः "यस्माद्विश्वमुदेतियेनलभते संरक्षणंशाश्वतंयस्मिन्नप्ययमेतियोहिसततंकारुण्यवारांनिधिः । यः कल्याणगुणाकरस्त्रिजगतः श्रेयःपरंप्रापकस्तं ब्रह्मार्चितपादपद्मयुगलंरामाख्यमीशंनुमः" इति तदुक्तमभियुक्तैरपि—

"संसारपटकुविन्दंजगदण्डकलशकुलालमीशानम् । सर्गप्रलयसिताकुसुमंस्रग्मालिनंवन्दे ॥ इति ॥
अन्यत्रापि—"परमेश्वरशक्तिलतायामलावुलतावत्सहस्रशोऽण्डान्यनुस्यूतानीत्यनुश्रूयते" इत्युदयनः ।

॥ इतिपरमेश्वरसाधककार्यत्वहेतोविरुद्धदोषपरिहरणप्रकरणेतत्त्वदीपः ॥

पुनः शङ्कते प्रतिवादी **एतादृशमहामहिमगुणवताकर्त्रा** इत्यादि । कर्मापराधीनत्वशरीररहितत्वसर्वज्ञत्वामोघसंकल्पवत्वादिविशिष्टेनकर्त्रासहकार्यत्वहेतोर्व्याप्तिर्घटादिकार्येषुनदृश्यते, तदाततोतिविलक्षणतयाकथमत्रसाध्यहेतोर्व्याप्तिः स्वीक्रियतेइतिशङ्काग्रन्थस्यतात्पर्यम् । वन्हित्वादिसामान्यधर्मावच्छिन्नसाध्येनव्याप्तिग्रहणादेवपक्षधर्मतासहकारात्तदितरवाधसहकाराद्वापर्वतीयसाध्यविशेषस्यसिद्धिर्जायते तथैवप्रकृतेपि किं न तथा स्यादित्याशयमनुरुध्यप्रतिवन्दिउत्तरमाह **अतिनिविडपर्वतप्रान्तेत्यादि** । उत्तरेसमानतामेवदर्शयति, तदिदमुत्तरपक्षेपिसमानमेवकेवलंस्वपक्षपातात् । यथा देशकालस्वगतपरि-

किञ्चव्यापकद्रव्याकाशात्मसम्बन्धवत्, क्रियावतश्चसर्वत्राव्यभिचरितत्वेपि, ज्ञानसुखदुःखादिविशेषगुणादनुमितात्मसंयोगवतोमनसः कथंस्पर्शराहित्यमभ्युपगम्यते ।

कथं वा वायवीयद्रव्यस्यमहत्वगुणवतोऽनियताधिष्ठानस्पार्शनत्वनियमदर्शनेपिमाणादिविशेषयुक्तवन्हेर्व्यभिचारात्, धूमव्यापकतावच्छेदकघटकत्वं न भवति, किन्तु वन्हित्वमात्रंव्यापकतावच्छेदकं भवति, किन्तु आर्द्रेन्धनसंयोगसहकृतंवन्हित्वमात्रंधूमव्यापकतावच्छेदकंतथैवमनुष्यत्वादिसहचरितम्, न कर्तृतावच्छेदककोटीघटकम्, यतोऽन्यत्रापितथादर्शनात् । ननु मनुष्यादिकं न व्यापकतावच्छेदकंतदाकिमत्रतद्घटकं तत्राह **एवमत्रापीत्यादि** अर्थात् सामर्थ्यमात्रंव्यापकतावच्छेदकमिति । यथापर्वतादौधूममात्रहेतुत एववन्हिविशेषस्यपर्वतानुयोगीकस्यपक्षधर्मतासहकारेणसिद्धिर्भवतिनान्यादृशस्यवन्हेः सिद्धिर्भवति, तथैव प्रकृतेकार्यत्वहेतुतः पृथिव्यादिपक्षेअदृष्टपूर्वस्यापिसर्वसमर्थसर्वशक्तिमतोऽपरिमितज्ञानवत् कर्तुरनुमानं भवति । धूमहेतोः कार्यत्वहेतोश्चवैलक्षण्याभावादिति ।

ननु सपक्षदर्शनमात्रेणार्थात् निश्चितसाध्यवतिसपक्षेयेयेयादृशाधर्माः परिदृष्टास्तेषांसर्वेषांपक्षे आपादनेप्रायः प्रत्यक्षधर्मिकानुमानमात्रमस्ततामियात्, तथा तत्र प्रतिबन्दींदर्शयितुमुपक्रमते **किंचव्यापकद्रव्याकाशेत्यादि** । तत्र "व्यापकद्रव्य" इत्यनेनमनसोव्यापकत्वंनिराकृतम्, न्यायमते विभुद्रव्ययोराकाशकालयोः संयोगस्यास्वीकारात् । नच यद्याकाशकालयोः सम्बन्धान्तरस्यसमवायादेरसंभवात्, परिशेषात् तयोर्द्रव्यरूपतयासंयोगआवश्यकएवेतिवाच्यं तथासतितुल्ययुक्त्यातथाविधोविभागोपिसिद्ध्येत्, प्रतियोगिनोर्नित्यतयानित्यसंयोगवत् तयोर्विभागोऽपिनित्यःस्यात् । सचनेष्टःकालाकाशौविभक्ताविति प्रतीतेरभवात्, इत्थं च संयोगस्यक्रियाजन्यत्वस्यश्येनशैलादौदृष्टत्वेनव्यापकयोःक्रियाया अभावेनव्यापकयोर्नित्यःसंयोगो वा तादृशोविभागोवानाद्रियते । ज्ञानसुखाद्यसमवायिकारणसंयोगाश्रयतयामनसःसिद्धिर्भवतीति । ज्ञानादीनामुत्पत्तौसमवायिकारणमात्मा, आत्मनः संयोगस्यासमवायिकारणत्वमदृष्टादेर्निमित्तकारणत्वम् । समवायिकारणत्वंद्रव्यस्यैवेतिनियमेनसमवायित्वमात्मनो गुणकर्मणोरेवा समवायित्वमितिनियमेनात्मनः संयोगोऽसमवायिकारणम् । ततश्च ज्ञानाद्यसमवायिकारणसंयोगाश्रयतयामनः सिद्ध्यतीतितन्मतम् । तथा ज्ञानानामयौगपद्यात्, तस्यमनसोऽणुत्वम्, मध्यमपरिमाणवत्वेव्यापकत्वे वा अनेकेन्द्रियेणयुगपत् सम्बन्धादनेकज्ञानजन्मप्रसङ्गात् । "अयौगपद्याज्ज्ञानानांतस्याणुत्वमिहेष्यते" इति तन्नियमात् । "कथितान्यगतश्चेतिसूत्रेऽणूनीन्द्रियाणिहि" (श्रौतप्रमेयचन्द्रिका १/१२४) "प्राणमनूत्क्रामन्तंसर्वेप्राणाअनूत्क्रामन्ति" (बृ. ४/४/२) इत्यादिश्रुतिस्मृत्योश्च । एवंस्पर्शराहित्येनत्वचाऽग्राह्यत्वम्, स्पर्शवत्वेवायुवन्मनसोपिभूतत्वप्रसङ्गात्, नीरूपत्वाच्चचक्षुरयोग्यत्वम्, अन्यथाघटादिवदेवभूतत्वमेवप्रसज्येत । मनसोभूतत्वस्वीकारेचाभूतात्मादिविशेषगुणग्राहकत्वंनस्याच्चक्षुरादिवदिति । एवञ्चयोहिविभुद्रव्यसंयोगी क्रियावान्, तत्रस्पर्शवत्वंघटादिवद् भवत्येव, ततश्चैतादृशस्यमनसः स्पर्शत्वंकथंनाभ्युपगतम, तस्मात् क्वचिद्यद्दृष्टंतत्सर्वंतदन्यत्रभवत्येवेति न नियमोमनसि व्यभिचारात् ।

अत्रायंप्रतितर्कौ मनोयदिपरिच्छिन्नपरिमाणवत्स्यात्, क्रियावद्वाभवेत्तदास्पर्शवदवश्यमेव, परन्तुघटादिवन्मनसिक्रियावत्वंप्रमाणासिद्धमपि किन्तुस्पर्शवत्वं न केनापिस्वीकृतम्, अन्यथा प्रयाणकाले शरीराद्विनिर्गच्छतोमनसः स्पर्शवत्तयाऽनुभवोभवेत्, परन्तु न केनाप्यनुभूतंतदुपपद्यतेवेति । भूयो

त्वगिन्द्रियेशरीरान्तर्गतेतदभावोभवति । कथं वा तैजसद्रव्यरूपस्पर्शयोरन्यतरस्यप्रत्यक्षनियमेपिरूपोपलंभसाधनतानुमिततैजसस्यचक्षुषोनियमस्तदुभयानुद्भवयोःस्वीकारः । अथ कार्यज्ञानानुमितसद्भाववतोतैजसत्वेपितत्तद्विशेषणांशयोग्यानुपलंभापहतविषयतया, तदभूयः सहचारदृष्टयोरपिपृथिवित्वलोहलेख्यत्वयोर्वज्रेव्यभिचारवदिहापि व्यभिचारोमनसिस्पर्शवत्वस्यव्यभिचारइतिभूयसहचारदृष्टस्येदंप्रथममुदाहरणमितिदर्शयित्वानिदर्शनान्तरंदर्शयितुमुपक्रमते **कथंवावायवीयद्रव्यस्य** इत्यादि महत्वगुणशालिनोनियताधिष्ठानेति । अत्रानियताधिष्ठानस्येत्याकारकप्रश्नांशस्तथासत्येवप्रकरणसंगतेः । यद्यपिमहत्वगुणवतोवायोःसर्वदेरणतयासर्वदैवगमनशीलस्यानियताधिष्ठानत्वमुद्भूतस्पर्शवत्वात् च प्रत्यक्षविषयत्वंभूयोभूयोदृष्टम्, तथापि वायवीयत्वेनानुमितशरीरव्यापित्वगिन्द्रियस्यनियताधिष्ठानत्वंस्पार्शनप्रत्यक्षाविषयत्वमेवाभिमतम् । यद्यपीन्द्रियमात्रस्यातीन्द्रियतयाऽन्तरत्वेन च न स्पार्शनविषयतायाः संभवस्तथापिप्रौढिवादेनप्रकरणानुकूलतया च निदर्शनत्वेनव्यभिचारित्वमुदाहृतमिति । अत्रायंप्रतितर्कः—त्वगिन्द्रियस्यवायवीयमहत्कार्यत्वेउद्भूतस्पर्शवत्वंभवेत्, नत्वेवंतथाऽदर्शनादितिद्वितीयमुदाहरणप्रदर्शनम् ।

अन्यदपिदृष्टान्तमुपन्यसितुमाह **तैजस** इत्यादि । यत्यार्यरूपंजन्यंतेजोद्रव्यम् तस्यमहिमगुणवतोमहतस्तस्योद्भूतस्पर्शवत्वंदृश्यते, तदन्यतरस्य वा प्रत्यक्षविषयत्वंनियमतोदृश्यते एववैश्वानरादौ, परन्तुविज्ञानंसकरणकम् क्रियात्वात्, इत्यनुमानेनचक्षुरिन्द्रियमेव, तत्रकरणतयाऽनुमियते, चक्षुस्तैजसंरूपादिषुमध्येरूपस्यैवाभिव्यंजकत्वात्, इत्यनुमानेनचक्षुषस्तैजसत्वात् तत्वाच्चोद्भूतरूपवत्वमपि तथापितस्यप्रत्यक्षत्वंनेतिकथमिवसंभवेत् । अर्थात् जन्यंतेजसःकाष्ठाश्रितवन्ह्यादेर्महत्वयुक्तस्यरूपस्पर्शयोरुद्भूतत्वंज्वलनादौ, सर्वानुभूतम् । स्पर्शमात्रस्योद्भूतत्वंभर्जनकपालस्थितवालुकादौ, तत्रतादृशवालुकान्तर्गतवन्हेरप्रत्यक्षत्वेपितद्गतवन्हेः स्पर्शवत्वस्योपलंभेनोद्भूतस्पर्शवत्वंत्वगिन्द्रियेणगृह्यते, तैजसप्रमादौरूपमात्रस्योद्भूतत्वंस्पर्शस्यतत्रानुभवाभावात् । एवञ्चरूपस्पर्शोभयतदन्यतरोद्भवस्यवहुशोदृष्टत्वेपिचक्षुरिन्द्रियस्यरूपादिषुमध्येरूपमात्रव्यञ्जकत्वेनानुमीयमानतैजसस्यतदुभयानुद्भवोऽर्थात्, चक्षुषि उद्भूतरूपोद्भूतस्पर्शयोरभावःकथम् । चक्षुषितयोरभावः कथमिति न शंकनीयम्, प्रमाणाभावेन तदवगमात् । यदिकदाचित् चक्षुषिउद्भूतरूपस्पर्शयोः संभवोभवेत् तदावैश्वानरादिवदेवचक्षुषोपितैजसेन्द्रियग्राह्यताभवेत्—परन्तुनत्वेवंक्वचिद्दृष्टंश्रुतमुपपद्यतेवेति ।

चक्षुषो विवैश्वानरादिवत् तैजसमहत्कार्यत्वेतत्ररूपस्पर्शान्यतरोद्भवः स्यादितिप्रसङ्गोऽत्रावधातव्यइति । उपर्युक्तप्रतिकूलतर्काणामाभासत्वमेवेत्याशयेनाह=**अथकार्यज्ञानानुमितसद्भावे**त्यादि । तत्तद्विशेषाणाम्—उद्भूयोभूयः सहचारदर्शनमात्रेणचक्षुरिन्द्रियादावापाद्यमानानांयोग्यानुपलंभबाधितत्वमितिनापादकत्वमापाद्यस्येत्यभिप्रायः । यद्यपिमनसोऽणुत्वेनाप्रत्यक्षत्वात्, तादृशाधिकरणे स्पर्शवत्वस्य, योग्यानुपलंभबाधोनयुक्तः, यतः “लब्धरूपेक्वचित् किञ्चित् तादृगेवनिषिध्यते, प्रमाणमन्तरेणासौ न निषेध्यस्यसंभव” इतिवचनात् । तथापि तत्रोद्भूतस्पर्शवत्वोपगमेऽनेकनियमभङ्गोऽस्त्येव । एतदभिप्रायेणकथितम् **तदभ्युपगमेऽनेकनियसभङ्गप्रसङ्गाच्चतथाभ्युपेयते** इति । तत्रयथा, मनइन्द्रियस्यस्पर्शवत्वेभूतत्वादनिन्द्रियत्वप्रसङ्गः, अन्यत्रस्पर्शवतांभूतत्वदर्शनात्, मनसोभूतत्वास्वीकारेस्पर्शवत्वेभूतत्वेभूतत्वमेवघटादिवदितिनियमभङ्गप्रसङ्गः । तदनुरोधात् कदाचिद्भूत-

भ्युपगमेऽनेकनियमभङ्गप्रसङ्गाच्चतथाभ्युपेयते ? इतिचेत् तर्हिंप्रकृतविपयेपिप्रासङ्गित धर्मविशेषाणामनुपलंभवाधस्यसमानत्वेनानेकनियमदर्शनविधानात् , तथास्वीकारोऽस्माभिः क्रियते इतिसर्वंतुल्यमन्यत्राभिनिवेशात् ।

दृश्यन्तेह्येवमनुमानानि विवादास्पदं परमाण्वादिकम् प्रेक्षावत् प्रेरणानन्तरमेव

त्वोपगमेचेन्द्रियान्तरचक्षुरादिवदेवात्मविशेषगुणसुखदुःखादिग्राहकत्वं न स्यात् । तथापितद्ग्राहकत्वोपगमेचाभूतविशेषगुणाग्राहकत्वनियमस्यापिभङ्गप्रसङ्गः ।

एवं चक्षुस्त्वक् घ्राणादीन्द्रियादावपिस्वीकारेऽनेकनियमभङ्गोभवतीत्यनुसन्धेयः । विपक्षेवाधकाभावेनापाद्यापादकयोर्व्याप्यव्यापकभावसिद्धिः । एवं च प्रतितर्काणांछिन्नमूलत्वमेवापेक्षितम् । मनःप्रभृतिकेन्द्रियस्यनिःस्पर्शत्वाभ्युपगमादितिसंक्षेपः । एवंप्रकृतेपिपरमेश्वरसाधककार्यत्वानुमानेतुल्यन्यायात् कर्तृत्वेशरीरवैशिष्ट्यमितिनियमोपिनास्तीतीश्वरवादीकथयति **तर्हिंप्रकृतेपीत्यादि** । कर्तुरीश्वरस्य सरीरत्वेशरीरद्वारापरमेश्वरस्याप्युपलंभप्रसङ्गः । परमेश्वरस्यशुभाशुभकर्मवत्वस्वीकारेजीववदेवासर्वज्ञत्वप्रसङ्गः । प्रकृष्टधर्मवत्वात् सर्वज्ञत्वाद्युपगमश्च न संभवति, कुतः ? परमेश्वरस्यधर्मसाधनयागाद्यनुष्ठानरहितत्वात् प्रकृष्टधर्मस्याप्यनुपपत्तेः । परमेश्वरस्यसधर्मोनित्य एवस्वीक्रियते इतिपक्षेतुधर्मसामान्यस्यार्थात् सर्वधर्माणांवेदविहितक्रियाजन्यत्वनियमस्यभङ्गप्रसङ्गः । ईश्वरस्यकर्मरहितत्वेसशरीरत्वानुपपत्तिर्यतः शरीरादेर्धर्माधर्मजन्यत्वनियमात् , अन्यथामुक्तस्यापितथात्वप्रसङ्गात् । परमेश्वरशरीरस्येश्वरवदेव नित्यत्वस्वीकारेसावयवत्वस्यकार्यत्वव्याप्यत्वनियमभङ्गप्रसङ्गस्तथा च क्षित्यङ्कुरादेरपिकार्यत्वासिद्धेस्तत्तत्कर्तृतयेश्वरानुमानाभावेनेश्वरचर्चाऽस्तमियादित्यादिकंस्वयंविचारणीयम् ।

इतीश्वरेसामान्यतोदृष्टानुमानस्यप्रामाण्यव्यवस्थापनप्रकरणेतत्त्वदीपः ।

अथ चक्षुरादीन्द्रियस्यानुमानद्वारेण रूपाद्युपलंभकतयातैजसत्वेपितत्तैजसविशेषस्यप्रमाणसिद्धत्वात् तत् विरुद्धापादनसंभवःपरन्तु, एवंप्रप्रकारेणपरमेश्वरीयविशेषाणांप्रमाणसिद्धत्वंनास्तीत्यतःपरमेश्वर सिद्ध्यापादनंदुरुपपादमेवेत्याशङ्कांनिराकर्तुमुपक्रमते **दृश्यन्तेह्येवमनुमानानि** इति परमेश्वरीय विशेषसाधकानीति । अर्थात् परमेश्वरेप्यभिमतविशेषसाधकान्यनुमानानिसन्त्येवेत्यर्थः । तान्यनुमानानिविविच्यदर्शयति **विवादास्पदंपरमाण्वादिकम्** इत्यादि । तत्रविवादास्पदंपरमाण्वादिकमिति पक्षः । **प्रेक्षावत् प्रेरणानन्तरमेवविलक्षणक्रियावद**र्थात् हिताहितप्राप्तिपरिहारात्मिकाचेष्टैवविलक्षणक्रिययागृह्यते इति परमाण्वाद्यचेतनयाचेष्टादृश्यते सासर्वज्ञपरमेश्वरप्रेरणापूर्विकैवेति, अचेतने स्वातन्त्र्येणप्रवृत्तेरसंभवात् । अचेतनत्वादितिधूमादिवत् साधनंवन्हिसाधकवत् । यदचेतनमित्याद्युदाहरणम् । यथाधूमेनवन्हिसाधनेयोयोधूमवान् , सवन्हिमानितिवदितिं, तथैवप्रकृते, यद्यदचेतनं तत् यथोक्तसाध्यवानित्यन्वयिदृष्टान्तः। व्यतिरेकीदृष्टान्तोपिवन्ह्यभावेधूमाभाववदिव, परप्रेरितचेष्टाभावेचेतनत्वस्यदर्शनादिति । इहापिपरमेश्वरीयाभिमतविशेषस्यसाधकाः सन्ति वहवः प्रकाराः । तत्रेश्वरस्य सर्जकत्वे “यतो वा इमानिभूतानिजायन्ते” इत्यादिश्रुतिसमर्थितानुमानंपूर्वंप्रदर्शितम् । परमेश्वरस्यप्रवर्तकत्वेतुप्रमाणंत्विदम् **परमाण्वादिकम्** इत्यादि । तत्र विवादास्पदमितिपक्षविशेषणम् पक्षतायाः संभवद्योतकम् । साध्यतदभावयोरन्यतरस्यनिर्णये एवपक्षताऽतिवर्तते । साध्यसाध्याभाववत्त्वविप्रतिविषयीभूतम् , इतिविवादास्पदमित्यस्यार्थः साध्यवत्त्वेनसन्दिह्यमानत्वमितिफलितम् । अनुमाना-

विलक्षणक्रियावद् भवति, अचेतनत्वात् यत् यथोक्तहेतुमत् तद् यथोक्तसाध्यवद् भवत्येव कन्दुकादिवत्। तथा विवादाध्यासिता बाह्याभ्यन्तरप्रवृत्तय उपादानोपकरणप्रत्यक्षपूर्विकाः कार्यत्वाद्घटादिवदितिशम् ॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्यप्रधानपीठाचार्य जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रप्रणीततत्त्वत्रयसिद्धावीश्वरसिद्धिः ॥ सर्वेश्वर श्रीरामः प्रीयताम् ॥

त्पूर्वंसाध्यनिश्चयेसिद्धिसाधनमिति न पक्षता, साध्याभावनिश्चयेतुवाधएवेति न ततः पक्षता, अग्निरनुष्णइतिवत् । प्राचीनमतेसाध्यसन्देहस्यपर्यतोवन्हिमान्नवेत्याकारकस्यैवपक्षतात्वम , संदिग्दसाध्यघर्माधर्मीपक्ष इति । साध्यसंशयएवपक्षतेतिप्राचीनाः सन्दिग्धेन्यायः प्रवर्ततेननिश्चितेतद्भावनिश्चये, इनि प्राचीनाः ।

गृहमध्यस्थितस्याकस्माद् घनगर्जनश्रवणेपूर्वंगगनंमेघवन्नवेतिमेघीयसंशयाभावेपिगगनंमेघवद् गर्जनादित्यनुमानदर्शनेन न साध्यसंदेहः पक्षता । किन्तु "सिषादयिषाविरहविशिष्टसिद्ध्यभाव एव तथा, सत्यामपिसिद्धौअनुमिनोमीतीच्छायाउत्तेजकत्वेनपक्षतायानिर्वाहात् । अन्यथाश्रुत्यात्मनिश्चयवतोऽनुमित्सयाऽत्मानुमानं न स्यात्, ततश्च "श्रोतव्यः" इत्यादिनाश्रवणानन्तरम्, "मन्तव्यः" इति पदेनात्मानुमानप्रतिपादनपरकश्रुतिवाक्यस्य का गतिरितिविभावनीयतामापद्येत । तस्मात् यदोक्त सिद्ध्यभावस्यैवपक्षतात्वंस्वीकृतंनवीनैः । "नहिप्रत्यक्षेकरिणिचीत्कारेणतमनुमिमतेऽनुमातारः" "प्रत्यक्षकरिकलितमप्यर्थमनुमानेनवुभुत्सन्तेतर्करक्षिकाः" एतद्वाचस्पतिवचनमनुरुद्ध्ययथोक्तविशेषणविशिष्ट सिद्ध्यभावस्यपक्षतात्वंगंगेशोपाध्यायाः स्वीकृतवन्तः । केचित्तुसाध्यसन्देहस्यपक्षतात्वंप्राचीनमतम् । सिद्धिस्थलेप्याहार्यसंशयादेवानुमित्सयाऽनुमानंभवतीतिवदन्ति । परन्तुविचारणीयंयत्, आहार्यज्ञानस्य प्रतिबध्यत्वप्रतिबन्धकत्वयोरनुपगमेनकथमित्थमिति ।

परमेश्वरस्य परमाण्वाद्यचेतनंप्रतिप्रेरणंतुपरप्रवृत्त्यनुकूलसंकल्पप्रयत्नवत्वस्वरूपमेवनेतोऽन्यादृशं तदितिभावः । तदनेनप्रकारेणपरमाण्वादिविपयकावीश्वरस्य संकल्पप्रयत्नौसाक्षात्कारमपितथाविधंसाधयितुमाह **तथाविवादाध्यासितावाह्यभ्यान्तरप्रवृत्तयउपादानोपकरणप्रत्यक्षपूर्विकाः कार्यत्वा दघटादिवत्** इति । अत्र घाटादिप्रवृत्तौ—उपादानकारणंघटादिः, उपकरणंदण्डादिकम्, तदीयद्रष्टादण्डेनघटादिकंप्रवर्तयन्दृश्यते, तदनन्तरंघटादौप्रवृत्तिरुपजायते । एवमेवपरमाण्वाद्यचेतनप्रवृत्तेर्ज्ञानाद्यर्थान्तरात्मप्रवृत्तेरप्युपादानोपकरणपरमाण्वाद्यदृष्टादीनांसाक्षात्कारीपुरुषः कर्त्ताऽत्रसाधितोभवतीति । नचैतादृशकर्तृत्वंजीवानामितिनतेनसिद्धसाधनम्, अत्रानुमानेऽतीन्द्रियाद्यर्थानामपिसाक्षात्कारस्यप्रकृतानुमानेफलितत्वादितिदिक् । तदेवमाचार्यामहान्तप्रयत्नमास्थायानुमानद्वारानिरीश्वरवादंस्थापयतोवादिनः केवलानुमानेनैवेश्वरसिद्धिमुदाजहाराः । शंभवतु सर्वजगतः ।श्रीरामः शरणं मम ॥

केवलेनानुमानेन साधितोऽत्रजगद्गुरुः । सिद्धश्चभगवान् रामोदयांकुर्यान्ममोपरि ॥
वन्दे रामं रमानाथं जानकीवल्लभं परम् । अन्तरं तत्त्वसिद्धिर्हियत्कृपालवलेशतः ॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्य प्रधानपीठ संस्थापकाचार्य जगद्गुरु श्री
रामानन्दाचार्य रामप्रपन्नाचार्ययोगीन्द्रशिष्यपश्चिमाम्नायविश्रोमद्वारिकास्थ श्री
रामानन्दाचार्य पीठाधीश्वर स्वामी रामेश्वरानन्दाचार्य
प्रणीत ईश्वरसिद्धौ
तत्त्वदीपः

卐 विशिष्टाद्वैतमीमांसा 卐

ले० पं० केदारनाथओझा
मुमुक्षुभवन–अस्सी-वाराणसी

सीतासमेतो विरहे च रामः सदाभिरामो मम शुग्विरामः ।
ममात्मदेहोभवतान्मनो मे गेहस्तदीयः सफलो भवामि ॥

श्रीसीतासाहित्यविशिष्टः सीताविरह····राम एव न रामाद् भिन्न····विशिष्टः शुद्धान्नातिरिच्यते इति शास्त्रप्रसिद्धिः । अत एवन्यायनये विशिष्टा सत्ता शुद्धसत्तैव विशिष्टऽऽधिकरणतैव अतिरिक्तेति गीयते । सर्वेश्वरस्य श्रीरामस्य श्रीसीताविरहसमये विरहविलपनं 'तत्तद्द्रष्ट्रणां मनो भावनया' इति महान्तो दार्शनिका श्रीमदपय्यदीक्षितमहोदया ब्रुवते । मानवावतारोमर्यादापुरुपोत्तमो भगवान् मानवलीलाम् एकपत्निव्रतञ्च विश्वं पालयेदिति यस्य भावना तत्कृते विरहं नाटयेत् । येषां तु सर्वेश्वरो भगवान् निरतिशयनित्यस्वभावभूतानन्दस्तेषां कृते तु सदाभिरामो नित्य सौन्दर्यशाली, यथा प्रसन्नस्वभावोपि नटः शोकस्थायिभावानुभावान् अभिनयेनसम्यगभिव्यनक्ति । एकपत्नीव्रतस्यैषामर्यादा सच्चिदानन्दस्य भगवतः समीचीनालीलेति भाषयतो मम शुग्विरामः शुचं विरमयति=करुणरसलिप्सान्तः करुणस्य सहृदयस्य शोकाभिमयैरभिव्यक्तस्यान्दमयस्यकरुणरसस्यास्वाद इव । एतावता सीतासाहित्यविशिष्टसीताविरहविशिष्टयो रामयोरद्वैतम् आनन्दघनत्वमकारण कृयालुत्वं "ज्ञात्वा धीरः शोकमोहौ जहाति" इत्यादिरीत्या प्रपन्नजनानां शुग्विनाशित्वञ्च संक्षेपेण सूचितम् । 'ममात्मदेह' इत्यनेन औपनिषदो जडचेतनयोः परमात्मनः शरीरशीरिभावः सूचितः, स च वैदिकदर्शनानां वैदिकत्वादेव कथमपि समन्वेय उपयोजनीयश्च । परं विशिष्टाद्वैतदर्शने तत एव शेषशेषिभावोऽपि विशेषोऽभ्युपेयते । यतो हि शरीरिण एव यथा स्वस्वामिन एव न स्वतन्त्रं शरीरम् । शरीरं न स्वस्यैपोपयोगि किन्तु शरीरिण उपयोगाय भोगाय वा 'एकाकी न रमते लोकवत्तु लीलाकैवल्यमिति' इत्यादिश्रुति सूत्राभिप्रेतं स्वतृप्तिमनुदिश्य क्रियमाणं 'स्वाभाविकी ज्ञानवलक्रिया च' इत्यादिशास्त्राभिमतं सर्वं सृष्टिस्थिति संहारानुकूलं कर्म नित्य तृप्तस्य भगवतोऽपि लीलैव । जीवानां भोगो भगवतो लीलैवभोगः । यथा ग्रामस्य जडचेतनसमूहस्य ग्रामणीः शेषी तथा चिदचिन्मयस्य जगतो भगवान् श्री रामः शेषी । परमात्माधीनं सर्वंजगदिति फलति । एवं जीवस्य चेतनस्य शरीरे भौतिके या क्रिया सा जीवाधीना यथा लोके मन्यते तथा जीवस्य भगवद्देहस्य या क्रिया सा भगवदधीनेति शरीरशरीरिभावः शेषशेषीभावो वा स्फोरयति । शेपशेपिभावेन सर्वापेक्षया शेषिणो भगवतः प्राधान्यमगतम् । भगवन्तमन्तराव्यक्तित्वं न पर्यवस्यतीत्यपिफलितम् ।

"द्वादशेऽहनि पिता नाम कुर्यात्" इतिस्मृतिदिशा यन्नामकरणं तन्न जातस्य शरीरमात्रस्य किन्तु नित्यसिद्धस्य जीवस्य शरीराधिष्ठितस्य, चैत्रप्रभृतिनामानि तस्मिन् जन्मनि सर्वव्यवहार साधकानि चेतनाधिष्ठितस्यैव, नामानि चेतनसंस्कारास्तन्नाम्नैव संकल्प्यन्ते। जातस्य सद्योमृतस्य चैतन्यतिरोधानस्यनामकरणमेव न जायते। अत एव चैत्रोऽधीते सम्यगवबुध्यते चेति चैत्रनाम्नि अवबोधकार्यशास्त्रसमर्थितं लोकेऽपि व्यवह्रियते। ततोऽग्रेऽपि विशिष्टाद्वैतं शास्त्रीयं समुपदिशति। नैतावदेव भगवच्छरीरेण भगवताऽधिष्ठितेन जीवेनाधिष्ठितस्य शरीरस्य चैत्रादीनि नामानि। तत्रापि शरीरमपेक्ष्य शेषी जीवात्मा प्रधानं भूयो व्यवहारस्य चेतनस्यैव लोके दर्शनात्, जीवात्मानमपेक्ष्य परमात्मा शेषी प्रधानं सर्वव्यवहारस्य परमात्माधीनत्वात्, तथा च चैत्रादीनि सर्वाणि नामानि प्राधान्येन परमात्मनामानि प्राधान्येन परमात्मबोधकानि। अनया रीत्या सर्वजगद्वस्तुबोधकानिसर्वाणि वचांसि प्राधान्येन सर्वशेषिणः परमात्मनो बोधकानि, किमुत वैदिकानि किञ्च वैदिकानां तात्पर्यान्वेषणेन ? व्यक्तित्वेऽपि प्राधान्यं परमात्मन एव। एतेन 'सर्वं ब्रह्ममयं जगत्' इति साधु व्याख्यायते।

अन्तर्यामि ब्राह्मणवेदसिद्धतया समेषां वैदिकदर्शनानां विभो ब्रह्मणः सर्वत्र व्याप्तत्वमभिप्रेतम्, सर्वाणि वैदिकदर्शनानि ईश्वरमङ्गीकुर्वन्ति, निरीश्वरवादिता केषाञ्चिज्जगत्कर्तृत्वानङ्गीकारादित्यहमभिप्रैमि, परं ततोऽपि विशेषेण दर्शनमिदं शरीरशरीरिभावेन शेषशेषिभावेन च परमात्मपरतन्त्रतां जीवानां प्रसारयति भक्तिं च भगवतीं सम्यग्भूषयति। पामरास्तु मम शरीरम् अहं चिन्तये इत्यादि निःसन्देहं चर्चयतोऽदेहजीवात्मनोऽपि शरीरशरीरिभावं न व्यवहरन्ति तथाऽपिश्रमेणाऽवधानेन च गावेषणया जनव्यवहारे परमात्माधीनतो जीवात्मनो लब्धुंशक्ष्यन्ति, यथा हि कश्चित् कञ्चित् स्वाभिप्रेतं स्वीकारयितुं नैकप्रकारैः प्रयतते तत्र चावसाने उत्तरं प्राप्नोति=भवान् सम्यङ् मम हितमुपदिशति परं किं करोमि ? ममान्तरात्मा न स्वीकरोति, इति, तत्र मम जीवात्मनोऽन्तरात्मा परमात्मैव व्यवहृतः।

"जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः। केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति गीतापद्यमर्जुनस्यानुभवप्रकाशनं स्वीकृत्य तत्र परमात्माधीनतां अर्जुनजीवात्मनो द्रक्ष्यन्ति विवेकिनः। धर्मं जानन्नपि अहमात्मा न धर्मे प्रवर्ते, अधर्मं जानन्नपि नाधर्मान्निवर्ते, केनापि ममात्मविलक्षणेन शुध्देन ममात्मस्वरूपशरीराधिष्ठायिना प्रधानेन परमात्मना प्रकाशमानेन यस्मिन् विषये देशे काले उपादेये हेये वा प्रैरिषि तथा प्रवर्ते निवर्ते वा, निखिले प्रवृत्तिनिवृत्ती जीवात्मनः परमात्माधीने इति अर्जुनस्य परमात्मपरायणस्यानुभवप्रकाशनम्। कुरुवंशस्यार्जुनस्य शरीरं तच्छरीरि अर्जुनात्मा शरीरशरीरिणोरभेदात्कुरुवंशस्य, अतो विरोधिसेनायां कुरुवंशीयास्तेषां सम्बन्धिनश्च भ्रातरः पितृव्यः पितामहा गुरवः श्यालाः श्वसुरादयश्च ममतामापन्नाः

कथं हन्तव्या इति युद्धविरोधिविषादः । अग्रे च भगवत्कृपया वासुदेवकृष्णात्मत्वस्य जगत्सृष्टिस्थितिसंहृतिकर्तृत्वस्य च साक्षात्कारे तदधीनञ्च मम सर्वं कार्यम् । ममशरीरमात्रं कुरुवंशीयमर्जुनञ्च । न ममार्जुनस्य शरीरीजीवात्मा कुरुवंशीयः, न मम जीवात्मन एव सैनिका भ्रातृप्रभृतयः, एतादृशाः बहवः सम्बन्धिनः, शरीरत्वेन च सर्वे जडाजीवाश्च समाना न केऽपि शत्रवो मित्राणि वा, शरीरञ्च साम्प्रतं कुरुवंशीयं क्षत्रियम् तदध्यक्षजीवशरीराध्यक्षपरमात्मादेशानुसारं शरीरेण कार्यसम्पादनीयम् , आदेशश्च "स्वकर्मणासभ्यर्च्य" गीतानुसारं स्वं कर्म भगवत्पूजा, तादृश्या पूजया च 'स्वे स्वे कर्मण्यभिरतः' इत्यादि गीतया सिद्धिलाभः । तथा च भगवदाज्ञानुसारं युद्धमेव साम्प्रतं सिद्धिसाधकं साधकस्यसाम्प्रतम् , इति दर्शनानुसारिदर्शनस्वारस्यम् ।

एवं श्रीमद्‌भागवतचतुर्थस्कन्धनवामाध्यायषाष्टं पद्यं श्रीध्रुवस्तुतिरूपंध्रुवस्यानुभवप्रकाशनं पश्यन्तु पठकाः—

"योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्चहस्तचरणश्रवणत्वगादिन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥१॥

योभगवान् अन्तः प्रविश्य प्रसुप्ताम् इमां मम वाचम् अन्यान् हस्त चरण श्रवणत्वगादीन् प्राणान् च संजीवयति । स्वस्य परमात्मनः धाम शरीरं ध्रुवस्य जीवात्मा संजीवयति वाग्हस्त चरणादिजागरणव्यापारेण प्रयोज्य कर्ता, प्रयोजककर्ता च भगवान् संजीवयति । जीवस्य सर्वे व्यापाराजीवनञ्च शेषिपरमेश्वरायत्त इति स्फुटं निर्दिष्टमत्र भगवद्वरप्रसादात् प्राक्तनमिदं ध्रुवस्य स्वानुभववर्णनम् । तादृशानुभवो ध्रुवस्य प्राग्जन्म सुकृतस्य तदानीन्तन तन्मय समाधे र्वा फलमस्तु । जीवकार्यस्येश्वराधीनत्वेऽनुभवः प्रमाणम् । अन्तर्यामि ब्राह्मणदिशा प्रागुक्तरीत्या समेषां वैदिकदर्शनानां मते कार्यमात्रं प्रति परमेश्वरस्य कारणता अञ्जसासिद्‌ध्यति, जीवकार्यं प्रति अपि यद्यपि परमात्मनः कारणता सिद्धा तथापि विशिष्टाद्वैतमते शरीर शरीरि—शेष शेषि भावाभ्यां यथा तथा न सिद्‌ध्यति, अन्येषां मते एक कार्यं प्रति जीवस्तत्कर्मेश्वरश्च कारणं परस्परसहकारिकारणमिति जायते विशिष्टाद्वैतदर्शने जीवस्तत्कर्मजीवशरीरं प्रकृतिः प्राकृतिकं सर्वमीश्वराधीनमितिसर्वत्र परमात्मनः प्राधान्यमनिवार्यं जायते । उक्तपक्षोधात्वर्थसंग्रहीत कर्मत्वेन जीवतेरकर्मकत्वं नाङ्गीकृत्य प्रयोज्यकर्त्तरि तृतीया । जीवति प्राणिति प्राणचलनानुकूलयत्नार्थकः सकर्मकः संजीवतिः । सुषुप्तौ मूर्च्छादौ च ज्ञानाभावेऽपि प्राणसञ्चारः परमेश्वरस्यजन्यजीवयत्नजन्यः । तादृशप्राणसञ्चाराय नैयायिका जीवनयोनियत्नज्ञानाभावाय च मनसा पुरीतति नाड्यादौ प्रवेशं प्रणदन्ति, वेदान्तिनोऽपि प्राणानां स्वातन्त्र्यं बुद्धेः स्वाप इत्यादिनैकविधां कल्पयन्ति । सुषुप्तेरपसारणन्तु अवशिष्यते एव, ईश्वरसहायमन्तरा जडेनादृष्टेन व्यवस्थापनमीश्वरमङ्गीकुर्वाणानां न शोभते । अत ईश्वरजन्यजीवान्ययत्नेनै व व्यवस्था समीचीना । 'येन जातानिजीवन्ति' प्रभृतयः श्रुतयः उद्‌घोषयन्ति । जीवनं स्थितिः स्थिति-

कर्तृत्वं परमेश्वरे मन्यत एव तदेव जीवनं कर्तृत्वम् 'अशरीरं वाव सन्तं न प्रियप्रिये स्पृशतः' इत्यादिश्रुतिसूचितप्रियाप्रियस्पर्शित्वसूचितो जीवात्मनः शरीरशरीरिभावो मृतेन शरीरेण विनश्यति वास्ति। सर्वत्रव्यापिना परमात्माना साक्षात्सम्बन्ध सत्त्वेऽपि तत्र ज़ीवयत्याभावान्न जीवनव्यवहारः, परमात्मनस्तु प्रियाप्रिययोरभावान्न तत्स्पर्शित्वं शरीरत्वनियामकम्।

अत्र नैयायिका आहुः—शरीरेन्द्रियात्मनां युगपदेकेनेन्द्रियेण प्रत्यक्षाभावात्तेषां भेदस्यापि प्रत्यक्षाभावेन अहंस्थूलः काणो ज्ञाता भोक्तेत्यादयस्तेषामभेदप्रत्यक्षभ्रमा अनादिकालात् प्रचलन्ति। तादृशभ्रमवशाद्दृढा वासना नानादोषानुत्पाद्य शरीरेन्द्रियवशजातान् प्रपञ्चान् आत्मनि आरोपयति कलुषयति च, आन्वीक्षिकी सहायश्च साधक उपनिषदां श्रवणेन तेषां भेदप्रभांदृढीकृत्य शुद्धात्मनश्चिरं निदिध्यासनेन स्वाभाविककर्तृत्वभोक्तृत्वरहितमात्मानं प्रत्यक्षीकुर्वाणो मुच्यत इति।

वेदान्तिनश्च—प्रकाशैकस्वरूपे चिदात्मनि ब्रह्मणि जडानां सर्वेषामनादिमायावशात्परस्परमध्यासात्सर्वं जगद्विवेकहीनं मिश्रितं जडचेतनात्मकं वर्तते, स्थूलोऽहं गौरश्चिन्तयामि करोमि भुञ्जे चेत्यादयो युगपदेकस्मिन् समानो जडचेतनव्यवहारः। साधकोमुमुक्षुर्विधिपूर्वकमुपनिषदां श्रवणेन जीवेश्वरात्मनोरभेदतात्पर्यं निर्णीय लौकिकवैदिकतर्कयुक्तिभ्यस्तयोरभेदप्रमां दृढीकृत्य चिरं निदिध्यासनेन तमेवापरोक्षां विधाय जडचेतनयोरभेदप्रत्यक्षे वासनाकार्यसहिता ब्रह्मनिष्ठा माया निवर्तते। स्वाभाविको ब्रह्मभावो जीवस्य प्रकटो भवति मुक्त इति व्यवह्रियते च इति वर्णयन्ति।

तत्र अध्यस्तस्य मिथ्यात्वापत्या वहवस्तमध्यासं न रोचयन्ते। यथाप्रसिद्धन्यायाचार्यश्रीमदुदयनाचार्यस्य आत्मतत्त्वविवेके बाह्यार्थभङ्गवादावसाने लेखोऽयम्—तस्मात् तथ्यमेव विश्वम्, मन्दप्रयोजनत्वात्तु सत्वरैर्मुमुक्षुभिरुपेक्षितमिति युक्तमुत्पश्यामः। तर्हिनैयायिकानां जगत्परिरक्षणे कोऽयमभिनिवेशातिशय इति चेत् सहसैव तदुपेक्षायां न्यायाभासावकाशे प्रमाणमात्रविप्लवो भवेत्। तथा च न्यायरुचिः प्रेक्षावान् न तत्त्वमधिगच्छेदिति भियेति। तथ्यमेव विश्वम्=संसारः सत्य एव न संवृत्ति सन् मिथ्या वा। धर्मार्थकामपुरुपार्थत्रयसाधकोऽपि सत्यः संसारः परमपुरुषार्थेमोक्षेऽनुपयुक्तत्वान् मन्दप्रयोजनः संसारः। सत्वरैः मुमुक्षुभिः संसारिणःकृते संसारो वयञ्च मोक्षमात्रमभीप्सामः, गुरुः शिष्यः शास्त्राणि मुमुक्षवः, आश्रमः स्थानं भिक्षा इत्यादिसर्वं संसारः। इत्यादिकं नावहितवन्तोऽत्र एव सत्वरा, अन्यथा शास्त्राणामपि संसारसत्यत्वेतात्पर्यमपाप्नुयुः। वैराग्यदिशोपेक्षा अन्यविधी युक्ता, उपयोगदिशा संसारोपेक्षा त्वरामयुक्ता। जगत्परीरक्षणे—बौद्धानामनात्मवादस्य क्षणिकवादश्य विज्ञानमात्रवादादेर्मुमुक्षूणाञ्च मिथ्यात्ववादादेश्च शास्त्रसम्बन्धितैर्न्यायैः खण्डनद्वारा समेषां पदार्थानां कार्यकारणफलादिभिः पूर्णव्याख्यानम्। न्यायाभासाऽवकाशे=निर्णीयते यैस्ते न्यायाः प्रत्यक्षानुमानागमादिं प्रमाणानि, तेषामाभासा न तदपि तदिवाभासमानानि अप्रत्यक्षाण्यपि प्रत्यक्षवल्लोके अवकाशं लभेरन्। एवमनुमानादयोऽपि। आगमप्रमाणमपि लोकक्रीडाभवेत्।

अत एव प्रमाणमात्र विप्लवः । अगमाः शब्दाः व्युत्पत्तिमपेक्षमाणा अर्थबोधकाः, व्युत्पत्तयश्च बहुविधलोकव्यवहारानुभवाधीनान्वयव्यतिरेकव्यभिचारविधुरकार्यकारणभावावधारणमुखालोकस्य जगत एवासत्यत्वे कुत्रात्मानं लभेरन् ? यथा अधुनैव भारते बहुविधा आगमाः वेदस्यापि बहुविधानि भारतीयानि विदेशीयानि च व्याख्यानानि । भारतीयैराद्रियन्ते च । विदेशीयव्याख्यानादेव 'आर्या उत्तरीय ध्रुवप्रदेशादनेन मार्गेण शनैः शनैर्भारते समायाताः । इति भारतीयानामितिहासे प्रसिद्धः । अहमपि तथैव मध्यमायां पठितः । यदा श्री जवाहरलाल नेहरुः काँग्रेसाध्यक्षः सन् "अंग्रेजा भारतं त्यजत" इत्युद्घोषयत् तदा अंग्रेजा अलिखन्=भारतीयानामेषमिथ्याभिमानः । आर्याहि उत्तर ध्रुवादागता न तेषां भारतदेशः । तदा भारतीयानां दृष्टिरुन्मिलिता इतिहासश्च परावर्तितः । इतो विस्तरेणैतन्मम व्याकरणनिबन्धमालायां हिन्द्यां संस्कृते च प्राप्यते । 'यस्तर्केणानु सन्धत्ते स धर्मं (वेदार्थं) वेदनेतरः' इति मनुस्मृतिरपि वेदार्थापगमे तर्कं सहायंब्रूते । एवं प्रमाणानां विप्लवे तत्त्वनिर्णयस्योपायाभावाद् योमन्दबुद्धिः यथा केनचिदुक्तं लिखितं वा प्राप्यैवतुस्येत् , परं यदुहापोहशङ्कासमाधानसमर्थबुद्धिमान् प्रेक्षांवान् वस्तुनिर्णयेप्रमाणान्वेषीप्रमाणाभावेन कथं तत्वं जानीयात तुष्येच्च यतो हि प्रेक्षावान् न्यायरुचिः—सत्प्रामाणान्वेषी भवति । अतस्तत्त्वजिज्ञासुभिः संसारसत्यत्वमवश्यमभ्युपेयम् । यतः प्रमाणस्वरूपपरीक्षणक्षेत्रं संसारः । तत्र वैदिकं विशिष्टाद्वैतदर्शनन्तुनिर्दोषशङ्कयाऽकलङ्कितेन वेदेन प्रतिपादितां साक्षात्परमेश्वरकृतां जगत्सृष्टिं न सत्यामेव किन्तु "तत्सृष्ट्वा तदेवानुप्राविशत् " इत्यादिश्रुतिरीत्याभगवतः शरीरं शरीरिणो भगवतः स्थानं मन्दिरं मूर्तिमिव वा मनुते । चिता चेतनेन अचिता प्रकृत्याजडेन च विशिष्टोभगवान् सदा सर्वत्रावस्थितिर्भगवतः, अवस्थितिरपि न केवलं शरीरित्वेन अपितु शेषित्वेन प्राधान्येन, कथमन्यथास्थितिकर्तृत्वं भगवतः । जडस्यापि विशेषकारणं विना उच्छेदोन कार्यः । भगवन्मन्दिरमूर्तिरूपाश्रीयाः न क्लेशनीया हिंसनीयाः अन्यथा श्रीराममन्दिरमूर्तिदूषणस्यभागी भवेत् । सृष्टिनियमपालनं जीवानां समादरणं भगवदादेशभूतशास्त्रानुसाराचरतां भगवत्पूजेति शिक्षयति ।

जीवात्मशरीरयोः सम्बन्धविशेषेमुधादर्शनान्तरीया भेदाभेदयोः क्लिश्यन्ति । प्रागूवर्णितं श्रुतिसमर्थितं भेदाभेदविलक्षणं शरीरशरीरिभावमेव कथन्न समर्थयन्ति, भिन्नयोः शरीरशरीरिणोरभेदभ्रमकेचन ब्रुवते अन्ये अभ्यासवशाद् भेदप्रतितिं सम्पादयन्ति । वस्तुतो भेदज्ञानं न जायत एता वतैवाभेद प्रतीतेः प्रवादाः । अन्यसम्बन्धबोधकशब्दान्तरव्युत्पत्त्या नात्र निर्वाहस्तेन शरीरशरीरिभावः सम्बन्धान्तरंसिद्ध्यति । शरीरमात्रे शक्तौ चैत्रचेतयते इति नोपपद्यते, आत्मामात्रे शक्तौ चैत्रः स्थूलः इत्यत्र बाधः, शरीरविशिष्टे शक्तौ चैत्रः स्थूल इत्यत्रैकदेशान्वयापत्तिः । खण्डशः शक्तिवादे स्थूलश्चैत्रश्चेतयत इत्यत्र उभयोर्विशेष्यतयोपस्थितयो कः सम्बन्ध इति प्रश्नः स्यात् । शरीरशरीरिभावस्तु सर्वदोभयोः क्वचिच्छरीरस्य क्वचिदात्मनश्च विशेस्यतया भानमित्यन्यसम्बन्धवैलक्षण्यम् ।

'तमेवंविदित्वाति मृत्युमेति' प्रभृतिवेदानुसारमुदयनाचार्याः 'स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः। यदुपास्तिमसावत्र परमात्मानिरुप्यते' इत्यादिना परमात्मोपासनामपवर्गमार्गं वदन्ति, 'आत्मावाऽरेद्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितष्यः' इतिश्रुतिः सर्वत्रप्रसिद्धा तेनापि व्याख्याता अन्यत्र शुद्धात्मोपासना वर्णिता च। अन्येषां मते उभयोः प्राधान्ये विकल्पापत्तिः, अङ्गाङ्गिभावे कलहः। अस्मिन् दर्शने न क्वचिद्विरोधः। सर्वत्र परमात्मैवोपास्यः। पूर्ववर्णितरीत्या सर्वे शब्दाः प्राधान्येन परमात्मबोधकाः। तथा च आत्मशब्देन जीवात्मशेषीपरमात्मैव प्रतिपादितः। जीवात्मा न स्वतन्त्रः परमात्मशेषतयैव कार्यकारी नाना च तस्योपासनया किं भवेत् ?

जगत् तत्कारणञ्च

तत्र साङ्ख्यम्—सुखदुःखमोहात्मकंस्वप्रकाशकचेतनसम्बन्धिनं जगत्, तत् कारणञ्चतादृशमेव अविविक्तचेतनाविशिष्टं प्रधानप्रकृत्यपरनामकम्, उपादानोपादेययोरभेदात् जगत्सदृशमेवउपादानम्। यावत् जडप्रकृतिचेतनपुरुषयोर्विवेको न ख्यायते तावत्करणमेकम्, एकमेव। अतएव श्रीकालिदास ईश्वरस्तुतौ "त्वमेव प्रकृतिमाहुः पुरुषार्थप्रवर्तनीम्। तद्दर्शिनमुदासीनं त्वमेव पुरुषं विदुः" आह। "सदेवसोम्य इदमग्र आसीत्" इत्यादि श्रुतौ तादृशमेव परमात्मानं पश्यति च एकत्रैव पुरुषार्थप्रवर्तित्वं सङ्गतत्वं द्रष्टृत्वञ्च उपलभ्यते। 'ऐतदात्म्यमिदं सर्वम्' इत्यादि श्रुत्यातस्यैवात्मपदेन व्यवहारः। तस्यैव 'एतस्मादात्मनः आकाशः सम्भूतः' इत्यादिसृष्टिश्रुतौ निर्देशः। "तत्त्वमसिश्वेतकेतो" बुद्धिप्रकाशरूपोजीवात्मप्रकृतिपुरुषरूपं कारणं कारणं तत्पदार्थः। "एकेन मृत् पिण्डेन ज्ञातेन—मृत्तिकेत्येव सत्यमित्यन्तश्रुत्यासामान्यज्ञानेन विशेषाणां ज्ञानं वर्णितम्। तत्र सत्यशब्देन अनुवर्तमानत्वम्, असत्यशब्देन विशेषाणां व्यावर्तमानत्वमभिप्रेतम्। चैतन्याविष्टाप्रकृतिः परिणामस्वभावा कर्तृत्ववती क्रियां करोति, क्रियाजातः पापपुण्यरूपः प्रकृतिरूपायां बुद्धौतत्कृतः परिणामः। कार्यविशेषोऽपि तत्रैव। क्रियापापपुण्यतत्फलशून्योऽसङ्गः पुरुषः केवलं पश्यति—तेषां प्रकाशः, तावतैव वराकः पुरुषो भोक्ता भण्यते बद्धश्चगीयते। जातायां विवेकख्यातौ जडचेतनयोः भेदे प्रत्यक्षेजाते बुद्धेश्चैनन्यावेशो विनश्यति। असङ्गपुरुषस्य अर्थाभावात्पुरुषार्थप्रवर्तनंविरमति निरर्थानि क्रिया च बुद्धिः स्वप्रकृतौलीयते, तत्पुरुषार्थप्रकृतिपरिणामानि भवन्ति। स्वभोगोपयोगिनः पदार्थान् पश्यति पुरुषः। स्वभावेनमुक्तस्तिष्ठतीति। बहुभ्यो नेयं रोचते सांख्यप्रक्रिया—चैतन्यप्रभावातिरिक्तो बुद्धौ चैतन्यावेशो न कश्चित्पदार्थः सिद्ध्यति, चैतन्यप्रभावरूपत्वे चैतन्यस्य कर्तृत्वमायाति, विवेकख्यातिप्रकृतौपुरुषो वा। प्रथमे वृत्तिरूपाप्रकाशस्वरूपा वा, आद्ये जडत्वान्ख्यातिविवेकस्य प्रकाशो व्यर्था ख्यातिः, जडे प्रकाशधर्माऽसंभवात् न द्वितीयम्। असङ्गोऽनाधेयातिशये पुरुषे ख्यातिरुत्पादासंभवः। प्रकृतिनिष्ठायाः पुरुषेप्रतिबिम्ब इतिं चेत् प्रतिबिम्बितं मुखं न दर्पणस्य किन्तु चैत्रस्यैव भवति।

अत एव विशिष्टाद्वैतदर्शनेन प्रकृतिपरमात्मनो वैंदिकशरीरशरीरिभावः सम्वन्धः समाद्रियते, शरीरियत्वेन शरीरे चेष्टा लोक प्रसिद्धा । प्रकृतौस्वभाविकपरिणामकिया स्वीकारे विवेकख्यातावपि मुक्तिदशायामपि सांख्यानुसारं विभुप्रकृतिपुरुषयोः सम्बन्धस्य स्वच्छंन्दतया परस्परच्छायाया अपरिहारात् पुरुषे भोग एवविराजेत न मोक्षस्यावसरः । परमेश्वरयत्नेन प्रकृतेर्जडवर्गंपरिणामेनोपादानत्वयोग्यता चेतनस्य शरीरिणो विकाराभावादपरिणामेन तादृशोपादानत्वंनास्ति, उपादानगोचरा परोक्षचिकीर्षा कृतिमत्वरूपं स्वतन्त्रकर्तृत्वं जडप्रकृत्तौ न संभवति । अचित्प्रकृतिहिशिष्टंचोभयं सिद्ध्यति । तेन उपादानबोधकानि कर्तृत्वबोधकानि च वैदिकवाक्यानि विशिष्टे सुखं समनुभवन्ति ।

न्यायनये परमेश्वरस्य कर्तृत्वे उपादानता परिणामाभावेन न सिद्ध्यति 'एकेन मृत्पिण्डेन ज्ञातेन' इत्यादिना । सामान्यज्ञानेनसामान्यलक्षणासहायेन विशेषाणां ज्ञानसमर्थनेऽपि मृत्तिकोपलक्षित सर्वोपादानस्य सत्यताबोधकं मृत्तिकेत्येव सत्यमितिपरमेश्वरं न स्पृसति। कार्यमात्रं प्रतीश्वरस्य अदृष्टस्य च द्वेधाकारत्वेगौरवम् । चेतन जीवस्वरूपशरीरविशिष्टस्य परमात्मनः कारणत्वे सर्वं संगृह्यते ।

अचेतनंजीवकर्मकार्यमात्रं प्रति कारणं ब्रुवाणाः कर्मणैव सर्वं व्यवस्थापयन्तो मीमांसकाः कर्म द्वाराजीवस्य चेतनस्यापि चरणतां न पश्यन्ति । मुधैव निरीश्वरकलङ्कं विभ्रति । तथा च सूक्ष्मचिदचिद्विशिस्टोरामः सृष्टिप्राग्दशायां सृष्टिदशायां स एव श्रीरामःस्थूलचिदचिद् विशिष्टस्तयोर्द्वैतं न सम्भवतीति, अद्वैतः । विशिष्टाद्वैतदर्शनं जडे चेतने च सर्वदा श्रीरामः तिष्ठतीति उपदिशति द्वेषं विद्रावयति स सौहार्दञ्च सृजति । तेन श्रीराममयस्य परिवारस्य जनपदस्य देशस्य च अद्वैतंवितरतीति ।

विश्वनाथं जगद्व्याप्तं श्रीरामं प्रणमाम्यहम् । विरमामि महाशास्त्राद् विशिष्टाद्वैत दर्शनात् ।

अर्चिरादिमार्गविवेकः

(गीता ८-२३ की श्रीरघुवरीटीका)

जगद्गुरु श्रीरामानन्दाचार्य रघुवराचार्यजी वेदान्तकेसरी

यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः । प्रयातायान्तितंकालं वक्ष्यामिभरतर्षभ ?।।

पूर्वोक्तपरेशोपासनयायोगधारणया च निर्धूतसमस्तकर्मवासना ये स्वात्मशरीरकं परम्ब्रह्मोपासते ये च ब्रह्मात्मकस्वात्मानमुपासते तेऽनुक्रमेण महापुरुषसायुज्यमक्षरधाम्निपरमगतिञ्चसम्प्राप्य पुनरावृत्तिरहिता भवन्ति ये चान्ये वर्णाश्रमधर्माभिमानिनःकर्मफलानुसन्धानतत्परास्तेत्वनिशमस्मिन् संसृतिचक्रेसमावर्तन्त इत्यनयोर्द्वयोरपिफलभेदात् सृतिभेदोऽप्यावश्यकः । सृतिरत्रकरणव्युत्पत्यामार्गवाचिका । तत्र येन मार्गेणसमुपासितभगवच्चरणाब्रह्मात्मकत्वेनप्रत्यगात्मोपासकाश्चप्रयान्ति स

देवयानपदवाच्योऽर्चिरादिमार्गः प्राथमिकोद्वितीयश्चपितृयाणपदवाच्योधूममार्गःकर्मिणांभूयोभूयः संसृतिसम्पादकः । तत्राऽस्मिन्नध्यात्म शास्त्रेऽस्यपितृयाणस्योपदेशस्त्वर्चिरादिसृतेर्माहात्म्यातिशयद्योतनायाभिसंहितफलकर्मानुष्ठायिनांपितृयाणेनासकृत्संसारगर्तपात इति मुमुक्षुभिर्दूरतः परिहरणीयोऽपन्था इत्यावेदयितुं वा समादृतः । तदेवंसफलंमार्गद्वयंविवक्षुरादौतत्प्रतिजानीते **यत्रेति** । हे भरतर्षभ ? प्राणोत्क्रान्तेरनन्तरंयत्रकालेतत्तदातिवाहिकदेवताभिर्नीयमानेमार्गेप्रयातायोगिनोब्रह्मानुध्यानयोगिनः सद्विद्यानुष्ठानयोगादनावृत्तिमेवयान्ति पुनरावृत्तिं नैवप्राप्नुवन्ति । इष्टापूर्तादिकर्मानुष्ठानयोगिनस्त्वावृत्तिमेव प्राप्नुवन्ति, अभिसंहितफलकर्मानुष्ठानयोगात् तं देवयानाख्यं पितृयाणाख्यं च कालं तत्तत्कालाभिमानिनीभिरातिवाहिकदेवताभिर्नीयमानंपन्थानं वक्ष्यामि । यत्त्वत्र मधुसूदनेन "यद्यपि देवयानेऽपि पथिप्रयाताः पुनरावर्त्तन्ते" इत्युक्तमाब्रह्मभुवनाल्लोकाः पुनरावर्तिन इत्यत्रतथापिपितृयाणेपथिगता आवर्तन्त एव न केऽपि तत्र क्रममुक्तिभाजः । देवयानेपथिगतास्तुयद्यपिकेचिदावर्तन्तेप्रतीकोपासकास्तड़िल्लोकपर्यन्तंगताहिरण्यगर्भपर्य्यन्तममानवपुरुषनीताअपि पञ्चाग्निविद्याद्युपासका अतत्क्रतवोभोगान्तेनिवर्तन्त एव तथापि दहराद्युपासकाः क्रमेणमुच्यन्तेभोगान्त इति न सर्व एवावर्तन्ते । इत्याद्युपन्यस्तं तदयुक्तमुपनिषद्गीताब्रह्मसूत्रविरुद्धत्वात् ।

तथाहि–छान्दोग्येस्थलद्वयेऽर्चिरादिगतिः श्रूयते । तत्र चतुर्थेऽध्याये 'अर्चिषोऽहरह्न आपूर्यमाणपक्षमित्युपक्रम्य "स एनान् ब्रह्मगमयत्येषदेवपथोब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तंनावर्तन्ते" (छा. ४।१५।६) इति स्पष्टमेवाऽनावृत्तिराम्नाता । पञ्चमेऽप्यध्याये—तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धातपइत्युपासतेतेऽर्चिषमभिसम्भवन्ति.' इत्यारभ्यचन्द्रमसोविद्युतंतत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येषदेवयानःपन्था इति (छा. ५।१०।१)इत्याम्नायते । अत्रचन्द्रलोकादूर्ध्वंविद्युल्लोकप्राप्तिस्ततोऽत्राश्रवणेऽपिश्रुत्यन्तरेश्रुतत्वाद्वरुणादिलोकानाम्प्राप्तिः 'तडितोऽधिवरुणःसम्बन्धात् (ब्र. सू. ४।३।३) इति न्यायेन । अन्येषाञ्च 'आगन्तूकानामन्तेनिवेश, इति न्यायात्तदूर्ध्वंनिवेशः । तथा चात्रापि 'एनान् ब्रह्मगमयति, इत्यविशिष्टश्रवणादपुनरावृत्तिः स्पष्टमेवप्रदर्शिता । नपुंसकब्रह्मपदं परस्मिन्नेव ब्रह्मणिनिरूढमितिमुख्यार्थंपरिहाय न गौणोऽर्थः शक्योगृहीतुमतोब्रह्मप्राप्तिरपुनरावृत्तिलक्षणैवात्राभिप्रेता । एवं छान्दोग्येऽष्टमप्रपाठकेऽपिश्रूयये 'एषसम्प्रसादोऽस्माच्छरीरात् समुत्थायपरंज्योतिरुप सम्पद्यस्वेनरूपेणाभिनिष्पद्यते, (छा.——८।१२।३।) अत्रशरीरात्समुत्थायेतिमूर्धन्यनाड्योत्क्रम्यदेवयानेनोद्गमनाभिधानम् । तयोर्ध्वमायन्नमृतत्वमेतीतिविवरणश्रुतावायन्नितिशतृप्रत्ययेनार्चिरादिमार्गप्रस्थितीनाममृतत्वप्राप्तेर्मध्येलोकविशेषचिरकालस्थितिलक्षणव्यवधानराहित्यंप्रतिपादयता 'एषसम्प्रसाद, इतिमूलश्रुतौसमुत्थायेतिल्यप्प्रत्ययार्थस्यविवक्षितत्वादुक्तश्रतेरर्चिरादिमार्गप्रस्थितानामव्यवधानेनामृतत्वप्राप्तिप्रतिपादकत्वंस्पष्टमेवातोऽपि न पुनरावृत्तिः । एवं वाजसनेयकेपञ्चमषष्ठयोः प्रपाठकयोः "स लोकमागच्छत्यशोकमहिमं तस्मिन् वसतिशाश्वतीः समाः, इति । "तान् वैद्युतान् पुरुषोऽमा-

नव एत्यब्रह्मलोकान् गमयति तेषुब्रह्मलोकेषु पराःपरोवतोवसन्तितेषां न पुनरावृत्तिः'' (बृ६।२।१५) अत्रापिस्पष्टमेवापुनरावृत्तिराम्नाता । अत्र ब्रह्मलोकानित्यदितिः पाशानितिवहुवचनमुपपत्त्याकर्मधारय समासमाश्रित्यार्थस्यसंगतिरथवाऽप्राकृतलोकानामपिवहूनांप्रमाणप्रतिपन्नतया तत्पुरुषसमासोऽपियुक्त एव। ननूपनिषत्स्वेवमुण्डके 'ते ब्रह्मलोके तु परान्तकालेपरामृतात् परिमुच्यन्ति सर्वे, (मु३।२।६) इति वचनादर्चिरादिमार्गेणकार्यब्रह्मलोकगतिरत्रगम्यते। अत एव छान्दोग्ये 'प्रजापतेः सभांवेश्मप्रपद्ये' इत्यष्टमाध्यायीयवाक्यमपि संगच्छते। अत एव च मुण्डकश्रुतिः समानार्थाभिधायिनी 'ब्रह्मणासहतेसर्वेसम्प्राप्तेप्रतिसंचरे। परस्यान्तेकृतात्मानःप्रविशन्तिपरंपदम्, इति स्मृतिरपिसंगच्छते। तथा च ये सगुणब्रह्मोपासकास्तेऽर्चिरादिनाब्रह्मलोकंप्रयान्ति। तत्रापि ये पञ्चाग्निविद्योपासीनस्तेपुनरावर्तन्ते प्रतीकोपासकास्तुदेवयानेनगताअपितडिल्लोकादेवावर्तन्ते न तेषां ब्रह्मलोकावाप्तिः। तदुक्तंभामत्यां "उत्तरोत्तरभूयस्त्वादब्रह्मक्रतुभावतः। प्रतीकोपासकान्ब्रह्मलोकंनामानवोनयेदिति।'' ब्रह्मोपासकास्तु परविद्यासामर्थ्याद् ब्रह्मलोकंसम्प्राप्यतत्रोत्पन्नविज्ञानाहिरण्यगर्भेणसहपरमंविशुद्धंविष्णोः पदंप्रयान्तीत्येषातेषांक्रममुक्तिरुपपद्यते। अत एव कार्यात्ययेतदध्यक्षेणसहातः परमभिधानात्, (ब्र. सू. ४।३।९) इति ब्रह्मसूत्रंसंगच्छते। तस्मात्त एव नावर्त्तन्त इति चेन्न, अज्ञातशास्त्ररहस्यानामिदं चोद्यम्। तथाहि—उदाहृतश्रुतिस्मृत्योरेकविषयतायाअसम्भवात्। ते ब्रह्मलोकेत्वित्यादिश्रुतेः प्रकरणानुरोधादयमर्थः। अस्याः खण्डिकायाः पूर्वार्धे—"वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः" (मु–३।२।६) एवमाम्नायते। निर्मलान्तः करणामुमुक्षवः इहैवलोकेसद्गुरुमुपसम्पद्यवेदान्तविज्ञानेनसुनिश्चितार्थाः सन्तोऽनभिसंहितकर्मफला अतएवयत्नशीलाः शुद्धस्वभावाः सम्यग्ब्रह्मविद्योद्भासितान्तः करणास्तेसर्वेब्रह्मलोकेब्रह्मैवलोकोब्रह्मलोकोनिषादस्थपतिन्यायेनकर्मधारयसमास एवात्राभिप्रेतस्तस्मिन्नुपास्येपरब्रह्मणिवर्तमानाः परान्तकालेपरोऽन्तिमोयोन्तः कालस्तस्मिन्प्रारब्धकर्मभोगहेतुप्राकृतचरमदेहावसानसमयेपरामृतात्। परममृतंप्राप्यपरिमुच्यन्ति सर्वस्माद् बन्धाद्विमुच्यन्त इति। नह्यत्रकार्यब्रह्मलोकमासाद्य तत्र विद्यामभ्यस्यपरान्तकालेब्रह्मणासहमोक्षमाप्नुवन्तीत्ययमर्थःसम्भवति पूर्वार्धपरार्धवाक्यविरुद्धत्वात् संदर्भविरुद्धत्वाच्च। सन्दर्भोऽयंपरस्यब्रह्मणः प्राप्तेरेव। यतः प्रथममुण्डकेद्वितीयखण्ड एकादशखण्डिकाया तपः श्रद्धे ये ह्युपवसन्त्यरण्येशान्ताविद्वांसोभैक्षचर्याचरन्तः। सूर्यद्वारेण ते विरजाः प्रयान्ति यत्राऽमृतस्सपुरुषोह्यव्ययात्मा, इत्यस्यांसूर्योपलक्षितार्चिरादिमार्गगामिनांब्रह्मविदांह्यमृतत्वाव्ययात्मत्वविशेषितपरमपुरुषतल्लोकावेवप्राप्यतयानिर्दिष्टौ न तु द्विपरार्धावसानकालविनाशिहिरण्यगर्भतल्लोकावितिप्रस्फुटमेवाभिधीयते। इतः स्मृतिस्त्वर्थान्तरमेवप्रतिपादयति सा चेहलोकसमभ्यस्तविद्यस्यदेवयानपथाप्रस्थितस्यविदुषोविषये न किमप्यभिधत्तेऽपि तु पुण्यकर्मानुष्ठानेनप्रजापतिलोकमुपेतानामविदुषां तदुपर्यपिबादरायण, इति न्यायेनब्रह्मलोकएवाभ्यस्तविद्यानांपरमपदप्राप्तिप्रकारमेव। तदर्थश्च ते सर्वेपुरुषविशेषाःस्वोपार्जितपुण्यकर्मणाब्रह्मणाप्रजापतिनासहकृतात्मानः ब्रह्मलोकएवाधिगतविद्या-

स्सन्तः परस्यप्रजापतेरायुषोऽन्तेप्रतिसंचरेमहाप्रलयेसम्प्राप्तेसतिपरंपदं प्रविशन्ति, इति । तस्माच्छ्रुतिस्मृत्योरैक्यार्थमेव नास्ति । श्रुतिर्विदुषांप्रारब्धशरीरावसानेऽर्चिरादिनापरब्रह्मप्राप्तिमभिदधाति । स्मृतिस्त्वविदुषांपुण्यकर्मविशेषेणकार्यब्रह्मणः प्रजापतेर्लोकंभेजुषां तत्रैवाधिगतविद्यानांप्रारब्धकर्मफलभूतहिरण्यगर्भसायुज्यानुभवावसानेतेनैवसार्धंमोक्षस्थानप्राप्तिमितिद्वयोर्विविक्तः पन्थाः । ब्रह्मविदः शरीरादुच्चिक्रमिषोमूर्धन्यनाड्यैवोत्क्रम्यार्चिरादिमार्गेणैव गमनेलोकविशेषेचिरकालवासलक्षणव्यवधानमन्तरेणैव परब्रह्मप्राप्तिरितिस्पस्टमुच्यते । छान्दोग्ये षष्ठाध्याये सद्विद्याप्रकरणस्थया 'तस्यतावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये, इति श्रुत्या सद्विद्यानिष्ठस्य मोक्षप्राप्तेर्देहपातमात्रावधिविलम्बप्रतितेरिति । अपि च तयोर्ध्वमायन्नमृतत्वमेतीतिछान्दोग्यश्रुत्युपबृहणभूतया याज्ञवल्क्यस्मृत्या "उर्ध्वमेकस्थित स्तेषां योभित्त्वासूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परांगतिम् ।" (या० स्मृ० ३/१६७) इतिदेवयानपथप्रस्थितानामेकसंवेगेनैव प्रजापतिलोकमप्यतिक्रम्य तत ऊर्ध्वंगत्वा ह्यमृतत्वप्राप्तिस्वरूपपरमगतिप्राप्तिमभिदधत्या निवारितैव तेषां हिरण्यगर्भप्राप्तिर्हिरण्यगर्भलोके च चिरकालं स्थित्वामहता विलम्बेन पश्चादमृतत्वप्राप्तिरित्यपि । तस्मादुपनिषद्भिरुद्धैवैषा कल्पना यदर्चिरादिमार्गेण गतानां चतुर्मुखलोकस्थितिरावश्यकी केषांश्चित्पुनरावृत्तिरपीति नापि गतिशास्त्रेदेवयानेन ब्रह्मलोकमागतानाम्पुनरावृत्तिर्बोध्यते । यदि देवयानमार्गगामिनामावृत्तिर्भगवतोऽभिमता चेत्तर्हि "यत्रकाले त्वनावृत्तिमावृत्तिञ्चैव योगिनः" इतिप्रतिज्ञावाक्यमेव नोच्चारयेन्नत्रोपसंहार एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः, इति स्पस्टतयोपदिशतो गीताशास्त्रविरुद्धमेतद् यद् देवयानेनपथा गतानामप्यावृत्तिरिति । एवमनावृत्तिश्शब्दादनावृत्तिः शब्दाद् (ब्र० सू० ४।४–२२) इति ब्रह्ममिमांसायामप्यनावृत्तिमेव प्रत्यपीपदद्भगवान् बादरायणः । ननु "अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च' (ब्र० सू० ४/३/१४) इति सूत्रेऽप्रतिकालम्बनान् नयतीत्युक्तवान् नामादि, प्रतिकोपासकानां नामानवः पुरुषो विद्युल्लोकादूर्ध्वं नयतीति स्पस्टमेवावगम्यते । किञ्च प्रतीकोपासका हि न परविद्याविदिवप्राधान्येन ब्रह्मोपासका यतस्तेऽर्चिरादिना मार्गेण गत्वा स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते" (छा० ८/१५/१) इत्युक्तं साक्षाद्ब्रह्मविद्योपास कफलं लभेरन् । न पितृयाणतृतीयगतिभ्यां वैषांगमनं सम्भवति । चन्द्रलोकादिप्रापककर्माननुष्ठायित्वादतस्तेषामर्चिरादिमार्गेणैव गतिर्वक्तव्या । अतश्चैते तडिल्लोकपर्यन्तमर्चिरादिमार्गेणैवगच्छन्तीति निश्चीयते । एवं पञ्चाग्निविदामपि कार्यब्रह्मलोकं यावदेवगतिः पुनरावृत्तिश्च । तथा च 'ते य एव मेतद्विदुर्ये चामी अरण्ये श्रद्धांसत्यमुपासते, (बृ० ६/२/१५) इत्यत्राद्येन यच्छब्देन पञ्चाग्निविदोगृह्यन्ते द्वितीयेन यच्छब्देन च तपः सत्यादिपदवाच्यपरब्रह्मविषयकविद्यावन्तः प्रतीकोपासकाश्च सर्वेऽपि गृह्यन्ते । तत्र प्रतीकोपासका देवयानेन गत्वाऽपि विद्युल्लोकंयावद्गत्वा पुनर्निवर्तन्ते । एवं पञ्चाग्निविदामपि ब्रह्मलोकं यावद्गतिः पुनरावृत्तिश्च, उभयोरब्रह्मोपासकत्वात् । तृतीयोपासकास्तु सगुणब्रह्मविद्यावन्त इति तेषामर्चिरादिमार्गेण कार्यब्रह्मलोके गतिस्तत्र चिराय, चतुर्मुखसायुज्यमनु-

भूय तच्छरीरावसाने तेनैव सार्धं द्विपरार्धकाले परब्रह्मधामप्राप्तिः। निर्गुण ब्रह्मानुध्यायिनान्तु न परिच्छिन्ने देशे गतिरुपपद्यते सर्वगतत्वात् ब्रह्मणोऽतस्तन्मुक्तिर्नदेशविशेषे किन्त्विहैव ब्रह्मभूयताप्राप्यते। न तस्य प्राणाउत्क्रामन्ति। इहैव समवलीयन्त इति श्रुतेरितिविवेक इति चेन्न, सूत्रतात्पर्यानवबोधविजृम्भितत्वात्तवाभिप्रायस्य, सूत्रेऽप्रतीकालम्वनान्नयतीतिकथयता वादरायणर्षिणा वादरि जैमिनिमते व्युदस्ते तथाहि प्रतीकालम्बनत्वेन हिरण्यगर्भलक्षणकार्योपासकस्यापि ग्रहणेन तस्यार्चिरादिगतिनिषेधसिद्ध्या वादरिमतमप्रतीकालम्बनत्वेन पंचाग्निविद् ब्रह्मनिष्ठोभयविधोपासकग्रहणं विधाय देवयानेनागतिप्रतिपादनेन जैमिनिमतञ्चेति सूत्रेऽप्रतीकालम्बनान् नयतीत्युक्तम्। अत्रैतत्पदघटकप्रतीकालम्बनाश्चाचिन्मात्रवस्तु। अचिन्मिश्रं वा। ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तूपासनपराः परमप्राप्यादर्वाचीनभूतप्राप्यरूपप्रतीकोपासनपरा इति पिण्डितार्थः। न चैवं परब्रह्मणोऽर्वाचीनप्रकृतिवियुक्तप्रत्यगात्मत्वावलम्बिनां पञ्चाग्निविदामपि प्रतीकालम्बनत्वेनतेषामप्यर्चिरादिनागतिर्नैव सिद्ध्येदितिवाच्यम्। प्रकृतिवियुक्तस्य प्रत्यगात्मस्वरूपस्य परमप्राप्यत्वेन प्रतीकत्वासिद्धेः। अयमभिसन्धिः। यस्मिन् प्राप्ये प्राप्तेऽपि परं तत्त्वं न प्राप्तं भवति पश्चात् प्राप्तव्यतयैव चावशिष्यते। तत्प्रतीकशब्दवाच्यमर्वाचीनप्राप्यम्। यस्मिंश्च प्राप्ते सर्वस्मात् परं तत्त्वंप्राप्तमेव भवति पश्चात् प्राप्तव्यतयाच नावशिष्यते तत्परमप्राप्यम् तत्र परमपुरुषस्य स्वयं परतत्त्वरूपत्वेन तत्प्राप्तेः परतत्त्वप्राप्तिरूपत्वात् तस्य स्वत एव परमप्राप्यत्वम् एवंभगवत्स्वरूपतीरोधायक निःशेषाविद्यानिवृत्त्यनन्तरमेव विशुद्धात्मस्वरूपावाप्तिः स्थानविशेषावाप्तिश्च सम्भवत इति तादृशप्राप्तिसमकालमेव भगवत् प्राप्तिनैयत्येनतयोरपि परमप्राप्यत्वं संम्भवत्येवात एव वणायामपि परमपदव्यपदेश्यत्वं यत्र तत्र श्रुतिस्मृतिषु दृश्यते। यथा 'तद्विष्णोः परमंपदं सदापश्यन्ति सूरयः' इति श्रुत्या परमस्थानमेव परमपदबोध्यं भवति। सर्गस्थित्यन्तकालेषु त्रिधैव सम्प्रवर्तत्ते। गुणप्रवृत्या परमं गुणं तस्यागुणंमहत्। इति प्रकृति विनिर्मुक्तक्षेत्रज्ञ स्वरूपम्। समस्तहेयरहितं विष्णवाख्यं परमंपदमिति स्मृत्या च भगवत्स्वरूपमेव परमपदशब्देन व्यपदिश्यते। तथा च ब्रह्मप्राप्तितदभावयोरेव परमप्राप्यत्वप्रतिकत्वप्रयोजकत्वावगमादचिद्वस्तु तन्मिश्रयोरेवप्रतीकता विश्राम्यति तत्रैवाविद्ययाब्रह्मप्राप्तिप्रतिरोधात्। यथोक्तरीत्याऽविद्याकृततिरोधानविगमेन ब्रह्मप्राप्तिगर्भत्वप्राप्तिकत्वात्। प्रकृतिवियुक्तप्रत्यगात्मस्वरूपन्तु परमप्राप्यमेवेतितत्त्वम्। अत एव गीताशास्त्रे तमाहुः परमांगतिमिति परमगतिशब्देनैतदेव प्रकृतिविनिर्मुक्तप्रत्यगात्मस्वरूपं निर्दिष्टम्। तथा च परान्महत् परममितिविग्रहे पृषोदरादिवत् तत्तदवयवलोपमाश्रित्य व्युत्पादनीयेन परमशब्देन सह प्राप्य शद्बस्य कर्मधारय समासमाश्रित्यापरत्वेनाभिमतात् कस्माच्चित्प्राप्यात् परत्वेनाभिमतं यत्प्राप्यं तस्मादुत्कृष्टप्राप्यं परमप्राप्य शब्देन बोध्यते। एवञ्च प्रकृतिपदवाच्याचित्तत्वात् परंयदचिन्मिश्रचित्तत्वरूपंप्राप्यं तस्मादुत्कृष्टत्वलक्षणं परमप्राप्यत्वं स्वोत्कृष्टप्राप्योत्कृष्टत्वसम्बन्धेन प्राप्यविशिष्टप्राप्यत्वपर्यवसितं विशुद्धक्षेत्रज्ञपरमात्मलक्षणप्राप्यद्वयसाधारणम्। परमात्मप्रकृतिविनिर्मुक्त प्रत्यगात्मस्वरूप-

परमस्थानेषु त्रिष्वपि पर्याप्तं परमप्राप्यत्वन्तु स्वप्राप्त्युत्तरकालप्राप्तव्यस्वोत्कृष्टत्वोभयसम्बन्धावच्छिन्नाधेयतासम्बन्धेन प्राप्यविशिष्टान्यप्राप्यत्वरूपम् । प्रोदीरितसम्बन्धेन प्राप्यविष्टिष्टप्राप्यत्वरूपमर्वाचीन प्राप्यत्वमेव च प्रतीकपदप्रवृत्तिनिमित्तमिहविवक्षितम् । परम्माप्यस्मात्तत्परसंपरमं च तत्प्राप्यञ्च परमप्राप्यमितिविग्रहे परमशब्दघटकपरशब्दस्योत्तरकालप्राप्तव्योत्कृष्टसमभिव्याहृतपदार्थतावच्छेद कावच्छिन्नपरतया यस्मात् प्राप्तादुत्तरकालप्राप्तव्योत्कृष्टप्राप्यवस्तु नास्ति तादृशं प्राप्यमित्यर्थ सिद्ध्यापरमप्राप्यशब्देन यथोक्तरूपावछिन्नोऽर्थः पर्यवसितो भवतीति बोध्यम् । स्थानविशेषस्य विशुद्धक्षेत्रज्ञस्वरूपस्य च प्राप्तिदशायां परमात्मनोऽपि पाप्तेरुत्तरकायप्राप्तव्यत्वाभावेनोक्तलक्षणं परमप्राप्यत्वं तयोरपि सम्भवत्येव । तथा च परमप्राप्यादर्वाचीनत्वरूपं प्रतीकत्वं प्रकृतिवियुक्तप्रत्यगात्मव्यावृत्तमेवज्ञेयम् । तेन पञ्चाग्निविदो न प्रतीकालम्बना भवन्ति । अथेदानीं प्रतीकालम्वनपदार्थौ विचार्यते। तत्त्वं ाह न तावत् स्वप्राप्तिप्रयोजकस्वनिंष्ठविलक्षणविषयतानिरूपकत्वसम्बन्धेन प्रतीक विशिष्टोपासनाश्रयत्वं सर्वेषां ब्रह्मविदां प्रतीकालम्बनत्वापत्तेः । किन्तु ब्रह्म प्राप्त्यभावविशिष्टस्वप्राप्ति प्रयोजकस्वनिष्ठविलक्षणविषयतानिरूपकत्वसम्बन्धेन प्रतीकविशिष्टोपासनाश्रयत्वमेव तद् विवक्षितं तद्देकप्राप्तिप्रयोजकतन्निष्ठविलक्षणविषयताशाल्युपासनाश्रयत्वस्यैव तदालम्बनत्वरूपत्वात् । स्वप्राप्तौ प्राप्त्यभाववैशिष्टयञ्च समानकालिकत्वसामानाधिकरण्योभयसम्बन्धेन एवञ्च सति पञ्चाग्निविदां न प्रतिकालम्बनत्वप्रसङ्गः । ब्रह्मप्राप्त्यन्तः पातितयैवप्रकृतिविनिर्मुक्तप्रत्यगात्मप्राप्तेस्तदीयविद्याफलत्वात्तदर्थमेव तदीयविद्यायास्तत्क्रतुन्यायेन ब्रह्मात्मकत्वेन प्रकृतिविनिर्मुक्तप्रत्यगात्मोपासनरूपतयाशिक्षणात् । ब्रह्मविदांतुमुक्तिदशायां ब्रह्मप्राप्तौ विद्यमानायामेवतदन्तः पातितया प्रतीकपदार्थप्राप्तेर्विद्यमानतया न प्रतीकालम्बनत्वमिति तत्त्वम् । तदयं निर्गलितोऽर्थः 'स्ववृत्तिविषयतानिरूपकत्व, स्वकार्यविषयकत्व, स्वसंसृष्टचिन्निष्ठविषयतानिरूपकत्वैतदन्यतमसम्बन्धेन प्रकृतिविशिष्टोपासनाविषयत्वपर्यवसितमेवार्वाचीनप्राप्त्वरूपं प्रतीकपदप्रवृत्तिनिमित्तम् । एतादृशप्रतीकालम्बनानामर्चिरादिमार्गेण गतिर्न शास्त्रसम्मता यतोहि सिद्धान्तसूत्रस्थाप्रतींकालम्वनानित्यत्रोपासकपदमनुच्चार्य तत्रालम्बनपदं प्रयुञ्जानस्यबादरायणमहर्षेरयमाशयो यत् प्राप्यतयाप्रतीकमुद्दिश्य ये प्रतीकोपासकास्ते सर्वेऽपि प्रतीकालम्बनपदेनोच्यन्ते । तथा च नामादिकं वस्तुमाणवकेऽग्निदृष्टिवद् ब्रह्मदृष्ट्यास्वरूपेण वा तद्वस्तूपासका हि ते तादृशानर्चिरादिगणो नैव ब्रह्मलोकं नयतींत्यर्थः । प्रतीकोपासकव्यतिरिक्तान् गत्यव्यवधानेन ब्रह्मप्राप्तिरूपं फलमुपलिप्सवो येऽधिकारिणस्तादृशाक्षेप्यं फलं लब्धु तत्परास्तानेवार्चिरादिरातिवाहिकगणोनयति । चतुर्मुखादिकार्योपासकानां नामादिप्रतीकोपासकवत्प्रतीकालम्बनत्वान्न तेषांदेवयानेन गतिरुपपद्यते । प्रतीकोपासकानां फलन्तु 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति । (छा० ७/१/५) इत्यादिरूपेण छान्दोग्ये स्पष्टमेवाम्नातम् । पञ्चाग्निविदां दहरादिविद्यावतां साक्षाद्ब्रह्मोपासकानाञ्च 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तपइत्युपासते तेर्चिषमभिसम्भवन्ति, (छा० ५।) इत्यर्चिरादिनाऽपुनरावृत्तिलक्षणागतिराम्नायते ।

एवञ्चात्र स्वनिष्ठविषयतानिरूपकत्वस्वविशिष्टवस्तुविपयकत्वाभ्यां सम्बन्धाभ्यां प्रकृतिवियुक्तात्मविशिष्टोपासनाश्रयत्वमेवानावृत्तिविशेषप्रयोजकतावच्छेदकं निष्पद्यते ।

सम्बन्धघटकवैशिष्ट्यञ्चस्वशरीरकब्रह्माभिन्नत्वस्वकर्मकब्रह्मात्मकत्वानुसंधानवत्वैतदन्यतरसम्बन्धेनग्राह्यम् । एतादृशोपासनाशालिनांपुनरावृत्तिर्नहिशास्त्रसम्मतेति निर्णयः । पञ्चाग्निविदोऽपि यद्यचिद्विशिष्टमेव प्रत्यगात्मानं प्राप्यतयोपासीरंस्तर्हितत्क्रतुन्यायेन नस्यात् तेषां ब्रह्मप्राप्तिरनावृत्तिश्च । तत्क्रतुन्यायश्च अथखलुक्रतुमयः पुरुषोयथाक्रतुरस्मिन् पुरुषो भवति तथेतःप्रेत्य भवति, (छा३।१४।१। तं यथायथोपासतेतथैव भवतीति द्वाभ्यां श्रुतिभ्यां तथोपासीनस्तथैव प्राप्नोतीत्येवंरूपः । एतन्न्यायबलेनानुपासितस्य ब्रह्मणः प्राप्त्ययोगात् । क्षरणस्वभावाच्चिन्मिश्रप्रत्यगात्मोपासनेनतस्यैव प्राप्तिस्तस्य च विनाशशीलत्वेन पुनरावृत्तिरवश्यम्भाविनीत्यतः पञ्चाग्निविदःप्रकृतिवियुक्तब्रह्मात्मकत्वेनप्रत्यगात्मानमेवोपासते । क्षेत्रज्ञस्यब्रह्मात्मकत्वन्तु 'यस्यात्माशरीरमित्याद्यनेकश्रुतिभिरवगतमेव । तस्मात् पञ्चाग्निविदांदेवयानगतिपुनरावृत्तिश्चसिद्ध्यत एव । ननु सर्वगतस्यब्रह्मणःक्वचिल्लोकविशेषोनोपपद्यते न वा तस्य सभावेश्मादिकंयतस्तत्रतदुपासकस्यगतिरूपपद्यतां न वा निर्धूतनिखिलाविद्यः पुमान् लोकविशेषस्थैश्वर्यंकामयेत् । तथाविधैश्वर्यप्राप्तिरेवमोक्षश्चेत् तस्य विनश्वरत्वेन मोक्षस्याप्यनित्यत्वमापद्येत । तस्मान्निर्गुणब्रह्मविदस्तुनार्चिरादिनादेशान्तरेगतिरस्तीतिचेन्न, श्रुतिशतप्रतिपादितार्चिरादिनामार्गेणदेशांतरंगत्वैव ब्रह्मप्राप्तिरितिश्रौतनिश्चयेऽत्रैव निशेषाविद्यानिवृत्ताविहैव च मुक्तिरितिकुतर्कोपबृंहितस्यत्वन्मतस्याप्रामाणिकत्वात् । न हि तर्कशतमेकामपि श्रुतिंबाधितुं प्रभवति लोके यथा वह्नेरौष्ण्यं सलिलस्य च शैत्यं वचादीनांधियोवर्धकत्वंतुण्ड्यादीनाञ्च तन्नाशकत्वमित्यसकृत्तत्तद्भावस्वभावोविलक्षणशक्तिमत्वेनानुभूयते । तथैव प्राकृतिकजगतिकर्मवासनाख्याविद्याजननशक्तिः परमव्योमाख्यदेशविशेषस्यतादृशाविद्यानिवर्तनशक्तिश्चनापह्नवमर्हतः । स्वाभाविकविचित्रभावशक्तयस्तर्केणाशक्यनिह्नवा इति निश्चिनोति ।

भगवान् पराशरः "शक्तयःसर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तुसर्गाद्याभावशक्तयः । भवन्ति तपतां श्रेष्ठ? पावकस्य यथोष्णता" इति । अपि च श्रुतिसचिवस्तर्कोऽप्यत्र प्रामाण्यमासादयति यथा पंकोपलिप्ताङ्गं न हि पंकिलाम्भस्यवस्थितंनिर्मलमपिजलंक्षालयितुं क्षमते तथा ह्याविद्यिकप्रकृतिमण्डलेऽविद्याख्यमलस्तोमं तिरस्कर्तुं न पार्यते विद्याबाहुल्येनापि । तदत्र यथा पंकोपलिप्तंवस्तुकश्चिच्चतुरोनिष्पङ्कंप्रदेशं प्रसन्नसलिलतीर्थंवाऽऽनीयप्रक्षाल्यनिर्मलीकरोति तथाऽत्रापिस्वभक्तानुकम्पाकूपारो भगवान् भक्तोपासनयाऽनुग्रहाविष्टउपासकानातिवाहिकगणैरर्चिरादिभिः प्राकृतलोकेभ्यः ऊर्ध्वं प्राकृतसम्बन्धविधुरंदेशविशेषमानीयसमस्ताविद्याकल्मषं प्रक्षाल्यस्वात्मानंप्रापयतीति विदुषां ब्रह्मावाप्तयेऽवश्यमेवगतिरुपपद्यते । समस्ताविद्यानिवृत्तिभूमयोऽप्राकृतादेशविशेषाः परमात्मनः श्रुतिस्मृतिप्रतिपादिताः सन्त्येव । तथा च श्रुतयः 'दिव्ये ब्रह्मपुरे ह्येपः व्योम्न्यात्माप्रतिष्ठितः, (मु.२।२७) 'आदित्यवर्णंतमसःपरस्तात्, (पु. सू.) क्षयन्तमस्यरजसःपराके,

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, इत्याद्यःशतशस्तल्लोकमामनन्ति। श्रुतिप्रतिपन्नेऽर्थेयथाश्रुतिविचारस्यैवन्याय्यत्वादन्यथाशास्त्रकप्रमाणकस्यब्रह्मणोऽपितर्कबलेनापलापप्रसंगात्। न चैवमुत्तरमीमांसायाःकार्याधिकरणस्य का गतिरितिवाच्यम्। कार्याधिकरणीयाद्ययोर्बादरिजैमिनिपक्षयोः पूर्वपक्षतयावस्थाप्यभगवताबादरायणेनाप्रतीकालम्बनान्नयतीत्यादिसूत्रद्वयेनसैद्धान्तिकस्यस्वाभिप्रायस्य स्पष्टं प्रतिपादितत्वात्।

तथाहि— कार्यं बादरिरस्यगत्युपपत्तेरितिचतुर्मुखादिरूपकार्यब्रह्मोपासकानातिवाहिकगणो हिरण्यगर्भलोकमेवनयतीति बादरिमतमयुक्तंबहुषूपनिषत्सुब्रह्मविद्याप्रकरणेश्रूयमाणायाअर्चिरादिगतेः परब्रह्मप्राप्तिहेतुतयैव तत्रतत्रसमाम्नानात्। तादृशश्रुतीनामपरब्रह्मविषयत्वेदहराद्यनेकविद्याविरोधात्। सर्वगतस्यापिंब्रह्मणोगतिशास्त्रबलसिद्धस्यदेशविशेष एव निःशेषाविद्यानिवृत्तिसम्भवस्यदुरपह्नवतया तंविना प्राप्तेरयुक्तत्वेनमार्गविशेषेणदेशविशेषगतिपूर्वकप्राप्तेरेवयुक्तत्वात्। तस्य च बादरिमतस्यजैमिनिनैवनिराकृतत्वात्तन्मतमत्र न प्रपञ्च्यते। उभयमतयोर्दोषमुद्भाव्याप्रतीकालम्बनान्नयतीति बादरायणस्यमहर्षेः सिद्धान्तः समुज्जृम्भते। इदं पुना रहस्यं यद्यपि कार्याधिकरणेऽपिदेवयानमार्गगामिनां पुनरावृत्तिस्तुक्वापि नोदीरिता न वा तत्प्रमाणभूतासूपनिषत्सु तथाऽप्यत्रमधुसूदनेन तट्टीकायाम्पुनरावृत्तिःप्रतिपाद्यत इति चित्रमतस्तन्मतं वेदानुसारिभिरनादरणीयमिति संक्षेपः। विस्तरस्तुअस्मद्गुरूपनिवद्धपरमगतिमीमांसायाष्टीकायांमत्प्रणीतायांद्रष्टव्यः ॥२३॥

श्रीसीतारामाभ्यां नमः

प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीता

प्रमाणदीपिका

(स्वशताब्दीमहोत्सवे श्रीहर्यानन्दाचार्योपदिष्टः प्रबन्धः)

रामं सीतां तथाचार्यं श्रियानन्दं प्रणम्य च। प्रमाणानां प्रकाशाय कुर्वे प्रमाणदीपिकाम् ॥१॥

* अथ प्रत्यक्षप्रमाणमयूखः *

चिदचिदीशतत्त्वानां ज्ञानं प्रामाणिकं च यत्। मोक्षस्य साधनं तद्धि 'भोक्ता भोग्यमि'तिश्रुतेः ॥२॥
प्रमायाः कारणं तत्र प्रमाणं सम्मतं बुधैः। अबाधव्यवहारस्यानुगुणा तु मतिः प्रमा ॥३॥
करणं चावगन्तव्यं व्यापारशालि कारणम्। त्रिधा प्रमाणमध्यक्षानुमानशब्दभेदतः ॥४॥
सम्भवस्योपमानस्य चार्थापत्तेस्तथैव हि। अन्तर्भावोनुऽमाने तु तत्त्वज्ञैरुररीकृतः ॥५॥
ऐतिह्यमाप्तमूलं यच्छब्दे चान्तर्भवत्यदः। अनुमानाङ्गतर्कस्य मन्यते स्वाङ्गिरूपता ॥६॥
भावान्तरेण चंभावप्रतीतिरुपपद्यते। अभावाख्यः पदार्थश्चातिरिक्तो मन्यते न तत् ॥७॥
अतिरिक्तं प्रमाणं तन्नानुपलब्धिनामकम्। अभावसाधकत्वेन प्रमाणज्ञैर्हि मन्यते ॥८॥
अनुमाध्यक्षशाब्दीतिभेदात् त्रिधा मता प्रमा। ज्ञानाकरणकं ज्ञानं प्रत्यक्षत्वेन सम्मतम् ॥९॥
प्रत्यक्षं द्विविधं चाथ तत्राद्यं निर्विकल्पकम्। अनेकवृत्तिजात्याद्यविषया शेमुषी च तत् ॥१०॥

प्रत्यक्षं चापरं प्रोक्तं विद्वद्भिः सविकल्पकम् । अनेकवृत्तिजात्यादिविषया शेमुषी च तत् ॥११॥
प्रत्यक्ष द्विविधं चैतद् द्वैविध्यं च गतं पुनः । अर्वाचीनमथानर्वाचीनञ्चेतिविभेदतः ॥१२॥
एकमिन्द्रियसापेक्षमपरं तद्विलक्षणम् । स्वयंसिद्धं च दिव्यं च द्विविधमादिमं तथा ॥१३॥
योगजन्यं च तत्राद्यं परञ्चेशप्रसादजम् । प्रत्यक्षानुभवे तत्र करणमिन्द्रियं मतम् ॥१४॥
व्यापारस्तत्र संयोगः संयुक्ताश्रयणं तथा । अर्वाचीनेतरद् बोध्यं प्रत्यक्षमीशमुक्तयोः ॥१५॥
पूर्वानुभवतश्चात्र संस्कृतिरुपजायते । सदृशादृष्टचिन्ताद्यैरुद्बुद्धा संस्कृतिर्भवेत् ॥१६॥
उद्बुद्धसंस्कृतेर्जाता स्मृतिः प्रत्यक्षमेव हि । प्रतिभाप्रत्यभिज्ञे च प्रत्यक्षे एव सम्मते ॥१७॥
'यथार्थं सर्वविज्ञानमिति वेदविदां मतम् । शुक्तावपि हि रौप्यांशाः पञ्चीकरणतो मताः ॥१८॥
शुक्तिरौप्यमतेस्तस्मात् सत्यालम्बनता मता । शुक्तिरौप्यमतिर्भ्रान्ता रौप्यांशाल्पत्वहेतुतः ॥१९॥

इतिप्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीतायां प्रमाणदीपिकायां प्रत्यक्षप्रमाणनिरूपणाख्यः प्रथमो मयूखः ॥१॥

अथानुमानप्रमाणमयूखः

अनुमाकरणं चाथानुमानं परिकीर्तितम् । साधकतममेवात्र करणं प्राज्ञसम्मतम् ॥१॥
ततोलिङ्गपरामर्शोऽनुमायां करणं मतम् । व्याप्यस्य पक्षवृत्तित्वधीः परामर्शनामिका ॥२॥
तज्जा चानुमितिः पक्षे साध्यबुद्धिर्मता बुधैः । साध्याधारस्थता हेतौ व्याप्तिः प्राज्ञैः प्रकीर्तिता ॥३॥
साहचर्यस्य भूयिष्ठदर्शनाद् व्याप्तिधीर्भवेत् । तद्दर्शनं सपक्षे हि भवेन्निश्चितसाध्यके ॥४॥
साध्यशून्यो विपक्षश्च पक्षः सन्दिग्धसाध्यकः । अन्वयव्यतिरेकी हि हेतुश्च केवलान्वयी ॥५॥
यत्सत्त्वे खलु यत्सत्त्वमन्वयव्याप्तिरीरिता । यच्छून्यत्वं च यच्छून्येऽभावव्याप्तिर्हि साधने ॥६॥
अन्वयव्याप्तितश्चाथान्वयी हेतुर्बुधैर्मतः । अभावव्याप्तितो हेतुर्व्यतिरेकी समीरितः ॥७॥
सिद्धान्ते द्विविधश्चैव सद्धेतुर्बुधसम्मतः । केवलव्यतिरेकी तु सिद्धान्ते मन्यते न हि ।८॥
उभे चात्रानुमानाङ्गे व्याप्तिश्च पक्षधर्मता । द्वयोरन्यतरस्याथ विरहे हेतुदुष्टता ।९॥
व्यभिचारी विरुद्धोऽथासिद्धः सत्प्रतिपक्षकः । बाधितश्चेति पञ्चापि हेत्वाभासाः प्रकीर्त्तिताः १०॥
हेतुश्च व्यभिचारी हि स्वस्थानातिक्रमे भवेत् । स ह्यनैकान्तिकश्चाथ द्विविधः परिकीर्तितः ।११॥
विपक्षेऽपिस्थितश्चेत् स साधारणो मतस्तदा । बुधैः सपक्षमात्रस्थोऽसाधारण उदाहृतः ।१२॥
साध्याभावेन स व्याप्तो विरुद्धत्वेन सम्मतः । आदिमस्त्रिष्वसिद्धेष्वाश्रयासिद्धः समीरितः ।१३॥
पक्षश्च पक्षताऽवच्छेदकशून्यश्च तत्र हि । पक्षे च हेतुराहित्यं स्वरूपासिद्धता स्मृता ।१४॥
व्याप्यत्वासिद्धता चात्र द्विधा प्राज्ञैः समर्थिता । व्याप्तिग्राहकमानस्य शून्यत्वात् तत्र चादिमा ।१५॥
हेतावुपाधिसत्त्वाच्च द्वितीया सम्मता बुधैः । साध्यव्यापकतायाञ्च साधनाव्यापकत्वकम् ।१६॥
उपाधित्वेन सम्प्रोक्तं हेतोः परमदूषणम् । प्रतिपक्षस्य सत्त्वे तु हेतोः सत्प्रतिपक्षता ॥१७॥
यस्य प्रबलमानेन साध्याभावो विनिश्चितः । दार्शनिकैः स हेतुर्हिबाधितः सम्प्रकीर्तितः ।१८॥

अनुमानं द्विघा स्वार्थं परार्थं चेति भेदतः । स्वार्थेन स्वानुमा चात्र परार्थेन परानुमा ॥१९॥
न्यायजस्तु परामर्शः परानुमितिकारणम् । न्यायस्तत्र प्रतिज्ञाद्यवयवपञ्चकं मतः ॥२०॥
प्रतिज्ञा साध्यनिर्देशो हेतूक्तेर्हेतुता तथा । व्याप्तिनिर्देशपूर्वा हि दृष्टान्तोक्तिरुदाहृता ॥२१॥
व्याप्यस्य पक्षवृत्तित्वबोधश्चोपनयो मतः । निगमनं तु साध्यस्योपसंहारवचः खलु ॥२२॥
नैयायिका भवन्त्येतत्पञ्चावयववादिनः । वेदान्तिनो वदन्त्येष्वनुमासिद्धौ यथारुचि ॥२३॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीतायां प्रमाणदीपिकायामनुमानप्रमाण-निरूपणाख्यो द्वितीयो मयूखः ॥२॥

* अथ शब्दप्रमाणमयूखः *

अनाप्तानुक्तवाक्यस्य शब्दप्रमाणता मता । द्वारं पदार्थबुद्धिश्च शक्तिधीः सहकारिणी ॥१॥
वाक्यं पदसमूहश्च शक्तं पदतया मतम् । अभिधाख्या च शक्तिर्हि वेदस्यार्थावबोधिता ॥२॥
मुख्या वृत्तिः पदस्यार्थे सर्वं प्राज्ञैरुदीरिता । घटेत्युक्ते घटे चैवं शक्तिर्घटपदस्य हि ॥३॥
सम्बन्धोऽभिहितः प्राज्ञैर्वृत्तिः पदपदार्थयोः । मुख्यार्थस्य हि बाधे तु वृत्तिर्मतौपचारिकी ॥४॥
गौणी च लक्षणा चेति भेदात् सा द्विविधा पुन । शक्यस्य गुणवत्त्वेन त्वाद्या वृत्तिर्मता बुधैः ॥५॥
लक्षणा शक्यसम्बन्धः साऽन्वयानुपपत्तितः । जहदथाजहच्चेति द्विधा सा परिकीर्त्तिता ॥६॥
आकांक्षायोग्यताऽऽसत्तिमद् वाक्यं हि प्रमापकम् । प्रमाणमखिलो वेदः सिद्धे व्युत्पत्तिसम्भवात् ।७॥
भागद्वये हि वेदस्य कर्मब्रह्माभिधायकम् । तत्राद्ये कथितं कर्म ब्रह्माराधनलक्षणम् ॥८॥
शास्त्रे हि पूर्वमीमांसाऽऽख्येऽस्यशंकाः समाहिता । ब्रह्मणो वर्णितं चान्त्ये स्वरूपं च गुणादिकम् ।९॥
एतच्छङ्कासमाधानं मीमांसा चोत्तरा मता । मता मीमांसयोस्तस्मादुभयोरेकशास्त्रता ॥१०॥
विध्यर्थवादमन्त्रेतिभेदाद् वेदस्त्रिधा मतः । सम्मतस्तत्र विद्वद्भिर्विधिवाक्यं प्रवर्त्तकम् ॥११॥
विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥१२॥
इत्येवंहिविधिः प्राज्ञैस्त्रिविधः सम्प्रकीर्त्तितः । नित्यो नैमित्तिकः काम्यश्चापि भेदा विधेर्मताः ॥१३॥
प्रवृत्त्युत्तम्भकं वाक्यमर्थवादतया मतम् । मन्त्रत्वेन मतो वेदोऽनुष्ठेयार्थप्रकाशकः ॥१४॥
शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा । कल्पश्चेति षडङ्गानि वेदस्योक्तानि वैदिकैः ॥१५॥
पूर्वक्रमविशिष्टा हि वेदाश्चेशसमीरिताः । नित्या अपौरुषेयास्ते तस्माद् बुधैश्च सम्मताः ॥१६॥
नित्यो वेदश्च निर्दोषो वक्त्रभावाद्धि सम्मतः । प्रामाण्यं हि बुधैर्वेदे स्वीकृतं स्वत एव तत् ॥१७॥
स्मृत्यादेस्तु प्रमाणत्वं वेदमूलतया मतम् । शास्त्रं वेदविरुद्धं च नैव याति प्रमाणताम् ॥१८॥
देहस्य वाचकाः शब्दा प्रर्यवस्यन्ति देहिनि । सर्वशब्दकवाच्यस्तद् रामः सर्वशरीरकः ॥१९॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीतायां प्रमाणदीपिकायां शब्दप्रमाण निरूपणाख्यस्तृतीयो मयूखः ॥३॥

श्रियानन्दार्यशिष्येण हर्यानन्देन निर्मिता । प्रकाशिका प्रमाणानां भूयात् प्रमाणदीपिका ॥२०॥ 卐

मायावादिकुतर्कजाल[illegible] चैतन्याख्यानसम्मू[illegible]
यो व्याख्यासुधयात्रयीं भगवतीं सञ्जीवयन् [illegible]ते
तस्याचार्यशिरोमणेर्विजयिनो वादाहवे श्रीमतो
रामानन्दमुनेर्वचोऽखिलजगत्क्षेमाय सञ्जा[illegible]स ॥

जगद्गुरु
श्रीरामानन्दाचार्यजी